GOVERNMENT OF INDIA

ARCHÆOLOGICAL SURVEY OF INDIA

CENTRAL
ARCHÆOLOGICAL
LIBRARY

ACCESSION NO. 9045

CALL No. Sa8Kr/Val/K.V.

D.G.A. 79

OFFICE OF THE DIRECTOR GENERAL OF ARCHAEOLOGY
Library Regd No
INDIA.

SRIMAD VĀLMĪKI RĀMĀYAṆA

A CRITICAL EDITION

With the commentary of Sri Govindarāja

AND

Extracts from many other commentaries and Readings.

ĀRAṆYAKĀṆDA 3.

EDITED AND PUBLISHED BY

T. R. KRISHNACHARYA, T. R. VYASACHARYA &

T. R. SRINIVASACHARYA,

Proprietors, Madhva Vilâs Book Depot, Kumbakonam

D 3210 (le)

Sa8Kr
Vāl | K. V.

Printed by B. R. Ghanekâr for the proprietors,

at the "Nirnaya-sagar" Press, 23, Kolbhat Lane,

BOMBAY.

1911.

CENTRAL ARCHAEOLOGICAL
LIBRARY NEW DELHI
Acc. No. 9045
Date 24-7-57
Call No. Sa BKr
Vāl/K.V

(*Registered according to the Act XXV of 1867.*)

[All rights reserved by the publisher.]

॥ श्रीः ॥

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यानसमलंकृतम् ।

तथा

तिलकप्रभृत्यनेकापूर्वव्याख्यानोद्धृतैः
गोविन्दराजीयानुक्तापूर्वविषयैश्च संवलितम् ।



आरण्यकाण्डम् ३.

9945

9945

एतच्च

कुम्भघोणस्थेन श्रीमन्मध्वविलासपुस्तकालयाधिपतिना

टी. आर्. कृष्णाचार्येण टी. आर्. व्यासाचार्येण
टी. आर्. श्रीनिवासाचार्येण च

अनेकेषां विदुषां साहाय्येन नानादेशीयकोशानुसारेण

संशोध्य

मुंबापुर्यां

तुकाराम जावजी इत्येतेषां निर्णयसागरमुद्रणयन्त्रे मुद्रयित्वा प्रकाशितम् ।

शाके १८३३ विरोधकृन्नाम संवत्सरे ।

CENTRAL ARCHAEOLOGICAL
LIBRARY NEW DELHI
Acc. No. 9045
Date 24-7-87
Call No. 8.8 Kr
VEL/

इदं पुस्तकं १८६७ संख्याकराजनियमस्य २५ संख्याकविभागानुसारतो लेखारूढं
कृत्वाऽस्य सर्वेऽधिकाराः प्रसिद्धिकर्तृभिः स्वाधीना रक्षिताः ।

श्रीः

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यासमलंकृतम् ।

आरण्यकाण्डम् ३

श्रीरामचन्द्राय नमः ॥

प्रथमः सर्गः ॥ १ ॥

वाल्मीकिनादण्डकारण्यस्थतापसाश्रममण्डलवर्णनम् ॥ १ ॥ तत्रत्यैस्तापसैःस्वाश्रमप्रवेशिनांरामादीनांप्रत्युद्गममङ्गलाशासनपूर्वकमर्घ्यादिनापूजनम् ॥ २ ॥ तथारामंप्रतिसप्रशंसनंस्वरक्षणप्रार्थनपूर्वकंस्तुतिप्रणामादिनापरितोषणम् ॥ ३ ॥

प्रविश्य तु महारण्यं दण्डकारण्यमात्मवान् ॥ ददर्श रामो दुर्धर्षस्तापसाश्रममण्डलम् ॥ १ ॥
कुशचीरपरिक्षिप्तं ब्राह्म्या लक्ष्म्या समावृतम् ॥ यथा प्रदीप्तं दुर्दर्शं गगने सूर्यमण्डलम् ॥ २ ॥

श्रीरामचन्द्रायनमः ॥ वात्स्यश्रीशठकोपदेशिकवरश्रीपादरेण्वङ्घ्रिनैर्दृष्ट्या निर्मलया निरीक्ष्य बहुधा वल्मीकजन्माशयम् । श्रीमत्कौशिकवंशसागरमणिर्गोविन्दराजाह्वयो व्याचष्टेऽहमरण्यकाण्डमधुना पश्यन्तु निर्मत्सराः ॥ १ ॥ श्रीरामायणराजस्य दत्त्वा पीतांम्बरं महत् । अर्पये परया लक्ष्म्या राजन्तीं रत्नमेखलाम् ॥ २ ॥ एवं पूर्वस्मिन्काण्डे जगज्जन्मादिकारणस्य वेदान्तवेद्यस्य ब्रह्मणो निरस्तसमस्तविद्यत्वं नित्यानन्दपरिपूर्णत्वं निखिलान्तर्यामित्वं निरतिशयौज्ज्वल्यं निरुपमधर्मप्रवर्तकत्वमित्याद्यनन्तकल्याणगुणजातमुपवर्णितम् । संप्रति सज्जनसंरक्षणरूपं धर्मविशेषमभिधातुमारण्यकाण्डआरभ्यते । यद्वा पूर्वकाण्डे पितृवचनपरिपालनरूपो धर्मः सङ्क्षिरनुष्ठातव्य इति प्राधान्येन दर्शितम् । अथ सज्जनसंरक्षणरूपं धर्मविशेषं प्रतिपादयितुमारण्यकाण्ड आरभ्यते—प्रविश्येत्यादि । तुशब्दः पूर्वारण्यवैलक्षण्यं द्योतयति । महारण्यं इतरदुरवगाहं । दण्डकारण्यं दण्डकस्य राज्ञोरण्यं शुक्रशापादरण्यभूतं जनपदं । प्रविश्य । आत्मवान् धैर्यवान् । दुरवगाहमहागहनप्रवेशेप्यजनितभयलेश इत्यर्थः । तत्र हेतुमाह—दुर्धर्ष इति । हिंसादिभिरप्रधृष्य इत्यर्थः । रामः । तापसानां तपस्विनां आश्रममण्डलं आश्रमसमूहं । "तपोवने मठे ब्रह्मचर्यादावाश्रमोस्त्रियां" इति वाणः । ददर्श ॥ १ ॥ अभिगम्यत्वायाश्रममण्डलं वर्णयति—कुशेत्यादिभिस्सार्धसप्तश्लोकैः । कुशैः यज्ञार्थमाहृतैः चीरैः स्नानानन्तरमातपे परिशोषणार्थं क्षिप्तैर्वल्कलैश्च परिक्षिप्तं व्याप्तं । ब्रह्मवेदः तत्संबन्धिनी । वेदाध्ययनतदर्थानुष्ठानजन्येत्यर्थः । तया लक्ष्म्या श्रिया । समावृतं समन्तादावृतं । अत एव गगने प्रदीप्तं गगनमध्यस्थमित्यर्थः । दुर्दर्शं सूर्यमण्डलं यथा तथाऽवस्थितमित्यर्थः । तद्वद्रक्षोभिरनभिभवनीयं । उदयास्तमययोर्हि सूर्यस्य मन्देहाख्यरक्षोभिराक्रमणं नतु मध्याह्ने

श्रीरामचन्द्रायनमः ॥ ति० प्रविश्येति । ऋषिदर्शितवर्त्मनेतिशेषः ॥ दण्डकारण्यं प्रायेणमहाराष्ट्रदेशोऽयं ॥ दुर्धर्षमितिपाठे रक्षोयुतत्वादशक्यप्रवेशमित्यर्थः ॥ शि० तापसाश्रममण्डलं तापसानांपरमात्मविचारशीलानां आश्रममण्डलं पर्णशालासमूहं । स० आत्मवान् प्रशस्तचित्तः ॥ १ ॥ ती० ब्राह्मीलक्ष्मीः तपोजनिततेजोविशेषः । तयासमावृतत्वादेव गगनाधिकरणकसूर्यमण्डलवद्दुर्दर्शं रक्षोसुरादिभिर्द्रष्टुमप्यशक्यं ॥ शि० कुशचीराणि परिक्षिप्तानियस्मिंस्तं । कुशचीराणां परिक्षिप्तं परिक्षेपोवास्मिंस्तमितिवा ॥

[पा०] १ क. छ. ज्ञ. ञ. ट. रामोददर्श. २ ग. दुर्धर्षं. ३ च. घ. दुर्धर्षं.

शरणं सर्वभूतानां सुसंमृष्टाजिरं सदा ॥ मृगैर्बहुभिराकीर्णं पक्षिसङ्घैः समावृतम् ॥ ३ ॥
पूजितं च प्रनृत्तं च नित्यमप्सरसां गणैः ॥ विशालैरग्निशरणैः स्रुग्भाण्डैरजिनैः कुशैः ॥ ४ ॥
समिद्भिस्तोयकलशैः फलमूलैश्च शोभितम् ॥ आरण्यैश्च महावृक्षैः पुण्यैः स्वादुफलैर्वृतम् ॥ ५ ॥
बलिहोमार्चितं पुण्यं ब्रह्मघोषनिनादितम् ॥ पुष्पैर्वन्यैः परिक्षिप्तं पद्मिन्या च सपद्मया ॥ ६ ॥
फलमूलाशनैर्दान्तैश्चीरकृष्णाजिनाम्बरैः ॥ सूर्यवैश्वानराभैश्च पुराणैर्मुनिभिर्वृतम् ॥ ७ ॥
पुण्यैश्च नियताहारैः शोभितं परमर्षिभिः ॥ तद्ब्रह्मभवनप्रख्यं ब्रह्मघोषनिनादितम् ॥
ब्रह्मविद्भिर्महाभागैर्ब्राह्मणैरुपशोभितम् ॥ ८ ॥
स दृष्ट्वा राघवः श्रीमांस्तापसाश्रममण्डलम् ॥ अभ्यगच्छन्महातेजा विज्यं कृत्वा महद्धनुः ॥ ९ ॥
दिव्यज्ञानोपपन्नास्ते रामं दृष्ट्वा महर्षयः ॥ अभ्यगच्छंस्तथा प्रीता वैदेहीं च यशस्विनीम् ॥ १० ॥
ते तं सोममिवोद्यन्तं दृष्ट्वा वै धर्मचारिणः ॥ लक्ष्मणं चैव दृष्ट्वा तु वैदेहीं च यशस्विनीम् ॥
मङ्गलानि प्रयुञ्जानाः प्रत्यगृह्णन्दृढव्रताः ॥ ११ ॥

॥ २ ॥ अत एव शरण्यं शरणार्हं । "तदर्हति" इति यत्प्रत्ययः। सहजवैरप्रयुक्तवध्यघातुकभावाभावेन सर्वप्राणिनां वरणीयमित्यर्थः । रक्षोभ्यो भीतानां वासार्हं वा "शरणं गृहरक्षित्रोः" इत्यमरः । सदा सुसंमृष्टाजिरं सम्यक् संमृष्टाङ्गणं । "अङ्गणं चत्वराजिरे" इत्यमरः । सर्वभूतशरण्यत्वंप्रपञ्चयति मृगैरिति ॥ ३ ॥ प्रनृत्तं प्रकृष्टनृत्तवत् । अर्शआद्यच् बहुव्रीहिर्वा। अतिरमणीयप्रदेशत्वाद्देवतासान्निध्याद्वा नर्तनं । अत एव पूजितं । अग्निशरणैः अग्निहोत्रगृहैः । स्रुङ्मुखानि भाण्डानि यज्ञपात्राणि स्रुग्भाण्डानि "स्फ्यश्चकपालानि च" इत्याद्याम्नातानि तैः। "वणिङ्मूलधने पात्रे भाण्डं" इतिवैजयन्ती । कुशैः परिस्तरणार्थैः । कुशचीरेत्यत्र संगृहीतकुशोक्तिः ॥ ४ ॥ अरण्ये भवैः आरण्यैः ॥ ५ ॥ बलिभिः भूतबलिप्रभृतिभिः होमैर्वैश्वदेवादिहोमैश्च। अर्चितं सत्कृतं। ब्रह्मघोषैर्वेदघोषैः। निनादितं संजातनिनादं । पुष्पैः देवपूजार्थमुपक्षिप्तैः । सपद्मया पद्मसहितया। पद्मिन्या सरस्या ॥६॥ मुनिषु तारतम्यप्रदर्शनार्थं सूर्यवैश्वानराभैरित्युपमानद्वयं । पुराणैः वृद्धैः ॥ ७ ॥ परमर्षिभिः उक्तमुनीनामपि पूजनीयैः । तत् प्रसिद्धं । ब्रह्मभवनप्रख्यं ब्रह्मलोकतुल्यप्रसिद्धिकं ब्रह्मघोषैः कर्मकालिकवेदमन्त्रघोषैः । निनादितं । ब्रह्मविद्भिः परब्रह्मज्ञानिभिः । महाभागैः महाभाग्यैः। "भागो रूपार्थके प्रोक्तो भागधेयैकदेशयोः" इति विश्वः । एतादृशं तापसाश्रममण्डलं ददर्शेति पूर्वेणान्वयः ॥ ८ ॥ विज्यं विसृष्टमौर्वीकं । कृत्वा । विनीतवेषप्रवेश्यत्वादाश्रमाणामाश्रममृगपक्ष्यादिभयनिवृत्त्यर्थं च विज्यकरणं । अभ्यगच्छत् अभिमुखीभूयगतः ॥ ९ ॥ दिव्यं लोकविलक्षणं ज्ञानं तेन उपपन्ना युक्ताः । अतीतानागतज्ञानवन्त इत्यर्थः । रामोयं रावणवधार्थमवतीर्णो विष्णुः सीता लक्ष्मीः लक्ष्मणश्च तदंश इतिविज्ञाततदवतारहस्या इतियावत् ॥ १० ॥ ते तमित्यादिसार्धश्लोक एका-

स० ब्राह्म्यालक्ष्म्या ब्राह्मणसंबन्धिन्याशोभया वेदसंबन्धिन्यावा ॥ २ ॥ स० फलमूलैः उत्कृत्तकन्दैः । ञिफलाविशरणेकर्मणिघञ् । फलानिमूलानिचतैरितिवा ॥ ५ ॥ स० पद्मिन्या सरस्यापरिक्षिप्तं सरामः पद्मया रमारूपयासीतयासह ददर्शेत्यनेनान्वयः ॥ ६ ॥ ति० ब्रह्मविद्भिः सर्वत्रब्रह्मानन्यत्वज्ञानवद्भिः । ब्राह्मणैः उक्तलक्षणैरन्वर्थब्राह्मणैः । तादृशैर्युक्तत्वादेवब्रह्मभवनप्रख्यत्वमाश्रमस्य ॥ ८ ॥ स० तापसानामाश्रमे श्रमाभावविषये मण्डलीकृतंयत्तद्धनुः विज्यंकृत्वाऽभ्यगच्छदित्यन्वयः ॥ ९ ॥ स० पूर्वमेतन्निमित्तकरक्षोविक्षोभभिया त्यक्तचित्रकूटाः पुनाराममागतमवलोक्य न जहर्षिरेमहर्षयः किमित्यतोनेत्याह—महर्षयइति। नायंरूढोमहर्षिशब्दः किंतुयौगिकइत्याह—दिव्यज्ञानोपपन्नाइति । एतेन चित्रकूटेरामसहवासाननुमतिरत्रतदनुमतिश्च खरादिनिराकरणाहेतुस्थानत्वतत्स्थानत्वाभ्यामितिसूचयति ॥ १० ॥ तनि० प्रत्यगृह्णन् आत्मीयताकरणंप्रतिग्रहः ।

[पा०] १ क. ग. ङ.—ट. चोपनृत्तं. २ झ. पुण्यस्वादुफलैः. ३ घ. र्युतं. ४ च. छ. ज. घोषानुनादितं. क. घोषविनादितं. ५ ग. ङ. झ. ञ. ट. पुष्पैश्चान्यैः. छ. पुष्पैरन्यैः. ६ झ. ञ. ट. र्युतं. ७ च. छ. ज. विनादितं. ८ क. ख. ग. ङ.—ञ. ञ. तंदृष्ट्वा. झ. तद्दृष्ट्वा. ९ ङ. च. झ. ञ. ट. अभिजग्मुस्तदाप्रीताः. घ. अभ्यगच्छन्ततेप्रीताः. ग. अभ्यागच्छन्तसौमित्रिं. क. अभ्यागच्छंस्तदाप्रीत्या. १० घ. तपस्विनीं. ११ ङ झ. ञ. ट. तेतु. १२ क. ग. ङ.—ट. धर्मचारिणं. १३ क. दृष्ट्वावै.

रूपसंहननं लक्ष्मीं सौकुमार्यं सुवेषताम् ॥ ददृशुर्विस्मिताकारा रामस्य वनवासिनः ॥ १२ ॥
वैदेहीं लक्ष्मणं रामं नेत्रैरनिमिषैरिव ॥ आश्चर्यभूतान्ददृशुः सर्वे ते वनचारिणः ॥ १३ ॥
अत्रैनं हि महाभागाः सर्वभूतहिते रतम् ॥ अतिथिं पर्णशालायां राघवं संन्यवेशयन् ॥ १४ ॥
ततो रामस्य सत्कृत्य विधिना पावकोपमाः ॥ आजह्रुस्ते महाभागास्सलिलं धर्मचारिणः ॥
[मङ्गलानि प्रयुञ्जाना मुदा परमया युताः] ॥ १५ ॥

न्वयः । ते त्रिकालज्ञाः । तं राक्षसनिरासायावतीर्णं रामं । उद्यन्तं सोममिव स्थितं अन्धकारनिवर्तनप्रवृत्तं चन्द्रमिव स्थितं । यद्वा उद्यन्तं सोममिव प्रतिपच्चन्द्रमिवार्चनीयं । यद्वा वनराज्यन्तःप्रादुर्भवत्तया मेघावृतमिन्दुमिव स्थितं । धर्मचारिणो दृष्ट्वा स्वाचर्यमाणधर्माराध्यं साक्षात्कृत्य । यद्वा इतः पूर्वं धर्मवीर्येण पश्यन्ति संप्रति चक्षुषा साक्षात्कुर्वन्तीत्यर्थः । तथा लक्ष्मणं च वैदेहीं च दृष्ट्वा मङ्गलानि प्रयुञ्जानाः स्वापेक्षितरक्षाभ्यर्थनात्प्रागेव मङ्गलानि प्रयुञ्जानाः । रामस्य सौन्दर्यसौकुमार्यादिकंदृष्ट्वा रक्षोभूयिष्ठेच वने किं भविष्यतीति व्याकुलहृदयतया तस्मै विरोधिनिरसनवचनानि प्रयुञ्जानाः । दृढव्रताः अशिथिलतद्रक्ष्यत्वनियमाःसन्तः । प्रत्यगृह्णन् प्रतिगृहीतवन्तः । प्रत्युत्थानफलप्रदानाद्युपचारमकुर्वन्नित्यर्थः ॥ ११ ॥ मङ्गलाशासननिमित्तं सौन्दर्यसौकुमार्यादिकमाह—रूपेति । रूपस्य शरीरस्य संहननं "समः समविभक्ताङ्गः" इत्युक्तावयवसंस्थानविशेषं । लक्ष्मीं समुदायशोभां । सौकुमार्यं पुष्पहासतुल्यकोमलतां । सुवेषतां शोभनलावण्यवत्तां । लावण्यस्वरूपमुक्तम् "मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा । प्रतिभातियदङ्गेषुलावण्यंतदिहोच्यते" इति ॥ विस्मितानामाकारा इवाकारा येषां ते विस्मिताकाराः । विस्मयावेदकस्वमुखप्रसादफुल्लनेत्रत्वादियुक्ता इत्यर्थः । वनवासिनः विकारहेतौ सत्यप्यविकृतचित्ता इत्यर्थः । वनवासिनोपि विस्मिताकाराःसन्तः रामस्य रूपसंहननादिकं ददृशुः । अभेदेन प्रत्ययद्योतनार्थं चकाराप्रयोगः । यद्वा अभूषणेपि भूषितवद्भासमानत्वं रूपं । तथोक्तं "अङ्गान्यभूषितान्येव वलयाद्यैर्विभूषणैः । येनभूषितवद्भाति तद्रूपमितिकथ्यते" इतिसंहननं सौन्दर्यं तदप्युक्तं "अङ्गप्रत्यङ्गकानांयः सन्निवेशो यथोचितः । सुश्लिष्टसन्धिबन्धः स्यात्तत्सौन्दर्यमिहोच्यते" इति ॥ लक्ष्मीं लावण्यं तद्योक्तं पूर्वमेव । सौकुमार्यमप्युक्तमेव । सुवेषतां उचितशृङ्गारसंपन्नत्वं ॥ १२ ॥ एतं न्यायं सीतालक्ष्मणयोरप्यतिदेष्टुमाह—वैदेहीमिति । सर्वे वनचारिणः । आश्चर्यभूतान् अदृष्टपूर्वतया आश्चर्यावहान् वैदेहीं लक्ष्मणं रामं च दिव्यरूपदर्शनजनितानन्दभङ्गभीरुतया विस्मयविस्फारितेक्षणतया च सर्वथा निर्निमेषैरिव स्थितैर्नेत्रैरुपलक्षिताः सन्तः ददृशुः । अनेन पूर्वश्लोके विस्मिताकारा इत्येतद्विवृतम् ॥ १३ ॥ अत्र आश्रममण्डले । महाभागाः महाभाग्या ऋषयः । सर्वभूतहिते रतं । अतिथिं न्यायतः पूजार्हं । एनं राघवं । पर्णशालायां स्वस्वपर्णशालायां संन्यवेशयन् स्थापयामासुः ॥ १४ ॥ रामस्य सत्कृत्येति षष्ठ्यर्थी । "नलोकाव्ययनिष्ठा" इत्यादिना निषेधात् । सत्कृत्य सत्कारंकृत्वा कुशलप्रश्नादिकं कृत्वेत्यर्थः । पावकोपमा इत्यनेन रामस्य पवित्राणां पवित्रत्वमुक्तं धर्मचारिण इत्यनेन सत्कारस्य धर्माचरणफलत्वमुक्तं । महाभागा इति सुकृतपरिपाक उच्यते । सलिलं

" निसृष्टात्मासुकृत्सुच " इतिवक्ष्यति । स० उद्यन्तंसोमंचन्द्रमिव । एतेन स्वराजदर्शनेनेव महर्षीणांहर्षोक्तोक्ष्यते । " सोमो वैब्राह्मणानांराजा " इतिश्रुतेः । यद्वा सोमं उमयासहितं रुद्रमिवोद्यन्तंलक्ष्मणमित्युत्तरत्रापिसंबध्यते । उभयोरशेषरुद्रयोस्साम्यादितिभावः ॥ ती० तंराममेव स्वेष्टदेवतालेन प्रत्यगृह्णन् स्वीचक्रुरित्यर्थः ॥ ११ ॥ स० सुवेषतां सुशोभनोवेषः कृत्रिमतापसाकारता यस्य तस्यभावस्सुवेषता तां । वनवासिनइतिषष्ठ्यन्तं रामविशेषणं । प्रथमाबहुवचनान्तमृषिविशेषणं ॥ १२ ॥ तनि० नेत्रैरनिमिषैरिव जगन्मोहनदिव्यमङ्गलविग्रहदर्शनानन्दविच्छेदभयेन निमेषरहितैर्नेत्रैः । इवशब्दोवाक्यालङ्कारे । अनिमिषत्वे हेतुमाह—आश्चर्यभूतानिति । ती० वनचारिणः पशुपक्षिमृगादयः । अयंभावः पद्मभवप्रमुखानामप्यगोचरोभगवान्सीता-

[पा०]१ ग. च. छ. ज. आश्चर्यभूताः. २ ग. सर्वेच. ३ क. ङ.—झ. ञ. वनवासिनः. ४ ख. च. ज. अत्रैवं. छ. तत्रैनं. ५ ट. सर्वेभूत. ६ क.—ज. रताः. ७ क. च. छ. ज. ञ. रामंसुसत्कृत्य. ८ ख. प्रजह्रुः. ९ क. ट. ब्रह्मचारिणः. १० इदमर्धं क. ङ.—ट. पाठेषुदृश्यते.

मूलं पुष्पं फलं वन्यमाश्रमं च महात्मनः ॥ निवेदयित्वा धर्मज्ञास्ततः प्राञ्जलयोऽब्रुवन् ॥ १६ ॥
धर्मपालो जनस्यास्य शरण्यस्त्वं महायशः ॥ पूजनीयश्च मान्यश्च राजा दण्डधरो गुरुः ॥ १७ ॥
इन्द्रस्येह चतुर्भागः प्रजा रक्षति राघव ॥ राजा तस्माद्वरान्भोगान्भुङ्क्ते लोकनमस्कृतः ॥ १८ ॥
ते वयं भवता रक्ष्या भवद्विषयवासिनः ॥ नगरस्थो वनस्थो वा त्वं नो राजा जनेश्वरः ॥ १९ ॥
न्यस्तदण्डा वयं राजञ्जितक्रोधा जितेन्द्रियाः ॥ रक्षितव्यास्त्वया शश्वद्धर्मभूतास्तपोधनाः ॥ २० ॥

अर्घ्यादयुचितं आजह्रुः ॥ १५ ॥ धर्मज्ञाः शेषिणि शेषवृत्तिरूपधर्मज्ञाः । प्राञ्जलयः प्रकृष्टाञ्जलयः । मूर्ध्नि कृताञ्जलय इत्यर्थः । महात्मनः शेषिणो रामस्य । वन्यंमूलादिकं आश्रमं च । निवेदयित्वा इमानि भवदीयानि यथेष्टं विनियुङ्क्ष्वेति निवेद्य । ततोऽब्रुवन् ॥ १६ ॥ धर्मपालः वर्णाश्रमधर्मपालकः । अस्य आर्तस्य मुनिजनस्य । शरण्यः शरणार्हः । पूजनीयश्च देवताबुद्ध्या अर्चनार्हः । मान्यः राजबुद्ध्या बहुमानार्हः । मान्यत्वेहेतुः—राजा दण्डधर इति । दण्डस्य निग्रहस्य धरः कर्ता । पूजनीयत्वे हेतुः—गुरुरिति ॥१७॥पूज्यत्वे हेत्वन्तरमाह—इन्द्रस्येहेति । इह भूस्वर्गे। इन्द्रस्य चतुर्भागः चतुर्थांशः । राजा प्रजा रक्षति । तस्मात्हेतोः । वरान् श्रेष्ठान् भोगान् भुङ्क्ते अनुभवति । इन्द्रस्येति लोकपालान्तराणामुपलक्षणं । "अष्टाभिर्लोकपालानां मात्राभिः कल्पितो नृपः" इति वचनात् । वस्तुतस्तु इन्द्रशब्दोयं परमात्मपरः । इदि परमैश्वर्ये इतिधातोस्तत्रैव मुख्यवृत्तित्वात् "इन्द्रो मायाभिः पुरुरूपईयते" इति श्रौतप्रयोगाच्च । इन्द्रस्य परमात्मनः । चतुर्भागः चतुर्थांशः । तदवतारभूते व्यक्तिचतुष्टये एकव्यक्तिभूतो भवान्भोगान्भुङ्क्ते इत्यर्थः । पूर्वापरश्लोकानुगुण्याच्चायमेवार्थः । नह्यन्यस्मै ऋषयः प्राञ्जलयो भवन्ति नचाश्रमं निवेदयन्ति नापिगर्भभूतत्वं वदन्ति ॥ १८ ॥ भवता रक्ष्यत्वे स्वदेशवासित्वमेव निष्प्रमादोहेतुः नोपासनादिकमित्याहुः—ते वयमिति । तेवयं आर्ता वयं । भवता रक्ष्याः । आर्तरक्षणदीक्षितेन त्वया रक्षितुमर्हाः । किमुपासनबलेनैवमुच्यते नेत्याहुः—भवद्विषयवासिन इति । भवद्देशवासित्वमेव भवद्रक्ष्यत्वेहेतुः नान्यः । तत्र प्रमादादिसंभवात् देशवासित्वे तदभावादिति भावः । भवतु तथैव रक्षिष्यामः यदारक्षणप्रदेशे स्थास्याम इत्यत्राहुः—नगरस्थ इति । नगरस्थः सिंहासनस्थो वा । वनस्थः तद्रहितो वा । त्वं स्वतःसिद्धसर्वशक्तिकः निरुपाधिकसर्वेशेषी च त्वं । नः अस्माकं राजारक्षकः । तत्रहेतुः—जनेश्वर इति । निरुपाधिकसर्वशेषीत्यर्थः ॥१९॥ ननु भवन्त एव तपःप्रभावेन स्वरक्षणक्षमा इत्यत्राहुः—न्यस्तेति । न्यस्तः त्यक्तो दण्डो यैस्ते न्यस्तदण्डाः । शापतो निग्र-

लक्ष्मणोपेतः श्रीरामः पद्मपरिगृह्यप्रवाहवदस्माकमपिपुरतः प्रादुरासीदिति मृगादयोप्यार्षयुता वदन्तुरित्यर्थः ॥ १३ ॥ तनि० आत्मीयभरसमर्पणमत्रोच्यते ॥ स० निवेदयित्वा सर्वतावकमित्युक्त्वा । प्राञ्जलयः बद्धाञ्जलयः । क्षत्रियंप्रत्यपि विदितस्वरूपाणामृषीणामञ्जलिबन्धउचित इतिनात्यौचिती ॥ १६ ॥ शि० धर्मपालः परमधर्मैरक्षकः अतएव अस्य एतल्लोकस्थस्यजनस्य इन्द्रस्य तदुपलक्षितोधर्मैर्लोकस्थस्यच ब्रह्मादिश्रेष्ठस्यवा शरण्यः शरणेहितः अतएव महायशाः समातिशयरहितयशोविशिष्टः ॥१७॥ शि० चतुर्भागः चतुर्णां अर्थधर्मकाममोक्षाणांभागः आश्रितकर्तृकसेवा यस्मात्स ॥ १८ ॥ ति० भवद्विषयवासिनइति । विषयोदेशः । सार्वभौमलाद्दण्डकारण्यमपि तद्देशएवेतिभावः । विष्णवतारत्वात्सर्वोदेशस्तवैवेतिगूढोऽभिप्रायः । स० यद्वा भवद्विषये वासिनः स्वरूपविषयध्यानयुक्ता ॥ तनि० ते पूर्वोक्तप्रकारेणात्मीयभरसमर्पकाः । वयं उपायशून्यत्वात्पापबहुलत्वादिमन्तः । भवता निरुपाधिकसर्वलोकशरण्येन रक्ष्याः । अतिप्रसङ्गपरिहार यमाह—भवद्विषयवासिनइति । भवद्विषयवासित्वात् साकेतसंभवचराचरजन्तुन्यायेन प्रपत्तिनिरपेक्षमेव रक्षणमित्येक पक्षः । पूर्वोत्तरश्लोकपर्यालोचनया प्रपत्तिद्वारकमित्यन्यः पक्षः । नच पूर्वकृतात्मात्मीयरक्षाभरसमर्पणेनैव प्रयोजनेसिद्धे विषयवासित्वकथनं व्यर्थमितिशङ्क्यं । रक्षकेपदयति तत्संनिधाने रक्ष्यविनाशस्यदोषभूयस्त्वकथनात्फलात् विषयवासित्वस्यनिरपेक्षहेतुत्वनिर्बन्धेपि मोक्षव्यतिरिक्तरक्षणोपायस्याविरोधात् । मद्यत्र महर्षयो मोक्षापेक्षयोपायानुष्ठानंचक्रु किंतु दुष्टराक्षसनिरसनापेक्षया । नगरस्थोवनस्थोवेति इतरे मूर्धाभिषिक्ताः बुद्धि-

[पा०] १ क. पुष्पंमूलं. ब. पुष्पमूलफलंरम्यं ङ. ञ. ट. पुष्पमूलफलंसदं. २ घ. महात्मने. ३ ङ च. ञ. ट. हेतुप्राञ्जलयः. ४ ङ. ञ. ट. शरण्यश्च. ख. ग. शरणंच. ५ क. ब.—ट. इन्द्रस्यैव. ६ ङ. ञ. ट. न्भोगान्भ्यान्भुङ्क्तेनमस्कृतः. क. ख. ग. ङ. ञ. भोगानश्नान्भुङ्क्तेनमस्कृतः ७ ङ. ञ. ट. रक्षणीयाः.

एवमुक्त्वा फलैर्मूलैः पुष्पैर्वन्यैश्च राघवम् ॥ अन्यैश्च विविधाहारैः सलक्ष्मणमपूजयन् ॥ २१ ॥
तथान्ये तापसाः सिद्धा रामं वैश्वानरोपमाः ॥ न्यायवृत्ता यथान्यायं तर्पयामासुरीश्वरम् ॥ २२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे प्रथमः सर्गः ॥ १ ॥

द्वितीयः सर्गः ॥ २ ॥

मुनिकृतातिथ्यस्वीकारपूर्वकंसीतालक्ष्मणाभ्यांसहवनमध्यंप्रविष्टवतारामेणतत्रविराधाख्यघोरराक्षसदर्शनम् ॥ १ ॥ विराधेनसीतापहरणपूर्वकंराघवौप्रतिसगर्हणंतद्वधप्रतिज्ञानम् ॥ २ ॥ सीतायास्तादृशावस्थादर्शनेनकैकेय्युपालंभगर्भवचनोक्तिपूर्वकंशोचन्तंरामप्रतिलक्ष्मणेनससान्त्वनंविराधवधप्रतिज्ञानम् ॥ ३ ॥

कृतातिथ्योथ रामस्तु सूर्यस्योदयनं प्रति ॥ आमन्त्र्य स मुनीन्सर्वान्वनमेवान्वगाहत ॥ १ ॥

हकरणरहिताइत्यर्थः । तत्रहेतुः—जितक्रोधा इति । तपोनाशभीत्या त्यक्तक्रोधा इत्यर्थः । तत्रापि हेतुः—जितेन्द्रिया इति । इन्द्रियजयेन कामाद्यभिष्वङ्गाभावात्तन्मूलक्रोधरहिता इत्यर्थः । वस्तुतस्तु स्वसामर्थ्ये सत्यपि स्वरूपविरोधान्नास्माभिरस्मद्रक्षणमुचितमित्याहुः । त्वया रक्षितव्या इति । अनन्यार्हशरणा इत्यर्थः । गर्भभूताः प्रजातुल्याः । अनेनानन्यार्हशेषत्वमुक्तं । शश्वदिति काकाक्षिन्यायेनोभयत्राप्यन्वेति । तेनानन्यार्हशेषत्वानन्यशरणत्वयोस्स्वाभाविकत्वमुक्तं तथापि साधनं विना रक्षणेऽतिप्रसङ्गस्स्यादित्यत्राहुः । तपोधना इति । तपोत्र न्यासनिक्षेपापरपर्यायः "तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः" इति श्रुतेः प्रपत्त्येकधनावयमित्यर्थः । अस्मत्कृतां प्रपत्तिं व्याजीकृत्यास्मान्रक्षेत्यर्थः । रक्षणमत्र मोक्षप्रापणमेव । खरादिभ्यस्त्राणस्य शरभङ्गाश्रमवासिभिर्वक्ष्यमाणत्वात् । इमे तु मुनयो मोक्षैकपराः ॥ २० ॥ अतस्तेषां प्रपन्नानां यथोचितकैङ्कर्यप्रवृत्तिं दर्शयति—एवमित्यादि । ऋषयः एवमुक्त्वा सलक्ष्मणंराघवं । वन्यैः पुष्पैः फलादिभिश्चापूजयन् । राघवमित्यनेन सीतापूजनमप्यर्थसिद्धं । मिथुनशेषित्वस्यैव स्वरूपत्वात् । प्रभाप्रभावन्यायेन तयोरपृथग्भावात् । अन्यैः संकल्पसिद्धैः । विविधाहारैः मृष्टान्नादिभिः ॥ २१ ॥ सिद्धाःसिद्धसाधननिष्ठाः । न्यायवृत्ताः न्ययानुगुणव्यापाराः । स्वरूपानुरूपकैङ्कर्यवृत्तयइत्यर्थः । वैश्वानरोपमाः अस्पृष्टविरोधिनः स्वरूपविरुद्धनिषिद्धकाम्यकर्मान्तरत्यागिन इत्यर्थः । अन्ये पूर्वेभ्यो विलक्षणाः । तापसाः कायिककैङ्कर्याशक्ता इत्यर्थः । ईश्वरं परमशेषिणं रामं । यथान्यायं यथोचितं । स्तुतिप्रणामादिभिस्तर्पयामासुरित्यर्थः ॥२२॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने प्रथमः सर्गः ॥ १ ॥

एवं प्रथमसर्गेण सिद्धसाधननिष्ठानां मुमुक्षूणां मुनीनां तदीयपर्यन्तं विशिष्टविषयकैङ्कर्यं प्रतिपाद्य स्वरवधार्थिमुनिजनशरणागतिंवक्ष्यञ्शरण्यत्वोपयोगिसामर्थ्यं विराधवधकथनमुखेन बोधयितुमुपक्रमते । कृतातिथ्य इत्यादिना । अतएव संक्षेपे विराधं राक्षसं हत्वा शरभङ्गं ददर्श हेत्यत्र विराधवधोपहारमुखेन शरभङ्गं दृष्टवानिति व्याख्यातं । तुशब्देन अत्र्यादिकृतातिथ्याद्वैलक्षण्यमुच्यते । अनन्यप्रयोजनदत्तं हि भगवतःपरमभोग्यं पत्रं पुष्पमित्यादि । अथशब्दः कृत्स्नवाची । कार्त्स्न्येन कृतातिथ्य इत्यर्थः । भक्तैर्यत्किञ्चिद्दत्त-

बलेन स्थानबलेन चतुरङ्गबलेनच स्वराज्यमात्ररक्षणेसमर्थाभवन्ति । सकललोकरक्षणधुरंधरस्यासहायशूरस्यतव नगरवासेकिंबलमुपचीयते वनवासेकिमपचीयते स्वाभाविकनित्यनिरतिशयशक्तिसंपन्नस्यावसादकंसत्त्वंकिमपिनास्तीत्यर्थः । सोपाधिकशेषिणो देशविशेषादिसंबन्धापेक्षा । निरुपाधिकशेषिणस्तव यत्रकुत्रचिदवस्थानेप्यस्मद्रक्षणमावश्यकमितिराजशब्दार्थः ॥ १९ ॥ स० सलक्ष्मणं लक्ष्मणेन श्रीवत्सचिह्नेन वैदेह्या सहितमितियावत् । एतेन पूर्वरामलक्ष्मणाभ्यांसहदृष्टायास्सीतायाः कथमनर्च्यत्वमितिशङ्कापरास्ता । ति० सलक्ष्मणमित्यनेन लक्ष्मणस्याप्याहारभक्षणस्पष्टमुक्तं ॥२१॥ ती० सिद्धाः भरद्वाजादिवत्सिद्धसंकल्पाः । न्यायवृत्ताः न्यायोभगवदुपासनादिरूपधर्मः सएववृत्तंशीलयेषांतेतथा ॥ २२ ॥ इतिप्रथमस्सर्गः ॥ १ ॥

[पा०] १ क. ख. ग ङ.—ट. पुष्पैरन्यैश्च. २ क. ख. च. छ. ज. पार्थिवं. ३ क. ख. ग. ङ.—ट. वन्यैश्च. ४ च. छ. ज. झ. वैश्वानरोपमं. ५ ख. ग. आमन्त्र्यच.

नानामृगगणाकीर्णं शार्दूलवृकसेवितम् ॥ ध्वस्तवृक्षलतागुल्मं दुर्दर्शसलिलाशयम् ॥ २ ॥
निष्कूजनानाशकुनिझिल्लिकागणनादितम् ॥ लक्ष्मणानुगतो रामो वनमध्यं ददर्श ह ॥ ३ ॥
सीतया सह काकुत्स्थस्तस्मिन्घोरमृगायुते ॥ ददर्श गिरिशृङ्गाभं पुरुषादं महास्वनम् ॥ ४ ॥
गम्भीराक्षं महावक्त्रं विकटं विषमोदरम् ॥ बीभत्सं विषमं दीर्घं विकृतं घोरदर्शनम् ॥ ५ ॥
वसानं चर्म वैयाघ्रं वसार्द्रं रुधिरोक्षितम् ॥ त्रासनं सर्वभूतानां व्यादितास्यमिवान्तकम् ॥ ६ ॥
त्रीन्सिंहांश्चतुरो व्याघ्रान्द्वौ वृकौ पृषतान्दश ॥ सविषाणं वसादिग्धं गजस्य च शिरो महत् ॥
अवसज्यायसे शूले विनदन्तं महास्वनम् ॥ ७ ॥
स रामं लक्ष्मणं चैव सीतां दृष्ट्वा च मैथिलीम् ॥ अभ्यधावत संक्रुद्धः प्रजाः काल इवान्तकः ॥ ८ ॥
स कृत्वा भैरवं नादं चालयन्निव मेदिनीम् ॥ अङ्केनादाय वैदेहीमपक्रम्य तदाऽब्रवीत् ॥ ९ ॥
युवां जटाचीरधरौ सभार्यौ क्षीणजीवितौ ॥ प्रविष्टौ दण्डकारण्यं शरचापासिधारिणौ ॥ १० ॥

मपि तत्सर्वातिथ्यत्वेन हि भगवान्स्वीकरोति । सूर्यस्योदयनंप्रतीति कर्मप्रवचनीययोगे द्वितीया । "लक्षणेत्थंभूताख्यान–" इत्यादिना प्रतेः कर्मप्रवचनीयत्वं । उदयनं प्रति उदयकाले । प्रातःस्नानादिकर्मावसान इत्यर्थः । वनमेवान्वगाहत नच तत्र स्थातुमैच्छदित्यर्थः ॥ १ ॥ नानामृगगणेत्यादिश्लोकद्वयमेकान्वयं । ध्वस्तवृक्षलतागुल्मं तुङ्गकठिनविराधदेहसंपर्कादिति भावः । दुर्दर्शसलिलाशयमित्यत्राप्येषयमेव हेतुः । निष्कूजनानाशकुनि निःशब्दनानाविधपक्षिकं । मुद्गरमुद्गीयमानोपि पक्षी तस्माद्भिया निःशब्दं लीयत इति भावः । झिल्लिकागणनादितं झिल्लिकाभिस्तु दुर्दर्शत्वात्सर्वदा शब्दित इत्यर्थः । नानेत्यादि सर्वं वनमध्यविशेषणं ॥ २—३ ॥ सीतया सहेत्यादि सार्धश्लोकचतुष्टयमेकान्वयं । घोरमृगास्तरक्ष्वादयः । पुरुषानत्ति भक्षयतीति पुरुषादः । पचाद्यच् । राक्षसमित्यर्थः । महास्वनं दृढकण्ठध्वनिकं ॥ ४ ॥ गम्भीराक्षं निम्नाक्षं । महावक्त्रं पृथुतरमुखं । विकटं विशालं । विषमोदरं निम्नोन्नतोदरं । बीभत्सं मांसरुधिरालिप्तशरीरतया कुत्सितं । विषमं न्यूनाधिकावयवं । विकृतं उक्तप्रकारेण विकृतवेषं । अतएव घोरदर्शनम् ॥ ५ ॥ वसा मांसं तया आर्द्रं । रुधिरोक्षितं रक्तसिक्तं । व्यादितास्यं व्यात्तास्यं । आर्षं इट् ॥ ६ ॥ भक्षणार्थमितिशेषः । पृषतान् बिन्दुभृगान् । आयसे अयोमये । शूले अवसज्य प्रोतान् कृत्वा । महास्वनं यथाभवति तथा विनदन्तं विनादं कुर्वन्तं ॥ ७ ॥ काले संहारकाले । प्रजा उद्दिश्य अन्तको यथा धावति तथा अभ्यधावत ॥ ८ ॥ अङ्केन कटिप्रदेशेन ॥ ९ ॥ सभार्याविति भार्याशब्दो योषिन्मात्रवाचीत्येके वदन्ति। अन्ये तु यथा "प्राणभृत उपदधाति" इत्यत्र प्राणभृच्छब्दः प्राणभृत्साधारणः । यथाच "ऋतं पिबन्तौ" इत्यत्र पानकर्त्रकर्तृसाधारणो जीवेश्वरयोः पिबच्छब्दप्रयोगस्तथा छत्रिन्यायेनात्रापि सभार्यावित्युक्तमित्याहुः । तथापि ध्वनिदोषोऽवर्जनीयः । वस्तुतस्तु द्वयोरेका भार्यास्तीति दुर्बुद्धिनैवमुक्तमिति

स० कुरुपाण्डवन्यायेन नानामृगगणाकीर्णं ऋक्षशार्दूलसेवितमितिसंभवति । दुर्दर्शसलिलाशयं गंभीरत्वात् ॥ ३ ॥ शि० झिल्लिकागणनादितमित्यनेन झिल्लिकाशब्दस्यराक्षसप्रियत्वंसूचितं ॥ स० निष्कूजनानाशकुनि स्वधनुर्दर्शनेननिश्शब्दनानापक्षि । झिल्लिकानाचौरीणां । लक्ष्मण अनुगतोयंरामेसः । लक्ष्मणानुचरइतिपाठे लक्ष्मणैः शुभलक्षणैः अनुचरास्सर्वेपियस्य सः ॥ ३ ॥ स० मृगाणामयुतंयस्मिंस्तस्मिन् । ती० गिरिशृङ्गाभं गिरेश्शृङ्गं आभा उपमा यस्यतं ॥ ४ ॥ ती० टी० अत्र विराधेनसीतामहणं स्वार्थोपपरिहारार्थमेव नतुदारलुब्धा । तदुक्तंस्कान्दे " सोपितांजानकीदृष्ट्वाशीघ्रंसंजातविभ्रमः । इयंपुरामहाशक्तिस्सेवंस्वर्गमयकारणम् । अस्यादिवोधोमोक्षेपिकारणंबन्धनेपिच । तस्मादिमांभजिष्यामीदिच्छाप्रासंद्विदर्शनम् । इतिदर्शनमात्रेण विमुक्ताभीषणाकरः । भक्तियुक्तोजहारैनांसीतांचैतन्यरूपिणीम् । " इति । शि० अङ्केन शीघ्रगत्या । वैदेहीं अपक्रम्य स्वस्कन्धमारोप्यसंस्थाप्य ॥ ९ ॥ ती० यद्वा सभार्यामार्यौ सभार्यौ । स० सभार्यौ भार्यासहितौ । सीतायाउभयभार्यात्वप्रमेणैवमुक्तिः । द्वयो-

[पा०] १ ग. समाकीर्णं. २ ट. शकुनं. ३ ग. सेवितं. ४ ङ. झ. ट. लक्ष्मणानुचरो ५ क. ख. ग. वनमध्येतुकाकुत्स्थः, ६ च. झ. ञ. ट. गभीराक्षं. ७ ग. घ. महास्वनं. ८ क. च. ज. ञ. विकृतोदरं. झ. ट. विकटोदरं. ९ क. ख. ग. अभ्यधावत्समुसंक्रुद्धः. क. ख. ग. अभ्यगच्छत्सु. १० ङ. झ. ट. तदाऽब्रवीत्. ११ ङ. झ. ट. पाणिनौ.

कथं तापसयोर्वा च वासः प्रमदया सह ॥ अधर्मचारिणौ पापौ कौ युवां मुनिदूषकौ ॥ ११ ॥
अहं वनमिदं दुर्गं विराधो नाम राक्षसः ॥ चरामि सायुधो नित्यमृषिमांसानि भक्षयन् ॥ १२ ॥
इयं नारी वरारोहा मम भार्या भविष्यति ॥ युवयोः पाप्योश्चाहं पास्यामि रुधिरं मृधे ॥ १३ ॥
तस्यैवं ब्रुवतो धृष्टं विराधस्य दुरात्मनः ॥ श्रुत्वा सगर्वितं वाक्यं संभ्रान्ता जनकात्मजा ॥
सीता प्रावेपतोद्वेगात्प्रवाते कदली यथा ॥ १४ ॥
तां दृष्ट्वा राघवः सीतां विराधाङ्कगतां शुभाम् ॥ अब्रवील्लक्ष्मणं वाक्यं मुखेन परिशुष्यता ॥ १५ ॥
पश्य सौम्य नरेन्द्रस्य जनकस्यात्मसंभवाम् ॥ मम भार्यां शुभाचारां विराधाङ्के प्रवेशिताम् ॥
अत्यन्तसुखसंवृद्धां राजपुत्रीं यशस्विनीम् ॥ १६ ॥
यदभिप्रेतमस्मासु प्रियं वरकृतं च यत् ॥ कैकेय्यास्तु सुसंपन्नं क्षिप्रमद्यैव लक्ष्मण ॥ १७ ॥
या न तुष्यति राज्येन पुत्रार्थे दीर्घदर्शिनी ॥ ययाऽहं सर्वभूतानां हितः प्रस्थापितो वनम् ॥
अद्येदानीं सकामा सा या माता मम मध्यमा ॥ १८ ॥

सम्यक् । क्षीणजीवितौ मद्धस्ते पतनादिति भावः । यद्वा क्षीणजीवितौ प्रविष्टौ क्षीणजीवितत्वादेव प्रविष्टौ । अत्र प्रविष्टानां जीवितं दुर्लभमितिभावः ॥ १० ॥ वस्तुतो विपरीताचारौ युवां मम वध्यावेवेत्याशयेनाह —कथमिति । वां युवयोः । प्रमदया सह वासश्च कथं विरुद्ध इत्यर्थः । "नचवाहा–" इति निषेधेपि वामादेशआर्षः । कथंशब्दोक्तं विवृणोति—अधर्मेति । मुनिदूषकौ मुनिवेषविरुद्धशरचापासिधारणादितिभावः । अतएव पापौ ॥११—१२॥ मृधे युद्धे ॥१३॥ सगर्वितं सगर्वं । भावे निष्ठा । उद्वेगात् भयात् ॥ १४ ॥ परिशुष्यता शोकसंकुचितेन । मुखेन उपलक्षितः ॥ १५—१६ ॥ कैकेय्याः अस्मासु विषये यदभिप्रेतं योभिप्रायः । यच्च प्रियं वरवृतं वरव्याजेन वृतं । तदद्यैवसुसंपन्नं फलितं ॥१७॥ अभिप्रेतशब्दोक्तं सूक्ष्मेक्षिकया विवृणोति—या न तुष्यतीति । दीर्घदर्शिन्या कैकेय्या अस्मद्व्यसनं पूर्वमेव यदि नाचिन्तितं स्यात्तर्हि पुत्रार्थं राज्यमेव वरयेत् । ननु मत्प्रवासनं । मत्प्रवासनवरणादवगम्यते । अयं वनं गतश्चेत्सीतापि गच्छेत् । सा च राक्षसादिभिरपह्रियेत । तेन रामोपि व्यसनं महत्प्राप्नुयात् । ततश्च मत्पुत्रस्य राज्यं निष्कण्टकं स्यादिति कैकेयी नूनममन्यतेति भावः । पुत्रार्थे पुत्रप्रयोजननिमित्तं । माता मम मध्यमेति । यद्यपि पूर्वं मम माता कनीयसीत्युक्तं तथापि महिषीत्रयापेक्षया कनीयसीत्वं सर्वदशरथपत्न्यपेक्षया मध्यमात्वं । त्रिशतपञ्चाशच्च दशरथपत्न्यः सन्तीति पूर्वमेवोक्तं । अद्य अस्मिन्दिवसे । इदानीं अस्मिन्क्षणे

रेकप्रियत्वंप्रमाणविकलंसदपि तदनुमतचेन्ममापि सा भार्याभवितुयोग्येतिभावमवगमयितुमियमुक्तिर्वा । अतएव "इयंनारीवरारोहामममभार्याभविष्यति " इतिवक्ष्यमाणंयुक्तंभवति । छत्रिन्यायेनवा ॥ ति० यद्वा विराधस्येदंनिन्दोक्तिरूपमेववाक्यं ॥१०॥ ति० तदेवाह—कथमिति । प्रमदया एकयासह द्वयोर्वासः कथंचेत्यन्वयः । स० मुनिदूषकौ मुनिधर्मदूषकौ ॥११॥ शि० वरारोहा वरः अत्युत्कृष्ट आरोह ममस्कन्धयोरारोहणं यस्यास्सा इयंनारी ममभार्या मत्तोप्यामविष्यति । एतेन तस्यसीतायांसेव्यत्वबुद्धिस्संजातेतिध्वनितं ॥ १३ ॥ शि० विराधाङ्कगतां विराधस्याङ्केन शीघ्रगत्याहेतुभूतया गतां तस्स्कन्धयोः प्राप्तां ॥१५॥ शि० विराधाङ्के प्रवेशितां विराधाङ्कस्य विराधशीघ्रगमनस्य या हेः व्याप्तिस्तया प्रवेशितां स्कन्धयोस्संस्थापितां । राजपुत्रीं राजती शोभावतीचसा पुत्री तां । स० प्रवेशितां तेनेतिशेषः ॥ १६ ॥ ति० मध्यमामाता कौसल्यातः कनिष्ठत्वात्सुमित्रातो ज्येष्ठत्वात् । कौसल्यापेक्षयाकनिष्ठत्वात्पूर्वंयवीयसीत्युक्तिरविनासंगता । भगवतोपीदृशोक्तिस्तु लक्ष्मणोत्साहवर्धनायेतिभावः । स० यद्वा मध्यमा सुमित्रा तत्सामीप्यान्मध्यमाकैकेयी । अथवा मध्यमा उक्तकारिणी । ऋतस्मद्बुद्धित्वान्मन्थरोक्तकारिणीति

[५१०] १ क. ग. मुनिदूषणौ. २ ङ. च. झ. ञ. ट. दुष्टं. ३ क. ख. ग. सगर्ववचनं. ज. समर्ववचनं. ४ झ. ट. प्रवेपितोद्वेगात्. घ. प्रावेपतोद्विग्ना. ५ घ. च. ज. ञ. राघवःश्रीमान्. ६ क.—घ. प्रवेपितां. ७ क. ख. ग. च. ज. ञ. मनस्विनीं. ८ घ. वरकृतंच. ज. वरमयंचतत्. ९ क. ग. ङ. च. ज. झ. ञ. ट. सुसुसंवृत्तं. घ. सस्सुसंवृत्तं. १० ज. झ. ट. मध्यमामम.

परस्पर्शात्तु वैदेह्या न दुःखतरमस्ति मे ॥ पितुर्वियोगात्सौमित्रे स्वराज्यहरणात्तथा ॥ १९ ॥
इति ब्रुवति काकुत्स्थे बाष्पशोकपरिप्लुते ॥ अब्रवील्लक्ष्मणः क्रुद्धो रुद्धो नाग इव श्वसन् ॥ २० ॥
अनाथ इव भूतानां नाथस्त्वं वासवोपमः ॥ मया प्रेष्येण काकुत्स्थ किमर्थं परितप्यसे ॥ २१ ॥
शरेण निहतस्याद्य मया क्रुद्धेन रक्षसः ॥ विराधस्य गतासोर्हि मही पास्यति शोणितम् ॥ २२ ॥
राज्यकामे मम क्रोधो भरते यो बभूव ह ॥ तं विराधे प्रमोक्ष्यामि वज्री वज्रमिवाचले ॥ २३ ॥
मम भुजबलवेगवेगितः पततु शरोस्य महान्महोरसि ॥
व्यवसयतु तनोश्च जीवितं पततु ततस्स महीं विघूर्णितः ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे द्वितीयः सर्गः ॥ २ ॥

॥ १८ ॥ किं ते तादृशं व्यसनं तत्राह—परस्पर्शादिति । वैदेह्याः परस्पर्शाद्यथा दुःखतरं अतिदुःखं । पितृवियोगाद्राज्यहरणाच्च तथा दुःखं नास्तीति योजना ॥ १९ ॥ रुद्धः मन्त्रगणनिरुद्धः । नागः सर्पः । श्वसन् रामशोकदर्शनादिति भावः ॥ २० ॥ वासवोपमो भूतानां नाथः सन् अनाथ इव नाथसापेक्षो नर इव । विशिष्य मया प्रेष्येण सहितोपि किमर्थं परितप्यसे । वास्तवार्थस्तु भूतानां सर्वलोकानां नाथःवासव उपमीयतेनेनेति वासवोपमः त्वं अनाथ इव नाथभिन्न इव किमर्थं परितप्यसे । एवमेव तत्त्वं जगुः । यथा विश्वामित्रः "अहं वेद्मि महात्मानं" इति । यथा च परशुरामः "त्वया त्रैलोक्यनाथेन यदहं विमुखीकृतः" इति । एवमृषयोपि ॥ २१ ॥ प्रेष्येण त्वयाकिं क्रियत इत्यत्राह—शरेणेति ॥२२॥ कैकेय्याः भरतार्थं राज्यकाङ्क्षित्वाद्भरतस्यापि राज्यकामत्वं । तं विराधे विमोक्ष्यामीति शरणागतेभरते दुर्विमोचत्वादिति भावः । ननु भरतकैकेयीभ्यामज्ञानात्प्रवासनं कारितं पुनरागन्तव्यमिति क्षमापणस्य कृतत्वात् । कुतः पुना रामलक्ष्मणाभ्यां तत्र राज्यापहारित्वमनुस्मर्यते । उच्यते अनन्तरं तथाऽनुष्ठानेपि पूर्वं कैकेय्या तथा चिन्तितत्वात्तस्यचावश्यकर्तव्यत्वाद्दुःखकाले तच्चिन्तनं । तथापि व्यसनकालेपि परदोषोद्घाटनं सत्पुरुषानुचितं रामप्रकृतिविरुद्धं च । सुप्तप्रमत्तकुपितानां भावज्ञानंदृष्टमितिन्यायेन दोषदर्शनमेवरामस्यहार्दं तदुपेक्षकत्वं त्वभिनयमात्रमिति स्यात् । अत्रोच्यते । व्यसनकाले लोकोवाच्यमवाच्यं च न जानातीत्यमुमर्थं व्यञ्जयितुमेवमुक्तमिति ॥ २३ ॥ भुजबलवेगेन धनुराकर्षणवेगेन वेगितः आनीतवेगः । इतजन्तो वा । विघूर्णितः संजातभ्रमणः ॥ २४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्वितीयः सर्गः ॥ २ ॥

प्रोक्तकारिणीत्यर्थः । "प्रोक्तकारीतुमध्यमः" इत्युक्तेः ॥ १८ ॥ ती० क्रुद्धः कैकेयीप्रति ॥२०॥ ती० सरामंलक्ष्मणंदृष्ट्वेत्यारभ्य किमर्थंपरितप्यसइत्यन्तस्यग्रन्थसंदर्भस्य वास्तवार्थस्तु सः विराधः रामंलक्ष्मणंवैदेहींचदृष्ट्वासंक्रुद्धस्सन् सीतामभ्यधावत् गृहीतुमिति शेषः।रामादीन्दृष्ट्वा तत्तेजसाऽभिभूतोविराधः स्ववृत्तान्तंकथयंस्तान्पृच्छति । स कृत्वेत्यादिश्लोकपञ्चकेन । ततस्सविराधः अन्तेसमीपे । आगत्येतिशेषः । वैदेहीमादायापक्रम्याब्रवीत् । रामलक्ष्मणावितिशेषः । युवामिति । सभार्यौ सभायामार्यौ । क्षीणजीवितौ क्षीणंजीवितमरीणांयाभ्यां । शरचापासिधारिणौसन्तौ जटाचीरधरौचसन्तौ दण्डकारण्यंप्रविष्टौ । यद्यपि तापसयोर्वांप्रमदयासहवासोयद्यपि । तथापि कथंपापौ कथंमुनिदूषकौ । तादृशौनभवतइत्यर्थः । अत्रहेतुः अधर्मचारिणौ अधर्मंचरतो भक्षयतो नाशयतइतितथा । एतादृशविशेषणविशिष्टौकौयुवां । किंच । अहमिति । अहंविराधोनामराक्षसः । इदानींमम पापयोः पापाभ्यां । हस्ताभ्यामितिशेषः । ऋषिमांसानिभक्षयन् सायुधोमृधेरुधिरंपास्यामीतिधिया दुर्गंवनंचरामि । किंच मया कान्त्या आर्याश्रेष्ठा इयंनारी युवयोःकामविष्यतीति तावब्रवीदितिपूर्वेणसंबन्धः । तस्येति । ऋषिमांसानिभक्षयंश्चरामीत्येवं दुष्टंयथातथा विराधस्यब्रुवतस्सतः सीताप्रावेपत । तामिति । विराधाङ्के तत्समीपे प्रवेशितां स्थितामित्यर्थः । सीतांदृष्ट्वा परिशुष्यतामुखेनोपलक्षितः सीताभीत्येतिशेषः । अब्रवीत् पश्येति । विराधाङ्के तत्समीपे प्रवेशितांस्थितां । यदभिप्रेतमित्यादिवाक्यानि सीताभीतिनिमित्तेनोक्तानीति द्रष्टव्यानि । परस्पर्शात् परस्यराक्षसस्यस्पर्शात् समीपागमनादित्यर्थः । बाष्पशोकपरिप्लुते सीताभीतिनिमित्तमितिभावः ॥२१॥ इतिद्वितीयस्सर्गः ॥२॥

[पा०] १ ग. दुःखान्तर. २ क. ख. ग. ङ. च. ज. झ. ट. पितुर्विनाशात्. ३ ङ. झ. ट. परिप्लुतः. ४ ख. लक्ष्मणस्तत्र क्रुद्धोनागइव. ५ घ. लोकानां. ६ क. ग. ङ. च. झ. ञ. ट. विमोक्ष्यामि. ७ क. ट. व्यपनयतु. ८ च. ञ. ततोस्य. ९ क. ख. ङ. च. ज. झ. ञ. ततश्च.

तृतीयः सर्गः ॥ ३ ॥

रामेणविराधंप्रतिस्ववृत्तान्तनिवेदनपूर्वकंतद्वृत्तान्तनिवेदनप्रभेदेनतंप्रतिस्वपितृनामस्वप्रभावनिवेदनपूर्वकंसीताविसर्जनेन स्वरयापलायनचोदना ॥ १ ॥ ततोरामबाणाभिहतिव्यधितेनतेनसीतायाभुविन्यसनपूर्वकंरामलक्ष्मणयोःस्वस्कन्धारोपणेन वनमध्यप्रवेशः ॥ २ ॥

[इत्युक्त्वा लक्ष्मणः श्रीमान्राक्षसं मैहसन्निव ॥ को भवान्वनमभ्येत्य चरिष्यति यथासुखम् ॥ १ ॥] अथोवाच पुनर्वाक्यं विराधः पूरयन्वनम् ॥ आत्मानं पृच्छते ब्रूतं कौ युवां क गमिष्यथः ॥ २ ॥ तमुवाच ततो रामो राक्षसं ज्वलिताननम् ॥ पृच्छन्तं सुमहातेजा इक्ष्वाकुकुलमात्मनः ॥ ३ ॥ क्षत्रियौ वृत्तसंपन्नौ विद्धि नौ वनगोचरौ ॥ त्वां तु वेदितुमिच्छावः कस्त्वं चरसि दण्डकान् ॥ ४ ॥ तमुवाच विराधस्तु रामं सत्यपराक्रमम् ॥ हन्त वक्ष्यामि ते राजन्निबोध मम राघव ॥ ५ ॥ पुत्रः किल जयस्याहं मम माता शतह्रदा ॥ विराध इति मामाहुः पृथिव्यां सर्वराक्षसाः ॥ ६ ॥ तपसा चापि मे प्राप्ता ब्रह्मणो हि प्रसादजा ॥ शस्त्रेणावध्यता लोकेऽच्छेद्याभेद्यत्वमेव च ॥ ७ ॥ उत्सृज्य प्रमदामेनामनपेक्षौ यथागतम् ॥ त्वरमाणौ पलायेथां न वां जीवितमाददे ॥ ८ ॥ तं रामः प्रत्युवाचेदं कोपसंरक्तलोचनः ॥ राक्षसं विकृताकारं विराधं पापचेतसम् ॥ ९ ॥

अथ विराधानुग्रहाय तदाक्रमणं तृतीये—अथोवाचेत्यादि । पूरयन् शब्देनेति शेषः । आत्मानं युष्मत्स्वरूपं । पृच्छते मह्यमिति शेषः । ब्रूतमिति लोण्मध्यमपुरुषद्विवचनम् । प्रश्नप्रकारमाह—कावितिः ॥ १—२ ॥ राक्षसत्वेन प्रकृत्या ज्वलिताननमिति भयहेतूक्तिः । आत्मनः सम्बन्धि इक्ष्वाकुकुलमुवाचेत्यन्वयः । इक्ष्वाकुवंश्यदशरथपुत्रावावां पितृवचनाद्वनं गमिष्याव इत्युवाचेत्यर्थः ॥ ३ ॥ अधर्मचारिणौ पापाविति पूर्वोक्तविराधवचनस्योत्तरमाह—क्षत्रियौ वृत्तसंपन्नाविति । त्वामिति । कस्य पुत्रः किंप्रभाव इति ज्ञातुमिच्छावइत्यर्थः । "अहं वनमिदं दुर्गं विराधो नाम राक्षसः" इति नामजाल्योः पूर्वमुक्तत्वान्नतद्विषयोयं प्रश्नः ॥४॥ हन्तस्वाभिप्रायकीर्तनोद्योगजगर्वेण । मम मत्तः मे स्वरूपमिति शेषः । निबोधेत्युवाचेत्यन्वयः ॥ ५ ॥ विराधः विगताराधनः दुराराध्यइत्यन्वर्थसंज्ञः । राक्षसाः सजातीयाः सजातीयैः कृतं नामेदं नतु मातापितृभ्यामिति भावः ॥ ६ ॥ चापि किञ्च । तपसा साधनेन । ब्रह्मणः प्रसादजा शस्त्रेणावध्यता अमारणीयता प्राप्ता । अच्छेद्याभेद्यत्वं च प्राप्तं । प्राणवियोजनहेतुखण्डनविदारणानर्हत्वं च प्राप्तमित्यर्थः ॥७॥ अनपेक्षौ अपेक्षायां मरणं ध्रुवमिति भावः । त्वरमाणौ मन्दगमने मे मनश्चलेदिति भावः । न वां जीवितमाददे उत्तमप्रमदारत्नप्राप्तेरादिति भावः ॥ ८ ॥ तं एवं परुषं वदन्तं । परुषवचनादेव

शि० विराधंज्ञातुकामस्य लक्ष्मणस्योक्तिमाह—इतीति । श्रीमाँल्लक्ष्मण इतिवचः उक्त्वा रामंप्रतीतिशेषः । वनं अन्यत्र प्राप्य यथासुखं यथारिष्यति चरति । सभवान्क इतिवचःप्रहसन्निव विराधं आहेतिशेषः ॥ १ ॥ स० वनं गोचरोययोस्तौ । यद्वा वनस्थयागौर्भूस्तस्यां चरत इतीतौ तयोक्तौ । समासान्तविधेरनित्यत्वात्टच् । यद्वा गविचरतोगोचरौ वनस्य गोचरौवनगोचरौ । वनपदार्थस्य योग्यतयागोचरपदैकदेशगोपदार्थेनान्वयः । "दीप्तानलार्कद्युतिमप्रमेयं" इत्यत्राप्रमेयत्वस्य द्युतावन्वयोज्ञेयः ॥ ४ ॥ स० सर्वराक्षसाइत्यनेन लोकप्रसिद्धत्वंद्योतयति ॥ ६ ॥ स० लोके ये छेद्यास्तेषामभेद्यत्वं । यद्वा छेद्यानामज्ञानामभेद्यत्वं । अवध्यत्वप्रकारनिरूपणं वैतत् ॥ वी० शस्त्रेण येनकेनापिशस्त्रेण । शस्त्रवत्वेनाच्छेद्याभेद्यत्वं छेदभेदाभ्यामन्वयनीयत्वं ॥ शि० अच्छेद्यत्वं अवयवद्वैधीभवनाभावः । अभेद्यत्वं शरीरव्रणप्राप्त्यभावः । वस्तुतस्तु छेद्येन छेत्तुमर्हेणप्राकृतशस्त्रेणेत्यर्थः । अतएव वक्ष्यमाणरामशस्त्रकरणकभेदनंसंगच्छते । तेषांप्राकृतभिन्नत्वात् ॥ ७ ॥ वी० अनपेक्षौ प्रमदाशारहितौ । वस्तुतस्तु उत्सृज्य मामितिशेषः । प्रमदामादायेतिशेषः । वां युवयोः जीवितं प्राणसमंस्त्रीरत्नं नाददे इत्युवाचेतिपूर्वेण

[पा०] १ अयंश्लोकः क. ग. च. छ. ज. ञ. ट. पुस्तकेष्वेवदृश्यते. २ क. च. ज ञ. ट. स्विराधं. ३ ग. प्रदहन्निव. ४ क. तावुवाचततोभीमोविराधः. ५ ङ. झ. ट. पृच्छतोममहिब्रूतं. ६ घ. विराधं. ७ क. अहं. ८ ख, ग. ङ. च. ज. झ. ञ. मातामम. ९ ङ. ञ. झ. ट. चाभिसंप्राप्ता.

क्षुद्र धिक्त्वां तु हीनार्थं मृत्युमन्वेषसे ध्रुवम् ॥ रणे संप्राप्स्यसे तिष्ठ न मे जीवन्गमिष्यसि ॥ १० ॥
ततः सज्यं धनुः कृत्वा रामस्सुनिशिताञ्शरान् ॥ सुशीघ्रमभिसन्धाय राक्षसं निजघान ह ॥ ११ ॥
धनुषा ज्यागुणवता सप्त बाणान्मुमोच ह ॥ रुक्मपुङ्खान्महावेगान्सुपर्णानिलतुल्यगान् ॥ १२ ॥
ते शरीरं विराधस्य भित्त्वा बर्हिणवाससः ॥ निपेतुः शोणितादिग्धा धरण्यां पावकोपमाः ॥ १३ ॥
स विद्धो न्यस्य वैदेहीं शूलमुद्यम्य राक्षसः ॥ अभ्यद्रवत्सुसंक्रुद्धस्तदा रामं सलक्ष्मणम् ॥ १४ ॥
स विनद्य महानादं शूलं शक्रध्वजोपमम् ॥ प्रगृह्याशोभत तदा व्यात्तानन इवान्तकः ॥ १५ ॥
अथ तौ भ्रातरौ दीप्तं शरवर्षं ववर्षतुः ॥ विराधे राक्षसे तस्मिन्कालान्तकयमोपमे ॥ १६ ॥
स प्रहस्य महारौद्रस्त्यक्त्वाऽजुम्भत राक्षसः ॥ जृम्भमाणस्य ते बाणाः कायान्निष्पेतुराशुगाः ॥१७॥
स्पर्शात्तु वरदानेन प्राणान्संरोध्य राक्षसः ॥ विराधः शूलमुद्यम्य राघवावभ्यधावत ॥ १८ ॥
तच्छूलं वज्रसंकाशं गगने ज्वलनोपमम् ॥ द्वाभ्यां शराभ्यां चिच्छेद रामः शस्त्रभृतां वरः ॥ १९ ॥

हेतोः कोपसंरक्तलोचनः। विकृताकारं विकृताकारमपि पापे सीताहरणे चेतो यस्य सं ॥ ९ ॥ क्षुद्रहीनजाते। धिकारे हेतुरयं। हीनार्थं उत्तमाङ्गनाभिलाषरूपहीनप्रयोजनमितियावत्। मृत्युं अन्वेषणहेतुं मरणं संप्राप्स्यसे। अन्वेषणं सफलं भविष्यतीत्यर्थः। तदा किञ्चिदुपेक्षया गन्तुमुद्युक्तं प्रत्याह—तिष्ठेति। गमनं च दुर्लभमित्याह—नेति। मे पुरत इति शेषः ॥१०॥ राक्षसं प्रति शरान्। निजघान अमुञ्चत्। हन हिंसागत्योरिति धातुः ॥ ११ ॥ पुनःशरान्विशिनष्टि—धनुषेति। ज्यारूपो गुणो रज्जुः तद्वता। महावेगान् अतएव सुपर्णानिलाभ्यां तुल्यं गच्छन्तीति तथोक्तान् ॥ १२ ॥ बर्हिणवासस इति स्वार्थे इनच्। बर्हिणवाससः बर्हपत्रा इत्यर्थः। शोणितेन आदिग्धाः ईषल्लिप्ताः। रक्तोद्गमात्पूर्वमेव शरीरान्निर्गमादितिभावः। पावकोपमा इति भूस्थतृणादिदहनादग्निसाम्यसिद्धिः ॥ १३ ॥ विद्धः बाणवेधजनितवेदनातिशयवान्। न्यस्य भूमौ निक्षिप्य ॥ १४ ॥ महान् नादः प्रतिध्वनिर्यस्मिंस्तद्यथा भवति तथा विनद्य। शक्रध्वजोपमं तद्वदुन्नतं। व्यात्तानन: विवृत्तास्यः। अनेन प्रसारितजिह्वत्वं लक्ष्यते शूलोपमेयतालाभाय ॥ १५ ॥ अथ सीतानिक्षेपानन्तरं। यथेष्टं बाणमोचनार्हत्वात् दीप्तं पूर्वबाणेभ्यस्तेजस्वि शरवर्षं शरसमूहं। उभाभ्यामपि मोचनीयत्वे हेतवः राक्षस इत्यादिविशेषणानि। कालान्तकयमोपमे काले संहारकाले अन्तको नाशको यो यमस्तत्तुल्ये ॥ १६ ॥ प्रहस्यकिमेतैर्मशकप्रायैरिति हसित्वा। अजुम्भत गात्रविनाममकरोत्। बाणाः काये किञ्चिल्लग्नाः। आशु गच्छन्तीत्याशुगाः आशुगा अपीत्यर्थः। निष्पेतुः जगळुः ॥ १७ ॥ वरदानेन स्पर्शात् संबन्धात्। प्राणान् प्राणवायून्। संरोध्य हृदये समूह्य बलं कृत्वेत्यर्थः ॥ १८ ॥ तत् हस्तस्थं। गगने ज्वलनः आकाशस्थाग्निः तदुपममित्यभूतोपमा

संबन्धः ॥ ८ ॥ ती० ज्यागुणवता ज्याशब्दवता। स० ज्यागुणवता भूमौप्रशस्तगुणवता। यद्वा ज्या मौर्वी गुणो मासुप्यादिः ताभ्यांयुक्तेन। शि० सुपर्णानिलतुल्यगान् सुपर्णानिलौ तुल्यं खसादृश्यं गच्छन्तिप्रापयन्ति तान् ॥१२॥ दि० बर्हिणवाससः बर्हिणः मयूराः तत्संबन्धिपिच्छानीत्यर्थः। तान्येववासांसियेषांतेतथा ॥ स० बर्हिणवासएव वासोयेषांतेबर्हिणवाससः। मयूरपक्षवन्नाः ॥ १३ ॥ ती० वस्तुतस्तु वैदेहीन्यस्य सीतासमीपमागत्वा ॥ १४ ॥ ती० कालोन्तकोयमश्चेतित्रयो मारणाधिकारिणः। तत्र कालस्याधिकारो जीवितविच्छेदे। अन्तकस्य प्राणापहारे। यमस्यपुण्यापुण्यविवेके इतिभेदः ॥ ति० कालान्तकयमाः प्राणतनुमनस्संहारप्रधानसंहारहृदस्यमूर्तयः तत्सदृशे ॥ शि० कालान्तकयमोपमे अन्तकः मृत्युः। कालस्त्रिमितं। यमस्त्रियन्ता। तैरुपमा यस्य। किंच कालः प्राप्तः अन्तकोयस्य सएव यमोपमस्तस्मिन् ॥ स० कालः कालाभिमानी अन्तकोमृत्युरित्युभौ यमभूतौ। तौच यमश्च तेषामुपमायस्य तस्मिन् ॥ १६ ॥ ति० प्रहस्य शस्त्रावज्ञेमयि वृथैवबाणपातइतिहासः ॥ १७ ॥ ती० टी० वरदानेन ईश्वरवरदानेन। तदुक्तं। "विराधोहाटकपुरेविधिवन्मामपूजयत्। मदनुग्रहवैशिष्ट्यादवध्यस्सुरा-

[पा०] १ च. क्षुद्रं. २ क. ख. ङ. च. ज.—ट. प्राप्स्यसिसंतिष्ठ. ३ ख. घ. ङ. च. ज.—ट. त्वमोक्ष्यसे. ४ ग. सतु. ५ ख. निजघानसः. ६ क. च. ज. ञ. तत्र. ७ क. ख. म. महारौद्रस्थित्वा. ८ क. ख. ग. च. ज. बलात्तुवरदानस्य ९ क. च. ज संरुध्य. १० क. ङ. च. छ. ज. ट. राघवायव्यसर्जयत्.

तद्रामविशिखच्छिन्नं शूलं तस्य कराद्भुवि ॥ पपाताशनिना छिन्नं मेरोरिव शिलातलम् ॥ २० ॥
तौ खड्गौ क्षिप्रमुद्यम्य कृष्णसर्पोपमौ शुभौ ॥ तूर्णमापततस्तस्य तदा प्रहरतां बलात् ॥ २१ ॥
स वध्यमानस्सुभृशं बाहुभ्यां परिरभ्य तौ ॥ अप्रकम्प्यौ नरव्याघ्रौ रौद्रः प्रस्थातुमैच्छत ॥ २२ ॥
तस्याभिप्रायमाज्ञाय रामो लक्ष्मणमब्रवीत् ॥ वहत्वयमलं तावत्पथाऽनेन तु राक्षसः ॥ २३ ॥
यथा चेच्छति सौमित्रे तथा वहतु राक्षसः ॥ अयमेव हि नः पन्था येन याति निशाचरः ॥ २४ ॥
स तु खबलवीर्येण समुत्क्षिप्य निशाचरः ॥ बालाविव स्कन्धगतौ चकारातिबलौ ततः ॥ २५ ॥
तावारोप्य ततः स्कन्धं राघवौ रजनीचरः ॥ विराधो निनदन्घोरं जगामाभिमुखो वनम् ॥२६॥
वनं महामेघनिभं प्रविष्टो द्रुमैर्महद्भिर्विविधैरुपेतम् ॥
नानाविधैः पक्षिशतैर्विचित्रं शिवायुतं व्यालमृगैर्विकीर्णम् ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः ॥ ४ ॥

विराधेनरामलक्ष्मणापहरणेसीतयाविषादादुद्वेगेराक्रोशनम् ॥ १ ॥ राघवाभ्यांशस्त्रेणविराधबाहुद्वयभञ्जनपूर्वकंशस्त्रादिना बहुधापीडनेप्यविमुक्तप्राणेतस्मिन्रामेणलक्ष्मणंप्रतिविराधस्यशस्त्राग्रवध्यत्वोक्तिपूर्वकंगर्तेनिखननस्वतद्बोधोपायत्वोक्तिः ॥ २ ॥ रामपादस्पर्शमहिम्नापूर्वजन्मस्मृतिमताविराधेनतत्प्रतिकुबेरशापान्तस्वराक्षसत्वप्रतिपादनपूर्वकंशरभङ्गाश्रमगमनचोदना ॥ ३ ॥ विराधेनापिस्वस्वगतेक्षेपंप्रार्थितेनरामेणलक्ष्मणस्वास्वगर्तेतस्मिन्खननम् ॥ ४ ॥ ततःसीतालक्ष्मणाभ्यांसहवनेसुखनिवासः ॥ ५ ॥

हियमाणौ तु तौ दृष्ट्वा वैदेही रामलक्ष्मणौ ॥ उच्चैस्स्वरेण चुक्रोश प्रगृह्य सुभुजा भुजौ ॥ १ ॥

॥ १९ ॥ अशनिना वज्रेण ॥ २० ॥ प्रहरतां प्राहरतां ॥ २१ ॥ अप्रकम्प्यौ चालयितुमप्यशक्यौ । किंपुनः परिग्रहीतुमिति कविः परिहसति । रौद्रः रौद्राकृतिः । अप्रकम्प्यत्वे हेतुः—नरव्याघ्राविति । नरव्याघ्रौ पुरुषोत्तमौ ॥२२ ॥ अभिप्रायं वनान्तर्नयनेच्छां । वहतु नौ प्रापयतु । अनेन आवाभ्यां गन्तव्येन पथावहतु । अथवा यथेच्छति येनमार्गेण गन्तुमिच्छति तथा वहतु । उभयथापि न दोष इति भावः । तत्र हेतुमाह—अयमिति । नः वनमध्यगमनेच्छूनामस्माकं ॥ २३—२४ ॥ अतिबलौ रामलक्ष्मणौ समुत्क्षिप्य बालाविव स्कन्धगतौ चकार तयोरिच्छावशादिति भावः ॥ २५—२६ ॥ इमावपि स्वाभीष्टवनं प्रविष्टावित्याशयेनाह—वनमिति । शिवाः सृगालविशेषः तासिर्युतं । व्यालमृगैः दुष्टमृगैः । "दुष्टे द्विपे श्वापदे च व्यालः पुंसि शठेपि च" इति वाणः । अत्र सर्गे भगवतः स्वायत्तसकलप्रवृत्तिकत्वं महाभयहेतावपि निर्भयत्वं च दर्शितं । अस्मिन्सर्गे षड्विंशतिः श्लोकाः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने तृतीयः सर्गः ॥ ३ ॥

अथ परमपुरुषवहनफलं वक्तुमुपक्रमते—हिय-

सुरैः " इति ॥ १८ ॥ ति० तच्छूलं करस्थमूलभागमेवेतिशेषः । गगनेज्वलनोपमं शिखाभागावच्छेदेनेतिभावः ॥ १९ ॥ स० महामेघनिभं सूर्यप्रकाशाच्छादकत्वेनेतिभावः ॥ २७ ॥ इतितृतीयस्सर्गः ॥ ३ ॥

शि० सुभुजौ सुभुजान्तौस्वबाहूप्रगृह्य समुत्थाप्य । सुभुजौ काकुत्स्थौ प्रगृह्य हियमाणौदृष्ट्वा चुक्रोशेत्यन्वयो वा ॥१॥

[पा०] १ क. ख. ङ.—ट. विशिखैश्छिन्नं. ग. विशिखैर्भिन्नं. २ घ. च. छ. ज. भुजौ. ३ ङ. ञ. ट. सर्पाविवोद्यतौ. ४ ट. मापेतदुस्तस्य. ५ क. वध्यमानस्सदुभृशं. ६ ख. ग. ङ.—ट. भुजाभ्यां. ७ क.—ज. ञ. ट. परिगृह्य. ८ ज. मासाद्य. ९ क. ख. ग. च. छ. ज. ञ. यथेच्छतिहि. १० क. च. छ. ज. ञ. तौसमुत्क्षिप्यराक्षस. ११ ग. चचारातिबलौ. ङ. ञ. ट. चकारातिबलोद्धतः. १२ क. ङ. ज. ञ. स्कन्धे १३ ख. घ.—ट. विनद्घोरं. १४ क. च. छ. ज. ञ. पक्षिगणैः, ङ. ञ. ट. पक्षिकुलैः, १५ ङ. ञ. ट. तुकाकुत्स्थौदृष्ट्वासीतारघूत्तमौ. क. ख. ततोदृष्ट्वा. १६ ङ. ञ. ञ. ट. सुभुजौ.

एष दाशरथी रामस्सत्यवाञ्छीलवाञ्छुचिः ॥ रक्षसा रौद्ररूपेण ह्रियते सहलक्ष्मणः ॥ २ ॥
मां वृका भक्षयिष्यन्ति शार्दूला द्वीपिनस्तथा ॥ मां हरोत्सृज्य काकुत्स्थौ नमस्ते राक्षसोत्तम ॥ ३ ॥
तस्यास्तद्वचनं श्रुत्वा वैदेह्या रामलक्ष्मणौ ॥ वेगं प्रचक्रतुर्वीरौ वधे तस्य दुरात्मनः ॥ ४ ॥
तस्य रौद्रस्य सौमित्रिर्बाहुं सव्यं बभञ्ज ह ॥ रामस्तु दक्षिणं बाहुं तरसा तस्य रक्षसः ॥ ५ ॥
स भग्नबाहुः संविग्नो निपपाताशु राक्षसः ॥ धरण्यां मेघसंकाशो वज्रभिन्न इवाचलः ॥ ६ ॥
मुष्टिभिर्जानुभिः पद्भिः सूदयन्तौ तु राक्षसम् ॥ उद्यम्योद्यम्य चाप्येनं स्थण्डिले निष्पिपेषतुः ॥७॥
स विद्धो बहुभिर्बाणैः खड्गाभ्यां च परिक्षतः ॥ निष्पिष्टो बहुधा भूमौ न ममार स राक्षसः ॥८॥
तं प्रेक्ष्य रामः सुभृशमवध्यमचलोपमम् ॥ भयेष्वभयदः श्रीमानिदं वचनमब्रवीत् ॥ ९ ॥
तपसा पुरुषव्याघ्र राक्षसोयं न शक्यते ॥ शस्त्रेण युधि निर्जेतुं राक्षसं निखनावहे ॥ १० ॥
[कुञ्जरस्येव रौद्रस्य राक्षसस्यास्य लक्ष्मण ॥ वनेऽस्मिन्सुमहच्छ्वभ्रं खन्यतां रौद्रवर्चसः ॥ ११ ॥
इत्युक्त्वा लक्ष्मणं रामः प्रदरः खन्यतामिति ॥ तस्थौ विराधमाक्रम्य कण्ठे पादेन वीर्यवान् ॥१२॥]
तच्छ्रुत्वा राघवेणोक्तं राक्षसः प्रश्रितं वचः ॥ इदं प्रोवाच काकुत्स्थं विराधः पुरुषर्षभम् ॥१३॥
हतोस्मि पुरुषव्याघ्र शक्रतुल्यबलेन वै ॥ मया तु पूर्वं त्वं मोहान्न ज्ञातः पुरुषर्षभः ॥ १४ ॥

माणावित्यादि । चुक्रोश रामस्यातिमानुषं चरित्रमवगच्छन्त्यपि स्नेहातिशयेन व्याकुला रुरोदेत्यर्थः ॥ १ ॥ सत्यवान् सत्यवचनवान् । शीलवान् सदाचारसंपन्नः । शुचिः ऋजुबुद्धिः ॥ २ ॥ एवं दैवं प्रत्याक्रुश्य विराधं प्रत्याह—मामिति । वृकाः ईहामृगाः । "कोकस्त्वीहामृगो वृकः" इत्यमरः । शार्दूलाः महाव्याघ्राः । द्वीपिनः अल्पव्याघ्राः । "व्याघ्रो मृगारिः शार्दूलो हिंसारुश्चित्रकी मृगात् । चण्डश्चाल्पस्त्वयं द्वीपी" इति वैजयन्ती । नमस्त इत्येवं चुक्रोशेति पूर्वेणान्वयः ॥ ३—४ ॥ सव्यमिति । ननु विराधादानेकबन्धादाने च लक्ष्मणः सव्यं रामो दक्षिणं भुजमच्छिनदित्यविशेषेणोच्यते किमत्र नियामकमिति चेत् । उच्यते । सर्वदा लक्ष्मणो रामस्य दक्षिणपार्श्व एव तिष्ठति अतो गृह्णन्दक्षिणेन रामं सव्येन लक्ष्मणं चागृह्णादित्यविरोधः । तरसा बलेन ॥ ५ ॥ संविग्नः भीतः ॥ ६ ॥ मुष्टिभिरिति । बहुवचनमावृत्त्या उद्यम्योद्यम्य सूदयन्तौ मुष्ट्यादिकमुद्धृत्योद्धृत्य प्रहरन्तौ । स्थण्डिले भूतले ॥ ७—८ ॥ भयेष्वभयदः शापापायकारणाय प्रसन्न इत्युच्यते ॥ ९ ॥ शस्त्रेण शस्त्रादिभिः । निखनावहे भूमौ निक्षिपेव ॥ १० ॥ प्रश्रितं विनयान्वितं यथा तथा प्रोवाचेत्यन्वयः ॥ ११—१३ ॥ रामपादस्पर्शेन प्रत्यभिजानन्नाह—हत इत्यादि । त्वयेति शेषः । पुरुषर्षभः पुरुषोत्तमस्त्वं रामत्वेनावतीर्ण इति न ज्ञात इत्यर्थः ॥ १४ ॥

ती० शार्दूलद्वीपिनः सबिन्दुबिन्दुव्याघ्राः ॥ ३ ॥ ति० बाहुंबभञ्जनैतावतापिप्राणहानिरिति नवरदानविरोधः । अभेद्याच्छेद्यत्वंच प्राणनाशक्षमावयवविशेषपरंबोध्यं । बभञ्ज मुष्टिप्रहारेणेतिशेषः अभेद्याच्छेद्यत्वरस्तु शस्त्रकरणकतद्विषयइत्यन्ये ॥५॥ स० संविग्नखिन्नः । अनेनवरस्तु रामेतरविषयइतिज्ञायते ॥६॥ ति० भयेषुभयकालेषु । स० भयेषु भयसाधनेषु । ती० भयेष्वभयदइति स्वश्रवःणस्मरणकीर्तनादिसंविदधतः पुरुषस्य सकलभयापहारीभवति ॥ ९ ॥ स० मया रमयासीतया सहितस्त्वंनज्ञातइतिवा ॥ १४ ॥

[पा०] १ क. च. छ. ज. ञ. सत्यवान्बलवानृजुः. २ ख. घोररूपेण. ३ झ. मामृक्षाः. ४ ग. राक्षसेश्वर. क. ५ भ्रातरौ. ६ क. ख. ङ.—ट. सौमित्रिस्सव्यंबाहुं. ७ ग. रामोपि. ८ ङ. झ. ट. पपाताशुविमूर्च्छितः. ९ क. च. छ. ज. ञ. सूदयन्तौच. १० क. संप्रेक्ष्य. घ. संप्रेक्षमाणस्समृशं. ११ इदंश्लोकद्वयं क.—ट. पुस्तकेष्वत्रापिदृश्यते. १२ क. च. ज. ञ. राक्षसस्याद्य. घ. राक्षसस्यतु. छ. राक्षसस्यच. १३ ख. महतस्सुमहच्छ्वभ्रं. घ. महतस्सुमहच्छिद्रं. क. च. छ ज. ञ. महतोस्यमहच्छ्वभ्रं. १४ ग. रौद्रकर्मणः. छ. रौद्ररक्षसः. १५ च. ज. प्रथितं. १६ क. ख. ग. ङ.—ट. हतोहं. घ. भक्तोस्मि. १७ क. घ. च. छ. ज. ञ. मोहादज्ञातः.

कौसल्या सुप्रजा राम तात त्वं विदितो मया ॥ वैदेही च महाभागा लक्ष्मणश्च महायशाः ॥ १५ ॥
अपि शापादहं घोरां प्रविष्टो राक्षसीं तनुम् ॥ तुम्बुरुर्नाम गन्धर्वः शप्तो वैश्रवणेन ह ॥ १६ ॥
प्रसाद्यमानश्च मया सोब्रवीन्मां महायशाः ॥ यदा दाशरथी रामस्त्वां वधिष्यति संयुगे ॥
तदा प्रकृतिमापन्नो भवान्स्वर्गं गमिष्यति ॥ १७ ॥
इति वैश्रवणो राजा रम्भासक्तं पुराऽनघ ॥ अनुपस्थीयमानो मां संक्रुद्धो व्याजहार ह ॥ १८ ॥
तव प्रसादान्मुक्तोऽहमभिशापात्सुदारुणात् ॥ स्वर्भुवनं स्वं गमिष्यामि स्वस्ति वोस्तु परंतप ॥ १९ ॥
इतो वसति धर्मात्मा शरभङ्गः प्रतापवान् ॥ अध्यर्धयोजने तात महर्षिः सूर्यसन्निभः ॥ २० ॥
तं क्षिप्रमभिगच्छ त्वं स ते श्रेयो विधास्यति ॥ अवटे चापि मां राम प्रक्षिप्य कुशली व्रज ॥ २१ ॥
रक्षसां गतसत्त्वानामेष धर्मः सनातनः ॥ अवटे ये निधीयन्ते तेषां लोकाः सनातनाः ॥ २२ ॥
एवमुक्त्वा तु काकुत्स्थं विराधः शरपीडितः ॥ बभूव स्वर्गसंप्राप्तो न्यस्तदेहो महाबलः ॥ २३ ॥
तच्छ्रुत्वा राघवो वाक्यं लक्ष्मणं व्यादिदेश ह ॥ २४ ॥
कुञ्जरस्येव रौद्रस्य राक्षसस्यास्य लक्ष्मण ॥ वनेऽस्मिन्सुमहच्छ्भ्रं खन्यतां रौद्रकर्मणः ॥ २५ ॥

ज्ञानप्रकारमाह—कौसल्येति । तात सर्वलोकजनक । त्वं कौसल्यायाः सुप्रजाः । "नित्यमसिच् प्रजामेधयोः" इत्यसिच् । इति विदितोसि । महाभागा श्रीर्वैदेहीत्यवगता । अयं च त्वदंशभूतो महायशाः त्वदनुवर्तनजकीर्तिमान् । लक्ष्मण इति विदितः ॥ १५ ॥ एतावत्पर्यन्तं कुतो न ज्ञातवानसीत्यत्राह—अपीति । अपिर्गर्हायां । कस्य केन शाप इत्यत्राह—तुम्बुरुरित्यादि । अहमिति शेषः ॥ १६ ॥ उपकारस्मृत्योपश्लोकयति—महायशा इति । प्रकृतिं स्वरूपं । शापनिमित्तमाह—अनुपस्थीयमान इति । रम्भासक्तं मां अनुपस्थीयमानः अवसरे मया असेव्यमानः । अत एव संक्रुद्धः राजा अस्मत्स्वामी वैश्रवणः इति उक्तप्रकारेण । राक्षसो भवेति व्याजहार । पुनर्मया प्रसाद्यमान इत्यन्वयः । उक्तप्रकारेण शापावसानं चोवाचेति योजना ॥ १७—१८ ॥ स्वर्भुवनं स्वर्गलोकं । उपकारस्मृत्या मङ्गलमाशास्ते—स्वस्ति व इति ॥ १९ ॥ वाचिकमेकदेशमातनोति—इत इति । प्रतापवान् महातपाः, अधिकमर्धं यस्य तदध्यर्धं तच्च तद्योजनं च तस्मिन् सार्धयोजन इत्यर्थः ॥ २० ॥ क्षिप्रं तदभिप्रवेशात्पूर्वं । ते स्वतः । श्रेयः ब्रह्मलोकं । विधास्यति पोषयिष्यति । यद्वा ते श्रेयः निवासस्थानप्रवेशनादिकं । अवटे श्वभ्रे । कुशली आर्तत्राणरूपकुशलयुक्तः ॥ २१ ॥ गतसत्त्वानां गतासूनां । "द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु" इत्यमरः । एषः अवटप्रक्षेपः । अस्य धर्मस्य फलमाह—अवट इति ॥ २२ ॥ स्वर्गसंप्राप्तः संप्राप्तप्राय इत्यर्थः । खननानन्तरं स्वर्गप्राप्तेः ॥ २३—२४ ॥ कुञ्जरस्येत्यादि श्लोकद्वयं । वैपुल्यं विधाय निम्नतां विधत्ते—प्रदरः खन्यतामिति । प्रकृष्टोदरः प्रदरः ॥ २५

ति० त्वयाकौसल्यासुप्रजाइति त्वंविदितः कौसल्यापुत्रइतिज्ञातोसीत्यर्थः ॥ १५ ॥ ति० व्याजहारेत्यस्य राक्षसीतनुंप्रविशेतीति शेषः ॥ १८ ॥ ति० अनुपस्थानेकारणमाह—इतीति । उक्तंशापंतत्प्रतीकारंचोवाचेत्यर्थः । शापमुक्तिकालज्ञानन्दपारवश्यात्पुनस्तेनदोषाय । रंभासक्तं पुरामत्तेतिपाठे पुनरुक्तयभावएव ॥ १८ ॥ स० स्वर्भुवनं सज्जनाय तुभ्यं । तेसकाशात्तस्य श्रेयोविधास्यतीतिवा ॥ २१ ॥ ति० सनातनः परंपराप्राप्तः । अतएव कलिराक्षसेयुगवनेष्वेतद्धर्मप्रवृत्तिः ॥ २२ ॥ ति० बभूव तथाभवितुमुद्यतोबभूव । यद्वा बभूवेत्यर्धेनसंक्षिप्ततयोक्तस्य विस्तरमाह—तच्छ्रुत्वेति । अवटनिक्षेपेणस्वर्गप्राप्तिश्रुत्वा ॥

[पा०] १ ग. घ. ङ. झ. ट. सुप्रजास्तातराम. २ ख. मयात्वंविदितोधुना. क. च. छ. ज. ञ. विदितस्त्वंमयाधुना. ३ क. ख. ग. महाबलः. ४ क. अहंशापादिमां. ख.—ञ. अभिशापादहं. ५ ङ.—ट. वैश्रवणेनहि. ६ क. ग. ततः प्रकृतिसंपन्नो. ख. ततःप्रकृतिसंपन्न पुनस्स्वर्गं. ७ इतिवैश्रवणइत्यस्मिन्श्लोकेपूर्वोत्तरार्धयोः पौर्वापर्यं क. ङ.—ट. पुस्तकेषुदृश्यते. ८ ङ.—ट. सक्तमुवाचह. ९ ङ. झ. ञ. सक्रुद्धो. १० क. च. छ. ञ. ट. मिहशापात्. ११ क.—घ. च. छ. ज. ञ. ट. भवन्. १२ क. च. छ. ज. ञ. तेस्तु. १३ ख. वरानन. १४ क. मधिगच्छ. १५ झ. श्रेयोऽभिधास्यति. १६ ग. यापि. १७ ङ.—ट. निक्षिप्य. १८ ख. कुशलं. १९ ख. हतसत्त्वानां. २० क. ख. ङ. छ. ज. ञ. राक्षसस्यास्य. २१ क. च. छ. ज. ञ. महतस्सुमहच्छ्भ्रं. ख. घ. ङ. झ. वनेऽस्मिन्सुमहाञ्श्वभ्रः.

इत्युक्त्वा लक्ष्मणं रामः प्रदरः खन्यतामिति ॥ तस्यौ विराधमाक्रम्य कण्ठे पादेन वीर्यवान् ॥ २६ ॥
ततः खनित्रमादाय लक्ष्मणश्चावभृत्तमम् ॥ अखनत्पार्श्वतस्तस्य विराधस्य महात्मनः ॥ २७ ॥
तं मुक्तकण्ठं निष्पिष्य शङ्कुकर्णं महास्वनम् ॥ विराधं प्राक्षिपच्छ्रेष्ठे नदन्तं भैरवस्वनम् ॥ २८ ॥

तमाहवे निर्जितमाशुविक्रमौ स्थिरावुभौ संयति रामलक्ष्मणौ ॥
मुदान्वितौ चिक्षिपतुर्भयावहं नदन्तमुत्क्षिप्य बिले तु राक्षसम् ॥ २९ ॥
अवध्यतां प्रेक्ष्य महासुरस्य तौ शितेन शस्त्रेण तदा नरर्षभौ ॥
समर्थ्य चात्यर्थविशारदावुभौ बिले विराधस्य वधं प्रचक्रतुः ॥ ३० ॥
स्वयं विराधेन हि मृत्युरात्मनः प्रसह्य रामेण वधार्थमीप्सितः ॥
निवेदितः काननचारिणा स्वयं न मे वधः शस्त्रकृतो भवेदिति ॥ ३१ ॥
तदेव रामेण निशम्य भाषितं कृता मतिस्तस्य बिलप्रवेशने ॥
बिलं च रामेण बलेन रक्षसा प्रवेश्यमानेन वनं विनादितम् ॥ ३२ ॥
प्रहृष्टरूपाविव रामलक्ष्मणौ विराधमुर्व्याः प्रदरे निहत्य तौ ॥
ननन्दतुर्वीतभयौ महावने शिलाभिरन्तर्दधतुश्च राक्षसम् ॥ ३३ ॥
ततस्तु तौ काञ्चनचित्रकार्मुकौ निहत्य रक्षः परिगृह्य मैथिलीम् ॥

—२६ ॥ उत्तमं अतिनिम्नं । महात्मनः महाकायस्य ॥२७॥ मुक्तकण्ठं कण्ठाक्रमणरहितं । अतएव महास्वनं शङ्कुकर्णं शङ्कुः कीलं तत्सदृशकर्णं गर्दभाकारं वा । "शङ्कुकर्णौ गर्दभोष्ट्रौ" इति वाणः । भैरवस्वनं भयंकरप्रतिध्वानं यथा भवति तथानदन्तं । महास्वनमित्यत्र स्वभावोक्तिः । अत्रोच्चारणरूपकार्योक्तिरिति भिदा ॥ २८ ॥ समस्तमुक्तमेवार्थं वृत्तान्तरेण संगृह्णाति—तमाहव इत्यादिना । संयति युद्धे स्थिरौ ॥ २९ ॥ बिलप्रक्षेपनिमित्तमाह—अवध्यतामिति । महासुरस्य वृत्राद्यसुरसदृशस्य । समर्थ्य अयमेवास्य वधोपाय इतिनिश्चित्य ॥ ३० ॥ न केवलं स्वनिश्चयः विराधेन चानन्तरं तथोक्तमित्याह—स्वयमिति । काननचारिणा रामेण प्रसह्य बलात्कृत्य । आत्मनो वधार्थं स्वयमीप्सितः मृत्युः बिलप्रवेशरूपवधोपायः । न मे वधः शस्त्रकृतो भवेदित्युपायान्तरं प्रतिषिध्य स्वयं निवेदितः उक्तो हीति योजना ॥ ३१ ॥ रामेण तद्भाषितमेव निशम्य तस्य विराधस्य । बिलप्रवेशने मतिः कृता । रामेण बलेन बिलं प्रवेश्यमानेन रक्षसा वनं विनादितमिति योजना ॥ ३२ ॥ प्रहृष्टरूपौ पुलकितशरीरौ । वस्तुतो हर्षशोकावनयोर्न स्तः किंतु तन्नटनमात्रमिति इवशब्देन सूचयति॥३३॥पत्नीसहितस्य रामस्य तद्रहितस्य परतश्चस्य लक्ष्मणस्य चोपमानमाह—चन्द्रदिवा-

३३—३४ ॥ ति० महात्मन गन्धर्वत्वप्रख्यापनाभिप्रायेण रामस्वरूपज्ञानाभिप्रायेणच कविना महात्मनइतिप्रयुक्तवा ॥ २७ ॥ सी० मुक्तकण्ठं श्रीरामचरणपीडनेन शिथिलीकृतकण्ठं । यद्वा सम्प्रेक्षेपणार्थं रामेणमुक्तकण्ठाक्रमणं । नदन्तं परमेश्वरेणश्रीरामेण वैधंप्राप्तोस्म्यतो धन्योहं धन्योहमिति हर्षेण नादंकुर्वन्तमित्यर्थः । शि० महास्वनं महाऽसुभिः ऊर्ध्वोच्छ्वासैः अनिति जीवतितं आसन्नमरणमित्यर्थः ॥ २८ ॥ ति० यथार्थं स्वप्रयोजनोचित । रामेणकर्त्रा प्रसह्यस्वयं स्वस्य योमृत्युरीप्सित तमात्मनोमृत्युं प्रसह्य उद्दिश्य । प्रपद्येतिपाठेप्ययमेवार्थः । काननचारिणा विराधेन । मेवधः शस्त्रकृतो नभवेदिति निवेदितोभूत् रामइतिशेषः ॥३१ ॥ ति० नीलाद्रिशालत्वाद्वनस्याकाशसादृश्यं । उभावपि चन्द्रवत्कलासंपन्नौसूर्यवत्प्रतापयुतौ ॥ ३४ ॥ इतिचतुर्थसर्गः ॥ ४ ॥

[पा०] १ क. ख. ग, च. छ. ज. ञ. दुरात्मनः. २ ख. ग. ङ.—ट. कण्ठमुत्क्षिप्य. ३ क. महावने. ४ ङ. झ. ञ. दारुणमाशु. ५ क. च. छ. ज. ञ. स्थितावुभौ. ६ क. ख. घ.—ट. बलेन. ७ क. महाबलस्य. ८ क.—घ. समर्थ्य. ९ ख. घ. ङ. च. झ. ञ. ट. मृत्युमात्मनः. १० ङ. झ. ट. यथार्थं. ११ क. च. छ. ज. ञ. तमेव. घ. निशम्य रामेणतदेवभाषितं. १२ क. ख. घ.—ट. तेनातिबलेन. १३ घ. ट. निनादितं. १४ क. ङ.—ट. मुर्व्याः. ख. ग. मुमं. १५ क. ङ.—ट. निपात्यतं. १६ ख. ग. कार्मुकखड्गधारिणौ.

विजह्रतुस्तौ मुदितौ महावने दिवि स्थितौ चन्द्रदिवाकराविव ॥ ३४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे चतुर्थः सर्गः ॥ ४ ॥

पञ्चमः सर्गः ॥ ५ ॥

विराधवनाच्छरभङ्गाश्रमंप्रविशतारामेणरथादवरुह्यशरभङ्गेणसहसंभाषमाणस्येन्द्रस्यावलोकनम् ॥ १ ॥ तथालक्ष्मणंप्रति सपरिजनेन्द्रप्रदर्शनपूर्वकंसीतयासहतत्रैवावस्थानचोदनेनप्रत्यक्षतोपितस्येन्द्रस्यविजिज्ञासयातत्समीपंप्रतिप्रस्थानम् ॥ २ ॥ रामागमनमवलोकयतेन्द्रेणशरभङ्गंप्रतितदानींस्वस्यरामसंभाषणादीनामनौचित्यनिवेदनपूर्वकंतदापृच्छनेनस्वलोकगमनम् ॥ ३ ॥ रामेणसीतालक्ष्मणाभ्यांसहशरभङ्गाभिवादनपूर्वकंतप्रतीन्द्रागमनकारणप्रश्नः ॥ ४ ॥ शरभङ्गेणरामंप्रतितत्कारणमभिधायसुतीक्ष्णाश्रमगमनचोदनपूर्वकंतत्संनिधावग्नौशरीरविसर्जनेनब्रह्मलोकगमनम् ॥ ५ ॥

हत्वा तु तं भीमबलं विराधं राक्षसं वने ॥ ततः सीतां परिष्वज्य समाश्वास्य च वीर्यवान् ॥
अब्रवील्लक्ष्मणं रामो भ्रातरं दीप्ततेजसम् ॥ १ ॥
कष्टं वनमिदं दुर्गं न च स्म वनगोचराः ॥ अभिगच्छामहे शीघ्रं शरभङ्गं तपोधनम् ॥ २ ॥
आश्रमं शरभङ्गस्य राघवोभिजगाम ह ॥ तस्य देवप्रभावस्य तपसा भावितात्मनः ॥ ३ ॥
समीपे शरभङ्गस्य ददर्श महदद्भुतम् ॥ विभ्राजमानं वपुषा सूर्यवैश्वानरोपमम् ॥ ४ ॥
अवरुह्य रथोत्सङ्गात्सकाशे विबुधानुगम् ॥ असंस्पृशन्तं वसुधां ददर्श विबुधेश्वरम् ॥ ५ ॥
सुप्रभाभरणं देवं विरजोम्बरधारिणम् ॥ तद्विधैरेव बहुभिः पूज्यमानं महात्मभिः ॥ ६ ॥

करावितेति ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुर्थः सर्गः ॥ ४ ॥

एवं विराधवनवासिमुमुक्षुमुनिजनशरणागतेरानुषङ्गिकफलभूतं विराधवधमभिधाय स्वरादिवधफलशरभङ्गाश्रमवासिमुनिजनशरणागतिं दर्शयिष्यन् तदुचितसौलभ्यदर्शनायशरभङ्गाश्रमवनगमनं दर्शयति पञ्चमे—हत्वेत्यादि । परिष्वज्य समाश्वास्य चेति विराधाङ्गस्पर्शजभयदुःखव्रीडाशान्त्यर्थमिति भावः ॥१॥ कष्टं कृच्छ्रं गहनं वा । "कृच्छ्रगहनयोःकषः" इत्यनिण्निष्ठा । अतएव दुर्गं विषमं विश्रमायोग्यमित्यर्थः ॥ २ ॥ तस्य विराधोक्तस्य । देवप्रभावस्य तपसा साधनेन भावितात्मनः साक्षात्कृतपरब्रह्मणः । "तपसा ब्रह्म विजिज्ञासस्व" इति श्रुतेः ॥ ३ ॥ महदद्भुतंमहाश्चर्यभूतं किमपि वस्तु । विभ्राजमानं वपुषा भ्राजमानवपुषमित्यर्थः । वैश्वानराः सूर्यव्यतिरिक्ततेजांसि । सूर्यादितेजःसमुदायोपममित्यर्थः ॥ ४ ॥ ततः किञ्चित्समीपगमनानन्तरं रथोत्सङ्गात् रथतटादवरुह्य वसुधामसंस्पृशन्तं । अभूमिस्पर्शस्य देवस्वभावत्वात् । सकाशे समीपे । विबुधानुगं विबुधा अनुगाः यस्य तं विबुधेश्वरमिन्द्रंददर्श ॥५॥ सुप्रभाभ्याभरणानि यस्य तं । देवं देदीप्यमानं । विरजो निर्मलं अम्बरं धर्तुं शीलमस्यास्तीति विरजोम्बरधारिणं । तद्विधैः इन्द्रतु-

---

स० कष्टं कष्टसाधनं । वयं अवनगोचराः । वनंगोचरोविषयोयेषांते वनगोचराः । ते नभवन्तीत्यवनगोचराः । नचस्मः अत्रेतिशेषः । नस्थास्मः । अन्यत्रगच्छामइतिभावः । यद्वावनगोचरा नचस्म इतीदंवनं दुर्गंकष्टमित्यब्रवीत् ॥२॥ स० इत्युक्त्वेतिशेषः । शी० तपसा सर्वेश्वरालोचनेन । भावितः वासितः आत्मा अन्तःकरणं यस्य सतथा ॥ ३ ॥ स० महदद्भुतं महतामद्भुतं । आत्त्वस्यानित्यत्वान्महांश्चासावद्भुतश्चेतिवा ॥ ति० वपुषा वपुःकान्त्या ॥४॥ स० विबुधेश्वरं ज्ञानिश्रेष्ठं । टीका० रथोत्सङ्गादाकाशे इतिपाठान्तरे । आकाशे भूमेस्समीपवर्तिनि ॥ ५ ॥ स० हरिभिरितिपाठे "त्वक्केशवालरोमाणि सुवर्णाभानियस्यतु ।

[पा०] १ क. विजहतुर्वै. २ ङ. ट. अब्रवीद्भ्रातरंरामोलक्ष्मणं. ३ क. ङ.—ट. वैश्वानरप्रभं. ४ क. ख. ङ.—ट. रथप्रवरमारुह्यमाकाशे. ५ ख. ग. ञ. संप्रभा. ६ क. ग. छ. ज. ञ. महर्षिभि .

हरिभिर्वाजिभिर्युक्तमन्तरिक्षगतं रथम् ॥ ददर्शादूरतस्तस्य तरुणादित्यसन्निभम् ॥ ७ ॥
पाण्डुराभ्रघनप्रख्यं चन्द्रमण्डलसन्निभं ॥ अपश्यद्विमलं छत्रं चित्रमाल्योपशोभितम् ॥ ८ ॥
चामरव्यजने चाग्र्ये रुक्मदण्डे महाधने ॥ गृहीते वरनारीभ्यां धूयमाने च मूर्धनि ॥ ९ ॥
गन्धर्वामरसिद्धाश्च बहवः परमर्षयः ॥ अन्तरिक्षगतं देवं वाग्भिरग्र्याभिरीडिरे ॥ १० ॥
सह संभाषमाणे तु शरभङ्गेण वासवे ॥ दृष्ट्वा शतक्रतुं तत्र रामो लक्ष्मणमब्रवीत् ॥
रामोऽथ रथमुद्दिश्य लक्ष्मणाय प्रदर्शयन् ॥ ११ ॥
अर्चिष्मन्तं श्रिया जुष्टमद्भुतं पश्य लक्ष्मण ॥ प्रतपन्तमिवादित्यमन्तरिक्षगतं रथम् ॥ १२ ॥
ये हयाः पुरुहूतस्य पुरा शक्रस्य नः श्रुताः ॥ अन्तरिक्षगता दिव्यास्त इमे हरयो ध्रुवम् ॥ १३ ॥
इमे च पुरुषव्याघ्रा ये तिष्ठन्त्यभितो रथम् ॥ शतं शतं कुण्डलिनो युवानः खड्गपाणयः ॥ १४ ॥
विस्तीर्णविपुलोरस्काः परिघायतबाहवः ॥ शोणांशुवसनास्सर्वे व्याघ्रा इव दुरासदाः ॥ १५ ॥
उरोदेशेषु सर्वेषां हारा ज्वलनसन्निभाः ॥ रूपं बिभ्रति सौमित्रे पञ्चविंशतिवार्षिकम् ॥ १६ ॥
एतद्धि किल देवानां वयो भवति नित्यदा ॥ यथेमे पुरुषव्याघ्रा दृश्यन्ते प्रियदर्शनाः ॥ १७ ॥

स्याकारैः । ददर्शेत्यनुषङ्गः ॥ ६ ॥ हरिभिः श्यामैः । यद्वा वाजिभिः वेगवद्भिः हरिभिः अश्वैः । तस्य इन्द्रस्य ॥ ७ ॥ पाण्डुराभ्रस्येव घना अधिका प्रख्या कान्तिर्यस्य तदिति श्लेषे दृष्टान्तः । चन्द्रमण्डलसन्निभमिति वृत्ततायां । चित्रमाल्यैर्लम्बमानकुसुमसरैः उपशोभितं ॥ ८ ॥ चामरव्यजने चामररूपव्यजने । महाधने बहुमूल्ये । मूर्धनि शस्येति शेषः । अपश्यदित्यनुषङ्गः ॥ ९ ॥ ईडिरे तुष्टुवुः । ईडमानानपश्यदित्यर्थः ॥१०॥ सहेत्यादिसार्धश्लोक एकान्वयः । तत्र तदानीं । राम इति पदस्यावृत्तिःक्रियाभेदात् । अतो न पुनरुक्तिः । उद्दिश्य हस्तेन निर्दिश्य शरभङ्गेण साकं वासवे संभाषमाणे सति तत्र समये रामः शतक्रतुं दृष्ट्वा तदीयरथं रामः लक्ष्मणाय उद्दिश्य प्रदर्शयन् सन् अथ लक्ष्मणमब्रवीदिति योजना ॥ ११ ॥ अर्चिष्मन्तं सतेजस्कं । श्रिया कान्त्या ॥ १२ ॥ पुरुहूतस्य । यज्वभिर्बहुशो हूतस्य । नः अस्माभिः । इमे हरितवर्णाः । हरयः अश्वाः ते । यद्वा त इमे शक्रस्य हरय इत्यन्वयः ॥ १३ ॥ इमे चेत्यादिश्लोकत्रयमेकं वाक्यं । शतं शतमिति प्रतिदिशमिति शेषः ॥ १४ ॥ विस्तीर्णविपुलोरस्काः अत्यन्तविशालोरस्काः । शोणांशुवसनाः रक्तकान्तियुक्तवस्त्राः । एवंभूता ये इमे तिष्ठन्तीत्यन्वयः ॥ १५ ॥ येषां सर्वेषामुरोदेशेषु हाराः ज्वलनसन्निभाः अग्निवच्छुक्लभास्वराः दृश्यन्ते । रूपमित्यत्रापि ये इत्यध्याहार्यं । पञ्चविंशतिः वर्षाः परिमाणमस्य पञ्चविंशतिवार्षिकं । "तदस्य परिमाणं" इति ठक् । "वर्षस्याभविष्यति" इत्युत्तरपदवृद्धिः । एवंभूतं रूपं शरीरं ये बिभ्रति "अदभ्यस्तात्" इत्यदादेशः । पञ्चविंशतिवार्षिकमिति यौवनावस्थोच्यते । "कौमारं स्यात्पञ्चदशाद्यौवनं तु ततः परं" इत्युक्तेः । त इमे सुरा इत्यध्याहार्यम् ॥ १६ ॥ तत्रयुक्तिमाह —एतद्धीति । एतत् पञ्चविंशतिवार्षिकं । वयः शरीरावस्था । देवानां नित्यदा भवति । नित्यदेति निपातः । किलेति प्रसिद्धौ । यथेमे वसनाभरणादिभिश्चारुदर्शनाः

हरिस्सवर्णतोश्वस्तुपीतकौशेयसप्रभः" इतिशालिहोत्रोक्तेर्हरिशब्दार्थोऽश्वेयः ॥ ७ ॥ स० पाण्डुराभ्रवते अभ्रेविद्यमानघनाश्च तैः प्रख्या सादृश्यं यस्यतं । पाण्डुराभ्रेषुमेघेषु येघनाश्चेष्टास्तत्सदृश्यमितिवा ॥ ८ ॥ ति० महाधने रत्नयुतत्वाद्बहुमूल्ये । चामरव्यजने चामरं बालनिर्मितं । व्यजनं मयूरपिच्छनिर्मितं । धूयमाने प्रकंप्यमाने ॥ ९ ॥ ति० तं शतक्रतुं दृष्ट्वा झाला । रामो अब्रवीत् । उक्तस्यैवप्रपञ्चः रामोथेति । दर्शयत अदर्शयतेत्यर्थः ॥ ११ ॥ ती० शतशब्दोत्रानेकवाची ॥ १४ ॥ ती० शोणांशुवसनाः

[पा०] १ क. ङ. ञ. ट. हरितैः. २ क. घ. च छ. ज. ञ. ददर्शदूरतः. ३ क. धूयमानेतु. ४ क. ङ. ट. गीर्भिः. ५ क. च. छ. ज. रत्नयुत्, ङ. ञ. रैडयन्. ६ क. च. छ. ज. ञ. रामोपि. ७ क- ङ.—ट. ब्रातुर्दर्शयताद्भुतं. ८ क. ङ. ट. दिशं. ९ ग. घ. च. छ. ज. ञ. शोणाश्मवसनाः. ञ. शोणाश्ववसनाः. १० क. च. छ. ज. ञ. यद्दमे. ११ च. छ. ज. ञ. शुभदर्शनाः.

इहैव सह वैदेह्या मुहूर्तं तिष्ठ लक्ष्मण ॥ यावज्जानाम्यहं व्यक्तं क एष द्युतिमान्रथे ॥ १८ ॥
तमेवमुक्त्वा सौमित्रिमिहैव स्थीयतामिति ॥ अभिचक्राम काकुत्स्थः शरभङ्गाश्रमं प्रति ॥ १९ ॥
ततः समभिगच्छन्तं प्रेक्ष्य रामं शचीपतिः ॥ शरभङ्गमनुप्राप्य विविक्त इदमब्रवीत् ॥ २० ॥
इहोपयात्यसौ रामो यावन्मां नाभिभाषते ॥ निष्ठां नैयतु तावत्तु ततो मां द्रष्टुमर्हति ॥ २१ ॥
[तावद्गच्छामहे क्षिप्रं यावन्मां नाभिभाषते ॥ २२ ॥]
जितवन्तं कृतार्थं च द्रष्टाऽहमचिरादिमम् ॥ कर्म ह्यनेन कर्तव्यं महदन्यैस्सुदुष्करम् ॥
निष्पादयित्वा तत्कर्म ततो मां द्रष्टुमर्हति ॥ २३ ॥
इति वज्री तमामन्त्र्य मानयित्वा च तापसम् ॥ रथेन हरियुक्तेन ययौ दिवमरिन्दमः ॥ २४ ॥
प्रयाते तु सहस्राक्षे राघवस्सपरिच्छदम् ॥ अग्निहोत्रमुपासीनं शरभङ्गमुपागमत् ॥ २५ ॥
तस्य पादौ च संगृह्य रामः सीता च लक्ष्मणः ॥ निषेदुस्समनुज्ञाता लब्धवासा निमन्त्रिताः ॥२६॥
ततः शक्रोपयानं तु पर्यपृच्छत्स राघवः ॥ शरभङ्गश्च तत्सर्वं राघवाय न्यवेदयत् ॥ २७ ॥

तथा किल देवा इति योजना ॥ १७ ॥ रथे इत्यनेन तदानीं रामं दृष्ट्वा रथमारूढ इत्यवगम्यते । यावज्जानामि ज्ञास्यामि । "यावत्पुरानिपातयोर्लट्" इति लट् । व्यक्तं अनुमितिं विना स्पष्टं प्रत्यक्षेण ज्ञास्यामीत्यर्थः ॥ १८ ॥ विरहासहिष्णुतया अनुव्रजन्तं लक्ष्मणं पुनः प्रदिश्य जगामेत्याह—तमेवमिति ॥ १९ ॥ अनुप्राप्य एकान्तवचनश्रवणाय समीपमागत्य । विविक्ते रहसि । वक्ष्यमाणस्यातिगोप्यत्वात् ॥ २० ॥ असौ रामः इह मत्समीपे । उपयाति । उपयानसौ यावति काले मां नाभिभाषते तावत्त्वंप्रतिज्ञां निष्ठां समाप्तिं नयतु । "निष्ठा निष्पत्तिनाशान्ताः" इत्यमरः । मया असंभाषमाण एव स्वप्रतिज्ञां निर्वर्तयतु मया संभाषणेऽस्यदेवत्वप्रकटनं स्यादिति भावः । संभाषणाभावेपि दर्शनमस्त्वित्यत आह—तत इति । ततः स्वप्रतिज्ञानिष्ठानयनानन्तरं । मां द्रष्टुमर्हति स मां पश्यतु ॥ २१—२२ ॥ भवांस्तं पश्यत्वित्यत्राह—जितवन्तमिति । रावणं जितवन्तं अतएव कृतार्थं कृतदेवप्रयोजनं इममहमचिराद्रष्टा द्रष्टास्मि । दर्शनसंभाषणाभ्यां देवत्वप्रकटने का हानिरित्यत्राह—कर्मेति । हि यस्मादन्यैर्देवैर्दुष्करं महत्कर्म रावणवधादिकं । अनेन मानुषवेषेण कर्तव्यं तस्मादित्यर्थः ॥ २३ ॥ इति वक्ष्यप्रकारेण तापसं तापसवेषं । मानयित्वा बहुमान्य । तं शरभङ्गमामन्त्र्य । हरियुक्तेन अश्वयुक्तेन रथेन दिवं ययौ ॥ २४ ॥ प्रयाते त्विति रामागमनोद्योगकाल एवेन्द्रस्य प्रयातत्वात् । सपरिच्छदं स्त्रीभ्रातृरूपपरिवारसहितं यथा भवति तथा । अग्निहोत्रं वह्निं । उपासीनं तत्रप्रवेशार्थमुपतिष्ठन्तं । शरभङ्गमुपागमत् ॥ २५ ॥ समनुज्ञाताः आसनाय कृतानुमतिकाः । लब्धवासाः मुनिना लब्धासनाः । ततो निमन्त्रिताः सत्कृताश्च सन्तः निषेदुः ॥ २६ ॥ शक्रो-

पद्मरागसदृशवसनाः ॥ टीका० शोणाक्षवसनाइतिपाठे शोणा अक्षा वसनानिच येषांते ॥ १५ ॥ ति० अनुज्ञाप्य गमनाय कृतानुमतिकंकृत्वा ॥ २० ॥ ति० यावदसौ मां नाभिभाषते तावन्मां निष्ठां स्थानान्तरं स्वर्गं वा गत मयासहगच्छत । ततो वनचारिलाद्धेतोः मा मां अद्रष्टुमर्हति द्रष्टुं नार्हतीत्यर्थः । अर्हतिनिषेधार्थमव्ययं पृथक्पदं । विपदीवस्थितेन एवंविधस्य दर्शनमनुचितमितिभावः ॥ २१ ॥ ति० कृतार्थं निस्तीर्णविपदं । तदानीमनयुक्तमिमं द्रक्ष्यामीतिशेषः । कृतकस्त्वेतत्पदं प्रक्षिप्तमित्याह । तद्वयैव मद्रीत्याव्याख्याने सर्वसामञ्जस्यात् । शि० जितवन्तं कृतरावणवधमित्यर्थः । अहं द्रष्टास्मीतिशेषः । एतेन रामसंभाषणे सति रावणः कोपंकर्तेतीन्द्रस्यभीतिर्व्यञ्जिता ॥ स० जितवन्तमिति । अनेन रामेण अन्यैस्सुदुष्करंकर्म रावणहननरूपंकर्तव्यं । जितवन्तं तत्कर्मप्राप्तिमन्तं । जिःप्राप्त्यर्थकः । स्वर्जितइत्यादौ तथादर्शनात् । कृतार्थं पूर्णं ॥ २३ ॥ स० सपरिच्छदः अनुबोधसहि-

[पा०] १ ख. ततस्तमभि. २ क.—ट. मनुज्ञाप्यविबुधानिदं. ३ क.—ट. नयत. ४ इदमर्धं क. च. छ. ज. पुस्तकेषुदृश्यते ५ घ. जीवितंच. ६ ङ. ञ. ट. कृतार्थंहि. ७ ङ. ञ. ट. तदाहं. क. च. छ. ज. ञ. दिष्ट्याद्रक्ष्याम्यहंहरिं. ८ ख. ग. मन्यैर्दुरासदं. ९ ङ. ञ. ट. अथ. १० घ. मानयित्वातु. ११ ङ. ञ. ट. हययुक्तेन. १२ ख. घ. ङ. ञ. ण. ट. सपरिच्छदः. क. च. छ. ज. सपरिच्छदे. १३ क. पादौतु. १४ क. ङ. च. ज.—ट. स्वदनुज्ञाताः. १५ क. ख. च. छ. ज. ञ. यानंतत. १६ घ. ञ. पर्यपृच्छत.

मामेष वरदो राम ब्रह्मलोकं निनीषति ॥ जितमुग्रेण तपसा दुष्प्रापमकृतात्मभिः ॥ २८ ॥
अहं ज्ञात्वा नरव्याघ्र वर्तमानमदूरतः ॥ ब्रह्मलोकं न गच्छामि त्वामदृष्ट्वा प्रियातिथिम् ॥ २९ ॥
त्वयाऽहं पुरुषव्याघ्र धार्मिकेण महात्मना ॥ समागम्य गमिष्यामि त्रिदिवं देवसेवितम् ॥ ३० ॥
अक्षया नरशार्दूल मया लोका जिताश्शुभाः ॥ ब्राह्म्याश्च नाकपृष्ठ्याश्च प्रतिगृह्णीष्व मामकान् ॥३१॥
एवमुक्तो नरव्याघ्रः सर्वशास्त्रविशारदः ॥ ऋषिणा शरभङ्गेण राघवो वाक्यमब्रवीत् ॥ ३२ ॥
अहमेवाहरिष्यामि सर्वलोकान्महामुने ॥ आवासं त्वहमिच्छामि प्रदिष्टमिह कानने ॥ ३३ ॥
राघवेणैवमुक्तस्तु शक्रतुल्यबलेन वै ॥ शरभङ्गो महाप्राज्ञः पुनरेवाब्रवीद्वचः ॥ ३४ ॥

पयानं इन्द्रागमननिमित्तं ॥ २७ ॥ कथं न्यवेदयदित्यत्राह—मामिति । सर्वेषां वरं ददातीति वरदः एष इन्द्रः मां ब्रह्मलोकं निनीषति नेतुमिच्छति । ब्रह्माज्ञयेति शेषः ॥ २८ ॥ तर्हि किमर्थं न गतोसीत्यत्राह—अहमिति । हे नरव्याघ्र अदूरतो वर्तमानं मनसि सदा सन्निहितं त्वां योगतो ज्ञात्वा प्रियातिथिं त्वामदृष्ट्वा त्वदनुभवानन्दं विहाय ब्रह्मलोकं आब्रह्मभवनाल्लोकाः पुनरावर्तिन इत्युक्तलोकं न गच्छामि ॥ २९ ॥ तर्हि केन साधनेन कं लोकं गमिष्यसीत्यत्राह—त्वयेति । धार्मिकेण धर्मस्वरूपेण । स्वार्थे ठक् । महात्मना सत्यसंकल्पेन त्वया समागम्य त्वत्कटाक्षविषयो भूत्वा । देवसेवितं "यत्र पूर्वे साध्याः सन्ति देवाः" इत्युक्तरीत्या नित्यसूरिसेवितं । त्रिदिवं त्रिपाद्विभूतिं ब्रह्मलोकादुत्कृष्टं । गमिष्यामि ब्रह्मलोकं न गच्छामि । त्रिदिवं गमिष्यामीत्यनेनायमर्थोवगम्यते ॥ ३० ॥ क्रमेण तथा भविष्यति आर्जितकर्मफलानि प्रथममनुभवेत्यत आह—अक्षया इति । ब्राह्म्याः ब्रह्मलोकभवाः । नाकपृष्ठ्याः स्वर्गलोकभवाः । अक्षयाः चिरकालस्थायिनः । ये लोकाः भोगभूमयः मया आर्जिताः तान्मामकान् प्रतिगृह्णीष्व मत्कृतानि सर्वाणि सुकृतानि त्वदर्पितानि सन्त्विति भावः । सर्वत्रातिथिसत्कारः प्रातीतिकोर्थः । कर्मणां भगवदर्पणं नाम फलसङ्गत्यागकर्तृत्वत्यागपूर्वकं भगवत्कैङ्कर्यतयानुष्ठानं ॥३१—३२ ॥ तदिदमङ्गीकुर्वन् तस्य वाचिककैङ्कर्यं नियमयति—अहमेवेति । आहरिष्याम्येव स्वीकरिष्याम्येव । सर्वलोकान् त्वया मय्यर्पितान् । इह कानने प्रदिष्टं त्वया निर्दिष्टं । आवासं त्विच्छामि तुशब्देन त्वदभिमतदेश एव वास इत्युच्यते । "सा काशीति न चाकशीति भुवि साऽयोध्येति नाध्यास्यते" इत्यादिकमिहानुसधेयम् ॥ ३३ ॥ महाप्राज्ञ इत्यनेन

तः ॥ २५ ॥ ति० रामस्तस्यपादौसंगृह्येति । रामस्येश्वरावतारत्वेपि क्षत्रियरूपेणावतीर्णत्वात् " यद्यदाचरतिश्रेष्ठः " इतिन्यायेन क्षत्रियमर्यादांप्रवर्तयतीतिसूचितं ॥ ती० हेनरव्याघ्र पुरुषोत्तम अदूरतोवर्तमानं बहुकालंमनसाध्यातं अधुनाममभाग्यवशेन बाह्येप्यदूरेवर्तमान प्रियातिथिं प्रियाअतिथयोभक्तायस्यतं त्वामदृष्ट्वा ब्रह्मलोकं नगच्छामि नगमिष्यामीत्यर्थः ॥ स० प्रियातिथिमित्यनेन ब्रह्मलोकापेक्षया रामदर्शनस्यानश्वरेष्टसाधनत्वंद्योतयति ॥ २९ ॥ ती० महात्मना महान् जगदाधारः आत्मा मूर्तिर्यस्य तेनत्वया ॥ ति० त्वत्समागमश्च सकृदपिसंवृत्तः एतावत्कालपर्यन्तानुष्ठितोपासनातोऽधिकफलदइतिभावः ॥३०॥ तनि० ब्राह्म्याः ब्रह्मलोकभवाः भोगप्रदेशविशेषाः । नाकपृष्ठ्याः स्वर्गलोकभवाः भोगप्रदेशविशेषाः । उभयत्र " दिगादिभ्योयत् " इतियत् । प्रतिगृह्णीष्वमामकानिति सर्वेश्वरेफलसमर्पणाभिप्रायेणोक्तं । अतिथिसत्कारविवक्षा प्रातीतिकी । उत्तरत्र " मत्प्रसादात्सभार्यस्त्वं विहरस्व सलक्ष्मणः " इतीदमपि फलसमर्पणाभिप्रायमेव । ति० तान्प्रतिगृह्णीष्व स्वकृतत्वेनाङ्गीकुरुष्व । अनेन सर्वकर्मणां भगवदर्पणमकरोदितिसूचितं । "कामतोकामतोवापियत्करोमिशुभाशुभम् । तत्सर्वंत्वयिसंन्यस्तंत्वत्प्रयुक्तःकरोम्यहम् । नाहंकर्तासर्वमेतद्ब्रह्मैवकुरुतेतथा । एतद्ब्रह्मार्पणप्रोक्तमृषिभिस्तत्वदर्शिभिः" इतिकौर्मोक्तिः यैर्जिताः भवत्कृपया स्वप्राप्तियोग्याः कृतास्तान्मामकाँल्लोकान् त्वंप्रतिगृह्णीष्व स्वकीयत्वेन जानीहि । एतेन तल्लोकेरघुनाथागमनंप्रार्थितमितिसूचितं ॥३१॥ ति० अहमेवेति । तपसेत्यर्थः त्वद्दत्तप्रतिग्रहे नाहमधिकारीत्यापाततोर्थः । वास्तवस्तु ऋषेः परमभक्तस्यानुग्रहाय तदर्पितधर्माङ्गीकारमाहभगवान्—अहमेवेति ॥ मयिन्यासत्वेनस्थापितानिमांस्त्वदर्जितान्सर्वलोकांस्तुभ्यमहमेवाहरिष्यामि प्रापयिष्यामीत्युक्त्वेतरजरनप्रतारणायाह—आवासंत्विति । तनि० अहमेवाहरिष्यामि संपादयामि प्रदास्यामीत्यर्थः "इष्टापूर्तंबहुधाजातंजायमानविश्वंवि-

[पा०] १ ख. घ. मजितात्मभिः. २ घ. त्वांदृष्ट्वाच. ३ ङ. झ. ट. चावरंपरं. ४ क. ङ.—ट. जितालोकामयाशुभाः. ख. मयालोकाःशुभाजिताः. ५ ग. ब्राह्म्यास्तु. ६ ग. रामतान्. ७ घ. छ. ज.ञ. शास्त्रविदांवरः. ८ ख. ग. स्वयंलोकान्, झ—ट. सर्वाँल्लोकान्. ९ ख. निर्दिष्टमिह. १० क. बलेनतु.

इह राम [1]महातेजास्सुतीक्ष्णो नाम धार्मिकः ॥ वसत्यरण्ये [2]धर्मात्मा स ते [3]श्रेयो विधास्यति ॥ ३५ ॥
सुतीक्ष्णमभिगच्छ त्वं [4]शुचौ देशे [5]तपस्विनम् ॥ रमणीये वनोद्देशे स ते वासं विधास्यति ॥ ३६ ॥
इमां मन्दाकिनीं राम प्रतिस्रोतामनु[6]व्रज ॥ नदीं [7]पुष्पोडुपवहां [8]तत्र तत्र गमिष्यसि ॥ ३७ ॥
एष पन्था नरव्याघ्र मुहूर्तं [9]पश्य तात माम् ॥ [10]यावज्जहामि गात्राणि जीर्णां त्वचमिवोरगः ॥ ३८ ॥
[11]ततोग्निं सुसमाधाय हुत्वा चाज्येन [12]मन्त्रवित् ॥ शरभङ्गो [13]महातेजाः प्रविवेश हुताशनम् ॥ ३९ ॥
तस्य रोमाणि केशांश्च [14]ददाहाग्निर्महात्मनः ॥ जीर्णां [15]त्वचं तथाऽस्थीनि यच्च [16]मांसं सशोणितम् ॥ ४० ॥
रामस्तु विस्मितो भ्रात्रा भार्यया च सहात्मवान् ॥ ४१ ॥
स च पावकसंकाशः कुमारः समपद्यत ॥ उत्थायाग्नि[17]चयात्तस्मा[18]च्छरभङ्गो व्यरोचत ॥ ४२ ॥
स लोकानाहिताग्नीनामृषीणां [19]च महात्मनाम् ॥ देवानां च व्यतिक्रम्य ब्रह्मलोकं व्यरोहत ॥ ४३ ॥

मृगरूपमारीचनिरसनं मनसि कृतवानिति सूचयति ॥ ३४ ॥ धार्मिकः धर्मचारी । धर्मात्मा धर्मबुद्धिः । वसति अदूर इति शेषः ॥ ३५—३६ ॥ मन्दाकिनीशब्दः पुण्यनदीमात्रे मुनिभिरुपचर्यते । अतएव चित्रकूटेप्युक्तं । प्रतिस्रोतामिति टाबार्षः । प्रतिस्रोतसं कृत्वाऽनुसृत्य व्रज नद्यां पूर्ववाहिन्यां पुरुषेण पश्चिमाभिमुखतया गमने प्रतिस्रोतस्त्वं भवति । पुष्पोडुपवहां उडुपः प्लवः उडुपाकारपुष्पचयावहामित्यर्थः । नदीं तत्र तत्र गमिष्यसीत्यनेन क्वचिन्नदीतीरे क्वचिद्व्यवहिते च मार्ग इत्युच्यते ॥ ३७ ॥ अनयोक्त्या सुतीक्ष्णाश्रममार्गो हस्तेन निर्दिश्यते । अथ मुनिः स्वदेहत्यागकाले रामसन्निधानमर्थयते—मुहूर्तं पश्य तात मामिति तात सर्वलोकजनक ॥ ३८ ॥ मन्त्रवित् ब्रह्ममेधमन्त्रवित् शरभङ्गः अग्निं सुसमाधाय परिस्तरणादिभिरलंकृत्य । आज्येन ब्रह्ममेधमन्त्रैर्हुत्वा हुताशनं प्रविवेश । अत्र विधिः "यद्युत्कण्ठा तदावाप्तौ ब्रह्ममेधानलं व्रजेत् । नाभिवक्त्रात्मगानग्नीनवरोप्य यथास्थलम् ॥ संस्कारयेत्" इति ॥ ३९—४१ ॥ अथास्य देवयानमार्गेण ब्रह्मलोकप्राप्तिं दर्शयति—सचेत्यादिना । कुमारलक्षणमुक्तं रत्नाकरे "बालोश्च पञ्चदशभिस्त्रिंशद्भिस्तु कुमारकः" इति ॥ ४२ ॥ ब्रह्मलोकं "तेर्चिषमभिसंभवन्त्यर्चिषोहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयति" इत्युक्तं ब्रह्मात्मकं लोकं ॥ ४३ ॥

मर्तिभुवनस्यनाभिः" इतिश्रुतेः । "लभतेचततःकामान्मयैवविहितान्हितान्" इति भगवदुक्तेश्च ॥ ३३ ॥ ति० मन्दाकिनीं तामिवपुण्यां तन्नामिकांवा चित्रकूटस्थेयमेव । पुष्पवल्लघूडुपवहां ॥ स० पुष्पाणिच नौकादीनिच वहतीति तां ॥ शि० प्रतिस्रोतां देवादिभिः प्रतिस्रोतस्त्वंप्रापितां पश्चिमाभिमुखं वाहितामित्यर्थः । मन्दाकिनीं तदवयवभूतामल्पधारां नदीं ॥ ३७ ॥ ती० तात जगज्जनक मांपश्य अयंकृतार्थोभवत्विति करुणाकटाक्षेणेतिशेषः । गात्राणीत्यवयवाभिप्रायेण । वृद्धश्शौचक्रियालुप्तः प्रत्याख्यातभिषक्क्रियः । आत्मानंघातयेद्यस्तुभृग्वग्न्यनशनादि(म्बु)भिः ॥' इति वचनाच्छरभङ्गस्याग्निप्रवेशस्समञ्जसइति ॥ स० जुहोमि अग्नाविति शेषः ॥ ३८ ॥ ति० वह्निः ददाहेतिशेषः ॥ ४० ॥ ति० आहिताग्निलोकाः कर्मणा पितृलोकइति श्रुताश्चन्द्रप्रदक्षिणाः ऋषिलोकाः । "विद्ययादेवलोकः" इति श्रुतास्सूर्यप्रदक्षिणाः । देवानां आजानदेवानां ब्रह्मविष्णुरुद्राणांच लोकाः यान्ध्रुवःप्रदक्षिणीकरोति । ततोब्रह्मलोकंतुर्यं । व्यरोहत आरूढवान् । स० ऋषीणां कश्यपादीनां । ब्रह्मलोकं भगवद्द्वारत्वेनेत्यर्थः । "स्वगतिंतथादात्" इत्याचार्योक्तेः ॥ ४३ ॥

[पा०] १ क. महाप्राज्ञः. २ ङ. झ. ट. नियतः. ३ ख. ग. वासं. ४ घ. शुचिदेशे. ५ क. छ. तपस्विनां. ६ क. च. छ. ज. ञ. मभिव्रज. ७ ख. पुष्पोत्करवहां ८ क. ख. ग. ज.—ञ. ततस्तत्र. ९ क. छ. ज. पश्यतांतु. १० ठ. यावज्जुहोमि. ११ क. ख. ग. ङ. झ. ठ. ततोऽग्निंस. छ. ज. ञ. ततोवह्निंसमाधाय. १२ ग. ङ. झ. ञ. ट. मन्त्रवद्. १३ क. च. छ. ज. ञ. महाप्राज्ञः. १४ ङ. झ. ट. तदावह्निः. १५ क. ग. च. छ. ज. ञ. त्वचमथा. झ. त्वचंतदस्थीनि. १६ घ. झ. मांसंच. १७ क. चितात्. १८ ग. च्छरभङ्गोप्यरोचत. १९ क. च. छ. ज. ञ. च. सुकर्मणां. ख. ग. भावितात्मनां.

स पुण्यकर्मा भवने द्विजर्षभः पितामहं सानुचरं ददर्श ह ॥
पितामहश्चापि समीक्ष्य तं द्विजं ननन्द सुस्वागतमित्युवाच ह ॥ ४४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे प्रथमः सर्गः ॥ ५ ॥

षष्ठः सर्गः ॥ ६ ॥

शरभङ्गाश्रमेमुनिगणैःश्रीरामंप्रतिराजधर्मकथनपूर्वकंस्वेषांराक्षसकृतपीडानिवेदनेनतद्वधप्रार्थनम् ॥ १ ॥ रामेणसबहुमानंतेभ्योऽभयप्रदानपूर्वकंसुतीक्ष्णाश्रमंप्रतिप्रस्थानम् ॥ २ ॥

शरभङ्गे दिवं याते मुनिसङ्घाः समागताः ॥ अभ्यगच्छन्त काकुत्स्थं रामं ज्वलिततेजसम् ॥ १ ॥
वैखानसा बालखिल्यास्संप्रक्षाला मरीचिपाः ॥ अश्मकुट्टाश्च बहवः पत्राहाराश्च धार्मिकाः ॥ २ ॥
दन्तोलूखलिनश्चैव तथैवोन्मज्जकाः परे ॥ गात्रशय्या अशय्याश्च तथैवाभ्रावकाशकाः ॥ ३ ॥

अत्र पितामहशब्दोपि सविग्रहपरमात्मपरः । सर्वमिदं शरभङ्गस्य रामसान्निध्यप्रतीक्षया ध्वन्यते । अस्मिन्सर्गे चतुश्चत्वारिंशच्छ्लोकाः ॥ ४४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चमः सर्गः ॥ ५ ॥

एवं खरवधार्थिमुनिजनशरणागतिं वक्तुं तदुपयोगितया रामस्य समर्थकारुणिकत्वमुक्त्वा अथ तच्छरणागतिं वक्तुमुपक्रमते—शरभङ्ग इत्यादि । शरभङ्गे दिवं याते इति कालप्रदर्शनं सुतीक्ष्णादीनां विद्यमानत्वात् । समागताः संमिलिताः ॥ १ ॥ वैखानसा इत्यादि । "ये नखास्ते वैखानसाः ये बालास्ते बालखिल्याः" इत्युक्तरीत्या भगवन्नखरोमजाता ऋषयः । सदाशरीरं संप्रक्षालयन्तीति संप्रक्षालाः । मरीचीश्चन्द्रसूर्यादिकिरणान् सदा पिबन्तीति मरीचिपाः । सदाऽन्तःकिरणान् प्रवेशयन्तः विवृतास्या इत्यर्थः । अश्मभिरालब्धशरीराणि कुट्टन्तीत्यश्मकुट्टाः । पत्राहाराः पर्णाशनाः ॥ २ ॥ दन्ता एवोलूखलं तदेषामस्तीति दन्तोलूखलिनः दन्तैरेव व्रीह्यादितुषनिर्मोकंकृत्वा भक्षयन्तइत्यर्थः । उन्मज्जकाः शिरोमात्रमुद्धृत्य सदा जलावगाढाः । गात्रमेव शय्या येषां ते गात्रशय्याः । उरसि पृष्ठेऽसथोर्वा शिरः कृत्वा शयाना इत्यर्थः । अतो न स्थण्डिलशायिन इत्यनेन पुनरुक्तिः । अशय्याः अनभ्रगात्रा इत्यर्थः । अभ्रावकाशकाः

ति० पितामहं ब्रह्मादित्रयसमष्टिरूपं ॥ ४४ ॥ इतिपञ्चमस्सर्गः ॥ ५ ॥

ती० मुनिसंघा काकुत्स्थं ककुत्स्थान्वयेऽवतीर्णं । रामं "रमन्तेयोगिनोऽनन्ते" इतिश्रुतेः परंब्रह्म । अभ्यगच्छन्त द्रष्टुं किंविद्विज्ञापयितुंचेतिशेषः । अयंभावः—स्वप्रकाशंपरंब्रह्मैव ककुत्स्थान्वयेऽवतीर्णं सद्भाग्यवशेनास्मद्दृष्टिगोचरोऽभूत् । अतोस्मत्पोदानादिकमस्य फलितमिति दर्शनानन्देन कृतार्थंभवितुं निर्धनस्यधनलाभेयथा तद्ददानन्दनिर्भरामुनिसंघा नानादिग्भ्यस्समागताइति ॥ १ ॥ **ती०** वैखानसादयस्तपोविशेषबलब्धसंज्ञास्तापसविशेषाः । यद्वा वैखनसमुनिनाप्रोक्तंसूत्रमधिकृत्य तन्मार्गानुसारिणो वैखानसाः । बालखिल्यास्तु नवेऽप्रेलब्धे पूर्वसंचितत्यागिनः । संप्रक्षालास्तु भगवतःश्रीपादप्रक्षालनजाता महर्षयः । यद्वा प्रत्यहं जीवनसाधनंसंपाद्य सर्वंतद्विनियुज्यवर्तन्ते ये ते वा संप्रक्षालाः । अश्वस्तनिकाइत्यर्थः । अश्मकुट्टास्तु भक्षणार्थंप्रियंग्वादीनश्मन्येवकुट्टयन्तीतितथा । अश्मकुट्टाः अपक्वकुट्टितान्नभक्षकाः ॥ **स०** विखनसःप्रजापतेर्जाताविखानसाः । विखनसाप्रोक्तंसूत्रमधीयन्ते वैखानसाइतिवा । "तेनप्रोक्त"मित्यणन्तात् "तदधीते—" इत्यणि तस्य "प्रोक्ताल्लुक्" इतिलुक् अनुशतिकादिनिवेशादुभयपदवृद्धिः । संप्रक्षालाः निरन्तरं भक्षप्रक्षालितोदकोपजीविनोवा संप्रक्षालितपात्रावा अश्वस्तनिकाइतियावत् । अश्मकुट्टकाः कुट्टितान्नभक्षकाः ॥ २ ॥ **ती०** उन्मत्तकाइतिपाठे उद्गतः मत्तोमात्सर्यं येषां ते तथा । स्वार्थेकः । यद्वा ज्ञानिनः बालोन्मत्तपिशाचवदितिस्मरणात्तथा । ये कदाचिदपि नक्षोरते ते अशय्याः । अभ्रवकाशिनइतिपाठे अभ्रवकाशिनः सदाजाग्रत्स्वभाविनः । **स०** उन्मज्जकाः सदाज्ञानपराः उपदेशादिनेतरमज्जकावा । अनवकाशकाः सर्वदाभगवदुपासनेनेतरव्यासंगार्थमवकाशरहिताः । **ति०** अनवकाशिकाः एकपादस्य स्थिरस्यावकाशदानरहिताः । एकपादस्थितिमन्तइतियावत् । **शि०** गात्रशय्या गात्रावयवानि

[पा०] १ क.—ट. भुवने. २ घ. ङ. मित्युवाच. ३ क.—ट. प्राप्ते. ४ ग. घ. ङ. छ. झ. ट. तापसाः. ५ घ. गतशय्याश्चार्याश्च. ६ क. झ. ट. तथैवानवकाशिकाः.

मुनयः सलिलाहारा वायुभक्षास्तथा परे ॥ आकाशनिलयाश्चैव तथा स्थण्डिलशायिनः ॥ ४ ॥
व्रतोपवासिनो दान्तास्तथाऽऽर्द्रपटवाससः ॥ सजपाश्च तपोनित्यास्तथा पञ्चतपोऽन्विताः ॥ ५ ॥
सर्वे त्राढ्या श्रिया जुष्टा दृढयोगाः समाहिताः ॥ शरभङ्गाश्रमे राममभिजग्मुश्च तापसाः ॥ ६ ॥
अभिगम्य च धर्मज्ञा रामं धर्मभृतां वरम् ॥ ऊचुः परमधर्मज्ञमृषिसङ्घाः समाहिताः ॥ ७ ॥
त्वमिक्ष्वाकुकुलस्यास्य पृथिव्याश्च महारथ ॥ प्रधानश्चासि नाथश्च देवानां मघवानिव ॥ ८ ॥
विश्रुतस्त्रिषु लोकेषु यशसा विक्रमेण च ॥ पितृभक्तिश्च सत्यं च त्वयि धर्मश्च पुष्कलः ॥ ९ ॥
त्वामासाद्य महात्मानं धर्मज्ञं धर्मवत्सलम् ॥ अर्थित्वान्नाथ वक्ष्यामस्तच्च नः क्षन्तुमर्हसि ॥ १० ॥

वर्षवातातपादिष्वप्यनावृतदेश एव वर्तमानाः ॥ ३ ॥ सलिलाहाराः सलिलमात्राहाराः । वायुभक्षाः वायुमात्रभक्षाः । आकाशे वृक्षाग्रादौ निलीयन्तइत्याकाशनिलयाः । स्थण्डिले कुशाद्यास्तृतभूतले शेरत इति स्थण्डिलशायिनः ॥ ४ ॥ व्रतोपवासिनः व्रतोपवासनिरताः । सर्वाहारशून्या इत्यर्थः । आर्द्रपटवाससः आर्द्रपटवसनशीलाः । सजपाः सदाजपशीलाः । तपोनित्याः "स्वाध्यायमधीते तपएव तप्यते तपो हिस्वाध्यायः" इत्युक्तसदास्वाध्यायपारायणरूपतपोनिष्ठाः । पञ्चतपोन्विताः ग्रीष्मे पञ्चाग्निमध्यस्थाः ॥ ५ ॥ त्राढ्या श्रिया ब्रह्मविद्यानुष्ठानजनितब्रह्मवर्चसेन । दृढः परिपक्वः योगो यमनियमाद्यष्टाङ्गयोगो येषां ते दृढयोगाः । समाहिताः योगैकाग्रचित्ताः । एवंभूतास्तापसाः राममभिजग्मुरित्यन्वयः । मुनिवैविध्योक्तिर्दर्शनीयत्वाय । अत्राभिजग्मुरित्यनेन शरणागतिरुक्ता ॥ ६—७ ॥ इक्ष्वाकुकुलस्य प्रधानः पृथिव्याश्च नाथः । प्रथमे दृष्टान्तः—देवानामिति । यथादेवेन्द्र इति शक्रस्य नाम तथा रघुपतिरिसि तव नामेत्यर्थः ॥ ८ ॥ यशसा शरभङ्गानुग्रहकीर्त्या । विक्रमेण विराधनिरसनेन च त्रिषु लोकेषु भूर्भुवःसुवर्लोकेषु । विश्रुतः प्रसिद्धः । पितृभक्तिस्त्वयि पुष्कला तद्वचनेन लब्धस्यापि राज्यस्य त्यागात् सत्यं सत्यवचनं च । त्वयि पुष्कलं भरतप्रार्थनयापि प्रतिज्ञातस्याभञ्जनात् । धर्मश्च त्वयि पुष्कलः शरभङ्गानुग्रहात् ॥ ९ ॥ धर्मज्ञं धर्मवत्सलमित्युक्तानुवादः । अर्थिनो याचकास्तेषां भावोऽर्थित्वं याच्ञेत्यर्थः । सा च रक्षोनिरसनविषया तया त्वां किंचिद्वक्ष्यामः तत् क्षन्तुमर्हसि आर्ततया त्वदभ्यागमनमेव कार्यसाधनं आर्त्यतिशयेन विज्ञापनं तु क्षमस्वेत्यर्थः । एतेन उपायत्वाध्यवसाय एव चेतनस्य कृत्यं प्रार्थनं तु न कर्तव्यं । हठात्कृतेपि क्षमापणं कर्तव्यमित्युक्तं भवति ॥ १० ॥

व्याघ्रचर्मादीनि शय्या येषांते ॥ ३ ॥ ती० आकाशनिलयाः आकाशएव वायुधारणबलेन ये निलीयन्ते तेतथा ॥४॥ ति० ऊर्ध्ववासिनः गिरिशिखराद्यूर्ध्वप्रदेशे निवसंवासशालिनः ॥५॥ स० दृढयोगसमाहिताः दृढंयोगस्समाहितोयेषु । यद्वा दृढंयोगाः अभिमादयोवा समाहिताःयेषु । यद्वा दृढयोगाः अत्यन्तसंबन्धवन्तः पुत्रादयोबान्धवाश्च । तैस्समाः अहिता येषांते । "सुहृन्मित्रार्युदासीन—" इत्यादेः समबुद्धयइतियावत् ॥ ६ ॥ ती० त्वमित्यादिश्लोकद्वयस्य प्रातीतिकार्थस्पष्टः । वस्तुतस्तु देवानांमघवानिव इक्ष्वाकुकुलस्य इक्ष्वाकुकुलमात्रस्य पृथिव्याश्च पृथिवीमात्रस्यच प्रधानोनाथश्चेतिकाकुः । किंतु जगद्धारणपोषणकर्ता । अतएव निरवधिकेनयशसा विक्रमेणच त्रिषुलोकेषु सर्वलोकेषु विश्रुतः सकललोकाधीश्वरइतिशेषः । तथापि क्षत्रियरूपेणावतीर्णस्यास्मदादिलोकशिक्षार्थं पितृव्रतत्वं पित्रर्थंव्रतंयस्यपितृव्रतः तस्यभावस्तत्त्वं पितृवचनपरिपालकत्वमितियावत् । सत्यं सत्यवचनत्वं । पुष्कलं अधिकोधर्मश्च लभ्यतीत्यर्थः । ति० किंच त्वयिस्मृते धर्मश्चपुष्कलः अक्षहीनोपि सकलाक्षपूर्णो भवतीत्यर्थः । "प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुच । तद्विष्णोस्स्मरणादेवसंपूर्णंस्यादितिश्रुतिः" इतिस्मृतेः । स० यशसा विक्रमेणच विश्रुतः । यशस्वी विक्रमीचेति प्रसिद्धइत्यर्थः । त्वयि विक्रमेणापि विरुद्धं क्रमः कनिष्ठराज्यप्रदानरूपस्तेनापि त्यागहेतौसत्यपीतियावत् । पितृव्रतत्वं पित्रनुव्रतत्वं

[पा०] १ क. च. ज. ञ. मासोपवासिनो. ख. घ. तथोपवासिनो. ग. ङ. झ. तथोर्ध्ववासिनो. २ ङ. झ. ट. तपोनिष्ठाः. ३ ङ. झ. ञ. ट. युक्ताः. ४ ङ. झ. ञ. ट. योगसमाहिताः. छ. ज. योगा·सहस्रशः. ५ घ. अभिजग्मुश्च. ६ घ. ङ. ञ. ट. समागताः. क. सहस्रशः. ७ क. इक्ष्वाकूणांकुलस्यास्य. ८ क. ङ.—ट. महारथः. ९ घ. ङ. झ. ट. क्वापि. १० ग. विश्रुताः. घ. विश्रुतं. ११ क. ख. ङ. ट. पितृव्रतत्वं. १२ घ. धर्माश्चपुष्कलाः.

अधर्मस्तु महांस्तात भवेत्तस्य महीपतेः ॥ यो हरेद्बलिषड्भागं न च रक्षति पुत्रवत् ॥ ११ ॥
युञ्जानः स्वानिव प्राणान्प्राणैरिष्टान्सुतानिव ॥ नित्ययुक्तः सदा रक्षन्सर्वान्विषयवासिनः ॥१२॥
प्राप्नोति शाश्वतीं राम कीर्तिं स बहुवार्षिकीम् ॥ ब्रह्मणः स्थानमासाद्य तत्र चापि महीयते ॥१३॥
यत्करोति परं धर्मं मुनिर्मूलफलाशनः ॥ तत्र राज्ञश्चतुर्भागः प्रजा धर्मेण रक्षतः ॥ १४ ॥
सोयं ब्राह्मणभूयिष्ठो वानप्रस्थगणो महान् ॥ त्वन्नाथोऽनाथवद्राम राक्षसैर्बाध्यते भृशम् ॥ १५ ॥
एहि पश्य शरीराणि मुनीनां भावितात्मनाम् ॥ हतानां राक्षसैर्घोरैर्बहूनां बहुधा वने ॥ १६ ॥
पम्पानदीनिवासानामनुमन्दाकिनीमपि ॥ चित्रकूटालयानां च क्रियते कदनं महत् ॥ १७ ॥

स्वविषये रामेण रक्षणं स्वाभाविकमिति दर्शयिष्यन्तः औपाधिकलौकिकराजरक्षणप्रकारं दर्शयन्ति—अधर्मस्त्वित्यादिना । यः प्रजाभ्यो बलिषड्भागं हरति हृत्वा च ताः न रक्षति तस्य महानधर्मः । बलिः करः । "भागधेयःकरोबलिः" इत्यमरः । षष्ठो भागः षड्भागः लुप्तपूरणो निर्देशः बलिश्चासौ षड्भागश्च बलिषड्भागः ॥ ११ ॥ एवमरक्षणे प्रत्यवायमुक्त्वा रक्षणेऽभ्युदयमाहुः—युञ्जान इति । युञ्जानो यतमानः । नित्ययुक्तो नित्यावहितः । सर्वान् स्वविषयवासिनः स्वकीयान् प्राणानिव प्राणैः प्राणेभ्योपि । इष्टान् सुतानिव च यो रक्षति स महीपतिः बहुवार्षिकीं बहुकालस्थायिनीं । शाश्वतीं अनुवृत्तां । "मुहुःपुनःपुनःशश्वत्" इतिबाणः । भवार्थेण् । तोङीप् । कीर्तिं प्राप्नोति । ब्रह्मणः स्थानमासाद्य तत्र ब्रह्मणा महीयते पूज्यते च ॥ १२—१३ ॥ यस्तु करप्रदानासमर्थो मुनिजनस्तद्रक्षणं कुत इत्यत्राह—यदिति । यद्धर्मं तत्र धर्मे राज्ञः चतुर्भागः चतुर्थांशोभवति ॥ १४ ॥ एवं धर्माय प्रजारक्षकस्य फलमुक्त्वा धर्मानपेक्षे रामे शरणागतिरेव रक्षणहेतुरित्याहुः—सोयमित्यादिना । सः पूर्वोक्तवैखानसादिरूपः । ब्राह्मणाः भूयिष्ठाः अधिकाः यस्मिन् स ब्राह्मणभूयिष्ठः । क्षत्रियवैश्यवानप्रस्थसंभवाद्ब्राह्मणभूयिष्ठ इत्युक्तं । यद्वाब्राह्मणाः ब्रह्मविदः । "तदधीतेतद्वेद" इत्यण् । वानप्रस्थानां तृतीयाश्रमिणां गणः त्वं नाथो यस्यासौ त्वन्नाथः । अनाथवद्बाध्यते ॥ १५ ॥ बाधामेव दर्शयन्ति—एहीत्यादिना । दूरे सम्यङ् नदृश्यत इत्यत एहि पश्येत्युक्तं । भावितात्मनां ध्यातात्मनां । बहुधा छेदनभेदनभक्षणादिभिः ॥ १६ ॥ हतानां बहूनामित्युक्तं विवृणोति—पम्पेति । अनुमन्दाकिनीमपीति अनुर्ल-

विश्रुतमिति विपरिणामेनान्वयः । यद्वा हेपितृव्रत त्वं विश्रुत इत्यन्वयः ॥ ८ ॥ ९ ॥ स० बलयश्चते षट्च बलिषण्णांभागो यस्य तं षष्ठांशमितियावत् । पूरणार्थकप्रत्ययलोपोवा ॥ ११ ॥ स० शाश्वतीं बहुकालसंबन्धिनीं । बहुवार्षिकीं बह्वीचसा वार्षिकीच रक्षकसंबन्धिनीं तां कीर्तिं प्राप्नोतीत्यन्वयः । "वार्षिकंत्रायमाणंस्याद्वर्षाकालभवेऽन्यवत्" इतिविश्वः । शि० बहुवार्षिकीं भारतानेकखण्डसंबन्धिनीं । शाश्वतीं नित्यां ॥ १३ ॥ ती० ननु क्वचित्षष्ठोभागउच्यते अत्र चतुर्थोभागोभण्यते क्वचिद्द्वितीयोभागः पठ्यते तत्कथमितिचेदुच्यते उपवासिभिक्षाहारजनकृतधर्मात्षष्ठोभागः । राजपरिपालितदेशसंभूतफलाशिनोधर्माच्चतुर्थोभागः । तदन्नपानपुष्टाङ्गजनस्य धर्माद्द्वितीयोभागः । "यस्यान्नपानपुष्टाङ्गः कुरुतेधर्मसंचयम् । अन्नप्रदातुस्तस्यार्धंकर्तुश्चार्धंनसंशयः" इतिस्मरणात् । ति० यदिति सामान्ये नपुंसकं । प्रजाः वानप्रस्थप्रजाः । स० "स्याद्धर्ममस्त्रियां" इत्यमरात् यद्धर्ममिति संभवति ॥ १४ ॥ तनि० सोयंब्राह्मणभूयिष्ठइत्यनेन क्षत्रियवैश्यवानप्रस्थाश्च केचिदिह संतीति व्यज्यते । यद्वा ब्रह्मविद्ब्राह्मणः । ब्राह्मणत्वादिपरमैकान्तिकधर्मनिष्ठइत्यर्थः । अतएव त्वन्नाथइत्येकंपदं । त्वमेव नाथोयस्य सः । तेनानन्यशेषत्वमुक्तं । तस्यैव नाथनीयत्वेनानन्यसाधनत्वानन्यभोग्यत्वे कथिते । अतएव महान् निरतिशयमहिमयुक्तः । तथाविधोप्यनाथवदयं बध्यते । अस्मत्पराभवोनाथ नतेऽनुरूपइतिभावः । स० त्वां नाथत इतिवा प्रार्थयतइत्यर्थः ॥ १५ ॥ तनि० मुनीनां सर्वेश्वरमननपराणां । भावितात्मनां निदिध्यासननिष्ठानां हतानांशरीराणिपश्येति कारुण्यातिशयोत्पादनायोक्तं । बहुधाहतानां अङ्गप्रत्यङ्गशस्त्रभिन्नानामस्माकं शरीराणि पश्येतिव्यज्यते ॥ स० बहुधा खड्गादिनानाशस्त्रेण ॥१६॥ ति० सकलदण्डकारण्यपीडामाहुः—पंपेत्यादि ।

[पा०] १ क.—ट. अधर्मस्सुमहान्नाथ. २ क.—ट. तस्यतुभूपतेः. ३ ग. प्रजाःस्वानिवचप्राणान्स्वसुतानिवनित्यशः. ४ च. छ. म. न्प्राणिनःस्वान्सुतानिव. ५ च.—झ. तत्रापिच. ६ क.—घ. च. छ. ज. ञ. यःकरोति. ७ क. च. छ. ज. ञ. पर्णमूल. ८ ग. रक्षितुं. ९ क.—घ. च. ज. ञ. वध्यते. ङ. झ. ट. हन्यते. १० घ. भीतानां. ११ क. ख. ग. पंपावननिवासानां.

एवं वयं न मृष्यामो विप्रकारं तपस्विनाम् ॥ क्रियमाणं वने घोरं रक्षोभिर्भीमकर्मभिः ॥ १८ ॥
ततस्त्वां शरणार्थं च शरण्यं समुपस्थिताः ॥ परिपालय नो राम वध्यमानान्निशाचरैः ॥ १९ ॥
परा त्वत्तो गतिर्वीर पृथिव्यां नोपपद्यते ॥ परिपालय नः सर्वान्राक्षसेभ्यो नृपात्मज ॥ २० ॥
एतच्छ्रुत्वा तु काकुत्स्थस्तापसानां तपस्विनाम् ॥ इदं प्रोवाच धर्मात्मा सर्वानेव तपस्विनः ॥२१॥
नैवमर्हथ मां वक्तुमाज्ञप्तोऽहं तपस्विनाम् ॥ केवलेनात्मकार्येण प्रवेष्टव्यं मया वनम् ॥
विप्रकारमपाकर्तुं राक्षसैर्भवतामिमम् ॥ २२ ॥
पितुस्तु निर्देशकरः प्रविष्टोऽहमिदं वनम् ॥ भवतामर्थसिद्ध्यर्थमागतोऽहं यदृच्छया ॥ २३ ॥
तस्य मेऽयं वने वासो भविष्यति महाफलः ॥ २४ ॥

क्षणे कर्मप्रवचनीयः । मन्दाकिनीं शरभङ्गाश्रमवाहिनीं । मन्दाकिन्यास्तटवासिनामित्यर्थः । कदनं हिंसा ॥ १७ ॥ शरीराण्युपेक्ष्य तपस्यतां किं हिंसाभयेनेत्याशङ्क्य न वयं स्वशरीरपीडातो भीताः किंतु महत्सु गरीयस्सु क्रियमाणं कदनं न मृष्याम इत्याहुः—एवमिति । विप्रकारं निकारं । "निकारोविप्रकारः—स्यात्" इत्यमरः । स्वजनपीडा दुःसहेति भावः ॥ १८ ॥ शरणार्थं रक्षणार्थं । समुपस्थिताः प्रपन्नाः । "गत्यर्थाकर्मक—" इत्यादिना कर्तरि क्तः ॥ १९ ॥ त्वत्तः परा अन्या । गतिः उपायः नोपपद्यते । पृथिव्यामिति सर्वभुवनोपलक्षणं । तथाच श्रुतिः । "नान्यः पन्था अयनाय विद्यते" इति । इत्यूचुरिति पूर्वेणान्वयः ॥ २० ॥ तपस्विनां प्रशस्ततपसां । तापसानां मुनीनां ॥ २१ ॥ शरणागतैवाऽऽज्ञप्तोहं परिपालयेत्यादिकं वक्तुं नार्हथ । केवलेनात्मकार्येण केवलात्मप्रयोजनत्वेन । राक्षसैः क्रियमाणं भवतामिमं विप्रकारं अपाकर्तुं निवर्तयितुं । मया वनं प्रवेष्टव्यं प्रविष्टं । "तयोरेव कृत्यक्तखलर्थाः" इति कर्मणि तव्यप्रत्ययः । स्वतो मत्प्रयोजनरूपं भवद्विरोधिनिरसनं कर्तुमेवेदं वनं प्रविष्टोस्मीत्यर्थः । शेषभूतरक्षणस्य शेषिप्रयोजनत्वादिति भावः ॥ २२ ॥ पितृवाक्यपरिपालनाय वनं प्रविष्टोसीति किंवदन्त्याः का गतिरित्यत्राह—पितुरिति । अहं भवतामर्थसिद्ध्यर्थमागतोस्मि यदृच्छया दैवगत्या । पितुर्निर्देशकरः वनमिदं प्रविष्टोस्मि । पितृवाक्यकरणव्याजेन भवदर्थसिद्ध्यर्थमेवागतोस्मीतिभावः ॥ २३ ॥ भवत्कार्यार्थमेवागतस्य मे वने

पंपा च नद्यश्च तन्निवासो येषांतेषां । पंपारूपा नदीवा । अनुमन्दाकिनीमपीति । मन्दाकिन्या अत्रत्यपुण्यनद्यास्तीरवासिनां । मन्दाकिन्याविस्तीर्णप्रवाहत्वादुरवगाहतयापृथगुल्लीराघवाख्याने । स० मन्दाकिनीमित्यनेनाख्यास्वर्णदीत्वं पंपादीनांचभूनदीत्वं सूच्यते ॥ १७ ॥ तनि० शरण्यमितिनिरुपपदेन सर्वलोकशरण्यत्वमुक्तं । तेन तदुपयुक्तगुणास्त्वामित्यादयः पूर्वखण्डनारायणपदोक्तास्मारिताः । शरणार्थं उपायान्तरस्थाने निवेशयितुमित्यर्थः । समुपागताः विश्वासायज्ञसंपत्तिपूर्वकरक्षाभरसमर्पणं कृतवन्तः । नःपरिपालयेति गोप्तृत्ववरणोक्तिः । उत्तरार्धेनानिष्टनिवृत्तिरूपफलप्रार्थना पर्यवसिता ॥ १९ ॥ तनि० उत्तरखण्डविवरणमाकिंचिन्मनसिकृत्याह—परेति । त्वत्तः सिद्धोपायात्परा । गतिः । यद्वा "नान्यःपन्थाअयनायविद्यत" इति श्रुत्यर्थं मनसिकृत्याह—परेति । पृथिव्यांनोपपद्यते यस्मात्परिमितफलमिश्रायुक्तबहुदोषदुष्टत्वादितिभावः । नस्सर्वानिति आत्मात्मीयसर्वसंग्रहः । राक्षसेभ्यइति सर्वानिष्टोपलक्षणं । स० यतोहइतिशेषः । यतस्त्वत्तः परागतिः पृथिव्यांनोपपद्यते अतः परिपालयेत्यन्वयः ॥ २० ॥ स० एवं क्षन्तुमर्हसीत्यादिरूपेण । आज्ञाप्यः नियोज्यः । केवलेन मुख्येनस्वकार्येण चतुर्दशवर्षवनवासरूपकार्येणेत्यर्थः ॥ २२ ॥ स० भवतां विप्रकारमपाकर्तुं पितुर्निर्देशकरश्च वनंप्रविष्टइत्यन्वयः । तुना मद्वनगमनं पितृनिर्देशकरणभवद्विप्रकारापाकरणरूपप्रयोजनवदिति विशेषस्सूच्यते । ति० यदृच्छयाऽऽगतएवाहं भवतामर्थसिध्यर्थमपि भविष्याम्येवेतिशेषः ॥ २३ ॥ पितुस्त्वित्यनेनोक्तएवार्थः कविना श्लोकान्तरेण वर्ण्यते । इयमपिशैली कवेरिति कृतकृतीयौ । यतश्शत्रून्हन्तुमिच्छामि अतस्तस्य यदृच्छया वनमागतस्य मेऽयं वनवासो महाफलोभविष्यतीति स्वगतोविचारः । अथ ऋषिधैर्याय प्रकाशंप्रतिजानीते—पश्यन्त्विति । ति० तस्य भवत्कार्यार्थमेवागतस्य मे वनवासः तपस्विनांमहाफलः अतः रणे तपस्विनांशत्रून्हन्तुमिच्छामीति योजनीयं । महाफलं नाम अनिष्टनिवृत्तिपूर्वकेष्टप्राप्तिरूपं ॥ स० तपस्विनांशत्रून्हन्तुमि-

[पा०] १ ख. एवंविधं. २ क. च. छ. ज. ञ. भीमविक्रमैः. ३ घ. समुपागतान्. ४ क.—ट. माज्ञाप्योहं. ५ क. ङ. ञ. छ. झ. ञ. ट. केवलेनस्वकार्येण. ज. केवलेनच. ख. ग. घ. केवलेनैव. ६ क.—ट. वनंमया. ७ घ. महोदयं.

तपस्विनां रणे शत्रून्हन्तुमिच्छामि राक्षसान् ॥ पश्यन्तु वीर्यमृषयः सभ्रातुर्मे तपोधनाः ॥ २५ ॥
देत्त्वाऽभयं चापि तपोधनानां धर्मे धृतात्मा सह लक्ष्मणेन ॥
तपोधनैश्चापि समाज्यवृत्तः सुतीक्ष्णमेवाभिजगाम वीरः ॥ २६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे षष्ठः सर्गः ॥ ६ ॥

सप्तमः सर्गः ॥ ७ ॥

रामेणसीतालक्ष्मणाभ्यांसहसुतीक्ष्णाश्रममेत्यतदभिवादनपूर्वकंतंप्रतिस्वावासस्थानप्रदर्शनप्रार्थना ॥ १ ॥ सुतीक्ष्णेन-रामंप्रतिस्वाश्रमस्यवासोपयोगिगुणवत्ताकथनपूर्वकंमृगगणप्रलोभनरूपदोषोत्कीर्तनेनरामेणतंप्रतिस्वस्यतत्रवासानभिरोचनो-क्तिः ॥ २ ॥

रामस्तु सहितो भ्रात्रा सीतया च परंतपः ॥ सुतीक्ष्णस्याश्रमपदं जगाम सह तैर्द्विजैः ॥ १ ॥
स गत्वाऽदूरमध्वानं नदीस्तीर्त्वा बहूदकाः ॥ ददर्श विपुलं शैलं महामेघमिवोन्नतम् ॥ २ ॥
ततस्तदिक्ष्वाकुवरौ संततं विविधैर्द्रुमैः ॥ काननं तौ विविशतुस्सीतया सह राघवौ ॥ ३ ॥
प्रविष्टस्तु वनं घोरं बहुपुष्पफलद्रुमम् ॥ ददर्शाश्रममेकान्ते चीरमालापरिष्कृतम् ॥ ४ ॥
तत्र तापसमासीनं मलपङ्कजटाधरम् ॥ रामस्सुतीक्ष्णं विधिवच्चपोवृद्धमभाषत ॥ ५ ॥

वासो महाफलो भविष्यति ॥ २४ ॥ तदेवफलमाह —तपस्विनामिति । तपस्विनां शत्रून् रणे हन्तुमिच्छामि इतीदं प्रोवाचेत्यन्वयः ॥ २५ ॥ अभयमिति छेदः । धृतात्मा निश्चलमनाः । तपोधनैः ऋषिभिश्च समाज्यवृत्तः पूज्याचारः ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षष्ठःसर्गः ॥ ६ ॥

अथ सुतीक्ष्णाभ्यर्थनया मृगरूपमारीचादिदुष्टराक्षसनिरासःसप्तमे । आश्रमपदं तद्दिदृक्षेति शेषः । तैर्द्विजैः वैखानसादिभिः ॥ १ ॥ अदूरमितिच्छेदः । पूर्वं शरभङ्गेन "इह राम महातेजाः" इति सुतीक्ष्णाश्रमस्यादूरत्वोक्तेर्नदीरिति बहुवचनमेकस्या एव मन्दाकिन्याः बहुप्रदेशेष्वावृत्त्या । बहूदकाः विपुलोदकाः । नौतार्यत्वानुक्तेः शैलं शैलसंबन्धिवनं काननमित्यनुवादात् । तस्येदमित्यण् । महामेघमिवेति श्यामिकायामुपमा ॥ २ ॥ द्रुमैः संततं व्याप्तं । इक्ष्वाकुवरौ राघवावित्युभयथा धैर्यमूलोक्तिः ॥ ३ ॥ चीरमालया वल्कलपङ्क्त्या परिष्कृतं अलंकृतं ॥ ४ ॥ मलपङ्कजटाधरं नित्यनिश्चलतपोयोगेन वा वार्धकेन वा मलपङ्क-

---

च्छामीति पारोक्ष्यनिर्देशेन पश्यन्त्विति पारोक्ष्येण निर्देशस्संभवति ॥ २४ ॥ २५ ॥ शि० आर्यदत्तः आर्यं सर्वश्रेष्ठं अचञ्चलमित्यर्थः दत्तंदानं यस्यसः ॥ स० आर्यवृत्तः आर्याणांवृत्तंयस्यसः । आर्यवृत्तंयस्येतिवा । सुतीक्ष्णं तन्नामकमृषिं । सुतीक्ष्णं राक्षसानां तीक्ष्णंयथाभवतितथा जगामेत्यथोवा ॥ २६ ॥ इतिषष्ठस्सर्गः ॥ ६ ॥

स० तैर्द्विजैस्सह । यद्वा हतैः राक्षसैर्हतप्रायैः । स रामः ॥ १ ॥ ति० विमलं पवित्रं । महामेघमिवेतिपाठे स्थितमितिशेषः । नैस्यस्थौल्याभ्यां सादृश्यं । उन्नतमिति स्वरूपकथनं ॥ स० महामेरुमिव स्थौल्येनेत्यर्थः । उन्नतं अनेकपक्षिभिर्धृतं । "नमुप्रह्वत्वेशब्देच" इत्युक्तेः ॥ २ ॥ रामानुजीयं । तदित्यनेन प्रस्तुतस्यकाननस्यपरामर्शः । प्रथमं शैलस्यप्रस्तुतत्वात्तस्यकाननमपि प्रस्तुतमेवेति ॥ ३ ॥ स० पूर्वं त्रयाणांप्रस्तुतत्वेपुत्तरत्र प्रश्नप्रतिवचनयोरेककर्तृकत्वतदेकविषयत्वाभ्यां मुनिदृश्येकवचनमुपपद्यते । अमुमेवविशेषंद्योतयति तुशब्दः ॥ ४ ॥ ति० मलपङ्कजटाधरं मलंनाम उद्वर्तनादिसंस्कारामा-

[पा०] १ क. छ. तपस्विनो. २ क. ग.—ट. दत्त्वावरं. ३ क. च. छ. ज. ञ. सतापसानांधर्मप्रधानःसह. ४ ख. ग च. छ. ञ. सहार्यवृत्तः. ङ. झ. ट. सहार्यदत्तः. क. महानुभावः. ५ च. छ. ज. ञ. रामश्च. ६ क. घ. च. छ. ज. ञ. सहितोद्विजैः. ट. सहितैर्द्विजैः. ७ घ. ते. गत्वा. ८ घ. ददृशुर्विपुलं. ख. ग. ङ.—ट. ददर्शविमलं. ९ क. ग. ङ.—ट. महामेरुं. १० झ. सततं. ११ ख. ग. प्रविष्टस्स. १२ क. च. छ. ज. ञ. रामो. १३ ख. ग. बहुमूलफल. १४ छ. तावत्समासीनं. १५ ङ. झ. ट. षड्जधारिणं. १६ ख. ङ. झ. ट. तपोधनं.

रामोऽहमस्मि भगवन्भवन्तं द्रष्टुमागतः ॥ त्वं माऽभिवद धर्मज्ञ महर्षे सत्यविक्रम ॥ ६ ॥
स निरीक्ष्य ततो वीरं रामं धर्मभृतां वरम् ॥ समाश्लिष्य च बाहुभ्यामिदं वचनमब्रवीत् ॥ ७ ॥
स्वागतं खलु ते वीर राम धर्मभृतां वर ॥ आश्रमोऽयं त्वयाऽऽक्रान्तः सनाथ इव साम्प्रतम् ॥ ८ ॥
प्रतीक्षमाणस्त्वामेव नारोहेऽहं महायशः ॥ देवलोकमितो वीर देहं त्यक्त्वा महीतले ॥ ९ ॥
चित्रकूटमुपादाय राज्यभ्रष्टोसि मे श्रुतः ॥ १० ॥
इहोपयातः काकुत्स्थ देवराजः शतक्रतुः ॥ उपागम्य च मां देवो महादेवस्सुरेश्वरः ॥
सर्वांल्लोकाञ्जितानाह मम पुण्येन कर्मणा ॥ ११ ॥

जटानां धरं । विधिवत् क्रमवद्यथा भवति तथा । अभाषत । मीलितनयनत्वेन स्वाभिवादनापरिज्ञानाद्वाक्यं ॥ ५ ॥ मा अभिवादयन्तं मां अभिवाद प्रत्यभिवादनं कुरु । सत्यविक्रम अमोघतपःप्रभाव ॥ ६—७ ॥ सनाथइव सनाथएव । यद्वा सर्वदा त्वया सनाथत्वेपि पामराणां सनाथत्वप्रतिभेदानीं जातेत्यर्थः ॥ ८ ॥ स्वस्य मोक्षापेक्षां व्यञ्जयति—प्रतीक्षमाण इति । त्वामेव प्रतीक्षमाणः प्रतिपालयन् त्वदागमनं काङ्क्षमाण इत्यर्थः । देवलोकं नारोहे "तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलं" इति तस्य मोक्षविरोधित्वादिति भावः ॥ ९ ॥ मदागमनं कुतोवगतं तत्राह—चित्रकूटमिति । चित्रकूटमुपादाय चित्रकूटगमनमारभ्य । राज्याद्भ्रष्टः प्रच्युत इति मे मया श्रुतोसि ॥ १० ॥ स्वर्गारोहणस्य कुः प्रसंङ्ग इत्यत्राह—इहेति । उपयातः शरभङ्गार्थमागतः । मामुपागम्याह । तर्हि तादृशमहाफलं किमिति त्यक्त-

च्छरीरजन्यं । पङ्कोन्नाम वनसंचाराच्छरीरलग्नमितिभेदः ॥ कतक० मलपङ्कजधारिणं मलरूपसर्वांगस्य शान्तये पङ्के पद्मासने स्थित्वा धारणशीलं । यद्वा कपङ्के हृदयपङ्के धारिणं ऐश्वर्ययोगधारणशीलमित्यर्थः । अत्र ततस्तदिक्ष्वाकुवरो इत्यादिश्लोकत्रयप्रक्षिप्तं । स० मलपङ्कजधारिणं मलं शारीरमलं । पङ्काः पङ्कोद्भूताः कणाः । तान्धर्तुंशीलमस्यास्तीति मलपङ्कजधारी तं तापसं । यद्वा तापसमासीनमित्येकंपदं । तापेषु पञ्चाग्नितापेषु सम्यगासीनं । ति० विधिवत् उपगम्येतिशेषः ॥ ५ ॥ स० मा मां वद । अनेन ऋषेर्मौनसूच्यते ॥ ६ ॥ स० वीरः धीधुरमणकर्ता ॥ ७ ॥ ति० सनाथइव सस्त्रीकइव । अनायमाश्रमः ब्रह्मचर्याद्याश्रमव्यवहार्योऽयंदेहः । त्वया जीवरूपेणाक्रान्तोपि साम्प्रतं अस्य बहिश्चक्षुषानुभवन् सनाथइव मायया सच्चिदानन्दस्यैवेश्वरशरीररूपेणप्रतिभासमानस्येदंशब्दत्वदूपस्य दर्शनेन चित्तशुद्ध्या पूर्वजीवाभेदेनाहमितिप्रतीत्यागृहीतस्य । तद्वैलक्षण्येनेदानींब्रह्मद्वेदनिबन्धनसनाथत्वव्यवहारः । इवेन जडानामप्यतिरिक्तत्वाभावस्सूचितइति ध्वनिः ॥ स० पूर्वं मयासनाथ इव सांप्रतं त्वयासमाक्रान्तइति सनाथः ॥ ८ ॥ स० अहं देवलोकं सत्यलोकं । नारोहे नगच्छेयं । यद्वा हेदेव महीतले देहंत्यक्त्वा इतः परं लोकं देहान्तरं नरोहे इत्यान्तरक्रियार्थः ॥ ९ ॥ ति० नन्वत्र कात्र मदागमनसंभावना तत्राह—चित्रेति । यदा राज्यभ्रष्टः चित्रकूटं उपादाय प्राप्य स्थितोसि तदाप्रभृति मे मया श्रुतोसि ॥ आश्रमोयमित्यस्य व्याख्यार्थेतु चित्रं विचित्रफलहेतुकूटं दुरवगाहत्वात्संसारं प्राप्य राज्यभ्रष्टो विद्यासंसर्गेणसंसाराज्यात् नित्यशुद्धबुद्धमुक्तस्वरूपात् भ्रष्टः । ततोगात्संसारंप्राप्तस्त्वमेव मया श्रुतिवाक्येभ्यश्रुतोसि । अतस्त्वत्प्रतीक्षया नदेवलोकं गतइति व्याख्योर्थः ॥ १० ॥ नन्विदानीं कृते देवलोकारोहणप्रसक्तिस्तत्राह—इहेति । शरभङ्गाननानन्तरमिहाप्यागतइत्यर्थः । ति० पुण्येनकर्मणाजितानित्यनेन श्रवणसंपत्तावपि निदिध्यासनसंपत्त्यभावोक्तोक्तः । पूजावचनेषु पौनरुक्त्यं नदोषाय । देवादिपदानां प्रवृत्तिनिमित्तभेदस्य स्पष्टत्वात्पौनरुक्त्यमितिकेचित् ॥ स० महादेवः महेनउत्सवेन आदेवः अतिकान्तिमान् सुरेश्वरः । सर्वान् चितान् प्राप्तानाहेत्यन्वयः । आहेत्यनेन तन्निदिध्यासितब्रह्मलोकादिप्राप्तं तस्यास्तीति तत्र साक्षित्वेनेन्द्रवचसउपयोगइति कविस्सूचयति । तन्निदिध्यासनाभावोक्तेति नागोजिभट्टीयंव्याख्यानं "यंयंलोकंमनसासंविभाति" "यंयंवापिस्मरन्भावं" इत्यादिश्रुतिस्मृतिविरुद्धत्वादसंगततरं-

[पा०] १ घ. भद्रंते. २ क. च. छ. ज. आगतपाहिधर्मज्ञ. ग. ङ. झ. ट. तन्माऽभिवद. ३ क. च. ज. संनिरीक्ष्य. ४ ख. ग. ङ. झ. ट. ततोधीरो. क. ञ. छ. ज. ञ. तदारामंवीरं. ५ क. वरः. ६ क. बाहुभ्यांवचनंचेदं. ७ ङ. झ. ट. तेरघुश्रेष्ठ. क. च. ज. ञ. तेनरश्रेष्ठ. ८ ङ. झ. ट. सत्यभृतां. ९ क. इति. ग. झ. १० ख. ग. महीतलाद्. ११ क. ख. ञ. छ. ज. ञ. मनुप्राप्तो. १२ क. छ. ञ. अश्रोमयाश्रुतः. च. ज. अंशोमयाश्रुतः. १३ क. छ. ज. ञ. उपगम्य. १४ ग. घ. ङ. झ. ट. मेवेवो. ख. देवेशो. १५ छ. सर्वेलोकान्.

तेषु देवर्षिजुष्टेषु जितेषु तपसा मया ॥ मत्प्रसादात्समार्यस्त्वं विहरस्व सलक्ष्मणः ॥ १२ ॥
तमुग्रतपसा युक्तं महर्षिं सत्यवादिनम् ॥ प्रत्युवाचात्मवान्रामो ब्रह्माणमिव कश्यपः ॥ १३ ॥
अहमेवाहरिष्यामि स्वयं लोकान्महामुने ॥ आवासं त्वहमिच्छामि प्रदिष्टमिह कानने ॥ १४ ॥
भवान्सर्वत्र कुशलस्सर्वभूतहिते रतः ॥ आख्यातश्शरभङ्गेण गौतमेन महात्मना ॥ १५ ॥
एवमुक्तस्तु रामेण महर्षिर्लोकविश्रुतः ॥ अब्रवीन्मधुरं वाक्यं हर्षेण महताऽऽप्लुतः ॥ १६ ॥
अयमेवाश्रमो राम गुणवान्रम्यतामिह ॥ ऋषिसङ्घानुचरितस्सदा मूलफलान्वितः ॥ १७ ॥
इममाश्रममागम्य मृगसङ्घा महायशः ॥ अटित्वा प्रतिगच्छन्ति लोभयित्वाऽकुतोभयाः ॥
नान्यो दोषो भवेदत्र मृगेभ्योऽन्यत्र विद्धि वै ॥ १८ ॥
तच्छ्रुत्वा वचनं तस्य महर्षेर्लक्ष्मणाग्रजः ॥ उवाच वचनं धीरो विकृष्य सशरं धनुः ॥ १९ ॥
तानहं सुमहाभाग मृगसङ्घान्समागतान् ॥ हन्यां निशितधारेण शरेणाशनिवर्चसा ॥ २० ॥
भवांस्तत्राभिषज्येत किं स्यात्कृच्छ्रतरं ततः ॥ एतस्मिन्नाश्रमे वासं चिरं तु न समर्थये ॥ २१ ॥

वानसीत्युक्ते तारतम्यज्ञानादिति भावः ॥ ११—१४ ॥ गौतमेन गौतमवंश्येन ॥ १५ ॥ हर्षेण महता प्लुतः मोक्षानुग्रहेण परमानन्दभरितः ॥ १६—१७ ॥ गुणमुक्त्वा दोषमाह निरसनीयत्वाभिप्रायेण—इममिति । आश्रमं तपोवनं । अविद्यमानं कुतोपि भयं येषां ते अकुतोभयाः सन्तः अटित्वा इतस्ततः परिप्लुत्य । लोभयित्वा समाधिभङ्गं जनयित्वा । विचित्रतरवेषैरिति शेषः । प्रतिगच्छन्ति प्रतियान्ति । अत्र वने । मृगेभ्योन्यत्र मृगान्विनाऽन्यो दोषो न भवेदिति विद्धि मृगप्रलोभनरूपदोषादन्यो दोषोत्र नास्तीत्यवेहीत्यर्थः । इति वाक्यमब्रवीदिति पूर्वेण संबन्धः ॥ १८ ॥ तत् मृगभयविषयकं वचनं । विकृष्य सशरं धनुरिति स्वोत्साहप्रकटनं ॥ १९ ॥ हन्यामिति प्राप्तकाले लिङ् । वधकाले प्राप्ते सकलमृगहननं कुर्यामित्यर्थः । प्राप्तकालश्च तद्दर्शनकालः ॥ २० ॥ तच्च हननमिह स्थित्वा न कर्तुं शक्यमित्याह—भवानिति । तत्र मृगसङ्घवधविषये । भवान् मया अभिषज्येत अभिभूयेत । अभिपूर्वात् षञ्जेः कर्मणि लिङ् । "अभिषङ्गः परिभवे सङ्गाक्रोशनयोरपि" इति याणः । तादृशमृगहनने मया त्वं

मिति द्रष्टव्यं ॥ ११ ॥ ती० वस्तुतस्तु मत्प्रसादात् मय्यनुग्रहात् । तेषु विहरस्वेत्यपि तान्विशेषेण हरस्वस्वीकुर्विति भगवति कर्मफलसमर्पणबुद्ध्या मुनिनोक्तं ॥ १२ ॥ स० आहरिष्यामीत्यनेन त्वया तपसा संपादितांल्लोकांस्तुभ्यं दास्यामीति रामस्य स्वातन्त्र्यं द्योत्यते । प्रदिष्टमित्यनेन मयैव पूर्वं तुभ्यप्रदिष्टमिति भावमाविष्करोतीदेव इत्यवगमयति कविः । ति० अहमेवेति । तपसेत्यर्थः । त्वत्तःप्रतिग्रहे नाहमधिकारीत्यापाततोर्थः । वास्तवस्तु तद्दत्तपुण्याङ्गीकारेणानुगृह्णाति भगवान्—अहमेवेति । न्यासत्वेन त्वयास्थापितं तुभ्यंप्रापयिष्यामि । अहमेवेत्यनेन सर्वकर्मफलदाता सर्वोपासनास्वहमेवेति सूचितं । अथ लोकदृष्ट्येतरजनप्रतारणायावासमिति । प्रदिष्टं । त्वयेतिशेषः ॥ १४ ॥ टीका० मृगेभ्यइति हेतुगर्भितं । मृगरूपधारिणोराक्षसाएवागत्य तपोभङ्गंकुर्वन्तीत्यर्थः । ति० महीयसः अतिशयितमहत्त्ववतोपि अहत्वा हननमकृत्वा लोभयित्वारूपकान्तिगतिविशेषैश्चित्तक्षोभंकृत्वा गच्छन्तीत्यर्थः । अनेन भावी मारीचवृत्तान्तस्सूचितः । स० एतन्निवेशिनांपशूनामपि नद्वेषबुद्धिः किमु मनुष्याणामित्याह—इममिति । महीयसः महीयांसः । अहत्वा विरोधिनमितिशेषः । लोभयित्वा स्वस्थावलोकान् सस्वाकाङ्क्षान्कृत्वा । अकुतोभयाः मुक्ताः तइव ॥ स० अन्यत्र मदाश्रमातिरिक्ते । अत्र दण्डकारण्ये । मृगेभ्योऽन्योदोषोनास्ति मृगाएवदोषाः । मघकारिणइति यावत् । अतएव पूर्वश्लोके इममितीममर्थं ज्ञापयति ॥ १८ ॥ स० तत्रभवानभिषज्येत शपथंवा आक्रोशंवा कुर्यात् मृगहननं नकुर्विति । अतः भवदाक्रोशात् शपथाद्वा । कृच्छ्रतरं कष्टतरं किमु । हातुं हन्तुं नशक्नोमीतिभावः ॥ "अभिषङ्गो

[पा०] १ क. त्समार्यस्तु. २ क. ख. ग. ङ.—ट. मुग्रतपसंदीप्तं. ३ छ. सत्यविक्रमः. ४ क. ङ. ट. वासवः. ५ ङ. ज. ट. अहमेवहरिष्यामि. ६ ङ. झ. ट. आख्यातं. ७ ङ. झ. ट. युतः. ८ ङ. झ. ट. मिति. ९ क.—घ. च. छ. फलायुतः. ङ. झ. ट. फलैर्युतः. १० ङ. झ. ट. महीयसः. ११ ङ. झ. ट. अहत्वा. ग. अभितः. १२ क. च. छ. ज. ञ. रामो. १३ ङ. झ. ट. विगृह्य. १४ ग. सहागतान्. १५ ङ. झ. ट. शरेणानतपर्वणा. १६ ग. स्यात्कृच्छ्रतरं. १७ च. छ. ज. एकस्मिन्नाश्रमे.

तमेवमुक्त्वा वरदं रामस्संध्यामुपागमत् ॥ २२ ॥
अन्वास्य पश्चिमां संध्यां तत्र वासमकल्पयत् ॥ सुतीक्ष्णस्याश्रमे रम्ये सीतया लक्ष्मणेन च ॥२३॥
ततश्शुभं तापसभोज्यमन्नं स्वयं सुतीक्ष्णः पुरुषर्षभाभ्याम् ॥
तौभ्यां सुसत्कृत्य ददौ महात्मा संध्यानिवृत्तौ रजनीमवेक्ष्य ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे सप्तमः सर्गः ॥ ७ ॥

अष्टमः सर्गः ॥ ८ ॥

प्रभातेकृताह्निकेनरामेणसुतीक्ष्णंप्रतिस्वस्यदण्डकारण्यदर्शनोत्कण्ठानिवेदनेनतद्गमनाभ्यनुज्ञाप्रार्थनम् ॥ १ ॥ मुनिना कृताभ्यनुज्ञेनरामेणतत्प्रदक्षिणीकरणपूर्वकंदण्डकारण्यंप्रतिप्रस्थानम् ॥ २ ॥

रामस्तु सहसौमित्रिस्सुतीक्ष्णेनाभिपूजितः ॥ परिणाम्य निशां तत्र प्रभाते प्रत्यबुध्यत ॥ १ ॥
उत्थाय तु यथाकालं राघवः सह सीतया ॥ उपास्पृशत्सुशीतेन जलेनोत्पलगन्धिना ॥ २ ॥
अथ "तेऽग्निं सुरांश्चैव वैदेही रामलक्ष्मणौ ॥ कौल्यं विधिवदभ्यर्च्य तपस्विशरणे वने ॥ ३ ॥

कृतापराधोभवेः आश्रमसंबन्धित्वादितिभावः । ततः किमित्यत्राह—किंस्यात्कृच्छ्रतरं तत इति । ततः भवदभितापात् । कृच्छ्रतरं कष्टतरं । किं न किमपीत्यर्थः । तस्मादेतस्मिन्नाश्रमे चिरं तद्दर्शनपर्यन्तं । वासं न समर्थये नेच्छामि । इह वासे मृगसङ्घपीडां सोढ्वा स्थातव्यं । हंतावस्थाने स्वाश्रममृगाणां स्वसन्निधौहनने तव वैमनस्यं स्यात् । तच्च ममानिष्टं अतोन्यत्र स्वदसन्निधाने मृगान् हनिष्यामीत्यर्थः । इत्युवाचेति पूर्वेणान्वयः ॥ २१ ॥ वरदमित्यनेन मुनिस्तथैवानुज्ञातवानिति गम्यते । संध्यामुपागमत् सन्ध्यामुद्दिश्य सरस्तीरं गतवानित्यर्थः ॥ २२ ॥ पश्चिमां सन्ध्यामन्वास्य । अत्यन्तसंयोगे द्वितीया । यावत्सन्ध्यं जलतीरे जपन् स्थित्वेत्यर्थः । तत्राश्रमे वासमकल्पयदित्यनेन प्रातर्जिगमिषा जातेति व्यज्यते । अन्यत्र गत्वा मृगनिरासश्च रावणं प्रति मारीचानुवादादवगन्तव्यः ॥ २३ ॥ शुभं भक्तयुपनीतत्वेन पावनं तापसभोज्यं फलमूलादि । अन्नं अदनीयं । स्वयं नतु शिष्यमुखेन । सुसत्कृत्य अर्घ्यपाद्यादिना संपूज्य । महात्मा तत्र परमपुरुषत्वज्ञानवान् । सन्ध्यानिवृत्तौ सन्ध्याकर्मावसाने । रजनीमवेक्ष्य ददौ रजनीभक्ष्यानुसारं ददावित्यर्थः । सीता तु रामभुक्तशेषं भुक्तवतीत्याशयः ॥ २४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तमः सर्गः ॥ ७ ॥

अथ सुतीक्ष्णानुज्ञया रामस्याश्रममण्डलं प्रति प्रस्थानमष्टमे—रामस्त्विलादि । परिणाम्य अतिवाह्य । प्रभाते उषःकाले ॥ १ ॥ सह सीतयेत्यनेन पूर्वमेव सौमित्रिः स्नात इति व्यज्यते । उपास्पृशत् स्नातवान् । " स्नानाचान्तोरुपस्पर्शः " इति शेषः । सुशीतेनेत्युष्णोदकव्यावृत्तिः । उत्पलगन्धिनेत्यनेन तटाकस्नानं सूच्यते ॥ २ ॥ अग्निमित्येकवचनेन एकाग्निलोपगमात्र त्रेताग्निरिदानीमिति गम्यते । सुरान् नारायणं । " सहपत्न्या विशालाक्ष्या नारायणमुपागमत्" इत्ययोध्याकाण्डोक्तेः । परिवारापेक्षया बहुवचनं । कौल्यं यथाकालप्राप्तं यथा तथा । देशानुगुण-

यशपथे स्यादाक्रोशे पराभवे " इतिविश्वः ॥ २१ ॥ ति० उपरमं उपरम्य । क्वचिदुपरम्येत्येवपाठः ॥ शि० उपरमं अतिनिवृत्तचित्तं । तं महर्षिं ॥ २२ ॥ इतिसप्तमस्सर्गः ॥ ७ ॥

[पा०] १ ङ. झ. ट. मुक्त्वोपरमं. क. ध. मुक्त्वावचनं. २ क. ख. ग. मुषाविंशत्. ३ क. च. छ. ज. ञ. रामः. ख. ग. पुण्ये. ४ ङ. झ. ट. योग्यमन्नं. ५ क. च. छ. ज. ञ. सत्कृत्यताभ्यांप्रददौ. ६ क. ख. ग. ङ. झ. ट. रजनींसमीक्ष्य. च. छ. ज. ञ. रजनींनिरीक्ष्य. ७ क. च. छ. ज. ञ. प्रत्यूषे. ८ ङ. झ. ट. उत्थायच. ९ ख. ग. च. छ. ज. ञ. उपस्पृश्यसुशीतेन. ङ. झ. ट. उपस्पृश्यसुशीतेन. १० ङ.—ट. तोयेनोत्पल. ११ क. छ. ज. ञ. तेऽग्नीन्. १२ क. ट. कार्ये.

उदयन्तं दिनकरं दृष्ट्वा विगतकल्मषाः ॥ सुतीक्ष्णमभिगम्येदं श्लक्ष्णं वचनमब्रुवन् ॥ ४ ॥
सुखोषितास्स्म भगवंस्त्वया पूज्येन पूजिताः ॥ आपृच्छामः प्रयास्यामो मुनयस्त्वरयन्ति नः ॥ ५ ॥
त्वरामहे वयं द्रष्टुं कृत्स्नमाश्रममण्डलम् ॥ ऋषीणां पुण्यशीलानां दण्डकारण्यवासिनाम् ॥ ६ ॥
अभ्यनुज्ञातुमिच्छामस्सहैभिर्मुनिपुङ्गवैः ॥ धर्मनित्यैस्तपोदान्तैर्विशिखैरिव पावकैः ॥ ७ ॥
अविषह्यातपो यावत्सूर्यो नाति विराजते ॥ अमार्गेणागतां लक्ष्मीं प्राप्येवान्वयवर्जितः ॥ ८ ॥
तावदिच्छामहे गन्तुमित्युक्त्वा चरणौ मुनेः ॥ ववन्दे सहसौमित्रिस्सीतया सह राघवः ॥ ९ ॥
तौ संस्पृशन्तौ चरणावुत्थाप्य मुनिपुङ्गवः ॥ गाढमालिङ्ग्य सस्नेहमिदं वचनमब्रवीत् ॥ १० ॥
अरिष्टं गच्छ पन्थानं राम सौमित्रिणा सह ॥ सीतया चानया सार्धं छाययेवानुवृत्तया ॥ ११ ॥
पश्याश्रमपदं रम्यं दण्डकारण्यवासिनाम् ॥ एषां तपस्विनां वीर तपसा भावितात्मनाम् ॥ १२ ॥
सप्राज्यफलमूलानि पुष्पितानि वनानि च ॥ प्रशस्तमृगयूथानि शान्तपक्षिगणानि च ॥ १३ ॥
फुल्लपङ्कजषण्डानि प्रसन्नसलिलानि च ॥ कारण्डवविकीर्णानि तटाकानि सरांसि च ॥ १४ ॥
द्रक्ष्यसे दृष्टिरम्याणि गिरिप्रस्रवणानि च ॥ रमणीयान्यरण्यानि मयूराभिरुतानि च ॥ १५ ॥
गम्यतां वत्स सौमित्रे भवानपि च गच्छतु ॥ आगन्तव्यं त्वया तात पुनरेवाश्रमं मम ॥ १६ ॥
एवमुक्तस्तथेत्युक्त्वा काकुत्स्थस्सहलक्ष्मणः ॥ प्रदक्षिणं मुनिं कृत्वा प्रस्थातुमुपचक्रमे ॥ १७ ॥

पूजाकथनायतपस्विशरण इत्युक्तं । उदयन्तं उद्यन्तं । अनेन होमानन्तरमादित्योपस्थानोक्त्या अनुदितहोमपक्षसूचनात् कात्यायनसूत्रक्रमेण राघवाणामनुष्ठानमितिगम्यते ॥ ३—४ ॥ सुखोषिता इत्यादित्रिश्लोक्येकान्वया । आपृच्छामः आपृच्छामहे । परस्मैपदमार्षं । अभ्यनुज्ञातुमिति भावेतुमुन् । त्वत्कर्तृकं गमनानुज्ञानं प्रार्थयामहे इत्यर्थः । मुनयः सहवासयोग्या इत्याह—धर्मनित्यैरित्यादि । धर्मनित्यैः नित्यधर्मैः । तपोभिर्दान्तैः निगृहीतेन्द्रियैः । तपो हीन्द्रियनिग्रहहेतुः । विशिखैः विगतज्वालैः । "अर्चिर्हेतिः शिखास्त्रियां" इत्यमरः । गुप्तमाहात्म्यैरित्यर्थः ॥ ५—७ ॥ सूर्यः अविषह्यातपः असह्यातपः सन् यावन्नातिविराजते नात्यन्तमुद्गच्छति । कथमिव अमार्गेणान्यायेनागतां लक्ष्मीं ऐश्वर्यं । प्राप्य अन्वयवर्जितः साधुसमागमवर्जितो दुष्प्रभुरिवाविषह्यातप इत्यन्वयः । तावदिच्छामहे गन्तुमित्यनेन रावणवधत्वरा व्यज्यते । अतो न हीनोपमादोषोपि ॥ ८—१० ॥ अरिष्टं अनुपद्रवं । रिषेः "तीषसह—" इति भावे निष्ठा । अनेनापि रावणविजयाभ्यनुज्ञा सूच्यते ॥ ११ ॥ तपोवनपदार्थान् कृतार्थयितुमाह—पश्येत्यादि ॥ १२ ॥ प्राज्यं अदभ्रं । "प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु" इत्यमरः ॥ १३ ॥ कारण्डवो जलकुक्कुटः । "मद्गुः कारण्डवः प्लवः" इत्यमरः ॥ १४ ॥ रमणीयत्वादिना विशेषयितुं पुनरप्याह—रमणीयानीति । मयूराणामभिरुतानि येषु तानि ॥ १५ ॥ गम्यतां त्वयेति शेषः । भवानिति

टीका० त्वरयन्तिमामितिपाठान्तरं । मुनयस्त्वभियन्तिमामित्यनेनचित्रकूटमारभ्यमार्गप्रदर्शनव्याजेनपञ्चवटीप्रवेशपर्यन्तंरामेणसहमुनयस्समागताइतिगम्यते ॥ ५ ॥ ति० अभ्यनुज्ञातुमिच्छाम त्वत्कर्तृकंगमनानुज्ञानंप्रार्थयामः । विशिखैः विधूमैः । स० पावकैः शुचित्वादिनातत्समैः ॥ ७ ॥ स० नातिविराजते नतापयति । अन्वयवर्जितः अकुलीनः ॥ ८ ॥ शि० अश्रमपदं श्रमनिवर्तकंस्थानंपश्य । ति० आश्रमपदमितिजातावेकवचनं ॥ १२ ॥ ति० शान्तपक्षिगणत्वं परस्परविरोधाभावात् । स० शान्तपक्षिगणानि मरन्दतुन्दिलत्वादितिभावः ॥ १३ ॥ शि० अत्रस्रोतोरहितानितटाकानि तत्सहितानिसरांसीतिनपौनरुक्त्यं ॥ १४ ॥

[पा०] १ ज. इच्छामहे. २ घ. तदनुज्ञातुं. ३ क. च. ज. ञ. सत्तमैः. ४ क. च. छ. ज. ववन्दतुस्तावेकाग्रौसीतयासहराघवौ. ५ ग. चैव. ६ घ. संस्पृशन्तौच. च. छ. ज. संस्पृशन्तावुत्थाप्यचरणौ. ७ क. ख. ग. ङ.—ठ. माश्लिष्य. ८ च. छ. ज. तंराममिदं. ९ क. ख. ग. पश्याश्रममिदं १० ग. पुण्यं. ११ क. च. छ. ज. राम. १२ क. ख. घ. ट. सुप्राज्य. १३ क.—घ. प्रशान्तमृग. १४ ङ. च. छ. झ. ञ. खण्डानि. १५ ग. गन्तव्यंच. ङ. झ. आगन्तव्यंचतेदृष्ट्वा. ट. आगन्तव्यंचतंदृष्ट्वा. १६ ङ. झ. ट. प्रति. १७ क. च. छ. ज. ञ. सहसीतया. १८ क. च. छ. ज. ञ. प्रदक्षिणमृषिं.

ततः शुभतरे तूणी धनुषी चायतेक्षणा ॥ ददौ सीता तयोर्भ्रात्रोः खड्गौ च विमलौ ततः ॥ १८ ॥
आबध्य च शुभे तूणी चापौ चादाय सस्वनौ ॥ निष्क्रान्तावाश्रमाद्गन्तुमुभौ तौ रामलक्ष्मणौ ॥१९॥
श्रीमन्तौ रूपसंपन्नौ दीप्यमानौ स्वतेजसा ॥ प्रस्थितौ धृतचापौ तौ सीतया सह राघवौ ॥ २० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे अष्टमस्सर्गः ॥ ८ ॥

नवमः सर्गः ॥ ९ ॥

सीतयादण्डकारण्यप्रस्थानसमयेआयुधधारिणंरामंप्रतिदृष्टान्ततयाद्रुरावृत्तकथनपूर्वकमायुधधारणेदोषोक्त्यातद्व्यसनप्रार्थना ॥ १ ॥

सुतीक्ष्णेनाभ्यनुज्ञातं प्रस्थितं रघुनन्दनम् ॥ हृद्यया स्निग्धया वाचा भर्तारमिदमब्रवीत् ॥ १ ॥
अयं धर्मस्सुसूक्ष्मेण विधिना प्राप्यते महान् ॥ निवृत्तेन तु शक्योऽयं व्यसनात्कामजादिह ॥ २ ॥

राम उच्यते आश्रमं प्रतीति शेषः ॥१६—१७॥ ततः प्रस्थानोपक्रमानन्तरं । विमलौ तत इति । ततः धनुरादिदानानन्तरमित्यर्थः । ततः शुभतरे इत्यादिनायमर्थोऽवगम्यते । आश्रमप्रवेशे किमस्माकमायुधैरिति मन्यमाना सीता आयुधानि मुनिगृहे कुत्रचिन्निहितवती । अथ अमार्गेणेत्यादिरामवाक्येन अरिष्टं गच्छेत्यादिमुनिवाक्येन च तयोर्हृदयं विदित्वा स्वयमेवादाय पुनर्दत्तवतीति । अत एवोत्तरसर्गे स्वाशयं वक्ष्यति ॥१८–२०॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने अष्टमः सर्गः ॥ ८ ॥

अथ सीता वीरपत्नीत्वेन धनुर्मुष्टिग्रहणविशेषेण सायुधतया सन्नद्धं पतिमालोक्य यदि त्वं सायुधो राक्षसभूयिष्ठे देशे प्रविष्टः स्याः तर्हि तैः साकं विरोधः स्यात् तेनावयोर्विश्लेषः स्यात् तेन भवतो महान्क्लेशः स्यात् अतो निधायायुधं वनेस्माभिर्गन्तव्यमित्याह नवमे—सुतीक्ष्णेनेत्यादि । अभ्यनुज्ञातं "अरिष्टं गच्छ पन्थानमिति" रावणवधाभिप्रायेणानुज्ञातं । हृद्यया युक्तियुक्तत्वेन हृदयंगमया । स्निग्धया स्नेहप्रवृत्तया । अनेन वक्ष्यमाणवचने स्नेह एव मूलमित्युक्तं । रामेण ऋषिभ्यः प्रतिज्ञाकरणं रामप्रतिज्ञाया दुरावरत्वं च बहुशो दृष्टवत्यपि राक्षसैर्वैरे भर्तुः स्वविरहद्वारा महान्क्लेशो भवेदिति प्रेमान्धतया तथोक्तवतीति भावः ॥ १ ॥ किं तदुक्तं तत्राह—अयं धर्म इति । महानयं धर्मः त्वयाऽनुष्ठीयमानो मुनिधर्मः । सुसूक्ष्मेण विधिना मार्गेण । प्राप्यते धर्मकामैरिति शेषः । सूक्ष्मविधिमेवाह—निवृत्तेनेति । इह वने । कामजात् इच्छाकृताद्व्यसनान्निवृत्तेन पुरुषेणायं धर्मः शक्यः

ति० चापे चापशब्दोद्विलिङ्गकः ॥ १९ ॥ इत्यष्टमस्सर्गः ॥ ८ ॥

टीका० अथ "केवलेनात्मकार्येण प्रवेष्टव्यंवनंमया । विप्रकारमपाकर्तुं राक्षसैर्भवतामिमं" इतिमुनीनां राक्षसवधप्रतिज्ञां कुर्वाणंभर्तारंप्रति सीता "अहिंसापरमोधर्म"इतिन्यायंमनसिनिधाय हिंसांनिवर्तयितुं लोकदृष्टान्तेनवक्तुमारभते—**यस्तुधर्मइत्यादिना** । महान् उत्कृष्टः । योधर्मः सुतीक्ष्णेनमुनिना विधिना शास्त्रोक्तप्रकारेणप्राप्यते । अयंधर्मः । इहलोकेकामजाद्व्यसनान्निवृत्तेनपुरुषेण त्वयेतिवा शक्यः आचरितुंशक्यइतियोजना । अधर्मंतुसुसूक्ष्मेणेतिपाठेतु महान् महात्मायद्यपिभवान् । तथापि सुसूक्ष्मेणविधिना सूक्ष्ममार्गेणविचारणेसति अधर्मंप्राप्यते । आपेश्छान्दसश्श्यन्वा कर्तरियग्वा छान्दसः । अधर्ममेवप्राप्नोति

[पा०] १ च. छ. ञ. ञ. कनकंसरू. ख. ग. विमलौशुभौ. २ क. च. छ. ज. ञ. चापेचादायसुस्वने. ख. ग. ङ. झ. चापेचादायसस्वने. ३ क. च. छ. ज. ञ. वाश्रमपदात्तावुभौ. ४ ङ. झ. ट. शीघ्रंतौ. ५ क. ख. ग. ङ.—ट. संपन्नावनुज्ञातौमहर्षिणा. ६ ङ. झ. ञ. ट. प्रस्थितौधृतचापासी. ख. ग. संप्रस्थितौमहावीरौ. ७ ख. राघवौसहसीतया. ८ क. वैदेही. ९ ङ. झ. अधर्मंतुसु. ख. ग. अथधर्मः. च. छ. ज. ञ. यस्तुधर्मः. ट. योधर्मस्तु. १० ङ. झ. ट. निवृत्तेनच.

त्रीण्येव व्यसनान्यत्र कामजानि भवन्त्युत ॥ मिथ्यावाक्यं परमकं तस्माद्गुरुतरावुभौ ॥
परदाराभिगमनं विना वैरं च रौद्रता ॥ ३ ॥
मिथ्यावाक्यं न ते भूतं न भविष्यति राघव ॥ कुतोभिलाषणं स्त्रीणां परेषां धर्मनाशनम् ॥ ४ ॥
तव नास्ति मनुष्येन्द्र न चाभूत्ते कदाचन ॥ मनस्यपि तथा राम न चैतद्विद्यते क्वचित् ॥ ५ ॥
स्वदारनिरतस्त्वं च नित्यमेव नृपात्मज ॥ धर्मिष्ठस्सत्यसन्धश्च पितुर्निर्देशकारकः ॥ ६ ॥
सत्यसन्ध महाभाग श्रीमँल्लक्ष्मणपूर्वज ॥ त्वयि सत्यं च धर्मश्च त्वयि सर्वं प्रतिष्ठितम् ॥ ७ ॥
तच्च सर्वं महाबाहो शक्यं धर्तुं जितेन्द्रियैः ॥ तव वश्येन्द्रियत्वं च जानामि शुभदर्शन ॥ ८ ॥
तृतीयं यदिदं रौद्रं परप्राणाभिहिंसनम् ॥ निर्वैरं क्रियते मोहात्तच्च ते समुपस्थितम् ॥ ९ ॥

संपाद्यः । व्यसनमिति जात्येकवचनं ॥२॥ किंतद्व्यसनं तत्राह—त्रीण्येवेति । अत्र लोके । उत अत्यर्थं । कामजानि रागकृतानि । त्रीण्येव व्यसनानि भवन्ति । कानि तानि त्रीणीत्यत्राह—मिथ्यावाक्यमित्यादि । मिथ्यावाक्यं परमकं प्रथममित्यर्थः । सर्वेभ्यो व्यसनेभ्यः श्रेष्ठमित्यर्थः । स्वार्थेकः । तस्मादपि व्यसनात् गुरुतरावुभौ व्यसनविशेषौ तावाह—परदारेत्यादिना । परदाराभिगमनं परदाराभिमर्शनं । वैरं विनारौद्रता हिंसकता चेति ॥ ३ ॥ एवं सामान्येन व्यसनरूपमुक्त्वा प्रकृते परिहार्यत्वेन वक्तव्यं व्यसनं दर्शयितुमितरपरिशेषमाह—मिथ्येत्यादिना । अत्र भूतभविष्यतोर्वर्तमानस्यान्तर्भावः । कुत इति परेषां संबन्धिनीनां स्त्रीणां धर्मनाशनं अधर्मकरं च । अभिलाषणं अभिलाषः । कुतः असंभावित इत्यर्थः । धर्मनाशनशब्देन गुरुतरशब्दोक्तातिशयो दर्शितः । मिथ्यावाक्यमधर्मकरं इदमुभयकरमिति भावः ॥४॥ कुत इत्यादिना परदाराभिलाष एव नास्ति कुतस्तदभिगमनमित्युक्तं कालत्रयेपि तदभाव इति विशेषयति—तवेति । मनुष्येन्द्रेति हेतुगर्भं संबोधनं । तव परदाराभिलाषणमिदानीं नास्ति । कदाचन ते तन्नाभूत् । हे राम एतत् अभिलाषणं । ते क्वचित्सुन्दरेष्वपि परदारेषु मनसा संकल्पेनापि न विद्यते । अनेन भविष्यत्कालेपि नास्तीत्युक्तं । तथेति समुच्चये । चोवधारणे ॥ ५ ॥ उक्तव्यसनद्वयाभावे बहून्हेतून्दर्शयति—स्वदारेत्यादिना । हे नृपात्मज त्वं नित्यमेव स्वदारनिरतः धर्मिष्ठश्च । अतएव सत्यसन्धः सत्यप्रतिज्ञः । तत्र निदर्शनं—पितुर्निर्देशकारकः ॥६ ॥ उक्तानुवादपूर्वकं भर्तारं स्तौति—सत्यसन्धेति । महाभाग महाधर्मन् । श्रीमान् निरवधिकैश्वर्य । लक्ष्मणपूर्वज वैराग्ये लक्ष्मणादप्यधिक । त्वयि सत्यं प्रतिष्ठितं । धर्मश्चप्रतिष्ठितः । अन्यत्सर्वमैश्वर्यवैराग्यादिकं च त्वयि प्रतिष्ठितं सुस्थिरं ॥ ७ ॥ तृतीयव्यसनसद्भावं वक्तुमुक्तव्यसनद्वयाभावं स्वानुभवसिद्धत्वेन द्रढयति—तच्चेति । हे महाबाहो जितेन्द्रियैः धर्तुं शक्यं तत्पूर्वोक्तं धर्मिष्ठत्वादिकं सर्वं तव वश्येन्द्रियत्वं च जानामि शुभदर्शन तत्सद्भावे तवदर्शनमेव प्रमाणं । "रूपमेवास्यैतन्महिमानं व्याचष्टे" इति श्रुतेः ॥ ८ ॥ एवं व्यसनद्वयरहितेन त्वया तृतीयव्यसनमपि कथंचित्परिहर्तव्यमित्याशयेनाह—तृतीयमिति । निर्वैरं यथा भवति तथा परप्राणाभिहिंसनरूपं यदिदं रौद्रं रौद्राख्यं । तृतीयं महद्व्यसनं पामरैः क्रियते । तच्च तत्तु । ते समुपस्थितं त्वया कर्तुमुद्युक्तमित्यर्थः ॥ ९ ॥

भवानित्यर्थः ॥२॥ शि० परमं परा अत्युत्कृष्टा मा अर्थाभावेपिमनोहारिका संपत्तिर्यस्मिंस्तद् मिथ्यावाक्यं । स० परदाराभिगमनं विनावैरंचरौद्रता । इतीतिशेषः । उभावित्यन्वयः ॥ ३ ॥ स० परेषांस्त्रीणामित्यन्वयः । अभिलषणं इच्छापूर्वकसंबन्धः । कुतः कुतश्चित्कारणादपिनास्ति । कदाचन नचाभूदित्यर्थः । अथवा मूलरूपे तवपरस्त्रीसंबन्धाभावेपि भूमौ किंनस्यादित्यतआह—कुतइति । भूसंबन्धादपीत्यर्थः ॥ ४ ॥ स० स्वदारनिरतः स्वदारेषुमयि निरतः ॥ ६ ॥ स० रक्षणार्थाय रक्षणाभिन्नप्रयो-

[पा०] १ क. ग ङ—ट. व्यसनान्यत्र. २ ग. वादंपरमकं. ङ. झ. ट. वाक्यंतुपरमं. घ. वाक्यंगुरुतरं. ३ ख. ग. गुरुतरेशुभे. ४ घ. ङ. च. झ. ञ. ट. कुतोभिलषणं. ग. कुतोहिधर्षणं. ५ ख. मनसापि. ६ ङ. झ. ट. निरतश्चैव. ७ क. पितृनिर्देश. ८ ख. ग. महाबाहो. ९ क. ख. ङ—ट. त्वयिधर्मश्चसत्यंच. ग. वेत्सिधर्मंचसत्यंच. घ. वेत्सिसत्यंचधर्मंच. १० ग. घ. ङ. छ—ट. बोद्धुं. ख. च. बोद्धुं. ११ ज. तच्च. १२ ङ. झ. ट. भूतानां.

प्रतिज्ञातस्त्वया वीर दण्डकारण्यवासिनाम् ॥ ऋषीणां रक्षणार्थाय वधस्संयति रक्षसाम् ॥ १० ॥
एतन्निमित्तं च वनं दण्डका इति विश्रुतम् ॥ प्रस्थितस्त्वं सह भ्रात्रा धृतबाणशरासनः ॥ ११ ॥
ततस्त्वां प्रस्थितं दृष्ट्वा मम चिन्ताकुलं मनः ॥ त्वद्वृत्तं चिन्तयन्त्या वै भवेन्निःश्रेयसं हितम् ॥१२॥
न हि मे रोचते वीर गमनं दण्डकान्प्रति ॥ कारणं तत्र वक्ष्यामि वदन्त्याः श्रूयतां मम ॥ १३ ॥
त्वं हि बाणधनुष्पाणिर्भ्रात्रा सह वनं गतः ॥ दृष्ट्वा वनचरान्सर्वान्कच्चित्कुर्याश्शरव्ययम् ॥ १४ ॥
क्षत्रियाणां च हि धनुर्हुताशस्येन्धनानि च ॥ समीपतस्स्थितं तेजो बलमुच्छ्रयते भृशम् ॥ १५ ॥
पुरा किल महाबाहो तपस्वी सत्यवाक्छुचिः ॥ कस्मिंश्चिदभवत्पुण्ये वने रतमृगद्विजे ॥ १६ ॥
तस्यैव तपसो विघ्नं कर्तुमिन्द्रश्शचीपतिः ॥ खड्गपाणिरथागच्छदाश्रमं भटरूपधृत् ॥ १७ ॥
तस्मिंस्तदाश्रमपदे निशितः खड्ग उत्तमः ॥ स न्यासविधिना दत्तः पुण्ये तपसि तिष्ठतः ॥ १८ ॥
स तच्छस्त्रमनुप्राप्य न्यासरक्षणतत्परः ॥ वने तं विचरत्येव रक्षन्प्रत्ययमात्मनः ॥ १९ ॥

कथमुद्युक्तमित्यत्राह—प्रतिज्ञात इति ॥ १० ॥ न केवलमृष्यभ्यर्थनया प्रतिज्ञातं प्रथमसंकल्पश्च तव तथैवेत्याह—एतन्निमित्तमिति । दण्डका इति विश्रुतं वनं प्रति त्वं भ्रात्रा सह धृतबाणशरासनः सन् प्रस्थितः । " केवलेनात्मकार्येण " इत्यादिना भवतैवोक्तत्वादिति भावः ॥ ११ ॥ ततः किमित्यत्राह—ततस्त्वामिति । प्रस्थितं त्वां दृष्ट्वात्वद्वृत्तं सत्यप्रतिज्ञत्वस्वदारैकनिरतत्वादिकं च दृष्ट्वा । त्वन्निःश्रेयसं तव सौख्यं हितं तत्साधनं च चिन्तयन्त्या मम मनश्चिन्ताकुलं भवेद्वै भवतिहि । भवान् सत्यप्रतिज्ञत्वेन रक्षोवधान्न निवर्तेत निर्वैरं परहिंसनं च न करोषि । यस्य कस्यचिद्वैरमूलस्य करणे तदहमेव स्यां । मद्विरहं च त्वमेकदारव्रतनिरतो न सोढुमर्हसि । अतः कथमिदं संपत्स्यत इति भावः ॥ १२ ॥ तर्हि क उपायस्ते प्रतिभातीत्यपेक्षायां रामपक्षस्यैव स्वपक्षत्वात्तत्पक्षं स्थूणादिस्वननन्यायेन द्रढयितुं पक्षान्तरमाह—नहीति । मम मत्तः ॥ १३ ॥ शरव्ययं शरमोक्षं । कच्चिदिति कामप्रवेदने ॥ १४ ॥ तर्हि शरव्ययं न करोमीत्यत्राह—क्षत्रियाणामिति । क्षत्रियाणां समीपतःस्थितं धनुः तेजोरूपं बलं भृशं उच्छ्रयते वर्धयति । हुताशस्य समीपस्थितानीन्धनानि च तेजोबलमुच्छ्रयन्ते । दृष्टान्तालंकारः ॥ १५ ॥ उक्तार्थे ऐतिह्यमाह—पुरेत्यादि । रतमृगद्विजे संतुष्टमृगपक्षिके । तपस्वी कश्चिदभवदित्यन्वयः ॥ १६—१७॥ स इति खड्गविशेषणं । न्यासविधिना न्यासप्रकारेण । " राजचोरादिकभयाद्दायादानां च वञ्चनात् । स्थाप्यतेऽन्यगृहे द्रव्यं न्यासः स परिकीर्तितः " इत्युक्तो न्यासः । तिष्ठतः तस्येति शेषः । चतुर्थ्यर्थे षष्ठी ॥ १८ ॥ आत्मनः प्रत्ययं विश्वासस्थापितं वस्तु । "प्रत्ययोधीनशपथज्ञानविश्वासहेतुषु " इत्यमरः । रक्षन्नेव

जनाय ॥ १० ॥ स० दण्डकाइतीत्यस्य विवक्षाऽभावान्नसंधिः ॥ ११ ॥ ति० ममनश्चिन्ताकुलं भवेत् भवति । रक्षसांबलवत्त्वेन तेभ्योऽनिष्टसंभावनया ऐहिकसुखभङ्गोपि संभावितइतिभावः । शि० त्वद्वृत्तं राक्षसवधप्रतिज्ञावृत्तान्तं । चिन्तयन्त्याममहितंनिश्श्रेयसं कल्याणं भवेत् । मत्प्रार्थनांस्वीकुर्वित्यर्थः । एतेन राक्षसमात्रवधप्रतिज्ञाश्रयणादनपराधिविभीषणादिवधविषयकसंशयो जातइति व्यञ्जितं । नच "तपस्विनांरणेशत्रून्हन्तुमिच्छामिराक्षसान्" इति प्रतिज्ञावाक्ये तपस्विशत्रुत्वविशिष्टराक्षसवधप्रतिज्ञया विभीषणादिव्यावृत्तिस्सिद्धैवेति संशयस्यनावकाशइति वाच्यं । शत्रुभ्रातृत्वादेश्शत्रुत्वाभासस्य संशयबीजत्वात् । नच प्रतिज्ञावाक्ये रणइतिसप्तम्यन्तस्योपादानाद्रणेआगतान्राक्षसान्हन्तुमिच्छामीत्यर्थात्कथंविभीषणादिसंग्रहसंशयइति वाच्यं । रणेविद्यमानोऽहं हन्तुमिच्छामीत्यर्थस्यापि संभवात् विभीषणानुयायिनामपि बहूनां रावणाधीनत्वाद्रणागमनसंभवाच्च यत्नविशेषमन्तरा विभीषणागमनस्यापि दुर्वारत्वाच्चेतिदिक् ॥ १२ ॥

[पा०] १ ट. तद्वृत्तं. २ क. घ. तवनिश्रेयसंहितत्. ३ क. छ. ज. तव. ४ घ. वने. ५ क. च. छ. ज. ञ. न्घोरान्. ६ क. च. छ. ज. ञ. क्षत्रियाणामपि. ङ. झ. ट. क्षत्रियाणामिह. ७ क—ङ. छ. झ. ञ. ट. सत्यवाञ्शुचिः. ८ क. ग. ङ. छ. ज. ञ. ट. रूपधृक्. ९ ङ. छ. झ. ट. निहितः. १० क—ट. वनेतु. ११ ख. ग. ङ. ट. विहरत्येव. क. विहरत्येवं. घ. विचरत्येवं.

यत्र गच्छत्युपादातुं मूलानि च फलानि च ॥ न विना याति तं खड्गं न्यासरक्षणतत्परः ॥ २० ॥
नित्यं शस्त्रं परिवहन्क्रमेण स तपोधनः ॥ चकार रौद्रीं स्वां बुद्धिं त्यक्त्वा तपसि निश्चयम् ॥२१॥
ततः स रौद्रेऽभिरतः प्रमत्तो धर्मकर्शितः ॥ तस्य शस्त्रस्य संवासाज्जगाम नरकं मुनिः ॥ २२ ॥
एवमेतत्पुरा वृत्तं शस्त्रसंयोगकारणम् ॥ २३ ॥
अग्निसंयोगवद्धेतुश्शस्त्रसंयोग उच्यते ॥ स्नेहाच्च बहुमानाच्च स्मारये त्वां न शिक्षये ॥ २४ ॥
न कथंचन सा कार्या गृहीतधनुषा त्वया ॥ बुद्धिर्वैरं विना हन्तुं राक्षसान्दण्डकाश्रितान् ॥
अपराधं विना हन्तुं लोकान्वीर न कामये ॥ २५ ॥
क्षत्रियाणां तु वीराणां वनेषु निरतात्मनाम् ॥ धनुषा कार्यमेतावदार्तानामभिरक्षणम् ॥ २६ ॥
क्व च शस्त्रं क्व च वनं क्व च क्षात्रं तपः क्व च ॥ व्याविद्धमिदमस्माभिर्देशधर्मस्तु पूज्यताम् ॥ २७॥
तदार्य कलुषा बुद्धिर्जायते शस्त्रसेवनात् ॥ पुनर्गत्वा त्वयोध्यायां क्षत्रधर्मं चरिष्यसि ॥ २८ ॥

विचरति व्यचरत् ॥ १९ ॥ एतदेवोपपादयति—यत्रेति ॥ २० ॥ परिवहन् रक्षन् । रौद्रीं हिंसापरां । स्वां शस्त्रधार्यसाधारणां ॥ २१ ॥ रौद्रे हिंसारूपकर्मणि । अधर्मेण कर्शितः पीडितः । संवासात्संपर्कात् ॥ २२ ॥ शस्त्रसंयोगकारणं पुरावृत्तं उक्तमिति शेषः ॥ २३ ॥ पुरावृत्तफलितमर्थमाह—अग्नीति । अग्निसंयोगो यथा वस्तुनो विकारहेतुः एवं शस्त्रसंयोगोपि शस्त्रिणो विकारहेतुर्भवति । स्नेहात् त्वद्विषयस्नेहात् । बहुमानात् मद्विषये त्वत्कृतबहुमानात् । स्मारये भवद्विज्ञातार्थमेव स्मारयामि । न शिक्षये नापूर्वमर्थमुपदिशामि ॥ २४ ॥ गृहीतधनुषा त्वयावैरं विना राक्षसान् हन्तुं सा रौद्री बुद्धिः । कथंचन केनापि प्रकारेण । न कार्या न कर्तुं योग्या । त्वत्प्रकृत्यननुगुणत्वादिति भावः । इयं बुद्धिर्मत्प्रकृतेरप्यननुगुणेत्याह—अपराधमिति । लोकान् प्राणिनः ॥ २५ ॥ यद्येवं तर्हि क्षत्रियधर्मो धनुर्धारणं निरवकाशं स्यादित्याशङ्क्याह—क्षत्रियाणां त्विति । वीराणां क्षत्रियाणां धनुषा कार्यं कर्तव्यं । वनेषु निरतात्मनां आर्तानां पीडितानां रक्षणं बाधकोत्सारणमित्येतावदेव । तुरवधारणे ॥ २६ ॥ ननु रक्षणार्थं वा धनुर्धार्यमेवेत्याशङ्क्य तदपिनेदानीमुचितं किंतु राज्यपालनकाल इत्याह—क्वचेत्यादिना । क्षात्रं क्षत्रधर्मः । किंशब्दाभ्यांगम्यमानमर्थमाह—व्याविद्धमिदमिति । शस्त्रवने क्षात्रतपसी च । परस्परविरुद्धमिदमस्माभिर्न पूज्यतां । किंतु देशधर्मस्तपोवनधर्मः पूज्यतां । क्षात्रशस्त्रे विहाय वनवासतपश्चरणे एव क्रियतामित्यर्थः ॥ २७ ॥ व्यत्ययो वा किं न स्यादित्यत्राह—तदार्येति । तर्हि वर्णधर्मो

ति० स्नेहात् भवद्विषयात् । बहुमानात् त्वत्कर्तृकान्मद्विषयात् । किंच बहुमानोनाम मदीयोऽयंभर्तेत्येवमभिमानः । स्मारये पुरावृत्तमितिशेषः । अत्र स्नेहोहेतुः । बहुमानाच्च त्वां तु शिक्षये इत्यर्थः । तदेवशिक्षणंकरोति । नकथंचनेति । यत्तुतीर्थः स्मारयेत्वांनशिक्षये इतिपठति व्याचष्टेच तत्तूत्तरवाक्ये करिष्यमाणशिक्षणेन व्याहतमिति कतकः ॥ २४ ॥ तनि० अपराधविनेति । निरपराधहननमेवात्रप्रतिषिध्यते नतु तपस्विषुमापराधराक्षसहननं । तेन सापराधं सम्यगालोच्य तत्राप्यपराधक्षालनोपायान्तराभावे हन्तव्यमितिभावः । लोकान्हन्तुमिति । "अकुर्वन्तोपिपापानि शुचयःपापसंश्रयात्" इत्युक्तन्यायेन एकापराधिलक्षीकरणेनप्रवृत्तेहनने अनपराधिनामपि बाधा यथा नभवति तथा कार्यमितीहार्थः । ति० हन्तुं राक्षसानिति शेषः । नमंस्यते तदयत्नमौचित्येनेतिशेषः ॥ लोकान्वीरनकामये इति पाठे लोकान्हन्तुंनेच्छामि राक्षसवधवदितरप्राणिवधस्याप्येवंसति प्रसङ्गादितिभावः ॥ शि० नमंस्यते प्रशस्तत्वेननिश्चेष्यतिकश्चिद्विद्वानितिशेषः ॥ २५ ॥ शि० निवृत्तानांतु प्राकृतक्षत्रियाणामपि शस्त्रधारणमनुचितमित्याह—क्वचेति । क्षात्रं क्षत्रियसंबन्धि शस्त्रंक्व तपश्चक्व । इदं धर्मद्वयस्वीकारः व्याविद्धं विरुद्धं अस्माभिर्निश्चीयतइतिशेषः । अतोदेशधर्मः प्राकृतविलक्षणायोध्योचितरीतिः सद्वारकाद्वारकपालनं पूज्यतां क्रियतां ॥२७॥

[पा०] १ क. तां. २ ग. नित्यतां. ख. निष्ठतां. ३ क. ख. ङ. च. ज—ट. रौद्राभिरतः. ४ क. धर्मदर्शने. ख. धर्मवर्जितः. ५ ङ. झ. त्वांतुशिक्षये. ६ क. झ. लोकोवीरनमंस्यते. ट. लोकेवीरनमंस्यते. क. वीरलोकान्नकामये. ग. लोकान्वीरान्नकामये. ७ क. ख. ग वनेतु. ८ क. ख. ज. ञ. नियतात्मनां. ९ ग. धार्यं. १० ग. क्वचित्. ११ क. च. छ. ज. झ. मस्माकदेश. १२ क. ङ. झ. ट. कदर्यकलुषा. १३ क. त्वयोध्यायां.

अक्षया तु भवेत्प्रीतिः श्वश्रूश्वशुरयोर्मम ॥ यदि राज्यं परित्यज्य भवेस्त्वं निरतो मुनिः ॥ २९ ॥
धर्मादर्थः प्रभवति धर्मात्प्रभवते सुखम् ॥ धर्मेण लभते सर्वं धर्मसारमिदं जगत् ॥ ३० ॥
आत्मानं नियमैस्तैस्तैः कर्शयित्वा प्रयत्नतः ॥ प्राप्यते निपुणैर्धर्मो न सुखाल्लभ्यते सुखम् ॥ ३१ ॥
नित्यं शुचिमतिः सौम्य चर धर्मं तपोवने ॥ सर्वं हि विदितं तुभ्यं त्रैलोक्यमपि तत्त्वतः ॥ ३२ ॥
स्त्रीचापलादेतदुदाहृतं मे धर्मं च वक्तुं तव कस्समर्थः ॥
विचार्य बुद्ध्या तु सहानुजेन यद्रोचते तत्कुरु मा चिरेण ॥ ३३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे नवमः सर्गः ॥ ९ ॥

दशमः सर्गः ॥ १० ॥

रामेणसीतांप्रतिसश्वशूर्यशरणार्थंमुनिजनेपुरक्षोहननस्वस्वेनप्रतिज्ञानत्वोक्तयाप्रतिज्ञापालनस्वप्राणादिभ्योपिगरीयस्त्वेन दुस्त्यजत्वोक्तिपूर्वंकंरक्षोवधेनमुनिजनरक्षणस्यावश्यंकर्तव्यत्वोक्तिः ॥ १ ॥

वाक्यमेतत्तु वैदेह्या व्याहृतं भर्तृभक्तया ॥ श्रुत्वा धर्मे स्थितो रामः प्रत्युवाचाथ मैथिलीम् ॥ १ ॥

क्षुण्येतेत्यत्राह—पुनरिति ॥ २८ ॥ तपोमात्रकरणे फलान्तरमप्याह—अक्षयेति । यद्वा सर्वदा क्षत्रधर्मं त्यक्त्वा मुनिवृत्तिराश्रीयतामित्याह—अक्षयेति । तुः समुच्चये । अकलुषा बुद्धिश्च ते भवेदित्यर्थः । श्वश्रूश्वशुरयोः कैकेयीदशरथयोः । "श्वशुरः श्वश्रवा" इत्येकशेषाभाव आर्षः ॥ २९ ॥ केवलधर्मानुष्ठानस्य सर्वश्रेयोमूलत्वमाह—धर्मादित्यादिना । सर्वं मुक्तिमपि ज्ञानद्वारा लभत इत्यर्थः ॥ ३० ॥ धर्मार्थज्ञानप्रकारमाह—आत्मानमिति । नियमैः चान्द्रायणादिव्रतैः । आत्मानं शरीरं ॥ ३१ ॥ त्रैलोक्यं त्रिलोकभवं पुरुषार्थतत्साधनतदङ्गकलापं ॥ ३२ ॥ स्त्रीचापलात् स्त्रीलप्रयुक्तचापलात् । मे मया । मा चिरेण विचारस्य विलम्बो मा भूत् । अत्र सार्धत्रयस्त्रिंशच्छ्लोकाः ॥ ३३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने नवमः सर्गः ॥ ९ ॥

एवं रामः सत्यप्रतिज्ञो निर्वैरं च रक्षोवधं नकरिष्यति । तथाच मद्वियोगेन रक्षोवधेन भवितव्यं । मद्विरहं च न सहिष्यते । संकटमिदमुपस्थितमित्याकुलचित्ता वैदेही पतिप्रेमान्धा रक्षोवधान्निवर्तयितुमुपक्रान्ता । रामस्तु सीताविरहं सोढ्वापि तन्मूलवैरेण रक्षांसि निहत्य प्रतिज्ञा निर्वोढव्येति समाधत्ते दशमे—वाक्यमेतत्त्वित्यादि । भर्तृभक्तयेत्यनेन भर्तृप्रेमपारवश्येन पूर्वमुक्तमिति ज्ञायते । धर्मेस्थित इत्यनेन सीताविरहक्लेशमङ्गीकृत्यापि प्रतिश्रुतनिर्वहणपरता द्योत्यते । यद्यपि

ति० यतः शास्त्रसेवनात् कदर्याणां कृपणानामिव कलुषाबुद्धिर्जायतेधर्मानुष्ठानविरोधिनी । अतः शास्त्रसेवनं वने नकर्तव्यमिति ध्वनिः ॥ २९ ॥ ती० श्वश्रूश्वशुरयोः अक्षयाप्रीतिर्भवेत् वनवासोचितधर्मानुष्ठाने श्वशुरस्यस्वर्गलाभजा प्रीतिः । पुत्रस्य युद्धाद्विक्लेशराहित्येन श्वश्वाःकौसल्यायाः प्रीतिरित्यर्थः ॥ स० श्वश्रूश्वशुरयोः वैकल्पिकत्वात्रैकशेषः ॥ २९ ॥ ति० अत्रेदं गूढसीतातात्पर्यं । यदि सकलरक्षःक्षयेण सकलत्रिभुवनवर्त्तीरक्षणमनन्यराधिपीडाविहाय कर्तुंशक्यं तदा क्षात्रधर्मं चर नोचेच्छुद्धतपोधर्मंचरेति "धनुषाकार्यमेतावदार्तानामभिरक्षणं" इत्यनेनेदं ध्वनितं । "क्षत्रियाणांतुवीराणां वनेष्वनियतात्मनां" इति पूर्वार्धस्य वनेष्वपिसतांक्षत्रियाणांवीराणामुत्तरार्धोक्तभावश्यकमिति गूढतात्पर्यं ॥ स० पूर्वं स्वस्वस्त्रियाः प्रकृतत्वेपि कस्समर्थइति पुंल्लिङ्देशेन स्त्रीपुरुषसाधारण्येनसमर्थोनास्तीति सूच्यते । यद्वा कूटस्थोक्षरइति रमायाः पुंशक्तिमत्त्वेन पुंल्लिङ्शब्दवाच्यत्वात्कस्समर्थइति वक्ष्यै स्वस्य तत्त्वंसूचयामासेत्यवसेयं । अनुजेनसहविचार्येति लोकानुकरणार्थं ॥ ३३ ॥ इतिनवमस्सर्गः ॥ ९ ॥

स० आपाततोऽधर्मत्वेनप्रतिपादितहिंसासीतासंमत्यैवधर्मत्वेनोदाहरति—वाक्यमिति । ति० संवर्धितइतिपाठेसंवर्धि-

[पा०] १ क. ख. ग. ङ—ट. राज्यंहित्वंन्यस्य. २ ख. ग. घ. प्रभवते. ३ ग. ज. लभ्यते. ४ ङ. ञ. ट. लभते. ५ क. च. ज. ञ. सम्यक्चर. ६ ङ—ञ. ञ ट. सर्वंतु. ७ च. छ. ज. ञ. त्रैलोक्येयद्विवर्तते. क. त्रैलोक्येयद्विवर्तते. ८ ख. ग. सहलक्ष्मणेन. ९ च. ञ. धर्मस्थितो. १० क. ख. ग. ङ—ट. जानकी.

हितमुक्तं त्वया देवि स्निग्धया सदृशं वचः ॥ कुलं व्यपदिशन्त्या च धर्मज्ञे जनकात्मजे ॥ २ ॥
किंतु वक्ष्याम्यहं देवि त्वयैवोक्तमिदं वचः ॥ क्षत्रियैर्धार्यते चापो नार्तशब्दो भवेदिति ॥ ३ ॥
मां सीते स्वयमागम्य शरण्याः शरणं गताः ॥ ते चार्ता दण्डकारण्ये मुनयः संशितव्रताः ॥ ४ ॥
वसन्तो धर्मनिरता वने मूलफलाशनाः ॥ न लभन्ते सुखं भीता राक्षसैः क्रूरकर्मभिः ॥ ५ ॥
काले काले च निरता नियमैर्विविधैर्वने ॥ भक्ष्यन्ते राक्षसैर्भीमैर्नरमांसोपजीविभिः ॥ ६ ॥
ते भक्ष्यमाणा मुनयो दण्डकारण्यवासिनः ॥ अस्मानभ्यवपद्येति मामूचुर्द्विजसत्तमाः ॥ ७ ॥
मया तु वचनं श्रुत्वा तेषामेवं मुखाच्च्युतम् ॥ कृत्वा चरणशुश्रूषां वाक्यमेतदुदाहृतम् ॥ ८ ॥
प्रसीदन्तु भवन्तो मे ह्रीरेषा हि ममातुला ॥ यदीदृशैरहं विप्रैरुपस्थेयैरुपस्थितः ॥
किं करोमीति च मया व्याहृतं द्विजसंनिधौ ॥ ९ ॥
सर्वैरेतैः समागम्य वागियं समुदाहृता ॥ १० ॥
राक्षसैर्दण्डकारण्ये बहुभिः कामरूपिभिः ॥ अर्दिताः स्म दृढं राम भवान्नस्तत्र रक्षतु ॥ ११ ॥

खरवध एवदण्डकारण्यवासिभिरर्थितो रामेण प्रतिज्ञातश्च । तथापि खरवधो रावणवधमूलमिति खरवधद्वारा रावणवधोप्यर्थित एवेति सीतयोक्तमुपपन्नं ॥१॥ स्निग्धया अनुरक्तया । कुलं व्यपदिशन्त्या स्वमहाकुलीनत्वं प्रख्यापयन्त्या । त्वया सदृशं अनुरागकुलसदृशं हितमुक्तं । हितोक्तौ हेतुः—धर्मज्ञ इति । कुलव्यपदेशे हेतुः—जनकात्मज इति ॥ २ ॥ यदि मया हितमुक्तं तर्हि तथैव क्रियतामिति चेत्तत्र वक्ष्यामि । तदेवाह—त्वयैवेति । क्षत्रियैर्धार्यते चापो नार्तशब्दो भवेदितीदं वचनं त्वयैवोक्तं खलु । मुनयश्चार्ताः तस्मात्तद्विरोधिवधः कर्तव्य एवेति भावः ॥ ३ ॥ ननूक्तं विरोध्युत्सारणेनार्तरक्षणंकर्तव्यं नतु निरपराधवध इत्याशङ्क्य तेषां शरणागतत्वेन मत्प्राणभूतत्वात्तेष्वपराधो मदपराध इत्याशयेनाह—मामित्यादि । अत्रत्यविशेषणैरात्मनः शरणागतपक्षपातं स्फोरयति ॥ ४—५ ॥ काले काले सर्वकालेष्वित्यर्थः ॥ ६ ॥ अभ्यवपद्य अनुगृहाणेत्यर्थः । लोण्मध्यमपुरुषैकवचनं । आर्षं परस्मैपदं । अभ्यवपत्तिः अनुग्रहः ॥ ७ ॥ चरणशुश्रूषां पादवन्दनं ॥ ८ ॥ प्रसीदन्तु मदपचारं क्षमन्तां । ह्रीः लज्जा । अतुला अधिका । तत्रहेतुमाह—यदिति । उपस्थेयैः अभिगन्तव्यैः । उपस्थितः अभिगतः । किं करोमीति लोडर्थे लट् । किं करवाणीत्यर्थः ॥ ९—१० ॥ अर्दिताः पीडिताः । तत्र तेभ्यः रक्षत्विति अभ्यवपद्येत्यत्र सामान्येनानुग्रहः प्रार्थितः । इह तु तद्विशेषे पृष्टे विशेष उक्तः ॥ ११ ॥

ततेजाः ॥ १ ॥ ती० कुलंव्यपदिशन्त्या क्षत्रियाणांहिवीराणामित्यादिना क्षत्रियकुलधर्मंप्रकाशयन्त्येत्यर्थः ॥ १ ॥ ती० हेदेवि किंनुवक्ष्यामि किंचिदपिमयानवक्तव्यं । तत्कुतः त्वयैवोक्तमिदंवचः ॥ ३ ॥ स० संशितव्रताः सम्यक् तीव्रफलजनकव्रतविशिष्टाः । संशितव्रताइतिपाठे सम्यक् सितंबद्धं व्रतंयेषांतेतथा । राक्षसोपद्रवादननुष्ठितसद्व्यापाराइतिभावः ॥ ४ ॥ ति० कालकालेषु सर्वकालेष्वित्यर्थः । राक्षसैरित्यस्य वध्यमानाइतिशेषः ॥ ५ ॥ ती० वचनशुश्रूषां वचनानुष्ठानलक्षणशुश्रूषामित्यर्थः । कृत्वा मनसिकृत्वेत्यर्थः ॥ ८ ॥ ति० उपस्थितः रक्षणार्थमितिशेषः ॥ एषा ममह्रीः अकीर्तिः । अतःप्रसीदन्त्वित्यर्थः । स० उपस्थेयैः अस्माभिरुपगम्यसंरक्षणीयैः ॥ तनि० स्तोत्रादिनाचेतस्संकोचनं ह्रीः "वीतरागस्यस्तोत्राद्यैश्चेतस्संकोचनं व्रीडा" इतिलक्षणात् ॥ ९ ॥ स० तत्र तत्कृतपीडावस्थायां । यद्वा तांस्त्रायतइति तत्रः । तस्यसंबुद्धिः हेतत्र । एतावत्काल-

[पा०] १ क. च. छ. ज. ञ. जनकस्यमहात्मनः. २ क. ङ—झ. ट. किंतु. ३ क. ग. घ. धार्यतेक्षत्रियैश्चापो. ४ अस्मिञ्श्लोकेपूर्वोत्तरार्धयोःपौर्वापर्यं क—ट. पुस्तकेषुदृश्यते. ५ घ. ङ. झ. ट. शरण्यं. ६ ङ. झ. ट. वसन्तःकालकालेषु. ७ ग. वनमूल. ८ क. ख. ग. ङ—ट. भीरु. ९ ग. भीमकर्मभिः. १० क. ख. च. छ. ज. ञ. सर्वकालेषुनिरताः. ग. सर्वकालेऽभिनिरताः. ११ क. च. छ. ज. ञ. र्युताः. ख. र्वृताः. १२ क. च. छ. ज. ञ. तैर्भक्ष्यमाणा. १३ घ. ङ. झ. ट. पद्यैते. १४ क. ख. घ. च. छ. ज. ञ. तेषामेव. १५ क. ग. ङ—ट. वचनशुश्रूषां. १६ ग. घ. झ. ह्रीरेषातु. ख. श्रीरेषातु क. ह्रीरेषाच. १७ च. छ. ज रुपस्थेयैरहंवीरैरुपस्थितः. क. रहंवीरैरुपस्थेयैः. १८ क. च. छ. ज. ञ. मुनिसंनिधौ. १९ क. ख. ग. ङ—ट. सर्वैरेव. २० ख. अर्दितान्सुदृढं. घ—ट. अर्दितास्मभृशं. २१ क. च. छ. ज. ञ. नस्त्रातुमर्हसि.

होमकालेषु संप्राप्ताः पर्वकालेषु चानघ ॥ धर्षयन्ति सुदुर्धर्षा राक्षसाः पिशिताशनाः ॥ १२ ॥
राक्षसैर्धर्षितानां च तापसानां तपस्विनाम् ॥ गतिं मृगयमाणानां भवान्नः परमा गतिः ॥ १३ ॥
कामं तपःप्रभावेन शक्ता हन्तुं निशाचरान् ॥ चिरार्जितं तु नेच्छामस्तपः खण्डयितुं वयम् ॥१४॥
बहुविघ्नं तपो नित्यं दुश्चरं चैव राघव ॥ तेन शापं न मुञ्चामो भक्ष्यमाणाश्च राक्षसैः ॥ १५ ॥
तैर्दह्यमानान्रक्षोभिर्दण्डकारण्यवासिभिः ॥ रक्ष नस्त्वं सह भ्रात्रा त्वन्नाथा हि वयं वने ॥ १६ ॥
मया चैतद्वचः श्रुत्वा कात्स्न्र्येन परिपालनम् ॥ ऋषीणां दण्डकारण्ये संश्रुतं जनकात्मजे ॥ १७ ॥
संश्रुत्य च न शक्ष्यामि जीवमानः प्रतिश्रवम् ॥ मुनीनामन्यथा कर्तुं सत्यमिष्टं हि मे सदा ॥१८॥
अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम् ॥ न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः ॥१९॥
तदवश्यं मया कार्यमृषीणां परिपालनम् ॥ अनुक्तेनापि वैदेहि प्रतिज्ञाय तु किं पुनः ॥ २० ॥
मम स्नेहाच्च सौहार्दादिदमुक्तं त्वयाऽनघे ॥ परितुष्टोस्म्यहं सीते न ह्यनिष्टोऽनुशिष्यते ॥ २१ ॥
सदृशं चानुरूपं च कुलस्य तव चात्मनः ॥ सधर्मचारिणी मे त्वं प्राणेभ्योपि गरीयसी ॥ २२ ॥

न केवलं पीडयन्ति यज्ञविघ्नं च कुर्वन्तीत्याहुः—होमेति। यज्ञविघ्नकरं हन्यामिति मद्भोजननिवर्तनात्कः परोपराध इति सीतायै सूचयितुमिदमनूदितं । होमकालेषु अग्निहोत्रकालेषु । पर्वकालेषु दर्शपौर्णमासादियज्ञकालेषु । धर्षयन्ति अभिधावन्ति ॥ १२ ॥ गतिं रक्षकं । मृगयमाणानां अन्वेषयतां ॥१६॥ परमशब्दव्यवच्छेद्यं दर्शयति—काममिति ॥१४॥ उक्तं विवृणोति—बहिति ॥१५॥ उपसंहरति—तदिति । त्वन्नाथा इति बहुव्रीहिः । इयं वाक् समुदाहृतेति पूर्वेणान्वयः ॥१६॥ कात्स्न्र्येन परिपालनं रक्षोवधपर्यन्तपरिपालनं। संश्रुतं प्रतिज्ञातं । मदाश्रितविरोधिनो मद्विरोधित्वान् मद्भोजनविघातकत्वाच्चेत्यर्थः ॥ १७ ॥ जीवमानः जीवन् । प्रतिश्रवं प्रतिज्ञां। अन्यथाकर्तुं न शक्ष्यामि । तत्र हेतुः—सत्यमिष्टमिति । सत्यं सत्यवचनं ॥ १८ ॥ तर्ह्यावयोर्विश्लेषो दुर्विषहः स्यात्तत्राह—अप्यहमिति। "आत्मानं सर्वदा रक्षेद्दारैरपि धनैरपि" इत्युक्तं जीवितमपि जह्यां । "भ्राता स्वा मूर्तिरात्मनः" इत्युक्तं लक्ष्मणमपि जह्यां । "अर्धो वा एष आत्मनो यत्पत्नी" इत्युक्तांवापि जह्यामिति किमाश्चर्यं । संश्रुत्य यस्मै कस्मैचित्किंचियत्प्रतिज्ञाय तां प्रतिज्ञां न जह्यां । ब्राह्मणेभ्यः ब्रह्मविद्भ्यः कृतां प्रतिज्ञां विशेषतो न जह्यां ॥ १९ ॥ अनुक्तेनापीति ऋषिभिरिति शेषः । उक्तरीत्या रक्षसां मदपराधित्वेन तद्वधस्य मत्कार्यत्वादिति भावः ॥ २० ॥ एवं वदन्त्यास्तव हृदयं च जानामीत्याह—ममेति । मम त्वयि स्नेहात् तव मयि सौहार्दाच्चोक्तं । विरहो दुःसहो भविष्यतीत्युक्तमित्यर्थः । अनिष्टः अप्रियः पुरुषः ॥ २१ ॥ तव आत्मनः सदृशं तव कुलस्य चानुरूपमिदं वचः धर्मप्राधान्योक्तित्वत्कुलानुरूपा । "कर्मणैव हि संसिद्धिमास्थिता जनकादयः" इति हि त्वत्कुलपद्धतिः । सापराधेष्वपि निरपराधोक्तिस्तव सदृशी । "पापानां वा शुभानां वा वधार्हाणां पुवंगम । कार्यं करुणमार्येण न कश्चि-

---

पर्यन्तं राक्षससंरक्षक । अत्रक्षणमन्तरेण तेषांजीवनासंभवादितिभावः ॥ ११ ॥ स० तापसानां तपसइमे तापसाः अतीतकालीनतपस्का तेषां । तपस्विनां वर्तमानकालीनतपस्कानां। यद्वा तपस्विनामिति निर्धारणेषष्ठी । तपस्विनांमध्ये तापसानामित्यर्थः । अत्यन्ततपस्विनामितिभावः ॥ शि० तपस्विनां परमात्मविचारशीलानां । तापसानां वेदशास्त्रोपपन्नानां ॥ १३ ॥ ति० चतुर्दशवर्षपर्यन्तं पित्राज्ञया राज्यत्यागेप्यग्रेराज्यसंबन्धस्यावश्यकत्वाच्छरणागतरक्षणेऽस्त्येवाधिकारः । किंच क्षत्रजातेरेवाधिकारः नतुराज्यपदस्थस्यैवेतितात्पर्यं ॥ १७ ॥ शि० जीवमानः जीवनसकलपालनेन मानः सत्कारोयस्य सोहं ॥ सदेत्यनेन स्वाभाविकोधर्मस्त्यक्तुं नशक्यत इतिसूचितं ॥ १८ ॥ शि० सधर्मचारिणी सहधर्मचरणशीला । त्वं मेप्राणेभ्योपिगरीयसी । असीतिशेषः । एतेन संसर्गप्राप्तापराधिवधस्त्वयापिन्यक्षतस्त्याजनीयइतिसूचितं । तेन लङ्कागमनाय सीतामाज्ञापयामासेति ध्वनितं ।

[पा०] १ क. ख. ग. ङ—ट. कालेष्वसंप्राप्ते. २ क. ख. ग. ङ—ट. धर्षयन्तिस्म. ३ ङ. ज्ञ. ट. नचेच्छामः. ४ क. ख. छ. ज. तदन्यमानान्. ५ क. छ. म. वासिनः. ६ ङ ज्ञ. ञ. ट रक्षकस्त्वं. ७ क. ख. ग. छ. ज. प्रतिज्ञायाश्चकिं. ङ. ज्ञ. ञ. ट. प्रतिज्ञायकयं. ८ क. मयि. ९ क. ख. ग. ङ. च. छ. ज्ञ. ञ. ट. त्वयावचः. १० ङ. शास्यते. ख. शिष्यते. ११ क. चानुकूलं. १२ क—ट. शोभने. १३ ख. लिखं.

इत्येवमुक्त्वा वचनं महात्मा सीतां प्रियां मैथिलराजपुत्रीम् ॥
रामो धनुष्मान्सह लक्ष्मणेन जगाम रम्याणि तपोवनानि ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे दशमः सर्गः ॥ १० ॥

एकादशः सर्गः ॥ ११ ॥

दण्डकारण्यंगच्छतारामेणपञ्चाप्सरोनामकेकचनतटाकेअन्तर्जलेगीतवादित्रध्वनिश्रवणेनादर्शनेनचवाद्यवादकादीनां विस्मयात्सहचरंकचनमुनिंप्रतितत्तत्वकथनप्रार्थना ॥१॥ तस्मान्मुनिवरात्तत्तटाकादिवृत्तान्तंशृण्वतैवगच्छतारामेणदण्डकारण्येमुनिगणाश्रममण्डलदर्शनम् ॥ २ ॥ तथासीतालक्ष्मणाभ्यांसहतत्रतत्राश्रमेषुत्रिचतुरादिमासक्रमेणनिवासेनदशवर्षपरिमितकालयापनम् ॥ ३ ॥ पुनरपिसुतीक्ष्णाश्रममुपागतवतारामेणतंप्रतिस्वस्यागस्त्यावलोकनौत्सुक्यनिवेदनेनतदाश्रममार्गप्रश्नः ॥४॥ तेनतंप्रत्यगस्त्यभ्रातुराश्रममार्गलक्षणकथनपूर्वकंतत्रैकरात्रिवासेनतेनैवपथाऽगस्त्याश्रमगमनचोदना ॥ ५ ॥ अगस्त्यभ्रात्राश्रमसमीपंगतेनरामेणलक्ष्मणंप्रतिवातापीक्ष्वलनिषूदनरूपागस्त्यचरितानुवर्णनपूर्वकंसायाह्नेतद्भ्रातरमेत्यतदभिवादनादिपूर्वकं तत्रतद्रात्रियापनम् ॥ ६ ॥ प्रभातेऽगस्त्याश्रममुपगतेनरामेणलक्ष्मणंप्रतिविन्ध्यगिरिनिरोधकत्वाद्यगस्त्यप्रभाववर्णनपूर्वकमगस्त्यायस्वागमननिवेदनचोदना ॥ ७ ॥

अग्रतः प्रययौ रामः सीता मध्ये सुमध्यमा ॥ पृष्ठतस्तु धनुष्पाणिर्लक्ष्मणोऽनुजगाम ह ॥ १ ॥
तौ पश्यमानौ विविधाञ्शैलप्रस्थान्वनानि च ॥ नदीश्च विविधा रम्या जग्मतुः सीतया सह ॥२॥
सारसांश्चक्रवाकांश्च नदीपुलिनचारिणः ॥ सरांसि च सपद्मानि युक्तानि जलजैः खगैः ॥ ३ ॥
यूथबद्धांश्च पृषतान्मदोन्मत्तान्विषाणिनः ॥ महिषांश्च वराहांश्च नागांश्च द्रुमवैरिणः ॥ ४ ॥
ते गत्वा दूरमध्वानं लम्बमाने दिवाकरे ॥ ददृशुः सहिता रम्यं तटाकं योजनायतम् ॥ ५ ॥

न्नापराध्यति" इति हि तव प्रकृतिः । तथापि त्वं मे प्राणेभ्यो गरीयस्यपि सधर्मचारिणीभव मया यो धर्मः संकल्पितस्तत्रैव त्वयापि संकल्पयितव्यमिति भावः ॥ २२॥ महात्मा महाधृतिः । प्रियां मैथिलराजपुत्रीं । इतीति उक्तधर्मद्वयानुवादः ॥ २३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने दशमः सर्गः ॥१०॥

अथ कर्माणि सापायानि रामसेवैका निरपायेति दर्शयितुं माण्डकर्णिवृत्तान्तप्रकटनपूर्वकं सकलमुनिजनाश्रममण्डलसंचरणमेकादशे—अग्रत इत्यादि । अनेन श्लोकेन प्रणवार्थ उक्तः । तौ पश्यमानावित्यादिना नारायणपदार्थः । माण्डकर्णिवृत्तान्ते नम इत्यस्यार्थः । ततः परं विरोधिनिवृत्तिः सूच्यते । एवं मूलमन्त्रार्थानुसंधानमेव परमा गतिरित्युच्यते ॥ १ ॥ पश्यमानौ पश्यन्तौ । शैलप्रस्थान् शैलसानूनि ॥ २ ॥ सारसान् हंसविशेषान् । पुलिनं सैकतं । जलजैः खगैः जलपक्षिभिः ॥ ३ ॥ यूथबद्धान् यूथतयाबद्धान् समूहीभूतानित्यर्थः । पृषतान् बिन्दुमृगान् विषाणिन इति महिषादिविशेषणं । नागान् गजान् ॥ ४ ॥ लम्बमाने अस्तमयोन्मुखे । योजनायतं चतुर्दिशि योजनप्रमाणविस्तारं । पद्मपुष्करसंबाधं पद्मैः पुष्करैः

नहिलङ्कागमनमन्तरा संग्रामाय विभीषणस्य रावणसहगमनं. निवारणार्हमिति तात्पर्यं ॥ स० सधर्मचारिणी समानोधर्मस्सधर्मः । सधर्मं चरितुं शीलमस्याअस्तीति सधर्मचारिणी ॥ २२ ॥ इतिदशमस्सर्गः ॥ १० ॥

तनि० अनेनश्लोकेन प्रणवार्थःप्रकाशितइति संप्रदायः । तत्र अग्रतइति अवर्णप्राथमिकत्वं । अग्रतः प्रययावित्यर्थप्राथम्यं । रामइति सत्तासंपादनरक्षणादिना रमयतीति कारणत्वेरक्षकत्वेच रमासंबन्धित्वेन श्रीशत्वंच । सुमध्यमेति प्रणवद्वितीयवर्णश्च । मध्यइतितस्यवर्णद्वयमध्यवर्तित्वं । सीतामध्येइति लक्ष्म्याः पुरुषकारत्वं । लक्ष्मणइति मनह्वानेइति धातोः असाधारणधर्मवत्वं । धनुष्पाणिरिति निरन्तरकैङ्कर्यवत्वं । अनुजगामेति अहंकारममकारविरहेणानुसरणं । पदान्तमकारेण प्रणवतृतीयवर्णश्च व्यज्यतइतिसंक्षेपः । तौपश्यमानावित्यादिना नारायणपदार्थःप्रकाशितइतिसंप्रदायः ॥ स० मध्ये रामलक्ष्मणयोर्मध्ये जगाम । मध्येकटिप्रदेशे

[पा०] १ क. झ. ट. सुशोभना. २ क—ट. सहसीतया. ३ च. छ. झ. ञ. ट. युतानि. ४ क. ख. ग. ङ—ट. गजांश्च.

पद्मपुष्करसंबाधं गजयूथैरलंकृतम् ॥ सारसैर्हंसकादम्बैः संकुलं जलचारिभिः ॥ ६ ॥
प्रसन्नसलिले रम्ये तस्मिन्सरसि शुश्रुवे ॥ गीतवादित्रनिर्घोषो न तु कश्चन दृश्यते ॥ ७ ॥
ततः कौतूहलाद्रामो लक्ष्मणश्च महाबलः ॥ मुनिं धर्मभृतं नाम प्रष्टुं समुपचक्रमे ॥ ८ ॥
इदमत्यद्भुतं श्रुत्वा सर्वेषां नो महामुने ॥ कौतूहलं महज्जातं किमिदं साधु कथ्यताम् ॥ ९ ॥
वक्तव्यं यदि चेद्विप्र नातिगुह्यमपि प्रभो ॥ १० ॥
तेनैवमुक्तो धर्मात्मा राघवेण मुनिस्तदा ॥ प्रभवं सरसः कृत्स्नमाख्यातुमुपचक्रमे ॥ ११ ॥
इदं पञ्चाप्सरो नाम तटाकं सार्वकालिकम् ॥ निर्मितं तपसा राम मुनिना माण्डकर्णिना ॥ १२ ॥
स हि तेपे तपस्तीव्रं माण्डकर्णिर्महामुनिः ॥ दशवर्षसहस्राणि वायुभक्षो जलाश्रयः ॥ १३ ॥
ततः प्रव्यथिताः सर्वे देवाः साग्निपुरोगमाः ॥ अब्रुवन्वचनं सर्वे परस्परसमागताः ॥ १४ ॥
अस्माकं कस्यचित्स्थानमेष प्रार्थयते मुनिः ॥ इति संविग्नमनसः सर्वे ते त्रिदिवौकसः ॥ १५ ॥
तत्र कर्तुं तपोविघ्नं देवैः सर्वैर्नियोजिताः ॥ प्रधानाप्सरसः पञ्च विद्युच्चलितवर्चसः ॥ १६ ॥
अप्सरोभिस्ततस्ताभिर्मुनिर्दृष्टपरावरः ॥ नीतो मदनवश्यत्वं सुराणां कार्यसिद्धये ॥ १७ ॥
ताश्चैवाप्सरसः पञ्च मुनेः पत्नीत्वमागताः ॥ तटाके निर्मितं तासामस्मिन्नन्तर्हितं गृहम् ॥ १८ ॥
तत्रैवाप्सरसः पञ्च निवसन्त्यो यथासुखम् ॥ रमयन्ति तपोयोगान्मुनिं यौवनमास्थितम् ॥ १९ ॥

सर्वैश्च संबाधं निबिडं। "वाद्यभाण्डमुखे सर्वे कारण्डे पुष्करं स्मृतं" इति विश्वः। सारसैः "सारसो मैथुने कामी गोनर्दः पुष्कराह्वयः" इत्युक्तेः। हंसैः राजहंसैः। कादम्बैः कलहंसैः। "कादम्बः कलहंसश्च हंसः स्याद्धूसरच्छदः" इत्युक्तेः ॥ ५—६ ॥ गीतेति गीतानि षड्जादिस्वरनिबद्धप्रबन्धाः। वादित्राणि ततघनसुषिरानद्धभेदेन चतुर्विधानि तेषां निर्घोषः। अत्र यादवः। "वादित्रं वादितं वाद्यमातोद्यं तच्चतुर्विधम्। ततं वीणादिकं वाद्यं तालं तु विततं घनम्। वंशादिकं तु सुषिरमानद्धं मुरजादिकं" इति कञ्चन वादयिता। न दृश्यते नादृश्यत ॥७॥ धर्मभृतं सहागतेषु मुनिष्वन्यतमं। कथ्यतामित्येवं प्रष्टुं समुपचक्रम इत्यन्वयः ॥ ८—१० ॥ प्रभवं उत्पत्तिं। कृत्स्नं गीतवादित्रमूलं चेत्यर्थः ॥ ११ ॥ पञ्चाप्सरःक्रीडासाधनत्वात् पञ्चाप्सरो नाम। सार्वकालिकं सर्वकाले भवं। "कालाट्ठञ्" उभयपदवृद्धिः। सर्वस्मिन्नपि काले अद्यप्यदित्यर्थः ॥ १२ ॥ उक्तार्थे इतिहासमाह—स हीत्यादिना। जलाश्रयः स्वनिर्मिततटाकजलावगाढः ॥ १३ ॥ साग्निपुरोगमाः अग्निना पुरःसरेण सहिताः। क्रियाभेदात्सर्वशब्दावृत्तिः ॥ १४ ॥ अस्माकं मध्ये। संविग्नमनसः भीतमनस्काः ॥ १५ ॥ तत्र तदा। विद्युच्चलितवर्चसः विद्युतइव तरलतेजसः चलितविद्युद्वर्चस इति वार्थः ॥ १६ ॥ दृष्टपरावरः दृष्टपरमात्मजीवस्वरूपः ॥ १७—१८ ॥ तपोयोगान्

सुशोभनेत्यपि बोध्यते ॥ ५ ॥ ती० पद्मानां रक्तपङ्कजानां। पुष्कराणां पुण्डरीकाणां ॥ कतक० पद्मानां पुष्करैश्च जलेसंबाधोनैबिड्यं यत्र तं ॥ स० पद्मानि कमलानि। पुष्कराः पक्षिणः। तेषां संबाधः संमर्दो यस्मिंस्तं। "पुष्करः। ओषधीपक्षिहस्तेषु" इतिविश्वः। जलजातिभिः। जलेषु जातिर्जन्म येषां तैर्मत्स्यादिभिः ॥ ६ ॥ ती० सर्वैरप्यप्रव्यथिता अभूवन्। सर्वे अब्रुवन्नितिच सर्वशब्दद्वयसन्निर्वाहः ॥ १४ ॥ प्रधानाप्सरसः पञ्चेत्यनेन तत्परिचारिकाअन्याअपि सन्तीत्यवगम्यते ॥ १६ ॥ ति० दृष्टपरावरः

[पा०] १ घ. च. छ. कारण्डैः. २ ङ—ट. जलजातिभिः. ३ क. च. छ. निर्घोषस्तत्रकश्चिन्नदृश्यते. ४ क. ग. कुतूहलात्. ५ ख—ङ. झ. ट. महारथः. ६ क. च. छ. ज. ञ. दृष्ट्वा. ७ छ. ज. किमेतत्. ८ क. ख. घ. ङ. च. ज—ट. प्रभावं. ९ च. छ. ज. सार्वकामिकं. १० क. ग. माण्डकर्णिना. ११ ख. महातपाः. १२ क. ख. ग. च. छ. ज. ञ. जलाशयः. ङ. झ. ट. जलाशये. १३ क. देवास्सर्वे. १४ क. ख. ग. ङ—झ. सर्वेतत्र. १५ क—ट. ततः. १६ ख. ग. ङ. ट. सर्वेदेवैः. झ. सर्वदेवैः. १७ ग. विद्युत्सदृश. १८ ङ—ट. देवानां. १९ ख. तस्यैवा. २० क. ग—ट. तासांतस्मिन्. २१ ख. ग. ङ—ट. तत्रैवा.

तासां संक्रीडमानानामेष वादित्रनिःस्वनः ॥ श्रूयते भूषणोन्मिश्रो गीतशब्दो मनोहरः ॥ २० ॥
आश्चर्यमिति तस्यैतद्वचनं भावितात्मनः ॥ राघवः प्रतिजग्राह सह भ्रात्रा महायशाः ॥ २१ ॥
एवं कथयमानस्य ददर्शाश्रममण्डलम् ॥ कुशचीरपरिक्षिप्तं ब्राह्म्या लक्ष्म्या समावृतम् ॥ २२ ॥
प्रविश्य सह वैदेह्या लक्ष्मणेन च राघवः ॥ उवास मुनिभिः सर्वैः पूज्यमानो महायशाः ॥ २३ ॥
तेषां तस्मिन्स काकुत्स्थः श्रीमत्याश्रममण्डले ॥ उषित्वा सुखं तत्र पूज्यमानो महर्षिभिः ॥२४॥
जगाम चाश्रमांस्तेषां पर्यायेण तपस्विनाम् ॥ येषामुषितवान्पूर्वं सकाशे स महास्त्रवित् ॥ २५ ॥
कचित्परिदशान्मासानेकं संवत्सरं कचित् ॥ कचिच्च चतुरो मासान्पञ्च षट् चापरान्कचित् ॥ २६ ॥

तपोरूपोपायात् । यौवनमास्थितं । " योगसन्नहनोपायध्यानसंगतियुक्तिषु" इत्यमरः ॥ १९ ॥ संक्रीडमानानामिति " क्रीडोनुसंपरिभ्यश्च" इत्यात्मनेपदं । भूषणोन्मिश्रः भूषणघोषोन्मिश्रः वादित्रनिःस्वनविशेषणं । भूषणोन्मिश्रो वादित्रनिःस्वनो गीतशब्दश्च श्रूयत इत्यन्वयः ॥२०॥ एतत् पूर्वोक्तं वचनं । आश्चर्यमिति प्रतिजग्राह श्रुतवान् ॥ २१ ॥ कथयमानस्य कथयमाने तस्मिन्मुनौ । कथयमानःस इतिपाठे एवं संभाषमाणः स रामः ब्राह्म्या ब्राह्मणसंबन्धिन्या । लक्ष्म्या समृद्ध्या ब्राह्मणसंपूर्णमित्यर्थः । आश्रममण्डलं ददर्श राघव इत्यनुषङ्गः ॥ २२ ॥ प्रविश्येति आश्रममण्डलमित्यनुषज्यते । सर्वैस्तदाश्रमवासिभिः पूज्यमानः स्वस्वाश्रमे अर्घ्यादिना अर्च्यमानः ॥ २३ ॥ कियन्तं कालं तत्रोवासेत्यपेक्षायां कालपरिमाणं वक्तुं रामस्याश्रमवासप्रकारंदर्शयति—तयेत्यादिश्लोकद्वयेन । तथा तत्प्रकारेण । तस्मिन्नाश्रममण्डले । सुखमुषित्वा तत्र पूज्यमानः स राम इत्युक्तानुवादः । येषां सकाशे पूर्वमुषितवान् तेषामाश्रमान् पर्यायेण द्वितीयपर्यायेण च जगाम । एवमाश्रमवासप्रकारः । एकवारं सर्वेषामाश्रमान्गत्वा पुनरपि तेषामेवाश्रमाञ्जगामेति वाक्यार्थः । महास्त्रविदित्यनेन तत्रत्यराक्षसोपद्रवपरिहाराय पुनर्गमनमिति सूचयति । वक्ष्यति हि मारीचः "तेन मुक्तास्त्रयो बाणाः" इत्यारभ्य "पराक्रमज्ञौ रामस्य शरो दृष्टभयः पुरा । समुद्धान्तस्ततो मुक्तस्ताबुभौ राक्षसौ हतौ" इति ॥ एतदर्थमेव सुतीक्ष्णेनात्र गमनमनुज्ञातं ऋषिभिः कारितं च ॥ २४—२५ ॥ पूर्वमुषितवानित्युक्तवासक्रमं दर्शयति—कचिदित्यादिना । राघवो रामः कचिदाश्रमे परिदशान् परिगताः दश येषां ते परिदशाः । "संख्ययाव्यय—" इत्यादिना बहुव्रीहिसमासः । "बहुव्रीहौ संख्येयेडजबहुगणात्" इतिटच् समासान्तः । तान्मासान् त्रयोदशमासानित्यर्थः । अत्यन्तसंयोगे द्वितीया । सुखं यथा भवति तथा न्यवसत् । कचिदाश्रमे एकं संवत्सरं सुखं न्यवसत् । कचिदाश्रमे चतुरो मासान् सुखं न्यवसत् । कचित् पञ्च मासान् कचिन् षण्मासान् कचिदपरान् बहुभ्योन्यान् सप्त मासान् । सुखं न्यवसत् । पञ्च षट् च तथा कचिदिति पाठे तथा पुनः कचिन् षण्मासानित्यर्थः । परिदशानित्यत्र चतुर्दशमासानित्यर्थः । अपरत्राश्रमे मासादधिकं सुखं न्यवसत् । अधिकशब्देनात्र मासचतुर्थांशो विवक्षितः । एकमासं मासपादं चेत्यर्थः । अपरत्राधिकं मासमिति पाठे मासं अधिकं तत्पादं चेत्यर्थः । अपिशब्दः सर्वत्र मासानुकर्षणार्थः । कचिदाश्रमे अर्धमधिकं च न्यवसत् पादोनमासमित्यर्थः । तथा चैतदव्यवहितपूर्वाश्रमवासदिनैर्द्वौ मासौ संवृत्तौ एकत्र सपादमासः अपरत्र पादोनमास इत्याहृत्य मासद्वयसंभवात् । अध्यर्धमधिकं

दृष्टैहिकपारलौकिकधर्मार्थः ॥ १७ ॥ ति० एवंकथयमानः आश्चर्यमित्येव कथयन् ॥ २२ ॥ ती० तस्मिन्नाश्रममण्डले उषित्वा तत्रैव महर्षिभिःपूज्यमानइति तच्छब्दद्वयसंबन्धः ॥ २४ ॥ ती० परिदशान् दशसमीपान् एकादशनवेत्यर्थः ॥

[पा०] १ क. भूषणैर्मिश्रो. २ ख. ग. आश्चर्यतरमस्यैतत्. ३ एवंकथयमानस्येत्यर्धस्यस्थाने क. च. छ. ज. ञ. पुस्तकेषु. एवंकथयमानस्यसहभ्रात्रामहामुनेः । अग्रतोरमणीयं चददर्शाश्रममण्डलम् । इत्यर्धद्वयं दृश्यते. ४ ङ. ञ. ट. कथयमानस्य. ५ ग. घ. च. छ. ज. नानावृक्षसमाकुलं. ६ क. राघवोलक्ष्मणेनच. ७ ग. ऋषिभिः. ८ क. ख. ग. च. छ. ज. महात्मभिः. ९ घ—ट तदा. १० ग. क. ञ. ट. सुमुखं. क. ख. घ. सुसुखं. ११ क. ख. ग. आश्रमंतेषां. १२ क. परमास्त्रविन्. च. छ. ज. सुमहास्त्रवित्. १३ क. ञ. ट. नेकसंवत्सरं. १४ घ. ङ. ञ. षट्चपरान्. च. ज. षट्त्रिसरान्. छ. झ. षट्त्रिपरान्.

अपरत्राधिकं मासादप्यर्धमधिकं क्वचित् ॥ त्रीन्मासानष्टमासांश्च राघवो न्यवसत्सुखम् ॥ २७ ॥
तथा संवसतस्तस्य मुनीनामाश्रमेषु वै ॥ रमतश्चानुकूल्येन ययुः संवत्सरा दश ॥ २८ ॥
परिवृत्य च धर्मज्ञो राघवः सह सीतया ॥ सुतीक्ष्णस्याश्रमं श्रीमान्पुनरेवाजगाम ह ॥ २९ ॥
स तमाश्रममासाद्य मुनिभिः प्रतिपूजितः ॥ तत्रापि न्यवसद्रामः किंचित्कालमरिंदमः ॥ ३० ॥
अथाश्रमस्थो विनयात्कदाचित्तं महामुनिम् ॥ उपासीनः स काकुत्स्थः सुतीक्ष्णमिदमब्रवीत् ॥३१॥
अस्मिन्नरण्ये भगवन्नगस्त्यो मुनिसत्तमः ॥ वसतीति मया नित्यं कथाः कथयतां श्रुतम् ॥ ३२ ॥
नं तु जानामि तं देशं वनस्यास्य महत्तया ॥ क्वैत्राश्रममिदं पुण्यं महर्षेस्तस्य धीमतः ॥ ३३ ॥
प्रसादात्तत्र भवतः सानुजः सह सीतया ॥ अगस्त्यमभिगच्छेयमभिवादयितुं मुनिम् ॥ ३४ ॥
मनोरथो महानेष हृदि मे परिवर्तते ॥ यंदहं तं मुनिवरं शुश्रूषेयमपि स्वयम् ॥ ३५ ॥
इति रामस्य स मुनिः श्रुत्वा धर्मात्मनो वचः ॥ सुतीक्ष्णः प्रत्युवाचेदं प्रीतो दशरथात्मजम् ॥३६॥
अहमप्येतदेव त्वां वक्तुकामः सलक्ष्मणम् ॥ अगस्त्यमभिगच्छेति सीतया सह राघव ॥ ३७ ॥
दिष्ट्या त्विदानीमर्थेऽस्मिन्स्वयमेव ब्रवीषि माम् ॥ अहमाख्यामि ते वत्स यत्रागस्त्यो महामुनिः॥३८॥
योजनान्याश्रमादस्मात्तथा चत्वारि वै ततः ॥ दक्षिणेन महाञ्छ्रीमानगस्त्यभ्रातुराश्रमः ॥ ३९ ॥

क्वचिदितिपाठे अध्यर्धं अर्धाधिकं अर्धमासाधिकमित्यर्थः । अधिकं पूर्वोक्तपादमासात्सकाधिकं तथाच त्रिपादमासमित्यर्थः । क्वचित्रीन्मासान् न्यवसत् क्वचिदष्टमासान् न्यवसत् । एवं षष्टिमासाः सिद्धाः । केचिदाहुः परिदशान् दशाधिकानिति । वक्ष्यमाणेष्वष्टसुस्थानेष्वन्वेति । तथाचायमर्थः । एवं संवत्सरं क्वचिदित्यत्र द्वाविंशतिमासानित्यर्थः । क्वचित्च चतुरो मासानित्यत्र चतुर्दश मासानित्यर्थः । पञ्च षट् चापरान् क्वचिदित्यत्र क्वचित् पञ्चदश मासान् क्वचित् षोडशमासानित्यर्थः । अपरानधिकं मासादप्यर्धमधिकं क्वचिदित्यत्र त्रयमाधिकशब्दोर्धमासरूपाधिकांशपरः । तथा च अपरान्परिदशान्मासान् अधिकं चेत्यन्वये अर्धाधिकदशमासानित्यर्थः । मासादप्यर्धमित्यादेरयमर्थः । क्वचित्परिदशान्मासान् तदुपरिमासादधिकमर्धमपि चेति । तथाच अर्धाधिकैकादशमासानित्यर्थः । त्रीन्मासानष्टमासांश्चेत्यत्र त्रयोदश मासान् अष्टादश मासांश्चेत्यर्थः । तथाच विंशत्युत्तरशतमासा लब्धा इति । तस्मिन्पक्षे प्रथमिकक्वचित्पदमासपदानर्थक्यं पूर्वमन्थविरोध इत्यादि द्रष्टव्यम् ॥२६—२७॥ तथाचाश्रममण्डले दश संवत्सराः संवृत्ता इत्याह—तथा संवसत इति । इयमेवाश्रमवाससंख्या । पूर्वापरसंख्या तु किष्किन्धाकाण्डे वक्ष्यते ॥ २८ ॥ परिवृत्य एवमाश्रमं सर्वं परिक्रम्य ॥ २९—३१ ॥ कथाः नानाकथाः । कथयतां कथयत्सु ॥ ३२—३३ ॥ तत्र वने । अगस्त्यमभिवादयितुमभिगच्छेयमित्यन्वयः ॥ ३४ ॥ तं मुनिवरं शुश्रूषेयमिति यत् एष मनोरथः अभिलाषो मे हृदि परिवर्तत इत्यन्वयः । शुश्रूषेयमिति परस्मैपदमार्षं ॥ ३५—३६ ॥ अहमिति । अगस्त्यमभिगच्छेत्येतद्वक्तुकामोस्मीत्यन्वयः ॥ ३७—३८ ॥ अस्मादाश्रमाद्दक्षिणेन । तथेति हस्तेन निर्देशः । चत्वारि

ति० परिदशान् दशसंख्यापरिगतान् । दशसंख्यानित्यर्थः ॥ २६ ॥ ति० " योजनादाश्रमादस्मादभिचत्वारिवैततः " इति कृतकपाठे अस्मादाश्रमाद्योजनादपि अधिकं चत्वारियोजनानीत्यर्थः । स० अगस्त्यभ्रातुः इत्यवाहस्य । " अगस्त्य-

[पा०] १ क. ङ.—ट. अपरत्राधिकान्मासानध्यर्धं. २ क. ख. घ. च. छ. ज. ध, ततः. ङ. झ. ट. तत्र. ३ क. च. छ. ज. ञ. ट. आश्रमेषुच. ४ क. ख. झ. परिसृत्यच. च. ज. ञ. परिवृत्यस. ५ ङ. ट. स्याश्रमपदंपुनः. ग. स्याश्रमंरामःपुनः. ६ क. ख. ग. ङ.—ट. मागम्य. ७ क. च. छ. ज. ञ. पूजितस्तदा. ख.—ङ. झ. ट. परिपूजितः. ८ घ. तदाश्रमस्थो. च. ज. अथाश्रमस्थं. ९ क.—घ. च. ज. भगवान्. १० क. घ. छ. ज. ञ. नहि. ११ क. घ. छ. ज. ञ. यत्राश्रमं. ग. यत्राश्रमपदं. ख.—च. ज. झ. कुत्राश्रमपदं. १२ ङ. ज. झ. ञ. रम्यं. १३ ख. गं. ङ. छ. झ. ट. प्रसादार्थंभगवतः. १४ ख. ग.—ङ. ट. संपरिवर्तते. १५ घ. यद्यहं. १६ क. घ. छ. ज. तच्छ्रुत्वाधर्मात्मामुनिसत्तमः. १७ घ.—झ. ट. राम. १८ ख. ङ.—ट. न्याश्रमात्तातयाहि.

स्थलीप्राये वनोद्देशे पिप्पलीवनशोभिते ॥ बहुपुष्पफले रम्ये नानाशकुनिनादिते ॥ ४० ॥
पक्षिन्यो विविधास्तत्र प्रसक्तसलिलाः शिवाः ॥ हंसकारण्डवाकीर्णाश्चक्रवाकोपशोभिताः ॥ ४१ ॥
तत्रैकां रजनीं व्युष्य प्रभाते राम गम्यताम् ॥ दक्षिणां दिशमास्थाय वनषण्डस्य पार्श्वतः ॥ ४२ ॥
तत्रागस्त्याश्रमपदं गत्वा योजनमन्तरम् ॥ रमणीये वनोद्देशे बहुपादपसंवृते ॥ ४३ ॥
रंस्यते तत्र वैदेही लक्ष्मणश्च सह त्वया ॥ सं हि रम्यो वनोद्देशो बहुपादपसंकुलः ॥ ४४ ॥
यदि बुद्धिः कृता द्रष्टुमगस्त्यं तं महामुनिम् ॥ अद्यैव गमने बुद्धिं रोचयस्व महायशः ॥ ४५ ॥
इति रामो मुनेः श्रुत्वा सह भ्रात्राऽभिवाद्य च ॥ प्रतस्थेऽगस्त्यमुद्दिश्य सानुजः सीतया सह ॥ ४६ ॥
पश्यन्वनानि रम्याणि पर्वतांश्चाभ्रसन्निभान् ॥ सरांसि सरितश्चैव पथि मार्गवशानुगाः ॥ ४७ ॥
सुतीक्ष्णेनोपदिष्टेन गत्वा तेन पथा सुखम् ॥ इदं परमसंहृष्टो वाक्यं लक्ष्मणमब्रवीत् ॥ ४८ ॥
एतद्देवाश्रमपदं नूनं तस्य महात्मनः ॥ अगस्त्यस्य मुनेर्भ्रातुर्दृश्यते पुण्यकर्मणः ॥ ४९ ॥
यैषा हि मे वनस्यास्य ज्ञाताः पथि सहस्रशः ॥ संनताः फलभारेण पुष्पभारेण च द्रुमाः ॥ ५० ॥
पिप्पलीनां च पक्वानां वनादस्मादुपागतः ॥ गन्धोऽयं पवनोत्क्षिप्तः सहसा कटुकोदयः ॥ ५१ ॥
तत्र तत्र च दृश्यन्ते संक्षिप्ताः काष्ठसंचयाः ॥ लूनाश्च पथि दृश्यन्ते दर्भा वैदूर्यवर्चसः ॥ ५२ ॥
एतच्च वनमध्यस्थं कृष्णाभ्रशिखरोपमम् ॥ पावकस्याश्रमस्थस्य धूमाग्रं संप्रदृश्यते ॥ ५३ ॥
विविक्तेषु च तीरेषु कृतस्नाना द्विजातयः ॥ पुष्पोपहारं कुर्वन्ति कुसुमैः स्वयमार्जितैः ॥ ५४ ॥

योजनानि अभियाहीति शेषः । ततस्तत्र अगस्त्यभ्रातुराश्रमो वर्तते । आश्रमाद्दक्षिणेनेत्यत्र "एनपा द्वितीया" इति द्वितीयाऽभाव आर्षः ॥ ३९ ॥ स्थलीप्राये स्थलीप्रचुरे ॥ ४० ॥ कारण्डवाः सारसाः ॥ ४१ ॥ तत्र अगस्त्यभ्रात्राश्रमे रजनीं व्युष्य रात्रिमतिवाह्य वनषण्डस्य वनसमूहस्य । पार्श्वतः दक्षिणां दिशं आस्थाय उद्दिश्य । निर्वणदेशे योजनमन्तरं योजनावकाशं गत्वा अगस्त्याश्रमपदं गम्यतामित्यन्वयः ॥ ४२—४५ ॥ इति एवंप्रकारेण । मुनेःसकाशाच्छ्रुत्वा ॥ ४६ ॥ अभ्रसन्निभान् मेघसन्निभान् । मार्गवशानुगाः मार्गवशेनानुगम्यमानाः । रामइति पूर्वश्लोकादनुवृत्त्यते ॥ ४७—४८ ॥ नूनमिति वितर्के । यदाश्रमपदं दृश्यते एतन्मुनेर्नूनमित्यन्वयः ॥ ४९ ॥ उक्तेर्थे हेतुमाह—यथाहीति । यथाहि मे पथि चिह्नतया वनंप्रतं तथैवास्य वनस्य फलभारेण पुष्पभारेण च संनताः द्रुमाः सहस्रशो मया ज्ञाताः ज्ञायमाना वर्तन्ते ॥ ५० ॥ असाधारणोपदिष्टलिङ्गं अनुभूयत इत्याह—पिप्पलीनामित्यादि । पक्वानां पिप्पलीनामिति तत्फलानामित्यर्थः । कटुकस्य कटुरसस्य उदयोभिव्यक्तिरनुमानिकी येन स तथा गन्धः उपागतः ॥ ५१—५२ ॥ कृष्णाभ्रशिखरोपमं नीलमेघाभोपमं ॥ ५३ ॥ विविक्तेषु पूतेषु । " विविक्तौ पूतविजनौ " इत्यमरः ।

[पा०] १ ग. घ. छ. ज. ञ. स्थलप्राये. झ. स्थलीप्रायवनोद्देशे. २ क. झ. ट. विहगनादिते. ३ क. झ. ट. सलिलाशयाः. घ. सलिलाम्बुमाः. ४ क. घ. छ. ज. ञ. चक्रवाकैरलंकृताः. ५ क.—ब. घ. छ. ज. ञ. रजनीमुष्य. ६ ङ. घ. छ. झ. ञ. ट. वनस्य. ७ क. घ. छ. ज. ञ. ततोऽगस्त्या. ८ ङ. झ. ट. शोभिते. ९ ङ झ. ट. सयासह. १० ख. ग. सतु. ११ ङ. झ. ट. संयुतः. १२ ङ. घ. ज.—ट. महामते. १३ ङ—ट. सहसीतया. १४ ख. ग. ङ. झ. ट. चित्राणि. १५ क. घ. छ. ज. ञ. सानूनिविविधानिच. १६ ङ. झ. ट. वक्षानुगान्. १७ क. ख. ग. ङ. च. ज झ. ञ. यथाहिमे १८ ख. घ. छ. ज ञ. जाताः. १९ ख. ध्वंसकाः. २० ख. ङ. झ. ट. परिदृश्यन्ते. २१ झ. ञ. वैदूर्य. २२ ख. ङ.—झ. ट. तीर्थेषु. घ. देशेषु. २३ ख. ग. घ. छ. कृतस्नाता. २४ घ. ज. ञ. महर्षयः. २५ ङ. झ. पुष्पोपहारं. क. घ. छ. ज. ञ. पुष्पोपहारान्. २६ ङ. घ. झ. ञ. ट. अर्जितैः.

तत्सुतीक्ष्णस्य वचनं यथा सौम्य मया श्रुतम् ॥ अगस्त्यस्याश्रमो भ्रातुर्नूनमेव भविष्यति ॥ ५५ ॥
निगृह्य तैरसा मृत्युं लोकानां हितकाम्यया ॥ यस्य भ्रात्रा कृतेयं दिक्छरण्या पुण्यकर्मणा ॥५६॥
इहैकदा किल क्रूरो वातापिरपि चेल्वलः ॥ भ्रातरौ सहितावास्तां ब्राह्मणघ्नौ महासुरौ ॥ ५७ ॥
धारयन्ब्राह्मणं रूपमिल्वलः संस्कृतं वदन् ॥ आमन्त्रयति विप्रान्स श्राद्धमुद्दिश्य निर्घृणः ॥ ५८ ॥
भ्रातरं संस्कृतं कृत्वा ततस्तं मेषरूपिणम् ॥ तान्द्विजान्भोजयामास श्राद्धदृष्टेन कर्मणा ॥ ५९ ॥
ततो भुक्तवतां तेषां विप्राणामिल्वलोब्रवीत् ॥ वातापे निष्क्रमस्वेति स्वरेण महता वदन् ॥ ६० ॥
ततो भ्रातुर्वचः श्रुत्वा वातापिर्मेषवद्वदन् ॥ भित्त्वा भित्त्वा शरीराणि ब्राह्मणानां विनिष्पतत् ६१॥
ब्राह्मणानां सहस्राणि तैरेवं कामरूपिभिः ॥ विनाशितानि संहत्य नित्यशः पिशिताशनैः ॥६२॥
अगस्त्येन तदा देवैः प्रार्थितेन महर्षिणा ॥ अनुकूलः किल श्राद्धे भक्षितः स महासुरः ॥ ६३ ॥
ततः संपन्नमित्युक्त्वा दत्त्वा हस्तोदकं ततः ॥ भ्रातरं निष्क्रमस्वेति चेल्वलः सोभ्यभाषत ॥६४॥
स तं तथा भाषमाणं भ्रातरं विप्रघातिनम् ॥ अब्रवीत्प्रहसन्धीमानगस्त्यो मुनिसत्तमः ॥ ६५ ॥
कुतो निष्क्रमितुं शक्तिर्मया जीर्णस्य रक्षसः ॥ भ्रातुस्ते मेषरूपस्य गतस्य यमसादनम् ॥ ६६ ॥
अथ तस्य वचः श्रुत्वा भ्रातुर्निधनसंश्रयम् ॥ प्रधर्षयितुमारेभे मुनिं क्रोधान्निशाचरः ॥ ६७ ॥
सोभिद्रवन्मुनिश्रेष्ठं मुनिना दीप्ततेजसा ॥ चक्षुषाऽनलकल्पेन निर्दग्धो निधनं गतः ॥ ६८ ॥

उपहारं पुष्पबलिं । स्वयमार्जितैः । "समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत्" इति स्मरणात् ॥ ५४ ॥ नूनं निश्चये । "नूनं तर्के विनिश्चये" इत्यमरः ॥ ५५ ॥ मृत्युं वातापील्वलनिमित्तकं मरणं । हितकाम्यया हितेच्छया । इयं दिक् दक्षिणा दिक् । शरण्या संश्रयितुं योग्या ॥ ५६ ॥ अस्मिन्नर्थे आख्यायिकामाह—इहेत्यादिना ॥ ५७ ॥ संस्कृतं व्याकरणसंस्कारवतीं वाचं । वदन् ॥ ५८ ॥ संस्कृतं श्राद्धोचितपाकसंस्कारसंस्कृतं कृत्वा श्राद्धदृष्टेन श्राद्धकल्पावगतेन ॥ ५९ ॥ भुक्तवतां भुक्तवत्सु । वदन्नब्रवीत् व्यक्तमब्रवीत् ॥ ६० ॥ व्यनिष्पतत् विनिरपतत् ॥ ६१ ॥ सैरिति बहुवचनं परिवारापेक्षया । संहत्य बहुश इतियावत् ॥ ६२ ॥ अनुभूय श्राद्धवरणादिकमनुभूय ॥ ६३ ॥ ततः श्राद्धान्ते संपन्नमित्युक्त्वा ततो हस्तोदकं च दत्त्वा ॥६४—६६ ॥ निधनसंश्रयं नाशविषयं । प्रधर्षयितुं हिंसितुं ॥ ६७ ॥ अनलकल्पेन अग्निसदृशेन ॥ ६८ ॥ वि-

---

रामानु० मेषवदन् सुतसंज्ञीविनीवैभवात् उदरान्तरितिशेषः ॥ ६१ ॥ स० जीर्णस्य पक्वीकृतस्य "जीर्णे पक्वेपुराणेच" इतिविश्वः ॥ ६६ ॥ स० ननु वनपर्वणि "ततोजगामकौरव्य—भिक्षितुंवसु" इत्यारभ्य "ततोराजर्षयस्सर्वेविष्णुगतचेतसः । वातापिंसंस्कृतंदृष्ट्वामेषभूतंमहासुरम् । अयात्रवीदगस्त्यस्तान्राजर्षीन्पृषिसत्तमः । विधादोयोनकर्तव्योह्यहंभोक्ष्येमहासुरम् । ध्रुर्यासनमथास्थाय निषसाद महामुनिः । तं पर्यवेषयद्वैल्वेन्द्र इल्वलः प्रहसन्निव । अगस्त्यएव कृत्स्नंतु वातापिं जुजुषेततः" इतिगर्भीकृत्य "गवांदशसहस्राणि राज्ञामेकैकशोसुर । तावदेव सुवर्णस्य दित्सितं तु महासुर । मह्यं ततोवै द्विगुणं रथञ्चैवहिरण्मयः । मनोजवौ वाजिनौ च दित्सितंतेमहासुर । जिज्ञास्यतां रथस्सद्यो व्यक्तएष हिरण्मयः । ततः प्रव्यथितोदैत्योददावभ्यधिकंधनम् । सिवाजाश्वसुवाजाश्च तस्मिन्युक्तौ रथे हयौ । ऊहतुस्तं वसून्याशु तानगस्त्याश्रमंप्रति । सर्वान्राज्ञस्सहागस्त्यान्निमेषादिवभारत"

[पा०] १ क. ख. ट. ततःसुतीक्ष्णवचनं. ज. सुतीक्ष्णस्यास्यवचनं. २ क. ख. च. छ. ज. मेव. ३ छ. ज. ञ. तपसा. ४ ख. ग. अस्य. ५ क. ख. च.—ट. विप्रान्स. ६ घ. श्राद्धकर्मणि. ७ क. ख. ग. ज्ञाता. ८ क. सद्विजान्. च.—ञ. द्विजातीन् ९ घ. हित्वा. १० ख. सहस्राणि. ११ क. विनिष्पतन्. ख. सहस्रशः. १२ क. च. छ. ज. ञ. सुवर्शं. ग. क. ट. संहत्य. १३ क. च. छ. ज. ञ. निशाचरः. १४ क. ख. ट. हस्तेवनेजनं. क. ख. ग. च. छ. ज. ञ. हस्तावसेचनं. १५ क. ख. ग. क.—ट. इल्वलः. १६ क. छ. ख. ट. समभाषत. १७ क. ख. ट. ततदाभाषमाणंतु. क. च. छ. ञ. तंतदाभाषमाणंतु. ख. ग. घ. तंतथाभाषमाणंतु. १८ क. च. छ. ञ. मुनिपुङ्गवः. १९ क. ख. ट. भ्रातुस्तु. २० क. च. छ. ज. ञ. तद्वचनं. २१ क. ख. क.—ट. संवृतं. २२ क. ख. ग. क.ख. ट. सोभ्यद्रवद्विजेन्द्रंतं. घ. सोभ्यद्रवद्विजश्रेष्ठं. छ. सोभ्यद्रवद्विजेन्द्रंतु ।

तस्यायमाश्रमो भ्रातुस्तटाकवनशोभितः ॥ विप्रानुकम्पया येन कर्मेदं दुष्करं कृतम् ॥ ६९ ॥
एवं कथयमानस्य तस्य सौमित्रिणा सह ॥ रामस्यास्तं गतः सूर्यः सन्ध्याकालोऽभ्यवर्तत ॥ ७० ॥
उपास्य पश्चिमां सन्ध्यां सह भ्रात्रा यथाविधि ॥ प्रविवेशाश्रमपदं तमृषिं सोऽभ्यवादयत् ॥ ७१ ॥
सम्यक्प्रतिगृहीतश्च मुनिना तेन राघवः ॥ न्यवसत्तां निशामेकां प्राश्य मूलफलानि च ॥ ७२ ॥
तस्यां रात्र्यां व्यतीतायां विमले सूर्यमण्डले ॥ भ्रातरं तमगस्त्यस्य ह्यामन्त्रयत राघवः ॥ ७३ ॥
अभिवादये त्वां भगवन्सुखमध्युषितो निशाम् ॥ आमन्त्रये त्वां गच्छामि गुरुं ते द्रष्टुमग्रजम् ७४॥
गम्यतामिति तेनोक्तो जगाम रघुनन्दनः ॥ यथोद्दिष्टेन मार्गेण वनं तच्चावलोकयन् ॥ ७५ ॥
निवारान्पनसांस्तालांस्तिमिशान्वञ्जुलान्धवान् ॥ चिरिबिल्वान्मधूकांश्च बिल्वानपि च तिन्दुकान् ७६॥
पुष्पितान्पुष्पिताग्राभिर्लताभिरनुवेष्टितान् ॥ ददर्श रामः शतशस्तत्र कान्तारपादपान् ॥ ७७ ॥
हस्तिहस्तैर्विमृदितान्वानरैरुपशोभितान् ॥ मत्तैः शकुनिसंघैश्च शतशश्च प्रणादितान् ॥ ७८ ॥
ततोऽब्रवीत्समीपस्थं रामो राजीवलोचनः ॥ पृष्ठतोऽनुगतं वीरं लक्ष्मणं लक्ष्मिवर्धनम् ॥ ७९ ॥
स्निग्धपत्रा यथा वृक्षा यथा क्षान्ता मृगद्विजाः ॥ आश्रमो नातिदूरस्थो महर्षेर्भावितात्मनः ॥८०॥
अगस्त्य इति विख्यातो लोके स्वेनैव कर्मणा ॥ आश्रमो दृश्यते तस्य परिश्रान्तश्रमापहः ॥ ८१ ॥
प्राज्यधूमाकुलवनश्चीरमालापरिष्कृतः ॥ प्रशान्तमृगयूथश्च नानाशकुनिनादितः ॥ ८२ ॥
निगृह्य तरसा मृत्युं लोकानां हितकाम्यया ॥ दक्षिणा दिक्कृता येन शरण्या पुण्यकर्मणा ॥ ८३ ॥

प्रानुकम्पया विप्रेष्वनुकम्पया ॥ ६९—७१ ॥ प्रतिगृहीतः प्रत्युद्गतः । प्राश्य भुक्त्वा ॥ ७२—७३ ॥ अभिवादय इति अत्रवर्णाधिक्यमार्षं ॥ ७४ ॥ यथोद्दिष्टेन सुतीक्ष्णोक्तेन ॥ ७५ ॥ निवारान् जलकदम्बान् । वञ्जुलान् बकुलान् । " बकुलोवञ्जुलोशोकः " इत्यमरः । तिमिशान् नेमिवृक्षान् । धवान् चिरिबिल्वान् नक्तमालान् । " करञ्जः स्यान्नक्तमालः प्रकीर्यश्चिरिबिल्वकः " इति वैजयन्ती । मधूकान् मधुद्रुमाख्यवृक्षान् । तिन्दुकान् स्फूर्जकाख्यान्वृक्षान् ॥७६—७९ ॥ स्निग्धपत्राः आश्रमवासिभिः रक्षितत्वेन सरसपत्राः । क्षान्ताः शान्ताः । यथा येन प्रकारेण । तथा तेन प्रकारेण । आश्रमो नातिदूरस्थ इति मन्ये ॥ ८० ॥ स्वेन कर्मणा विन्ध्यस्तम्भनरूपेण । अगस्त्य इति विख्यातः अगं स्तम्भयतीत्यगस्त्य इति व्युत्पत्तेः । परिश्रान्तानां श्रममपहन्तीति परिश्रान्तश्रमापहः । प्राज्यैर्बहुभिर्धूमैराकुलं वनं यस्य सः ॥ ८१—८३ ॥

इत्यन्तेन प्रघर्षणारंभस्येल्वलकृतस्य तेनागस्त्येन तद्धननस्यचानुक्तेर्विरोधइतिचेत्सत्यं । कल्पभेदेन समाधिसंभवात् । यद्वा अनलकल्पेनस्वेनचक्षुषा दग्धइव सन्निल्वलस्तंमुनिमभ्यद्रवत् । अनन्तरं तेनदीप्तेनतेजसामुनिनागस्त्येन निधनं भारतरीत्या धनाभावरूपंनिधनंगतइत्यर्थैककण्ठ्यंज्ञेयम् ॥ ६८ ॥ ती० प्रतिगृहीतः प्रतिपूजितः ॥ ७२ ॥ स० लक्ष्मिवर्धनं इकारान्तलक्ष्मीशब्दोप्यस्तीतिभावः । शि० लक्ष्मिणां सुचिह्नानां वर्धनं वृद्धिर्यस्मिंस्तं ॥ ७९ ॥ शि० अगइतिस्त्यः विन्ध्याद्रौशब्दः नामेतिया-

[पा०] १ ख. ग. कर्मैतत् २ क. ख. ङ.—ट. चाभ्यवादयत्. ३ ङ. झ. ट. प्रतिगृहीतस्तु. क. च. छ. ज. ञ. प्रतिगृहीतस्स. ख. ग. परिगृहीतस्तु. ४ ख. ङ.—ञ. व्यतीतायामुदिते. ५ ङ. झ. ट. रविमण्डले. ६. क.—घ. च. छ. झ. ठ. आमन्त्रयत. ७ क. च. छ. ज. आमन्त्रयित्वा. ८ क. च. छ. ज. ञ. निवारांस्तिमिशांश्चैवपनसान्वञ्जुलान्धवान्. ख. ग. ङ. ट. निवारान्पनसान्सालान्वञ्जुलांस्तिलशांस्तथा. झ. निवारान्पनसान्सालान्वञ्जुलांस्तिनिशांस्तथा. ९ घ. च. चीरबिल्वान्. १० क. प्रकीर्यानपिकिंतुकान्. च. छ. ज. ञ. प्रकीर्यानपि. झ. ट. बिल्वानथच. ११ क. च. छ. ज. ञ. र्लताभि.परिवेष्टितान्. ङ. झ. ट. र्लताभिरुपशोभितान्. १२ क.—च. झ. ट. शतशःप्रतिनादितान्. छ. ज. ञ. शतशःप्रविनादितान्. १३ ख. मृगाद्विजाः १४ ग. च. छ. ज. ट. आज्य. १५ क. ग. च. छ. ज. ञ. संकुलः.

तस्येदमाश्रमपदं प्रभावाद्यस्य राक्षसैः ॥ दिगियं दक्षिणा त्रासादृश्यते नोपभुज्यते ॥ ८४ ॥
यदाप्रभृति चाक्रान्ता दिगियं पुण्यकर्मणा ॥ तदाप्रभृति निर्वैराः प्रशान्ता रजनीचराः ॥ ८५ ॥
नाम्ना चेयं भगवतो दक्षिणा दिक्प्रदक्षिणा ॥ प्रथिता त्रिषु लोकेषु दुर्धर्षा क्रूरकर्मभिः ॥ ८६ ॥
मार्गं निरोद्धुं निरतो भास्करस्याचलोत्तमः ॥ निदेशं पालयन्यस्य विन्ध्यः शैलो न वर्धते ॥८७॥
अयं दीर्घायुषस्तस्य लोके विश्रुतकर्मणः ॥ अगस्त्यस्याश्रमः श्रीमान्विनीतजनसेवितः ॥ ८८ ॥
एष लोकार्चितः साधुर्हिते नित्यरतः सताम् ॥ अस्मानभिगतानेष श्रेयसा योजयिष्यति ॥ ८९ ॥
आराधयिष्याम्यत्राहमगस्त्यं तं महामुनिम् ॥ शेषं च वनवासस्य सौम्य वत्स्याम्यहं प्रभो ॥ ९० ॥
अत्र देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ अगस्त्यं नियताहारं सततं पर्युपासते ॥ ९१ ॥
नात्र जीवेन्मृषावादी क्रूरो वा यदि वा शठः ॥ नृशंसः कामवृत्तो वा मुनिरेष तथाविधः ॥९२॥
अत्र देवाश्च यक्षाश्च नागाश्च पतगैः सह ॥ वसन्ति नियताहारा धर्ममाराधयिष्णवः ॥ ९३ ॥
अत्र सिद्धा महात्मानो विमानैः सूर्यसंनिभैः ॥ त्यक्तदेहा नवैर्देहैः स्वर्याताः परमर्षयः ॥ ९४ ॥
यक्षत्वममरत्वं च राज्यानि विविधानि च ॥ अत्र देवाः प्रयच्छन्ति भूतैराराधिताः शुभैः ॥ ९५ ॥

त्रासात् दृश्यते न तु प्राचीनकाल इवोपभुज्यते ॥८४॥ यदाप्रभृतीति अगस्त्यागमनात्प्रभृति । दिक् अगस्त्याश्रमप्रदेशः । अन्यथा पूर्वोक्तविराधादिराक्षसोपद्रवो विरुध्येत । यद्वा दिक् सर्वापि । विराधादयोप्यगस्त्यागमनप्रभृति मन्दोपद्रवाएव । अशुचितादशायामेव मुनिमांसभक्षणं । निर्वैराः वैरप्रवर्तनाशक्ताः । प्रशान्ताः अशान्तवद्वर्तमानाः । अतएवेयं दक्षिणा दिक् नाम्ना भगवतोऽगस्त्यस्य दिगिति प्रसिद्धेत्युच्यते ॥ ८५—८६ ॥ निरतः उद्युक्तः । वर्धमान इत्यर्थः । न वर्धते अद्यापीति शेषः ॥ ८७—८८ ॥ सतां हिते साधुः नित्यरतश्च ॥ ८९ ॥ प्रभो इत्युक्तिः लक्ष्मणस्यापि राजपुत्रत्वात् । प्रभोरिति पाठे प्रभोरगस्त्यस्य । नियोगादिति शेषः ॥ ९० ॥ देवाः वक्ष्यमाणाः पूज्यव्यतिरिक्ताः ॥ ९१ ॥ क्रूरः निर्दयः । "क्रूरौ कठिननिर्दयौ" इत्यमरः । शठः गूढविप्रियकृत् । नृशंसः धातुकः । कामेन वृत्तं यस्य सः कामवृत्तः स्वैरवृत्तः । एषमुनिः अगस्त्यः । तथाविधः मृषावाद्याद्यनर्हः ॥ ९२ ॥ देवाः वक्ष्यमाणब्रह्मादिभिन्नाः । पतगैः गरुडजातिभिः । आराधयिष्णवः आराधयन्तः । छान्दस इष्णुच् ॥ ९३ ॥ सिद्धाः तपस्सिद्धाः । नवैः दिव्यैः ॥ ९४ ॥ भूतैः प्राणिभिः । देवाः ब्रह्मादयः । अगस्त्योपासनकृतनित्यसान्निध्यादितिभावः ।

वत् । यस्मात् ॥ ८१ ॥ स० तस्येदमाश्रमपदं दृश्यतइत्यन्वयः ॥ ८४ ॥ सनिर्वैराः एतद्देशस्थितप्राणिषुवैररहिताः ॥ ८५ ॥ स० भगवतः अगस्त्यस्यमहिम्ना इयंदिक् क्रूरकर्मभीरक्षोभिर्दुर्धषा अतोदक्षिणा अत्युदारा इतिहेतोः नाम्ना दक्षिणेति त्रिषुलोकेषु प्रथितेत्यन्वयः ॥ ८६ ॥ ति० भेरुस्पर्धयासास्करमार्गनिरोद्धुं वर्धितुकामोप्यचलोविन्ध्यः तस्यअगस्त्यस्य संदेशं मदागमनपर्यन्तं मावर्धस्वेत्याज्ञां पालयन्न वर्धते । अद्यापीति शेषः । शि० इयमन्याख्यायिका । सूर्यमाक्रमितुंवर्धमानोऽगस्त्यशिष्योविन्ध्यो गुरुदेश्यकनित्यसान्निध्यप्रणमनसमये देवप्रार्थितागस्त्येन शिष्यद्वारा यावन्मदागमं प्रणमन्भूमावेव पतेत्याज्ञाप्य तदारभ्य स्वयं दक्षिणस्यांदिश्येवातिष्ठदिति ॥ ८७ ॥ स० श्रेयसा धनुर्दानादिना ॥ ति० श्रेयसायोजयिष्यति इन्द्रोदीरितं शरभङ्गोक्तमर्थं मनसिनिधायेदमुक्तमित्यनुसंधेयं ॥ ८९ ॥ ति० प्रभो शुश्रूषणसमर्थेत्यर्थः ॥ स० तमगस्त्यं प्रभोरित्यहमाराधयिष्यामीत्यन्वयः ॥ ९० ॥ ति० तथाविधः दुर्वृत्तासहिष्णुः ॥ ९२ ॥ ति० अत्र आश्रमे । भूतैःप्राणिभिः कर्तृभिः । शुभैः सत्कर्मभिः आराधितादेवादयः आश्रममाहात्म्यादल्पकालेनैव राज्यादीनि प्रयच्छन्तीत्यर्थः ॥ ९५ ॥ इत्येकादश सर्गः ॥ ११ ॥

[पा०] १ क. ख. ग. च. छ. ज. ञ. तस्यैतदाश्रम. २ ख. छ. ज. नोपयुज्यते. ३ क. ख. घ.—ट. सततं. ४ क. ङ. छ. ट. संदेशं. ५ ग. ङ. झ. ट. पालयंस्तस्य. ख. पालयस्तत्र. ६ क ख. घ.—ट. विन्ध्यशैलो. ७ क. प्रथित. ८ क. ङ.—ट. मृगसेवितः. ९ क. च. छ. ज. ञ. चाभिरतः. ख. ङ. झ. ट. नित्यंरतः. १० च. ज. निहागतान्. ग. ङ. झ. ञ ट. नधिगतान्. ख. नभ्यागतान्. ११ क. च. छ ज ञ. सुखं. १२ ख. तत्र. १३ ङ. झ. ट. नियताहाराः. १४ ङ. झ. ट. पापवृत्तो. १५ क. देवास्सयक्षाश्च. १६ ङ. च. ज.—ट. त्यक्त्वादेहानवैः. १७ घ. शुभाः.

आगताः स्माश्रमपदं सौमित्रे प्रविशाग्रतः ॥ निवेदयेह मां प्राप्तमृषये सीतया सह ॥ ९६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकादशः सर्गः ॥ ११ ॥

द्वादशः सर्गः ॥ १२ ॥

लक्ष्मणेनागस्त्यशिष्यंप्रत्यगस्त्येरामागमननिवेदनचोदना ॥ १ ॥ तेनागस्त्याज्ञयाससीतालक्ष्मणस्यरामस्याश्रमप्रवेशनम् ॥ २ ॥ तत्रब्रह्मादिदेवगणस्थानान्यवलोकयतारामेणशिष्यैःसहाभ्यागच्छतोऽगस्त्यस्यपादाभिवादनम् ॥ ३ ॥ अगस्त्येनश्रीरामायसादरमातिथ्यकरणपूर्वकमिन्द्रदत्तवैष्णवधनुराद्यायुधदानम् ॥ ४ ॥ अगस्त्येनरामंप्रतिमृगुशापेनमरुभूतस्यदण्डकारण्यस्यपुनःस्वप्रभावेणयथापुरंतरुनिकरसरित्सरस्समुदयरूपनिजरूपप्राप्तिकथनपूर्वकरक्षश्शिक्षणेनमुनिकुलरक्षणप्रार्थना ॥ ५ ॥

स प्रविश्याश्रमपदं लक्ष्मणो राघवानुजः ॥ अगस्त्यशिष्यमासाद्य वाक्यमेतदुवाच ह ॥ १ ॥
राजा दशरथो नाम ज्येष्ठस्तस्य सुतो बली ॥ रामः प्राप्तो मुनिं द्रष्टुं भार्यया सह सीतया ॥ २ ॥
लक्ष्मणो नाम तस्याहं भ्राता त्ववरजो हितः ॥ अनुकूलश्च भक्तश्च यदि ते श्रोत्रमागतः ॥ ३ ॥
ते वयं वनमत्युग्रं प्रविष्टाः पितृशासनात् ॥ द्रष्टुमिच्छामहे सर्वे भगवन्तं निवेद्यताम् ॥ ४ ॥
तस्य तद्वचनं श्रुत्वा लक्ष्मणस्य तपोधनः ॥ तथेत्युक्त्वाऽग्निशरणं प्रविवेश निवेदितुम् ॥ ५ ॥
स प्रविश्य मुनिश्रेष्ठं तपसा दुष्प्रधर्षणम् ॥ कृताञ्जलिरुवाचेदं रामागमनमञ्जसा ॥
यथोक्तं लक्ष्मणेनैव शिष्योऽगस्त्यस्य संमतः ॥ ६ ॥
पुत्रौ दशरथस्येमौ रामो लक्ष्मण एव च ॥ प्रविष्टावाश्रमपदं सीतया सह भार्यया ॥ ७ ॥
द्रष्टुं भवन्तमायातौ शुश्रूषार्थमरिंदमौ ॥ यदत्रानन्तरं तत्त्वमाज्ञापयितुमर्हसि ॥ ८ ॥
ततः शिष्यादुपश्रुत्य प्राप्तं रामं सलक्ष्मणम् ॥ वैदेहीं च महाभागामिदं वचनमब्रवीत् ॥ ९ ॥

शुभैः सत्कर्मनिरतैः ॥ ९५ ॥ सीतया सह प्राप्तमित्यन्वयः । अनेन रावणवधोद्युक्तत्वं द्योतयति ॥९६॥ अत्र चतुर्नवतिः श्लोकाः ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकादशः सर्गः ॥ ११ ॥

रुद्रस्यापूज्यत्वमाह—स प्रविश्येत्यादि ॥ १—२ ॥ हितः हितकारी । अनुकूलः प्रियकरः । प्रियहितकरत्वे हेतुः—भक्तइति । भक्तः प्रीतिमान् । यदीति संभावनायां । अहं रामश्च ते श्रुतौ भवेवेत्यर्थः । अग्रजत्वादिविशेषणानि रामेण तुल्यप्रतिपत्तिवारणाय ॥ ३ ॥ निवेद्यतां अस्मद्दर्शनेच्छेति शेषः । एतद्वाक्यमुवाचेति पूर्वेणान्वयः । तेवयमित्यस्मिन् श्लोके यमिति गायत्र्या अष्टमाक्षरं सप्तसहस्रसंख्याकाः श्लोका गताः ॥ ४ ॥ अग्निशरण अग्निगृहं ॥ ५ ॥ अञ्जसा आशु । यथोक्तमित्यस्य उवाचेत्यनेनान्वयः । संमतः शिष्येषु मान्यत्वेन संमतः ॥ ६—७ ॥ शुश्रूषार्थं सेवार्थं चेत्यर्थः । अत्र अस्मिन् रामे विषये । अनन्तरं तदागमनानन्तरं । यद्वक्तव्यं तत्त्वं तस्यभावं प्रकारं आज्ञा-

---

ती० हितः शुभोदर्ककारी । अनुकूलः तदिच्छाकरणशीलः । भक्तः पूज्यविषयकानुरागो भक्तिस्तद्वान् ॥१॥ ती० ततइति । प्रातीतिकार्थस्स्पष्टः । वस्तुतस्तु अस्मत्कुलदैवतं सीतालक्ष्मणोपेतश्रीराम आगतइति शिष्यादुपश्रुत्य स्वयं श्रवणानन्दमनुभूय

[पा०] १ क. घ. च ज. निवेदयस्व. २ ख. ङ. च. ज.—ट. सहसीतया. ३ क. च. ञ. सीतयासहभार्यया. ४ क. घ. ज. ञ. अनुरक्तश्च. ५ घ. मन्यग्रं. ६ ग मुनिश्रेष्ठं. ७ क. च. ज. ञ. द्योतितप्रभं. ८ क. च. छ. ज. वचनंव्यक्तयागिरा. ९ क. च. छ. ज. ञ. पुत्रोदशरथस्यासौ. १० क. च. छ. ज. ञ. रामोनाममहायश . ख. भ्रतारौरामलक्ष्मणौ. ११ क. च. छ. ज. ञ. सहभ्रात्राश्रम. १२ क. च. छ. ज. ञ. मायातो. १३ क. च. छ. ज. ञ. मरिंदम .

दिष्ट्या रामश्चिरस्याद्य द्रष्टुं मां समुपागतः ॥ मनसा काङ्क्षितं ह्यस्य मयाऽप्यागमनं प्रति ॥ १० ॥
गम्यतां सत्कृतो रामः सभार्यः सहलक्ष्मणः ॥ प्रवेश्यतां समीपं मे किं चासौ न प्रवेशितः ॥११
एवमुक्तस्तु मुनिना धर्मज्ञेन महात्मना ॥ अभिवाद्याब्रवीच्छिष्यस्तथेति नियताञ्जलिः ॥ १२ ॥
ततो निष्क्रम्य संभ्रान्तः शिष्यो लक्ष्मणमब्रवीत् ॥ कासौ रामो मुनिं द्रष्टुमेतु प्रविशतु स्वयम् ॥१३
ततो गत्वाऽऽश्रमद्वारं शिष्येण सह लक्ष्मणः ॥ दर्शयामास काकुत्स्थं सीतां च जनकात्मजाम् ॥१४॥
तं शिष्यः प्रश्रितो वाक्यमगस्त्यवचनं ब्रुवन् ॥ प्रावेशयद्यथान्यायं सत्कारार्हं सुसत्कृतम् ॥ १५॥
प्रविवेश ततो रामः सीतया सह लक्ष्मणः ॥ प्रशान्तहरिणाकीर्णमाश्रमं ह्यवलोकयन् ॥ १६ ॥
स तत्र ब्रह्मणः स्थानमग्नेः स्थानं तथैव च ॥ विष्णोः स्थानं महेन्द्रस्य स्थानं चैव विवस्वतः ॥१७॥
सोमस्थानं भगस्थानं स्थानं कौबेरमेव च ॥ धातुर्विधातुः स्थाने च वायोः स्थानं तथैव च ॥१८॥
नागराजस्य च स्थानमनन्तस्य महात्मनः ॥ स्थानं तथैव गायत्र्या वसूनां स्थानमेव च ॥ १९ ॥
स्थानं च पाशहस्तस्य वरुणस्य महात्मनः ॥ कार्तिकेयस्य च स्थानं धर्मस्थानं च पश्यति ॥ २० ॥

पयितुमर्हसि ॥ ८—९॥ दिष्ट्या यदृच्छया। चिरस्य चिरात् प्रतिकाङ्क्षितमित्यन्वयः। प्रतिर्वीप्सायां। सत्कृतः सत्कारार्हः। किंचासौ न प्रवेशितः—कुतो विलम्बितइत्यर्थः ॥ १०—११॥ अभिवाद्येति। विलम्बकरणापचारनिवृत्त्यर्थं वन्दनं। अतएव संभ्रान्त इति वक्ष्यति ॥ १२—१४ ॥ अगस्त्येनोच्यत इत्यगस्त्यवचनं अगस्त्योक्तमित्यर्थः। सुसत्कृतं सविनयवाक्येनबहुमतं ॥ १५ ॥ आश्रमं मुनिगृहं ॥ १६ ॥ अयं तत्र देवपूजागृहाण्यपश्यदित्याह—स तत्रेत्यादि। तत्र अगस्त्यगृहे। ब्रह्मणः चतुर्मुखस्य। अग्नेः पावकस्य। तथैव चेति निपातसमुदायस्समुच्चये ॥ १७ ॥ भगो देवताविशेषः ॥१८—१९॥ पाशहस्तस्येत्यादिविशेषणानि तत्र मुनेरगस्त्यस्य भक्तिविशेषद्योतनार्थं। इमे ब्रह्मादयः पूर्वसर्गे फलप्रदत्वेनोक्ताः। अन्ये अगस्त्योपासकत्वेनोक्ताः। एते ब्रह्माग्निविष्णुमहेन्द्रविवस्वत्सोमभगकुबेरधातृविधातृवाय्वनन्तगायत्रीवसुवरुणकार्तिकेयधर्माख्याः सप्तदशदेवाः। "यो वै सप्तदशं" इत्यनुवाकोक्तसप्तदशाक्षरदेवताः यायजूकेन मुनिना पूजार्थं प्रतिष्ठिता इति बोध्यं। अत्र पूज्यदैवतेषु रुद्रस्यानुपादानादपूज्यत्वमुक्तम्। अधुना जनैः कैश्चित्पूज्यमानता तु तामसशास्त्रानुरोधेनेति बोध्यम्। ननु विष्णोः स्थानं महेशस्येति पाठात् स्थानानुक्त्यसंभव इति चेत् तदापूर्वं रामेण "अगस्त्यं नियताहारं सततं पर्युपासते" इत्युक्तावपि स्थाननिर्देशे

पश्चादब्रवीदित्यर्थः ॥२॥ ती० वस्तुतस्तु मयापि अन्तरङ्गभूतया लक्ष्म्यापि। यस्यास्य विष्णो। "अकारोब्रह्मविष्ण्वीशेषु" इतिनिघण्टुः। आगमनं ज्ञानं। "सर्वेगत्यर्था ज्ञानार्था इतिवचनात्। मनसा काङ्क्षितं हि काङ्क्षितंखलु। "दृश्यतेत्वग्र्ययाबुद्ध्यासूक्ष्मयासूक्ष्मदर्शिभिः" इतिश्रुतेः। सएव सर्वलोकैकशरण्यश्रीरामः भीषणामयपीडितस्यभिषगिव चिरस्य चिरकालस्य अद्य द्रष्टुं मांप्रति मामुद्दिश्य दिष्ट्या मद्भाग्यवशेन समुपागतः ममपुरतआविर्भूतइत्यहो ममभाग्यं किंवर्णनीयमित्यर्थः। एतदात्मगतं ॥ ति० किंच। अन्तर्भावितण्यर्थो दृशिः। मामात्मानं दर्शयितुं यद्वनेवसतः चिरस्यचिरकालस्य गमनेप्यागतः तद्दिष्ट्या मद्भाग्येन। उद्बुद्धेनेत्यर्थः। स० चिरस्यबहुकालक्षेपंकृत्वा। चिरमस्यति। असुक्षेपणेण्यत्। संज्ञापूर्वकत्वादृद्ध्यभावः शकंध्व दित्वात्पररूपं। "चिरस्याद्याश्चिरार्थकाः" इत्यमरः ॥ १० ॥ ति० अग्निरत्ररुद्रः। शि० पश्यति अपश्यत्। तत्राग्निशब्देन शंभुरुच्यते। अतएव ब्रह्मविष्णुवाचकशब्दयोरन्तरापाठः ॥ १७ ॥ ति० भगः स्थूलमण्डलाभिमानी। कतक० धाता कार्यप्रजापतिः। विधाताविश्वकर्मा ॥ स० धातुर्विधातुः तन्नामसूर्ययोः पृथक्पृथग्विद्यमानंस्थानं ॥ १८ ॥ ति० गायत्रीति सरस्वतीसावित्र्योरप्युपलक्षणं ॥ १९ ॥ ति० एतेन

[पा०] १ ग. चिरादद्य. २ ग. समुपस्थितः ३ क. सहभार्यस्सलक्ष्मण.. ४ छ. झ. किमसौ ङ. ट. किमयं. ५ ङ. झ. ट. तदा. ६ ङ. झ. ट. कोसौ. ७ क. ङ.—ट. पदं. ८ क. ख. सशिष्यः. ९ ग. ङ.—ट. प्रश्रितं. १० क. ख ङ.—ज. तत्रतु. ११ क. स्थानंचपश्यति. १२ क. ग. विष्णुस्थानं. १३ घ शिवस्थानं. १४ च. छ. ज. कौबेरंस्थानमेव. १५ क. ग. ङ.—ट. स्थानंच. १६ नागराजस्यचेत्याद्यर्धत्रयं क. ख. ग. ङ.—ट. -पुस्तकेषु स्थानंचपाशहस्तस्य. स्थानंतथैवगायत्र्याः. स्थानंचनागराजस्य. इतिव्युत्क्रमेणदृश्यते. क. च. छ. ज. ट. स्थानंचनागराजस्यगरुडस्यतथैवच. ङ. झ. ञ. स्थानंचनागराजस्यगरुडस्थानमेवच. ख. ग. स्थानंचनागराजस्यवासुकेःसुमहात्मनः.

ततः शिष्यैः परिवृतो मुनिरप्यभिनिष्पतत् ॥ तं ददर्शाग्रतो रामो मुनीनां दीप्ततेजसाम् ॥ २१ ॥
अब्रवीद्वचनं वीरो लक्ष्मणं लक्ष्मिवर्धनम् ॥ एष लक्ष्मण निष्क्रामत्यगस्त्यो भगवानृषिः ॥
औदार्येणावगच्छामि निधानं तपसामिमम् ॥ २२ ॥
एवमुक्त्वा महाबाहुरगस्त्यं सूर्यवर्चसम् ॥ जग्राह परमप्रीतस्तस्य पादौ परंतपः ॥ २३ ॥
अभिवाद्य तु धर्मात्मा तस्थौ रामः कृताञ्जलिः ॥ सीतया सह वैदेह्या तदा रामः सलक्ष्मणः ॥२४॥
प्रतिजग्राह काकुत्स्थमर्चयित्वाऽऽसनोदकैः ॥ कुशलप्रश्नमुक्त्वा च ह्यास्यतामिति चाब्रवीत् ॥२५॥
अग्निं हुत्वा प्रदायार्घ्यमतिथीन्प्रतिपूज्य च ॥ वानप्रस्थेन धर्मेण स तेषां भोजनं ददौ ॥ २६ ॥
प्रथमं चोपविश्याथ धर्मज्ञो मुनिपुङ्गवः ॥ उवाच राममासीनं प्राञ्जलिं धर्मकोविदम् ॥ २७ ॥
अग्निं हुत्वा प्रदायार्घ्यमतिथिं प्रतिपूजयेत् ॥ अन्यथा खलु काकुत्स्थ तपस्वी समुदाचरन् ॥
दुःसाक्षीव परे लोके स्वानि मांसानि भक्षयेत् ॥ २८ ॥
राजा सर्वस्य लोकस्य धर्मचारी महारथः ॥ पूजनीयश्च मान्यश्च भवान्प्राप्तः प्रियातिथिः ॥ २९ ॥

उपास्योपासकयोरुभयोरपि निर्देशो नविरुध्यते । यद्वा उपासनं समीपावस्थानं नत्वाराधनं । धर्ममाराधयिष्णव इत्युक्तेः । धर्मस्याराधनं परिपालनमेव ॥ २० ॥ अभिनिष्पतत् अभ्युत्थानं कृतवान् अडभावआर्षः । मुनीनामग्रतः स्थितमिति शेषः ॥ २१ ॥ औदार्येण तेजोविशेषरूपौन्नत्येन । इममवगच्छामि अगस्त्यत्वेनेति शेषः । इति वचनमब्रवीदित्यन्वयः ॥ २२ ॥ अगस्त्यं उद्दिश्येति शेषः ॥ २३ ॥ रामः अभिवाद्य रामस्तस्थावित्यन्वयः ॥ २४ ॥ प्रतिजग्राह अतिथित्वेनेति शेषः । उदकानि पाद्यानि ॥ २५ ॥ तस्मिन्नासीने अग्निं हुत्वा वैश्वदेवं कृत्वा । तेभ्यः अर्घ्यं दत्त्वा अतिथीन् तान् प्रतिपूज्य आचमनीयपुष्पादिभिः पूजयित्वा । वानप्रस्थेन धर्मेण सिद्धं भोजनं कन्दमूलादिकं ददौ ॥ २६ ॥ स्वयं प्रथममुपविश्य आसीनं राममुवाच ॥ २७ ॥ अयं रामव्याजेन सीतां प्रत्युपदेशः । धर्मकोविदमित्युक्तस्य रामस्य हि नेदं वक्तव्यं । अतएव सीता रावणं सत्करिष्यति । अन्यथा समुदाचरन् होममतिथिसत्कारं चकुर्वन्नित्यर्थः । दुःसाक्षी कूटसाक्षी ॥ २८ ॥ भवांस्तु विशिष्टातिथिरित्याह—राजेति । राजपक्षे स्पष्टोर्थः । तत्त्वार्थस्तु सर्वस्य लोकस्य भुवनत्रयस्य । राजा स्वामी । "पतिं विश्वस्य" इति श्रुतेः । अतएव लोकस्य पूजनीयः कर्मभिराराध्यः । "इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः" इति श्रुतेः । मान्यः मुक्तये योगिभिश्चिन्त्यः । प्रियातिथिः लौकिकातिथिभ्यो विलक्ष-

पूजास्थाने एतावतांदेवानां पूजाऽऽवश्यकीतिसूचितं ॥ २० ॥ ती० योगरूढिभेदेन रामशब्दस्यापौनरुक्त्यं ॥ स० स आरामः उपवनंयस्यसः तदारामः । अतो नपुनरुक्तिः । शि० आरामः सर्वाभिरामदाता । रामः ॥ २४ ॥ ति० आसीनं पश्चादासीनमित्यर्थइतिप्राञ्चः । ममतुभाति प्रथममिति भोजनं ददावित्यनेनान्वेति । अथ उपविश्य । अतिथिपूजाव्यग्रतया तावत्पर्यन्तमनुपवेशनमिति ॥ २७ ॥ ती० ननु निरपेक्षेण पूजनीयो न क्षत्रियः । कथं किमर्थं पूजितइत्याशङ्कायां वानप्रस्थधर्मइति मयैवमनुष्ठितं नान्यथेति समाधित्सुराह—अन्यथेति । तपस्वी वानप्रस्थः । अन्यथासमुदाचरन् पूज्यपूजातिक्रमंकुर्वन् परेलोके स्वानिमांसानिभक्षयेत् । किंच दुस्साक्षी कूटसाक्ष्यपि परलोके स्वानिमांसानिभक्षयेत् । अतः प्रत्यवायपरिहाराय त्वां पूजयामीत्यर्थः ॥ स० ब्राह्मणैः क्षत्रियपूजा न कार्येत्यतो धर्मस्वरूपनिरूपणव्याजेनातिथिमात्रस्य पूज्यत्वं सूचयति—अन्यथेति । परेलोके यमलोके ॥२८ ॥ ती० वस्तुतस्तु सर्वस्यलोकस्य ब्रह्माण्डस्य राजा प्रभुः । तथापि धर्मचारी लो-

[पा०] १ ङ. झ. ञ. ट. दीप्ततेजसं. २ क. च. ञ. रामो. ग. धीरो. ३ ङ. झ. ट. बहिर्लक्ष्मण. ४ ग. मुनिसत्तमः. ५ च. छ. ज. ञ. तपसोराशिमुत्तमं. क. तपसोराशिमव्ययं. ङ. झ. निधानंतपसामिदं. ट. निदानंतपसामिदं. ख. निधानं तपसामिव. ६ ङ. झ. ट. जग्राहापततस्तस्यपादौचरघुनन्दनः ७ ग. ङ—ट. प्रतिगृह्यच. क. प्रतिगृह्यतुतंवीरं. ८ ख. कुशलंप्रश्नयित्वा. ९ क. च. छ. ज. मुक्त्वातु. १० क. ख. ग. ङ—ट. आस्यतामिति. ११ ङ—ट. सोब्रवीत् १२ इदमर्धं क. ख. ग. छ—ट पुस्तकेषुनदृश्यते. १३ घ. मतिथीन्प्रति.

एवमुक्त्वा फलैर्मूलैः पुष्पैरन्यैश्च राघवम् ॥ पूजयित्वा यथाकामं पुनरेव ततोऽब्रवीत् ॥ ३० ॥
इदं दिव्यं महच्चापं हेमरत्नविभूषितम् ॥ वैष्णवं पुरुषव्याघ्र निर्मितं विश्वकर्मणा ॥
अमोघः सूर्यसंकाशो ब्रह्मदत्तः शरोत्तमः ॥ ३१ ॥
दत्तौ मम महेन्द्रेण तूणी चाक्षयसायकौ ॥ संपूर्णौ निशितैर्बाणैर्ज्वलद्भिरिव पावकैः ॥ ३२ ॥
महारजतकोशोयमसिर्हेमविभूषितः ॥ ३३ ॥
अनेन धनुषा राम हत्वा संख्ये महाऽसुरान् ॥ आजहार श्रियं दीप्तां पुरा विष्णुर्दिवौकसाम् ॥३४
तद्धनुस्तौ च तूणीरौ शरं खड्गं च मानद ॥ जयाय प्रतिगृह्णीष्व वज्रं वज्रधरो यथा ॥ ३५ ॥
एवमुक्त्वा महातेजाः समस्तं तद्वरायुधम् ॥ दत्त्वा रामाय भगवानगस्त्यः पुनरब्रवीत् ॥ ३६ ॥
[सुखं स्वप महाबाहो ससीतः सहलक्ष्मणः ॥ रविरस्तंगतः सौम्य सन्ध्याकालोप्युपागमत् ॥३७॥
एते निशाचरा राम निलीना मृगपक्षिणः ॥ नगाग्रेषु भृशं लीना दृश्यन्ते सुसमाहिताः ॥
नैशेन तमसा व्याप्तमप्रकाशं नभस्थलम् ॥ ३८ ॥
एवमुक्तो महाबाहुरगस्त्येन महात्मना ॥ उपास्य पश्चिमां सन्ध्यां रामः सौमित्रिणा सह ॥ ३९ ॥
अभिवाद्य महात्मानमगस्त्यमृषिसत्तमम् ॥ सुष्वाप रजनीमेकां पूजितः परमर्षिणा ॥ ४० ॥
सुखोषितस्तदा रामः सन्ध्यामन्वास्य सानुजः ॥ कृतपूर्वाह्णिकस्तस्थौ स्नात्वा हुतहुताशनः ॥ ४१ ॥
लक्ष्मणेन सह भ्रात्रा सीतया च परंतपः ॥ उपागच्छदमेयात्मा अगस्त्यं सूर्यवर्चसम् ॥ ४२ ॥
स दृष्ट्वा राघवं श्रीमानगस्त्यः संयताञ्जलिम् ॥ प्रतिपूज्य यथान्यायमिदं वचनमब्रवीत् ॥ ४३ ॥
कच्चित्सुखा निशा राम व्यतीता रघुनन्दन ॥ तव सभ्रातृभार्यस्य ममाश्रमपदे शुभे ॥ ४४ ॥

णः । एवमुक्त्वेति पूर्वेणान्वयः ॥ २९ ॥ एवमिति पुनः फलादिदानं सीतायाः ॥ ३० ॥ परशुरामाद्गृहीत्वा वरुणहस्ते दत्तं रामेण तदेववरुणः खरादिवधः सन्निहित इत्यगस्त्यहस्ते निक्षिप्तवानित्यवगम्यते । वैष्णवशब्दप्रत्यभिज्ञानात् । ब्रह्मदत्तः ब्रह्मणा दत्तः । अत्यमितिशेषः ॥ ३१॥ तूणी इमाविति शेषः ॥३२॥ महारजतं सुवर्णं तन्मयः कोशः खड्गपिधानं यस्य सः महारजतकोशः । बालरामायणे ऐन्द्रं शरासनमिति इन्द्रदत्तलोक्तिश्छत्रिन्यायात् ॥ ३३ ॥ धनुषा धनुरादिना ॥ ३४ ॥ शरं खड्गं च वैष्णवाविति शेषः । वज्रं वज्रधरो यथेत्यनेन तावकं स्वमेव गृहाणेत्युक्तं ॥ ३५ ॥ एवमुक्त्वा ततः पुनरेव इत्यब्रवीदित्यन्वयः ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्वादशः सर्गः ॥ १२ ॥

क्षशिक्षार्थं धर्मोश्वरति आचरतीतितथा । महारथः महान्महात्मा शब्दो रथो यस्य सतथोक्तः । किंच पूजनीयः सत्कर्मभिराराध्यः। मान्यः मुक्तिसिद्धये मन्तव्यश्चेतियोजना । स० अतिथिमात्रस्यादापूज्यता तदा काकथा सर्वोत्तमस्यतवेत्याह—राजेति । प्रियातिथिरिति कर्मधारयो बहुव्रीहिर्वा । बहुव्रीहिपक्षे रामस्यापिप्रियातिथिकर्तृत्वं सूच्यते ॥ २९ ॥ कतक० परशुरामाद्गृहीत्वा वरुणहस्तेदत्तंयद्रामेण तदेव वरुणादादाय महेन्द्रोऽगस्त्ये निक्षिप्तवान्॥ योगेन महेन्द्रपदेन वरुणएवेत्यन्ये॥ स० महत्_चापमितिपदद्वयं । इदंच शार्ङ्गमिन्द्रदत्तं । " शार्ङ्गंतदादिपुरुषो निजमाजहार " इत्याचार्योक्तेः । एतदुत्पत्तिप्रकारस्तु " अस्त्रागमंतवक्ष्यामि " इत्यारभ्य ' एतत्तेसर्वमाख्यातं ' इत्यन्तेनानुशासनिकेपर्वण्युक्तः । तन्वानुशासनिकेपर्वणि धनुषोवेणुविकृतत्वोक्तेः कथं शार्ङ्गविकृतत्वाच्छार्ङ्गोक्तिरितिचेत् कण्वशिरस्थवल्मीकगवेणुविकृतत्वात्तथा व्यपदेशः । ति० ब्रह्मणादत्तो ब्रह्मदत्तः तदाख्यश्च ॥ ३१ ॥ तूणीचेति चेन धनुश्शरयोरुभयोरिन्द्रदत्तलंगम्यते ॥ ३२ ॥ स० दिवौकसांश्रियंसंपदं । ति० वज्रं वज्रधरोयथेत्यनेन त्वदीयमेव त्वयास्त्रीकियतइतिध्वनितं ॥३५॥ ति० वरायुधं वरस्यविष्णोरायुधंच ॥ ३६ ॥ इतिद्वादशस्सर्गः ॥ १२ ॥

[पा०] १ क. ग. ट. पुष्पैश्चान्यैश्च. २ ख पार्थिवं. ३ ततोऽगस्त्यस्तमब्रवीत्, क. छ. ज. ञ. पुनरेवाब्रवीद्वचः. घ. पुनरेवतमब्रवीत्. ४ क. ख. घ. ङ. ज. ञ. ट. वज्र. ५ ङ—ञ. चाक्षय्य. ६ ज. राजत. ७ ग. सौम्य. संख्येहत्वाराम. ८ क. छ. ज. ट. तूणीच. ९ इमेसप्तत्रिंशच्छ्लोकाः क. पुस्तकएवाधिकादृश्यन्ते.

अगस्त्येनैवमुक्तस्तु काकुत्स्थो वाक्यमब्रवीत् ॥ मानिताः स्म यथान्यायं त्वया पूज्येन पूजिताः ॥ ४५
शयनासनदानेन भोजनाच्छादनैः शुभैः ॥ राज्ञो दशरथस्यैव पुरस्यान्तःपुरे यथा ॥
सुखोषिताः स्म भगवन्सर्वकामैरुपस्थिताः ॥ ४६ ॥
सुखोपविष्टे रामे तु सहसीते सलक्ष्मणे ॥ स तेन ऋषिसङ्घेन अगस्त्यो वाक्यमब्रवीत् ॥ ४७ ॥
कालोऽयं गतभूयिष्ठो यः कालस्तव राघव ॥ समयो यो नरेन्द्रेण कृतो दशरथेन ते ॥
तीर्णप्रतिज्ञः काकुत्स्थ सुखं राम निवत्स्यसि ॥ ४८ ॥
धन्यस्ते जनको राम स राजा रघुनन्दन ॥ यस्त्वया ज्येष्ठपुत्रेण ययातिरिव तारितः ॥ ४९ ॥
एवमुक्तस्ततो रामः प्रत्युवाच कृताञ्जलिः ॥ प्रीतः प्रीततरं वाक्यं प्रत्युवाच महायशाः ॥ ५० ॥
धन्योस्म्यनुगृहीतोस्मि यस्य मे मुनिपुङ्गव ॥ प्रीयमाणस्तु सुप्रीतो नास्ति धन्यतरो मम ॥ ५१ ॥
मया न तारितो राजा स्वगुणैरेव तारितः ॥ स्वर्गं दशरथः प्राप्तः स्वकृतैः पुण्यकर्मभिः ॥ ५२ ॥
अयं तु देशो निखिलः सर्व एव महातपः ॥ अशरण्यः शरण्योऽभूद्यथैव विनिवेशितः ॥
तथाऽऽख्याह्यर्थतत्त्वेन परं कौतूहलं मम ॥ ५३ ॥
श्रुत्वा तु वचनं तस्य रामस्य मधुराक्षरम् ॥ प्रत्युवाच ततो राममगस्त्यो भगवानृषिः ॥ ५४ ॥
शृणु राघव तत्त्वेन देशंस्यास्य यथातथम् ॥ ५५ ॥
दण्डकेन परित्यक्तो ह्ययं देशो महात्मना ॥ भार्गवस्य च शापेन निर्मनुष्यमृगोऽभवत् ॥ ५६ ॥
वृक्षगुल्मलताहीनं तापसैरभिवर्जितम् ॥ कान्तारमभवच्चात घोरं परमदारुणम् ॥
योजनार्धसहस्रं तु विन्ध्यपादस्तु दक्षिणः ॥ ५७ ॥
नानुवर्षति पर्जन्यो नानुवाति सुखोऽनिलः ॥ रक्षःप्रतिभयं घोरमासीत्परमदारुणम् ॥ ५८ ॥
बहून्यब्दसहस्राणि क्षेत्रदासीदमानुषम् ॥ गन्धर्वैर्ऋषिसंघैश्च देवैश्च परिवर्जितम् ॥ ५९ ॥
कस्य चित्त्वथ कालस्य दैवयोगादहं नृप ॥ हिमवच्छिखराद्देशादिह प्राप्तोस्मि मानद ॥ ६० ॥
ततो मया समाहूतः पर्जन्यो जलदैः सह ॥ स्वच्छन्दवर्षश्च कृतः कंचित्कालमरिन्दम ॥ ६१ ॥
बलस्य चैव चारास्तु बहून्यब्दशतानि वै ॥ तेजसा मृत्युभूताश्च व्याधयश्च निराकृताः ॥ ६२ ॥
हिमवत्पादजा वृक्षाश्चिन्तिता मनसाऽऽगताः ॥ प्रवृत्ताश्च पुनर्नद्यः फुल्लपङ्कजमण्डिताः ॥
तटाकानि च रम्याणि सरितश्च सरांसि च ॥ ६३ ॥
प्रवृद्धवनषण्डं तु स्फीतसस्यवनाकुलम् ॥ अचिरेणाभवद्रम्यं सर्षिसङ्घानुसेवितम् ॥ ६४ ॥
केवलं त्वभिशापेन तस्यैव रघुनन्दन ॥ सोपद्रुतमिवाप्येतद्राक्षसैरुग्रकर्मभिः ॥ ६५ ॥
यदाप्रभृति चापि त्वं चित्रकूटमुपागतः ॥ तदाप्रभृति रक्षांसि विप्रकुर्वन्ति तापसान् ॥
ऋषीणाममयं वीर दातुमर्हसि मानद ॥ ६६ ॥
अस्माद्धि कारणाद्राम दण्डकारण्यवासिनाम् ॥ त्राणार्थमिह संप्राप्तस्त्रातुमर्हसि नो भवान् ॥ ६७ ॥
समर्थो ह्यसि काकुत्स्थ त्रैलोक्यस्यापि रक्षणे ॥ किंपुनर्वीर रक्षांसि द्विजमन्युहतानि वै ॥ ६८ ॥
अयमिक्ष्वाकुपुत्रेण दण्डकेन महाबल ॥ देशो निराकृतो राजञ्शापदोषेण राघव ॥ ६९ ॥
दण्डकारण्यमखिलं दर्शनादेव राघव ॥ शापस्यान्ताय काकुत्स्थ प्राप्तस्त्वमरिमर्दन ॥ ७० ॥
स त्वं मन्युपराद्धैः पितृभिः संनिराकृतम् ॥ तारय त्वं महाबाहो दण्डकारण्यमद्य वै ॥ ७१ ॥
एवमुक्तस्तदा रामः प्रत्युवाच महामुनिम् ॥ आश्चर्यमिदमाख्यातं देशस्यास्य यथातथम् ॥ ७२ ॥
एवमुक्तस्तु रामेण महर्षिस्त्विदमब्रवीत्] ॥ ७३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे द्वादशस्सर्गः ॥ १२ ॥

त्रयोदशः सर्गः ॥ १३ ॥

आगस्त्येनसमंप्रतिलोहितकुमारीजनदुस्त्यजमावलिङ्गनपूर्वकंसीतयाबालहंसकथनोपक्रमणम् ॥ १ ॥ रामेणस्वावासो-चितस्थाननिवेदनमर्पितेनागस्त्येनतत्प्रतिपत्तिपूर्वकंस्वागतप्रश्नोत्तरमार्गनिवेदनम् ॥ २ ॥ रामेणसीतालक्ष्म-णाभ्यांसहसमागममगस्त्यानुचरेणपञ्चवटीपतिप्रस्थानम् ॥ ३ ॥

राम प्रीतोऽस्मि भद्रं ते परितुष्टोऽस्मि लक्ष्मण ॥ अभिवादयितुं यन्मां प्राप्तौ स्थः सह सीतया ॥ १ ॥
अध्वश्रमेण वां खेदो बाधते प्रचुरश्रमः ॥ व्यक्तमुत्कण्ठते चापि मैथिली जनकात्मजा ॥ २ ॥
ऐषा हि सुकुमारी च दुःखैश्च न विमानिता ॥ प्राज्यदोषं वनं प्राप्ता मद्धेतोरनघोदिता ॥ ३ ॥
यथैषा रमते राम इह सीता तथा कुरु ॥ दुष्करं कृतवत्येषा वने त्वामनुगच्छति ॥ ४ ॥
एषा हि प्रकृतिः स्त्रीणामासृष्टे रघुनन्दन ॥ समस्तमनुरज्यन्ति विषमस्थं त्यजन्ति च ॥ ५ ॥
शतह्रदानां लोलत्वं शस्त्राणां तीक्ष्णतां तथा ॥ गरुडानिलयोः शैघ्र्यमनुगच्छन्ति योषितः ॥ ६ ॥
इयं तु भवतो भार्या दोषैरेतैर्विवर्जिता ॥ श्लाघ्या च व्यपदेश्या च यथा देवी अरुन्धती ॥ ७ ॥
अलंकृतोऽयं देशश्च यत्र सौमित्रिणा सह ॥ वैदेही चानया राम वत्स्यसि त्वमरिन्दम ॥ ८ ॥

एतादृशस्थले सर्गविच्छित्तिर्नास्तीति प्रतीयते कथा-वा अपर्यवसानात् । अत्र स्वरक्षायागस्त्येनानुज्ञातस्य रामस्य पञ्चवटीं प्रति प्रयाणं त्रयोदशे—रामेत्यादि । ये इत्यस्य लक्ष्मणेत्यत्रान्वयः ॥ १ ॥ अध्वश्रमेण मार्गायासेन । प्रचुरः श्रमः श्रमजलं येन सः प्रचुर-श्रमः खिन्नः वां बाधते । उत्कण्ठते विश्रान्तिमभि-लषति । अनेनासाधारण्यं तिरश्च उच्यते । जनकात्म-जेति सौकुमार्यातिशयोक्तिः ॥ २ ॥ एतामुकुमार्यपि प्राज्यदोषं बहुदोषं वनं प्राप्ता दुःखैर्न विमानिता न परिभूता च । तत्र हेतुः—मद्धेतोरनघोदितेति ॥ ३ ॥ इह वासे ॥ ४ ॥ प्रकृतिः स्वभावः । आसृष्टेः जगत्सृष्टिमारभ्य । समस्तं सुखं इति । विषमस्थं दुर्दशापन्नं ॥ ५ ॥ शतह्रदानां विद्युतां । लोलत्वं चञ्चलत्वं । अनुगच्छन्ति चञ्चलचित्तत्वादिति भावः । शस्त्राणां तीक्ष्णतां क्रौर्यं । अनुगच्छन्ति बहुकालीनस्नेहबन्धच्छेदनादिति भावः । गरुडा-निलयोः शैघ्र्यं अनुगच्छन्ति । अविचारेणकार्य-करणादिति भावः ॥ ६ ॥ एवंलोकिकस्त्रीणां दुष्ट-स्वभावमुक्त्वा सीतायास्तद्वैलक्षण्यमाह—इयंत्विति । न केवलं दोषरहिता श्लाघ्या दृष्टिः प्रशंसनीया च । व्यपदेश्या पतिव्रतात्वमगम्या । एवं सीतायास्तव वक्ष्यमाणदेवचन्दीमोचनोत्साहमाह ॥ ७ ॥ अयं देशः आश्रमप्रदेशः । वत्स्यसि वत्स्य-

---

ति० अध्वश्रमेण क्षणिक पादसुद्दोऽस्य । रामसेवातत्परत्वेन परितोषः । भगवद्विषयप्रीतेरेव सकलेन बहुक्लेशेनेतिध्वनितं ॥ १ ॥ वी० अध्वश्रमेण मार्गश्रमेण आगमनादिप्रयुक्तसेवादिकार्यक्लेद. खिन्नता वां बाधतेकिमितिशेषः । प्रचुरश्रमः मैथिली-मितिशेषः । व्यक्तंबाधतइतिवोऽयं । अतएवमैथिली उत्कण्ठते आकाङ्क्षते क्वचिद्विश्रान्तिमितिशेषः । स० अध्वश्रमेण क्लेद तत्कर्म दु खंबाधतइतिबाधं । समापि प्रचुरश्रम मैथिलीसंबन्धमात्रात् । ईक्षणक जगज्जनक राम आत्मनः अतएव आयतइक्ष्वाकुजा अयोनिजेतियावत् ॥ २ ॥ स० इहवने रामे सति यथा रमते सीता तथाकुरु । अभिगच्छतीति दीर्घान्तपाठे छन्दसं । इच्छा-स्यपाठे लिट् । आसृष्टेः आसृष्टिमारभ्य । द्वितीये वर्तमानइतिशेषः ॥ ४ ॥ स० आसृष्टेः ईक्षणकर्मणः विवाहरूपद्वितीयजन्मारभ्येतियावत् । " स्त्रीणां प्रसादनैर्दैन्य वयोरूपबलेन वा " इत्यादुक्तेः । बहु आसृष्टे जगति । समस्तं यथा संपदा सहितमस्तथा तेषुतिष्ठतीति समस्थस्तं संपदुक्तं । अनुरज्यन्ति अनुरागयुक्ता भवन्ति ॥ विषमस्थं दरिद्रं ॥ ५ ॥ स० " अजायदन्तं " इत्यनिलशब्दएव प्राक्प्रयोज्यः । तथापि गरुडशब्दस्य सुपर्णगरुत्मदादिनिखिलशब्दस्य भूतद्वयपर-त्वात्तदपेक्षया बहुत्वाभ्यर्हितत्वात्पूर्वनिपातः । बहु " समुद्राभ्राद्धः " इत्यत्रादर्शनात् " अजायदन्तं " इत्यत्रानिलस्याहरुक-

[पा०] १ क. ङ. ट. वासि. ङ. च. छ. ज. देवी. २ क. ङ. च. छ. ङ. ज. ट. एषाच. ३ च. छ. ङ. ज. खेदैश्च. ४ ज. ङ. ङ. ज. ट. त्वामपि. च. त्वामिह. ५ क. ङ. रज्यन्ते. ६ च. रेतैस्तुवर्जिता. ७ क. ङ. ट. देवेचरुंधती. ज. देवीमरुंधती. छ. च. ङ. ज. देवीलरुंधती.

एवमुक्तः स मुनिना राघवः संयताञ्जलिः ॥ उवाच प्रश्रितं वाक्यमृषिं दीप्तमिवानलम् ॥ ९ ॥
धन्योस्म्यनुगृहीतोस्मि यस्य मे मुनिपुङ्गवः ॥ गुणैः सभ्रातृभार्यस्य वरदः परितुष्यति ॥ १० ॥
किंतु व्यादिश मे देशं सोदकं बहुकाननम् ॥ यत्राश्रमपदं कृत्वा वसेयं निरतः सुखम् ॥ ११ ॥
ततोऽब्रवीन्मुनिश्रेष्ठः श्रुत्वा रामस्य तद्वचः ॥ ध्यात्वा मुहूर्तं धर्मात्मा धीरो धीरतरं वचः ॥ १२ ॥
इतो द्वियोजने तात बहुमूलफलोदकः ॥ देशो बहुमृगः श्रीमान्पञ्चवट्यभिविश्रुतः ॥ १३ ॥
तत्र गत्वाऽऽश्रमपदं कृत्वा सौमित्रिणा सह ॥ [वैदेह्या चानया राम वत्स्यसि त्वमरिंदम ॥]
रंस्यसे त्वं पितुर्वाक्यं यथोक्तमनुपालयन् ॥ १४ ॥
कालोऽयं गतभूयिष्ठो यः कालस्तव राघव ॥ समयो यो नरेन्द्रेण कृतो दशरथेन ते ॥ १५ ॥
तीर्णप्रतिज्ञः काकुत्स्थ सुखं राज्ये निवत्स्यसि ॥ धन्यस्ते जनको राम स राजा रघुनन्दन ॥
यस्त्वया ज्येष्ठपुत्रेण ययातिरिव तारितः ॥ १६ ॥
विदितो ह्येष वृत्तान्तो मम सर्वस्तवानघ ॥ तपसश्च प्रभावेन स्नेहाद्दशरथस्य च ॥ १७ ॥
हृदयस्थश्च ते छन्दो विज्ञातस्तपसा मया ॥ इह वासं प्रतिज्ञाय मया सह तपोवने ॥ १८ ॥
[वसन्तं त्वां जनास्सर्वे ज्ञास्यन्ति रघुनन्दन ॥] अतश्च त्वामहं ब्रूमि गच्छ पञ्चवटीमिति ॥ १९ ॥
स हि रम्यो वनोद्देशो मैथिली तत्र रंस्यते ॥ स देशः श्लाघनीयश्च नातिदूरे च राघव ॥ २० ॥
गोदावर्याः समीपे च मैथिली तत्र रंस्यते ॥ प्राज्यमूलफलश्चैव नानाद्विजगणायुतः ॥
विविक्तश्च महाबाहो पुण्यो रम्यस्तथैव च ॥ २१ ॥

वर्षसहस्राणि दशवर्षशतानि च ॥ ८ ॥ संयताञ्जलिः बद्धाञ्जलिः ॥ ९—१० ॥ निरतः एकाग्रः ॥ ११ ॥ ध्यात्वा भाविकार्योचितदेशं ध्यात्वा । धीरः धीमान् निश्चितकार्योचितदेशइत्यर्थः । धीरतरं अतिनिश्चितं वचः ॥ १२ ॥ पञ्चानां वटानां समाहारः पञ्चवटीतद्युक्तदेशो लक्षणया पञ्चवटीत्युच्यते । पञ्चवटीत्यभिविश्रुतो देश इत्यन्वयः ॥ १३—१६ ॥ मम पितृवाक्यपरिपालनप्रकारःकथं ज्ञात इत्यत्राह—विदित इति । तपःप्रभावेन पर्यालोचनकरणे निमित्तमाह—स्नेहादिति ॥ १७ ॥ छन्दोभिप्रायः । " अभिप्रायवशौ छन्दौ " इत्यमरः । स्वरादिवधसंकल्प इत्यर्थः । तपसा आलोचनेन तन्मूलत्वद्वचनभङ्ग्याचेत्यर्थः । अलंकृतोयं देशश्चेति ममेह वासे प्रस्तुते किंतु व्यादिश मे देशमिति त्वदुक्त्या चेत्यर्थः । अभिप्रायवेदनकार्यमाह—इहेति । यस्मात्त्वदभिप्रायो मया विदितः अतो हेतोः इह तपोवने मया सह वासं प्रतिज्ञाय अनुज्ञाय तदनन्तरमेव त्वं पञ्चवटीं गच्छेति ब्रूमि ब्रवीमि । अनित्यमागमशासनमिति ईडभावः ॥ १८—१९ ॥ आयुतः व्याप्तः । विविक्तःविजनः ॥ २०—

शब्दस्य पूर्वनिपातः ॥ ६ ॥ ती० ध्यात्वेति । भाविकार्यनिश्चयाय ध्यानं । ध्यानेनागामिसीतावियोगरूपं किञ्चिद्विक्षेपं दृष्ट्वापि भाविवाञ्छितरावणादिवधसीतावाप्त्यादिकार्यसिद्धिदर्शनेन धीरस्सन् तं वचोऽब्रवीत् । ति० ततउवाचेत्यर्थेततोवाचेति संधिरार्षः ॥ १२ ॥ स० द्वियोजने द्वेयोजने । द्वितीयाद्विवचनमेतत् । इतः प्राप्तः । योजनद्वयमवधीकृत्य विद्यमानोदेशइतियावत् ॥ १३ ॥ दशरथस्यस्नेहात् कैकेयीविषयदशरथस्नेहात् । तव सर्वोपिवृत्तान्तः प्रवृत्तइति मम तपसःप्रभावेन विदितइत्यन्वयः । यद्वा ममतपसःप्रभावेन । दशरथस्य तवोपरिपरमस्नेहाच्च तवदशरथस्यच वृत्तान्तः पितृवाक्यपरिपालनायवनवासवृत्तान्तः दशरथवृत्तान्तः कैकेयीविषयस्नेहात्त्वत्प्रेरणारूप विदितइत्यर्थः । स० सर्वस्तवेतिव्यस्तं समस्तंच । समस्तत्वपक्षे सर्वैः स्तवो यस्यसः ॥ १७ ॥ ति० यदिह वासंप्रतिज्ञाय । " आराधयिष्याम्यत्राहमगस्त्यंतंमहामुनिम् ॥ शेषंचवनवासस्यसौम्यवत्स्याम्यहंप्रभो " इत्यनेन ममसमीपे इह मदाश्रमे वासंप्रतिज्ञाय पुनर्मांप्रति व्यादिशमेवासमित्येतद्वदसि तन्मूलं ते हृदयस्थः छन्दः अभिप्रायः

[पा०] १ ग. क. झ. ट. मुक्तस्तु २ क. झ. ट. गुरुर्नः. ३ क.—ट. भाषितं. ४ क. झ. ट. ततोवाचवचःशुभं. ५ इदमर्धं क. च. छ. पुस्तकेषु दृश्यते. ६ ग. ङ.—ट. रमस्व. ७ ग. घ. तदानघ. ८ घ. हार्दात्. ९ क. ख. ग. च. छ. ज. पुस्तकेषुदृश्यते. १० ग. बाहि. ११ ख. पञ्चवटीमितः. १२ च. छ. झ. ञ. गणैर्युतः.

भवानपि संदारश्च शक्तश्च परिरक्षणे ॥ अपि चात्र वसन्राम तापसान्पालयिष्यसि ॥ २२ ॥
एतदालक्ष्यते वीर मधूकानां महद्वनम् ॥ उत्तरेणास्य गन्तव्यं न्यग्रोधमभिगच्छता ॥ २३ ॥
ततः स्थलमुपारुह्य पर्वतस्याविदूरतः ॥ ख्यातः पञ्चवटीत्येव नित्यपुष्पितकाननः ॥ २४ ॥
अगस्त्येनैवमुक्तस्तु रामः सौमित्रिणा सह ॥ सत्कृत्यामन्त्रयामास तमृषिं सत्यवादिनम् ॥ २५ ॥
तौ तु तेनाभ्यनुज्ञातौ कृतपादाभिवन्दनौ ॥ तदाश्रमात्पञ्चवटीं जग्मतुः सह सीतया ॥ २६ ॥

गृहीतचापौ तु नराधिपात्मजौ विषक्ततूणौ समरेष्वकातरौ ॥
यथोपदिष्टेन पथा महर्षिणा व्रजन्मतुः पञ्चवटीं समाहितौ ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

चतुर्दशः सर्गः ॥ १४ ॥

पञ्चवटीगच्छतारामेणमध्येमार्गेदृष्टंजटायुषंप्रतितत्तत्त्वप्रश्नः ॥ १ ॥ तेनरामंप्रतिप्रसङ्गात्सर्वंभूतसमुद्भवकथनपूर्वकंस्वस्यारुणात्मजत्वकथनम् ॥ २ ॥ तथास्वस्यदशरथसख्यकथनेनवनवासेसीतारक्षणादिरूपसाहाय्यकरणोक्तिः ॥ ३ ॥ रामेणसबहुमानंतत्परिष्वङ्गादिपूर्वकंसीतालक्ष्मणाभ्यांतेनचसहपञ्चवटींप्रतिगमनम् ॥ ४ ॥

अथ पञ्चवटीं गच्छन्नन्तरा रघुनन्दनः ॥ आससाद महाकायं गृध्रं भीमपराक्रमम् ॥ १ ॥
तं दृष्ट्वा तौ महाभागौ वटस्थं रामलक्ष्मणौ ॥ मेनाते राक्षसं पक्षिं ब्रुवाणौ को भवानिति ॥ २ ॥
सं तौ मधुरया वाचा सौम्यया प्रीणयन्निव ॥ उवाच वत्स मां विद्धि त्वयस्यं पितुरात्मनः ॥ ३ ॥

---

२१ ॥ परिरक्षणे तापसानामिति शेषः । अत्र पञ्चवटयाश्रमे ॥ २२ ॥ अस्य मधूकवनस्य । न्यग्रोधमभिगच्छता उत्तरेण मार्गेण गन्तव्यं । इदंमधूकवनंगत्वातदुत्तरेण मार्गेण गन्तव्यं स मार्गो न्यग्रोधं प्रापयतीत्यर्थः ॥ २३ ॥ ततो न्यग्रोधात्परतः । स्थलं निर्वणप्रदेशं । किंचिदुन्नतमुपारुह्य गमने कश्चित्पर्वतो दृश्यते । तस्याविदूरतः पञ्चवटीति ख्यातः पञ्चवटत्वेन प्रसिद्धः । नित्यपुष्पितकाननत्वेन ह्रातुं योग्यश्चाश्रमो दृश्यत इत्यर्थः ॥ २४ ॥ सत्कृत्य प्रदक्षिणनमस्काराभ्यामिति शेषः ॥ २५—२६ ॥ विषक्ततूणौ बद्धतूणीरौ । अकारान्तोपि तूणशब्दः । महर्षिणा यथोपदिष्टेन पथेत्यन्वयः । समाहितौ एकाग्रौ । अस्मिन्सर्गे सार्धसप्तविंशतिः श्लोकाः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रयोदशः सर्गः ॥ १३ ॥

अथ गृध्रराजसमागमश्चतुर्दशे—अथ पञ्चवटीमित्यादि ॥ १ ॥ वटस्थं अगस्त्योपदिष्टवटस्थं । पक्षिमिति च्छान्दसं रूपं । को भवानिति ब्रुवाणौ सन्तौ राक्षसं मेनाते राक्षसं मत्वा को भवानित्यब्रूतामित्यर्थः ॥ २ ॥ सौम्यया सौजन्यपरया । प्रीणयन्निवेति ध्व-

---

मयाज्ञातः अत्रावस्थाने प्रतिज्ञातराक्षसवधनिर्वाहो नभवति . अत्र राक्षसागमनाभावादिलेवंरूपइतिभावः ॥ १८ ॥ ति० मद्वानपीडनेन स्वस्यापि तापसलक्षणेसामर्थ्यबोधनेन स्वाश्रमे रक्षसामपीडा सूचिता ॥ २२ ॥ इतित्रयोदशस्सर्गः ॥ १३ ॥

शि० महाकायं अतएव राक्षसं राक्षसत्वेन प्रतीयमानं तं जटायुष दृष्ट्वा महाभागौ रामलक्ष्मणौ पक्षिं पक्षिणं मेनाते । को भवानितिविशेषं ब्रुवाणौ अभवतां चेति शेषः ॥ १—२ ॥ ति० तं पक्षिणं राक्षसं मेनाते विज्ञातवन्तौ । तं राक्षसं ब्रुवाणौ

[पा०] १ ङ. ञ. म. ट. सदाचार . २ ग. शक्तोहि. ३ ग. पालयिष्यति. ४ ङ. ञ. ट. महावनं. ५ क. ख. ङ. च. ञ. ट. तमाश्रमं पञ्चवटीं. ग. तदाश्रमं. ६ क. ख. ङ.—ट. तूणी. ७ क. ततः. ८ ग. तंदृष्ट्वाथ. ख. दृष्ट्वातुतं. ९ ख. ग. ङ. ञ. ण. ट. वनस्थं. १० ञ. ततो. ११ ख. स्निग्धया.

स तं पितृसखं बुद्ध्वा पूजयामास राघवः ॥ स तस्य कुलमव्यग्रमथ पप्रच्छ नाम च ॥ ४ ॥
रामस्य वचनं श्रुत्वा सर्वभूतसमुद्भवम् ॥ आचचक्षे द्विजस्तस्मै कुलमात्मानमेव च ॥ ५ ॥
पूर्वकाले महाबाहो ये प्रजापतयोऽभवन् ॥ तान्मे निगदतः सर्वानादितः शृणु राघव ॥ ६ ॥
कर्दमः प्रथमस्तेषां विश्रुतस्तदनन्तरः ॥ शेषश्च संश्रयश्चैव बहुपुत्रश्च वीर्यवान् ॥ ७ ॥
स्थाणुर्मरीचिरत्रिश्च क्रतुश्चैव महाबलः ॥ पुलस्त्यश्चाङ्गिराश्चैव प्रचेताः पुलहस्तथा ॥ ८ ॥
दक्षो विवस्वानपरोरिष्टनेमिश्च राघव ॥ कश्यपश्च महातेजास्तेषामासीच्च पश्चिमः ॥ ९ ॥
प्रजापतेस्तु दक्षस्य बभूवुरिति विश्रुतम् ॥ षष्टिर्दुहितरो राम यशस्विन्यो महायशः ॥ १० ॥
कश्यपः प्रतिजग्राह तासामष्टौ सुमध्यमाः ॥ अदितिं च दितिं चैव दनुमप्यथ कालिकाम् ॥
ताम्रां क्रोधवशां चैव मनुं चाप्यनलामपि ॥ ११ ॥
तास्तु कन्यास्ततः प्रीतः कश्यपः पुनरब्रवीत् ॥ पुत्रांस्त्रिलोक्यभर्तॄन्वै जनयिष्यथ मत्समान् ॥१२॥
अदितिस्तन्मना राम दितिश्च मनुजर्षभ ॥ कालिका च महाबाहो शेषास्त्वमनसोऽभवन् ॥ १३ ॥
अदित्यां जज्ञिरे देवास्त्रयस्त्रिंशदरिंदम ॥ आदित्या वसवो रुद्रा ह्यश्विनौ च परंतप ॥ १४ ॥
दितिस्त्वजनयत्पुत्रान्दैत्यांस्तात यशस्विनः ॥ तेषामियं वसुमती पुराऽऽसीत्सवनार्णवा ॥ १५ ॥
दनुस्त्वजनयत्पुत्रमश्वग्रीवमरिंदम ॥ नरकं कालकं चैव कालिकाऽपि व्यजायत ॥ १६ ॥
क्रौञ्चीं भासीं तथा श्येनीं धृतराष्ट्रीं तथा शुकीम् ॥ ताम्राऽपि सुषुवे कन्याः पञ्चैता लोकविश्रुताः ॥१७॥
उलूकाञ्जनयत्क्रौञ्ची भासी भासान्व्यजायत ॥ श्येनी श्येनांश्च गृध्रांश्च व्यजायत सुतेजसः ॥१८॥
धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्वशः ॥ चक्रवाकांश्च भद्रं ते विजज्ञे साऽपि भामिनी ॥ १९ ॥

शब्द एवकारार्थः । आत्मन इत्यन्ते इतिकरणं ज्ञेयं । आत्मनः रामस्य ॥ ३–४ ॥ द्विजः आत्मानं आत्मनाम ॥ ५ ॥ स्वोत्पत्तिं कथयिष्यन् प्रसङ्गादादौ सर्वभूतसमुद्भवमाह—पूर्वकाल इत्यादि ॥ ६–८ ॥ अरिष्टनेमिरिति कश्यपविशेषणं ॥ ९–१० ॥ तासां दुहितॄणां मध्ये सुमध्यमाः अष्टौ कन्याः प्रतिजग्राह पर्यणैषीत् ॥ ११ ॥ त्रैलोक्यभर्तॄन् त्रैलोक्यरक्षणक्षमान् ॥ १२ ॥ तन्मनाः तद्वचनदत्तावधानाः । कालिकाचेत्यत्र चकारेण मनुरप्युच्यते । तन्मना इति दितिकालिकामनूनामपि विशेषणं । चतस्रः प्रौढपुत्रोत्पादनमनसोभवन् चतस्रो नाभवन्नित्यर्थः ॥ १३ ॥ भर्तृवचनादरानादरफलेदर्शयति—अदित्यामित्यादिना । द्वादशादित्याः अष्टौ वसवः एकादश रुद्राः अश्विनौ द्वौ एवं त्रयस्त्रिंशत् ॥ १४ ॥ तेषां दितिपुत्राणां ॥ १५–१७ ॥ ताम्रावंशं प्रपञ्चयति—उलूकानित्यादिना । जनयदित्यत्र आगमशास्त्रस्यानित्यतया नाडागमः ॥ १८ ॥ अप्रसक्तकृत्तान्तानादरप्रतिषेधाय मध्ये भद्रं ते इत्युक्तिः । सा भामिनीति धृतराष्ट्रीवि-

---

परस्परं कथयन्तौ कोभवानिति पप्रच्छतुरितिशेषः ॥ २ ॥ ति० पूर्वकाले ब्रह्मणोऽहरादिकाले ॥ ६ ॥ ति० कर्दमाद्यास्सप्तदश प्रजापतयो बभूवुः ॥ ७ ॥ ती० मनु " ददौ स दश धर्माय कश्यपाय त्रयोदश " इतिश्रूयते । अत्र कथमष्टाविंशुच्यत इतिचेत्सत्यं । अष्टाविंशेकवारमितिवा उपलक्षणमितिवा वैवस्वतमन्वन्तरे एवमितिवा द्रष्टव्यं ॥ ति० वक्ष्यमाणसन्तानोपयोगिन्योष्टाविंशतिवा ॥ ११ ॥

[पा०] १ ङ. ञ. ट. मत्सा. २ क. ख. ग. ङ.—ट. कुलमात्मानमेव च. ३ क. ख. ग. ङ.—ट. सर्वभूतसमुद्भवं. ४ ग. ङ. ट. विकृतस्तदनन्तरः. छ. झ. ञ. विकृतस्तदन्तरं. ख. घ. च. छ. ज. विकीतस्तदनन्तरं. ५ घ. संश्रितश्चैव. ६ ङ. ञ. ट विश्रुतः. क. नःश्रुताः ख. ग. च. छ. ज. ञ. नःश्रुतं. ७ ख. घ. ङ. ञ. ट. दनूमपि च. ८ क. घ. ङ. च. झ. ञ. ट. दनुरेवच. ख. मनुरेवच. ९ ङ. ञ. ट. कालका. १० ङ.—ञ. अश्विनौ. ११ ग. चैवराघव. १२ ग. ञ. च. छ. ज. ञ. कालिकं. १३ क. ञ. ट, कालकापि. १४ क. घ. हसीं. १५ ङ. छ. ञ. ट. नाम्नातु. १६ च. ज. ञ. साच.

शुकी नतां विजज्ञे तु नताया विनता सुता ॥ २० ॥
देश क्रोधवशा राम विजज्ञे ह्यात्मसंभवाः ॥ मृगीं च मृगमन्दां च हरिं भद्रमदामपि ॥ २१ ॥
मातङ्गीमपि शार्दूलीं श्वेतां च सुरभिं तथा ॥ सर्वलक्षणसंपन्नां सुरसां कद्रुकामपि ॥ २२ ॥
अपत्यं तु मृगाः सर्वे मृग्या नरवरोत्तम ॥ ऋक्षाश्च मृगमन्दायाः सृमराश्चमरास्तथा ॥ २३ ॥
हर्यश्च हरयोपत्यं वानराश्च तरस्विनः ॥ ततस्त्विरावतीं नाम जज्ञे भद्रमदा सुताम् ॥ २४ ॥
तस्यास्त्वैरावतः पुत्रो लोकनाथो महागजः ॥ मातङ्ग्यास्त्वथ मातङ्ग्या अपत्यं मनुजर्षभ ॥ २५ ॥
गोलाङ्गूलांश्च शार्दूली व्याघ्रांश्चाजनयत्सुतान् ॥ दिशागजांश्च काकुत्स्थ श्वेतांऽप्यजनयत्सुतान् ॥२६॥
ततो दुहितरौ राम सुरभिर्दे व्यजायत ॥ रोहिणीं नाम भद्रं ते गन्धर्वीं च यशस्विनीम् ॥ २७ ॥
रोहिण्यजनयद्वै वै गन्धर्वी वाजिनः सुतान् ॥ सुरसाऽजनयन्नागान्राम कद्रूस्तु पन्नगान् ॥ २८ ॥
मनुर्मनुष्याञ्जनयद्राम पुत्रान्यशस्विनः ॥ ब्राह्मणान्क्षत्रियान्वैश्याञ्शूद्रांश्च मनुजर्षभ ॥ २९ ॥
[मुखतो ब्राह्मणा जाता उरसः क्षत्रियास्तथा ॥ ऊरुभ्यां जज्ञिरे वैश्याः पद्भ्यां शूद्रा इति श्रुतिः] ॥३०॥
सर्वान्पुण्यफलान्वृक्षाननलोऽपि व्यजायत ॥ [जज्ञे राम महाबाहो तांश्च सर्वान्महीरुहान्] ॥३१॥
विनता च शुकीपौत्री कद्रूश्च सुरसासुता ॥ कद्रूर्नागं सहस्राक्षं विजज्ञे धरणीधरम् ॥ ३२ ॥

शेषणं ॥ १९ ॥ शुकी ताम्रापुत्री । विजज्ञे एवमादयोऽन्तर्भावितण्यर्थाः शब्दाः ॥ २० ॥ क्रोधवशा कश्यपपत्नी ॥ २१–२२ ॥ अपत्यमिति जात्येकवचनं । सृमराः स्त्रीणां केशसहायोपयुक्तविनीलदीर्घवालाः मृगाः । चमराः चामरमृगाः ॥ २३ ॥ हरयः सिंहाः ॥ २४ ॥ मातङ्गाः गजाः ॥ २५ ॥ गोलाङ्गूलाः अत्यन्तदीर्घलाङ्गूलाः मर्कटजातिविशेषाः ॥२६–२७॥ रोहिण्यजनयद्वा वै इति पाठः । नागाः बहुफणाः सर्पाः । पन्नगाः केवलसर्पाः ॥ २८ ॥ मनुः कश्यपपत्नी ॥ २९–३० ॥ पुण्यफलान् चारुफलान् । " पुण्यं तु चारु " इत्यमरः । विषवृक्षनिम्बादयोपि महौषधत्वेन पुण्यफला एव । पिण्डफलानितिपाठे पिण्डाकारफलानित्यर्थः । प्रायिकं चैतदिति बोध्यं ॥ ३१ ॥ एवं प्रासङ्गिकं परिसमाप्य स्वकुलमवतारयति—विनता चेति । अत्र कद्रूं उपादानं स्वप्रतिपक्षकुललेनेति केचित् । वस्तुतस्तु धरणीधरशेषजनकत्वेन स्वकुलतुल्यत्वं वक्तुं " कद्रूर्नागं सहस्राक्षं

• ती० येषांश्वेतबालैर्देवराजादिदीजनंक्रियते ते चमराःहिंषाकृतयः ॥ २३ ॥ शि० लोकनाथः सर्वैरीप्सितः ॥ २५ ॥ ति० गोलाङ्गूलाइतिपूर्वान्वयि ॥ २६ ॥ ति० गावः गाइत्यर्थः ॥ ती० यद्वा मनुष्याकाराः फणालाङ्गूलयुक्ता नागाः । तदन्ये पन्नगाः ॥ कतक० निर्विषा नागाः । तदन्ये पन्नगाः । स० नागान् फणानुद्यत्य गन्तॄन् पन्नगान् भूमिमालंब्य गन्तॄन् ॥२८॥ ति० उरसः बाहुमध्यात् । क्वचित्तु बाहुभ्यामितिपाठः । ति० नागसहस्रं पन्नगसहस्रमित्यर्थः । अतोनोक्तेनविरोधः । शि० कद्रूस्तुधरणीधरान्नागसहस्रंविजज्ञे । "सुरसाजनयन्नागान्रामकद्रूश्चपन्नगान्" इतिपूर्वोक्तेन न विरोधः । सुरसाया धरणीधरनागातिरिक्त नागोत्पादकत्वेन विरोधाभावात् ॥ ३२ ॥

[पा०] १ क. च. छ. ज. ञ. विजज्ञेसा. २ ग. ततःक्रोशवशानाम. ३ क. ग. ङ. च. छ. झ. ट. विजज्ञेऽप्यात्म. ४ ख. ग. ङ—ट. मातङ्गामथ. ५ ख. ग. झ. सुरभीं. ६ हर्यश्चहरयोपत्यं. ततस्त्विरावतींनाम. तस्यास्त्वैरावतः पुत्रो. मातङ्गास्त्वथ. गोलाङ्गूलांश्च. इतिपञ्चानामर्धानां. ख.—ट. पुस्तकेषु. ततस्त्विरावतींनाम. तस्यास्त्वैरावतःपुत्रो. हर्यश्चहरयोपत्यं. गोलाङ्गूलाश्च. मातङ्ग्यास्त्वथ. इतिक्रमभेदोदृश्यते. ७ झ. ञ. ट. मातङ्ग्यास्त्वथमातङ्गाः. ८ क. ख. घ. ङ. च झ. ञ. गोलाङ्गूलाश्च. ९ ग. छ.—ट. दिशागजंतु. १० ग. छ.—ट. श्वेताव्यजनयत्सुतं. घ. श्वेताचजनयत्सुतं. ११ ख. ग. सुरभीर्द्वे. झ. ञ. सुरभिर्देव्यजायत. १२ क. ङ—ट. ह्यावो. १३ घ. ङ. झ. ट. कद्रूश्च. १४ क. ग. छ. झ. ञ. जनयत्काश्यपस्यमहात्मनः. १५ अयं श्लोकः क. घ. ङ. छ. झ. ट. पुस्तकेष्वधिकोदृश्यते. १६ घ. शिरसो. १७ च. छ. ज. ञ. बाहुभ्यां. क. भुजाभ्यां. १८ च. छ. ञ. ब. शूद्राविनिस्सृताः. घ. शूद्राइतिस्मृतिः. १९ घ. च. छ. ज. ञ. पिण्डफलान्. २० इदमर्धं क. च. छ. ज. पुस्तकेषुदृश्यते. २१ ग. विनतातु. २२ ख. ग. ङ. ज. झ. ट. नागसहस्रंतु. क. नागसहस्रंच. २३ ङ. झ. ट. धरणीधरान्.

द्वौ पुत्रौ विनतायास्तु गरुडोऽरुण एव च ॥ तस्माज्जातोऽहमरुणात्संपातिस्तु ममाग्रजः ॥
जटायुरिति मां विद्धि श्येनीपुत्रमरिंदम ॥ ३३ ॥
सोहं वाससहायस्ते भविष्यामि यदीच्छसि ॥ इदं दुर्गं हि कान्तारं मृगराक्षससेवितम् ॥
सीतां च तात रक्षिष्ये त्वयि याते सलक्ष्मणे ॥ ३४ ॥
जटायुषं तं प्रतिपूज्य राघवो मुदा परिष्वज्य च सन्ततोऽभवत् ॥
पितुर्हि शुश्राव सखित्वमात्मवाञ्जटायुषा संकथितं पुनः पुनः ॥ ३५ ॥
स तत्र सीतां परिदाय मैथिलीं सहैव तेनातिबलेन पक्षिणा ॥
जगाम तां पञ्चवटीं सलक्ष्मणो रिपून्दिधक्षञ्शलभानिवानलः ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

पञ्चदशः सर्गः ॥ १५ ॥

कश्यपेनरामस्योदयापञ्चवट्यांगोदावरीसमीपेपर्णशालासहिताश्रमनिर्माणम् ॥ १ ॥ पर्णशालारामणीयकावलोकनहृष्टेन रामेणलक्ष्मणंप्रलोभनपूर्वकंसीतयासहतत्रसुखनिवासः ॥ २ ॥

ततः पञ्चवटीं गत्वा नानाव्यालमृगायुताम् ॥ उवाच भ्रातरं रामः सौमित्रिं दीप्ततेजसम् ॥ १ ॥
आगताः स्म यथोद्दिष्टमगस्त्येन महर्षिणा ॥ अयं पञ्चवटीदेशः सौम्य पुष्पितपादपः ॥ २ ॥
सर्वतश्चार्यतां दृष्टिः कानने निपुणो ह्यसि ॥ आश्रमः कतरस्मिन्नो देशे भवति संमतः ॥ ३ ॥

विज्ञेये धरणीधरं" इत्युक्तं ॥ ३२ ॥ श्येनीपुत्रमिति इयं च श्येनी पूर्वोक्ताया अन्या । यद्वा कश्यपसुता श्येनीमाता कश्यपस्य पञ्चमोऽरुणः । पिता कश्यपप्रजापतिः कूटस्थ इति स्वीयवंशप्रभावो निवेदितः । विधिनिषेधयोस्तिर्यङ्स्त्रभावान्न मातृपुत्रयोरेकवंश्यत्वादिदोषः । अयंच सृष्टिक्रमो वैवस्वतमन्वन्तरप्रकारः । अतो न पुराणान्तरविरोधः ॥ ३३ ॥ वाससहायः वासस्थले सीतायाः रक्षणे सहाय इत्यर्थः । यदीच्छसि उक्तार्थमिति शेषः । सहायापेक्षत्वे हेतुमाह —इदमिति । याते मृगयार्थमिति शेषः ॥३४॥ सन्ततौ हेतुमाह—पितुर्हीति ॥ ३५ ॥ सीतां तत्र परिदाय रक्षणाय जटायुवशां कृत्वेत्यर्थः । "यमाय त्वा परिददाम्यसावन्तकाय त्वा परिददाम्यसौ" इत्यादौ तथा प्रयोगात् । शलभानिवानल इत्यनेन लीलया विरोध्युन्मूलनाभिप्रायोवगम्यते ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुर्दशः सर्गः ॥१४॥

अथ शेषभूतस्य शेष्यभिमतकैङ्कर्यमेव कर्तव्यमिति दर्शयति पञ्चदशे—तत इत्यादि । सौमित्रिं रामं दशरथं विद्धीत्यादिसुमित्रानियोगेन रामकैङ्कर्योक्तं । दीप्ततेजसं कैङ्कर्योचितदेशलाभेन संतुष्टमित्यर्थः । व्यालाः दुष्टसर्पाः ॥ १ ॥ यथोद्दिष्ट अगस्त्योक्तक्रमेण आगताः स्म । यं देशं मुनिरब्रवीत् सोयं पञ्चवटीदेश इत्यर्थः ॥ २ ॥ सर्वतः सर्वत्र । कानने त्वया दृष्टिश्चार्यतां सर्वं काननमवलोक्यतामित्यर्थः । हिर्हे-

टी० ननु श्येनीशुक्र्यौ ताम्रायाः पुत्र्यौ श्येनीपुत्रस्तु कथंजटायुः अरुणस्यकथंश्येनी भार्या । उच्यते . श्येनीसंतानपरंपरापतिता काचन श्येनी भविष्यतीत्यदोषः ॥ ३३ ॥ ति० परिधायेतिपाठे परिवार्येत्यर्थः । ३६ । इतिचतुर्दशस्सर्गः ॥ १४ ॥

ति० यं देशं मुनिरब्रवीत् यथोद्दिष्टं तंदेशमागतास्स्मेत्यन्वयः ॥ २ ॥

[पा०] १ क. ख. ग. ङ. छ.—ट. संपातिश्च. २ ख ग. रामसहायः. ३ क —ट. जटायुषंतु. ४ क. ख. छ ज. रामः. ख. सीतासहितोरघूत्तमःसहैव ५ घ. च छ. ज. ञ. ट परिधाय. ६ ङ. झ. दिधक्षन्सवनानिपालयन्. ७ ग. सतु. ८ ङ झ. ट. लक्ष्मणंरामोभ्रातरं क. च. छ. ज च. भ्रातरंश्रीमान्. ९ घ. च.—ञ. यथोद्दिष्टंदेशंमुनिरब्रवीत्. ख. ङ. ट. यथोद्दिष्टमिमं. १० क. झ. ञ. ट. पुष्पितकाननः.

रमते यत्र वैदेही त्वमहं चैव लक्ष्मण ॥ तादृशो दृश्यतां देशः सन्निकृष्टजलाशयः ॥ ४ ॥
वनरामण्यकं यत्र स्थलरामण्यकं तथा ॥ सन्निकृष्टं च यत्र स्यात्समित्पुष्पकुशोदकम् ॥ ५ ॥
एवमुक्तस्तु रामेण लक्ष्मणः संयताञ्जलिः ॥ सीतासमक्षं काकुत्स्थमिदं वचनमब्रवीत् ॥ ६ ॥
परवानस्मि काकुत्स्थ त्वयि वर्षशतं स्थिते ॥ स्वयं तु रुचिरे देशे क्रियतामिति मां वद ॥ ७ ॥
सुप्रीतस्तेन वाक्येन लक्ष्मणस्य महात्मनः ॥ विमृशन्नोचयामास देशं सर्वगुणान्वितम् ॥ ८ ॥
स तं रुचिरमाक्रम्य देशमाश्रमकर्मणि ॥ हस्तौ गृहीत्वा हस्तेन रामः सौमित्रिमब्रवीत् ॥ ९ ॥
अयं देशः समः श्रीमान्पुष्पितैस्तरुभिर्वृतः ॥ इहाश्रमपदं सौम्य यथावत्कर्तुमर्हसि ॥ १० ॥
इयमादित्यसंकाशैः पद्मैः सुरभिगन्धिभिः ॥ अदूरे दृश्यते रम्या पद्मिनी पद्मशोभिता ॥ ११ ॥

तौ । असीति त्वमित्यर्थे निपातः । यस्मात्त्वमाश्रमोचितस्थलपरिज्ञाने निपुणः तस्मात्कतरस्मिन्प्रदेशे सर्वेषां नः संमत आश्रमो भवतीति सर्वत्र कानने दृष्टिश्चार्यतामित्यर्थः ॥ ३ ॥ सर्वसंमतत्वमुपपादयति —रमत इति । त्वं रमस इति शेषः । सर्वरतिहेतुमाह —सन्निकृष्टेति ॥ ४ ॥ तदेवविवृणोति—वनेति । रामण्यकं रमणीयता । "योपधाद्गुरूपोत्तमाद्वुञ्" इति वुञ् । ईकारलोपश्छान्दस इति बोध्यं । वनस्य रमणीयता चूतपुन्नागादिमिश्रत्वं । स्थलस्य रमणीयता निम्नोन्नतत्वरहितकोमलसिकतामयत्वं । समिदिति "जातिरप्राणिनां" इत्येकवद्भावः । वनरामण्यकं कुसुमाभिलाषिण्याः सीतायाः रतिहेतुः । स्थलरामण्यकं सुखशयनादिकाङ्क्षिणो रामस्य । सन्निकृष्टसमिदादिमत्त्वं शुश्रूषमाणस्य सौमित्रेः ॥ ५ ॥ एवं स्वसौख्यमप्युक्तवतो रामस्य वचनमसहमानःसौमित्रिः सीतायास्तव च यः प्रदेशो रमणीयः स एवाज्ञप्तव्यः न तु मे सौकर्यावह इत्याह—एवमिति । सीतासमक्षमिति पुरुषकारसांनिध्योक्तिः ॥ ६ ॥ परवानस्मि ममास्मिता तवास्मितावत्र भवति पारतन्त्र्यैकवेषा ममास्मितेति भावः । काकुत्स्थ इदं च पारतन्त्र्यं न परत्वावस्थायामेव किंत्ववतारावस्थायामपीत्यर्थः । इदं च पारतन्त्र्यं कियत्कालं तत्राह—त्वयि वर्षशतं स्थित इति । शतशब्द आनन्त्यवचनः । सार्वकालिकं मम पारतन्त्र्यमिति भावः । एवं पारतन्त्र्यस्यैव मत्स्वरूपत्वेन तदनुकूलतया त्वया आज्ञापनं कर्तव्यमित्याह—स्वयमिति । स्वयं रुचिरे देशे तवैव रमणीये प्रदेशे । आश्रमः क्रियतामिति मां वद ॥ ७ ॥ विमृशन् पर्यालोचयन् । देशं कंचिदितिशेषः ॥ ८ ॥ आक्रम्य स्वीयत्वेनाभिमन्य । आश्रमकर्मणि आश्रमनिमित्तं । हस्तौ कृताञ्जलिकौ । स्वहस्तेन गृहीत्वाञ्जलिं । स्नेहातिशयकृतानुभावो हस्तग्रहणं ॥ ९ ॥ समः समतलः । पुष्पितैः संजातपुष्पैः । यथावत् यथायोग्यं ॥ १० ॥ आदित्यसंकाशैः आदित्यविकसितैः तद्वदुज्ज्वलैर्वा । "तुलसीकाननं यत्र यत्र पद्मवनानि च । वसन्ति वैष्णवा यत्र तत्र सन्निहितो हरिः" इत्युक्तरीत्या नित्यसंनिहितहरिभिरिति वा ।

तनि० एवमुक्तः त्वमहंचैव लक्ष्मणेति तवापि सौख्यकारिणि कस्मिंश्चिद्देशे पर्णशालांकुर्विति लक्ष्मणे स्वातन्त्र्यं निक्षिप्य श्रीरामेणोक्ते मयि स्वातन्त्र्यनिक्षेपकालएव रामो मां त्यक्तवान् । एतावत्पर्यन्तं ममाज्ञानेन स्वरूपहानिः कृता । इतःपरं ममस्वरूपं नाम कथनपदार्थोस्ति किमित्येवमवस्थान्तरं प्राप्तवाँल्लक्ष्मणः पारतन्त्र्यैकलक्षण. संयताञ्जलिः इदानीं श्रीरामं प्रत्यञ्जलिरेव मद्रक्षकः । अञ्जलेस्सर्वाभिमतसाधनत्वादितिमत्वा कृताञ्जलिस्सन् । सीतासमक्षं पुरुषकारभूतायाःश्रियस्संनिधौ काकुत्स्थं प्रति वचनमब्रवीत् । एतादृशमुक्तवानिति ऋषिस्तौति । सीतासमक्षमित्यनेनैकैकर्यप्रतिसंबन्धित्वं द्वयोत्तरखण्डोक्तं लक्ष्मीविशिष्टस्यैवेति व्यञ्जितं । परवानस्मि ममास्मिता तवास्मितावत्र भवति . तव पारतन्त्र्यं न केनाप्याकाङ्क्षितं । अतएव भवता न दीयते । लोकस्य भिन्नरुचित्वात् । मयोऽपेक्षितमेव वर्षशतं । अत्र शतशब्द आनन्त्यवाची । तेन सार्वकालिकस्वोक्तिः । परवानस्मीति सर्वदा परवत्त्वप्रतीत्या सर्वावस्थोक्तिः । क्रियतामिति मां वदेति निरुपपदक्रियापदयोगात्सर्वविधकैङ्कर्योपलक्षणं । एवंकैङ्कर्यरूपफलप्रार्थना द्वयोत्तरखण्डोक्ता व्यञ्जिता ॥ ७ ॥ ति० हस्तेन स्वहस्तेन । हस्ते लक्ष्मणस्यहस्ते । लक्ष्मणगृहीतेत्यर्थः

[पा०] १ क.—ट. अलरामण्यकं. २ क. ङ.—ट. संनिकृष्टं च यस्मिंस्तु. ग. संनिकृष्टं वनस्यास्य इध्मपुष्पकुशाजिनं. ३ क.—ट. महाद्युतिः. ४ ग. सदृशंरोचयामास. ५ ख. ङ.—ञ. ट. हस्ते. क. ग. हस्तं. ६ क. ञ. ट. रम्यं. ७ ग. पुष्पाः ८ ग. घ. च. छ. ज. ञ. पद्मसेविता.

यथाऽऽख्यातमगस्त्येन मुनिना भावितात्मना ॥ इयं गोदावरी रम्या पुष्पितैस्तरुभिर्वृता ॥
हंसकारण्डवाकीर्णा चक्रवाकोपशोभिता ॥ १२ ॥
नातिदूरेण चास्माभि मृगयूथैर्निपीडिताः ॥ मयूरनादिता रम्याः प्रांशवो बहुकन्दराः ॥
दृश्यन्ते गिरयः सौम्य फुल्लैस्तरुभिरावृताः ॥ १३ ॥
सौवर्णै राजतैस्ताम्रैर्देशे देशे च धातुभिः ॥ गवाक्षिता इवाभान्ति गजाः परमभक्तिभिः ॥ १४ ॥
सालैस्तालैस्तमालैश्च खर्जूरपनसाम्रकैः ॥ निवारैस्तिमिशैश्चैव पुन्नागैश्चोपशोभिताः ॥ १५ ॥
चूतैरशोकैस्तिलकैश्चम्पकैः केतकैरपि ॥ पुष्पगुल्मलतोपेतैस्तैस्तैस्तरुभिरावृताः ॥ १६ ॥
चन्दनैः स्पन्दनैर्नीपैः पर्णासैर्लिकुचैरपि ॥ धवाश्वकर्णखदिरैः शमीकिंशुकपाटलैः ॥ १७ ॥
इदं पुण्यमिदं मेध्यमिदं बहुमृगद्विजम् ॥ इह वत्स्यामि सौमित्रे सार्धमेतेन पक्षिणा ॥ १८ ॥
एवमुक्तस्तु रामेण लक्ष्मणः परवीरहा ॥ अचिरेणाश्रमं भ्रातुश्चकार सुमहाबलः ॥ १९ ॥
पर्णशालां सुविपुलां तत्र संभृतमृत्तिकाम् ॥ सुस्तम्भां मस्करैर्दीर्घैः कृतवंशां सुशोभनाम् ॥ २० ॥

सुरभिगन्धिभिः सौम्यगन्धयुक्तैः । " गन्धस्येत्—" इत्यादिना इकारोन्तादेशः । " सुरभिर्मधुमासे स्याद्-सन्तर्वावपि त्रिषु । सौम्ये सुगन्धौ क्लीबेन्वाम् " इति दर्पणः । " सर्वगन्धः सर्वरसः " इत्युक्तरीत्या सुरभिणा हरिणा गन्धिभिः गन्धवद्भिरिति वा । पद्मिनी गोदावरीसमीपस्था पुष्करिणी । पद्मया शोभिता पद्मशोभिता । " ऋग्यापोःसंज्ञाछन्दसोर्बहुलं " इति ह्रस्वः । हरिसांनिध्येन तन्नित्यानपायिन्या श्रिया च युक्तेत्यर्थः । अनेन श्लोकेन वासयोग्यत्वमुक्तं ॥ ११ ॥ अगस्त्येन यथा ख्यातं तथेयं गोदावरी दृश्यत इत्यनुषङ्गः ॥१२॥ नातिदूरेण चास्माभि इति । अस्य गोदावर्या गिरिभिरन्वयः । काकाक्षिन्यायात् । मृगेत्यादि गिरिविशेषणं । मयूरनादिताः मयूरनादयुक्ताः । इतच्प्रत्ययः । प्रांशवः उन्नताः । बहुकन्दराः विपुलगुहाः । " दरी तु कन्दरो वा स्त्री देवखातबिले गुहा " इत्यमरः । फुल्लैः विकसितपुष्पैः । " अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः " इति निपातितः ॥ १३ ॥ देशे देशे नानादेशे वर्तमानैः सुवर्णादिसदृशैः धातुभिः परिणतस्वदशासंक्रान्तैः गैरिकैः । " धातवो गिरिसंभवाः " इत्यमरः । उपलक्षिताः गजाः परमभक्तिभिः उत्कृष्टरेखालंकारैः । गवाक्षिताः संजातगवाक्षा इवाभान्ति । गजानां हि गवाक्षाकाराः भक्तीः कुर्वन्ति ॥ १४ ॥ प्रीत्यतिशयेन वनं वर्णयति—सालैरित्यादिना । सालैः सर्जकाख्यैर्वृक्षैः । तमालैः कालस्कन्धाख्यैः । खर्जूरैः खर्जूरवृक्षैः । पनसैः । आम्रकैः रसालभेदैः । निवारैः जलकदम्बैः । तिमिशैः नेमिद्रुमैः । पुन्नागैः । तिलकैः क्षुरकवृक्षैः । गुल्माः जातिप्रभृतयः । लताः माधवीप्रभृतयः । स्पन्दनैः तिमिशभेदैः । नीपैः स्थलकदम्बकैः । पर्णासैः करिञ्जराख्यैः । लिकुचैः धवैः अश्वकर्णैः खदिरैः शमीभिः । किंशुकैः पलाशैः । पाटलैः । अत्र पूर्वश्लोकात् गिरयो दृश्यन्त इत्यनुषक्तपदाभ्यामन्वयः ॥ १५—१७॥ पुण्यं पुण्यप्रदं । मेध्यं पवित्रं । एतेन अस्माभिः सहागतेन । पक्षिणा जटायुषा ॥ १८ ॥ परवीरहेति किप् छान्दसः । आश्रमं अङ्गणादिविस्तारवदाश्रमप्रदेशं ॥ १९ ॥ तत्र आश्रमे । पर्णशालां उटजं । संस्तातमृत्तिकां भित्तीकृतमृत्तिकामित्यर्थः । मस्करैः वेणुभिः । " मस्करमस्करिणौ वेणुपरिव्राजकयोः " इति निपातनात्साधुः । कृतवंशां कृतगृहोर्ध्वकाष्ठां ।

॥ १ ॥ ती० परमभक्तिभिः नीलपीतादिवर्णरचनाभिः । गवाक्षिताः चित्रिताः । अलङ्कृताइतियावत् ॥ १४ ॥ ती० खर्जूरः कण्टकच्छदः । नीवारः स्थलकदंबः ॥ १५ ॥

[पा०] १ घ. छ. ज. ञ. सेविता. २ क.—च. ज. झ. ञ. नातिदूरेचासन्ने. ३ घ. यूथाभिपीडिताः. क यूथावपीडिता. ङ. झ. ञ. ट. यूथावपीडिताः. ४ घ. गिरिकन्दराः. ५ ङ. झ. ट. सौम्याः. ६ ग. पुष्पितैस्तरुभिर्वृताः. ७ ङ. झ. ट. सवाशुभे. ८ ख. ग. घ. स्तमालैस्तालैश्च. ९ ङ. झ. ट. खर्जुरैःपनसैर्हिमैः. च. ज. ञ. खर्जुरैःपनसाम्रकैः. १० झ. स्तिनिग्रैश्चैव. ११ ङ. झ. ट. तिलकैः केतकैरपि चंपकैः. १२ ख. फुल्लगुल्म. १३ घ. सौवंहुभिरावृताः. १४ ङ.—ट. स्पन्दनैःस्पन्दनैर्नीपैः. क. स्पन्दनैश्चन्दनैः. १५ ख.—ट. लैकुचैरपि. १६ ङ. झ. रम्यमिदं. १७ ख. ग. ङ—ट. संघात.

शमीशाखाभिरास्तीर्यं दृढपाशावपाशितम् ॥ कुशकाशशरैः पर्णैः सुपरिच्छादितां तथा ॥ २१ ॥
समीकृततलां रम्यां चकार लघुविक्रमः ॥ निवासं राघवस्यार्थे प्रेक्षणीयमनुत्तमम् ॥ २२ ॥
स गत्वा लक्ष्मणः श्रीमान्नदीं गोदावरीं तदा ॥ स्नात्वा पद्मानि चादाय सफलः पुनरागतः ॥ २३ ॥
ततः पुष्पबलिं कृत्वा शान्तिं च स यथाविधि ॥ दर्शयामास रामाय तदाश्रमपदं कृतम् ॥ २४ ॥
स तं दृष्ट्वा कृतं सौम्यमाश्रमं सह सीतया ॥ राघवः पर्णशालायां हर्षमाहारयद्वशम् ॥ २५ ॥
सुसंहृष्टः परिष्वज्य बाहुभ्यां लक्ष्मणं तदा ॥ अतिस्निग्धं च गाढं च वचनं चेदमब्रवीत् ॥ २६ ॥
प्रीतोस्मि ते महत्कर्म त्वया कृतमिदं प्रभो ॥ प्रदेयो यन्निमित्तं ते परिष्वङ्गो मया कृतः ॥ २७ ॥
भावज्ञेन कृतज्ञेन धर्मज्ञेन च लक्ष्मण ॥ त्वया पुत्रेण धर्मात्मा न संवृत्तः पिता मम ॥ २८ ॥
एवं लक्ष्मणमुक्त्वा तु राघवो लक्ष्मिवर्धनः ॥ तस्मिन्देशे बहुफले न्यवसत्सुसुखं वशी ॥ २९ ॥
कंचित्कालं स धर्मात्मा सीतया लक्ष्मणेन च ॥ अन्वास्यमानो न्यवसत्स्वर्गलोके यथाऽमरः ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

"वंशस्तु पृष्ठास्थि गृहोर्ध्वकाष्ठे वेणौ गुणे कुले" इति वैजयन्ती । वेणुमयस्तम्भोपरि प्रसारितितिर्यक्काष्ठमित्यर्थः । शमीशाखाभिरास्तीर्यं तिर्यग्वेणूपरि शमीशाखाभिरास्तीर्यं । दृढपाशावपाशितां दृढवल्कलादिकृतपाशैरवपाशितां संजातपाशां । तिर्यग्वंशैः सह शमीशाखाः दृढं बध्नेत्यर्थः । कुशकाशशरैः कुशादिरूपैः पर्णैः सुपरिच्छादितां सुशोभनं रमणीयं यथा तथा परिच्छादितां । पर्णशालारूपं निवासं चकारेत्यन्वयः ॥ २०—२२ ॥ सफलः फलानि चादायेत्यर्थः ॥ २३ ॥ पुष्पबलिं वास्तुपूजां । शान्तिं आभ्युदयिकीं क्रियां । यथाविधि वास्तुकल्पानुसारेण ॥ २४ ॥ पर्णशालायां विषये हर्षमाहारयत् संतोषं प्राप्तवानित्यर्थः ॥ २५ ॥ अतिस्निग्धं च गाढं चेति परिष्वङ्गक्रियाविशेषणं ॥ २६ ॥ हे प्रभो समर्थ । त्वया इदं महत्कर्म कृतं अतस्ते प्रीतोस्मि । यन्निमित्तं यदाश्रमनिर्माणनिमित्तं । प्रदेयः पारितोषिकोक्ति सन्निमित्तं मया परिष्वङ्गः कृतः आश्चर्यभूतपर्णशालानिर्माणस्य उचितपारितोषिकान्तराभावात्परिष्वङ्गमेव कृतवानस्मीत्यर्थः ॥ २७ ॥ भावज्ञेन मच्चित्तज्ञेन सीतया सह रहसि स्थातुं मम स्थलं रचयेति रामो न वदेत् किंतु मनसि कुर्यादिति तदपि ज्ञातवतेत्यर्थः । कृतज्ञेन चिरमपुत्रेण दशरथेन स्वस्मिन्नाद्वरातिशयाद्येन क्रमेण चन्द्रतारावलालोचनपूर्वकं गृह्यं निर्मापितं तेन क्रमेण तत्कृतप्रकारज्ञेनेत्यर्थः । धर्मज्ञेन स्वयं राजपुत्रोपि स्वोचितस्थलमकृत्वा यथा रामः संतुष्यति तथैव मया स्थातव्यमित्येवंविधधर्मज्ञेन । त्वया पुत्रेण पुन्नाम्नो नरकाद्यस्मात्र इति पुत्रः । ततो मदभिमतासिद्धिरेव स्वस्यनिरय इत्यभिमेने । मदभिमतकरणेन तस्य निरयनिस्तारकेण त्वयेत्यर्थः । धर्मात्मा स्वयं यावज्जीवंमदभीष्टमेव कृत्वा स्वचरमकालेपि मदभिमतकरणाय त्वां स्थापितवान् पानीयशालाप्रवर्तकवत् । मम पिता न संवृत्तः किंतु त्वमेव स्वन्मुखेन पित्रा मम सर्वाभिलषितपरिपूरणात् अहं सर्वं करिष्यामीति हि त्वयोक्तमिति भावः ॥ २८ ॥ वशी विषयचापलरहितः ॥ २९—३० ॥ अत्र एकत्रिंशच्छ्लोकाः । इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चदशः सर्गः ॥ १५ ॥

टी० लघुविक्रमः अनलसगतिः ॥ २२ ॥ टी० नायेन पालकेनत्वया ॥ २८ ॥ इतिपञ्चदशस्सर्गः ॥ १५ ॥

[पा०] १ क. ङ. छ. झ. ञ. ट. चकारसुमहाबलः. घ. चकारसमहाबलः. च. छ. ञ. चकारादुलविक्रमः. २ ख. सजलः. ३ घ. पुष्पाञ्जलिं. ४ घ. सीतयासह. ५ क. ख. ग. ङ.—ट. त्वरं. ६ क.—घ. ससंहृष्टः. ७ ङ. घ. ट. कृतमरिंदम. ८ च. नायेन. ९ ख. तव. १० च. ज. ससुखीसुखं. छ. झ. ञ. ससुखंसुखी. ग. ङ. सुसुखंसुखी. क. सुखंसुखी. ११ क. स्वर्गेलोके.

षोडशः सर्गः ॥ १६ ॥

हेमन्तागमेप्रातस्स्नानायसीतयारामइकदाचनगोदावरींगच्छन्तंराममनुगच्छतालक्ष्मणेनहेमन्तवर्णनम् ॥ १ ॥ लक्ष्मणेन भरतवृत्तान्तप्रश्नावपूर्वंकंकैकेय्युपालंभेरामेणतत्प्रतिषेधपूर्वंकंभरतप्रशंसनम् ॥ २ ॥ तयासीतालक्ष्मणाभ्यांसहस्नानपूर्वंक सन्ध्योपासनाद्याचरणम् ॥ ३ ॥

वसतस्तस्य तु सुखं राघवस्य महात्मनः ॥ शरत्क्षपाये हेमन्त ऋतुरिष्टः प्रवर्तते ॥ १ ॥
स कदाचित्प्रभातायां शर्वर्यां रघुनन्दनः ॥ प्रययावभिषेकार्थं रम्यां गोदावरीं नदीम् ॥ २ ॥
प्रह्वः कलशहस्तस्तं सीतया सह वीर्यवान् ॥ पृष्ठतोऽनुव्रजन्भ्राता सौमित्रिरिदमब्रवीत् ॥ ३ ॥
अयं स कालः संप्राप्तः प्रियो यस्ते प्रियंवद ॥ अलङ्कृत इवाभाति येन संवत्सरः शुभः ॥ ४ ॥
नीहारपरुषो लोकः पृथिवी सस्यशालिनी ॥ जलान्यनुपभोग्यानि सुभगो ह्यव्यवाहनः ॥ ५ ॥
नवाग्रयणपूजाभिरभ्यर्च्य पितृदेवताः ॥ कृताग्रयणकाः काले सन्तो विगतकल्मषाः ॥ ६ ॥
प्राज्यकामा जनपदाः संपन्नतरगोरसाः ॥ विचरन्ति महीपाला यात्रास्था विजिगीषवः ॥ ७ ॥
सेवमाने दृढं सूर्ये दिशमन्तकसेविताम् ॥ विहीनतिलकेव स्त्री नोत्तरा दिक्प्रकाशते ॥ ८ ॥
प्रकृत्या हिमकोशाढ्यो दूरसूर्यश्च सांप्रतम् ॥ यथार्थनामा सुव्यक्तं हिमवान्हिमवान्गिरिः ॥ ९ ॥
अत्यन्तसुखसंचारा मध्याह्ने स्पर्शतः सुखाः ॥ दिवसाः सुभगादित्याश्छायासलिलदुर्भगाः ॥१०॥

अथ भाविशूर्पणखादर्शनाद्यनर्थसूचकतया हेमन्तवर्णनं प्रस्तौति—वसत इत्यादि । इष्टः तपस्विनां तपःसाधनायेष्टः । रामस्य तु खरादिराक्षसवधविजयमूलशूर्पणखाऽऽगमनहेतुतयेष्टः ॥ १ ॥ प्रभातायां विरामोन्मुखायां ॥ २—३ ॥ येन हेमन्तेन ॥ ४ ॥ लोको जनः । नीहारेण हिमेन । परुषः परुषत्वक् । सर्वत्र भवतीति शेषः । स्वभावोक्तिरलंकारः । " स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनं " इति लक्षणात् ॥ ५ ॥ काले आग्रयणकर्मानुष्ठानकाले । आग्रयणं नाम कश्चिद्धविर्यज्ञो नूतनधान्यभोजनस्यादावनुष्ठेयः । तदुक्तमापस्तम्बेन " नानिष्ट्वाग्रयणेनाहिताग्निर्नवस्य धान्यस्याश्नीयाद्व्रीहीणां यवानां श्यामाकानामग्रे पाकस्य यजेत " इति । आग्रयणरूपपूजाभिः पितृदेवता अभ्यर्च्य कृताग्रयणकाः नतु कृताग्रयणप्रतिनिधय इत्यर्थः ॥ ६ ॥ प्राज्यकामाः बहुलकामोद्रेकाः । " प्राज्यमदभ्रंबहुलंबहु " इत्यमरः । जनपदाः जनपदस्थाः । यात्रायां युद्धयात्रायां आस्था येषां ते यात्रास्थाः ॥ ७ ॥ अन्तकसेवितां दक्षिणामित्यर्थः । अत्रोत्प्रेक्षालंकारेण दक्षिणा दिक् सतिलकेव प्रकाशत इत्युत्प्रेक्षा व्यज्यते ॥ ८ ॥ प्रकृत्या स्वभावेन । हिमकोशैः घनीभूतहिमैः । आढ्यः संपूर्णः । सांप्रतं दक्षिणायने दूरसूर्यः अत एव हिमवान् अधिकहिमः । भूमार्थे मतुप् । हिमवान् गिरिः यथार्थनामा भवति सुव्यक्तमित्युत्प्रेक्षाव्यञ्जकं निरुक्तिश्चालंकारः । " निरुक्तिर्योगतो नाम्नामन्वर्थत्वप्रकल्पनं " इति लक्षणात् ॥ ९ ॥ मध्याह्ने स्पर्शतः उष्णस्पर्शतः । सुखाः सुखकराः । अतएव तदानीं अत्यन्तसुखसंचाराः सुभगादित्याः दर्शनयोग्यादित्याः । छायासलिलदुर्भगाः दुर्भगच्छायासलिलाः । आहिताग्न्यादिलात्परनिपातः । अतिशीतच्छायासलिला इत्यर्थः ।

ती० इष्टः कामिनीनां कामिनामिष्टइत्यर्थः ॥ १ ॥ ती० येन हेमन्तेनसुपकसस्यादिसंपत्तेन । शुभस्त्रयसंवत्सरः अलंकृतो यद्यपि तथापि तत्रातिसुकुमारस्य प्रियइवाभातिकिमितियोजना । यद्वा । य हेमन्तकालः सेप्रियः । येनहेमन्तेनसंवत्सरश्शुभस्सन्नलंकृतइवभाति । अयंकालस्सम्प्राप्तइतियोजना ॥ ४ ॥ ती० जलान्यनुपभोग्यानि शैत्यातिशयात्स्नानाद्यर्थमशक्यानि । सुभगः इष्टः ॥ ५ ॥ ती० संपन्नतरगोरसाः बहुलतरगोक्षीराः । जनपदाः भवन्तीतिशेषः ॥ ७ ॥ शि० हिमकोशाढ्यः हिमकोशैः कोशवद्घनीभूतहिमैः आढ्यः हिमवान्गिरिः सांप्रतंदूरसूर्यस्सन् सुव्यक्तंहिमवानिति यथार्थनामाऽभवत् । सूर्यस्यदूरस्थत्वात्

[पा०] १ ग. ङ. झ. ञ. ट. इलसु. २ घ. न्त्रातुः. ख. न्त्रात्रा. ३ क.—घ. च. ज. झ. ञ. मालिनी. ४ क. ञ—ञ. यात्रार्थे. छ. यात्रार्थे. ५ च. पश्यतः.

मृदुसूर्याः सनीहाराः पटुशीताः समारुताः ॥ शून्यारण्या हिमध्वस्ता दिवसा भान्ति सांप्रतम् ॥ ११
निवृत्ताकाशशयनाः पुष्यनीता हिमारुणाः ॥ शीता वृद्धतरायामास्त्रियामा यान्ति सांप्रतम् ॥ १२ ॥
रविसंक्रान्तसौभाग्यस्तुषारारुणमण्डलः ॥ निश्श्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ॥ १३ ॥
ज्योत्स्नी तुषारमलिना पौर्णमास्यां न राजते ॥ सीतेव चातपश्यामा लक्ष्यते न तु शोभते ॥ १४ ॥
प्रकृत्या शीतलस्पर्शो हिमविद्धश्च सांप्रतम् ॥ प्रवाति पश्चिमो वायुः काले द्विगुणशीतलः ॥ १५ ॥

भवन्तीति शेषः । स्वभावोक्तिरलंकारः ॥ १० ॥ मृदुसूर्याः अक्रूरसूर्याः । पटुशीताः प्रबलशीताः । शून्यारण्याः आरण्या वनचराः तैः शून्याः आवरणरहितत्वेन शीतपीडिताः न बहिः संचरन्तीत्यर्थः । हिमध्वस्ताः हिमध्वस्तजनवन्तः । शैत्येन पिण्डीभूतशरीरजना इत्यर्थः । अनेन राक्षसकृतसार्वत्रिकपीडा द्योतिता ॥ ११ ॥ निवृत्ताकाशशयनाः निवृत्तचन्द्रशालाद्यनावृतप्रदेशशयनाः । पुष्यनीताः पुष्यनक्षत्रयुक्ता पौर्णमासी पुष्यं तेन नीताः तत्प्रधाना इत्यर्थः । यद्वा पुष्यः पुष्यमासः तेन नीताः पुष्यमाससन्निहिता इत्यर्थः । हिमारुणाः हिमधूसराः । शीताः शीतवाताः । वृद्धतरायामाः चतुर्विंशतिघटिकायुक्तत्वेनातिवृद्धतरविस्ताराः त्रियामाः रात्रयः । दिनान्ते अर्धयामस्य दिनादावर्धयामस्य च दिनशेषत्वात् । अनेन स्वर्गलोकोपद्रवः तामसराक्षसवृद्धिः सज्जनक्षयः कल्यनुसारिता चोक्ता । पुष्यः कलिः ॥ १२ ॥ मन्दरश्मित्वेन संक्रान्तं संप्रवृत्तं सौभाग्यं भोग्यत्वं यस्य सः सूर्ये स्वसौभाग्यं दत्तवानित्यर्थः । तुषारैः हिमशीकरैः अरुणं रक्तं मण्डलं यस्य । हिमशीकरावरणेन चन्द्रसूर्यमण्डलयोरारुण्यं प्रत्यक्षसिद्धं । निःश्वासेन अन्धः अप्रकाशः । आदर्शः दर्पणमिव । उपमालंकारः । अनेन रावणापहृतसर्वस्वस्य मलिनाकृतेरिन्द्रस्यावस्थोक्ता ॥ १३ ॥ ज्योत्स्नी चन्द्रिकयान्विता रात्रिः । तुषारमलिना सती पौर्णमास्यामपि न राजते न शोभते । एवंभूता सा आतपश्यामा आतपापहृतवर्णा सीतेव लक्ष्यते किंतु सीतावन्न शोभते । व्यतिरेकालंकारः । "व्यतिरेको विशेषश्चेदुपमानोपमेययोः" इति तल्लक्षणं । अनेन सीताया भाविरावणाभिभवः तेनापि सुरनारीजनबन्दीमोक्षणार्थत्वेनातिशयश्च व्यज्यते ॥ १४ ॥ प्रकृत्या शीतलस्पर्शः वायोः शीतस्पर्श एव स्वभावः । उष्णस्पर्शस्त्वागन्तुक इति हृदयं । सांप्रतं हेमन्ते । हिमविद्धः हिमयुक्तः । काले प्रातःकाले । द्विगुणशीतलः द्विरावृत्त्या शीतलः । "अथो गुणः । रूपादौ सूदशिञ्जिन्योरावृत्तीन्द्रियतन्तुषु । सध्र्यादावपि सत्त्वादौ त्यागादावुपसर्जने" इति रत्नमाला । पश्चिमो वायुः पश्चिमदिग्वायुः । अनेन स्वभावतः करुणाशीलस्य अवतारकाले देवप्रार्थनोत्तम्भितकृपस्य पुनर्मुन्याश्रमे

हिमद्रवाभावेन घनीभूतहिमविशिष्टोभवतीत्यर्थः ॥ ९ ॥ टीका० सनीहाराइत्युक्त्वा हिमध्वस्ताइतिपुनर्वचनं हिमवासराइतिविशेषणदर्शनार्थं । स० हे मध्वस्त मधुरस्तो ध्वस्तोयेन सतथा तत्संबुद्धिः । आहिताग्न्यादित्वात्परनिपातः । आदिवसाः ईषद्दिवसाः अहर्मानन्यौन्यात् । छन्दस्तुल्यत्वादाभान्तीति तिङावाऽऽङोन्वयः । अरण्यपुरहिमभेदाद्वाऽपौनरुक्त्यं । शि० मृदुसूर्याः मृदुः सहनयोग्योष्मविशिष्टःसूर्योयेषु । अतएवसनीहाराः । अतएव हिमैर्ध्वस्ताः ध्वंसकर्मीभूताजनायेषुते । अतएव शून्यानि हिमध्वस्तत्वेनकोमलपत्रादिरहितानि अरण्यानि येषुते । ति० हिमध्वस्ताः हिमध्वस्तपङ्कजाः ॥ ११ ॥ ती० पुष्यनीताः पुष्यनक्षत्रेण नीताः प्रवर्तिताः । येषुदिवसेषु पुष्यनक्षत्रं रात्रिकालपरिमाणंबोधयतीत्यर्थः । अन्येतु पुष्यनीताः पुष्यशब्देन पुष्यनक्षत्रयुक्तापौर्णमासी नीतालक्ष्यते । तथाच पुष्यनक्षत्रयुक्तापौर्णमासी नीताः गताः तदुपलक्षिताइतियावत् । कादाचित्कतया भेदधीहेतुरुपलक्षणमित्याहु । यद्वा पुष्यनीताः पुष्याः पोष्याः गुणाभावआर्षः । शीतनिवारकोपचारैःपोष्याः भोगिनइत्यर्थः । तैर्नीताः कृच्छ्रेणगमिताः । स० पुष्यनीताः पुष्यमासावधिकाः ॥ ति० हिमारुणाः हिमधूसराः । कपोतवर्णेप्यरुणशब्दः । शीतं वृद्धतरं यासुताः । आयामाः दैर्घ्यवत्यः ॥ १२ ॥ स० निश्श्वासान्धः निश्श्वासएव अन्धं तिमिरंयस्यसः । "अन्धंस्यात्तिमिरं" इति विश्वः । प्रतिफलनप्रतिबन्धकत्वादितिभावः ॥ १३ ॥ ती० प्रकृत्या स्वभावेन अशीतलस्पर्शः । अशीतेत्युपलक्षणं । अनुष्णोपीतिद्रष्टव्यं । तथाच अनुष्णाशीतस्पर्शइत्यर्थः । काले प्रातःकाले । हिमविद्धस्सन् द्विगुणशीतलः प्रातःकालभवत्वेन हिमविद्धत्वेन द्विगुणशीतलत्वमितिभावः । स० यद्वा प्रकृत्याशीतलस्पर्शः । त्रिवृत्करणाज्जलविशेषगुणस्यापि वायुवृत्तित्वं नानुपपन्नं ॥ १५ ॥

[पा०] १ झ. सुनीहाराः. २ ङ. झ. समाहिताः. ३ क. ङ. च. झ. ञ. ट. शीतवृद्धतरा. ४ क.—ट. ज्योत्स्ना. ५ ङ—ट. नच.

बाष्पच्छन्नान्यरण्यानि चक्रवोधूमवन्ति च ॥ शोभन्तेऽभ्युदिते सूर्ये नदद्भिः कौञ्चसारसैः ॥ १६ ॥
खर्जूरपुष्पाकृतिभिः शिरोभिः पूर्णतण्डुलैः ॥ शोभन्ते किंचिदानम्राः शालयः कनकप्रभाः ॥१७॥
मयूखैरुपसर्पद्भिर्हिमनीहारसंवृतैः ॥ दूरमभ्युदितः सूर्यः शशाङ्क इव लक्ष्यते ॥ १८ ॥
अप्राह्यवीर्यैः पूर्वाह्णे मध्याह्ने स्पर्शतः सुखैः ॥ संरक्तैः किंचिदापाण्डुरातपैः शोभते क्षितौ ॥ १९ ॥
अवश्यायनिपातेन किंचित्प्रक्लिन्नशाद्वला ॥ वनानां शोभते भूमिर्निविष्टतरुणातपा ॥ २० ॥
स्पृशंस्तु विपुलं शीतमुदकं द्विरदः सुखम् ॥ अत्यन्ततृषितो वन्यः प्रतिसंहरते करम् ॥ २१ ॥
एते हि समुपासीना विहंगा जलचारिणः ॥ न विगाहन्ति सलिलमप्रगल्भा इवाहवम् ॥ २२ ॥
अवश्यायतमोनद्धा नीहारतमसा वृताः ॥ प्रसुप्ता इव लक्ष्यन्ते विपुष्पा वनराजयः ॥ २३ ॥
बाष्पसंछन्नसलिला रुतविज्ञेयसारसाः ॥ हिमार्द्रवालुकैस्तीरैः सरितो भान्ति साम्प्रतम् ॥ २४ ॥
तुषारपतनाच्चैव मृदुत्वाद्भास्करस्य च ॥ शैत्यादगाधग्राह्यमपि प्रायेण रसवज्जलम् ॥ २५ ॥

द्विगुणितकरुणस्य रामस्य व्यापारः सूचितः ॥ १५ ॥ बाष्पैः ऊष्मभिः छन्नानि यथा कूपोदकेभ्यो निर्गच्छन्तो धूमाकारा बाष्पाः । अनेन रामसमागमानन्तरभाव्याश्रमसमृद्धिरुच्यते । बाष्पशब्देन रामकूपोच्यते । वचेत्यादिना तपःसमृद्धिः । नदद्भिरिति वेदघोषः ॥ १६ ॥ खर्जूरपुष्पाकृतिभिः तद्वत्पिशङ्गवर्णैः । शिरोभिः कणिशैः । कनकप्रभाः परिपक्वनालप्रवस्त्वात्कनकवर्णाः । अनेन वृद्धा अपि जटाभरितशिरोभिस्त्वां प्रणमन्तीति द्योतितं ॥ १७ ॥ हिमनीहारैः शीतलनीहारैः संवृताः वैः [अनेन बहुकालं समागतोपि राक्षसप्रभाभिभूततेजस्को मृदुरिव किमर्थं वर्तत इत्यर्थः सूच्यते ॥ १८ ॥ पूर्वाह्णे अप्राह्यवीर्यैः अग्राह्यौष्ण्यैः चन्द्रिकायमाणो वर्तत इत्यर्थः । ईषदर्थे चा नञ् । अनुदरा कन्येतिवत् । तदुक्तं " तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः " इति । मध्याह्ने स्पर्शेन सुखैः सुखकरैः । किंचित्संरक्तैः किंचिदापाण्डुरैश्च । अनेनापि राक्षसाक्रमेष्वपराक्रमत्वमनुचितमिति गम्यते ॥ १९ ॥ अवश्यायः हिमं । शाद्वलः शष्पप्रचुरा भूमिः । " नडशादाद्वलच् " इति वलच् । अनेन राक्षसाभिभवकृतमुनिजनरोदनं रामकृपाप्रवृत्तिश्चोच्यते ॥ २० ॥ प्रतिसंहरते अतिदुःसहशैत्यवदिति भावः । अनेनेन्द्रस्य राज्यभोगाभिलाषिणोपि तद्भोगभीरुत्वं सूचितं ॥ २१ ॥ समुपासीनाः जलमिति शेषः । अनेन मुनीनां समाधिभङ्गो द्योत्यते । अप्रगल्भाः अधृष्टाः । आहवं युद्धं ॥ २२ ॥ अवश्यायः हिमसलिलं स एव तमः तेन नद्धाः बद्धाः । अनेन निश्चलत्वं लक्ष्यते । हिमच्छिन्ना हि लता निश्चलीभवन्ति । नीहारः अजलवर्षिमहाहिमं तदेव तमः तेनावृताः । अनेन प्रच्छादनपटाच्छन्नत्वं व्यज्यते । विपुष्पा इत्यनेन निमीलिताक्षत्वमुक्तं । अनेन वनवासिनां दैन्यातिशय उक्तः । अत्रोत्प्रेक्षालंकारः ॥२३॥ रुतं शब्दः । हिमार्द्रवालुकैः हिमसिक्तसिकतैः । अनेनापि ऋषिजनदैन्यमेव द्योत्यते ॥ २४ ॥ तुषारः हिमं । अगाधस्थमपि निर्मलशिलातलस्थमपि । रसवत् विषवत् । " रसो रागे विषे द्रव्ये शृङ्गारादौ

ती० प्रातःकालेकूपोदकादिष्विव वनादप्यूष्मा प्रादुर्भवतीत्यनुभवएवप्रमाणं ॥ १६ ॥ ति० खर्जूरपुष्पाकृतित्वं प्रलंबत्वेनपीतत्वेनच ॥ किंचिदानम्राः किंचिन्नम्राः ॥ १७ ॥ ति० नीहारः हिमातिशयरूपो वृक्षपर्वतादर्शनसंपादनक्षमः ॥ १८ ॥ ति० अप्राह्यवीर्यैः ईषद्ग्राह्यौष्ण्यैः ॥ स० अप्राह्यवीर्यैः अग्राह्यं हिमप्रसरात्स्वेनगृहीतुमशक्यंवीर्यंयस्यसः ॥ १९ ॥ ति० नावगाहन्ति नावगाहन्ते ॥ २२ ॥ ति० अवश्यायतमोभ्यां नद्धा रात्रौ । नीहारतमसावृताः प्रत्यूषे ॥ २३ ॥ स० रुतविज्ञेयसारसाः हिमाच्छादितत्वादितिभावः ॥ २४ ॥ ती० अगाधस्थमपि गंभीरस्थमपि । अगाधस्थमितिपाठे पर्वताग्रस्थमपीत्यर्थः ।

[पा०] १ ग. शष्पच्छन्नानि. २ क. ग. ङ.—ट. दालंबाः. ३ ख. आग्राह्यवीर्यः. ४ क. ङ—ञ. संसक्तः. ५ क. ख. छ. ज. झ. सैस्पृशन्त्विमलं. ६. स्पृशंस्तुदिमलं. ६ ख. च छ. ज. झ. अत्यर्थं. ७ घ. विहंगाः. ८ क ख घ. ङ. ज.—ट. नावगाहति. ९ क. ख. ट. वालुकास्तीरैः. १० ग. यान्ति. ११ ग. घ. दृगारस्थमपि. छ. ज. झ. दगाधस्थमपि. क. खदपात्रस्थमपि.

जराजर्झरितैः पद्मैः शीर्णकेसरकर्णिकैः ॥ नालशेषैर्हिमध्वस्तैर्न भान्ति कमलाकराः ॥ २६ ॥
अस्मिंस्तु पुरुषव्याघ्रः काले दुःखसमन्वितः ॥ तपश्चरति धर्मात्मा त्वद्भक्त्या भरतः पुरे ॥ २७ ॥
त्यक्त्वा राज्यं च मानं च भोगांश्च विविधान्बहून् ॥ तपस्वी नियताहारः शेते शीते महीतले ॥२८॥
सोपि वेलामिमां नूनमभिषेकार्थमुद्यतः ॥ वृतः प्रकृतिभिर्नित्यं प्रयाति सरयूनदीम् ॥ २९ ॥
अत्यन्तसुखसंवृद्धः सुकुमारः सुखोचितः ॥ कथं न्वपररात्रेषु सरयूमवगाहते ॥ ३० ॥
पद्मपत्रेक्षणो वीरः श्यामो निरुदरो महान् ॥ धर्मज्ञः सत्यवादी च ह्रीनिषेधो जितेन्द्रियः ॥३१॥
प्रियाभिभाषी मधुरो दीर्घबाहुररिंदमः ॥ संत्यज्य विविधान्भोगानार्यं सर्वात्मना श्रितः ॥ ३२ ॥
जितः स्वर्गस्तव भ्रात्रा भरतेन महात्मना ॥ वनस्थमपि तापस्ये यस्त्वामनुविधीयते ॥ ३३ ॥
न पित्र्यमनुवर्तन्ते मातृकं द्विपदा इति ॥ ख्यातो लोकप्रवादोऽयं भरतेनान्यथा कृतः ॥ ३४ ॥

पराक्रमे " इतिबाणः । शैत्यातिशयेन विषवदनुपादेयं भवतीत्यर्थः । एतेन राक्षसप्रकोपात् भवतश्चानुद्योगान्मुनिमनो दुःखितं भवतीति द्योत्यते ॥ २५ ॥ जरया चिरप्ररूढतया जर्झरितैः विवर्णैः । जीर्णकेसरकर्णिकैः शिथिलकिञ्जल्ककर्णिकैः । पद्मैर्न भान्ति । स्पष्टं व्यङ्ग्यं ॥ २६ ॥ एवमृषिपीडातिशयेपि रामस्य राक्षसवधानुद्यममुक्त्वा भरतस्य त्वदागमनव्यसनित्वात्तद्दर्शनकालोपि संनिहित इत्याशयेनाह—अस्मिन्नित्यादिना । दुःखसमन्वितः त्वद्विरहादिति शेषः ॥२७॥ राज्यं राजत्वं प्रभुत्वमित्यर्थः । मानं राजपुत्रोहमित्यभिमानं । भोगान् स्रक्चन्दनवनितादीन् । बहूनित्यपरित्याज्यत्वमुच्यते । तपस्वी तपस्विचिह्नजटादिमान् । नियताहारः फलमूलाद्यशनः । शीत इत्यनेनावरणराहित्यमुच्यते । महीतल इत्यनेन खट्वादिराहित्यं ॥ २८ ॥ वेलां प्राप्येति शेषः । प्रकृतिभिरिति " उपभोक्तुं व्यवस्यन्ति पौरा वै धर्मवत्सलं " इति वक्ष्यमाणरीत्या भरतभक्त्या त्वद्भक्त्या च भरतमनुसरन्तीभिरित्यर्थः ॥ २९ ॥ अत्यन्तसुखसंवृद्धः राज्ञा उपलालितत्वात् सुखसंवृद्धः त्वयापि लालितत्वादत्यन्तसुखसंवृद्धः । सुकुमारः भवतोपिदृष्टयवेक्षणासहसौकुमार्यः । सुखोचितः त्वया सह वस्तुं योग्यः नतु त्वद्वियोगार्हः । कथं नु आत्मौपम्येन मन्यते स्वस्य रामविरहाभावेन शैत्यानुभवः तस्य रामतापात् " उपतप्तोदका नद्यः " इत्युक्तरीत्या नदीनामपि रामविरहेणोष्णत्वाच्च शैत्यप्रसक्तिरेव नास्ति । अपररात्रेषु यथा नववैधव्याः स्त्रियः मनुष्यसंचारात्पूर्वमेव मनुष्यमुखमनवलोकयन्त्यो गच्छन्ति । तथाऽयमपि । कैकेयीपुत्रोयं । एतन्निमित्त एवानर्थ इति जना वक्ष्यन्तीति भीत्या अपररात्रेष्वेव गच्छति । सरयूमवगाहते निर्वेदातिशयेनातित्वरितगामिनीमपि सरयूं निर्भयोवगाहते । अवगाहते जलेनिमग्नश्चेन्मनुष्यादाव्यो भवति ॥३०॥ निरुदरः अतुन्दिलः । ह्रीनिषेधः ह्रिया लज्जया निषेधः अकृत्येभ्यो निवर्तनं यस्य सः ॥ ३१ ॥ मधुरः मधुरवाक् सुन्दरो वा । आर्यं ज्येष्ठं त्वां सर्वात्मना करणत्रयेण श्रितः ॥३२॥ स्वर्गः रामप्राप्त्यन्तरायभूतः स्वर्गः । जितः तिरस्कृतः । वनस्थमपि त्वांतापस्ये तापसकर्मविषये । अनुविधीयते अनुकरोति श्यन्नार्षः ॥ ३३ ॥ एवं प्रतिज्ञातराक्षसवधे विलंबः कृतः भरतक्लेशेन तत्रापि शीघ्रं गन्तव्यं । अतःकिमत्र कृत्यमिति सूचयित्वा सर्वस्यानर्थस्य मूलभूता कैकेयीत्याशयेनाह—न पित्र्यमित्यादिश्लोकद्वयेन । पित्र्यं पितृस्वभावं । द्वे पदे येषां ते द्विपदाः मनुष्याः । अन्यथाकृतः पितृस्वभाव

रसवत् रुचिकरं ॥ २५ ॥ स० निरुदरः अल्पाहारत्वात्कृशोदरः । निस्संदेहोवा । अभिधानंतूक्तं । ह्रियाःनिषेधोयस्यसः । राजपुत्रोऽहं कथंस्थण्डिलशायीभविष्यामीति ह्रीप्रतियोगिकनिषेधवानित्यर्थः ॥ ३१ ॥ ती० आर्यं ज्येष्ठंत्वां । वस्तुतस्तु सर्वात्मना श्रवणादिरूपनवविधभक्त्या । आर्यं ब्रह्मादीनामपिपूज्यंत्वामेवाश्रितः ॥ ३२ ॥ ति० अनुविधीयते अनुकरोति सेवत

[पा०] १ क. कर्करितैः. ग. मर्मरितैः. २ क. ङ. म. ट. पत्रैः. ख. पर्णैः. ३ क. घ. छ. ज. केसरपाण्डुभिः. ४ क. झ. ट. नालशेषाहिमध्वस्ताः. ५ क. ज. संयाति. छ. सयाति. ६ क—ट. सरयूंनदीं. ७ क—ट. सुकुमारोहिमार्दितः. ८ च. ज. चापररात्रेषु. ग. घ. ङ. झ. म. ट. अपररात्रेषु. छ. वापररात्रेषु. ९ क. ख. घ. च. छ. ज. म. पत्रेक्षणःश्रीमान्. ग. ङ. झ. ट. पत्रेक्षणःश्यामःश्रीमान्निरुदरो. १० ग. ङ. झ. ट. विविधान्सौख्यान्. ११ ख. नार्यः. १२ क. विधास्यते.

भर्ता दशरथो यस्याः साधुश्च भरतः सुतः ॥ कथं नु साम्बा कैकेयी तादृशी क्रूरशीलिनी ॥३५॥
इत्येवं लक्ष्मणे वाक्यं स्नेहाद्ब्रुवति धार्मिके ॥ परिवादं जनन्यास्तमसहन्राघवोऽब्रवीत् ॥ ३६ ॥
न तेऽम्बा मध्यमा तात गर्हितव्या कथंचन ॥ तामेवेक्ष्वाकुनाथस्य भरतस्य कथां कुरु ॥ ३७ ॥
निश्चिताऽपि हि मे बुद्धिर्वनवासे दृढव्रता ॥ भरतस्नेहसंतप्ता बालिशीक्रियते पुनः ॥ ३८ ॥
संस्मराम्यस्य वाक्यानि प्रियाणि मधुराणि च ॥ हृद्यान्यमृतकल्पानि मनःप्रह्लादनानि च ॥३९॥
कदान्वहं समेष्यामि भरतेन महात्मना ॥ शत्रुघ्नेन च वीरेण त्वया च रघुनन्दन ॥ ४० ॥
इत्येवं विलपंस्तत्र प्राप्य गोदावरीं नदीम् ॥ चक्रेऽभिषेकं काकुत्स्थः सानुजः सह सीतया ॥४१॥
तर्पयित्वाऽथ सलिलैस्ते पितॄन्दैवतानि च ॥ स्तुवन्ति स्मोदितं सूर्यं देवताश्च समाहिताः ॥ ४२ ॥

एवानुकृतो न मातृस्वभाव इत्यर्थः ॥ ३४ ॥ साधुशब्दस्य भर्तरि भरतेचान्वयः । तादृशीति पूर्वं कैकेय्युक्तस्मरणं ॥३५॥ इत्येवमिति । अनेन लक्ष्मणः प्रत्यूषे रामस्य ससीतस्य सरःस्नानादिक्लेशमालोक्य सुदुःखिततया कैकेयीं निन्दितुमुपक्रम्य झटितिनिन्दायां क्रियमाणायां रामः कुप्येदिति प्रथमं हेमन्तस्वभावं प्रस्तुत्य तत्प्रसङ्गेन भरतमुपक्षिप्य कैकेयीं निन्दतिस्मेति गम्यते । स्नेहात् रामस्नेहात् । परिवादं अपवादं । असहन् असहमानः ॥ ३६ ॥ मध्यमा सर्वदशरथपत्न्यपेक्षया । कथंचन प्रासङ्गिककथायामपि । मध्यमाम्बेति स्वाभिमानद्योतनाय । इक्ष्वाकुनाथस्य राजनि स्वर्गं गते अस्मासु च वनं गतेषु पूर्वतरास्मत्कुलमर्यादास्थापकस्य ॥ ३७ ॥ वनवासे निश्चिता दृढव्रतापि मे बुद्धिः । भरते स्नेहसंतप्ता सती बालिशीक्रियते बालबुद्धिरिव भवति । असंपूर्णेपि वनवासकाले तद्दर्शने संजातकुतूहला भवतीत्यर्थः ॥ ३८ ॥ स्नेहमेव प्रकाशयति—संस्मरामीत्यादिना । लोके कैश्चिदुक्तानि वाक्यानि प्रियाण्यपि कर्णकठोराणि भवन्तीति तद्व्युदासायाह—मधुराणीति । हृद्यानि हृदयादनपेतानि । अमृतकल्पानि शुभोदर्काणि । इदानीमपि मनःप्रह्लादनानि ॥ ३९ ॥ कदेति भरतसाहित्याभावेन विद्यमानाभ्यां सीतालक्ष्मणाभ्यामपि विरहितमात्मानं मन्यते । भरतस्नेहातिशयप्रकारोयम् ॥ ४० ॥ इत्येवं विलपन् भरतस्नेहकृतानि बहूनि वाक्यानि जल्पन्नित्यर्थः । अभिषेकं स्नानं ॥ ४१ ॥ तर्पयित्वेति । ऋषितर्पणस्याप्युपलक्षणं । स्तुवन्ति स्म उपतस्थिरे । " मित्रस्य—" इत्यादिमन्त्रैः । सीतात्वमन्त्रेण । देवताः संध्यादिदेव-

इत्यर्थः । धीङोदैवादिकस्वरूपं । स० जितः प्राप्तः ॥ ३३ ॥ स० असहन्निति पदव्यत्ययेन मत्प्रव्राजनं कैकेयीबुद्धिकृतं नभवतीतिसूच्यते । परस्मैपदतापिसंभवति । " सएवायंनागस्सहतिकलभेभ्यःपरिभवं " इत्यादिकौमुद्युक्तेः ॥ ३६ ॥ तनि० तामेव तस्मिन्पुरुषव्याघ्रइत्याद्युक्तां । इक्ष्वाकुनाथस्य " आस्फोटयन्तिपितरः " इत्यादिना इक्ष्वाकुभिःप्रार्थनीयस्य । भरतस्य पद्मपत्रेक्षणइत्याद्युक्तसद्गुणभरितस्य ॥ स० आमध्यमेतिच्छेदः । सुमध्यमेतितदर्थः । यद्वा यथातथाशब्दावध्याहार्यौ । तथाच यथाते मातामध्यमा सुमित्रा । मध्येमकारोयस्याइतियोगाद्वा । नगर्हितव्या तथेयमपिनगर्हितव्येत्यन्वयः ॥ ३७ ॥ तनि० वाक्यानि अर्थपरिपूर्णानि । प्रियाणि श्रवणप्रियाणि । मधुराणि " माधुर्यंसुकुमारता " इत्याद्युक्तगुणवन्ति । एवं शब्दधर्मानुक्त्वाऽर्थधर्मानाह—हृद्यानीति । हृद्यानि हृदयाह्लादजननानि । अमृतकल्पानि शर्करामध्वादिवदत्यन्तभोग्यानि । मनःप्रह्लादनानि विजातीयप्रत्ययमूलतया आनन्दैकजनकानि ॥ यद्वा हृद्यानि हृदयंगमानि । " बन्धनेचर्षौ " इति यत्प्रत्ययः । वश्यमन्त्रवत्परहृदयबन्धनानीतियावत् ॥ ३९ ॥ तनि० रघुनन्दन शत्रुघ्नेन त्वयाचसहितेनभरतेन कदासमेष्यामि संगतोभविष्यामीतियोजनीयं । चकारेण सीतासमुच्चयः । यावदनुरक्तमेलनेपि एकानुरक्तविरहे सर्वानुरक्तविरहइवार्तिर्जायते । तस्यैकस्यापिमेलने अपूर्वसर्वसुहृज्जनमेलनइवातिहर्षोजायतइति त्वयाचेति लक्ष्मणमेलनस्यसिद्धत्वेप्यसिद्धवत्कथनं भरतशत्रुघ्नविषयप्रेमातिशयेनेतिभावः ॥ ४० ॥ इतिषोडशस्सर्गः ॥ १६ ॥

[पा०] १ क—ट. क्रूरदर्शिनी. २ ङ. छ.—ट. द्रुदति. ३ ज. तेसा. ४ ग. वत्स. ५ घ. गर्हितास्यात्कथंचन. झ. गर्हितव्याकदाचन. ६ ङ. झ. ट. निश्चितैव. ख. सुनिश्चिता. ७ ग. ङ.—ट. कदाह्यहं. कदाप्यहं. ८ ग. तर्पयित्वातु. तर्पयित्वाथवाऽत्रायंसपितॄन्. ९ क. ग. ङ. च. ज. झ. ट. सलिलैस्तैः. १० ग. न्देवताअपि. ख. झ. दैवतानपि. ११ ङ. छ. घ. ट. दैवतांश्च. १२ क. ख. ङ. च. छ. ञ. ट. तथानघाः.

कृताभिषेकः स रराज रामः सीताद्वितीयः सह लक्ष्मणेन ॥
कृताभिषेको गिरिराजपुत्र्या रुद्रः सनन्दी भगवानिवेशः ॥ ४३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे षोडशः सर्गः ॥ १६ ॥

सप्तदशः सर्गः ॥ १७ ॥

गोदावरीतीरवासीतालक्ष्मणाभ्यांसहपर्णशालामेलकर्षिभिःसहसंभाषमाणंराममेत्यशूर्पणखयातत्त्वप्रश्नः ॥ १ ॥ रामेण स्वतत्त्वकथनपूर्वकंतांप्रतितत्त्वादिप्रश्नः ॥ २ ॥ तयारामंप्रतिस्वतत्त्वकथनेनस्वस्यभार्यांभावेनस्वीकारप्रार्थनापूर्वंकंसीतालक्ष्मणयोर्भक्षणप्रतिज्ञानम् ॥ ३ ॥

कृताभिषेको रामस्तु सीता सौमित्रिरेव च ॥ तस्माद्गोदावरीतीरात्ततो जग्मुः स्वमाश्रमम् ॥ १ ॥
आश्रमं तमुपागम्य राघवः सहलक्ष्मणः ॥ कृत्वा पौर्वाह्णिकं कर्म पर्णशालामुपागमत् ॥ २ ॥
उवास सुखितस्तत्र पूज्यमानो महर्षिभिः ॥ लक्ष्मणेन सह भ्रात्रा चकार विविधाः कथाः ॥ ३ ॥
स रामः पर्णशालायामासीनः सह सीतया ॥ विरराज महाबाहुश्चित्रया चन्द्रमा इव ॥ ४ ॥
तथाऽऽसीनस्य रामस्य कथासंसक्तचेतसः ॥ तं देशं राक्षसी काचिदाजगाम यदृच्छया ॥ ५ ॥
सा तु शूर्पणखा नाम दशग्रीवस्य रक्षसः ॥ भगिनी रामंमासाद्य ददर्श त्रिदशोपमम् ॥ ६ ॥
सिंहोरस्कं महाबाहुं पद्मपत्रनिभेक्षणम् ॥ आजानुबाहुं दीप्तास्यमतीव प्रियदर्शनम् ॥ ७ ॥
गजविक्रान्तगमनं जटामण्डलधारिणम् ॥ सुकुमारं महासत्त्वं पार्थिवव्यञ्जनान्वितम् ॥ ८ ॥

ताः ॥ ४२ ॥ रुद्रः सनन्दीत्युपमया दुष्प्रधर्षणत्वमुच्यते । रुद्रः सविष्णुर्भगवानिवेश इति न क्वचिदपि कोशे दृश्यते । कश्चिद्दृश्यत इत्याह तदा अभूतोपमेति युक्तमिति ज्ञेयं ॥ ४३ ॥ इतिश्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षोडशः सर्गः ॥ १६ ॥

एवं रामतपोविशेषद्योतनाय हेमन्तं प्रथममप्रवृत्तमुपवर्ण्य ततस्त्रिषु संवत्सरेष्वतीतेषु कदाचिच्चैत्रमासे प्रसक्तं भाविसकलराक्षसवधनिधानत्वेन शूर्पणखावृत्तान्तमुपक्षिपति सप्तदशे—कृताभिषेक इत्यादि । ततः अभिषेकान्तरभाविकृत्यानन्तरं । आश्रमं तपोवनं । " तपोवने मठे ब्रह्मचर्यादावाश्रमोस्त्रियां " इति वाणः ॥ १ ॥ पूर्वाह्णे भवं पौर्वाह्णिकं ब्रह्मयज्ञादि नित्यमिकृत्यं । अनुदितहोमत्वेन तस्य सूर्योपस्थानानन्तरभावित्वाभावात् । पर्णशालामुपागमत् आश्रमे पर्णशालातो बहिरेव कर्तव्यमनुष्ठाय वासस्थानमगमदित्यर्थः ॥ २ ॥ कथाः पुराणेतिहासकथाः । चकार उवाचेत्यर्थः । तथा चोक्तं धातुवृत्तौ " करोतिरभूतप्रादुर्भावे वर्तते अश्मानमितः कुरु पादं जले कुरु नः प्रथमः शकलः परापतेत् स्मरुः कार्यः चोरंकारमाक्रोशतीत्यादौ अवस्थापननिर्मलीकरणोपादानोच्चारणादौ प्रयोगात् । चौरंकारमित्यत्र चोरशब्दमुच्चार्येत्यर्थः । नह्यत्र चोरः क्रियते । अर्थनिर्देशस्त्वपलक्षणं " इति ॥ ३ ॥ चित्रया चित्रानक्षत्रेण । चित्रापौर्णमास्यामितिभावः ॥ ४ ॥ रामस्यासीनस्य रामे आसीने ॥ ५ ॥ राक्षसीमृषिर्विशेषयति—सेति । राममासाद्य ददर्श रामं दृष्ट्वाजाससादेत्यर्थः । समानकर्तृकत्वमात्रेल्यप् ॥ ६ ॥ सिंहोरस्कं सिंहशब्दः श्रेष्ठवाची विशालोरस्कमित्यर्थः ॥ ७ ॥ महासत्त्वं महाबलं । पार्थिवव्यञ्जनानि रा-

---

ति० पर्णशालां बाह्यां ॥ २ ॥

[पा०] १ क. ख. ग. ङ. च. ज.—ट. कृताभिषेकस्तगराज. २ क. ग. छ. ज. ञ. सर्वे. ३ क. ग. च. छ, ज. ञ. मुपाविशत्. ४ ख. सहितः. ५ इदमर्धं क. ग. ङ.—ट. पुत्रकेषु. विरराजमहाबाहुरित्यर्धांत्परतः. तथासीनस्येत्यर्धांत्पूर्वं दृश्यते. ६ क. सहचन्द्रमाः. ७ ङ. ट. तदा. ८ घ. कामात्. ९ क.—ञ. छ. ज. शूर्पनखी. १० क. मागम्य. ११ ङ. झ, ट. दीप्तास्यंच. १२ ङ. झ. ट. पत्रायतेक्षणं. १३ इदमर्धं ङ. झ. ट. पाठेषुनदृश्यते.

राममिन्दीवरश्यामं कन्दर्पसदृशप्रभम् ॥ बभूवेन्द्रोपमं दृष्ट्वा राक्षसी काममोहिता ॥ ९ ॥
सुमुखं दुर्मुखी रामं वृत्तमध्यं महोदरी ॥ विशालाक्षं विरूपाक्षी सुकेशं ताम्रमूर्धजा ॥ १० ॥
प्रीतिरूपं विरूपा सा सुस्वरं भैरवस्वरा ॥ तरुणं दारुणा वृद्धा दक्षिणं वामभाषिणी ॥ ११ ॥
न्यायवृत्तं सुदुर्वृत्ता प्रियमप्रियदर्शना ॥ शरीरजसमाविष्टा राक्षसी वाक्यमब्रवीत् ॥ १२ ॥
जटी तापसरूपेण सभार्यः शरचापधृत् ॥ आगतस्त्वमिमं देशं कथं राक्षससेवितम् ॥
किमागमनकृत्यं ते तत्त्वमाख्यातुमर्हसि ॥ १३ ॥
एवमुक्तस्तु राक्षस्या शूर्पणख्या परंतपः ॥ ऋजुबुद्धितया सर्वमाख्यातुमुपचक्रमे ॥ १४ ॥
अनृतं न हि रामस्य कदाचिदपि संमतम् ॥ विशेषेणाश्रमस्थस्य समीपे स्त्रीजनस्य च ॥ १५ ॥
आसीद्दशरथो नाम राजा त्रिदशविक्रमः ॥ तस्याहमग्रजः पुत्रो रामो नाम जनैः श्रुतः ॥ १६ ॥
भ्राताऽयं लक्ष्मणो नाम यवीयान्मामनुव्रतः ॥ इयं भार्या च वैदेही मम सीतेति विश्रुता ॥ १७ ॥
नियोगात्तु नरेन्द्रस्य पितुर्मातुश्च यन्त्रितः ॥ धर्मार्थं धर्मकाङ्क्षी च वनं वस्तुमिहागतः ॥ १८ ॥
त्वां तु वेदितुमिच्छामि कन्यतां कोऽसि कस्य वा ॥ १९ ॥
न हि तावन्मनोज्ञाङ्गी राक्षसी प्रतिभासि मे ॥ ब्रूहि वा किंनिमित्तं त्वमागता ब्रूहि तत्त्वतः ॥ २० ॥
साऽब्रवीद्वचनं श्रुत्वा राक्षसी मदनार्दिता ॥ शृणुतां राम वक्ष्यामि तत्त्वार्थं वचनं मम ॥ २१ ॥

श्लक्ष्णानि । कामकृतमोहहेतवो विशेषणानि ॥ ८—९ ॥ तस्मात्तस्मिन्मनःप्रवृत्तिं मुनिः परिहसति—सुमुखमित्यादिना । वृत्तमध्यं तनुमध्यं । विरूपाक्षी विकटनेत्री । सुकेशं नीलकेशं ॥ १० ॥ प्रीतिरूपं प्रियरूपं । भैरवस्वरा इति प्रीतिः । विरूपा विकटरूपा । सुस्वरं स्निग्धगम्भीरस्वरं तरुणं युवानं सौम्यं चेत्यर्थः । दारुणेति प्रतियोगिनिर्देशात् दक्षिणं ऋजुभाषिणं । वामभाषिणी वक्रभाषिणी ॥ ११ ॥ न्यायवृत्तं उचिताचारं । शरीरजो मन्मथः ॥ १२ ॥ तापसरूपेण जटी कामुकरूपेण सभार्यः क्षत्रियरूपेण शरचापधृत् । राक्षससेवितं एतद्रूपासद्भिः सेवितमित्यर्थः ॥ १३ ॥ शूर्पनख्येति छान्दसौ दीर्घणत्वाभावौ । ऋजुबुद्धितया कुटिलेष्वप्यकुटिलबुद्धितया ॥ १४ ॥ आश्रमस्थस्य तपोवनस्थस्य ॥ १५—१६ ॥ यवीयान् कनिष्ठः । अनुव्रतः अनुसरणं व्रतं यस्य सः । वैदेही विदेहराजपुत्री ॥ १७ ॥ मातुः कैकेय्याः । यन्त्रितः नियतः चोदित इति यावत् । धर्मकाङ्क्षी पितृवाक्यपालनरूपधर्मकाङ्क्षी । धर्मार्थं तपोरूपधर्मसिद्ध्यर्थं । वनंवस्तुं यन्त्रितः सन्निहागत इत्यन्वयः ॥ १८ ॥ कासीति नामजातिप्रश्नः । कस्येति पित्रादिविषयः प्रश्नः ॥ १९ ॥ तावत् कात्स्न्र्येन । मनोज्ञाङ्गी न भवसि मां प्रति राक्षसीति प्रतिभासि । यद्वा राक्षससेवित इति तद्वचनात् राक्षसीत्व मित्याशङ्क्य परिहरति । मनोज्ञाङ्गि त्वं राक्षसीति न प्रतिभासीति रामदर्शनकाले तथारूपं कृतवती कामरूपत्वात् । दुर्मुखीत्यादिकं वास्तवमिप्रायेण मुनिनोक्तमिति ज्ञेयं ॥ २० ॥ तत्त्वार्थं परमार्थं

ति० सुमुखमित्यादि । विषमालङ्कारोऽत्र ॥ १० ॥ ति० शूर्पनख्येतियौगिकं ॥ १४ ॥ शि० त्रिदशेषुदेवेषु विक्रमः प्रसिद्धः पराक्रमोयस्यसः ॥ १६ ॥ ति० कस्यत्वं कन्येतिशेषः । कासि किंनामासि । कस्य वंशजेतिशेषः ॥ १९ ॥ ति० राक्षसी एवंमनोज्ञाङ्गत्वस्य कामरूपत्वंविनाऽसंभवात् । कामरूपत्वंच राक्षसत्वंविनानेतिभावः ॥ २० ॥ ति० मदनार्दिता रामदर्शनादितिशेषः ॥ २१ ॥

[पा०] १ क. च. छ. ज. सदृशंप्रभुं. २ क. ङ. च. छ. झ. ञ. ट. प्रियरूपं. ३ ख —ट. राममब्रवीत्. ४ ङ. झ. ट. वेषेण. ५ घ. चापभृत्. ख. च.—ट. चापभृक्. ६ क. ग. च. छ. ज. ञ. कार्यं. ७ क. ख. च. ज. ञ. विशेषादाश्रम. ८ क. झ. ट. कस्यत्वं. ९ क. काच. १० ग. छ. कस्यच. ११ ङ. च. झ. ट. त्वंहि. १२ क. घ. प्रतिभाति. १३ च. छ. ज. ह्येव. १४ घ. ञ. मदनान्विता. १५ क. छ. ट. तत्त्वार्थंवक्ष्यामि. च. ज. ञ. वक्ष्यामितत्त्वार्थंवचनं.

अहं [1]शूर्पणखा नाम राक्षसी कामरूपिणी ॥ अरण्यं विचरामीदमेका [2]सर्वभयंकरा ॥ २२ ॥
रावणो नाम मे भ्राता [3]वैश्रवणयात्राक्षसेश्वरः ॥ [4]वीरो विश्रवसः पुत्रो यदि ते श्रोत्रमागतः ॥ २३ ॥
[5]बृद्धनिद्रश्च सदा कुम्भकर्णो महाबलः ॥ विभीषणस्तु धर्मात्मा न तु राक्षसचेष्टितः ॥ २४ ॥
प्रख्यातवीर्यौ च रणे भ्रातरौ खरदूषणौ ॥ तानहं समतिक्रान्ता राम त्वा पूर्वदर्शनात् ॥
समुपेताऽस्मि भावेन भर्तारं पुरुषोत्तमम् ॥ २५ ॥
अहं प्रभावसंपन्ना स्वच्छन्दबलगामिनी ॥ चिराय भव [6]मे भर्ता सीतया किं करिष्यसि ॥ २६
विकृता च विरूपा च न चेयं सदृशी तव ॥ अहमेवानुरूपा ते [7]भार्यारूपेण पश्य माम् ॥ २७ ॥
[8]इमां विरूपामसतीं [9]करालां निर्णतोदरीम् ॥ अनेन [10]ते सह भ्रात्रा भक्षयिष्यामि मानुषीम् ॥२८॥
ततः पर्वतशृङ्गाणि वनानि विविधानि च ॥ पश्यन्सह मया [11]कान्त दण्डकान्विचरिष्यसि ॥ २९ ॥

॥ २१ ॥ कामरूपिणी इतोप्यधिकरूपधारणेसमर्था । सर्वभयंकरेति वक्ष्यमाणरतिप्रतिबन्धकनिवारणक्षमतोक्ता ॥ १२ ॥ कासीति प्रश्नस्योत्तरमुक्त्वा कस्येत्यस्य प्रश्नस्योत्तरमाह—रावणइत्यादिना ॥ २३ ॥ कुम्भकर्णश्च मे भ्रातेत्यन्वयः । विभीषणस्तु तस्य विशेषोस्ति सोपि मे भ्रातेत्यर्थः । तं विशेषमाह—धर्मात्मेति । धर्मात्मा धर्मस्वभावः । राक्षसचेष्टितो न जन्मना राक्षसोपि न राक्षसव्यापारइत्यर्थः ॥ २४ ॥ एतदेशागमने निमित्तमाह—प्रख्यातेति । खरदूषणौ जनस्थानस्थाविशेषः । एवं भ्रातृकथनेन रामस्य स्वपरिग्रहे भीतिर्माभूदित्याह—तानहमिति । अतिक्रान्ता अतिक्रम्य वर्तमाना स्वच्छन्दचारिणीत्यर्थः । त्वा त्वां । पूर्वदर्शनात् प्रथमदर्शनमारभ्य । अपूर्वदर्शनादिति वा छेदः । देवदानवमर्त्येष्वितः पूर्वमदृष्टत्वद्रूपदर्शनाद्धेतोः । भावेन हृदयेन रत्याख्यभावेन वा । भर्तारं समुपेतास्मि तत्र हेतुः—पुरुषोत्तममिति ॥ २५ ॥ सीतायां विद्यमानायां किमत्रयेत्यत्राह—अहमिति । स्वच्छन्दबलगामिनी स्वेच्छानुगुणबलगमना च ॥ २६ ॥ सीतां निन्दति—विकृतेति । विकृतेति विषमशरीरत्वमुच्यते ॥२७॥ करालां विकृतां "करालो दन्तुरे तुङ्गे विशाले विकृतेपि च" इति वैजयन्ती । निर्णतं निरतिशयेन नतं निम्नमुदरं यस्याः सा निर्ण-

ति० यदितेश्रोत्रमागतः प्रायःश्रुतएवभविष्यतीतिभावः ॥ २३ ॥ ति० खरदूषणौ विभीषणवन्निरस्तराक्षसस्वभावत्वान्नोक्तः । रावणादीन्दीर्घेणसमतिक्रान्ता ततोधिका । अतस्तान्समतिक्रान्ता त्वदभिसरणेतन्निमित्तभयरहितेत्यावृत्त्यायोज्यं ॥ २५ ॥ ति० प्रभावसंपन्ना प्रकृष्टेनभावेनश्रृङ्गारेणसंपन्ना । यद्वा प्रभावेण शक्त्यतिशयेनसंपन्ना ॥ २६ ॥ ति० आत्मनोदेवयोनिभेदत्वेनानभिमतग्रहणसामर्थ्याभिमानेनस्वस्मिन्नामप्रवृत्तयेसीतादूषणमाह—विकृतेति । विकृता मायास्वरूपतयापरिणामाख्यविकारवती । विरूपा नानारूपोन्मादकार्यकारिणी । अतएव शुद्धसुखस्वभावस्यतव नसदृशीतिपरमार्थः । अहमेवानुरूपा उभयोरपिमायाधिष्ठातृतुल्यादित्यर्थः ॥ २७ ॥ ति० असतीं स्वपुरुषस्यदुस्सहानेकसंसारदत्वात् । कार्यरूपेणसतींच । त्वयासहप्रौढ्यानिर्मनुष्येवनेआगमनाच्चासतीं । सतीहिवृद्धानांश्रुश्रूषादीनांसविधएव पतिर्बलरक्षणायतिष्ठेदित्याशयः । वी० निर्णतोदरीं लंबोदरीं । स० मानुषींमितिभक्ष्यत्वेहेतुः ॥ शि० ननुसीतायाःकागतिरित्यत्राह—इमामिति । विरूपां मदीप्सितरूपविहीनां । असतीं सूक्ष्मशरीरेणाविद्यमानामिव । अतएव करालां पतनमौत्सुक्यादिकां । निर्णतोदरीं अतुन्दिलां ॥ २८ ॥

[पा०] १ क. ख. ग. च. छ. ज. ञ. शूर्पनखी. २ घ. मेकाकीतुभयंकरा. ख. च. मेकाकीतुभयंकरी. ३ रावणोनामेलेकश्लोकस्यस्थाने ङ. झ. ट. पाठेषु. रावणोनाममेभ्रातायदितेश्रोत्रमागतइत्यर्धमेवदृश्यते. ४ क. ख. ग. घ. छ. ज. ञ. राक्षसोराक्षसाधिपः. ५ घ. छ. ज. सोयं. क. ख. च. योयं. ञ. साक्षाद्विश्रवसः. ६ अस्मिञ्श्लोके पूर्वोत्तरार्धयोः पौर्वापर्यं ङ. ट. पाठयोर्दृश्यते. ७ क. ज. छ. ज. ञ. निद्रस्तु. ८ च. घ. विभीषणश्च. ९ ङ. झ. भर्तामे. १० छ. ज. ञ. भ्रातृरूपेण. ११ ङ. इमामरूपां. १२ ग. च. छ. ज. ञ. करालीं. १३ क. ख. ग. ङ. ट. सहते. १४ क. ख. ग. ङ. झ. ट. कामी.

इत्येवमुक्तः काकुत्स्थः प्रहस्य मदिरेक्षणाम् ॥ इदं वचनमारेभे वक्तुं वाक्यविशारदः ॥ ३० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे सप्तदशः सर्गः ॥ १७ ॥

अष्टादशः सर्गः ॥ १८ ॥

रामेणशूर्पणखांप्रतिस्वेनतदपरिग्रहेहेतूक्तिपूर्वकंसोपहासंलक्ष्मणवरणचोदना ॥ १ ॥ लक्ष्मणेनसयुक्त्युपन्यासंचोदितया शूर्पणखयापुनारामंप्रतिस्वपरिग्रहप्रार्थनापूर्वकंसीताभक्षणोद्यमः ॥ २ ॥ रामचोदनयालक्ष्मणेनछिन्नकर्णनासयाशूर्पणखया खरसमीपगमनम् ॥ ३ ॥

ततः शूर्पणखां रामः कामपाशावपाशिताम् ॥ स्वच्छया श्लक्ष्णया वाचा स्मितपूर्वमथाब्रवीत् ॥ १ ॥
कृतदारोस्मि भवति भार्येयं दयिता मम ॥ त्वद्विधानां तु नारीणां सुदुःखा ससपत्नता ॥ २ ॥
अनुजस्त्वेष मे भ्राता शीलवान्प्रियदर्शनः ॥ श्रीमानकृतदारश्च लक्ष्मणो नाम वीर्यवान् ॥ ३ ॥
अपूर्वी भार्यया चार्थी तरुणः प्रियदर्शनः ॥ अनुरूपश्च ते भर्ता रूपस्यास्य भविष्यति ॥ ४ ॥

तोदरी ॥ २८—२९ ॥ तां मदिरेक्षणां मदयति दर्पयतीति मदिरं तादृशमीक्षणं यस्यास्तां । मददर्पशोभनयोरित्यस्माद्धातोः " इषिमदि—" इत्यादिना किरच् प्रत्ययः । अत्रसार्धत्रिंशच्छ्लोकाः ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तदशः सर्गः ॥ १७ ॥

अथ खरक्रोधहेतुः शूर्पणखाविरूपकरणमष्टादशे । ततः तत्र पर्णशालायां । अथ शूर्पणखावचनानन्तरं । स्वच्छया स्पष्टार्थया श्लक्ष्णया मृद्व्या । काम एव पाशः तेनावपाशितां संजातपाशां बद्धामित्यर्थः ॥ १ ॥ कृतदारः स्वीकृतभार्यः । करोतेरनेकार्थत्वात् । अस्मीत्यहमित्यस्मिन्नर्थे निपातः । भवतीति शूर्पणखायाः संबोधनं । इष्टत्वेन त्यक्तुमनर्हेत्याह—दयितेति । तर्हि " तुल्योनेकत्रदक्षिणः " इत्युक्तदक्षिणो भवेत्याशङ्क्याह—त्वद्विधानामिति । सुदुःखा सुतरां दुःखकरी । सपत्न्या सहिता ससपत्नी तस्या भावः ससपत्नता । "त्वतलोर्गुणवचनस्य " इति पुंवद्भावः । गुणत्वं चास्य न शुक्लतादिवत् किंतु कठिनत्वमित्यादिवद्द्रव्यत्वव्यावृत्तिः । अतः सपत्नीसाहित्यरूपगुणवचनत्वात्पुंवद्भावः ॥ २ ॥ अकृतदारः असहकृतदार इत्यर्थः । " न वितथापरिहासकथास्वपि " इत्युक्तेः "अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन " इत्युक्तेश्चाकृतदार इति नार्थः ॥ ३ ॥ पूर्वं भार्यासुखं ज्ञातमनेन पूर्वी " पूर्वादिनिः " इति इनिः । न पूर्वी

टीका० मदिरेक्षणां रक्तलोचनां ॥ ३० ॥ इतिसप्तदशस्सर्गः ॥ १७ ॥

ति० स्वेच्छयेतिपाठे परिहासविनोदेनेत्यर्थः । अतएवस्मितपूर्वमितितीर्थः । स्वच्छन्दामितिपाठोयुक्तः । स्वेच्छाचारिणीमित्यर्थः । स० स्वेच्छया स्वपतित्वापेक्षया ॥ १ ॥ ति० कृतदारः ऊढभार्यः । इयंभार्यामम दयिता संनिहिताचेतिशेषः । ससपत्नता सशत्रुता । पत्युर्भार्यान्तरंहिभार्यान्तरस्यशत्रुभूतंभवति । सपत्नीसाहित्यमितिवार्थः । अगुणवचनत्वेप्यार्षः पुंवद्भावः । सपत्नीशब्दश्चसपत्नप्रकृतिकोपिभर्तुर्द्वितीयभार्यायामेवरूढइतिध्येयं । शि० नन्वियंतुमयाभक्ष्यतइत्यतआह—दयितेति । अतिप्रिया । एतेन न भक्षणीयेतिसूचितं । ननुमयासहइयमपितिष्ठत्वित्यतआह—त्वद्विधानामिति ॥ २ ॥ ती० " गुरुणापि समंहास्यंकर्तव्यंकुटिलंविना " इतिन्यायेन भ्रातृविषयमपिपरिहासंप्रयोजयंस्रामोलक्ष्मणविषयत्वेनप्रवृत्त्याभासप्रत्यायकैस्तात्पर्येण निवृत्तिप्रतिपादकैश्श्लिष्टशब्दैरुत्तरमनुभाषते—अनुजइत्यादिना । ति० अकृतदारः अकृतपरदारपरिग्रहइति धातूनामनेकार्थत्वादसंनिहितदारइतिवाहृदिस्थोर्थः । नहिरामोमिथ्याब्रूते । परिहासादौमिथ्याभाषणे न दोषइत्यनेनसूच्यतइतिवयं ॥ ३ ॥ शि० अकृतदारः न कृताः वनेस्वीकृता दारायेनसः । अतएवापूर्वी पूर्वभार्याभाववान् अतएवभार्ययाऽर्थीप्रयोजनवांश्च

[पा०] १ अस्यार्धस्यवैपरीत्येनैकमर्धं ततोऽधिकमर्धद्वयंच क. ख. पाठयोर्दृश्यते. इत्येवमुक्त्वाकाकुत्स्थंप्रहस्यमदिरेक्षणा । देवीलक्ष्मणमध्येतुबभूवावस्थितापुनः । संप्रहासनिमित्तंतुरामःशूर्पणखांततःइति. २ क. ग. छ. ज. ञ. मदिरेक्षणः. ३ क. ग. ङ. च. ज.—ट. तांतु. ४ क. शूर्पनखीं. ५ क. ख. ङ.—ट. स्वेच्छया. ६ च. ज. ट. सुदुःखाच. ख. सुदुःखाहि. ७ ख. च. ज. अपूर्वभार्यया. घ. अपूर्वभावोभार्यार्थी. च. शीलवान्प्रिय. ८ घ. रूपस्यच.

एनं भज विशालाक्षि भर्तारं भ्रातरं मम ॥ असपत्ना वरारोहे मेरुमर्कप्रभा यथा ॥ ५ ॥
इति रामेण सा प्रोक्ता राक्षसी काममोहिता ॥ विसृज्य रामं सहसा ततो लक्ष्मणमब्रवीत् ॥ ६ ॥
अस्य रूपस्य ते युक्ता भार्याऽहं वरवर्णिनी ॥ मया सह सुखं सर्वान्दण्डकान्विचरिष्यसि ॥ ७ ॥
एवमुक्तस्तु सौमित्री राक्षसा वाक्यकोविदः ॥ ततः शूर्पनखीं स्मित्वा लक्ष्मणो युक्तमब्रवीत् ॥८॥
कथं दासस्य मे दासी भार्या भवितुमिच्छसि ॥ सोहमार्येण परवान्भ्रात्रा कमलवर्णिनि ॥ ९ ॥
समृद्धार्थस्य सिद्धार्थी मुदितामलवर्णिनी ॥ आर्यस्य त्वं विशालाक्षि भार्या भव यवीयसी ॥ १० ॥
एनां विरूपामसतीं करालां निर्णतोदरीम् ॥ भार्यां वृद्धां परित्यज्य त्वामेवैष भजिष्यति ॥ ११ ॥
को हि रूपमिदं श्रेष्ठं संत्यज्य वरवर्णिनि ॥ मानुषीषु वरारोहे कुर्याद्भावं विचक्षणः ॥ १२ ॥
इति सा लक्ष्मणेनोक्ता करला निर्णतोदरी ॥ मन्यते तद्वचस्तथ्यं परिहासाविचक्षणा ॥ १३ ॥
सा रामं पर्णशालायामुपविष्टं परंतपम् ॥ सीतया सह दुर्धर्षमब्रवीत्काममोहिता ॥ १४ ॥

अपूर्वी चिरादज्ञातभार्यासुख इत्यर्थः । अतएव भार्यया अर्थी प्रयोजनवान् । इदं यचनद्वयं स्वभार्याविषयकान्तराशयेन प्रयुक्तं । अनुरूपश्च ते भर्तेत्यत्र अभर्तेति च्छेदेनान्तराशयः । रूपस्यास्य कुत्सितस्य रूपस्येत्यर्थः ॥ ४ ॥ विशालाक्षी वर्तुलतया विशालाक्षीत्वमपि गम्यते । अर्कप्रभा मेरुं यथा भजति तथेत्यन्वयः । अर्कप्रभा मेरुं प्राप्ता यथा निवर्तते तथेत्यर्थः । एवं रामो दयालुतया स्वस्मिन्काममोहेन प्राप्ताया: स्त्रियाः सहसा धिक्कारेण दुःखं मा भूदिति परिहासकथां प्रवर्तयामास ॥५—७॥ शूर्प इव नखो यस्याः सा शूर्पनखी संज्ञाया अविवक्षितत्वात् "स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्" इति ङीप् । असंज्ञात्वादेव "पूर्वपदात्संज्ञायां—" इति णत्वाभावः ॥ ८॥ दासस्य मे भार्या भूत्वा कथं दासी भवितुमिच्छसि । कस्य दासस्त्वमित्यत्राह—सोहमिति । अहमार्येण ज्येष्ठेनभ्रात्रा । परवान् नाथवान् । "दूरान्तालोत्तमाःपराः" इत्यमरः । तस्य दासोहमित्यर्थः । अकमलवर्णिनीत्यपि च्छेदः ॥ ९ ॥ सिद्धार्थो सिद्धनिवृत्तिः । "अर्थोभिधेयरैवस्तुप्रयोजननिवृत्तिषु" इत्यमरः । अमुदिता मलवर्णिनीत्यपि । यवीयसी कनिष्ठा हीना च ॥ १० ॥ सीतायां विद्यमानायां कथं मां परिग्रहीष्यसीत्यत्राह—एनामिति । एतादृशावस्थां त्वामेव परित्यज्य सीतां भजिष्यतीति हार्दोर्थः । असतीं अप्रशस्तामिति सौतापक्षे । अतो नपुरः स्फूर्तिकदोषः । करालां दन्तुरां । निर्णतं निरतिशयं उदरं यस्यास्तां ॥ ११ ॥ कोहीति । विपरीतलक्षणा ॥ १२ ॥ परिहासाविचक्षणा परिहासानभिज्ञा ॥ १३ ॥ पर्णशालायामित्यनेन लक्ष्मणो बहिरेव स्थित इति गम्यते

यदिभविष्यतितदासतींभविष्यति । भविष्यतीत्यावर्तते ॥ ती० अपूर्वभार्ययाचार्थीतिपाठेअयमर्थः । अपूर्वा नूतना या भार्या तामेवार्थयतीति साच लभेवभविष्यसीतिपरिहासानुकूलप्रातीतिकोर्थः । अन्तराशयस्तु अकृतदारः अकृतपरदारपरिग्रहः असंनिहितभार्योवा । अपूर्वभार्यया प्रथमभार्ययैवार्थी चरितार्थः । शीलवान् एकपत्नीव्रतशीलः । प्रियदर्शनः प्रियेषुमित्रेषुदर्शनंदृष्टिर्यस्य सतथोक्तः । तेऽभर्तेतिछेदः । अनुरूपः स्वभार्यानुरूपइतियावत् । अस्यरूपस्य योग्यइतिशेषः । भविष्यति काकादरेणनभविष्यतीत्यर्थः । यद्वा अस्यरूपस्यानुरूपोभविष्यतीतिकाकुः ॥ ४ ॥ ती० भर्तारं महासत्कर्मणाऽस्तत्योषकमित्यन्तराशयः ॥ ५ ॥ स० सहसेत्यव्ययं प्रथमैकवचनंच । बलात्कारेण हसेनहासेनसहितेतिचार्थः ॥ ६ ॥ स० आर्येणपरवान् आर्योभिन्नपरवान् कमलवर्णिनि कमलसदृशवर्णवति । पुण्डरीकवद्यशस्विनीतिवा । "वर्णोरूपयशोक्षरे" इतिविश्वः ॥ ९ ॥ स० अमलवर्णिनि शुद्धाक्षरालापे ॥ १० ॥ ती० वस्तुतस्तुविरूपां विशेषरूपां त्रिलोकसुन्दरीमित्यर्थः । असतीं नविद्यतेऽन्यासतीयस्यास्तां । परमपतिव्रतेत्यर्थः । करालां उन्नतां । "करालोदन्तुरेतुङ्गेदारुणेपिचकथ्यते" इतिनिघण्टुः । निर्णतोदरीं निर्णतंनिम्नउदरंयस्यास्सातां ।

[पा०] १ ख. सुप्रोक्ता. २ च. छ. ज. ञ. सहसारामं. ३ च. ज. शूर्पणखां. ४ क. ख. ग. वाक्यं च युक्तं. ५ च. छ. ज. ञ. वरवर्णिनी. क. कामरूपिणी. ६ ङ. झ. ब. ट. एतां. ७ क. ख. घ. वृद्धांभार्यां. ८ च. छ. ज ञ. रतिंकुर्याद्विचक्षणः. ९ ख. च. छ. ज. कराली. १० ङ. झ. ट. तद्वचस्तथ्यं, छ. ज. तद्वचःपथ्यं.

एनां विरूपामसतीं करालां निर्णतोदरीम् ॥ वृद्धां भार्यामवष्टभ्य मां न त्वं बहुमन्यसे ॥ १५ ॥
अद्येमां भक्षयिष्यामि पश्यतस्तव मानुषीम् ॥ त्वया सह चरिष्यामि निःसपत्ना यथासुखम् ॥ १६ ॥
इत्युक्त्वा मृगशावाक्षीमलातसदृशेक्षणा ॥ अभ्यधावत्सुसंक्रुद्धा महोल्का रोहिणीमिव ॥ १७ ॥
तां मृत्युपाशप्रतिमामापतन्तीं महाबलः ॥ निगृह्य रामः कुपितस्ततो लक्ष्मणमब्रवीत् ॥ १८ ॥
क्रूरैरनार्यैः सौमित्रे परिहासः कथंचन ॥ न कार्यः पश्य वैदेहीं कथंचित्सौम्य जीवतीम् ॥ १९ ॥
इमां विरूपामसतीमतिमत्तां महोदरीम् ॥ राक्षसीं पुरुषव्याघ्र विरूपयितुमर्हसि ॥ २० ॥
इत्युक्तो लक्ष्मणस्तस्याः क्रुद्धो रामस्य पार्श्वतः ॥ उद्धृत्य खड्गं चिच्छेद कर्णनासं महाबलः ॥ २१ ॥
निकृत्तकर्णनासा तु विस्वरं सा विनद्य च ॥ यथागतं प्रदुद्राव घोरा शूर्पणखा वनम् ॥ २२ ॥
सा विरूपा महाघोरा राक्षसी शोणितोक्षिता ॥ ननाद विविधान्नादान्यथा प्रावृषि तोयदः ॥२३॥
सा विसरन्ती रुधिरं बहुधा घोरदर्शना ॥ प्रगृह्य बाहू गर्जन्ती प्रविवेश महावनम् ॥ २४ ॥

ततस्तु सा राक्षससंवृतं खरं जनस्थानगतं विरूपिता ॥
उपेत्य तं भ्रातरमुग्रदर्शनं पपात भूमौ गगनाद्यथाऽशनिः ॥ २५ ॥
ततः समार्यं भयमोहमूर्च्छिता सलक्ष्मणं राघवमागतं वनम् ॥
विरूपणं चात्मनि शोणितोक्षिता शशंस सर्वं भगिनी खरस्य सा ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे अष्टादशः सर्गः ॥ १८ ॥

॥१४॥ अवष्टभ्य अवलम्ब्य ॥१५॥ पश्यतस्तव त्वयि पश्यति । निःसपत्ना निष्प्रतिबन्धिका ॥ १६ ॥ अलातसदृशेक्षणा निर्ज्वालकाष्ठाग्नितुल्येक्षणा । उल्का निर्गतज्वाला सा चोत्पातकालभाविनी प्रकृते विवक्षिता ॥ १७ ॥ निगृह्य हुंकारेण प्रतिषिध्य ॥ १८ ॥ अनार्यैः दुर्जनैः । कथंचिज्जीवतीं शूर्पणखायाः क्रौर्यमालोक्य कथंचित्स्वास्थ्यमापन्नां ॥ १९ ॥ पूर्वमेव विरूपां पुनर्विरूपयेति भावः । एतावत्पर्यन्तमपराधाभावात्तूष्णीं स्थितं अद्य सीताक्रमणव्याजेनेमां विरूपयेत्यर्थः ॥ २० ॥ तस्याः कर्णनासमित्यन्वयः । प्राण्यङ्गत्वादेकवद्भावः । रामे बद्धभावाया अपि शूर्पणखायास्तदीयापचारेण हानिर्जातेत्यनुसन्धेयं ॥२१॥ यथागतं आगतमार्गमनतिक्रम्य । वनं प्रदुद्रावेति संबन्धः ॥ २२ ॥ शोणितोक्षिता रक्तेन सिक्ता । नादान्ननाद नादंश्चकारेत्यर्थः । ओदनपाकं पचतीतिवत् । प्रावृषि वर्षाकाले ॥२३॥ विसरन्ती स्रवन्ती । रुधिरं रक्तं । प्रगृह्य उद्यम्य ॥ २४ ॥ तं रामवध्यत्वेन प्रसिद्धं । यथाऽशनिः अशनिरिव । गगनात् भूमौ पपात ॥ २५ ॥ उत्तरसर्गार्थमेकेन संगृह्णाति—ततः समार्यमिति । भयजो मोहो भयमोहः निःसंज्ञता

तनुमध्यामित्यर्थः । वृद्धां ज्ञानशीलगुणवृद्धामित्यर्थः ॥ १५ ॥ ति० अनार्यैःपरिहासोनकथमपिकार्यइत्यत्रानुभवंप्रमाणयति । पश्यवैदेहीमक्षयितुमुद्युक्ता । अस्मत्कृतपरिहासदोषादितिशेषः । हेसौम्य कथंचिज्जीवतीमेवेत्युत्तरश्लोकान्वयि ॥ कतक० इदं परिहासेनाप्यनृतवचनंसत्यनिष्ठस्यरामस्यसर्वानर्थमूलं । मूलविघातायामायाबीजावेशमूलंच ॥ १९ ॥ टीका० कर्णनासमित्युपलक्षणं । स्तनोष्ठमपीत्यर्थः । उक्तंचभारते " निकृत्तकर्णनासोष्ठंचकारसुनन्दनः " इति । स्कान्देच " लक्ष्मणस्तूर्णमुत्थायकरवालेनवीर्यवान् । कर्णौस्तनौनासिकांचअच्छिनद्रामशासनात् " । स० कर्णनासेइतिपाठे छान्दसएकवद्भावाभावः । यद्वा कर्णश्चनासाचकर्णनासं । कर्णनासंचकर्णनासंचकर्णनासेइत्येकशेषाद्विवचनोपपत्तिः ॥२१॥ ति० अत्रेदंबोध्यं—दशवर्षंगमनोत्तरंपुनस्सुतीक्ष्णाश्रमगमनंरामस्य । तत्रचवर्षाकालापगमपर्यन्तंस्थिलाकिंचिच्छिष्टेएकादशेऽगस्त्याश्रमगमनं । ततोवर्षाकालारंभेपञ्चवट्यांवासः । "मयूरनादितारम्याः" इतितत्रोक्तेः । एवंवसतस्तस्यत्रयोदशेवर्षेहेमन्तर्तु प्रविष्टस्येत्युक्तेरत्रद्वादशवर्षपूर्तिः । "पञ्चमेपञ्चमेवर्षेद्वौद्वावधि-

[पा०] १ ख.—घ. ज.—ट. इमां. २ क. ङ. ट. नमांसं. च. छ. झ. मांसंन. ३ क. निस्सपत्नी. ४ क. ङ. ट. अभ्यगच्छत्. ५ ट. प्रगृह्य. ६ क.—ट. पश्यतः. ७ क. ङ. ञ. ट. कर्णनासे. ८ ख. ग. घ. विकृत्त. ९ च. छ. ज. महानादा. १० क. ङ. ट. सुप्रतेजसं.

एकोनविंशः सर्गः ॥ १९ ॥

खरेण शूर्पणखांप्रतितद्वैरूप्यकारिजनप्रश्ने तथातंप्रति रामवृत्तान्तकथनपूर्वकंतच्चोदनयालक्ष्मणेनस्वस्यवैरूप्यकरणोक्तिः ॥ १ ॥ खरेण रामलक्ष्मणवधंचोदितैश्चतुर्दशभीराक्षसैः शूर्पणखयासह रामाश्रमाभिगमनम् ॥ २ ॥

तां तथा पतितां दृष्ट्वा विरूपां शोणितोक्षिताम् ॥ भगिनीं क्रोधसंतप्तः खरः पप्रच्छ राक्षसः ॥ १ ॥
उत्तिष्ठ तावदाख्याहि प्रमोहं जहि संभ्रमम् ॥ व्यक्तमाख्याहि केन त्वमेवंरूपा विरूपिता ॥ २ ॥
कः कृष्णसर्पमासीनमाशीविषमनागसम् ॥ तुदत्यभिसमापन्नमङ्गुल्यग्रेण लीलया ॥ ३ ॥
कः कालपाशमासज्य कण्ठे मोहान्न बुध्यते ॥ यस्त्वामद्य समासाद्य पीतवान्विषमुत्तमम् ॥ ४ ॥
बलविक्रमसंपन्ना कामगा कामरूपिणी ॥ इमामवस्थां नीता त्वं केनान्तकसमा गता ॥ ५ ॥
देवगन्धर्वभूतानामृषीणां च महात्मनाम् ॥ कोयमेवं विरूपां त्वां महावीर्यश्चकार ह ॥ ६ ॥
न हि पश्याम्यहं लोके यः कुर्यान्मम विप्रियम् ॥ अन्तरेण सहस्राक्षं महेन्द्रं पाकशासनम् ॥ ७ ॥

तेन मूर्च्छिता व्याप्ता । राघवं वनमागतं शशंस आत्मविरूपणंच सर्वं शशंस समूलं शशंसेत्यर्थः । खरस्य भगिनी सपत्नीमातृपुत्रत्वान्मातृष्वसेयत्वाच्चेति पूर्वमुपपादितं ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने अष्टादशः सर्गः ॥ १८ ॥

अथ खरवधमूलभूतः खरक्रोध उच्यते एकोनविंशे । भगिनीं ज्येष्ठां ॥ १ ॥ प्रमोहो विसंज्ञता । संभ्रमश्चित्ताप्रतिष्ठा । एवंरूपा यथा भवसि तथा विरूपितेत्यर्थः ॥ २ ॥ उत्तरकाल एवापकर्तुरनिष्टावाप्तिंसूचयन्पृच्छति—क इति । कृष्णेत्यमोघविषत्वव्यञ्जनाय । आसीनं निश्चलमित्यर्थः । आशिषि दंष्ट्रायां विषं यस्येति सर्पविशेषणं । पृषोदरादित्वात्सकारलोपः । "आशीरुरगदंष्ट्रायां प्रियवाक्यामिषङ्गयोः" इति निघण्टुः । ईकारान्तोप्याशीशब्दोस्ति । तुदति व्यथयति । अभिसमापन्नं आभिमुख्येनागतमिति शीघ्रप्रतीकारमूलं । अङ्गुल्यग्रेण लीलयेति प्रभावानभिज्ञत्वोक्तिः । अनेनस्वस्यलीलया सद्यःप्रतीकारसामर्थ्यं द्योतितं ॥ ३ ॥ पुनरपि स्वमहिमानं प्रकटयञ्शूर्पणखां चाश्वासयन्पृच्छति—कः कालेति । यः कण्ठे कालपाशं मृत्युपाशं । आसज्य आबध्य । न बुध्यते उत्तरक्षणे स्वमरणं न जानातीत्यर्थः । यश्च त्वां आसाद्य प्राप्य । उत्तमं विषं कालकूटं पीतवान् स क इत्यन्वयः । अत्र आसादनशब्देन विरूपकरणमुच्यते । त्वदासादनरूपं विषमित्यर्थः ॥ ४ ॥ अथ विस्मयेन पृच्छति—बलेति । इतो गता त्वं केनेमामवस्थां नीतेत्यन्वयः ॥ ५ ॥ देवेत्यादि । निर्धारणे षष्ठी । देवादीनां मध्ये । अयं एतादृशकार्यकर्ता कः एवं विरूपां चकार ॥ ६ ॥ स्वनिश्चयमाह—नहीति । अत्रतमित्यध्याहार्यं । तस्य

कमासकौ" इत्युक्तेर्मार्गशुक्लैकादश्यांत्रयोदशारंभः । अतएवपाद्मउक्तं—"तत्र तु द्वादशाब्दानि रामस्य अतिचक्रमुः । कस्मिंश्चिदथ काले तु राक्षसी कामरूपिणी । तत्र शूर्पणखा भेजे राघवं रावणानुजा" इतिकेचित् । अन्येतु त्रयोदशेकिञ्चिदवशिष्टेशूर्पणखागमनं ततोमाघेसीताहरणमित्याहुः । भारतेयुधिष्ठिरवनवासस्याधिकमासंगृहीत्वाऽर्वागेवसमाप्तेः । "पञ्चमेपञ्चमेवर्षेद्वौमासावुपजायतः । एषामभ्यधिकामासा पञ्चचद्वादशक्षपाः । त्रयोदशानांवर्षाणामितिमेवर्ततेमतिः" इतिभीष्मेणोक्तत्वात्तद्रीत्याऽत्रापितथैवोचितमितिपूर्वव्याख्यैवयुक्तेतिममभाति । यत्तुतत्रत्रयोदशाब्दानिरामस्यअतिचक्रमुरितिपाद्मेपाठःक्वचित् तत्रापिप्रवेशमात्रेणतदतिक्रमव्यवहारः । यथान्येतु वादिनामर्धावस्थितौतद्व्यवहारइतिबोध्यं । प्रचुरस्तुद्वादशाब्दानीत्येवपाठः ॥ टीका० सर्गफलं—"कर्णनासापहारंचशृण्वतांपठतामपि । नजातुमानभङ्गस्स्याद्रघुनाथप्रसादतः ।" इतिस्कान्दे ॥२६॥ इत्यष्टादशस्सर्गः ॥ १८ ॥

ती० बलंआत्मशक्तिः । विक्रमः पराभिमवनसामर्थ्यं ॥ ५ ॥ ती० अमरेष्विति । अत्रमहेन्द्रशब्दोविशेष्यं । पाकशासन-

[पा०] १ क. ख. ग. तदा. २ ग. क्रोधसंरक्तः. ख. कोपसंतप्तः. ३ व्यक्तमाख्याहीत्यर्धमारभ्यदेवगन्धर्वभूतानामित्यर्धपर्यन्तंविद्यमानानामष्टानामर्धानांपौर्वापर्यं च. छ. ज. ञ. पुस्तकेषु. यस्त्वामद्य. बलविक्रमसंपन्ना. इमामवस्थां. देवगन्धर्व. व्यक्तमाख्याहि. कःकृष्णसर्प. तुदत्यभि. कःकालपाशं. एवंक्रमेणदृश्यते. ४ ङ. छ. रूपविरूपिता. ५ घ. कृतान्तसममापन्नं. ६ च. छ. ज. झ. ञ. ट. कालपाशंसमासज्य. ७ क. ख. घ. मता. ८ ख. सुमहात्मनां. ९ क—ट. महावीर्यस्त्वांविरूपां. १० क. ग. ङ—ट. अमरेषु.

अद्याहं मार्गणैः प्राणानादास्ये जीवितान्तकैः ॥ सलिले क्षीरमासक्तं निष्पिबन्निव सारसः ॥ ८ ॥
निहतस्य मया संख्ये शरसंकृत्तमर्मणः ॥ सफेनं रुधिरं रक्तं मेदिनी कस्य पास्यति ॥ ९ ॥
कस्य पत्ररथाः कायान्मांसमुत्कृत्य संगताः ॥ प्रहृष्टा भक्षयिष्यन्ति निहतस्य मया रणे ॥ १० ॥
तं न देवा न गन्धर्वा न पिशाचा न राक्षसाः ॥ मयापकृष्टं कृपणं शक्तास्त्रातुमिहाहवे ॥ ११ ॥
उपलभ्य शनैः संज्ञां तं मे शंसितुमर्हसि ॥ येन त्वं दुर्विनीतेन वने विक्रम्य निर्जिता ॥ १२ ॥
इति भ्रातुर्वचः श्रुत्वा क्रुद्धस्य च विशेषतः ॥ ततः शूर्पणखा वाक्यं सबाष्पमिदमब्रवीत् ॥ १३ ॥
तरुणौ रूपसंपन्नौ सुकुमारौ महाबलौ ॥ पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥ १४ ॥

गर्वविशेषद्योतनाय इन्द्रस्य विशेषणद्वयं ॥ ७ ॥ प्राणान् तस्येति शेषः । जीवितान्तकैः शत्रुजीवितविनाशकरैः । मार्गणैः बाणैः । सारसः हंसविशेषः ॥ ८ ॥ संख्ये युद्धे । शरसंकृत्तमर्मणः बाणच्छिन्नमर्मस्थलस्य । सफेनं प्राणवायुनिर्गमनकालिकफेनसहितं । रक्तं रक्तवर्णं । अचिरप्रवृत्तत्वमनेनोच्यते । मेदिनी भूमिः ॥ ९ ॥ पत्ररथाः पक्षिणः । कायात् देहात् । उत्कृत्य उच्छिद्य । संगताः संघशः समवेताः ॥ १० ॥ मया आहवे अपकृष्टं आकृष्टं इहेति युद्धसन्निधानोक्तिः ॥ ११ ॥ उपलभ्य प्राप्य । दुर्विनीतेन दुर्जनेन । विक्रम्य शौर्यं कृत्वा ॥ १२ ॥ विशेषतः अतिशयेन । क्रुद्धस्य कृतक्रोधस्य ॥ १३ ॥ ननु व्यक्तमाख्याहि केन त्वमेवंरूपा विरूपितेति पृच्छन्तं खरं प्रति " पुत्रौ दशरथस्यास्तां भ्रातरौ रामलक्ष्मणौ " इत्येव

सहस्राक्षशब्दौ विशेषणे । एतेषु षष्ठ्यर्थे द्वितीया । यथा महेन्द्रस्येति दृष्टान्तः । पाकं पाकाख्यं वृत्रासुरभ्रातरं शासितवानिति पाकशासनः । अन्तरेण सहस्राक्षमिति पाठे महेन्द्रमन्तरेण इन्द्रं विना । कोममविप्रियं कुर्यात् तं न हि पश्यामीत्यन्वयः । ति० महेन्द्रमित्यस्यान्तरेणेति शेषः । मनुष्यादीनां तु स्वाप्रियकरणे संभावनैव नेति भावः ॥ ७ ॥ ति० जीवितान्तगैः जीवितस्यान्तं गमयन्ति प्रापयन्ति तैः । तृषया निष्पिबन् सारसो हंसो यथा सलिले आसक्तक्षीरमादत्ते एवं प्राणानादास्य इत्यर्थः ॥ ८ ॥ ती० श्रीरामचन्द्रे दोषाणामभावाद्गुणोक्त्यैव तं बोधयति—तरुणावित्यादि ॥ तनि० एतत्पुत्रावेतन्नामकाविति वक्तव्ये सौन्दर्यवर्णनमस्यावैरूप्यप्राप्तावपि वैराग्योत्पत्त्यभावेन । काममोहितत्वादवशा भ्रातुस्संनिधावर्वाच्यमपि हृद्गतमेवाह ॥ विषयाभिनिवेशवन्तो ह्यनुकूलप्रतिकूलविचारमन्तरेण प्रथमं मनसि यल्लग्नं तदेवानुवदन्ति ॥ यद्वा " सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वा " इतिवत्प्रथमं रूपोदाहरणं । अथवा सुप्तमत्तकुपितानां भावज्ञानं दृष्टमिति कुपितत्वाद्भावज्ञानं प्रकाशितं । यद्वा एवं राक्षसावासवनप्रवेशविरूपकरणाभ्यां तौ बलिष्ठाविति माभैषीः किंतु मृदुप्रकृतिकावित्युच्यते । यद्वा " युवाकुमारं " इत्यादिवेदान्तसिद्धमर्थं राक्षस्याचष्टे । "व्यक्तमेष महायोगी " इति मन्दोदरीवत् परत्वं खलु मुक्तवेद्यं स्नेहस्तु दशरथादिभिः कार्यः तदविशेषेण राक्षस्या जातं ज्ञानं स्नेहश्चेत्युभयं रघुनन्दनसौन्दर्यवैलक्षण्यमहिम्नेति ज्ञेयं । ननु रूपसंपदा प्रथमं तरुणत्वादिविशेषणविशिष्टे श्रीरामे भावानुबन्धः । लक्ष्मणे तु विरूपकरणाद्द्वेषः । उभयोः प्राधान्येन ग्रहणं कथमिति चेत्परस्परस्य सदृशाविति तारुण्यादिसामान्याद्रामप्रत्याख्याने लक्ष्मणेपि भावबन्धनात् रामेणापि कर्णनासच्छेदाभ्यनुज्ञानेन द्वेषसाम्याच्च न दोषः । ताभ्यामुभाभ्यामिमामवस्थां संप्राप्तेति वक्ष्यति । कथं युगपदेकस्याद्वयोर्भावबन्धो जातः ज्येष्ठकनिष्ठभावानुसंधानेपि न तारुण्यवैषम्यं । तेनोभयत्रैकधा(दा)भावबन्धः तारुण्यैक्येपि रूपवैषम्ये अन्यथाभावबन्धस्स्यात्तच्चेत्याह । रूपसंपन्नौ । लोके मन्मथादिभिः रूपापेक्षया यथा प्रार्थनीयौ भवेतां तथा रूपसमृद्धौ एतदङ्गप्रत्यङ्गसौष्ठवलेशयाऽयाखलुमदनो रूपवान् । " रूपदाक्षिण्यसंपन्नः प्रसूत " इत्युक्तरीत्या उत्पत्तिसिद्धरूपसमृद्धौ न तु वयउपचितरूपसमृद्धौ । "रामेति रामेति सदैव बुद्ध्या निचार्य वाचा ब्रुवतीतमेव" इत्येतादृशातिव्यामोहजनकरूपसंपन्नौ । सुकुमारौ आलिङ्गने काठिन्यरहितावयवौ पुष्पसमुदायालिङ्गनवत् । अतएव शिरीषपुष्पसाम्यं । सौकुमार्यप्रयुक्तदौर्बल्यं परिहरति—महाबलाविति । बलं मनुभवसामर्थ्यं । तेन " रामस्तु सीतया सार्धं विजहार बहूनृतून् " इत्युक्तरीत्याऽनवरतकान्तानुभवसंभवेपि बलहानिराहित्यमुक्तं । एतेन राक्षसजातिप्रयुक्तकठिनप्रकृतियुक्ताया अपि स्वस्याः समरतिप्रदानसामर्थ्यमभिप्रेतं । स्त्रीणां तु स्वानुभवविशेषैः पुरुषो जेतव्य इति मनोरथः । तमतिक्रम्य स्वबलाधिक्येन क्रीडायां स्त्रियं यो जयति स महाबलः । पुण्डरीकविशालाक्षौ अवयवानां सौन्दर्यसमीपगमने सम्यक्प्रकाशते । नेत्रे तु दूरे स्फुटप्रकाशते । यद्वा पुण्डरीकं सितांभोजं । अनेन सत्वगुणप्रचुरतया दृष्टिप्रसन्नतोच्यते न तु महापुरुषलक्षणोपयुक्तरक्तान्तत्वं कनीनिकानैल्यं च निवार्यते । अथवा मनुष्यावतारेण परत्वगोपनेपि " कप्यासं पुण्डरीकाक्षं " इत्युक्तपुण्डरीकाक्षत्वं प्रकाशत एव । किंच क्षीरसमुद्रवन्नेत्रविशालत्वगांभीर्यकेनापि निश्चेतुमशक्यं लोकरीत्या पुण्डरीकसाम्यमुक्तं । वस्तुतस्तु

[पा०] १ झ. जीवितान्तगैः. २ ङ. सफेनरुधिरं. ३ क. झ. ट कस्य ४ ङ. झ. ट. पातुमिच्छति ५ घ. मुद्धृत्य. ६ ङ—ट. त्रातुं महाहवे. ७ च. ज. ञ. ततः. ८ क.—च. निष्क्रम्य.

वक्तव्ये तरुणावित्यादिना रामादिसौन्दर्यादिकं किमर्थं कथयतीति चेत् अस्या वैरूप्ये जातेपि वैराग्याजननात्काममोहातिशयेन भ्रात्रादिसन्निधानेपि हृद्गतमेवोक्तवती । अनुकूलानां प्रतिकूलानां च रामं दृष्टवतामयमेव स्वभावः । अतएव " यानि रामस्य चिह्नानि " इति पृष्टवतीं सीतां प्रति " त्रिस्थिरस्त्रिप्रलम्बश्च " इति वक्तव्ये " रामः कमलपत्राक्षः सर्वसत्त्वमनोहरः " इत्येवमाह हनुमान् । यद्वा । " सुप्तप्रमत्तकुपितानां भावज्ञानं दृष्टं " इति न्यायेन कर्णनासाच्छेदेनप्रमत्ता कुपिता च शूर्पणखा हृद्गतमेवाह । तरुणौ कामिनीनां प्रथमाकर्षकं वय एव हि अतस्तदुच्यते । परस्परपरिहासकरणेनोभयत्र भावबन्धाविशेषाद्द्विवचनं । वयसातुल्यत्वेपि रूपेकिमनयोस्तारतम्यमस्ति नेत्याह—रूपसंपन्नौ । रूपं सौन्दर्यं तेन संपन्नौ समृद्धौ । इतरेषां कामादीनां रूपमाभ्यां भिक्षित्वा संपादयितव्यमिति मन्यमानावित्यर्थः । यद्वा रूपसंपन्नौ संपन्नरूपौ । आहिताग्न्यादित्वात्परनिपातः । तेन " उत्पन्नं द्रव्यं क्षणमगुणं तिष्ठति " इतिन्यायं विहाय " रूपदाक्षिण्यसंपन्नः प्रसूतः " इत्युक्तरीत्या धर्मिणा सहैवोत्पन्नरूपावित्यर्थः । वयोरूपसत्त्वेपि किं कठिनस्पर्शौ नेत्याह—सुकुमारौ । परुषतरभवच्छरीरवन्नभवत्यनयोश्शरीरं किंतुपुष्पहाससुकुमारौ । एवं सौकुमार्यसत्त्वेपि रतिवैयात्ये किं श्रान्तौ स्यातां नेत्याह—महाबलौ । " रामस्तु सीतया सार्धं विजहार बहूनृतून् " इत्याद्युक्तरीत्याऽनेकर्तुषु विहरणेपि श्रमलवरहितौ । एवं समुदायशोभासंपन्नत्वेपि किमवयवशोभासु वैकल्यं नेत्याह—पुण्डरीकविशालाक्षौ । "संरक्तनयनाघोरा " इत्युक्तरीत्या त्वादृशनयनवन्न भवति तन्नयनमित्यर्थः । पुण्डरीकं सिताम्भोजं । तमोगुणोद्रेकेण निद्राकषायितत्वं रजोगुणोद्रेकेण संरक्तत्वं वा नास्ति । किंतु सर्वदा सत्त्वप्रसन्ननयनावित्यर्थः । न केवलमेवावयवशोभातिशयः चीरकृष्णाजिनाम्बरौ " किमिव हि मधुराणां मण्डनं नाकृतीनां " इत्युक्तरीत्या वल्कलाजिनधारणेप्यतिरमणी-

" अदीर्घमप्रेमदुघं " इत्याद्युक्तरीत्याऽनुपममेव । अपिच बद्धमुक्तनित्यात्मकत्रिविधकोट्युभयविभूतिमेकप्रत्यक्षेनकटाक्षयितुं विशालत्वं । महाबलौ पुण्डरीकाक्षाविति बलंप्रदर्श्य भयंजनयित्वा " जितंतेपुण्डरीकाक्ष " इतिस्तुतिप्रसन्ननेत्रतांप्रकाशयति । सुकुमारौ पुण्डरीकविशालाक्षाविति नयनपुष्पबाणवत्त्वमुक्तं अरविन्दस्यमदनबाणत्वात् । तेनशूर्पणखामनोदारकत्वंव्यज्यते । चीरकृष्णाजिनांबरौ आभरणरहितावेव मां मन्मथपीडितां कृत्वाव्यथयत । " इयमधिकमनोज्ञावल्कलेनापि"—इत्युक्तंहि कालिदासेन । अतश्चीरकृष्णाजिनधारणेन तयोस्सौन्दर्यं न्यूनतांनैति । किंतु तत्तारुण्यादिगुणसमुदायरञ्जितमिदंचीरं रामशरीरसंनिकर्षेणसर्वस्यापिहृदयाकर्षकंसत् " रूपंसंहननंलक्ष्मीसौकुमार्यंसुवेषताम् । ददृशुर्विस्मिताकारारामस्यवनवासिनः " इति स्वरूपध्यानपराणामिदमेव हृदयग्राहकंभवति । द्वितीययोजनायां तरुणौ "ऊनषोडशवर्षः नयुद्धयोग्यतामस्यपश्यामि" इत्याद्युक्तरीत्या युद्धायोग्यौ । यद्वा विषयप्रवणौ नतुयुद्धप्रवणौ । रूपसंपन्नौ " कन्याकामयतेरूपं " इतिरूपेण वनिताजनानुरागजनकसौन्दर्यवन्तौ नतुपौरुषज्ञापकपराक्रमसंपन्नौ ॥ केवलमाकारसुन्दरौ नत्वन्तस्सारवन्तौ । अत्रहेतुः सुकुमारौ श्रीमत्कुमारतया श्रमासहनौ भवदीयरक्तलोचननिरीक्षणासहावत्युग्रभवदायुधनिपातंकथंसहेतां महाऽबलौ अत्यन्ताबलौ । स्त्रीनिमित्तंराज्यत्यागेनतयोर्बलंदृष्टमेव । यद्वा महतीरक्षणीया अबला ययोस्तौ । प्रतिबन्धकीभूताऽबलाचास्तीत्यर्थः । पुण्डरीकविशालाक्षौ भाविकार्यापरिज्ञानेन कर्णनासच्छेदःकृतः इत परंकिं भविष्यतीति भयेन निर्निमेषेणप्रफुल्लनेत्रौ दैन्येनशीतायमाननेत्रौवा स्वस्थानसामर्थ्येपि जलादपनीतपुण्डरीकवदन्यत्रासामर्थ्यंलोचनेनप्रकाशितं । स्वयमशक्तत्वेप्यैश्वर्यादिसंपत्तौप्रबलौ भवतः साचनेत्याह—चीरकृष्णाजिनांबरौ । वस्त्राभावेन दारुचर्म मृगचर्मच वसानौ । अतोद्रव्यसाध्यसेनासंपादनं कथमित्यर्थः । यद्वा आच्छादनमेकजातीयमपिन । किंतु स्थावरेणैकंदत्तं जङ्गमेनैकंदत्तमिति । तृतीययोजनायांतु तरुणौ " ऊनषोडशवर्षः—" इत्युक्तरीत्या अनतिबालावनतिवृद्धौच । यौवनेविजिगीषूणामितिवत् युद्धेनहस्तकण्डूनिरसनंकर्तुमिच्छन्तौ । रूपसंपन्नौ वीररसाभिव्यञ्जकसंहननविशेषौ । "सिंहोरस्कंमहाबाहुं" इतिवत् संनिवेशदर्शनेनशत्रवः पलायन्ते । रूप्यते अनेनेतिव्युत्पत्त्या रूपशब्दोसाधारणनिरतिशयरूपविशेषवाची "नाविजित्यनिवर्तते " इति " यशसश्चैकभाजनं " इतिचवास्यादारभ्य सुबाहुप्रभृतिनिरसनेनैतावत्पर्यन्तंप्रसिद्धापदानौ । सुकुमारौ अनायासेनशत्रुनिरासकौ । पौरुषदर्शनेहृदयग्राहित्वं रूपसौकुमार्ययोरपि हृदयग्राहित्वं । महाबलौ " सदेवगन्धर्वमनुष्यपन्नगंजगत्सशैलंपरिवर्तयाम्यहम् ।" " सागरमेखलां । महींदहतिकोपेन " इत्याद्युक्तरीत्याप्रसिद्धबलयुक्तौ । बलशब्देनबाहुबलंमनोबलमुपायबलंचोच्यते । पुण्डरीकविशालाक्षौ अतिसङ्कटवनसंचारेप्यम्लाननेत्रौ । एतेन युद्धेअश्रमावितिज्ञायते । युद्धादिकालेपि शत्रुष्वलक्ष्यबुद्ध्यानेत्रविकारादिरहितौ "प्रीतिविस्फुरितेक्षणं" इतिवत् शत्रुदर्शनेप्युत्तरोत्तरमुत्साहेनातिविस्तृतनेत्रौ । चीरकृष्णाजिनांबरौ सर्वदायुद्धसंनाहसूचकवस्त्रबन्धादियुक्तौ । यद्वा मृगयाशीलतया तदुचितकृष्णाजिनदारुपटकञ्चुकधरौ । "सत्येनलोकाञ्जयति" इत्युक्तरीत्या तदुचितवेषव्यापारवत्त्वंप्रसिद्धं । महाबलावित्यनेन खरोक्तवीरालापाननादृत्याजेयत्वंसमर्थितं ॥ १४ ॥

फलमूलाशनौ दान्तौ तापसौ धर्मचारिणौ ॥ पुत्रौ दशरथस्यास्तां भ्रातरौ रामलक्ष्मणौ ॥ १५ ॥
गन्धर्वराजप्रतिमौ पार्थिवव्यञ्जनान्वितौ ॥ देवौ वा मानुषौ वा तौ न तर्कयितुमुत्सहे ॥ १६ ॥
तरुणी रूपसंपन्ना सर्वाभरणभूषिता ॥ दृष्टा तत्र मया नारी तयोर्मध्ये सुमध्यमा ॥ १७ ॥
ताभ्यामुभाभ्यां संभूय प्रमदामधिकृत्य ताम् ॥ इमामवस्थां नीताऽहं यथाऽनाथाऽसती तथा ॥१८॥
तस्याश्चानृजुवृत्तायास्तयोश्च हृतयोरहम् ॥ सकेनं पातुमिच्छामि रुधिरं रणमूर्धनि ॥ १९ ॥
एष मे प्रथमः कामः कृतस्तात त्वया भवेत् ॥ तस्यास्तयोश्च रुधिरं पिबेयमहमाहवे ॥ २० ॥
इति तस्यां ब्रुवाणायां चतुर्दश महाबलान् ॥ व्यादिदेश खरः क्रुद्धो राक्षसानन्तकोपमान् ॥२१॥

यौ । यद्वा कोयमेवं महावीर्य इति भीतं प्रति तयोर्दुर्बलत्वमुच्यते । तरुणौ ऊनषोडशवर्ष इत्यादुक्तरीत्या युद्धायोग्यौ । यद्वा यौवने विषयैषिणामित्यादुक्तरीत्या विषयप्रावण्येन युद्धभीतौ । रूपसंपन्नौ "कन्या कामयते रूपं" इत्युक्तरीत्या वनिताजनवशीकरणाय शरीरमुद्वासयन्तौ नपौरुषसंपन्नौ । सुकुमारौ श्रीमत्पुत्रतया संपत्कुमारौ । अतो मदायुधप्रहारासहौ । महाबलौ विपरीतलक्षणया द्वावेतौ दुर्बलौ । ससैन्यस्य भवतो न पर्याप्तावित्यर्थः । यद्वा सुकुमारतराबलासहितौ युद्धविरोधिकलत्रसहितत्वान्न युद्धार्हौ । पुण्डरीकविशालाक्षौ तयोर्युद्धासामर्थ्यं मद्वैरूप्यकरणानन्तरं किं भविष्यतीति भीत्या शुभ्रीभूतलोचनतया चाक्गम्यते । चीरकृष्णाजिनाम्बरौ परिधानसंपादनस्याप्यशक्तौ । तत्राप्येकरूपोत्तरीयरहितौ । चीरकृष्णाजिनाम्बरौ स्थावरतिर्यग्भ्यां वाचिंयमा लब्धे अम्बरे बिभ्राणौ । यद्वा खरस्य प्रोत्साहनाय तयोर्बलातिशय उच्यते—तरुणावित्यादि । तरुणौ जयोत्साहयोग्यवयस्कौ । रूपसंपन्नौ "सिंहोरस्कं महाबाहुं" इत्युक्तरीत्या युद्धाभावेपि दर्शनमात्रेण परहृदयकम्पजनकशरीरौ । सुकुमारौ लीलयैव सर्वसंहरणक्षमौ । महाबलौ मनोबलबाहुबलोपायबलसंपन्नौ । पुण्डरीकविशालाक्षौ वैरिषु गौरवबुद्धिमूलककालुष्यरहिततया विमलनेत्रौ । अनेन शत्रुदर्शनकृतक्षोभराहित्यमुच्यते । चीरकृष्णाजिनाम्बरौ सदा बद्धवसनतया युद्धसन्नद्धाविति यावत् । एवमुत्तरत्रापि योज्यं ॥ १४—१५ ॥ पुनरपि हृदये परिवर्तमानं तत्सौन्दर्यमाह—गन्धर्वेति । देवाविति । यद्यपि दशरथसुताविति श्रुतं तथापि तत्प्रभावदर्शनेनतदसत्यमेवोक्तमिति मन्य इति भावः ॥ १६ ॥ तत्र आश्रमे ॥ १७ ॥ प्रमदां अधिकृत्य निमित्तीकृत्य । उभाभ्यां संभूय ऐकमत्यं प्राप्य इमामवस्थां नीताऽस्मि । यथा अनाथा असती कुलटा नीयते तथा नीताऽस्मीति योजना ॥ १८ ॥ अनृजुवृत्तायाः कुटिलवृत्तायाः । अनेन तत्प्रेरणेनैव मां तौ विरूपितवन्तावित्यमन्यतेति गम्यते । रणमूर्धनिहृतयोरित्यन्वयः । सीताया रणमूर्धनि गमनासंभवाद्धृताया इति विपरिणामो न युक्तः । अन्यथा अशक्यत्वाद्रणमूर्धनीत्युक्तं ॥ १९ ॥ अवश्यकर्तव्यत्वाय पुनरप्याह—एष इति । प्रथमः श्रेष्ठः । कामः अभिलाषः । "प्रथमौ प्रवरादिमौ" इतिवैजयन्ती । *तातेति पितृवत्प्रेष्ठसंबोधनं ॥ २० ॥ चतुर्दशेति

स० भ्रातराविति खरदूषणयोस्संबोधनं । अतोनपुत्रावित्यादिनाऽर्धतःपुनरुक्तिः ॥ १५ ॥ ती० रुधिरंपातुमिच्छामीत्यनेन श्रीरामवर्णनेनलक्ष्यकामुकीलक्षणलक्षणनिवर्तयतीतिज्ञेयं । तस्याश्चानृजुवृत्तायाइत्यादिश्लोकद्वयस्यवास्तवार्थस्तु रणमूर्धनितयोःरामलक्ष्मणयोः । तृतीयार्थेषष्ठी । अनृजुवृत्तायाः तस्याः लक्ष्मण्याः । ममेतिशेषः । हृतयोः छिन्नयोः । द्वितीयार्थेषष्ठी । कर्णनासिके । पश्येतिशेषः । अतइतःपरमह सकेनमपिरुधिरंपातुमिच्छामीतिकाकुः । नेच्छाम्येवेत्यर्थः । आहवेतयोस्त्वयंकृतोभवेद्यदि । अपकारइतिशेषः । छिन्नकर्णनासांमांदृष्ट्वात्वयुपेक्षेयदि तदा स्वकाहारा देहंत्यक्ष्यामीतिभावः ॥ २० ॥ ती० इतितस्यांब्रुवाणायामित्यारभ्य सर्गसमाप्तिपर्यन्तस्यवास्तवार्थस्तु—तस्यांब्रुवाणायां रामवृत्तान्तमितिशेषः । खर—"तस्माद्यःक्रूररूपेणदेहेनहरताऽमृतम् । विष्णुर्दाशरथिर्भूत्वामोक्षयिष्यतिसुव्रत" इति शिवशापाद्राक्षसत्वंप्राप्तो याज्ञवल्क्यसुतश्चन्द्रकान्तइत्यर्थः अतएव शूर्पणखासुखाद्रामवृत्तान्तश्रवणानन्तरं विष्णुत्वेनज्ञात्वा सपरिवारस्वस्वरामहस्ताद्वधेच्छुस्तन्भगिनीप्रीतयइव रामेणसहयुद्धार्थंराक्षसान्व्यादिदेशेत्यर्थः । अस्मिन्नर्थेशेषधर्मेभीष्मयुधिष्ठिरसंवादकथाऽनुसंधेया ।

[पा०] १ ब. ङ. छ. ज. मूलाशिनौ. २ ख. घ. दशरथस्येमौ. ३ ङ. झ. ट. दानवावेतौ. ४ क. ख. आनतवृत्तायाः. ५ क. ज. ञ. ज. स्तम्.

मानुषौ शस्त्रसंपन्नौ चीरकृष्णाजिनाम्बरौ ॥ प्रविष्टौ दण्डकारण्यं घोरं प्रमदया सह ॥ २२ ॥
तौ हत्वा तां च दुर्वृत्तामपावर्तितुमर्हथ ॥ इयं च रुधिरं तेषां भगिनी मम पास्यति ॥ २३ ॥
मनोरथोयमिष्टोस्या भगिन्या मम राक्षसाः ॥ शीघ्रं संपाद्यतां तौ च प्रमथ्य स्वेन तेजसा ॥२४॥
[युष्माभिर्निहतौ दृष्ट्वा तावुभौ भ्रातरौ रणे ॥ इयं प्रहृष्टा मुदिता रुधिरं युधि पास्यति] ॥ २५ ॥
इति प्रतिसमादिष्टा राक्षसास्ते चतुर्दश ॥ तत्र जग्मुस्तया सार्धं घना वातेरिता यथा ॥ २६ ॥
ततस्तु ते तं समुदग्रतेजसं तथापि तीक्ष्णप्रदरा निशाचराः ॥
न शेकुरेनं सहसा प्रमर्दितुं वनद्विपा दीप्तमिवाग्निमुत्थितम् ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

विंशः सर्गः ॥ २० ॥

रामेण शूर्पणखासहागतराक्षसावलोकनेन सीतारक्षणे लक्ष्मणनियोजनपूर्वकंरणायनिर्गमनम् ॥ १ ॥ तथा स्वेनस्ववृत्तान्तनिवेदनपूर्वकं सामोक्तौपरुषोक्तावप्यपरावर्तनेनसमरोद्यतानांरक्षसां हननम् ॥ २ ॥ शूर्पणखया खरसमीपमेत्य चतुर्दशराक्षसक्षयनिवेदनम् ॥ ३ ॥

ततः शूर्पणखा घोरा राघवाश्रममागता ॥ रक्षसामाचचक्षे तौ भ्रातरौ सह सीतया ॥ १ ॥
ते रामं पर्णशालायामुपविष्टं महाबलम् ॥ ददृशुः सीतया सार्धं वैदेह्या लक्ष्मणेन च ॥ २ ॥
तान्दृष्ट्वा राघवः श्रीमानागतां तां च राक्षसीम् ॥ अब्रवीद्भ्रातरं रामो लक्ष्मणं दीप्ततेजसम् ॥ ३ ॥
मुहूर्तं भव सौमित्रे सीतायाः प्रत्यनन्तरः ॥ इमानस्या वधिष्यामि पदवीमागतानिह ॥ ४ ॥

चतुर्दशसहस्राध्यक्षानित्यर्थः ॥ २१—२२ ॥ दुर्वृत्तां भगिनीवैरूप्यमूलत्वात् । अपावर्तितुं आनेतुं । तां चेतिचकारेण तावपीत्युच्यते । आनयनप्रयोजनमाह —इयं चेति ॥ २३ ॥ अस्या अयं मनोरथः मम चायमिष्टः संमत इत्यर्थः । प्रमथ्य हत्वा ॥ २४—२५ ॥ इतीति । तयोर्मार्गं प्रदर्शयन्त्येति शेषः । इयं खरेणाप्रेरितापि गतेति बोध्यं ॥ २६ ॥ प्रदराः बाणाः । "प्रदरा भङ्गनारीरुग्बाणाः" इत्यमरः । तथा तीक्ष्णप्रदरा अपीति योज्यं । तमेनमित्यन्वयः । उत्थितं राक्षसान् दृष्ट्वा अभिमुखमुद्गतमिति रामविशेषणं । उत्तरसर्गसंग्रहोयं श्लोकः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकोनविंशः सर्गः ॥ १९ ॥

अथ चतुर्दशराक्षसवधो विंशे । ततः शूर्पणखेत्यादि ॥ १—३ ॥ प्रत्यनन्तरः प्रत्यासन्नः रक्षक इति

" भीष्मउवाच । याज्ञवल्क्यसुता राजंस्त्रयोवैलोकविश्रुता । चन्द्रकान्तमहामेघविजयाब्राह्मणोत्तमाः । खरश्चदूषणश्चेतित्रिशिरा ब्रह्मवित्तमाः । आसंस्तेषांचशिष्याश्च चतुर्दशसहस्रधा " इति । अतएव बाह्यदृष्ट्यापरुषोक्तिवत्प्रतीयमानानि तस्यवाक्यानिसौम्यरूपाण्येव तथाव्याख्यास्यामः ॥ २१ ॥ स० रुधिरंममपास्यतीत्यन्वयेन खरमरणमसूचयत्कविरितिज्ञेयं ॥ ती० वस्तुतस्तु हेराक्षसाः इयंभगिनी प्रमथ्यममरुधिरंपास्यति । अतस्तेषांसमीपंगत्वा स्वतेजसाशीघ्रेणतौरामलक्ष्मणौ । दुर्वृत्तां दुर्लभंवृत्तंआचारोयस्यास्तांसीतांच हत्वा ज्ञात्वा । "हन हिंसागत्योः" इतिधातोर्गत्यर्थस्यज्ञानार्थत्वात् । अपावर्तितुं प्रतिनिवर्तितुमर्हथ । अयंमम भगिन्याः इष्टोमनोरथः ॥ २३ ॥ इत्येकोनविंशस्सर्गः ॥ १९ ॥

ति० सहसीतया वर्तमानावितिशेषः ॥ १ ॥

[पा०] १ क.—ट. मुपावर्तितुं. २ ख. ङ.—ट. भगिनीतेषांरुधिरं. ३ क.—ट. गत्वातौप्रमथ्यस्वतेजसा. ४ क. ख. ङ. झ. ट. पुस्तकेष्वयंश्लोकोदृश्यते. ५ क. भूरि. अयं पाठः झ. ट. पाठयोर्नदृश्यते. ६ च. छ. ज. तेराघवमुग्रतेजसं. ७ च. छ. ज. तथासुतीक्ष्णप्रदराश्चराक्षसाः. घ. दुरासदंधर्षयितुंनचाशकन्वनद्विपादीप्तमिवाग्निमुद्धतं. ८ क. च. ज. वनेद्विपाः. ९ छ. दीप्तदवाग्नि. १० क. ग. घ. माश्रिता. ११ ङ. झ. ट. राक्षसानाचचक्षे. १२ ङ.—ट. लक्ष्मणेनापिसेवितं. १३ झ. ट. तांदृष्ट्वा. १४ ख. ङ. झ. ट. नागतांस्तांश्चरक्षसान्. १५ ज. मागतानहं.

वाक्यमेतत्ततः श्रुत्वा रामस्य विदितात्मनः ॥ तथेति लक्ष्मणो वाक्यं रामस्य प्रत्यपूजयत् ॥ ५ ॥
राघवोपि महच्चापं चामीकरविभूषितम् ॥ चकार सज्यं धर्मात्मा तानि रक्षांसि चाब्रवीत् ॥ ६ ॥
पुत्रौ दशरथस्यावां भ्रातरौ रामलक्ष्मणौ ॥ प्रविष्टौ सीतया सार्धं दुश्चरं दण्डकावनम् ॥ ७ ॥
फलमूलाशनौ दान्तौ तापसौ धर्मचारिणौ ॥ वसन्तौ दण्डकारण्ये किमर्थमुपहिंसथ ॥ ८ ॥
युष्मान्पापात्मकान्हन्तुं विप्रकारान्महाहवे ॥ ऋषीणां तु नियोगेन प्राप्तोऽहं सशरायुधः ॥ ९ ॥
तिष्ठतैवात्र संतुष्टा नोपावर्तितुमर्हथ ॥ यदि प्राणैरिहार्थो वा निवर्तध्वं निशाचराः ॥ १० ॥
तस्य तद्वचनं श्रुत्वा राक्षसास्ते चतुर्दश ॥ ऊचुर्वाचं सुसंक्रुद्धा ब्रह्मघ्नाः शूलपाणयः ॥ ११ ॥
संरक्तनयना घोरा रामं संरक्तलोचनम् ॥ परुषं मधुराभाषं हृष्टा दृष्टपराक्रमम् ॥ १२ ॥
क्रोधमुत्पाद्य नो भर्तुः खरस्य सुमहात्मनः ॥ त्वमेव हास्यसे प्राणानद्यास्माभिर्हतो युधि ॥ १३ ॥
का हि ते शक्तिरेकस्य बहूनां रणमूर्धनि ॥ अस्माकमग्रतः स्थातुं किं पुनर्योद्धुमाहवे ॥ १४ ॥
एहि बाहुप्रयुक्तैर्नः परिघैः शूलपट्टिशैः ॥ प्राणांस्त्यक्ष्यसि वीर्यं च धनुश्च करपीडितम् ॥ १५ ॥
इत्येवमुक्त्वा संक्रुद्धा राक्षसास्ते चतुर्दश ॥ [उद्यतायुधनिस्त्रिंशा राममेवाभिदुद्रुवुः ॥]
चिक्षिपुस्तानि शूलानि राघवं प्रति दुर्जयम् ॥ १६ ॥

यावत् । अस्याः पदवीमागतानित्यन्वयः ॥ ४ ॥ प्रत्यपूजयत् परिपालितवान् ॥ ५ ॥ चामीकरं स्वर्णं ॥ ६ ॥ स्वस्य कपटवेषत्वं परिहरन्नाह—पुत्रावित्यादि । आवां किमर्थमुपहिंसथ ॥७—८॥ प्रत्युत युष्मानेवाहं हन्तुमागत इत्याह—युष्मानिति । विप्रकारान् हिंसकान् । भवतां प्रथमप्रवृत्तिमाकाङ्क्षन्स्थितोस्मीत्यर्थः ॥ ९ ॥ अत्रैव संतुष्टाः अभीता इति यावत् । तिष्ठत नोपावर्तितुमर्हथेति मा पलायध्वमित्यर्थः । यदि वा प्राणैः अर्थः प्रयोजनं प्राणापेक्षास्ति चेन्निवर्तध्वमित्यर्थः ॥ १० ॥ ब्रह्मघ्नाः ब्राह्मणघ्नाः ॥ ११—१३ ॥ शक्तिः बलं । " शक्तिर्बले प्रभावादौ " इतिविश्वः ॥ १४ ॥ परिघैः गदाभेदैः । पट्टिशैः असिभेदैः ॥१५॥ तानि

ति० अनपकारिणामस्माकंहिंसार्थया युष्मत्प्रवृत्त्या युष्मद्वधार्थमस्मदपेक्षितनिमित्तं संपन्नमित्याह—युष्मानिति । विप्रकारान् भवत्कृतपीडारूपान्निमित्ताज्जातनियोगेन युष्मान्हन्तुं सशरासनोऽहं संप्राप्तः संप्राप्तनिमित्तः । यद्वा विप्रकारानित्यर्शआद्यजन्तं । अस्मास्वस्मदीयेषु च वृथावैरवतोयुष्मानित्यर्थः ॥ ९ ॥ ती० हेसंदुष्टाः अतिदुष्टाः ॥ १० ॥ शि० संरक्तनयना रामवचनश्रवणजनितकोपहेतुकारुण्यविशिष्टनेत्रवन्तः । संरक्तलोचनं स्वाभाविकारुण्यविशिष्टनयनविशिष्टं ॥ ति० अदृष्टपराक्रममितिच्छेदः संधिरार्षः ॥ १२ ॥ ती० क्रोधमुत्पाद्येत्यादिश्लोकत्रयस्यप्रातीतिकार्थस्स्पष्टः । वस्तुतस्तु सुमहात्मनः सुमहानात्माशरीरंयस्यसः भर्तुराज्ञः खरस्य क्रोधमुत्पाद्य । तत्प्रेरितैरस्माभिरतितुच्छैः हतः ताडितोपित्वं प्राणान्नोहास्यस्येव । अत्रहेतुः काहीति । रणमूर्धन्येकस्यतेऽग्रतः स्थातुंबहूनामप्यस्माकंकाशक्तिः शक्तिर्नास्ति तदा किंपुनर्योद्धुमितियोजना । अतएव खरनिर्बन्धेनागतानामस्माकमित्यत्राप्याकृष्यते । परिघादिभिरुपलक्षितानामस्माकंप्राणान् । वीर्यमित्यादिजात्येकवचनं । वीर्यादिकंच त्यक्ष्यसि । गर्भितणिच् । त्याजयिष्यसि । नसंदेहः । अतएवहीतिसंबन्धः । इतःपरावृत्त्यगतानामस्माकंखरहस्तवधाद्वरं लब्धस्तेनवधइतिभावः ॥ १३—१५ ॥

[पा०] १ ख. ग. ज. मेतत्तुतच्छ्रुत्वा. २ घ. ङ. झ. राघवस्यप्रपूजयन्. ३ ब्रह्मचारिणौ. ४ च. ज. ञ. पापात्मनो हन्तुं. ५ क. घ. च. छ. ज. ञ. न्महावने. ६ ङ.–ट. संप्राप्त. ७ ङ. झ. ट. सशरासनः. ८ च. संदुष्टाः. ९ क. ङ.—ज. ञ. ट. नोपसर्पितुं. ख. ग. घ. नोपासर्पितुं. १० ख. ग. च.–ञ. वो. ११ ख. वचः. ग. वचनसंक्रुद्धाः. १२ क. ग. च. छ. ज. ञ. रक्तान्तलोचनं. १३ क. ख. ङ.–ट. पुरुषः. १४ ख. दृष्टाधृष्ट. १५ क. प्राणानिहास्माभिः. ङ. झ. प्राणान्सद्योस्माभिः. च. छ. ज. ञ. प्राणान्रामास्माभिः. १६ क. ख. घ. ङ. च. ज.–ट. एभिः. १७ छ. ञ. बाहुविनिर्मुक्तैः. च. ज. बाहुविमुक्तैर्नः. ङ. झ. बाहुप्रत्युक्तैश्च. ख. बाहुप्रत्युक्तैस्तु. १८ क.–घ. पट्टसैः. १९ क. ङ. च. छ. झ. ञ. ट. संरब्धाः. ज. संरुद्धाः. २० क. ख. ङ.–ट. पाठेष्विदमर्धंदृश्यते. २१ ख. तावुभावभिदुद्रुवुः.

तानि शूलानि काकुत्स्थः समस्तानि चतुर्दश ॥ तावद्भिरेव चिच्छेद शरैः काञ्चनभूषणैः ॥ १७ ॥
ततः पैशान्महातेजा नाराचान्सूर्यसन्निभान् ॥ जग्राह परमक्रुद्धश्चतुर्दश शिलाशितान् ॥ १८ ॥
गृहीत्वा धनुरायम्य लक्ष्यानुद्दिश्य राक्षसान् ॥ मुमोच राघवो बाणान्वज्रानिव शतक्रतुः ॥ १९ ॥
रुक्मपुङ्खाश्च विशिखा दीप्ता हेमविभूषिताः ॥ [अन्तरिक्षे महोल्कानां बभूवुस्तुल्यदर्शनाः]॥२०॥
ते भित्त्वा रक्षसां वेगाद्वक्षांसि रुधिराप्लुताः ॥ विनिष्पेतुस्तदा भूमौ न्यमज्जन्ताशनिक्षताः ॥२१॥
ते भिन्नहृदया भूमौ छिन्नमूला इव द्रुमाः ॥ निपेतुः शोणितार्द्राङ्गा विकृता विगतासवः ॥२२॥
तान्दृष्ट्वा पतितान्भूमौ राक्षसी क्रोधमूर्च्छिता ॥ परित्रस्ता पुनस्तत्र व्यसृजद्भैरवस्वनान् ॥ २३ ॥
सा नदन्ती पुनर्नादं जवाच्छूर्पणखा पुनः ॥ [जगाम तत्र संभ्रान्ता खरो यत्र महाबलः] ॥२४॥
उपगम्य खरं सा तु किंचित्संशुष्कशोणिता ॥ पपात पुनरेवार्ता सनिर्यासेव वल्लकी ॥ २५ ॥
भ्रातुः समीपे शोकार्ता ससर्ज निनदं मुहुः ॥ [भूमौ शयाना दुःखार्ता लब्धसंज्ञा चिरात्पुनः] ॥
सस्वरं मुमुचे बाष्पं विवर्णवदना तदा ॥ २६ ॥

निपातितान्दृश्य रणे तु राक्षसान्प्रधाविता शूर्पणखा पुनस्ततः ॥
वधं च तेषां निखिलेन रक्षसां शशंस सर्वं भगिनी खरस्य सा ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे विंशः सर्गः ॥ २० ॥

शूलपाणय इति पूर्वमुक्तानि ॥ १६—१७ ॥ नाराचान् अफलकान्बाणान् । शिलाशितान् शिलास्वपि शितान् शिलानिर्भेदक्षमानित्यर्थः । शाणोपलसन्निघृष्टानित्यप्याहुः ॥ १८ ॥ लक्ष्यान् वेध्यान् । वज्रानित्यभूतोपमा ॥ १९—२० ॥ न्यमज्जन्त न्यमज्जन्तेत्यर्थः ॥ २१ ॥ विकृताः विरूपाः । विगतासवः विगतप्राणाः ॥ २२ ॥ भैरवस्वनान् भयंकरशब्दान् ॥ २३ ॥ महानादं नदन्ती कुर्वन्तीत्यर्थः ॥ २४ ॥ निर्यासः क्षतप्रसृतवृक्षरसः । सङ्कीलतविशेषः ॥२५—२६॥ पुनः सर्गार्थं संक्षेपेणाह—निपातितानिति । इदम् दृष्ट्वा । अस्मिन्सर्गे पञ्चविंशतिश्लोकाः ॥ २७ ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने विंशः सर्गः ॥ २० ॥

स० खिलोदुर्बलोनभवतीत्यखिलः प्रबलोरामः । तेनवधं ॥ २७ ॥ इतिविंशस्सर्गः ॥ २० ॥

[पा०] १ तानिशूलानीतिश्लोकानन्तरं च. छ. ज. पुस्तकेषु. अभिपत्यततो वेगाच्चिक्षिपुस्तेनिशाचराः । परिघान्पट्टिशाञ्शूलांश्चतुर्दश चतुर्दश ॥ तावद्भिरवचिच्छेदसमस्तान्सवरायुधान् । चतुर्दशभिरव्यग्रःशरैःकाञ्चनभूषणैः ॥ इतिश्लोकद्वयमधिकं दृश्यते अ. पुस्तकेतु. तानागतान्प्रचिच्छेदसमस्तान्सवरायुधान् । चतुर्दशभिरव्यग्रःशरैःकाञ्चनभूषितैः ॥ इत्येकःश्लोकोऽधिको दृश्यते. २ ख. कनकभूषणैः. ग ङ. झ. ट. काञ्चनभूषितैः. ३ ङ. छ.—ञ. पश्यन्महातेजाः. ४ ख ग. शराञ्शितान्. ५ च. ज. गृहीतधनुरानम्य. ६ च. छ. ज. प्रदीप्ताहेमभूषणाः. क. ग. प्रदीप्ताहेमभूषिताः. ख. दीप्ताहेमपरिष्कृताः. ७ इदमर्धं क. ख. पाठयोर्दृश्यते ८ ङ. ज. झ. ट. रुधिरप्लुताः. ९ क. विनिपेतुः. १० ङ.—ट. वल्मीकादिवपन्नगाः. ११ क. ख. ग. म. तैर्भिन्न. ङ. झ. ट. तैर्भग्न. १२ ङ. झ. भिन्नमूलाः. १३ ग. ङ. झ. ञ. शोणितस्नाताः च. छ. ज. म. शोणिताक्ताङ्गाः. क. शोणितादिग्धाः. १४ ख. छ. ज. ञ. राक्षसान्पतितान्दृष्ट्वा. क. ख. ग. ङ. झ. ट. तान्भूमौपतितान्दृष्ट्वा. १५ ख. घ. क्षणेनैवमहाबलान्. १६ ख. ग. खरान्. १७ क.—घ. च. छ. ज. ञ. महानादं. १८ छ. यथाशूर्पनखी. १९ इदमर्धं च. छ. ज. म. पाठेषुदृश्यते. २० ख. घ.—ट. वल्लरी. २१ ग. विसज्य. २२ ङ.—झ. ट. महत्. २३ इदमर्धं क. च. छ. ज. म. पाठेषुदृश्यते. २४ ङ.—ट. विवर्णवदना. २५ क. घ.—ट. न्यस्त. २६ च. छ. ज. म. पुनःपुनः. २७ ठ. तेषामखिलेन.

एकविंशः सर्गः ॥ २१ ॥

खरेणसरोदनंपुनरागतांशूर्पणखांप्रतिसान्त्वनंरोदनकारणप्रश्नः ॥ १ ॥ तयातंप्रतित्वेषितरक्षसांरामेणहननंनिवेदनपूर्वकं परुषभाषणेणोत्साहनम् ॥ २ ॥

सं पुनः पतितां दृष्ट्वा क्रोधाच्छूर्पणखां खरः ॥ उवाच व्यक्तया वाचा तामनर्थार्थमागताम् ॥१॥
मया त्विदानीं शूरास्ते राक्षसा रुधिराशनाः ॥ त्वत्प्रियार्थं विनिर्दिष्टाः किमर्थं रुद्यते पुनः ॥ २ ॥
भक्ताश्चैवानुरक्ताश्च हिताश्च मम नित्यशः ॥ घ्नन्तोपि न निहन्तव्या न न कुर्युर्वचो मम ॥ ३ ॥
किमेतच्छ्रोतुमिच्छामि कारणं यत्कृते पुनः ॥ हा नाथेति विनर्दन्ती सर्पवल्लुठसि क्षितौ ॥ ४ ॥
अनाथवद्विलपसि नाथे तु मयि संस्थिते ॥ उत्तिष्ठोत्तिष्ठ मा भैषीर्वैक्लव्यं त्यज्यतामिह ॥ ५ ॥
इत्येवमुक्ता दुर्धर्षा खरेण परिसान्त्विता ॥ विमृज्य नयने सोत्रे खरं भ्रातरमब्रवीत् ॥ ६ ॥
अस्मीदानीमहं प्राप्ता हृतश्रवणनासिका ॥ शोणितौघपरिक्लिन्ना त्वया च परिसान्त्विता ॥ ७ ॥
प्रेषितांश्च त्वया वीर रौक्षसास्ते चतुर्दश ॥ निहन्तुं राघवं क्रोधान्मत्प्रियार्थं सलक्ष्मणम् ॥ ८ ॥
ते तु रामेण सामर्षाः शूलपट्टिशपाणयः ॥ समरे निहताः सर्वे सायकैर्मर्मभेदिभिः ॥ ९ ॥
तान्दृष्ट्वा पतितान्भूमौ क्षणेनैव महाबलान् ॥ रामस्य च महत्कर्म महांस्त्रासोऽभवन्मम ॥ १० ॥
अहमस्मि समुद्विग्ना विषण्णा च निशाचर ॥ शरणं त्वां पुनः प्राप्ता सर्वतोभयदर्शिनी ॥ ११ ॥
विषादनक्राध्युषिते परित्रासोर्मिमालिनि ॥ किं मां न त्रायसे मग्नां विपुले शोकसागरे ॥ १२ ॥
एते चैव निहता भूमौ रामेण निशितैः शरैः ॥ येऽपि मे पदवीं प्राप्ता राक्षसाः पिशिताशनाः ॥१३॥
मयि ते यद्यनुक्रोशो यदि रक्षस्सुतेषु च ॥ रामेण यदि ते शक्तिस्तेजो वाऽस्ति निशाचर ॥
दण्डकारण्यनिलयं जहि राक्षसकण्टकम् ॥ १४ ॥

अथ खरप्रोत्साहनमेकविंशे—स पुनरित्यादि । अनर्थार्थं सर्वराक्षसविनाशार्थं ॥ १—२ ॥ भक्ताः विश्वासभाजः । हिताः हितपराः । नकुर्युरिति न किंतु कुर्युरेवेत्यर्थः ॥ ३ ॥ किमेतदिति विस्मये । यत्कृते यस्यकृते । कृत इत्यव्ययं । यन्निमित्तं लुठसि तस्य कारणं श्रोतुमिच्छामीत्यन्वयः ॥४॥ विलपसीति किमिति शेषः । वैक्लव्यं कातर्यं । इह मत्समीपे ॥५॥ दुर्धर्षा दुःसाध्या ॥ ६ ॥ खरोक्तमङ्गीकरोति—अस्मीत्यादिना ॥ ७—१० ॥ समुद्विग्ना भीता । विषण्णा दुःखिता । सर्वतो भयदर्शिनी सर्वत्ररामप्रतिभासवतीति भावः ॥ ११ ॥ नक्रो ग्राहः ॥ १२ ॥ क्रोधभीतिभ्यां पूर्वोक्तं विस्मृत्य पुनराह—एते चेति ॥ १३ ॥ अनुक्रोशो दया । शक्तिरिति तुल्येति शेषः

ति० यदितेशक्तिः योढुमितिशेषः । ती० रामेणेत्यादिश्लोकचतुष्टयस्यप्रातीतिकार्थस्स्पष्टः । वस्तुतस्तु—शूर्पणखारामंनजहीतिहितदुष्प्राक्खरनिवारयति—रामेणेत्यादिना । हेनिशाचर रामेण तेशक्तिः वीर्यंतेजोवास्तियदि । तथापिअमित्रघ्नंदण्ड-

[पा०] १ ख. तांपुनः. २ ङ. झ. ट. पुनः. ३ ख. गतास्त्विदानीं. ४ ख. ङ.—ट. पिशिताशनाः. ५ ख. मयोद्दिष्टाः. ६ ख. भीताश्च. ७ क. ख. ग. ङ.—ट. हन्यमानानहन्यन्ते. ८ घ. निहन्यन्ते. ९ क.—घ. सर्पवद्वेष्टसे. ङ. च. ज.—ट. सर्पवच्चेष्टसे. १० क.—घ. च. ट. किंतुनाथेमयिस्थिते. ङ. छ.—ञ. किंतुनाथेमयिस्थिते. ११ क.—घ. च. ज. ञ. मामैवं. ङ. झ. ट. मामैवं. १२ ङ.—ट. लज्यतामिति. १३ ग. सालेवं. १४ ख. विदूल. १५ ग. सास्ये. १६ ख. खयातु. १७ ख. प्रेषितास्ते. १८ क.—ट. शूराः. १९ ख. छ. ट. राक्षसाश्च. २० च.—ञ. घोरंमत्प्रियार्थं. ङ. ट. घोरामत्प्रियार्थं. २१ क. ख. ग. ङ. च. ज.-ट. तान्भूमौपतितान्दृष्ट्वा. २२ ङ.-ट. महाबलान्. २३ च. छ. ज. ञ. सास्मिभीताभयोद्विग्ना. क. ग. ङ. झ. ट. सास्मिभीतासमुद्विग्ना. २४ ख. विषण्णास्मि. २५ ख. प्रपन्नाहं. २६ च. छ. ज. ञ. विनिहता. २७ ख. घ. ङ. झ. मेच. २८ च. ज. ञ. यदितेमम्यनु. २९ क. रामेवा. ३० क. झ. यदिशक्तिस्ते.

यदि रामं ममामित्रं न त्वमद्य वधिष्यसि ॥ तव चैवाग्रतः प्राणांस्त्यक्ष्यामि निरपत्रपा ॥ १५ ॥
बुध्याऽहमनुपश्यामि न त्वं रामस्य संयुगे ॥ स्थातुं प्रतिमुखे शक्तः सबलश्च महात्मनः ॥ १६ ॥
शूरमानी न शूरस्त्वं मिथ्यारोपितविक्रमः ॥ मानुषौ यौ न शक्नोषि हन्तुं तौ रामलक्ष्मणौ ॥१७॥
रामेण यदि ते शक्तिस्तेजो वोऽस्ति निशाचर ॥ दण्डकारण्यनिलयं जहि तं कुलपांसन ॥ १८ ॥
निःसत्त्वस्याल्पवीर्यस्य वासस्ते कीदृशस्त्विह ॥ अपयाहि जनस्थानात्त्वरितः सहबान्धवः ॥
[जहि त्वं समरे मूढाऽन्यथा तु कुलपांसन] ॥ १९ ॥
रामतेजोभिभूतो हि त्वं क्षिप्रं विनशिष्यसि ॥ २० ॥
स हि तेजःसमायुक्तो रामो दशरथात्मजः ॥ भ्राता चास्य महावीर्यो येन चासि विरूपिता ॥२१॥
एवं विलप्य बहुशो राक्षसी विततोदरी ॥ भ्रातुः समीपे दुःखार्ता नष्टसंज्ञा बभूव ह ॥
कराभ्यामुदरं हत्वा रुरोद भृशदुःखिता ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकविंशः सर्गः ॥ २१ ॥

द्वाविंशः सर्गः ॥ २२ ॥

खरेणशूर्पणखासमाश्वासनपूर्वकंदूषणंप्रतिसेनासंनाहनादिचोदना ॥ १ ॥ तथादूषणानायितरथाधिरोहणेनचतुर्दशसहस्रसंख्याकराक्षससैन्यावृषणेनचसहरणायत्रियाणम् ॥ २ ॥

एवमाधर्षितः शूरः शूर्पणख्या खरस्तदा ॥ उवाच रक्षसां मध्ये खरः खरतरं वचः ॥ १ ॥
तवावमानप्रभवः क्रोधोऽयमतुलो मम ॥ न शक्यते धारयितुं लवणाम्भ इवोत्थितम् ॥ २ ॥

॥ १४ ॥ निरपत्रपा निर्लज्जा । छृतकर्णनासात्वादिति भावः ॥ १५ ॥ प्रतिमुखे अग्रे । सबलः ससैन्यः ॥१६॥ मिथ्येति मिथ्यावचोभिरित्यर्थः । आरोपितविक्रमः कल्पितपराक्रमः ॥ १७—१८ ॥ कीदृश इति अत्यन्तायोग्य इत्यर्थः ॥१९—२१॥ विततोदरी महाराार्थं विस्तृतोदरी । अत्र द्वाविंशतिःश्लोकाः ॥२२॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकविंशः सर्गः ॥ २१ ॥

अथ खरस्य युद्धोद्योगो द्वाविंशे । आधर्षितः अवमानितः । खरः दारुणः । खरतरं परुषतरं ॥१॥ लवणाम्भ

आरण्यनिलयं । रामंलंनजहि मावधीः । यदिहनिष्यसि तर्हि तवाग्रतोहंप्राणांस्त्यक्ष्यामीतिसंबन्धः । विचार्यमाणेतयोर्हननेतवशक्तिरपिनास्तीत्याह—बुध्येति ॥ १४—१७ ॥ इत्येकविंशस्सर्गः ॥ २१ ॥

स० अखरः स्वभावतोऽक्रूरः । याज्ञवल्क्यसुतत्वात् । यथोक्तंशान्तिपर्वणि " याज्ञवल्क्यसुतारात्रिम्- " इत्यादि ॥ १ ॥ ती० आत्मनीत्यध्याहारः । आत्मनिकोपोवारयितुंनशक्यतइत्यन्वयः । लवणांभइवोत्थितं । व्रणइतिशेषः । व्रणेविक्षिप्तंलवणयुक्तमंभइव धारयितुंनशक्यतइत्यर्थः । उदितमितिपाठे उदितं न्यस्तं । त्रि० ममेतिमयेत्यर्थेसंबन्धेषष्ठी । स० क्रोधः यम-

[पा०] १ क. ग. ङ. छ. झ. ट. राममित्रं. २ ख. छ. ज. ञ. मित्रमयत्नेन. ३ च, छ, ज. ञ. तवाहमग्रतः. ध. तवैवाग्रतः. ४ क. मनुशोचामि. ५ क. ग. ख. छ. ज. सचापल्यमहारणे. ख. सचापल्यमहात्मनः. ङ. झ. ञ. ट. सबलोपिमहारणे. ६ शूरमानीत्यर्धादनन्तरं झ. पुस्तके. अपयाहि. जहित्वं. मानुषौतौ. निस्सत्वस्येत्यर्धानिएवंक्रमेणदृश्यन्ते. किंचरामेणयदितेशक्तिरितिपुनरपिदृश्यमानोऽष्टादशःश्लोकश्चनदृश्यते. ७ ङ. झ. ञ. मानुषौतौ. क. ग. मनुष्यौमौ. च. छ. ज. मनुष्यौयत्र. ८ ङ. झ. ञ. इन्तुंवै. क. ग. इन्तुंलं. ९ घ. वापि. १० ग. खं. ११ ख. च. छ. ज. ञ. बाम्भवैः. १२ इदमर्धं झ पुस्तके दृश्यते. १३ क. ग. बहुधा. १४ घ. च. छ. ज. ञ. प्रततोदरी. ङ. झ. ट. प्रदरोदरी. १५ क. ग. ङ.—ट. शोकार्ता. १६ क. ग. घ. च. छ. ज. बभूवसा. १७ क. ग. झ. ट. स्तः. १८ क. कोपोयं. १९ ङ.—ट. इवोल्बणं.

न रामं गणये वीर्यान्मानुषं क्षीणजीवितम् ॥ आत्मदुश्चरितैः प्राणान्हतो योऽद्य विमोक्ष्यति ॥३॥
बाष्पः संह्रियतामेष संभ्रमश्च विमुच्यताम् ॥ अहं रामं सह भ्रात्रा नयामि यमसादनम् ॥ ४ ॥
परश्वधेहतस्याद्य मन्दप्राणस्य संयुगे ॥ रामस्य रुधिरं रक्तमुष्णं पास्यसि राक्षसि ॥ ५ ॥
सा हृष्टा वचः श्रुत्वा खरस्य वदनाच्युतम् ॥ प्रशशंस पुनर्मौर्ख्याद्भ्रातरं रक्षसां वरम् ॥ ६ ॥
तया परुषितः पूर्वं पुनरेव प्रशंसितः ॥ अब्रवीद्दूषणं नाम खरः सेनापतिं तदा ॥ ७ ॥
चतुर्दश सहस्राणि मम चित्तानुवर्तिनाम् ॥ रक्षसां भीमवेगानां समरेष्वनिवर्तिनाम् ॥ ८ ॥
नीलजीमूतवर्णानां घोराणां क्रूरकर्मणाम् ॥ लोकहिंसाविहाराणां बलिनामुग्रतेजसाम् ॥ ९ ॥
"तेषां शार्दूलदर्पाणां महास्यानां महौजसाम् ॥ सर्वोद्योगमुदीर्णानां रक्षसां सौम्य कारय ॥ १० ॥
उपस्थापय मे क्षिप्रं रथं सौम्य धनूंषि च ॥ शरांश्चित्रांश्च खड्गांश्च शक्तीश्च विविधाः शिताः ॥११॥
अग्रे निर्यातुमिच्छामि पौलस्त्यानां महात्मनाम् ॥ वधार्थं दुर्विनीतस्य रामस्य रणकोविदः ॥१२॥
इति तस्य ब्रुवाणस्य सूर्यवर्णं महारथम् ॥ सदश्वैः शबलैर्युक्तमाचचक्षेऽथ दूषणः ॥ १३ ॥
तं मेरुशिखराकारं तप्तकाञ्चनभूषणम् ॥ हेमचक्रमसंबाधं वैडूर्यमयकूबरम् ॥ १४ ॥

म्भः लवणसमुद्राम्भः । उत्थितं पर्वण्युल्बणं ॥२॥ यः आत्मदुश्चरितैरेव हतः सन् अद्य प्राणान्विमोक्ष्यति तं रामं न गणये ॥३॥ संह्रियतां निवर्त्यतां । सदनमेव सादनं ॥ ४ ॥ परश्वधः कुठारः । मन्दप्राणस्य अल्पप्राणस्य । औष्ण्यार्थमिदमुक्तं रक्तवर्णत्वार्थं च ॥ ५ ॥ मौर्ख्यात् अव्यवस्थितचित्ततया । पुनः प्रशशंस ॥६॥ अमुमर्थं विशदयति—तयेति ॥ ७ ॥ चतुर्दशेत्यादिश्लोकत्रयमेकंवाक्यं । चतुर्दश सहस्राणि सन्तीति शेषः । घोराणां घोररूपाणां । लोकहिंसाविहाराणां जनवधैकलीलानां । महास्यानां विकृतमुखानामिति यावत् । उदीर्णानां गर्वितानां सर्वोद्योगं सर्वप्रकारैरुद्योगं सर्वायुधवाहनादिभिरुद्योगमित्यर्थः ॥८—१०॥ शक्तिः आयुधविशेषान् ॥ ११ ॥ पौलस्त्यानां पुलस्त्यवंश्यानां अग्रे रणकोविदोहं गन्तुमिच्छामीत्यन्वयः । रामस्य रणज्ञत्वात् पौलस्त्यानां वधार्थमिति दैवी वाक् भाविसूचनी ॥१२॥ शबलैः नानावर्णैः । "शबलैताश्च कर्बुरे" इत्यमरः । महारथं सदश्वैर्युक्तमाचचक्ष इत्यन्वयः ॥ १३ ॥ तप्तकाञ्चनं परिशुद्धकाञ्चनं । असंबाधं विस्तीर्णं । कूबरः युगंधरः ।

मुलः यमसदनः । तद्वन्मारकत्वात् । अयमिलपिच्छेदः ॥ २ ॥ ती० आत्मदुश्चरितैः विरूपकरणैः ॥ ३ ॥ ती० संभ्रमः भयं ॥ ४ ॥ ति० तवावमानप्रभवदुःखादिश्लोकचतुष्टयस्य वास्तवार्थस्तु—तवावमानप्रभवः तत्संबन्ध्यवमानोत्पन्नः मयित्वयाकृतावमानप्रभवदुःखार्थः । क्रोधः धारयितुंनशक्यते ॥ किंचमानुषंच । वीर्यात् मच्छौर्यात् । क्षीणजीवितं नगणये । तमहंजेतुंनशक्नोमीत्यर्थः । स रामएव । प्राणान् मदीयप्राणान् । मोक्ष्यति मोक्षयिष्यतीत्यर्थः । अतोहेदुर्मते आत्मदुश्चरितैः स्वापचारव्यापारैः । अद्य अयः मच्छुभावहविधिः हतः । तन्निमित्तेममैश्वर्यक्षीणजीवितंच नष्टमितिभावः । इतःपरंबाष्पस्संह्रियतां । संभ्रमश्चविमुच्यतां । अहंभ्रात्रासहरामंप्रतियामि । ममसादनंचयामि नसन्देहइत्यर्थः । परश्वधेति । ततः परं रामस्यपरश्वधहतस्य रामसंबन्धिपरश्वधेनहतस्य मन्दप्राणस्य भूतलेपतितस्य । ममेतिशेषः । हेराक्षसि रुधिरंपास्यसीतिसंबन्धः । ति० परश्वधहतस्येति । परश्वधस्तस्य मुख्यमायुधमित्यनेनज्ञायते । रक्तं रक्तवर्णमित्यर्थः ॥ ५ ॥ ती० तयेति । पुनश्शंसितत्वमेवसकलरक्षश्श्रेष्ठत्वादि । स० परुषितः श्रावितनिष्ठुरवाक् । दूषितहृदियावत् ॥ ७ ॥ स० पौलस्त्यानांमध्ये रणकोविदः ॥ १२ ॥

[पा०] १ ख. क्षणजीवितं. २ घ.—ङ. ट. विमोक्ष्यते. ३ क. ङ. ट. संधार्यतां. घ. संह्रियतां. ४ ख. हतस्यास्य. घ. हतस्याथ. ५ क. ख. ग. ङ. ट. भूतले. ६ क. च. छ. ज. काङ्क्षितं. ७ च. छ. ज. ञ. प्रहृष्टवचनं. क. झ. ट. संप्रहृष्टः. ८ अस्यश्लोकस्यप्रतिनिधिस्तया. नीलजीमूतवर्णानांलोकहिंसाविहारिणां. इत्यर्धमेव ग. ङ. झ. ट. पुस्तकेषुदृश्यते. ९ क. ख. च. छ ञ. कामरूपिणां. १० लोकहिंसाविहाराणां. तेषांशार्दूलदर्पाणां. इत्यनयोरर्धयोःपौर्वापर्यं च. छ. ज. ञ. पाठेषुदृश्यते. ११ ग. ङ. छ. ट. पुस्तकेष्विदमर्धनदृश्यते १२ ख. शार्दूलखलानां. १३ च. छ. ज. ञ. महात्मनां. १४ ग. रथंचचित्रान्खड्गांश्च. ख. ङ.—ट. शरांश्चचित्रान्खड्गांश्च. १५ च. छ. ञ. रणमूर्धनि. १६ ग. सचलैः.

मत्स्यैः पुष्पैर्द्रुमैः शैलैश्चन्द्रसूर्यैश्च काञ्चनैः ॥ मङ्गलैः पक्षिसङ्घैश्च तारााभिरभिसंवृतम् ॥ १५ ॥
ध्वजनिस्त्रिंशसंपन्नं किङ्किणीकविराजितम् ॥ सदश्वयुक्तं सोमर्षादारुरोह खरो रथम् ॥ १६ ॥
निशाम्य तु रथस्थं तं राक्षसा भीमविक्रमाः ॥ तस्थुः संपरिवार्यैनं दूषणं च महाबलम् ॥ १७ ॥
खरस्तु तान्महेष्वासान्घोरवर्मायुधध्वजान् ॥ निर्यातेत्यब्रवीद्दृष्टो रथस्थः सर्वराक्षसान् ॥ १८ ॥
ततस्तद्राक्षसं सैन्यं घोरवर्मायुधध्वजम् ॥ निर्जगाम जनस्थानान्महानादं महाजवम् ॥ १९ ॥
मुद्गरैः पट्टिशैः शूलैः सुतीक्ष्णैश्च परश्वधैः ॥ खड्गैश्चक्रैश्च हस्तस्थैर्भ्राजमानैश्च तोमरैः ॥ २० ॥
शक्तिभिः परिघैर्घोरैरतिमात्रैश्च कार्मुकैः ॥ गदासिमुसलैर्वज्रैर्गृहीतैर्भीमदर्शनैः ॥ २१ ॥
राक्षसानां सुघोराणां सहस्राणि चतुर्दश ॥ निर्यातानि जनस्थानात्खरचित्तानुवर्तिनाम् ॥ २२ ॥
तांस्त्वभिद्रवतो दृष्ट्वा राक्षसान्भीमविक्रमान् ॥ खरस्यापि रथः किंचिज्जगाम तदनन्तरम् ॥२३॥
ततस्ताञ्शबलानश्वांस्तप्तकाञ्चनभूषितान् ॥ खरस्य मतिमाज्ञाय सारथिः समचोदयत् ॥ २४ ॥
स चोदितो रथः शीघ्रं खरस्य रिपुघातिनः ॥ शब्देनापूरयामास दिशश्च प्रदिशस्तदा ॥ २५ ॥
मद्बुद्धमन्युस्तु खरः खरस्वनो रिपोर्वधार्थं त्वरितो यथाऽन्तकः ॥
अचूचुदत्सारथिमुन्नदन्घनं महाबलो मेघ इवाश्मवर्षवान् ॥ २६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

"कूबरस्तुयुगंधरः" इत्यमरः ॥ १४ ॥ मङ्गलैः मङ्गलावहैः अलंकारकरैरित्यर्थः । काञ्चनैः काञ्चनविकारैः । इदं विशेषणद्वयं मत्स्यादिसर्वविशेषणं । निस्त्रिंशः असिः ॥ १५—१८ ॥ राक्षसं राक्षससंबन्धि ॥ १९ ॥ मुद्गरः लोहमयगदा । पट्टिशः पट्टयमितिद्रमिडनामयुक्त आयुधविशेषः । तोमरः वल्लयमिति द्रमिडनामयुक्तः ॥ २० ॥ शक्तिः ईट्टीति द्रमिडनामकः । परिघः कुण्डान्तडीति द्रमिडनामा । अतिमात्रैः महद्भिः । वज्रैः अष्टास्रैरायुधैः ॥ २१—२२ ॥ किंचिज्जगाम सेनासंमर्दादिति भावः । खरानुज्ञाभावाद्वा ॥ २३ ॥ मतिं संमतिं यात्राभिप्रायमिति यावत् ॥ २४ ॥ शब्देन नेमिघोषेण । प्रदिशः विदिशः ॥ २५ ॥ महाबलः झञ्झामारुतः । "झञ्झावातो महाबलः" इति निघण्टुः । तद्वान् अश्मवर्षवान् । झञ्झामारुतप्रेरित इत्यर्थः । महानिल इत्यपि पाठः । अश्मवर्षवान् अश्मवर्षोद्युक्त इत्यर्थः । घनं उपरितनमेघं ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्वाविंशः सर्गः ॥ २२ ॥

ती० अमर्षात् क्रोधादारोहेतिपराजयसूचनं । "क्रोधः कार्यविभङ्गाय" इतिशाकुनशास्त्रे ॥ १६ ॥ ति० दूषणः दूषणश्चेत्यर्थे ॥ १८ ॥ ति० संचोदितइत्यादिश्लोकद्वयं कतकसंख्यारीत्याप्रक्षिप्तं ॥ २५ ॥ इतिद्वाविंशस्सर्गः ॥ २२ ॥

[पा०] १ ङ. ञ. चन्द्रकान्तैश्च. २ क. घ. ङ. ञ. ट. माङ्गल्यै. छ. पक्षिसंघैश्चतारााभीरामाभिश्चसमावृतं. ख. पुष्पसंघैश्चमाङ्गल्यै.. ३ ग. ङ. च. ञ. ण. तारााभिश्चसमावृतं. ४ च. छ. ज. ण. किङ्किणीभिर्विभूषितं. ञ. किङ्किणीस्वरभूषितं. ङ. ट. किङ्किणीरवभूषितं. क. ख. किंकिणीजालभूषितं. ग. घ. किङ्किणीकविभूषितं. ५ ग. घ. च. छ. ज. ण. ट. सामर्षात्, ६ क. च. छ. ज. ण. ट. रथखरः.. ख. घ. ङ. ञ. खरस्तदा. ७ ख. ते. ८ क. ग. च. छ. ज. ण. तस्थुश्चपरिवार्यैनं. ९ ङ. ज. ञ. तन्महत्सैन्यंरथवर्मायुधध्वजं. ट. ततसैन्यंरथवर्मायुधध्वजं. क. तन्महाप्रासान्. १० ङ. ञ. ट. व्यब्रवीत्प्रेक्ष्य. ख. घ. व्यब्रवीद्दृष्ट्वा. ११ क. सरथः. ङ. ञ. ट. दूषणः. १२ च. छ. ज. ण. ततस्तद्रक्षसां. घ. ततस्तुतन्महत्सैन्यं. १३ ङ. ञ. ट. वर्मायुध. १४ ख. तीक्ष्णैश्चैव. १५ ख. चक्रैःखड्गैश्च. ङ. ञ. ट. खड्गैश्चकैरथस्थैश्च. १६ क.—ट. भ्राजमानैस्स. १७ ङ. ज. ञ. गदाभिर्मुसलैः.. १८ क. ग. रुग्रदर्शनैः. १९ ङ. च. छ. ञ. ण. ट. तांस्तुनिर्धावतो. २० ङ. च. छ. ञ. ण. ट. भीमदर्शनान्. २१ ङ. ञ. ट. खरस्याथ. २२ क. ख. ङ. च. छ. ण. भूषणान्. २३ क.—ङ. छ. ञ. ण. ट. मतं. २४ ञ. संचोदितः. २५ ङ. च. ञ. ट. दिशस्सप्रदिशः.. २६ क. ङ. च. छ. ञ. ण ट. तथा. २७ ङ. ञ, खरस्वनः. २८ क. ग. ङ.—ट. मुन्नदन्पुनः. ख. घ. मुन्नदन्घनं.

त्रयोविंशः सर्गः ॥ २३ ॥

खरेण रणप्रयाणसमयसमुत्पन्नदुर्निमित्तनिरीक्षणेऽपि गर्वात्तदविगणनेनैव दूषणादिभिस्तद्धरणाय निर्याणम् ॥ १ ॥

तस्मिन्याते जनस्थानादशिवं शोणितोदकम् ॥ अभ्यवर्षन्महामेघस्तुमुलो गर्दभारुणः ॥ १ ॥
निपेतुस्तुरगास्तस्य रथयुक्ता महाजवाः ॥ समे पुष्पचिते देशे राजमार्गे यदृच्छया ॥ २ ॥
श्यामं रुधिरपर्यन्तं बभूव परिवेषणम् ॥ अलातचक्रप्रतिमं परिगृह्य दिवाकरम् ॥ ३ ॥
ततो ध्वजमुपागम्य हेमदण्डं समुच्छ्रितम् ॥ समाक्रम्य महाकायस्तस्थौ गृध्रः सुदारुणः ॥ ४ ॥
जनस्थानसमीपे तु समागम्य खरस्वनाः ॥ विस्वरान्विविधांश्चक्रुर्मांसादा मृगपक्षिणः ॥ ५ ॥
व्याजह्रुश्च प्रदीप्तायां दिशि वै भैरवस्वनम् ॥ अशिवं यातुधानानां शिवा घोरा महास्वनाः ॥ ६ ॥
प्रभिन्नगिरिसंकाशास्तोयशोणितधारिणः ॥ आकाशं तदनाकाशं चक्रुर्भीमा बलाहकाः ॥ ७ ॥
बभूव तिमिरं घोरमुद्धतं रोमहर्षणम् ॥ दिशो वा विदिशो वाऽपि न च व्यक्तं चकाशिरे ॥ ८ ॥
क्षतजार्द्रसवर्णाभा सन्ध्या कालं विना बभौ ॥ खरस्याभिमुखा नेदुस्तदा घोरमृगाः खगाः ॥ ९ ॥
कङ्कगोमायुगृध्राश्च चक्रुश्चुर्भयशंसिनः ॥ [चैक्रिरे विस्वरान्घोरान्मांसादा वनगोचराः] ॥ १० ॥
नित्याशुभकरा युद्धे शिवा घोरनिदर्शनाः ॥ नेदुर्बलस्याभिमुखं ज्वालोद्गारिभिराननैः ॥ ११ ॥
केबन्धः परिधाभासो दृश्यते भास्करान्तिके ॥ जग्राह सूर्यं स्वर्भानुरपर्वणि महाग्रहः ॥ १२ ॥

अथ युद्धाय प्रयातस्य खरस्य उत्पातवर्णनं त्रयोविंशे । अशिवं अशुभावहं । शोणितोदकं रक्तवर्णजलं । तुमुलः संकुलः । गर्दभारुणः गर्दभवद्धूसरः ॥१॥ निपेतुः स्खलिताः रथयुक्ताः रथे बद्धाः । पुष्पचिते पुष्पैः निबिडे । यदृच्छया दैवगत्या ॥ २ ॥ सूर्यपरिवेषमाह—श्याममिति । सर्वत्र श्यामं । पर्यन्ते प्रान्ते रुधिरं रुधिरवर्णं । अलातचक्रप्रतिममिति ह्रस्वत्वमुच्यते । परिवेषणं परिवेषः । परिगृह्य परितो व्याप्य ॥३॥ समुच्छ्रितं उन्नतं । ध्वजमुपागम्य समाक्रम्य परिक्रम्य तस्थौ ॥४॥ खरस्वनाः परुषस्वनाः । विस्वरान् विकृतस्वरान् । मांसमदन्तीति मांसादः ॥ ५ ॥ प्रदीप्तायां दिशि सूर्यसन्निहितदिशीत्यर्थः । शिवाः सृगालाः । घोराः ज्वालामुखाः ॥ ६ ॥ प्रभिन्नाः इन्द्रच्छिन्नपक्षाः । तोयशोणितधारिणः शोणिततोयधारिणः । परनिपातः । अनाकाशं अप्रकाशं छन्नमिति यावत् । बलाहकाः मेघाः ॥ ७ ॥ उद्धतं सान्द्रं ॥ ८ ॥ क्षतजार्द्रसवर्णाभा क्षतजेन रक्तेनार्द्रं संसिक्तं यत् पटादिकं तत्तुल्याभा । कालं विना स्वकालं विना । सन्ध्या बभौ मेघेष्विति शेषः । खरस्येति । पूर्वं सूर्याधिष्ठितदिशि शिवारुतमुक्तं । अधुना खरस्याभिमुखमुच्यते । घोरमृगाः श्वापदादयः । कङ्काः स्थूलकायाः भयंकराः मृतपशुनरादिभक्षणशीलाः पक्षिविशेषाः ॥ ९—१० ॥ सेनाभिमुखशिवारुतमाह—नित्येति । युद्धे नित्यमशुभकराः अशुभशंसिनः । घोरनिदर्शनाः घोरफलकनिदर्शनाः । शिवाः गोमायवः । "स्त्रियां शिवाभूरिमायगोमायुमृगधूर्तकाः" इत्यमरः । ज्वालामुद्गिरन्तीति ज्वालोद्गारीणि तैः आननैः उपलक्षणे तृतीया ॥ ११ ॥ परिधवत् परिधायुधव-

ति० तुमुलः तुमुलशब्दः । अभ्यवर्षत् मेघइतिशेषः ॥ १ ॥ ति० प्रभिन्नगजेतिपाठे मत्तगजेत्यर्थः । प्रभिन्नगिरीतिपाठे गैरिकादिधातुस्राविणइत्यर्थः ॥ ७ ॥ टीका० कङ्क श्वेतगृध्रः ॥ १० ॥ ती० कबन्ध धूमकेतुः ॥ १२ ॥

[पा०] १ क—ट. तंप्रयातंबलंघोरमशिवं. ध. तंप्रयातंजनस्थानात्, ग, तंप्रयान्तंबलंघोरमशिवं. १ क. ज.—ट. महाघोरः. ३ क—ट. प्रतिगृह्य. ४ ग. दण्डसमुच्छ्रितं. ५ क. ग.—ट. समीपेच. ६ क.—ट. समाक्रम्य. ७ ख. ग. घ. खरस्वराः. ८ क. झ. ट. विविधामादान्मांसादाः. ९ क. झ. ट. व्याजहुरभिदीप्तायां. क. ख. व्याजहुरपिदीप्तास्यादीप्तायां दिशिभैरवं. १० ख. महास्वराः. ११ क. ख. ङ. झ. ट. प्रभिन्नगज. १२ घ. भीमबलाहकाः. क. झ. ट. भीमांबुवाहकाः. १३ घ ङ. ग. नव्यक्तंसंचकाशिरे. ङ. झ. ट सुव्यक्तंनचकाशिरे. ङ. ग, नव्यक्तंप्रचकाशिरे. १४ ट. खरंचाभिमुखे. ङ. झ. खरंचाभिमुखं. ख. खरस्याभिमुखे. १५ क.—ङ. झ. ग. ट. घोरामृगाः. १६ इदमर्धं क. पुस्तकेदृश्यते. १७ क—ट. निलाशिवकराः. १८ घ. च. छ. ज. ग. बलस्याभिमुखा. १९ घ. च. ग. कबन्धाःपरिधाभासोदृश्यन्ते.

प्रवाति मारुतः शीघ्रं निष्प्रभोऽभूद्दिवाकरः ॥ उत्पेतुश्च विना रात्रिं ताराः खद्योतसप्रभाः ॥ १३ ॥
संलीनमीनविहगा नलिन्यः शुष्कपङ्कजाः ॥ तस्मिन्क्षणे बभूवुश्च विना पुष्पफलैर्द्रुमाः ॥ १४ ॥
उद्धूतश्च विना वातं रेणुर्जलधरारुणः ॥ वीचीकूचीति वाश्यन्त्यो बभूवुस्तत्र शारिकाः ॥ १५ ॥
उल्काश्चापि सनिर्घाता निपेतुर्घोरदर्शनाः ॥ प्रचचाल मही सर्वा सशैलवनकानना ॥ १६ ॥
खरस्य च रथस्थस्य नर्दमानस्य धीमतः ॥ प्राकम्पत भुजः सव्यः स्वरश्चास्यावसज्जत ॥ १७ ॥
सास्रा संपद्यते दृष्टिः पश्यमानस्य सर्वतः ॥ ललाटे च रुजा जाता न च मोहान्न्यवर्तत ॥ १८ ॥
तान्समीक्ष्य महोत्पातानुत्थितान्रोमहर्षणान् ॥ अब्रवीद्राक्षसान्सर्वान्प्रहसन्स खरस्तदा ॥ १९ ॥
महोत्पातानिमान्सर्वानुत्थितान्घोरदर्शनान् ॥ न चिन्तयाम्यहं वीर्याद्बलवान्दुर्बलानिव ॥ २० ॥
तारा अपि शरैस्तीक्ष्णैः पातयामि नभःस्थलात् ॥ मृत्युं मरणधर्मेण संक्रुद्धो योजयाम्यहम् ॥२१॥
राघवं तं बलोत्सिक्तं भ्रातरं चास्य लक्ष्मणम् ॥ अहत्वा सायकैस्तीक्ष्णैर्नोपावर्तितुमुत्सहे ॥ २२ ॥
सकामा भगिनी मेऽस्तु पीत्वा तु रुधिरं तयोः ॥ यन्निमित्तस्तु रामस्य लक्ष्मणस्य विपर्ययः॥२३॥

दाभासत इति परिघाभासः कबन्धः शिरःशून्यमनुष्यकायः । भास्करान्तिके सूर्यस्य समीपे । दृश्यते अदृश्यत । तथोक्तं कामन्दकीये । "सूर्यदृष्टकबन्धादिरकस्मान्मूढवाहनः" इति । कबन्धाकारमेघखण्ड इतियावत् । महानाग्रहो यस्य स महाग्रहः स्वर्भानुः राहुः । अपर्वणि प्रतिपद्दर्शसंधिः पर्व तस्मादन्यस्मिन्नपि काले सूर्यं जग्राह । तदाह वराहमिहिरः । "अपर्वणि तथा राहुग्रहणं चन्द्रसूर्ययोः" इति ॥ १२ ॥ प्रवाति प्रतिकूलो वाति । उत्पेतुः प्रचकाशिरे । खद्योतसप्रभाः ज्योतिरिङ्गणसमानकान्तयः ॥ १३ ॥ संलीनाः जलान्तरगताः । पुष्पफलैर्विना बभूवुः गलितपुष्पादिका बभूवुरित्यर्थः ॥१४॥ उद्धूतः उत्क्षिप्तः । जलधरारुणः मेघवद्धूसरः । वीचीकूचीति शब्दनुकारः । वाश्यन्त्यः शब्दं कुर्वन्त्यः ॥ १५ ॥ उल्कानिर्घातौ ज्योतिर्वायुविशेषौ । अत्रवराहमिहिरः "उल्का शिरसि विशाला निपतन्ती वर्धते तनुप्रभया । पवनाभिहता गगनादवनौ च यदा समापतति ॥ भवति तदा निर्घातः स च पापो दीर्घखगविरुतः" इति ॥ १६ ॥ अवसज्जत अवासज्जत । गद्गदकण्ठतया प्रतिबद्धोभूदित्यर्थः ॥ १७ ॥ रुजा पीडा । "स्त्रीरुग्रुजाचोपतापरोगव्याधिगदामयाः" इत्यमरः । मोहात् अज्ञानात् । न न्यवर्तत एवमनेकदुर्निमित्तदर्शनेपियुद्धगमनान्न न्यवर्ततेत्यर्थः ॥ १८ ॥ उत्थितान् उद्भूतान् । रोमहर्षणान् रोमाञ्चकरान् भयजनकानित्यर्थः । तदुक्तं साहित्यचिन्तामणौ "उल्कानिपातनिर्घातव्यालव्याघ्रादिदर्शनैः । उत्पन्नः सहसा चित्तविक्षोभस्त्रास इष्यते ॥ नेत्रसंमीलनोत्कम्पगात्रसंकोचगद्गदैः । वैवर्ण्यस्वेदरोमाञ्चस्तम्भाद्यैरनुभाव्यते" इति ॥ प्रहसन्नित्यनेन गर्वःसूच्यते ॥ १९ ॥ तत्कार्यप्रतिज्ञामाह—महोत्पातानिति । तथाचोक्तं चिन्तामणौ । "कुलरूपवयोविद्याबलैश्वर्यधनादिभिः । या भवेदात्मनः श्लाघा स गर्व इति कथ्यते ॥ उद्ग्रीवावेक्षणावज्ञाप्रतिज्ञातिर्भवेदिह" इति । दुर्बलानिव पुरुषान् ॥ २०—२१ ॥ उत्सिक्तं

ति० खद्योतसप्रभत्वंनिस्तेजस्कत्वेनचाञ्चल्येनच ॥१३॥ ति० वाश्यन्तः । आर्षं ॥१५॥ शि० वनकाननयोर्निबिडानिबिडत्वे नभेदात्रपौनरुक्त्यं ॥१६॥ स० मरणधर्मेण मरणाख्यधर्मेण ॥२१॥ टीका० ननुरामस्यामानुषचरित्रंज्ञात्वा युद्धागमनवेलायां स्वस्यदुर्निमित्तानिदृष्ट्वाचखरोनिर्भीकःप्रहृष्टः किमर्थमभूदित्याशङ्कायामुच्यते । स्वस्यशिवशापविमुक्तिर्भविष्यतीतितद्वासनावशात्प्रमोदो जातइत्यविरोधः ॥ ती० वस्तुतस्तुअहत्वानोपावर्तितुमुत्सहइत्यनेन हत्वैवोपावर्तितुमुत्सहइत्यभिप्रायः । हन्तुमसमर्थः अतोनोपावर्ततइतिव्यज्यते ॥२२॥ ती० वस्तुतस्तु रामस्यलक्ष्मणस्यचजयइतिशेषः । मेममविपर्ययः नाशश्च यन्निमित्तः याशूर्पणखानिमित्तं

[पा०] १ ग. विवाति. २ क. ख. च. छ. ञ. संनिभाः. ३ घ. च. छ. ज. ञ. पुष्पैःफलैः. ४ झ. चीचीकूचीति. ५ झ. वाश्यन्तो. घ. शंसन्त्यो. ६ ङ. छ.—ट. सारिकाः. ७ ङ. झ. ञ. ट. सनिर्घोषाः. ८ क.—ट. चापि. ९ घ सास्रं. १० ङ. ट. नुदितान्. ११ क. ख. ग. च. छ. ज. ञ. प्रहसन्वाहिनीपतिः. १२ ङ. ट. नुदितान्. १३ क. ग. ङ.—ट. पातयेयं. १४ ङ. ट. चापि. १५ एतच्छ्लोकार्धयोःपौर्वापर्यं. क. ङ.—ट. पुस्तकेषुदृश्यते. १६ ख. ग. पीत्वाच. छ. ज. ञ. पीत्वेयंशोणितं. १७ क. ग.—ट. यन्निमित्तंतु. १८ ख. रामश्चलक्ष्मणश्चविपत्स्यते.

न कचित्प्राप्तपूर्वो मे संयुगेषु पराजयः ॥ युष्माकमेतत्प्रत्यक्षं नानृतं कथयाम्यहम् ॥ २४ ॥
देवराजमपि क्रुद्धो मत्तैरावतयायिनम् ॥ वज्रहस्तं रणे हन्यां किं पुनस्तौ कुमानुषौ ॥ २५ ॥
सा तस्य गर्जितं श्रुत्वा राक्षसस्य महाचमूः ॥ प्रहर्षमतुलं लेभे मृत्युपाशावपाशिता ॥ २६ ॥
समीयुश्च महात्मानो युद्धदर्शनकाङ्क्षिणः ॥ ऋषयो देवगन्धर्वाः सिद्धाश्च सह चारणैः ॥
समेत्य चोचुः सहितास्तेऽन्योन्यं पुण्यकर्मणः ॥ २७ ॥
स्वस्ति गोब्राह्मणेभ्योस्तु लोकानां येऽभिसंगताः ॥ जयतां राघवः संख्ये पौलस्त्यान्रजनीचरान् ॥
चक्रहस्तो यथा युद्धे सर्वानसुरपुङ्गवान् ॥ २८ ॥
एतच्चान्यच्च बहुशो ब्रुवाणाः परमर्षयः ॥ जातकौतूहलास्तत्र विमानस्थाश्च देवताः ॥
ददृशुर्वाहिनीं तेषां राक्षसानां गतायुषाम् ॥ २९ ॥
रथेन तु खरो वेगादुग्रसैन्यो विनिःसृतः ॥ तं दृष्ट्वा राक्षसं भूयो राक्षसाश्च विनिःसृताः ॥ ३० ॥
श्येनगामी पृथुग्रीवो यज्ञशत्रुर्विहङ्गमः ॥ दुर्जयः करवीराक्षः परुषः कालकार्मुकः ॥ ३१ ॥
मेघमाली महामाली सर्पास्यो रुधिराशनः ॥ द्वादशैते महावीर्याः प्रतस्थुरभितः खरम् ॥ ३२ ॥
महाकपालः स्थूलाक्षः प्रमाथी त्रिशिरास्तथा ॥ चत्वार एते सेनान्यो दूषणं पृष्ठतो ययुः ॥ ३३ ॥

सा भीमवेगा समराभिकामा महाबला राक्षसवीरसेना ॥
तौ राजपुत्रौ सहसाऽभ्युपेता माला ग्रहाणामिव चन्द्रसूर्यौ ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

गर्वितं ॥२२—२६ ॥ समीयुः सङ्गताः । सहिताः लोकहितपराः । पुण्यकर्मणः पुण्यकर्माणः। दीर्घाभाव आर्षः ॥ २७ ॥ लोकानामभिसङ्गता इति ये लोकानां अभिसङ्गताः अनुकूलाः तेभ्योपि स्वस्त्यस्त्वित्यर्थः । जयतां जयतु। आर्षमात्मनेपदं। संख्ये युद्धे। चक्रहस्तो विष्णुः ।वाहिनीं सेनां । गतायुषां गन्तुमुद्युक्तायुषां । एतत् स्वस्तीत्यादिवाक्यं । अन्यच्च राघवजयविषयकं वाक्यं । ब्रुवाणाः परमर्षयः विमानस्था देवताश्च जातकौतूहलाः सन्तः । राक्षसानां वाहिनीं ददृशुरिति संबन्धः ॥ २८—२९ ॥ वेगात् रथवेगात् । विनिःसृतः गतः ॥ ३० ॥ श्येनगाम्यादयो द्वादशखरामात्याः ॥३१—३३॥ समराभिकामा युद्धेप्सुः । ग्रहाणां अङ्गारकादीनां ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रयोविंशः सर्गः ॥ २३ ॥

मस्मसः । साभगिनी तयोः ताभ्यां मृतस्यममेतिशेषः । रुधिरंपीलासकामाऽस्तु ॥ २३ ॥ ती० कुमानुषौ कौ भूमौ मनुष्यरूपेणावतीर्णावित्यवगन्तव्यं ॥ २५ ॥ ति० सैन्यस्याग्राद्विनिस्सृतः पूर्वंसैन्यसंबद्धएवतदग्रभागेस्थितः । इदानींतुसेनांबहुदूरेपृष्ठतस्त्यक्त्वास्वयमेवाग्रेगतइत्यर्थः ॥ ३० ॥ इतित्रयोविंशस्सर्गः ॥ २३ ॥

[पा०] १ च. छ. ज. ञ. प्राप्तपूर्वस्तु. २ ख. संग्रामेषु. ३ ख. ङ. च. झ. ट. गामिनं. ४ ख. ग. छ. स्तौतुमानुषौ. ङ. झ. ट. स्तौतुमानवौ. ५ ङ. झ. ट. राक्षसानां. ६ ख. पाशवशंगता. ७ क.—च. ञ. ट. समेयुश्च. ८ ङ. झ. ञ. ट. ब्राह्मणेभ्यस्तु. ९ ङ. झ. ञ. ट. येचसंमताः. ख. येहितैषिणः. १० क. ख. ग. ङ. झ. ञ. ट राघवोयुद्धे. ११ सर्वानसुरसत्तमान्. १२ ङ. झ. ञ. ट. यथाविष्णुः. १३ क. ग. ङ. झ. ञ. ट. सत्तमान्. १४ ङ. झ. ट. वेगात्सैन्याग्राद्विनिस्सृतः. १५ च. छ. ज. ञ. निस्सृतंभूमौ. १६ घ. श्चापिनिस्सृताः. १७ ङ. ट. पृथुश्यामो. १८ क. ख. शत्रुर्महाविषः. १९ ट. परवीराक्षः. २० ख. महाबाहुः. २१ ङ. ट. वरास्यो. २२ ङ. ट. प्रमाथिस्त्रिशिराः. झ. प्रमाथस्त्रिशिराः. २३ घ. च. छ. ज. ञ. सेनाग्र्याः. क. ग. ङ. झ. ट. सेनाग्रे. २४ ङ.—ट. पृष्ठतोन्वयुः. २५ ङ. झ. ट. कांक्षिणी. २६ क. ग. ङ.—ट. सुदारुणा.

चतुर्विंशः सर्गः ॥ २४ ॥

रामेणलक्ष्मणंप्रति खरप्रयाणकालिकदुर्निमित्तप्रदर्शनेन तेषां स्वपरजयापजयसूचकत्वकथनपूर्वकंसीतारक्षणाय तयासहगुहाश्रयणचोदना ॥ १ ॥ श्रीरामेयुद्धसन्नद्धे समरावलोकनायदेवगन्धर्वादियुगानाङ्गणमवतीर्णेषु खरसैन्येनरणायरामंप्रत्यभिसर्पणम् ॥ २ ॥

आश्रमं प्रतियाते तु खरे खरपराक्रमे ॥ तानेवोत्पातिकान्रामः सह भ्रात्रा ददर्श ह ॥ १ ॥
तानुत्पातान्महाघोरानुत्थितान्रोमहर्षणान् ॥ प्रजानांमहितान्दृष्ट्वा वैवयं लक्ष्मणमब्रवीत् ॥ २ ॥
इमान्पश्य महाबाहो सर्वभूतापहारिणः ॥ समुत्थितान्महोत्पातान्संहर्तुं सर्वराक्षसान् ॥ ३ ॥
अमी रुधिरधारास्तु विसृजन्तः खरस्वनान् ॥ व्योम्नि मेघा विवर्तन्ते परुषा गर्दभारुणाः ॥ ४ ॥
सधूमाश्च शराः सर्वे मम युद्धाभिनन्दिनः ॥ रुक्मपृष्ठानि चापानि विवेष्टन्ते च लक्ष्मण ॥ ५ ॥
यादृशा इह कूजन्ति पक्षिणो वनचारिणः ॥ अग्रतो नो भयं प्राप्तं संशयो जीवितस्य च ॥ ६ ॥
संप्रहारस्तु सुमहान्भविष्यति न संशयः ॥ ७ ॥
अयमाख्याति मे बाहुः स्फुरमाणो मुहुर्मुहुः ॥ सन्निकर्षे तु नः शूर जयं शत्रोः पराजयम् ॥ ८ ॥
सैंप्रभं च प्रसन्नं च तव वक्त्रं हि लक्ष्यते ॥ उद्यतानां हि युद्धार्थं येषां भवति लक्ष्मण ॥
निष्प्रभं वदनं तेषां भवत्यायुःपरिक्षयः ॥ ९ ॥
रक्षसां नर्दतां घोरः श्रूयते च महाध्वनिः ॥ आहतानां च भेरीणां राक्षसैः क्रूरकर्मभिः ॥ १० ॥

अथ रामस्य युद्धसन्नाहश्चतुर्विंशे । औत्पातिकानिति स्वार्थेठक् ॥ १—२ ॥ सर्वभूतापहारिणः सर्वभूतापहारसूचकान् । प्रकृतेतु सर्वराक्षसान् संहर्तुमुद्यतानिति योजना ॥ ३ ॥ रुधिरमय्यो धारा येषां ते रुधिरधाराः । खरस्वनान् घोरस्तनितानि । विवर्तन्ते संचरन्ति ॥ ४ ॥ सधूमा इति । प्रतापानलोद्गता इतिभावः । अत एव मम युद्धाभिनन्दनः रुक्मपृष्ठानि स्वर्णमयपृष्ठानि । चापानि धनूंषि । "अथास्त्रियां । धनुश्चापौ" इत्यमरः । विवेष्टन्ते चलन्ति । युद्धसन्नद्धानि भवन्तीत्यर्थः । आत्मनश्चापद्वयं लक्ष्मणस्यैकमिति बहुवचनं ॥ ५ ॥ यादृशाः प्रसिद्धाः । पूर्वकृतसंवादा इत्यर्थः । अग्रतः अव्यवहितोत्तरकाले । नो भयमिति सुबाक् ॥ ६ ॥ सुमहान् संप्रहारः युद्धं ॥ ७ ॥ बाहुः दक्षिणः । सन्निकर्षे अव्यवहितोत्तरकाले ॥८॥ स्वमुखप्रसादादेः स्वयं द्रष्टुमशक्यत्वेन स्वसमानसुखे लक्ष्मणेनिदर्शयति—सप्रभमिति । मुखप्रसादफलं व्यतिरेकमुखेनाह—उद्यता-

---

स० तान् ये खरदृष्टाः ॥१॥ शि० अत्यमर्षणः मुनिखेदासहिष्णुः । रामः प्रजानां दशरथराज्यनिवासिराक्षसानां । किंच प्रकर्षेण को मृत्युञ्जयोयेषांतेषांराक्षसानां । अहितान् घोरानुत्पातान् दृष्ट्वा अवलोक्य दृष्ट्वा विचार्यच । लक्ष्मणमब्रवीत् । "जो ना मृत्युञ्जयेजन्यांतातमात्रेजनार्दने" इतिमेदिनी ॥२॥ ती० एवंराक्षसानांदुर्निमित्तान्युक्त्वा स्वस्वजयसूचकानिनिमित्तान्याह—सधूमाइति । ममयुद्धाभिनन्दिताः युद्धेअभितोनन्दः आनन्दः एषांसंजातहर्षितइतीक्ताः । श्रीरामगतोयुद्धहर्षश्चारेषूपचर्यते । ममयुद्धहर्षसूचकाइतिफलितार्थः । चापानिविवेष्टन्ते विशेषेणवेष्टन्ते । अभिमन्त्रिततत्तद्देवतासांनिध्याच्चापेषुस्वयमेवशरास्संसक्तामवन्तीत्यर्थः । स० शराः तदभिमानिदेवताः । एवमुत्तरत्रापि ॥ ५ ॥ ती० अग्रतः अस्माकंपुरतइत्यर्थः । वनचारिणः यादृशाःसौम्याः पक्षिणःकूजन्ति । तादृशैस्सुनिमित्तैः नः अस्माकं अभयंप्राप्तं । वकारादरिणांजीवितस्यसंशयश्चप्राप्तइत्यर्थः ॥ ६ ॥ स० आयुः परिक्षयइतिपदद्वयं । यतस्तववक्त्रंसुप्रसन्नंलक्ष्यते तस्माद्भवतित्वयि आयुः । येषांपरिक्षयोभावी तेषांवदनंनिष्प्रभंभवति ॥ ९ ॥

[पा०] १ ङ.—ट. घोरान्रामोदृष्ट्वात्यमर्षणः. २ ख. महितान्घोरान्. ३ च. छ. ञ. लक्ष्मणंवाक्यं. ४ ग. ङ. झ. ट. विसृजन्तेखरस्वनाः. क. ख. ग. विसृजन्तःखरस्वनाः. च. छ. ज. ञ. विसृजन्तःखरस्वराः. ५ ग. निवर्तन्ते. च. छ. ज. ञ. विनर्दन्ते. ६ ङ.—ट. नन्दिताः. ७ च. छ. ज. ञ. चेष्टन्तेपिच. ङ ट. विचेष्टन्तेच. झ. विचेष्टन्तेविचक्षण. ८ ग. गर्जन्ति. ९ च. छ. ञ. ससंप्रहारः. १० ख. घ.—ट. सुप्रभं. ११ ट. युद्धार्थे. १२ क. च. ज. ञ. श्रूयतेह्ये. ङ. झ. ट. श्रूयतेऽयं.

अनागतविधानं तु कर्तव्यं शुभमिच्छता ॥ आपदं शङ्कमानेन पुरुषेण विपश्चिता ॥ ११ ॥
तस्माद्गृहीत्वा वैदेहीं शरपाणिर्धनुर्धरः ॥ गुहामाश्रय शैलस्य दुर्गां पादपसंकुलाम् ॥ १२ ॥
प्रतिकूलितुमिच्छामि न हि वाक्यमिदं त्वया ॥ शापितो मम पादाभ्यां गम्यतां वत्स मा चिरम् ॥ १३
त्वं हि शूरश्च बलवान्हन्या ह्येतान्न संशयः ॥ स्वयं तु हन्तुमिच्छामि सर्वानेव निशाचरान् ॥ १४ ॥
एवमुक्तस्तु रामेण लक्ष्मणः सह सीतया ॥ शरानादाय चापं च गुहां दुर्गां समाश्रयत् ॥ १५ ॥
तस्मिन्प्रविष्टे तु गुहां लक्ष्मणे सह सीतया ॥ हन्त निर्युक्तमित्युक्त्वा रामः कवचमाविशत् ॥ १६ ॥
स तेनाग्निनिकाशेन कवचेन विभूषितः ॥ बभूव रामस्तिमिरे विधूमोग्निरिवोत्थितः ॥ १७ ॥
स चापमुद्यम्य महच्छरानादाय वीर्यवान् ॥ बभूवावस्थितस्तत्र ज्याखनैः पूरयन्दिशः ॥ १८ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च सह चारणैः ॥ समेयुश्च महात्मानो युद्धदर्शनकाङ्क्षिणः ॥ १९ ॥
ऋषयश्च महात्मानो लोके ब्रह्मर्षिसत्तमाः ॥ समेत्य चोचुः सहिता अन्योन्यं पुण्यकर्मणः ॥ २० ॥
स्वस्ति गोब्राह्मणेभ्योऽस्तु लोकानां येऽभिसङ्गताः ॥ जयतां राघवो युद्धे पौलस्त्यान्रजनीचरान् ॥ २१ ॥
चक्रहस्तो यथा युद्धे सर्वानसुरपुङ्गवान् ॥ [एतच्चान्यच्च बहवो ब्रुवाणाः परमर्षयः ॥]
एवमुक्त्वा पुनः प्रोचुरालोक्य च परस्परम् ॥ २२ ॥

नामिति ॥ ९—१० ॥ आपदं निमित्तवशाच्छङ्कमानेन शुभं आपत्परिहारं । इच्छता विपश्चिता दूरदर्शिना पुरुषेण अनागतविधानं अनागतस्य भाविनोऽनर्थस्य विधानं प्रतिविधानं कर्तव्यं ॥ ११ ॥ गृहीत्वा रक्ष्यत्वेन गृहीत्वा । पादपसंकुलां वृक्षावृतां ॥ १२ ॥ अहमेव योत्स्यामीति वक्तुमुद्यतं प्रत्याह—प्रतिकूलितुमिति । इदं वाक्यं प्रतिकूलितुं नेच्छामि । मयाशापितोसीति वक्तव्ये मम पादाभ्यामित्युक्तिर्लक्ष्मणव्यवहारानुसारेण ॥ १३ ॥ त्वन्निवर्तनं न त्वदशक्तया किंतु मुनिभ्यः प्रतिज्ञानान्मयैव तद्वधः कर्तव्य इत्याशयेनाह—त्वं हीति ॥ १४ ॥ दुर्गां अन्यैर्दुरासदां ॥ १५ ॥ हन्तेति हर्षे । निर्युक्तं निश्चयेन उपायश्चिन्तित इत्यर्थः । "योगः सन्नहनोपायध्यानसंगतियुक्तिषु" इत्यमरः । आविशत् प्राविशत् अधारयदित्यर्थः ॥ १६ ॥ अत्रोपमालंकारेण क्षणेन रक्षःक्षयो ध्वन्यते ॥ १७—१८ ॥ ततो देवा इत्यादि । पूर्वसर्गे समागमनमुक्तं अत्र सन्निधानं । चारणाः देवजातिविशेषाः ॥ १९ ॥ लोके त्रैलोक्ये । ब्रह्मर्षिसत्तमाः भृग्वादयः । पुण्यकर्मणः पुण्यकर्माणः ॥ २० ॥ लोकानां येभिसंगता इति ये लोकानामभिसंगताः अनुकूलाः । तेभ्योपि स्वस्त्यस्त्वित्यर्थः । देवादयः समेत्य स्वस्तीत्याद्यूचुः । तएवैवमुक्त्वा कथं युद्धं भविष्यतीत्यन्तं पुनः प्रोचुरिति संबन्धः ॥ २१ ॥

ति० प्रतिकूलितुं विपरीतंकर्तुं नेच्छामि । भिन्नकर्तृके तुमुनार्षः । ती० प्रतिकूलितमितिपाठे त्वयाप्रतिकूलितं त्वत्कर्तृकप्रातिकूल्यवद्वाक्यंनेच्छामीत्यर्थः । स० इदवाक्यंत्वयाप्रतिकूलितुंनेच्छामीतिभिन्नकर्तृकत्वेपिभोक्तुमनुजानामीत्यादिवत्तुमुन्संभवति । यद्वा इदंत्वयेत्येकंपदं अयंचासौत्वंचइदंत्वंतेन प्रतिकूलितुं । भवान्युवत्यासहगच्छतीतिशङ्कामारोपयितुंवाक्यनेच्छामीतिपादाभ्यांशपितोसि । अतश्चिरंमामाकुरु । यद्वा इदं वाक्यं । चिरमुत्तरं प्रत्युत्तररूपं मामाकार्षीः ॥ १३ ॥ ती० निर्युक्तं अस्मदुक्तं लक्ष्मणेन निर्युक्तं नितरांयुक्तंकृतमित्युक्त्वा रामः कवचमाविशत् धृतवानित्यर्थः । स० निर्युक्तं अतिशोभनं । इत्युक्त्वा । यथोक्तंकर्मनिर्णयटीकायां "युक्तशब्दश्शोभनपर्यायः । यथाहभिक्षुः" इति । तट्टिप्पण्यांच यथाहभिक्षुः "बालक्रीडावासुदेवस्ययुक्ता" इतीति ॥ १६ ॥ ती० येलोकानामभिसंगताः हविर्मुखेनानुकूलाभवन्तीत्यर्थः । तदुक्तं "अग्नौप्रास्ताहुतिस्सम्यगादित्यमुपतिष्ठते । आदित्याज्जायतेवृष्टि-

[पा०] १ ख. घ. जयमिच्छता. २ झ. आपदा. ३ ख. च. छ. ज. ञ. तत्र. ४ ख. बलवानेतांहन्तुंन. ५ क. ग. ङ. च. छ. झ. ञ. ट. स्वयनिहन्तुं ख. अहंतुहन्तुं. ६ ख. निर्यामिचेत्युक्त्वा ७ घ. मादधत्. ८ क. ग. ङ. ट. महानग्निः. ९ ग. च्छरमादाय. १० ङ. झ. ट. संबभूवास्थित. ११ ख. च. छ. ज. ञ. परमर्षयः. १२ ख. समेताश्च. च. छ. ज. ञ. समेयुश्चारणैस्तत्र. १३ क. ङ.—ट. काङ्क्षया. १४ क. ग. ङ.—ट. सहितास्तेऽन्योन्यं. १५ क. ग.—च. झ. ट. ब्राह्मणानांच. ख. ब्राह्मणेभ्यश्च. १६ ङ. झ. ट. चेतिसंस्थिताः. घ. च. छ. ज. येहिसंगताः. क. ख. ग. चेतिसंगताः. १७ क. सत्तमान्. १८ इदमर्धं क. च. छ. ज. पाठेषुदृश्यते.

चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् ॥ एकश्च रामो धर्मात्मा कथं युद्धं भविष्यति ॥ २३ ॥
इति राजर्षयः सिद्धाः सगणाश्च द्विजर्षभाः ॥ जातकौतूहलास्तस्थुर्विमानस्थाश्च देवताः ॥ २४ ॥
आविष्टं तेजसा रामं संग्रामशिरसि स्थितम् ॥ दृष्ट्वा[1] सर्वाणि भूतानि भयाद्विव्यथिरे तदा ॥ २५ ॥
रूपमप्रतिमं तस्य[2] रामस्याक्लिष्टकर्मणः ॥ बभूव रूपं क्रुद्धस्य रुद्रस्येव पिनाकिनः[3] ॥ २६ ॥
इति संभाष्यमाणे तु[4] देवगन्धर्वचारणैः ॥ ततो गम्भीरनिर्ह्रादं घोरवर्मायुधध्वजम्[5] ॥
अनीकं यातुधानानां समन्तात्प्रत्यदृश्यत[6] ॥ २७ ॥
सिंहनादं[7] विसृजतामन्योन्यमभिगर्जताम्[8] ॥ चापानि विस्फारयतां जृम्भतां चाप्यभीक्ष्णशः ॥२८॥
विप्रघुष्टस्वनानां[9] च दुन्दुभींश्चापि[10] निघ्नताम् ॥ तेषां सुतुमुलः[11] शब्दः पूरयामास तद्वनम् ॥ २९ ॥
तेन शब्देन वित्रस्ताः श्वापदा वनचारिणः ॥ दुद्रुवुर्यत्र निःशब्दं पृष्ठतो न[12] व्यलोकयन् ॥ ३० ॥
तत्त्वनीकं[13] महावेगं रामं[14] समुपसर्पत ॥ धृतनानाप्रहरणं गम्भीरं सागरोपमम् ॥ ३१ ॥
रामोपि[15] चारयंश्चक्षुः सर्वतो रणपण्डितः ॥ ददर्श खरसैन्यं तद्युद्धाभिमुखमुत्थितम्[16][17] ॥ ३२ ॥
वितत्य[18] च धनुर्भीमं तूण्योश्चोद्धृत्य[19] सायकान् ॥ क्रोधमाहारयत्तीव्रं वधार्थं सर्वरक्षसाम् ॥ ३३ ॥

—२३ ॥ राजर्षयः देवत्वं प्राप्ताः । यद्वा वानप्रस्थीभूताः । सगणाः सपरिकराः ॥ २४ ॥ संग्रामशिरसि युद्धाग्रे ॥ २५ ॥ रामस्य रूपं रुद्रस्य रूपमिव बभूव ॥ २६ ॥ निर्ह्रादः शब्दः । वर्म कवचं । अनीकं सेना ॥ २७ ॥ अन्योन्यमभिगर्जतां अहमेव शत्रुं हनिष्यामीति जल्पतामित्यर्थः । विस्फारयतां ज्याशब्दं कुर्वतां । अभीक्ष्णशः भृशं । जृम्भतां जृम्भमाणानां मदेनोद्गच्छतामित्यर्थः । विप्रघुष्टस्वनानां घोषो गुञ्जनाख्यध्वनिविशेषः । "घोषो गुञ्जनमञ्जने" इति वैजयन्ती । भावे निष्ठा । तद्रूपस्वनवतामित्यर्थः ॥ २८—२९ ॥ श्वापदाः हिंस्रा व्याघ्रादयः । यत्र निःशब्दं शब्दाभावः । "अव्ययं विभक्ति—" इत्यादिना अव्ययीभावः । तं देशं दुद्रुवुरित्यन्वयः । पृष्ठतः पश्चाद्भागं ॥ ३० ॥ समुपसर्पत समुपासर्पन् । गम्भीरं इतरदुष्प्रवेशं ॥ ३१ ॥ उत्थितं उद्युक्तं ॥३२॥ वितत्य किञ्चिद्बाणविसर्पणं कृत्वेत्यर्थः । "विततं संहितस्येषोः किंचिदेव विसर्पणं" इति वैजयन्ती । तूण्योः पृष्ठपार्श्वद्वयबद्धयोः । आहारयदित्यनेन करुणामूर्तिरप्याश्रितकण्टकोद्धारणाय क्रोधमारोपयामासेति गम्यते । भीमं धनुरुद्धृत्य तूण्योः शरांश्चोद्धृत्य

वृष्टेरन्नंतत प्रजाः" इति ॥ २१ ॥ ति० धर्मात्मा अच्छद्मयोधीत्यर्थः ॥ २३ ॥ ति० तेजसा वैष्णवेनक्षात्रेण । एतेनसहजस्वभावोभगवतोग्राह्यएव । क्षात्रस्तुस्वेच्छयाकार्यायभगवतास्वीक्रियतइतिसूचितं । भयात् अनुमितरामपरिश्रमजनितभीतेः ॥२५॥ ती० रूपमिति । जगत्संहरणार्थमुद्युक्तस्यप्रलयकालरुद्रस्यरूपंयद्वत् तद्वत्खरादिवधार्थमुद्युक्तस्यरामस्यरूपमपिबभूवेत्यर्थः । तदुक्तंस्कान्दे—"रुद्रतेजोविलसितंदृष्ट्वारामकलेबरम् । शङ्खंचक्रंचशूलंचपिनाकंखेटमेवच । खट्वांघण्टांचडमरुंबाणपाशाङ्कुशंतथा । चापंवज्रंचखड्गंचपरशुंत्रासकारणम् । जयश्रियंचगङ्गांचददृशुस्सिद्धचारणाः ।" इति ॥ शि० नक्लिष्टं नकस्मैचित्खेदप्रदं कर्म व्यापारोयस्यतस्य ॥ ति० रुद्रस्यरूपमिव रामस्यरूपमप्रतिमं ॥ २६ ॥ स० समन्तात् सम्यगन्तमुद्दिश्येतित्यब्लोपनिमित्तापञ्चम्यपि ॥ २७ ॥ ति० अन्योन्यमभिगच्छतां एवंयुद्धंकर्तव्यमितिचबोधनार्थमितिशेषः । देहममताराहित्येनयुद्धप्रवृत्तये मादकद्रव्यस्वीकारजंजृंभणं ॥ २८ ॥ शि० विप्रहृष्टस्वनानां अतिहर्षसूचकशब्दवतां ॥ २९ ॥ ति० सर्वरक्षसांवधार्थं सर्वरक्षोवधद्वारत्वादस्ययुद्धस्येतिभावः ॥ ३३ ॥ इतिचतुर्विंशस्सर्गः ॥ २४ ॥

[पा०] १ ट. तं दृष्ट्वासर्वभूतानि. २ तत्र. ३ ङ. झ. ट. महात्मनः. ४ क. सर्षिसंघैश्चचारणैः. ५ ङ. झ. ट. चर्मायुध. ६ ङ. झ. ट. त्प्रत्यपद्यत. ७ ङ. च. ज.—ट. वीरालापान्विसृजतां. क. छ. ज. विरावांस्तान्विसृजतां. ८ ङ. झ. ट. मन्योन्यमभिगच्छतां. ख. मन्योन्यंभयगर्जनां. ९ ग. घ. च. ज. ट. विप्रहृष्ट. १० क. ख. दुन्दुभीनांचनिःस्वनैः. ११ क.—ट. सुविपुलः. १२ क.—ट. नावलोकयन्. १३ ङ.—ट. तच्चानीकं. ग. गत्वानीकं. १४ ङ. च. छ. झ. ञ. ट. रामंसमनुवर्तत. क. ख. राघवंसमसर्पत. ज. रामंसमनुवर्तते. १५ ख. रामोविचारयन्. ग. घ. च. छ. ज. ञ. ट रामोपिचालयन्. १६ घ. तद्युद्धायसमुपस्थितं. ङ. झ. तद्युद्धायाभिमुखोगतः. १७ क. ख. ग. च. छ. ज. ञ. ट. मुद्यतं. १८ ख. विनम्यच. क. सज्यंकृत्वा. १९ झ. तूण्याश्चोद्धृत्यसायकं. क. ख. ङ. च. ञ. तूण्याश्चोद्धृत्य. घ. तूणाच्चोद्धृत्य.

दुष्प्रेक्षः सोमवत्क्रुद्धो युगान्ताग्निरिव ज्वलन् ॥ तं दृष्ट्वा तेजसाऽऽविष्टं प्राद्रवन्वनदेवताः ॥ ३४ ॥
तस्य क्रुद्धस्य रूपं तु रामस्य ददृशे तदा ॥ दक्षस्येव क्रतुं हन्तुमुद्यतस्य पिनाकिनः ॥ ३५ ॥
आविष्टं तेजसा रामं संग्रामशिरसि स्थितम् ॥ दृष्ट्वा सर्वाणि भूतानि भयार्तानि प्रदुद्रुवुः ॥ ३६ ॥
तत्कार्मुकैराभरणैर्ध्वजैश्च तैर्वर्मभिश्चाग्निसमानवर्णैः ॥
बभूव सैन्यं पिशिताशनानां सूर्योदये नीलमिवाभ्रवृन्दम् ॥ ३७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

पञ्चविंशः सर्गः ॥ २५ ॥

रामखरसैन्येनसहसंकुलयुद्धम् ॥ १ ॥

अवष्टब्धधनुं रामं क्रुद्धं च रिपुघातिनम् ॥ ददर्शाश्रममागम्य खरः सह पुरःसरैः ॥ १ ॥
तं दृष्ट्वा संशरं चापमुद्यम्य खरनिःस्वनम् ॥ रामस्याभिमुखं सूतं चोदयेत्यचोदयत् ॥ २ ॥
स खरस्याज्ञया सूतस्तुरगान्समचोदयत् ॥ यत्र रामो महाबाहुरेको धन्वन्यतिष्ठतो धनुः ॥ ३ ॥
तं तु निष्पतितं दृष्ट्वा सर्वे ते रजनीचराः ॥ नर्दमाना महानादं सचिवाः पर्यवारयन् ॥ ४ ॥
स तेषां यातुधानानां मध्ये रथगतः खरः ॥ बभूव मध्ये तारााणां लोहिताङ्ग इवोदितः ॥ ५ ॥
ततः शरसहस्रेण राममप्रतिमौजसम् ॥ अर्दयित्वा महानादं ननाद समरे खरः ॥ ६ ॥
ततस्तं भीमधन्वानं क्रुद्धाः सर्वे निशाचराः ॥ रामं नानाविधैः शस्त्रैरभ्यवर्षन्त दुर्जयम् ॥ ७ ॥
मुद्गरैः पट्टिशैः शूलैः प्रासैः खड्गैः परश्वधैः ॥ राक्षसाः समरे रामं निजघ्नू रोषतत्पराः ॥ ८ ॥
ते बलाहकसंकाशा महानादा महौजसः ॥ अभ्यधावन्त काकुत्स्थं रथैर्वाजिभिरेव च ॥
गजैः पर्वतकूटाभै रामं युद्धे जिघांसवः ॥ ९ ॥

खित्वा सर्वरक्षसां वधार्थं क्रोधमाहारयदित्यन्वयः ॥ ३३—३४ ॥ दक्षस्येति क्रोधातिशयमात्रे दृष्टान्तः ॥३५—३६॥ कवचसूर्यकिरणयोः साम्यं । नीलाभ्राणां रक्षसां च कार्मुकवत्त्वं ध्वजवत्त्वं च तुल्यं मेघे उत्पातध्वजसंभवात् । अत्र सार्धसप्तत्रिंशच्छ्लोकाः ॥३७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुर्विंशः सर्गः ॥ २४ ॥

तुमुलयुद्धं पञ्चविंशे । धन्यत इति धनुः । धन धान्य इत्यस्माद्धातोः " भृमृशीङ्तृचरितत्सरितनिधनिमीमस्जिभ्यउः " इत्यौणादिकसूत्रेण उप्रत्ययः । " धनुषां च धनुं विदुः धनुरिवाजनिवकः " इति कविकाव्यप्रयोगश्च ॥ १ ॥ चोद्यतामिति रथ इतिशेषः ॥२—३॥ निष्पतितं युद्धोन्मुखं । सचिवाः श्येनगाम्यादयः ॥४॥ लोहिताङ्गः अङ्गारकः ॥ ५ ॥ अर्दयित्वा पीडयित्वा । महानादं ननाद चकारेत्यर्थः ॥ ६ ॥ भीमधन्वानं "धनुषश्च" इत्यनङ्समासान्तः । शस्त्रैः आयुधैः । " शस्त्रमायुधलोहयोः " इत्यमरः ॥ ७ ॥ मुद्गरैःस्थूलगदाभिः । प्रासैः कुन्तैः । रोषतत्पराः क्रोधपरवशाः ॥ ८ ॥ बलाहकसंकाशाः मेघतुल्याः । कूटं शृङ्गं ।

[पा०] १ ङ.—ञ. ट. दुष्प्रेक्षश्चाभवत्. २ क. ग. ङ. झ. ट. रुद्रस्य. ३ ख. ददृशुस्तदा. ४ च. छ. ज. ञ. हन्तुरुद्यतस्येव. ५ ख. ग. घ. प्रविष्टं. ६ ख. ङ. झ. ट. तद्वर्मभिः. ७ ग. ङ. झ. ञ. ट. जालं. ८ ङ. झ. ञ. ट. क्रुद्धंतं. ९ क. ग. पुरस्सरः. १० ख. ग. ङ. च. छ. झ. ञ. ट. सगुणं. ११ क. च छ. ज. ञ. खरनिस्स्वनः. १२ ख. चोदयामासराक्षसं. १३ ङ.—ट. धुन्वन्धनुस्थितः. १४ ङ झ. ट. सर्वतो. घ. सर्वेपि. १५ ङ.—ट. मुञ्चमानाः. १६ क. सचापाः. १७ क. च. ज. ञ. ट. इवोत्थितः. ङ. झ. इवोद्धतः. १८ क. ख. ग. ङ.—ट. मुद्गरैरायसैः. १९ ख. खड्गैःप्रासैः. २० ङ.—ट. महाकायामहाबलाः. २१ ख. गजैर्वाजिभिः. २२ ख. रथैः. २३ क. संकाशैः.

ते रामे शरवर्षाणि व्यसृजन्राक्षसां गणाः ॥ शैलेन्द्रमिव धाराभिर्वर्षमाणा बलाहकाः ॥ १० ॥
स तैः परिवृतो घोरै राघवो रक्षसां गणैः ॥ तिथिष्विव महादेवो वृतः पारिषदां गणैः ॥ ११ ॥
तानि मुक्तानि शस्त्राणि यातुधानैः स राघवः ॥ प्रतिजग्राह विशिखैर्नद्योघानिव सागरः ॥१२॥
स तैः प्रहरणैर्घोरैर्भिन्नगात्रो न विव्यथे ॥ रामः प्रदीप्तैर्बहुभिर्वज्रैरिव महाचलः ॥ १३ ॥
स विद्धः क्षतजादिग्धः सर्वगात्रेषु राघवः ॥ बभूव रामः सन्ध्याभ्रैर्दिवाकर इवावृतः ॥ १४ ॥
विषेदुर्देवगन्धर्वाः सिद्धाश्च परमर्षयः ॥ एकं सहस्रैर्बहुभिस्तदा दृष्ट्वा समावृतम् ॥ १५ ॥
ततो रामः सुसंक्रुद्धो मण्डलीकृतकार्मुकः ॥ ससर्ज विशिखान्बाणाञ्शतशोथ सहस्रशः ॥ १६ ॥
दुरावारान्दुर्विषहान्कालदण्डोपमान्रणे ॥ मुमोच लीलया रामः कङ्कपत्रानजिह्मगान् ॥ १७ ॥
ते शराः शत्रुसैन्येषु मुक्ता रामेण लीलया ॥ आदद् रक्षसां प्राणान्पाशाः कालकृता इव ॥१८॥
भित्त्वा राक्षसदेहांस्तांस्ते शरा रुधिराप्लुताः ॥ अन्तरिक्षगता रेजुर्दीप्ताग्निसमतेजसः ॥ १९ ॥
असंख्येयास्तु रामस्य सायकाश्चापमण्डलात् ॥ विनिष्पेतुरतीवोग्रा रक्षःप्राणापहारिणः ॥ २० ॥
तैर्ध्वजाग्राणि वर्माणि च शिरांसि च ॥ बाहून्सहस्राभरणानूरून्करिकरोपमान् ॥
चिच्छेद रामः समरे शतशोथ सहस्रशः ॥ २१ ॥
हयान्काञ्चनसन्नाहान्रथयुक्तान्ससारथीन् ॥ गजांश्च सगजारोहान्सहयान्सादिनस्तथा ॥
[चिच्छिदुर्विभिदुश्चैव रामबाणा गुणच्युताः] ॥ २२ ॥

अभ्यधावन्त आभिमुख्येनाधावन्त ॥ ९ ॥ शैलेन्द्र-मित्येतदुपमानेन रामस्य निर्दुःखत्वमुक्तं ॥ १०—११ ॥ विशिखैः बाणैः । प्रतिजग्राह प्रतिरुरोध । नद्योधान् नदीप्रवाहान् ॥ १२ ॥ वज्रैः अशनिभिः ॥ १३ ॥ क्षतजादिग्धः रुधिरालिप्तः ॥ १४ ॥ बहुभिः सहस्रैः चतुर्दशसहस्रैः ॥ १५ ॥ मण्डलीकृतकार्मुकः आकर्णाकर्षणेन मण्डलाकारीकृतधनुः । विशिखान् बाणान् अर्धचन्द्राग्रबाणान् । प्रथमं शतशः अनन्तरं सहस्रशः स निर्विभेदेति योजना ॥ १६ ॥ दुरावारान् वारयितुमशक्यान् । दुर्विषहान् दुःसहान् । कालदण्डोपमान् यमदण्डतुल्यान् । अजिह्मगान् अवक्रगामिनः । अस्खलितलक्ष्यकानित्यर्थः । कङ्कपत्रान् बाणान् । " कङ्कपत्रशरमार्गणबाणाः " इति हलायुधः ॥ १७ ॥ प्राणानाददुः अमारयन्नित्यर्थः । कालकृताः यममुक्ता इत्यर्थः ॥ १८ ॥ रुधिराप्लुता इति विशेषणं दीप्ताग्न्युपमासिद्ध्यर्थं ॥ १९ ॥ सायकाः बाणाः ॥ २० ॥ तैरित्याद्यर्धत्रयमेकं वाक्यं । वर्माणि कवचानि ॥ २१ ॥ काञ्चनसन्नाहान् काञ्चनाभरणान् । रथयुक्तान् रथबद्धान् । सगजारोहान्

ति० तिथिषु प्रदोषतिथिषु । पारिषदां भूतभावनार्थः ॥ ११ ॥ गो० वज्रैरिवमहाचलइतिव्यतिरेकदृष्टान्तः । वज्रैः वज्रनिपातैः । अनयोपमया श्रीरामस्यनकदाचिदपितत्कृतव्यथेतिसूच्यते । शि० भिन्नगात्रः भिन्नंप्राकृतविलक्षणं गात्रंशरीरंयस्यसः ॥ १३ ॥ क्षतजादिग्धः स्वीकृतकोपाभासहेतुकारुण्यविशिष्टत्वेन रुधिरलिप्तइव ॥ १४ ॥ गो० विशिखान्बाणान् बाणसंज्ञाञ्शरान् । " बाणास्तुगतपत्रिणः " इतियैजयन्ती ॥ १६ ॥ ति० लीलयेति । युगपत्सकलप्रपञ्चसंहारस्वरूपसैतावन्मात्रंलीलैवेति नाश्चर्यायेतिभावः ॥ १८ ॥ ति० चापमण्डलात् सन्धानमोचनशैथ्याम्मण्डलाकारतात्चापस्य ॥ २० ॥ ति० छेदभेदौ द्वैधीभा

[पा०] १ क. ख. ग. ङ. च. छ. ज. ञ. ट. महाबलाः. २ ङ.—ट. सर्वैः परीवृतोरामोराक्षसैःक्रूरदर्शनैः. ३ इदमर्धं ङ. ज. ञ. ट. पाठेषुदृश्यते. एतदर्धस्यप्रतिनिधितया. घोररूपैर्महादेवोवृतःपारिषदांगणैः. इत्यर्धं च. छ. ज. पाठेषु दृश्यते. ४ घ. च. महाबलः. ५ क. ग. क्षतजैर्दिग्धः. ६ घ. समागतं. ७ ङ ञ. ट. रामस्तु. ८ क. ङ.—ट. निशितान्. ख. विविधान्. ९ ङ. ञ. ट. कालपाशोपमान. १० ङ. ञ. लीलयाकङ्कपत्रान्काञ्चनभूषणान्. ११ ख. इत्था. १२ घ. असङ्ख्येयाश्च. १३ ङ.—ट. चर्माणिकवचानिच. १४ घ. विभेद. १५ ख. गजसंरोहान्. १६ ङ.—ट. स्तदा. १७ इदमर्धं ङ.—ट. पुस्तकेषुदृश्यते. चिच्छिदुर्विभिदुश्चैव. पदातीन्समरे. इत्यनयोरर्धयोःपौर्वापर्यं. च. छ. ज. ञ. पुस्तकेषुदृश्यते.

पदातीन्समरे हत्वा ह्यनयद्यमसाधनम् ॥ २३ ॥
ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः ॥ भीममार्तस्वरं चक्रुर्भिद्यमाना निशाचराः ॥ २४ ॥
तत्सैन्यं [3]निशितैर्बाणैरार्दितं मर्मभेदिभिः ॥ [4]रामेण न सुखं लेभे शुष्कं वनमिवाग्निना ॥ २५ ॥
केचिद्भीमबलाः शूराः [5]शूलान्खड्गान्परश्वधान् ॥ रामस्याभिमुखं गत्वा चिक्षिपुः परमायुधान् ॥ २६ ॥
तानि बाणैर्महाबाहुः शस्त्राण्यावार्य राघवः ॥ जहार समरे प्राणांश्चिच्छेद च शिरोधरान् ॥ २७ ॥
[10]ते छिन्नशिरसः पेतुश्छिन्नबर्हमशरासनाः ॥ [12]सुपर्णवातविक्षिप्ता जगत्यां पादपा यथा ॥ २८ ॥
अवशिष्टाश्च ये तत्र विषण्णाश्च निशाचराः ॥ खरमेवाभ्यधावन्त शरणार्थं [16]शरार्दिताः ॥ २९ ॥
तान्सर्वान्पुनरादाय समाश्वास्य च दूषणः ॥ [17]अभ्यधावत काकुत्स्थं क्रुद्धो रुद्रमिवान्तकः ॥ ३० ॥
निवृत्तास्तु पुनः सर्वे दूषणाश्रयनिर्भयाः ॥ राममेवाभ्यधावन्त सालतालशिलायुधाः ॥ ३१ ॥
शूलमुद्गरहस्ताश्च चापहस्ता महाबलाः ॥ सृजन्तः शरवर्षाणि शस्त्रवर्षाणि संयुगे ॥
द्रुमवर्षाणि मुञ्चन्तः शिलावर्षाणि राक्षसाः ॥ ३२ ॥
तद्बभूवाद्भुतं युद्धं तुमुलं रोमहर्षणम् ॥ रामस्य च महाघोरं पुनस्तेषां च रक्षसाम् ॥ ३३ ॥
ते समन्तादभिक्रुद्धा राघवं पुनरभ्ययुः ॥ ३४ ॥

सनिषादान् । सादिनः अश्वारोहान् ॥ २२ ॥ सदनमेव सादनं स्वार्थे अण् ॥ २३ ॥ नालीकाः नालमात्रशराः । नाराचा आयससशराः । विकर्णिनः कर्णशराः । भीममिति क्रियाविशेषणं ॥ २४ ॥ रामेण कर्त्रा बाणैः आर्दितं पीडितं । तत्सैन्यं सुखं दुःखनिवृत्तिं । अग्निनाऽर्दितं शुष्कं वनमिव न लेभे ॥ २५ ॥ परमायुधानिति शूलादिविशेषणं ॥ २६ ॥ आवार्य निवार्य शिरोधरानिति पुल्लिङ्गत्वमार्षं । शिरोधरांश्चिच्छेद प्राणांश्चाहरेति क्रमः ॥ २७ ॥ सुपर्णो गरुडः तस्य वातेन पक्षानिलेन विक्षिप्ताः उन्मूलिताः । जगत्यां भुवि ॥ २८ ॥ तत्र सैन्येषु । अवशिष्टाः हतावशिष्टाः । विषण्णाः दुःखिताः । शरणार्थं रक्षणार्थमिति यावत् ॥ २९ ॥ आदाय खरसमीपगमनान्निवर्त्य । अन्तकः रुद्रपराजितो यमः ॥ ३० ॥ निवृत्ताः युद्धान्निवृत्ताः । दूषणरूपाश्रयेण निर्भयाः सन्तः अभ्यधावन्त अभिमुखमाजग्मुः । प्रायशो नष्टायुधत्वात्सालतालेत्युक्तं ॥ ३१ ॥ शस्त्रवर्षाणि शरमिश्रायुधवर्षाणीत्यर्थः । सृजन्त इति आसन्निति शेषः ॥ ३२ ॥ रामस्य रक्षसां च तुमुलं संकुलं । महाघोरं अत एव रोमहर्षणं भयातिरेकेण रोमाञ्चकं । अत एवाद्भुतं तद्युद्धं पुनरपि बभूव ॥ ३३ ॥ त इत्यर्धमेकं

बविदारणरूपौ ॥ २२ ॥ शि० यमसादनं ईनांसवैसंपत्तीनांअम निलंप्राप्तिर्यस्मिन् तदेवसादनंगृहंयस्मिंस्तंनित्यलोकं ॥ २३ ॥ ति० नालीकाः मुखमात्रायस्संयुक्ताः । नाराचा सर्वतआयसाः । विकर्णिनः अग्राकुशाः उद्धारेप्राणहराः ॥ २४ ॥ स० शूलान् " शूलोस्त्री रोगआयुधे " इत्यमरव्याख्या ॥ २६ ॥ कतक० सुपर्णवातेन गरुडपक्षवातेन अमृतहरणयुद्धे विक्षिप्ताः भग्नाः । पादपाः नन्दनस्थाःकल्पवृक्षादयोयथा तद्वत् । समग्रालङ्कारयुतलाद्रक्षस्तनूनांकल्पवृक्षादिसाम्यं ॥ २८ ॥

[पा०] १ ङ. ञ. ण. ट. अनयत् २ ङ.—ट. चक्रुर्द्विद्यमानाः. ३ क. ञ. ट. विविधैर्बाणैः. ४ ङ.—ट. नरामेण. ५ ग. भीमबलान्प्रासान्. ६ क. ख. ङ. ञ. ट. प्रासाञ्शूलान्परश्वधान्. च. छ. ज. ञ. शूलांश्चैवपरश्वधान्. ७ ङ. ञ. ट. चिक्षिपुःपरमक्रुद्धारामायरजनीचराः. ८ च छ. ज. ञ. स्थिता. ९ ङ. ञ. ट. तेषां. क. तेषांयुधिमहा. ग. तेषांसुधीर्महा. १० ङ. ञ. ट. वीर्यवान्. ११ घ. तैश्छिन्न. ग. तैर्भिन्न. १२ ङ. ञ. ट. चर्मशरासनाः. ग. वर्मशिरोधरा. १३ च. पक्षविक्षिप्ता. घ. ङ. ट. वातनिक्षिप्ता. क. ख. पादविक्षिप्ता. १४ ङ. ञ. विषण्णास्ते. १५ ग. ङ. मेवाभिधावन्तः. १६ ङ. ञ. शराहताः. १७ ङ.—ट. सर्वान्धनुरादाय. १८ ङ. ञ. ण. ट. अभ्यधावत्सुसंक्रुद्धःक्रुद्धंक्रुद्धइवान्तकः. १९ ग. रुद्रंक्रूर इवान्तकः. क. ख. क्रुद्धंरुद्रमिवान्तकः. २० च छ. ज. संप्रयाः. ग. दुर्जया. ञ. संश्रिताः. २१ क. ङ.—ट. पाशहस्ता. २२ क. ग. ङ.—ट. रामस्यास्य. २३ ङ. ञ. ट. पुनरर्दयन्.

तैश्च सर्वा दिशो दृष्ट्वा प्रदिशश्च समावृताः ॥ राक्षसैरुद्यतप्रासैः शरवर्षाभिवर्षिभिः ॥ ३५ ॥
स कृत्वा भैरवं नादमस्त्रं परमभास्वरम् ॥ [1]संयोजयत गान्धर्वं राक्षसेषु महाबलः ॥ ३६ ॥
ततः शरसहस्राणि निर्ययुश्चापमण्डलात् ॥ सर्वा दश दिशो बाणैरावार्यन्त समागतैः ॥ ३७ ॥
नाददानं शरान्घोरान्न मुञ्चन्तं शिलीमुखान् ॥ [2]विकर्षमाणं पश्यन्ति राक्षसास्ते शरार्दिताः ॥३८॥
[शरा रामेण तूत्सृष्टा रुक्मपुङ्खाः पतत्रिणः ॥ सर्पाः पञ्चानना भूत्वा भक्षयन्ति स्म राक्षसान्]॥३९॥
शरान्धकारमाकाशमावृणोत्सदिवाकरम् ॥ बभूवावस्थितो रामः [3]एवमुग्निव ताञ्शरान् ॥ ४० ॥
युगपत्पतमानैश्च [4]युगपच्च हतैर्भृशम् ॥ [5]युगपत्पतितैश्चैव [6]विकीर्णा वसुधाभवत् ॥ ४१ ॥
निहताः पतिताः क्षीणाश्छिन्ना भिन्ना विदारिताः ॥ तत्रतत्र स्म दृश्यन्ते राक्षसास्ते सहस्रशः ॥४२॥
सोष्णीषैरुत्तमाङ्गैश्च साङ्गदैर्बाहुभिस्तथा ॥ ऊरुभिर्जानुभिश्छिन्नैर्नानारूपविभूषणैः ॥ ४३ ॥

वाक्यं । अभ्ययुः आवन्नुः ॥३४॥ इदमनुवदन्नाह—तैश्चेत्यादि श्लोकद्वयमेकं वाक्यं । महाबलः स रामः दिशः प्रदिशश्च तैरावृता दृष्ट्वा भैरवं भयंकरं नादं कृत्वा राक्षसेषु राक्षसनिमित्तं । गान्धर्वमस्त्रं धनुषि संयोजयत समयोजयत् । शरवर्षाभिवर्षिभिः शरवर्षकारिभिरित्यर्थः ॥ ३५—३६ ॥ चापमण्डलात् संहितगान्धर्वास्त्रात् । आकर्षणातिशयेन मण्डलीकृताच्चापान्निर्ययुः । समागतैस्तैर्बाणैर्दश दिशः सर्वाः अन्यूनाः अवार्यन्त ॥ ३७ ॥ राक्षसा रामस्य शरादानकर्षणमोचनानि नापश्यन् किंतु स्वहिंसनमेवापश्यन्निति क्रियाप्रधानो निर्देशः । यद्यपि गान्धर्वास्त्रप्रयोगे विचित्रबाणनिर्गमोक्ति तदस्मिन्श्लोके नोच्यते । किंतु तदनन्तरभाविकेवलशरमोक्ष इति ज्ञेयं ॥ ३८—३९ ॥ अन्धकारमिति क्लीबत्वमार्षं । प्रवमन् उद्गिरन् ॥ ४० ॥ युगपच्छरनिर्गमः समुत्प्रेक्ष्यते—युगपदिति । पतमानैः पतद्भिः । एककाले शरहतैः एककाले भूमौ पतद्भिः एककाले पतितैश्च राक्षसैः । वसुधा विकीर्णा व्याप्ताऽभवदिति युगपच्छरनिर्गमनकार्योक्तिः ॥ ४१ ॥ अथ हिंसावैचित्र्यमाह—निहता इति । निहताः केवलं प्रहताः । पतिताः अशनिपात इव भयेन भूमौ पतिताः । क्षीणाः कण्ठगतप्राणाः । छिन्नाः द्विधाकृताः । भिन्नाः खण्डितावयवाः । विदारिताः नृसिंहेन हिरण्यवदानाभिकण्ठमुद्भिन्नशरीराः । तत्र तत्रेत्यनेन कश्चिद्भिन्नः कश्चिद्विदारितः पुनः कश्चिद्भिन्न इत्येवं विचित्रशवत्वमुक्तं ॥ ४२ ॥ चित्रवधं दर्शयति—सोष्णीषैरित्यादिना । सोष्णीषैः शिरोवेष्टनवद्भिः । उत्तमाङ्गैः केवलशिरोभिः । नानारूपविभूषणैरित्यूरुजानूनां विशेषणं । साङ्गदैरूरुभिः सकटकैर्जानुभिश्चेत्यर्थः । अनेकशो भिन्नैरिति ह्यादित्रयविशेषणं । विच्छिन्नैरिति चामरादिसर्वविशेषणं । विचित्रैरिति शूलादिविशेषणं । नानाविधैरिति चामरादिविशेषणं । पूर्वोक्तैरेतैर्विकीर्णा अतएव भयंकराऽभूदिति योजना । एतावता ग्रन्थेन रामशरप्रभावातिशयो दर्शितः ।

स० सर्वाद्यनुपचरितलक्षणोतयति । शि० अत्र दशशब्दोपादानेनैव सर्वदिशाग्रहणेसिद्धे पुनस्सर्वशब्दोपादानमवान्तरदेशव्याप्तिपरिग्रहाय ॥३७॥ शि० प्रक्षिपन्निवबभूव प्रक्षिपन्निवेत्यनेनाभिप्रायविज्ञानमात्रेण स्वतश्चलन्तीतिसूचितं । तेन रामबाणानांचेतनत्वं सूचितं । ति० प्रक्षिपन्निव भूयोभूयःप्रक्षिपन्निवेत्यर्थः । इवशब्दएवार्थे ॥ ४० ॥ वि० विस्तीर्णा विशेषतःकृताच्छादना ॥ ४१ ॥ ति० विभूषणैरुपलक्षितैः । राक्षसैरितिशेषः ॥ ४३ ॥ इतिपञ्चविंशस्सर्गः ॥ २५ ॥

[पा०] १ क. ङ. ट. ततः, २ क. ङ. ट. राक्षसैस्सर्वतःप्राप्तैः, ३ क. ग. च. छ. ज. ञ. वर्षाणिवर्षिभिः, ङ. ङ. ट. वर्षाभिरावृतः, ४ क. ङ. ट. समयोजयद्गान्धर्वं, ५ च. ट. रापूर्यन्तः, ख. ग. रावार्यन्ते, ६ ख. घोरान्मुञ्चन्तं, क. ङ. ट. घोरान्विमुञ्चन्तं, ७ ख. ग. क.—ट. शरोत्तमान्, ८ क. न कार्मुकं विकर्षन्तं रामं पश्यन्ति संयुगे, ९ अयं श्लोकः क. पुस्तके दृश्यते, १० क. ङ. ञ. ट. प्रक्षिपन्निव, च. छ. ज. विसृजन्निशिताञ्शरान्, ११ ग. च. छ. ज. ञ. युगपत्प्रहितैःशरैः, १२ घ. युगपत्प्रेरितैश्चैव, १३ क.—घ. च. छ. ज. विस्तीर्णा, १४ घ. भग्नानिवारिताः, १५ ख. बाहुभिस्तदा, १६ क. ख. घ. ङ. ङ. ट. बाहुभिः, १७ क. ट. रूपैर्विभूषणैः.

हयैश्च द्विपमुख्यैश्च रथैर्भिन्नैरनेकशः ॥ [1]चामरैर्व्यजनैश्छत्रैर्ध्वजैर्नानाविधैरपि ॥ ४४ ॥
[2]रामस्य बाणाभिहतैर्विचित्रैः[3] शूलपट्टिशैः ॥ [4]खड्गैः खण्डीकृतैः प्रासैर्विकीर्णैश्च परश्वधैः ॥ ४५ ॥
[5]चूर्णिताभिः शिलाभिश्च [6]शरैश्चित्रैरनेकशः ॥ [7]विच्छिन्नैः समरे भूमिर्विकीर्णा[8]ऽभूद्भयंकरा ॥४६॥
[[9]तान्दृष्ट्वा निहतान्[10]सर्वे [11]राक्षसाः परमातुराः ॥ न तत्र [12]चलितुं शक्ता रामं परपुरंजयम् ॥ ४७ ॥
बलावशेषं तु निरस्तमाहवे खराधिकं राक्षसदुर्बलं बलम् ॥
जघान रामः स्थिरधर्मपौरुषो धनुर्बलैरप्रतिवारणैः शरैः ॥ ४८ ॥]
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

षड्विंशः सर्गः ॥ २६ ॥

दूषणेन स्वसेनाक्षयजकोपात्पञ्चसहस्रराक्षसैस्सह रामंप्रत्यभियानम् ॥ १ ॥ रामेण दूषणेतदनुयायिनिसेनापतित्रयेच सेनयासहनिहते खरेणद्वादशसेनाध्यक्षैस्सहतंप्रत्यभियानम् ॥ २ ॥ खरेण स्वसहचराणांद्वादशसेनापतीनामपिरामेणहनने स्वयमेवतंप्रत्यभियानम् ॥ ३ ॥

दूषणस्तु स्वकं सैन्यं हन्यमानं [13]निरीक्ष्य सः ॥ संदिदेश महाबाहुर्भीमवेगा[14]न्दुरासदान् ॥
राक्षसान्पञ्च साहस्रान्समरेष्वनिवर्तिनः ॥ १ ॥
ते शूलैः पट्टिशैः खड्गैः [15]शिलावर्षैर्द्रुमैरपि ॥ [16]शरवर्षैरविच्छिन्नं [17]ववृषुस्तं समन्ततः ॥ २ ॥
[18]सद्रुमाणां शिलानां च वर्षं प्राणहरं महत् ॥ प्रतिजग्राह धर्मात्मा राघवस्तीक्ष्णसायकैः ॥ ३ ॥
[19]प्रतिगृह्य च तद्वर्षं निमीलित इवर्षभः ॥ रामः क्रोधं परं [20]भेजे वधार्थं सर्वरक्षसाम् ॥ ४ ॥
ततः क्रोधसमाविष्टः प्रदीप्त इव तेजसा ॥ शरै[21]रवाकिरत्सैन्यं सर्वतः सहदूषणम् ॥ ५ ॥

अस्मिन्सर्गे पञ्चचत्वारिंशच्छ्लोकाः ॥ ४३—४८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चविंशः सर्गः ॥ २५ ॥

अथ दूषणप्रमुखसर्वसैन्यविनाशः षड्विंशे । दूषणस्त्वित्याद्यर्धत्रयमेकं वाक्यं । निरीक्ष्य चेति खिन्नश्चेत्यर्थः । भीमवेगान् भयंकरधावनान् । अतएव दुरासदान् । पञ्चसहस्रानित्यनेन पञ्चसाहस्री पूर्वं हतेति व्यज्यते ॥ १ ॥ तं रामं ॥ २ ॥ प्राणहरं अन्येषामिति शेषः । प्रतिजग्राह प्रतिरुरोध । धर्मात्मेत्यनेन कूटयोधित्वव्युदासः ॥ ३ ॥ निमीलित इवर्षभ इत्यनेन शरवर्षेपि निर्व्यथत्वमनायासत्वं च द्योत्यते ॥ ४ ॥ क्रोधसमाविष्ट इति राम इति शेषः । प्रदीप्त इव तेजसेति तेजोयुक्तत्वेन प्रदीप्त इव स्थित

स० पञ्चसाहस्रान् " शतमानविंशतिक—" इत्यण् । सहस्राणीतिवक्तव्येयत्साहस्रानितिकथनं तेन अहस्रै अमूर्खैस्सहितास्साहस्रास्तान् कुशलपुरुषसहितानितियावत् । " हस्रोमूर्खेविदूषके " इतिसंसारावर्तः ॥ १ ॥ ति० निमीलितः वर्षधारयानि-

[पा०] १ क. ख. घ झ. ट. चामरव्यजनैः. २ क. ग. ङ. झ. ञ. ट. रामेण. ३ ख. ग. ङ.—ट विच्छिन्नैः. ४ खड्गैः खण्डीकृतैः. चूर्णिताभिःशिलाभिश्च. इत्यर्धद्वयं झ. ञ. ट. पाठेषु न दृश्यते. ५ ख. चूर्णीकृतैः. ६ च. शरैश्छिन्नैः. घ. ज. शरैश्छत्रैः. ७ च. छ. ज. विच्छिन्नैस्तोमरैर्भूमिः. ञ. विचित्रैस्समरे. क. विभिन्नैस्समरे. ८ क.—ट. विस्तीर्णाभूत्. ९ इदं श्लोकद्वयं क. ख. ङ.—ज. ञ. पुस्तकेषुदृश्यते. झ. ट. पाठयोस्तु तान्दृष्ट्वेतिश्लोकमात्रं दृश्यते. १० क. ख. च. छ ज. ञ. स्सङ्ख्ये. ११ च. छ. ज. राक्षसान्परमातुरान्. १२ क. ख च छ ज. सहितुं. १३ ङ.—ट. विलोक्यच. ख. निरीक्ष्यतत्. क. ग. घ. निरीक्ष्यच. १४ घ. वेगान्निशाचरान् ख. वेगान्महाबलान्. १५ ख. ग. वर्षद्रुमैरपि. १६ घ. रविच्छिन्नैः. १७ ख. ववृषुश्च. १८ ङ.—ट. तद्रुमाणां १९ क. प्रतिगृह्यतु. २० ग. ङ. च. छ. झ. ञ. ट. लेभे. २१ क. ख. ग. ङ. झ. ट. रभ्यकिरत्. च. छ. ज. ञ. रभ्यहनत्तूर्णं.

ततः सेनापतिः क्रुद्धो दूषणः शत्रुदूषणः ॥ शरैरशनिकल्पैस्तं राघवं समवाकिरत् ॥ ६ ॥
ततो रामः सुसंक्रुद्धः क्षुरेणास्य महद्धनुः ॥ चिच्छेद समरे वीरश्चतुर्भिश्चतुरो हयान् ॥ ७ ॥
हत्वा चाश्वान्शरैस्तीक्ष्णैरर्धचन्द्रेण सारथेः ॥ शिरो जहार तद्रक्षस्त्रिभिर्विव्याध वक्षसि ॥ ८ ॥
स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः ॥ जग्राह गिरिशृङ्गाभं परिघं रोमहर्षणम् ॥ ९ ॥
वेष्टितं काञ्चनैः पट्टैर्वसैन्यप्रमर्दनम् ॥ आयसैः शङ्कुभिस्तीक्ष्णैः कीर्णं परवसोक्षितम् ॥ १० ॥
वज्राशनिसमस्पर्शं परगोपुरदारणम् ॥ तं महोरगसंकाशं प्रगृह्य परिघं रणे ॥
दूषणोऽभ्यद्रवद्रामं क्रूरकर्मा निशाचरः ॥ ११ ॥
तस्याभिपतमानस्य दूषणस्य स राघवः ॥ द्वाभ्यां शराभ्यां चिच्छेद सहस्ताभरणौ भुजौ ॥ १२ ॥
भ्रष्टस्तस्य महाकायः पपात रणमूर्धनि ॥ परिघश्छिन्नहस्तस्य शक्रध्वज इवाग्रतः ॥ १३ ॥
स कराभ्यां विकीर्णाभ्यां पपात भुवि दूषणः ॥ विषाणाभ्यां विशीर्णाभ्यां मनस्वीव महागजः १४
तं दृष्ट्वा पतितं भूमौ दूषणं निहतं रणे ॥ साधु साध्विति काकुत्स्थं सर्वभूतान्यपूजयन् ॥ १५ ॥
एतस्मिन्नन्तरे क्रुद्धास्त्रयः सेनाग्रयायिनः ॥ संहत्याभ्यद्रवन्रामं मृत्युपाशावपाशिताः ॥ १६ ॥
महाकपालः स्थूलाक्षः प्रमाथी च महाबलः ॥ महाकपालो विपुलं शूलमुद्यम्य राक्षसः ॥
स्थूलाक्षः पट्टिशं गृह्य प्रमाथी च परश्वधम् ॥ १७ ॥
दृष्ट्वापतत्तस्तूर्णं राघवः सायकैः शितैः ॥ तीक्ष्णाग्रैः प्रतिजग्राह संप्राप्तानतिथीनिव ॥ १८ ॥
महाकपालस्य शिरश्चिच्छेद परमेषुभिः ॥ असंख्येयैस्तु बाणौघैः प्रममाथ प्रमाथिनम् ॥ १९ ॥
स पपात हतो भूमौ विटपीव महाद्रुमः ॥ स्थूलाक्षस्याक्षिणी तीक्ष्णैः पूरयामास सायकैः ॥ २० ॥
दूषणस्यानुगान्पञ्चसाहस्रान्क्रुपितः क्षणात् ॥ बाणौघैः पञ्च साहस्रैरनयद्यमसादनम् ॥ २१ ॥

इत्यर्थः । सहदूषणं दूषणसहितं ॥ ५ ॥ दूषणः खरस्य सेनापतिः ॥६॥ चतुर्भिरिति शरैरित्यनुषङ्गः ॥ ७ ॥ तद्रक्षः दूषणं । वक्षसि विव्याधेति संबन्धः ॥८॥ परितो हन्यतेऽनेनेति परिघः तं । पट्टैः बन्धनैः । परवसोक्षितं शत्रुमेदःसिक्तं "क्लोम्नि मेदस्तु वपावसा" इत्यमरः । वज्राशनिसमस्पर्शं वज्रं वज्राख्यरत्नं । अशनिः वज्रायुधं । तदुभयसदृशकाठिन्यं । परगोपुरदारणं परेषां शत्रूणां यत् गोपुरं पुरद्वारं तस्य दारणं भेदकं । "पुरद्वारं तु गोपुरं" इत्यमरः ॥ ९—११ ॥ अभिपतमानस्य अभिपततः । सहस्ताभरणावित्यनेन शौर्यविरुदवत्त्वं लक्ष्यते ॥ १२ ॥ रणमूर्धनि छिन्नहस्तस्य तस्य दूषणस्य भ्रष्टः हस्ताच्युतः । महाकायः महाप्रमाणः । परिघः शक्रध्वज इवाग्रतः पपातेत्यन्वयः ॥ १३ ॥ कराभ्यां सह पपातेत्यन्वयः । मनस्वी धीरः ॥ १४ ॥ अपूजयन् अस्तुवन् ॥ १५—१६ ॥ त्रीनेवाह—महाकपाल इति । कः किमायुधं गृहीत्वाऽभ्यद्रवदित्यत्राह—महाकपाल इति ॥ १७ ॥ शितैः शाणोल्लीढैः । प्रतिजग्राह तेषु बाणानर्पयामासेत्यर्थः । यथा गृहं प्राप्तानतिथीनुपचारैः प्रतिगृह्णाति तथेत्यर्थः ॥ १८ ॥ प्रतिजग्राहेत्युक्तं विवृणोति—महाकपालस्येत्यादिना । प्रममाथ चूर्णीचकारेत्यर्थः ॥ १९ ॥ चूर्णशरीरत्वे दृष्टान्ततयोक्तं—

मीलिताक्षः ॥ ४॥ ति० क्षुरेण क्षुरधारेण शरेण ॥७॥ ति० पुरगोपुरदारणं शत्रूणांगावइन्द्रियाणितेषांपुरंशरीरंतस्यदारणंविदारकं । ती० वज्राशनिसमस्पर्शं वज्रतियात्येव न प्रतिहन्यतइतिवज्रं । अश्नाति शत्रुजीवितमित्यशनिः । तदुभयसमस्पर्शं ॥ ११ ॥ शि० असंख्येयैः अतिद्रुतगमनवत्त्वेनसंख्यातुमशक्यैः ॥ १९ ॥ ति० पञ्चसाहस्रान्पञ्चसाहस्रैरित्यनेन भगवतोऽमोघेषुत्वंसूचितं

[पा०] १ ख. कल्पैश्च. २ ङ. झ. ट. समवारयत्. ३ क. जघान. ४ ख. संकाशं. ५ क.—घ. च.—ट. सैन्याभिमर्दनं. ६ ग. च. छ. ज. पुरगोपुर. ७ ख. ग. ङ.—ट. दूषणोऽभ्यपतत्. क. दूषणोऽपपतत्. ८ घ. इवोच्छ्रितः. ९ ङ. झ. ट. कराभ्यांच. १० क.—ट. दृष्ट्वा तं. ११ क. संगम्याभ्यद्रवन्. १२ क.—ट. स्त्रांस्तु. १३ ङ.—ट. रघुनन्दनः. क. परमेषुणा. १४ एतच्छ्लोकार्धयो. पौर्वापर्ये क —ट. पुस्तकेषु दृश्यते. १५ ख. ग. महान्भूमौ. १६ ङ. झ. ट. स्थूले. १७ ख. ग. च. छ. ज. ञ. सहस्रान्. १८ क. ङ. झ. ञ. हत्वातुपञ्च. च. छ. ज. ट. हत्वातान्पञ्चसाहस्रान्.

दूषणं निहतं दृष्ट्वा तस्य चैव पदानुगान् ॥ व्यादिदेश खरः क्रुद्धः सेनाध्यक्षान्महाबलान् ॥२२॥
अयं विनिहतः संख्ये दूषणः सपदानुगः ॥ महत्या सेनया सार्धं युध्वा रामं कुमानुषम् ॥ २३ ॥
शस्त्रैर्नानाविधाकारैर्हनध्वं सर्वराक्षसाः ॥ एवमुक्त्वा खरः क्रुद्धो राममेवाभिदुद्रुवे ॥ २४ ॥
श्येनगामी पृथुग्रीवो यज्ञशत्रुर्विहङ्गमः ॥ दुर्जयः करवीराक्षः परुषः कालकार्मुकः ॥ २५ ॥
मेघमाली महामाली सर्पास्यो रुधिराशनः ॥ द्वादशैते महावीर्या बलाध्यक्षाः ससैनिकाः ॥
राममेवाभ्यवर्तन्त विसृजन्तः शरोत्तमान् ॥ २६ ॥
ततः पावकसंकाशैर्हेमवज्रविभूषितैः ॥ जघान शेषं तेजस्वी तस्य सैन्यस्य सायकैः ॥ २७ ॥
ते रुक्मपुङ्खा विशिखाः सधूमा इव पावकाः ॥ निजघ्नुस्तानि रक्षांसि वज्रा इव महाद्रुमान् ॥२८॥
रक्षसां तु शतं रामः शतेनैकेन कर्णिना ॥ सहस्रं च सहस्रेण जघान रणमूर्धनि ॥ २९ ॥
तैर्भिन्नवर्माभरणाश्छिन्नभिन्नशरासनाः ॥ निपेतुः शोणितादिग्धा धरण्यां रजनीचराः ॥ ३० ॥
तैर्मुक्तकेशैः समरे पतितैः शोणितोक्षितैः ॥ आस्तीर्णा वसुधा कृत्स्ना महावेदिः कुशैरिव ॥ ३१ ॥
क्षणेन तु महाघोरं वनं निहतराक्षसम् ॥ बभूव निरयप्रख्यं मांसशोणितकर्दमम् ॥ ३२ ॥
चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् ॥ हतान्येकेन रामेण मानुषेण पदातिना ॥ ३३ ॥
तस्य सैन्यस्य सर्वस्य खरः शेषो महारथः ॥ राक्षसस्त्रिशिराश्चैव रामश्च रिपुसूदनः ॥ ३४ ॥
शेषा हता महासत्त्वा राक्षसा रणमूर्धनि ॥ घोरा दुर्विषहाः सर्वे लक्ष्मणस्याग्रजेन ते ॥ ३५ ॥

ततस्तु तद्भीमबलं महाहवे समीक्ष्य रामेण हतं बलीयसा ॥
रथेन रामं महता खरस्तदा समाससादेन्द्र इवोद्यताशनिः ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे षड्विंशः सर्गः ॥ २६ ॥

विटपीति ॥ २०—२३ ॥ हनध्वं घ्नत ॥ २४ ॥ सेनाध्यक्षानेवाह—श्येनगामीत्यादिना ॥२५—२६॥ वज्रं वज्रमणिः । तेजस्वी राम इति शेषः ॥ २७ ॥ सधूमा इत्यनेन दहनोन्मुखत्वं व्यज्यत इत्यङ्गारावस्थाव्यावृत्तिः । वज्रा इवेति "वज्रमस्त्रियां" इत्युभयलिङ्गो वज्रशब्दः ॥ २८ ॥ कर्णिना कर्णाकारशरीरेण ॥ २९ ॥ छिन्नं खण्डितं । भिन्नं विदारितं । आदिग्धाः आलिप्ताः ॥ ३० ॥ रणाग्रपतितत्वातिशयात्कुशसाम्योक्तिः ॥ ३१ ॥ निरयप्रख्यं नरकतुल्यं । मांसशोणितैः कृतः कर्दमः पङ्को यस्य तत्तथा ॥ ३२ ॥ मानुषेण ऋजुना । पदातिना वाहनरहितेनेत्यद्भुतोक्तिः ॥ ३३ ॥ सैन्यस्य युद्धप्रवृत्तस्य । अतो रामस्यापि तत्रान्तर्भावः । खरादित्रयं शेषः अवशिष्टांश इत्यर्थः । शेषाः सर्वे राक्षसा हता इत्यन्वयः । महासत्त्वा इत्यादिविशेषणैर्महारथा एव हताः क्षुद्राः केचन भीरवो न हता इतिगम्यते । अत एवोत्तरसर्गे हतशेषा इति वक्ष्यति । लक्ष्मणस्याग्रजेनेति रामस्य विष्ण्वर्धांशभाक्त्वेनाधिकबलत्वोक्तिः ॥ ३४—३५ ॥ भीमबलं भीमसैन्यं । उद्यताशनिः उद्यतवज्रः ॥३६॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षड्विंशः सर्गः ॥ २६ ॥

शि० पञ्चसाहस्रान्दूषणस्यानुगान्हत्वा तान्पञ्चसाहस्रान् यमसादनं सकलसंपत्तिविशिष्टलोकविशेषं अनयत् । वि० पञ्चसाहस्रैः बाणैरितिशेषः ॥ २१ ॥ स० कुमानुषं कौ भूमौमनुष्याकारंप्राप्तं ॥ २३ ॥ ति० शतं एकेन शतेन तत्संख्याकेन । कर्णिना बाणविशेषेण । एवसहस्रंसहस्रेण ॥ २९ ॥ शि० मुक्ता ग्रन्थिरहिता केशा येषांतैः ॥ ३१ ॥ इतिषड्विंशस्सर्गः ॥२६॥

[पा०] १ ङ. झ. ट. श्रुत्वा. २ ग. वशानुगान्. ३ च छ. ज. ञ. शेते. ४ ङ.—ट. हेममाली ५ क. ङ.—ट. वाभ्यधावन्त. ६ ख. शेषांस्तेजस्वी. ७ क. वज्राणीव. ८ च. छ. ज. ञ. महासुरान्. ९ च. छ. ज. शरेणैकेन. १० क.—ट. सहस्रंतु. ११ ङ. झ. ट. विस्तीर्णा. १२ क. तत्र. १३ ङ. च. छ झ. ञ. ट. तत्क्षणेतु. १४ क. क्रूरकर्मणां. १५ ङ.—ट. महावीर्याः. १६ क. रणनिर्भयाः. ख. ग. रणदुर्जयाः. १७ ङ. झ. ट. धर्मेण. १८ क. ङ.—ट. स्तत..

सप्तविंशः सर्गः ॥ २७ ॥

त्रिशिरसा रामाभियायिनः खरस्यरामवधप्रतिज्ञानेननिवर्तनपूर्वकं संप्रत्यभियानम् ॥ १ ॥ रामेणत्रिशिरसोपिबधे खरेणरामंप्रति स्वयमेवाभियानम् ॥ २ ॥

सेनापतिं तु रामाभिमुखं प्रयान्तं वाहिनीपतिः ॥ राक्षसस्त्रिशिरा नाम संनिपत्येदमब्रवीत् ॥ १ ॥
मां नियोजय विक्रान्त संनिवर्तस्व साहसात् ॥ पश्य रामं महाबाहुं संयुगे विनिपातितम् ॥ २ ॥
प्रतिजानामि ते सैन्यमायुधं चाहमालभे ॥ यथा रामं वधिष्यामि वैधार्हं सर्वरक्षसाम् ॥ ३ ॥
अहं वाऽस्य रणे मृत्युरेष वा समरे मम ॥ विनिवृत्य रणोत्साहान्मुहूर्तं प्राभ्रिको भव ॥ ४ ॥
प्रहृष्टे वा हते रामे जनस्थानं प्रयास्यसि ॥ मयि वा निहते रामं संयुगायोपयास्यसि ॥ ५ ॥
खरस्त्रिशिरसा तेन मृत्युलोभात्प्रसादितः ॥ गच्छ युध्येत्यनुज्ञातो राघवाभिमुखो ययौ ॥ ६ ॥
त्रिशिराश्च रथेनैव वाजियुक्तेन भास्वता ॥ अभ्यद्रवद्रणे रामं त्रिशृङ्गइव पर्वतः ॥ ७ ॥
शरधारासमूहान्स महामेघ इवोत्सृजन् ॥ व्यसृजत्सदृशं नादं जलार्द्रस्य तु दुन्दुभेः ॥ ८ ॥
आगच्छन्तं त्रिशिरसं राक्षसं प्रेक्ष्य राघवः ॥ धनुषा प्रतिजग्राह विधून्वन्सायकाञ्शितान् ॥ ९ ॥
स संप्रहारस्तुमुलो रामत्रिशिरसोर्महान् ॥ बभूवातीव बलिनोः सिंहकुञ्जरयोरिव ॥ १० ॥

त्रिशिरश्छिरसां छेददृष्टान्तेन स्वसेविनाम् । दुःखत्रयनिहन्तारं लक्ष्मणाग्रजमाश्रये ॥ वाहिनीपतिः सेनापतिः । संनिपत्य समीपमागत्येत्यर्थः ॥ १ ॥ साहसात् युद्धाभिमुख्यलक्षणात् । विनिपातितमिति मयेतिशेषः ॥ २ ॥ आलभे स्पृशामि । प्रतिज्ञाप्रकारमाह—यथेति । सर्वरक्षसां सर्वरक्षोभिः ॥ ३ ॥ मृत्युः मारयिता । प्राभ्रिकः जयापजयनिर्णायकः ॥४॥ प्रहृष्टे गर्विष्टे । संयुगाय युद्धं कर्तुं । "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति चतुर्थी ॥५॥ मृत्युलोभात् मृत्युना कृतो लोभो युद्धलोभस्तस्मात् । प्रसादितः निवर्तित इति यावत् । युध्य युद्धं कुरु । अनुज्ञातः खरेणेति शेषः । त्रिशिरा इति सिद्धं ॥ ६ ॥ त्रिशिराश्चेति चकारो न समुच्चयार्थः ॥ ७ ॥ शरा एव धाराः आसाराः तासां समूहान् । दुन्दुभिशब्दः पुंलिङ्गः । "भेरी स्त्री दुन्दुभिः पुमान्" इत्युक्तेः । दुन्दुभेः दुन्दुभिनादस्य । जलार्द्रस्येत्यनेनास्य हीनस्वरत्वमुक्तं ॥ ८ ॥ धनुषा सायकान् विधून्वन् कम्पयन् मुञ्चन्निति यावत् ॥ ९ ॥ संप्र-

---

ती० सप्तविंशेसर्गेमांनियोजयेत्यादिसार्धश्लोकस्यचतुष्टयस्यवास्तवार्थस्तु—हेखर संयुगेरामंच तेनविनिपातितंसैन्यंचेतिशेषः । पश्य । अतस्त्वंसाहसाभिवर्तस्व । मांनियोजय । तर्हित्व तंहनिष्यसिकिं तत्राह—प्रतिजानामीत्यादि । सर्वरक्षसांवधार्हं सर्वरक्षसांहन्तारमित्यर्थः । रामं यथा यथावत् । अहंप्रतिजानामि सम्यग्जानामीत्यर्थः । अतस्तं वधिष्यामीति सर्वमायुधमालभे प्रहिष्यामिकेवलमित्यर्थः । हन्तुमशक्यखेदनेनकिं तत्राह—अहमिति । अस्यरामस्य अहं वा रणेमृत्युः किंतु एषवा एषरामएव समरेममृत्युः । अतस्त्वं महोत्साहाद्विनिवर्तस्व । मुहूर्तंप्राभ्रिकोभवेतिसंबन्धः । प्रहृष्टोवाहतइत्यत्र अहतइतिच्छेदः । रामे अहतेसति मे मयिच निहतेसति प्रहृष्टस्त्वं रामंप्रति संयुगायोपयास्यसि अथवा जनस्थानंवा प्रयास्यसीतिसंबन्धः । प्रसादितः प्रार्थितः ॥ २—६ ॥ स० सर्वरक्षसांवधार्हं सर्वराक्षसकर्मकवधयोग्यं वधकर्तारमितियावत् ॥ ३ ॥ ति० अहंवाऽस्यसमरेइतिपाठे मृत्युरित्यस्यासेतिशेषः ॥ ४ ॥ ति० मृत्युलोभात् मृत्युकृतेयुद्धलोभात् । मृत्युसमये रक्षःप्रकृतिविपर्ययात्तस्यभगवत्तत्वंज्ञात्वा तद्धस्तमृत्युलोभादित्यर्थश्च ॥६॥ ति० जलार्द्रस्येति । अनेन नादवैपरीत्येनमृत्युसान्निध्यंसूचितं । स० मेघपक्षे शरसन्दोहदक-

---

[पा०] १ च. छ. ज. ञ. वाहिनीपतिः. २ क. ख. संनिवर्त्येदं. ३ च. छ. ज. ञ. संप्राप्ते, घ. क. ङ. विक्रान्तं. ४ ङ. ञ. ट. संनिवर्तस्व. ५ क. सर्वं. ६ क. च. समालभे. ७ ख. हितार्थं. ८ घ. प्रहृष्टोनिहते. क. ख. ग. ङ.—ट. प्रहृष्टोवाहते. ९ ङ.—ट. संयुगायप्रयास्यसि. १० क. ग. युद्धेऽभ्यनुज्ञातः. ११ घ. क. ङ. ट. त्रिशिरास्तु. १२ च. छ. ज. ञ. व्यसृजद्भैरवं. १३ क.—ट. जलार्द्रस्येव. १४ ङ. ञ. ट. त्रिशिरसोस्तदा. १५ ङ.—ट. संबभूवाति.

ततस्त्रिशिरसा बाणैर्ललाटे ताडितस्त्रिभिः ॥ अमर्षी कुपितो रामः संरब्धमिदमब्रवीत् ॥ ११ ॥
अहो विक्रमशूरस्य राक्षसस्येदृशं बलम् ॥ पुष्पैरिव शरैर्यस्य ललाटेऽस्मि परिक्षितः ॥ १२ ॥
ममापि प्रतिगृह्णीष्व शरांश्चापगुणच्युतान् ॥ एवमुक्त्वा तु संरब्धः शरानाशीविषोपमान् ॥
त्रिशिरोवक्षसि क्रुद्धो निर्जघान चतुर्दश ॥ १३ ॥
चतुर्भिस्तुरगानस्य शरैः संनतपर्वभिः ॥ न्यपातयत तेजस्वी चतुरस्तस्य वाजिनः ॥ १४ ॥
अष्टभिः सायकैः सूतं रथोपस्थे न्यपातयत् ॥ रामश्चिच्छेद बाणेन ध्वजं चास्य समुच्छ्रितम् ॥१५॥
ततो हतरथात्तस्मादुत्पतन्तं निशाचरम् ॥ बिभेद रामस्तं बाणैर्हृदये सोभवज्जडः ॥ १६ ॥
सायकैश्चाग्रमेयात्मा सामर्षस्तस्य रक्षसः ॥ शिरांस्यपातयद्रामो वेगवद्भिस्त्रिभिः शितैः ॥ १७ ॥
सै भूमौ रुधिरोद्गारी रामबाणाभिपीडितः ॥ न्यपतत्पतितैः पूर्वं स्वैश्शिरोभिर्निशाचरः ॥ १८ ॥
हतशेषास्ततो भग्ना राक्षसाः खरसंश्रयाः ॥ द्रवन्ति स्म न तिष्ठन्ति व्याघ्रत्रस्ता मृगा इव ॥१९॥
तान्खरो द्रवतो दृष्ट्वा निवर्त्य रुषितः स्वयम् ॥ राममेवाभिदुद्राव राहुश्चन्द्रमसं यथा ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

हारो युद्धं ॥ १० ॥ संरब्धं सकोपमित्यर्थः । लोके कश्चित्कुपितोपि वचनेन कोपं न प्रकटयति अयं तु प्रकटयतीति भावः ॥ ११ ॥ अहो इत्यादिव्यङ्ग्योक्तिः । विक्रमः पराभिभवनं तत्र शूरस्य समर्थस्येत्यर्थः । ईदृशमित्यस्यैव विवरणं—पुष्पैरिवेत्यर्धं । ललाटे स्वल्लाटे । ललाटे स्वल्पापि क्षतिर्बाधिका भवति सापि नास्तीति सूचयितुं पुष्पतौल्यं । चापगुणः चापमौर्वी । सरब्धः सन्नेवमुक्त्वा क्रुद्धो निजघानेत्यन्वयः ॥ १२—१३ ॥ सन्नतपर्वभिः ऋजुपर्वभिः । वाजिनः वेगवतः ॥ १४ ॥ रथोपस्थे रथोपरिभागे ॥१५॥ हतरथात् हतहयसारथिकरथात् । हृदये वक्षसि । बिभेदेत्यन्वयः । जडः निश्चेष्टः ॥ १६—१७ ॥ पूर्वं पतितैः शिरोभिः हेतुभिः स्वयं न्यपतत् ॥ १८ ॥ खरसंश्रयाः खरसेवकाः ॥ १९—२० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तविंशः सर्गः ॥ २७ ॥

वाची ॥ ८ ॥ शि० अमर्षी अन्यपराधासहनशीलः ॥ ११ ॥ ती० अहोइतिसोपहासवचनं । पुष्पैस्स्वल्पापीडाभवति । स्वच्छरैस्वादृशपीडापिनास्तीतिभावः । स० परिक्षतः वर्जितक्षतः । " अपपरीवर्जने " इतिवचनात् पुष्पैरितिमुलप्रं ॥ १२ ॥ ति० जडः आयुधपरिग्रहेइतिशेषः ॥ १६ ॥ ति० पूर्वंपतितै शिरोभिरुपलक्षित पश्चान्न्यपतत् । " चतुर्दशसहस्राणिममचित्तानुवर्तिनाम्" इतिसेनोद्योगेखरोक्तेः चतुर्दशसहस्राणिहतानि खरत्रिशिरसावेवावशिष्टाविति पूर्वसर्गान्ते उक्तेर्हतशेषाभिवर्त्येत्यत्रश्लोकेश्चचतुर्दशसहस्रं यूथपाअत्रेतिज्ञायते । हतशेषाइतितु खरीयमूलबलाभिप्रायंबोध्यं । टी० ननु खरशेषोमहारथः । त्रिशिराधैवरामश्चेत्युक्तं कथमिदानींहतशेषाइति । उच्यते , तत्र प्रधानेषुत्रयोऽवशिष्टाइतिमुनेरभिप्रायः ॥ १९ ॥ स० निवर्त्य निवर्तयित्वा । रुषितः रुष्टः ॥ २० ॥ इतिसप्तविंशस्सर्गः ॥ २७ ॥

[पा०] १ क. ख. ङ. च. छ. झ. ञ. ट. संरब्धइदं. २ ङ.—ट. शरैर्योहं. ३ ट. सुसंरब्धः. क. ख. तु संकुद्धः. ४ ख. घ. निचखान. ५ अ. रथोपस्थान्यपातयत्. ६ ङ.—ट. चिच्छेद. ७ क. ग. ङ.—ट. स्वपातयन्नीणि. ८ क.—ट. शरैः. ९ ङ. झ. ट. सधूमशोणितोद्गारी. ख. ग. च. छ. ज. ञ. समूमौशोणितोद्गारी. १० ख. ङ. ट. समरस्योनिशाचरः. घ. स्वशिरोभिर्महाबलः. ११ क. शेषास्तु. १२ ङ. झ. ट. रुषितस्त्वरन्.

अष्टाविंशः सर्गः ॥ २८ ॥

खरकृतधनुश्छेदरुष्टेनरामेणागस्त्यदत्तधनुरादानेन शरैः खरस्यविरथीकरणम् ॥ १ ॥ रथसङ्गेगदापरिग्रहेणधरणीतलस्थे खरे विमानस्थैर्देवादिभिः सहर्षंश्रीरामाभिष्टवः ॥ २ ॥

निहतं दूषणं दृष्ट्वा रणे त्रिशिरसा सह ॥ खरस्याप्यभवत्त्रासो दृष्ट्वा रामस्य विक्रमम् ॥ १ ॥
स दृष्ट्वा राक्षसं सैन्यमविषह्यं महाबलः ॥ हतमेकेन रामेण त्रिशिरोदूषणावपि ॥ २ ॥
तद्बलं हतभूयिष्ठं विमनाः प्रेक्ष्य राक्षसः ॥ आससाद खरो रामं नमुचिर्वासवं यथा ॥ ३ ॥
विकृष्य बलवच्चापं नाराचान्रक्तभोजनान् ॥ खरश्चिक्षेप रामाय क्रुद्धानाशीविषानिव ॥ ४ ॥
ज्यां विधून्वन्सुबहुशः शिक्षयाऽस्त्राणि दर्शयन् ॥ चकार समरे मार्गाञ्शरै रथगतः खरः ॥ ५ ॥
स सर्वाश्च दिशो बाणैः प्रदिशश्च महारथः ॥ पूरयामास तं दृष्ट्वा रामोपि सुमहद्धनुः ॥ ६ ॥
स सायकैर्दुर्विषहैः सस्फुलिङ्गैरिवाग्निभिः ॥ नभश्चकाराविवरं पर्जन्य इव वृष्टिभिः ॥ ७ ॥
तद्बभूव शितैर्बाणैः खररामविसर्जितैः ॥ पर्याकाशमनाकाशं सर्वतः शरसंकुलम् ॥ ८ ॥
शरजालावृतः सूर्यो न तदा स्म प्रकाशते ॥ अन्योन्यवधसंरम्भादुभयोः संप्रयुध्यतोः ॥ ९ ॥
ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः ॥ आजघान खरो रामं तोत्रैरिव महाद्विपम् ॥ १० ॥
तं रथस्थं धनुष्पाणिं राक्षसं पर्यवस्थितम् ॥ ददृशुः सर्वभूतानि पाशहस्तमिवान्तकम् ॥ ११ ॥
हन्तारं सर्वसैन्यस्य पौरुषे पर्यवस्थितम् ॥ परिश्रान्तं महासत्त्वं मेने रामं खरस्तदा ॥ १२ ॥
तं सिंहमिव विक्रान्तं सिंहविक्रान्तगामिनम् ॥ दृष्ट्वा नोद्विजते रामः सिंहः क्षुद्रमृगं यथा ॥ १३ ॥
ततः सूर्यनिकाशेन रथेन महता खरः ॥ आससाद रणे रामं पतङ्ग इव पावकम् ॥ १४ ॥

महामोहसहायस्य दर्पस्याश्रयनिग्रहम् । व्यङ्क्तुं स्वरोपकरणं हन्तारं राममाश्रये ॥ निहतं दूषणं दृष्ट्वा रामस्य विक्रमं च दृष्ट्वा स्थितस्य खरस्य त्रासोऽभवदिति योजना ॥ १ ॥ रक्षसां संबन्धि राक्षसं त्रिशिरोदूषणौ हतावित्यनुषङ्गः । बलं सैन्यं । हतभूयिष्ठं हतप्रवरराक्षसं । चतुर्दशसहस्रसंख्याकाः प्रधाना हताः अवशिष्टं सैन्यं प्रेक्ष्येत्यर्थः । विमनाः विगतगर्वावस्थं मनो यस्य स तथा ॥ २—३ ॥ बलवत् अत्यन्तं । नाराचान् "प्रक्ष्वेडनास्तु नाराचाः" इत्यमरः । रक्तभोजनानिति रक्तरूषितत्वेन रक्तभोजनत्वव्यपदेशः । आशीविषानिव सर्पानिव स्थितान् ॥ ४ ॥ शिक्षया धनुर्वेदशिक्षापाटवेन । ज्यां विधून्वन् अस्त्राणि दर्शयन् अस्त्रप्रयोगपाटवं दर्शयन्नित्यर्थः । समरे शरैः मार्गान् नानाप्रकारांश्चकार ॥५॥ स रामोपि तं दृष्ट्वा बाणैः सुमहद्धनुः सर्वा दिशः प्रदिशश्च पूरयामासेत्यन्वयः ॥ ६ ॥ सः रामः । अविवरं नीरन्ध्रं ॥ ७ ॥ पर्याकाशं परितः स्थितमाकाशं । खररामयोश्चतुःपार्श्ववर्त्याकाशमित्यर्थः । सर्वतः सर्वत्र । अनाकाशं अनवकाशं बभूव ॥ ८ ॥ संरम्भात् कोपात् । "संरम्भः संभ्रमे कोपे" इत्यमरः । उभयोः शरजालावृत इत्यन्वयः ॥ ९ ॥ तोत्रैः गजशिक्षणयष्टिभिः ॥ १०—११ ॥ खरः सर्वसैन्यहननपरिश्रान्तमपि रामं पौरुषे पर्यवस्थितं महासत्त्वं मेने । यद्वा उक्तविशेषणं रामं परिश्रान्तं मेने ॥१२॥ नोद्विजते नाचलत् । क्षुद्रमृगं शशं ॥ १३ ॥ पतङ्ग

स० मार्गान् शरसंघातप्रक्षेपणादिप्रकारभेदान् । स० रथगतइत्यनेन रामस्यपदातित्वेप्यस्यरथगतत्वमन्याय्यमितिसूचयति ॥ ५ ॥ स० शरसंकुलं उदकसंकुलमिव ॥ ८ ॥ ति० रामंखरःपरिश्रान्तंमेने । अनेनायंप्रहारावसरइति खरबोधस्सूचितः ।

[पा] १ ख.—च. झ. ट. महाबलं. २ ङ. झ. ञ. ट. दूषणस्त्रिशिराअपि. ३ ख. तत्सैन्यं. ४ क. घ. सबहुशः. ५ क. च.—ट. चचार. ६ क. ग. रामश्चकार. ख. रामश्चकाराविरतं. ७ ख. च. छ. ज. ञ. संप्रकाशते. ८ क.—ट. रणे. ९ क. च. छ. ज. ञ. तस्यसैन्यस्य.

ततोस्य सशरं चापं मुष्टिदेशे महात्मनः ॥ खरश्चिच्छेद रामस्य दर्शयन्पाणिलाघवम् ॥ १५ ॥
स पुनस्त्वपरान्सप्त शरानादाय वर्मणि ॥ निजघान खरः क्रुद्धः शक्राशनिसमप्रभान् ॥ १६ ॥
ततस्तत्प्रहतं बाणैः खरमुक्तैः सुपर्वभिः ॥ पपात कवचं भूमौ रामस्यादित्यवर्चसः ॥ १७ ॥
ततः शरसहस्रेण राममप्रतिमौजसम् ॥ अर्दयित्वा महानादं ननाद समरे खरः ॥ १८ ॥
स शरैरर्पितः क्रुद्धः सर्वगात्रेषु राघवः ॥ रराज समरे रामो विधूमोग्निरिव ज्वलन् ॥ १९ ॥
ततो गम्भीरनिर्ह्रादं रामः शत्रुनिबर्हणः ॥ चकारान्ताय स रिपोः सज्यमन्यन्महद्धनुः ॥ २० ॥
सुमहद्वैष्णवं यत्तदतिसृष्टं महर्षिणा ॥ वरं तद्धनुरुद्यम्य खरं समभिधावत ॥ २१ ॥
ततः कनकपुङ्खैस्तु शरैः सन्नतपर्वभिः ॥ विभेद रामः संक्रुद्धः खरस्य समरे ध्वजम् ॥ २२ ॥
स दर्शनीयो बहुधा विकीर्णः काञ्चनध्वजः ॥ जगाम धरणीं सूर्यो देवतानामिवाज्ञया ॥ २३ ॥
तं चतुर्भिः खरः क्रुद्धो रामं गात्रेषु मार्गणैः ॥ विव्याध युधि मर्मज्ञो मातङ्गमिव तोमरैः ॥२४॥
स रामो बहुभिर्बाणैः खरकार्मुकनिःसृतैः ॥ विद्धो रुधिरसिक्ताङ्गो बभूव रुषितो भृशम् ॥ २५ ॥
स धनुर्धन्विनां श्रेष्ठः प्रगृह्य परमाहवे ॥ मुमोच परमेष्वासः षट् छरानभिलक्षितान् ॥ २६ ॥
शिरस्येकेन बाणेन द्वाभ्यां बाह्वोरथार्दयत् ॥ त्रिभिश्चन्द्रार्धवक्त्रैश्च वक्षस्यभिजघान ह ॥ २७ ॥

इत्यनेन अमृत्वा अनिवृत्तिरुच्यते ॥ १४ ॥ मुष्टिदेशे मुष्टिबन्धनसमीपदेशे । महात्मन इत्यनेन मुष्टिदेशे पततो बाणस्य परिहरणसामर्थ्यं व्यज्यते । लाघवं शैघ्र्यं चिच्छेद रामस्य किंचिच्छ्रान्तत्वेनानवधानादिति भावः ॥ १५ ॥ पाणिलाघवमेवाह—स पुनरित्यादिना । वर्मणि निजघान अवदारयति स्म ॥ १६ ॥ आदित्यवर्चस इत्यनेन कवचपतनानन्तरं प्रकाशमानतेजोविशेष उच्यते ॥१७—१८ ॥ अर्पितः संयुक्तः । विधूम इत्यनेन ज्वालाधिक्यमुच्यते ॥ १९ ॥ गम्भीरनिर्ह्रादं गम्भीरध्वनिकं । धनुः रिपोरन्ताय नाशाय । चकारेत्यन्वयः ॥२०॥ यत्तदिति प्रसिद्ध्यतिशयवाची । महर्षिणा अगस्त्येन । अतिसृष्टं दत्तं । समभिधावत समभ्यधावत ॥ २१ ॥ सन्नतपर्वभिः ऋजुपर्वभिः ॥ २२ ॥ दर्शनीयः रम्यः । आज्ञया शापेन । उत्प्रेक्षेयं ॥ २३ ॥ मातङ्गं गजं । तोमरैः गजशिक्षादण्डैः । चतुर्भिरित्यत्र वीप्सा बोध्या । बहुभिरित्यनुवादात् ॥ २४—२५ ॥ परमेष्वासः उत्कृष्टशरासनः । अभिलक्षितान् प्रसिद्धान् ॥२६॥ षण्णां विनियोगप्र-

---

अतएवानुपद तेनरामधनुषश्छेदः । स० महासत्वमपि रामं परिश्रान्तंमेने । अनेन भ्रमस्सूच्यते । शि० पौरुषे परमपुरुषत्वे पर्यवस्थितंरामं खरःपरिश्रान्तंमेने । एतेन खरस्याज्ञानंसूचित ॥ १२ ॥ शि० चिच्छेद । एतेन तद्धनुषोऽदिव्यत्वसूचितंयद्यपि । वस्तुतस्तु चिच्छेदेत्यस्य द्विधाभवनानुकूलव्यापारंचकारेत्यर्थः । नहि व्यापारमात्रेण फलसिद्धिस्सार्वत्रिकीति अत्र फलसिद्धेरभावाच्चापस्यदिव्यत्वमक्षतमेव ॥१५॥ शि० खरमुक्तैर्बाणैः प्रहतं ताडनाश्रयत्वेनेच्छविषयीभूतं । आदित्यवर्चसं तद्रामकवचं भूमौपपात ताडितस्वसस्पर्शजनितरामखेदसंभावनया बाणसंबन्धात्पूर्वमेव रामशरीरान्निस्सृत्य खरप्रक्षिप्तबाणान्गृहीत्वा पृथिव्यामतिष्ठदित्यर्थः ॥ १७ ॥ शि० अगस्त्येनदत्तमित्यनेन महत्तचापेनैव खरोहन्तव्य इत्यगस्त्यप्रार्थना सूचिता । तेनागस्त्यस्याप्यनेन कश्चिदपराधःकृतइति सूचितं ॥ २१ ॥ स० देवतानां स्वोत्तमानां हरिब्रह्महराणां आज्ञया सूर्य अस्तसमयेधरणीमिव ध्वजोजगामेत्यर्थः ॥ २३ ॥ शि० बाणैर्विद्धस्ताडितः, रुधिरसिक्ताङ्गः निहतानेकराक्षसशरीरजनितशोणितोक्षितोरामः ॥ स० रुधिरसिक्ताङ्गः तद्वद्बभूवेत्यर्थः ॥ २५ ॥ स० अभिलक्षितान् ज्ञातसामर्थ्यान् ॥ २६ ॥

[पा०] १ ङ. झ. ट. न्हस्तलाघवं. २ क.—घ. च —ञ. मर्मणि. ३ क —घ निचखान. ४ क.—ट. रणे. ५ क. ग. समस्वनान. ६ ततस्तत्प्रहितं. ततःशरसहस्रेणेत्यनयोः श्लोकयोः पौर्वापर्यं क. ख. ग. ङ.—ट. पाठेषु दृश्यते. क. ततस्तन्मृदितं. छ. ततस्तत्प्रहतैः. ७ ग. सपर्वभिः. ८ ङ. झ. ञ. ट. वर्चसं. ९ ख. रामंचापिमहौजसं. १० ख. ग. घ. च. छ. ज. अर्पयित्वा. ११ घ. विधूमाग्निरिव. १२ च. ज. पुङ्खैश्च. १३ ङ.—ट. चिच्छेद. १४ ख. दर्शनीयोथ. १५ क. ङ.—ट. विच्छिन्नः काञ्चनो ध्वजः. १६ ख. खरश्चतुर्भिःक्रुद्धोथ. १७ ज. रामगात्रेषु. १८ ङ. झ. ट. हृदि. १९ ख. च. छ. ज. ञ. दिग्धाङ्गो. २० ङ. झ. ट. संगृह्य. २१ क. ग. घ. ङ. छ. झ. ञ. ट. बाह्वोरथार्पयत्. ख. बाह्वोस्समार्पयत्. २२ घ. वक्त्रैस्तं. २३ घ. जघानच.

ततः पश्चान्महातेजा नाराचान्भास्करोपमान् ॥ जिघांसू राक्षसं क्रुद्धस्त्रयोदश समाददे ॥ २८ ॥
तैस्तु युगमेकेन चैतुर्भिश्चतुरो हयान् ॥ षष्ठेन तु शिरः सङ्ख्ये खरस्य रथसारथेः ॥ २९ ॥
त्रिभिस्त्रिवेणुं बलवान्द्वाभ्यामक्षं महाबलः ॥ द्वादशेन तु बाणेन खरस्य सशरं धनुः ॥ ३० ॥
छित्त्वा वज्रनिकाशेन राघवः प्रहसन्निव ॥ त्रयोदशेनेन्द्रसमो विभेद समरे खरम् ॥ ३१ ॥
प्रभग्नधन्वा विरथो हताश्वो हतसारथिः ॥ गदापाणिरवप्लुत्य तस्थौ भूमौ खरस्तदा ॥ ३२ ॥
तत्कर्म रामस्य महारथस्य समेत्य देवाश्च महर्षयश्च ॥
अपूजयन्नाञ्जलयः प्रहृष्टास्तदा विमानाग्रगताः समेताः ॥ ३३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे अष्टाविंशः सर्गः ॥ २८ ॥

एकोनत्रिंशः सर्गः ॥ २९ ॥

रामेण खरंप्रति सगर्हणंवीरवादः ॥ १ ॥ तथा सगर्हणंसवीरवादं खरप्रक्षिप्तायागदाया बाणैर्बहुधाखण्डनम् ॥ २ ॥

खरं तु विरथं रामो गदापाणिमवस्थितम् ॥ मृदुपूर्वं महातेजाः परुषं वाक्यमब्रवीत् ॥ १ ॥
गजाश्वरथसंबाधे बले महति तिष्ठता ॥ कृतं सुदारुणं कर्म सर्वलोकजुगुप्सितम् ॥ २ ॥
उद्वेजनीयो भूतानां नृशंसः पापकर्मकृत् ॥ त्रयाणामपि लोकानामीश्वरोपि न तिष्ठति ॥ ३ ॥
कर्म लोकविरुद्धं तु कुर्वाणं क्षणदाचर ॥ तीक्ष्णं सर्वजनो हन्ति सर्पं दुष्टमिवागतम् ॥ ४ ॥

कारमाह—शिरसीत्यादिना । द्वाभ्यामिति । बाह्वोरिति एकैकस्य बाहोरेकैकेनेत्यर्थः । चन्द्रार्धचक्रैः । अर्धचन्द्राकारमुखैरित्यर्थः ॥ २७ ॥ त्रयोदश नाराचान् समादद इत्यन्वयः । अन्तिमपादे त्रयोदशशराञ्छितानिति पाठे मुमोचेति क्रियाध्याहार्या ॥ २८ ॥ त्रयोदशानां विनियोगमाह—ततोस्येत्यादिना । छित्त्वेत्युत्तरत्र स्थिता क्रिया सर्वत्र संबध्यते । त्रिवेणुर्नाम रथमुखस्थो युगाधारदण्डः । प्रहसन्निव लीलयेत्यर्थः ॥ २९ ॥ ३० ॥ ३१ ॥ अवप्लुत्य रथात्समुल्लङ्घ्य ॥ ३२ ॥ तत्कर्म खरभङ्गकर्म । अपूजयन् अस्तुवन् । समेत्य समूहीभूय । समेताः आगताः ॥ ३३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने अष्टाविंशः सर्गः ॥ २८ ॥

अहंकारस्य हीनस्य व्यक्तां शक्तिमिव स्थिताम् ।
गदां खरस्य निर्भिद्य राजन्तं राममाश्रये ॥ सर्वसाधनवैकल्येन खरस्यानुकूल्यमपि भवेदिति तच्चित्तपरीक्षार्थमाह—खरं त्वित्यादिना । मृदुपूर्वं न्यायावलम्बनेनोक्तं । परुषं मर्मोद्घाटनरूपत्वात् ॥ १ ॥ तिष्ठता अधिपतित्वेन तिष्ठतेत्यर्थः ॥ २ ॥ मृदुपूर्वत्वसिद्धये लोकन्यायमाह—उद्वेजनीय इति । उद्वेजनीयः उद्वेजकः । नृशंसो घातुकः । एवंविधो लोकानामीश्वरोपि न तिष्ठति न जीवेत् । किंपुन-

---

ति० भास्करोपमानित्यस्य गृहीत्वेतिशेषः ॥ २८ ॥ शि० रथस्य युगं रथाङ्गं । यद्यपि "युगोरथहलाध्वगे" इतिकोशाद्युगेनैव रथाङ्गग्रहणेसिद्धे रथस्येति निरर्थकं । तथापि स्पष्टतरतदङ्गव्यावृत्तये तदुपात्तं । अन्वयस्तु विशेषणाविवक्षया ॥ २९ ॥ स० कर्म समेत्य ज्ञात्वा अपूजयन्नित्यन्वयः ॥ ३३ ॥ इत्यष्टाविंशस्सर्गः ॥ २८ ॥

स० मृदुपूर्वं शब्दतः । परुषं अर्थतः ॥ १ ॥ ति० त्वत्कृतान्यायेनायंतवनाशइत्याह—गजेत्यादि ॥ स० तिष्ठता त्वया ॥ २ ॥ ति० नतिष्ठति नचिरंतिष्ठति । स० उद्वेजनीयः जनकतासंबन्धेनभयकरोनित्यर्थः । सर्वजनः अपकृतानपकृतजनः ॥३॥

[पा०] १ क. ङ. ञ. ट. जघान. २ ग. समादिशत्. क. ख. घ.—ट. शिलाशितान्. ३ क. ङ. ञ. ट. रथस्य. ४ क. ङ.—ट. चतुर्भिःश्चबलान्हयान् ५ क. ङ.—ट. षष्ठेनच. ६ क. ङ. ञ. ट. चिच्छेदखरसारथेः. ७ ग. ङ. ञ. ञ. ट. त्रिवेणून्. ८ क. ङ. ञ. ट. सकरं. ९ घ. च. छ. ज. ञ. समभ्रमन्वा. ख. प्रमिभ्रमन्वा. १० ख. ग. आपूजयन्. ११ क. ङ. ट. तेदारुणं.

लोभात्पापानि कुर्वाणः कामाद्वा यो न बुध्यते ॥ भ्रष्टः पश्यति तस्यान्तं ब्राह्मणी करकादिव ॥५॥
वसतो दण्डकारण्ये तापसान्धर्मचारिणः ॥ किंनु हत्वा महाभागान्फलं प्राप्स्यसि राक्षस ॥ ६ ॥
न चिरं पापकर्माणः क्रूरा लोकजुगुप्सिताः ॥ ऐश्वर्यं प्राप्य तिष्ठन्ति शीर्णमूला इव द्रुमाः ॥ ७ ॥
अवश्यं लभते जन्तुः फलं पापस्य कर्मणः ॥ घोरं पर्यागते काले द्रुमाः पुष्पमिवार्तवम् ॥ ८ ॥
नचिरात्प्राप्यते लोके पापानां कर्मणां फलम् ॥ सविषाणामिवान्नानां भुक्तानां क्षणदाचर ॥ ९ ॥
पापमाचरतां घोरं लोकस्याप्रियमिच्छताम् ॥ अहमासादितो राज्ञा प्राणान्हन्तुं निशाचर ॥ १० ॥
अद्य हि त्वां मया मुक्ताः शराः काञ्चनभूषणाः ॥ विदार्य निपतिष्यन्ति वल्मीकमिव पन्नगाः ॥११॥
ये त्वया दण्डकारण्ये भक्षिता धर्मचारिणः ॥ तानद्य निहतः संख्ये ससैन्योऽनुगमिष्यसि ॥ १२ ॥
अद्य त्वां पतितं बाणैः पश्यन्तु परमर्षयः ॥ निरयस्थं विमानस्था ये त्वया हिंसिताः पुरा ॥ १३ ॥
प्रहर त्वं यथाकामं कुरु यत्नं कुलाधम ॥ अद्य ते पातयिष्यामि शिरस्तालफलं यथा ॥ १४ ॥
एवमुक्तस्तु रामेण क्रुद्धः संरक्तलोचनः ॥ प्रत्युवाच खरो रामं प्रहसन्क्रोधमूर्च्छितः ॥ १५ ॥

र्भवादृश इति भावः ॥ ३ ॥ सर्वजन इति दयालुरपीति भावः ॥ ४ ॥ लोभात् लब्धस्य त्यागासहिष्णुतया । कामात् अपूर्वलाभेच्छया । न बुध्यते न पश्चात्तापं करोतीत्यर्थः । भ्रष्टः ऐश्वर्याद्भ्रष्टः । तस्य कर्मणः । अन्तं फलं । पश्यति अनुभवति । कथमिव करकात् ब्राह्मणीव । करकाः वर्षोपलाः । "वर्षोपलस्तु करकः" इत्यमरः । तानत्तीति करकात् । ब्राह्मणी रक्तपुच्छिका "ब्राह्मणी रक्तपुच्छिका" इति निघण्टुः । तस्यास्तद्भक्षणं विषभक्षणवन्मारकमिति प्रसिद्धिः । यथा ब्राह्मणी स्वमारकं कर्म स्वयमेव करोति तथा त्वमपीत्यर्थः ॥५॥ किं पापं मया कृतमित्यत्राह—वसत इति ॥६॥ ननु तर्हि कथं पापिनोपि बहवो जीवन्तीत्यत्राह—न चिरमिति । केवलपापिनो जन्मान्तरे फलं भुञ्जते क्रूरास्तु पुण्यलेशेन ऐश्वर्यं प्राप्यापि न चिरं तिष्ठन्ति क्षिप्रमेव विनश्यन्तीत्यर्थः ॥ ७ ॥ पापस्य कर्ता जन्तुः काले प्राप्ते अवश्यं घोरं दुःखरूपं फलं लभते ऋतुलक्षणे काले पर्यागते प्राप्ते आर्तवं तत्तदृतुप्राप्तं पुष्पमिव ॥ ८ ॥ नचिरादित्येकं पदं अविलम्बेनेत्यर्थः । अत्र पुरुषेणेति शेषः । पापानां अत्युत्कटानामित्यर्थः ॥ ९ ॥ एवं मृदुपूर्वमुक्त्वा परुषमाह—पापमित्यादिना । आसादितः प्राप्तोस्मि । आगमने हेतुमाह—राज्ञेति ॥ १० ॥ मया मुक्ताः शराः त्वां विदार्य निपतिष्यन्ति प्रवेक्ष्यन्ति । यथा पन्नगाः सर्पाः । वल्मीकं प्रविशन्ति तथा ॥ ११ ॥ ताननुगमिष्यसीति पापिनामपि समरे हतानां स्वर्गसंभवादिति भावः ॥ १२ ॥ निरयस्थं नरकसदृशं दुःखं भूमौ पतित्वाऽनुभवन्तमित्यर्थः ॥ १३ ॥ तालफलं यथेत्यनेनाना-

कतक० एवंयःकर्मकरणकाले नाशकमिदमितिनबुध्यते तस्यतत्कर्मप्राप्तं अन्तं नाशं लोकोहृष्टस्सन्पश्यतीत्यर्थः । स० पापानिकुर्वाणः यःभ्रष्टः नबुध्यते मयेदकृतमिति सः तस्य पापस्यसकाशात् अन्तं स्वनाशं पश्यति । कस्मात्केव करकाद्ब्राह्मणीव । " वर्षोपलस्तुकरका " इत्यमरव्याख्यानावसरे " वर्षोपलस्तुकरकाकरकोपिचदृश्यत " इतिभानुदीक्षिताभिधानात्करकशब्दः पुँल्लिङ्गोप्यस्ति ॥ ५ ॥ ति० घोरं कर्मणःफलंभवतीतिशेषः । अतोहेतोरहंराजा दुष्टनिग्रहाधिकारी । हेनिशाचर रक्षसांप्राणान्हन्तुआसादितः । ऋषिभिरितिशेषः । त्वयेतिवा । राज्ञेतिपाठे राज्ञा दशरथेन आसादितःनियुक्तइत्यर्थइतितीर्थः ॥ १० ॥ ती० येधर्मचारिणस्ताननुगमिष्यतीत्यनेन पापिनामपिस्वेनहतानामुत्तमलोकप्राप्तिरस्तीत्युक्तंभवति । तदुक्तंस्कान्दे—"रामविद्धा निशिचरा बाणैर्मर्मसु ताडिताः । राममासाद्य समरे सायुज्यपदवींगताः " इति ॥ ति० अत्र ऋष्यनुगमनं प्राणनाशमात्रेण । अतएव निरयस्थमितिवक्ष्यति ॥१२॥ ति० निरयस्थमिति । ननु भगवताहतस्य मृतिसमयेभगवद्दर्शनवतः कथंनिरयस्थत्वमितिचेन्न । अत्युग्रस्य ब्रह्मवधकर्मणः फलस्यावश्यंभोक्तव्यत्वेनादौभगवदिच्छयैव निरयभोगपूर्वमुत्तमपदवीप्राप्तेस्सत्वेनादोषात् । स० विमानस्थाइत्यनेन तेषामुत्तमलोकस्थितत्वं द्योतयति ॥ १३ ॥ शि० यत्नं स्ववधाभावप्रयत्नं । कामं यथेच्छं

[पा०] १ क. झ. ट. हृष्टः. ख. नष्टः. २ घ. पापाः. ३ क.—ट. कर्ता. ४ ख. ग. ङ.—ट. द्रुमः. ५ क. ख. घ. ङ. झ. राजा. ६ क. ख. घ. ङ. झ. ञ. ट. भित्त्वा. ग. हत्वा. ७ झ. विदार्यापि. ग. ङ. छ. ञ. ट. विदार्याति. ८ ख.—घ. ज.—ट. निहतं. ९ क. घ. छ. झ. ञ. ट. निहताः. १० ङ.—ट. प्रहरस्व. ११ क. ख. ङ—ट. ततो.

प्राकृतान्राक्षसान्हत्वा युद्धे दशरथात्मज ॥ आत्मना कथमात्मानमप्रशस्यं प्रशंससि ॥ १६ ॥
विक्रान्ता बलवन्तो[1] वा ये[2] भवन्ति नरर्षभाः ॥ कथयन्ति न ते किंचित्तेजसा स्वेन गर्विताः ॥१७॥
प्राकृतास्त्वकृतात्मानो[3] लोके क्षत्रियपांसनाः ॥ निरर्थकं विकत्थन्ते यथा राम विकत्थसे ॥ १८ ॥
कुलं व्यपदिशन्वीरः समरे कोऽभिधास्यति[4] ॥ मृत्युकाले[5] हि संप्राप्ते स्वयमप्रस्तवे स्तवम् ॥ १९ ॥
सर्वथैव[6] लघुत्वं ते कत्थनेन विदर्शितम् ॥ सुवर्णप्रतिरूपेण तप्तेनेव[7] कुशाग्निना ॥ २० ॥
न तु मामिह तिष्ठन्तं पश्यसि त्वं गदाधरम् ॥ धराधरमिवाकम्प्यं पर्वतं धातुभिश्चितम्[8] ॥ २१ ॥
पर्याप्तोहं गदापाणिर्हन्तुं प्राणान्रणे तव ॥ त्रयाणामपि लोकानां पाशहस्त इवान्तकः ॥ २२ ॥
कामं बह्वपि वक्तव्यं त्वयि वक्ष्यामि न त्वहम् ॥ अस्तं गच्छेद्धि[9] सविता युद्धविघ्नस्ततो भवेत् ॥२३॥
[अग्रतस्संस्थितं[10] दृष्ट्वा त्वां मनो रुष्यते मम ॥ रणे यस्य तु रुष्यामि मुहूर्तं न स जीवति ॥ २४ ॥
मम कृत्वाऽप्रियं राम दुर्लभं तव जीवितम् ॥ तोयवर्षमिवावर्षे तोयदस्य विनर्दतः ॥ २५ ॥]
चतुर्दश सहस्राणि राक्षसानां हतानि[11] ते ॥ त्वद्विनाशात्करोम्येष[12] तेषामश्रुप्रमार्जनम्[13] ॥ २६ ॥

यासोक्तिः ॥ १४—१५ ॥ आत्मना स्वयमेव ॥१६॥ तेजसा प्रतापेन ॥ १७ ॥ प्राकृताः क्षुद्राः । अकृतात्मानः अप्रतिष्ठितधृतयः । क्षत्रियपांसनाः क्षत्रियाधमाः । निरर्थकं निष्प्रयोजनं यथा तथा विकत्थन्ते श्लाघन्ते ॥ १८ ॥ कुलं व्यपदिशन् आत्मनो महाकुलप्रसूतत्वं प्रकटयन् । को वीरः मृत्युकाले संप्राप्ते अप्रस्तवे अनवसरे । स्वयं स्तवमभिधास्यतीत्यन्वयः ॥ १९ ॥ ते कत्थनेन लघुत्वमल्पत्वं सर्वथैव स्पष्टमेव विदर्शितं यथा तप्तेन अतएव सुवर्णसदृशेन कुशाग्निना कुशदर्भमाश्रितेनाग्निना । लघुत्वं विदर्श्यते तद्वत् । यथा तृणाग्निः सुवर्णतुल्यतया भासमानोपि ज्वलन्नप्युत्तरकाले दाहकार्यकरो न भवति । तथा कत्थनेन वीरवद्भासमानोपि पुरुषः उत्तरकाले लघुरेव भविष्यतीत्यर्थः । शीघ्रं ज्वलन् तृणाग्निः यथा सद्यः शान्तो न दग्धुमीष्टे तथा कत्थमानः पुरुषः स्वकत्थनानुरूपं कार्यं न करोतीति सिद्धमिति ॥२०॥ इह तव पुरतः तिष्ठन्तं निश्चलतया स्थितं । गदाधरं शत्रुरक्तोक्षितगदावन्तं । मां सर्वनिर्वाहकं पर्वतमिवाकम्प्यं न पश्यसि अतएवैवं कत्थस इति भावः ॥ २१ ॥ गदापाणिरहं पाशहस्तोन्तक इव तव त्रयाणां लोकानामपि प्राणान् हन्तुं पर्याप्तः समर्थ इति योजना ॥ २२ ॥ त्वयि आत्मश्लाघिनि विषये । कामं यद्यपि बहु पारुष्यं वक्तव्यमस्ति तथापि तन्न वक्ष्यामि । कुतः हि यस्मात् । सविता अस्तं गच्छेत् । ततः अस्तमयेन युद्धविघ्नो भवेत् । यद्यपि स्वस्य रात्रिर्बलायैव तथापि रात्र्यशक्तमनुष्यवधे स्वस्य न कापि कीर्तिरिति स्वरहृदयं ॥ २३—२५ ॥ ते त्वया । एष इत्यव्यवधानोक्तिः । तेषां तद्बन्धूनामि-

कुरु । अनवधानतयाहतोस्मीति न वक्तव्यमितितात्पर्यं ॥ १४ ॥ स० अप्रस्तवे अप्रस्तावे ॥ १९ ॥ ती० सुवर्णप्रतिरूपेण सुवर्णसदृशेन । अग्निना अग्निवर्णेन । अश्मना पाषाणेन । नतप्यते वस्त्वितिशेषः । सुवर्णवर्णमश्मानंदृष्ट्वा अयमङ्गारइति स्तुत्या व्यपदिशन्ति तथापि तेनाग्निनावस्तु न तप्यते । किं तु मुख्येनैवाग्निना तप्यतइत्यर्थः । एतदुक्तंभवति । अग्निबुद्ध्याऽग्निवर्णमश्मानंस्पृशते पुरुषायानुपलभ्यमानोष्णस्पर्शेनात्मनाऽऽत्मनोऽनग्नित्वंनाम लघुत्वं यथाविदर्शितं भवति तथा ते त्वया । त्वांवीरमन्वानायमह्यं कत्थनेन आत्मप्रशंसया अवीरत्वंनामात्मनोलघुत्वंविदर्शितमित्यपेक्षितपदाध्याहारेणयोजना । तप्तेनेवकुशाग्निनेतिपाठेत्वयमर्थः । कुशाग्निना सुवर्णशोधकाग्निना तप्तेन सुवर्णप्रतिरूपेणारकूटेन । लघुत्वं कार्ष्ण्यरूपं यथाविदर्शितंभवति तथा ते त्वया । कत्थनेनात्मप्रशंसयालघुत्वमशूरत्वं प्रदर्शितंभवतीति ॥ ति० कत्थनेन प्राकृतेन । ते त्वया सर्वथैवात्मनोलघुत्वंदर्शितं । यथा सुवर्णप्रतिरूपेण स्वर्णतुल्यरूपेणपित्तलेन । कुशाग्निना स्वर्णादिशोधनाग्निना तप्तेन यथा स्वस्यकृष्णवर्णत्वरूपं लाघवं दर्शितंभवति तद्वत्तापात्पूर्वंहि तत्र स्वर्णताबुद्धिः सा तापेयथानश्यति तथा त्वयास्वस्मिन्स्थिता प्राक्शूरत्वबुद्धिः कत्थनेनापहृतेत्यर्थः । तुषाग्निनेतिपाठान्तरं ॥ २० ॥ ती० प्राकृतानित्वादीनांवास्तवार्थस्तु आत्मानंप्रशंससि । इह महात्मनस्तवैतन्नयुक्त-

[पा०] १ ग. बलवन्तोहि. २ क. ग. भवन्तीह. घ. येनिहन्ति. ३ ख. प्राकृताविकृतात्मानो. ४ ग. कोविधास्यति. ५ क.—ट. कालेतु. ६ क. ख. ग. क. झ. ट. सर्वथातु. ७ घ. तप्तेनेवाश्मनाग्निना. ग. तप्तेनेवतुषाग्निना. ८ ख. धातुमण्डितं. ९ क. झ. ट. प्राप्नोति. १० इदंश्लोकद्वयं. क. ख. पाठयोर्दृश्यते. ११ ख. हतानिवै. १२ क.—ट. त्करोम्यद्य. ख. ग. घ. त्करिष्यामि. १३ क.—घ. मास्रप्रमार्जनं.

[ततो रुधिरधाराभिस्त्वच्छरीरविमर्दनात् ॥ करिष्यामि बलिं भूमौ त्वां हत्वा सर्वरक्षसाम् ॥२७॥]
इत्युक्त्वा परमक्रुद्धस्तां गदां परमाङ्गदः ॥ खरश्चिक्षेप रामाय प्रदीप्तामशनिं यथा ॥ २८ ॥
खरबाहुप्रमुक्ता सा प्रदीप्ता महती गदा ॥ भस्म वृक्षांश्च गुल्मांश्च कृत्वाऽगात्तत्समीपतः ॥ २९ ॥
तामापतन्तीं ज्वलितां मृत्युपाशोपमां गदाम् ॥ अन्तरिक्षगतां रामश्चिच्छेद बहुधा शरैः ॥ ३० ॥
सा विकीर्णा शरैर्भग्ना पपात धरणीतले ॥ गदा मन्त्रौषधबलैर्व्यालीव विनिपातिता ॥ ३१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

त्रिंशः सर्गः ॥ ३० ॥

रामेणसवीरवादमधिक्षिप्तेनखरेण निरायुधतयासक्रोधं तदुपरिवृक्षप्रक्षेपः ॥ १ ॥ रामेणखरक्षिप्ततरुच्छेदपूर्वकंशूरगणैस्तच्छरीरविदारणे स्रवद्रुधिराप्लुतेनतेन सरभसंरामोपरिसमुत्पतनोद्यमः ॥ २ ॥ रामेण जुगुप्सयापश्चात्किंचिदपसर्पणपूर्वकंखरोरसि शरार्पणेनतद्धननम् ॥ ३ ॥ खरनिधने देवर्ष्यादिभिस्सपुष्पवर्षणंरामाभिष्टवः ॥ ४ ॥ लक्ष्मणेनसहगुहामुखान्निर्गतयासीतया निजाश्रममुपेयुषोरामस्य हर्षात्परिष्वङ्गः ॥ ५ ॥

भित्त्वा तु तां गदां बाणै राघवो धर्मवत्सलः ॥ स्मयमानः खरं वाक्यं संरब्धमिदमब्रवीत् ॥ १ ॥
एतत्ते बलसर्वस्वं दर्शितं राक्षसाधम ॥ शक्तिहीनतरो मत्तो वृथा त्वमवगर्जसि ॥ २ ॥
एषा बाणविनिर्भिन्ना गदा भूमितलं गता ॥ अभिधानप्रगल्भस्य तव प्रत्यरिघातिनी ॥ ३ ॥

त्यर्थः । यद्वा तद्वधप्रतिक्रियां करिष्यामीत्यत्र हृदयं ॥ २६—२७ ॥ परमाङ्गदः गदाप्रहारसामर्थ्यबिरुदयुक्त इत्यर्थः । अशनिं वज्रं ॥ २८ ॥ भस्म कृत्वा तत्समीपमगादित्यन्वयः । समीपत इति सार्वविभक्तिकस्तसिः ॥ २९–३० ॥ व्याली पन्नगी ॥ ३१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकोनत्रिंशः सर्गः ॥ २९ ॥

निरस्तनिखिलालम्बमहंकारमिव स्थितम् । खरं विहत्य साधूनां सुखावहमहं भजे ॥ धर्मवत्सल इत्यनेन निरायुधवधोनुचित इति श्रीरामोमन्यतेति गम्यते । स्मयमानः परिहसन्नित्यर्थः । संरब्धं भ्रान्तमिति खरविशेषणं "संरम्भः संभ्रमे कोपे" इत्यमरः ॥१—२॥ अभिधाने वचसि प्रगल्भस्य धृष्टस्य । प्रत्यरिघातिनीति वीप्सायां प्रतिः । अरीनरीन् प्रतिघाति-

---

मितिभावः । विक्रान्ताइति । ये नरर्षभाः त्वादृशमहात्मानः । ते एवं नकथयन्ति । केचित्स्वतेजसागर्विताः कथयन्ति । अतस्तवोचितंनभवतीतिभावः ॥ प्राकृताइति । क्षत्रियपांसनाः यथानिरर्थकंविकत्थन्ते तथात्वंविकत्थसे । तवनयुक्तमितिभावः । कुलमिति । समरे शत्रुपक्षस्यमृत्युकालेसंप्राप्तेसति स्तवकोवाभिधास्यति नकोपीत्यर्थः । सर्वथेति । आत्मानमेवं भूषयसियदि तदा तवलघुत्वमेवप्रदर्शितंभविष्यति । अतस्तवैतन्नयुक्तमितिभावः । नन्विति । हेराम गदाधरंमांपश्यसि । नन्वेतादृशगदापाणिरहं पाशहस्तोन्तकइव त्रयाणामपिलोकानांप्राणान्हन्तुं पर्याप्तोयद्यपि । तथापि रणे तव नपर्याप्तइतिशेषः । चतुर्दशेति । राक्षसानां चतुर्दशसहस्राणि ते त्वयाहतानि । तथा त्वन्नाशात् त्वत् त्वत्तः । नाशात् मन्नाशात् । त्वत्तोमन्नाशेसतीत्यर्थः । तेषां तद्दारादीनां । अश्रुप्रमार्जनंकरोमीतिसंबन्धः । त्वदिति । घातयितुर्मम मरणे तद्दाराणांदुःखनिवृत्तिर्भवतीतिभावः ॥ २६ ॥ ति० परमा अङ्गदाः कनकवलयानियस्याः । तां प्रसिद्धां हस्तस्थांगदांचिक्षेप । ती० इत्युक्त्वा अश्रुप्रमार्जनंकरोमीत्युक्त्वेत्यर्थः । रामाद्वधाकाङ्क्षीसन्निति शेषः । परमक्रुद्धः खरः गदांरामायचिक्षेपेतिसंबन्धः ॥ २८ ॥ इत्येकोनत्रिंशस्सर्गः ॥ २९ ॥

ति० तवप्रत्ययघातिनी अभिधानेकेवलंप्रगल्भस्यतवानयाशत्रुवधोभवत्येवेत्ययं यःप्रत्ययो विश्वासः तस्य स्वनाशेन घातिका

[पा०] १ अयंश्लोकः क. च. छ. ज. पुस्तकेषुदृश्यते. २ ख. ङ. झ. ट. क्रुद्धस्सगदां. ३ ख. ङ. झ. ट. परमांगदां. च. छ. ज. ञ. कनकाङ्कितां. ४ क. ग. मशनीमिव. ५ ग. ङ. झ. ट. महतीं. ख. सहसा. ६ ङ. छ.—ट. विशीर्णा. ७ ङ. झ. ञ. ट. शरैर्भिन्ना. ख. च. छ. ज. शरैर्दग्धा. ८ ङ. झ. ट. मन्त्रौषधि. ९ ग. सहला. १० ग. रघुनन्दनः. ११ घ. ङ. झ. ट. मुपगर्जसि. ग. मभिगर्जसि. १२ घ. तले. १३ ङ.—ट. प्रत्ययघातिनी. ख. प्रत्ययघातिनः.

यत्त्वयोक्तं विनष्टानामहमश्रुप्रमार्जनम् ॥ राक्षसानां करोमीति मिथ्या तदपि ते वचः ॥ ४ ॥
नीचस्य क्षुद्रशीलस्य मिथ्यावृत्तस्य रक्षसः ॥ प्राणानपहरिष्यामि गरुत्मानमृतं यथा ॥ ५ ॥
अद्य ते छिन्नकण्ठस्य फेनबुद्बुदभूषितम् ॥ विदारितस्य मद्बाणैर्मही पास्यति शोणितम् ॥ ६ ॥
पांसुरूषितसर्वाङ्गः स्रस्तन्यस्तभुजद्वयः ॥ स्वप्स्यसे गां समालिङ्ग्य दुर्लभां प्रमदामिव ॥ ७ ॥
प्रवृद्धनिद्रे शयिते त्वयि राक्षसपांसने ॥ भविष्यन्त्यशरण्यानां शरण्या दण्डका इमे ॥ ८ ॥
जनस्थाने हतस्थाने तव राक्षस मच्छरैः ॥ निर्भया विचरिष्यन्ति सर्वतो मुनयो वने ॥ ९ ॥
अद्य विप्रसरिष्यन्ति राक्षस्यो हतबान्धवाः ॥ बाष्पार्द्रवदना दीना भयादन्यभयावहाः ॥ १० ॥
अद्य शोकरसज्ञास्ता भविष्यन्ति निरर्थकाः ॥ अनुरूपकुलाः पत्न्यो यासां त्वं पतिरीदृशः ॥ ११ ॥
नृशंस नीच क्षुद्रात्मन्नित्यं ब्राह्मणकण्टक ॥ यत्कृते शङ्कितैरग्नौ मुनिभिः पात्यते हविः ॥ १२ ॥
तमेवमभिसंरब्धं ब्रुवाणं राघवं रणे ॥ खरो निर्भर्त्सयामास रोषात्खरतरस्वनः ॥ १३ ॥
दृढं खल्ववलिप्तोसि भयेष्वपि च निर्भयः ॥ वाच्यावाच्यं ततो हि त्वं मृत्युवश्यो न बुध्यसे ॥१४॥
कालपाशपरिक्षिप्ता भवन्ति पुरुषा हि ये ॥ कार्याकार्यं न जानन्ति ते निरस्तषडिन्द्रियाः ॥ १५ ॥

नी गदा ॥ ३—४ ॥ नीचस्य केवलवाचाटकत्वेन क्षुद्रस्य । क्षुद्रशीलस्य हीनस्वभावस्य । मिथ्यावृत्तस्य असद्वृत्तस्य ॥ ५ ॥ फेनबुद्बुदाभ्यां भूषितं अलङ्कृतं । अनेन नूतनत्वमुक्तं । विदारितस्य विदारितोदरस्य ॥६॥ पांसुरूषितेति । रूषितं लिप्तं । स्रस्तं यथा तथा भुवि न्यस्तं भुजद्वयं येन । गां भूमिं समालिङ्ग्येत्यनेनावाग्भूतत्वमुच्यते ॥ ७ ॥ प्रवृद्धनिद्रे दीर्घनिद्रे । अशरण्यानां ऋष्यादीनामगतीनां । शरण्याः सुखावासभूताः ॥ ८ ॥ हतस्थाने हतराक्षसावस्थानसन्निवेशे ॥ ९ ॥ पूर्वमन्यभयावहाः राक्षस्यः अद्य मद्भयात् जनस्थानात् विप्रसरिष्यन्ति पलायिष्यन्ते ॥ १० ॥ यासां त्वमीदृशः पापी पतिः ताः पत्न्यः अनुरूपकुलाः त्वत्सदृशदुर्वृत्ता इत्यर्थः । इतः पूर्वं शोकानभिज्ञा अपि अद्य शोकरसज्ञाः निरर्थकाः निर्गतकामपुरुषार्थाः भविष्यन्ति ॥ ११ ॥ ईदृश इत्युक्तं विवृणोति—नृशंसेति । नृशंस घातुक । नीच वृत्ततोहीन । क्षुद्रात्मन् क्षुद्रबुद्धे । ब्राह्मणकण्टक ब्राह्मणशत्रो । मुनिभिः यत्कृते यन्निमित्तं । शङ्कितैः सद्भिः अग्नौ हविः पात्यते हविर्दानसमयेपि किमेतदपहरिष्यन्तीति भीता भवन्तीत्यर्थः ॥ १२—१३ ॥ अवलिप्तोसि गर्वितोसि । दृढं निश्चितं । ततः कारणात् । भयेषु भयकारणेषु सत्स्वपि । निर्भयोसि वाच्यं चावाच्यं च वाच्यावाच्यं । "येषां च विरोधः शाश्वतिकः" इति द्वन्द्वैकवद्भावः । तन्मृत्युवश्यः सन् न बुध्यस इति योजना ॥ १४ ॥ उक्तमर्थं विशिष्य दर्शयति—कालेति । परिक्षिप्ताः बद्धाः ।

॥ ३ ॥ स० अमृतमित्यनेन खरदेहे सचेतनोस्तीति सूचितं ॥ ५ ॥ स० शयिते शायिते । ति० शरण्यानां तपोमहिम्ना सर्वजनशरण्यानां ॥ ८ ॥ स० हतस्थाने राक्षस तव मृतस्थानेसति । यद्वा तवजनस्थाने राक्षसानांमृतस्थानेसति ॥ ९ ॥ स० भयात् दीनाः अन्यभयावहाः अन्येषांस्वविकारेणभयावहाः ॥ १० ॥ ति० शङ्कितैः लद्भटेभ्यः । यद्यपि भगवतईदृशेषुक्षुद्रेष्वेवंवादोऽनुचितः । तथापि निरयस्थमिति स्वोक्तिं सत्यांकर्तुं मरणकाले क्रोधजनकतमोगुणोद्रेकस्य तामसगुणगतिसंपादकस्योद्भवायेतिबोध्यम् ॥ १२ ॥ ती० वस्तुतस्तु एवंब्रुवाणंरामं मृत्युवश्यः खरः हेराम त्वं वाच्यावाच्यंनबुध्यसइति दृढमवलिप्तोसीतिच निर्भर्त्सयामासेतिसंबन्धः ॥ १३—१४ ॥ एवंनिर्भर्त्सनेहेतुमाह—कालपाशेति । लोकेकालपाशपरिक्षिप्ताः पुरुषाः महात्मानमपि निर्भर्त्सयन्त्येवेतिभावः । ति० मृत्युकाले स्फुरितभगवद्रूपश्लेषेणस्वाविनयंक्षमापयतिच—कालेति । अतस्त्वया मदुक्तयः क्षन्तव्याइति व्यङ्ग्यमित्यन्ये । तेषां निरयस्थमितिभगवदुक्तेरसंगतिस्स्पष्टैव । शि० मनसोपीन्द्रियस्वमितिमतेन मनसः प्रधा-

[पा०] १ क. ख. ग. महमास्र. ङ—झ. ट. मिदमश्रु. २ क. च. छ. ज. ञ. राक्षस. ३ क.—ट. भिन्नकण्ठस्य. ४ च. छ. ञ. दूषितं. ख. ग. रूषितं. घ. शोभितं. ५ क. ग. ङ.—ट. समाश्लिष्य. ६ क. ख. च. ज. प्रबद्ध. ७ ङ. झ. ट. भविष्यन्तिशरण्यानां. घ. प्रभवन्त्यशरण्यानां. ८ क. ग. नयनाः. ९ क. च. ज. निशाचर. १० क. ग. ङ.—ट. नृशंसशील. ११ क. ग. कण्टकः. १२ क. ग. ङ. झ. ट. त्वत्कृते. १३ ङ. झ. ट. वने. १४ ङ. च. झ. ट. स्वरः. १५ ख. प्रयाहि. १६ ख. ध्रुवंकालपरिक्षिप्ता. १७ ख. वाच्यावाच्यं.

एवमुक्त्वा ततो रामं संरुध्य भ्रुकुटीं ततः ॥ स ददर्श महासालमविदूरे निशाचरः ॥
रणे प्रहरणस्यार्थे सर्वतोऽप्यवलोकयन् ॥ १६ ॥
स तद्धनुरपाटयामास संदश्य दशनच्छदम् ॥ १७ ॥
तं समुत्क्षिप्य बाहुभ्यां विनद्य च महाबलः ॥ राममुद्दिश्य चिक्षेप हतस्त्वमिति चाब्रवीत् ॥ १८ ॥
तमापतन्तं बाणौघैश्छित्त्वा रामः प्रतापवान् ॥ रोषमाहारयत्तीव्रं निहन्तुं समरे खरम् ॥ १९ ॥
जातस्वेदस्ततो रामो रोषाद्रक्तान्तलोचनः ॥ निर्बिभेद सहस्रेण बाणानां समरे खरम् ॥ २० ॥
तस्य बाणान्तराद्रक्तं बहु सुस्राव फेनिलम् ॥ गिरेः प्रस्रवणस्येव तोयधारापरिस्रवः ॥ २१ ॥
विह्वलः स कृतो बाणैः खरो रामेण संयुगे ॥ मत्तो रुधिरगन्धेन तमेवाभ्यद्रवद्भृशम् ॥ २२ ॥
तमापतन्तं संरब्धं कृतास्त्रो रुधिराप्लुतम् ॥ अपोसर्पत्प्रतिपदं किंचित्त्वरितविक्रमः ॥ २३ ॥
ततः पावकसंकाशं वधाय समरे शरम् ॥ खरस्य रामो जग्राह ब्रह्मदण्डमिवापरम् ॥ २४ ॥
सैं तं दत्तं भगवता सुराजेन धीमता ॥ संदधे चापि धर्मात्मा मुमोच च खरं प्रति ॥ २५ ॥

निरस्तषडिन्द्रियाः निरस्तषडिन्द्रियव्यापाराः ॥१५॥ भ्रुकुटीं संरभ्य कुलेत्यर्थः । प्रहरणस्यार्थे आयुधार्थं । सर्वतोऽवलोकयन्सन्नपि दूरे महासालं ददर्शेत्यन्वयः ॥ १६ ॥ दशनच्छदं अधरं । संदश्य निपीड्य । अनेन सालस्य दुर्ग्रहत्वमुक्तं ॥ १७ ॥ बाहुभ्यामित्यनेन सालस्थौल्यमुक्तं । विनद्येत्यादिना जयाशोच्यते ॥ १८ ॥ रोषमिति सर्वसामग्रीविरहेण्यानुकूल्यलेशाभावादिति भावः ॥ १९ ॥ रोषाज्जातस्वेदः नतु श्रमात् । रक्तान्तलोचनः रक्तवर्णोपान्तः ॥ २० ॥ बाणान्तरात् बाणक्षतविवरात् । फेनिलं फेनवत् । प्रस्रवणस्य प्रस्रवणाख्यस्य । परिस्रवः प्रवाहः ॥ २१ ॥ विह्वलः विह्वलः । रुधिरगन्धेनोपलक्षितः ॥ २२ ॥ संरब्धं संभ्रान्तं । प्रतिपदं अल्पमोचनप्रतिकूलं तं खरं किंचिदपासर्पत् पश्चादागतः तस्मादपासर्पदित्यर्थः । अपसर्पणनिमित्तमाह—कृतास्त्र इति । संहितास्त्रत्वात् अल्पमोचनावकाशलाभायापासर्पदिति भावः । निमित्तान्तरमाह—रुधिराप्लुतमिति । तत्स्पर्शवीभत्सेनापसर्पणमित्यर्थः । यद्यपि किंचिदपसर्पणं शूरस्यायुक्तं तथापि " सर्वतो बलवती ह्यन्यथानुपपत्तिः " इति न्यायेनापसर्पणं विना तत्संहारहेत्वलाभादपसर्पणं न दोष इति हृदयम् ॥ २३ ॥ ततः बाणपातावसरलाभात् । ब्रह्मदण्डं ब्रह्मशरं ॥ २४ ॥ धीमता भावज्ञेन दत्तं अगस्त्यमुखेनेति शेषः

अत्यन्तेन्द्रियाणांबद्धत्वमिति नानुपपत्तिः॥१५॥ ति० जातस्वेदः रोषादितिशेषः । नतु श्रमादिति । अयंरोषोपि भगवताऽऽरोपित एव भगवत् । नतु वास्तवोमानुषबलस्थिरीकरणायेतिबोध्यं । स० जातस्वेदश्च ॥२०॥ ति० विकलः परवशः कृतः । नतु मृत इत्यर्थः ॥ २२ ॥ तनि० संरब्धं अतिक्रुद्धं । आपतन्तं आयुधप्रसारणावकाशतयाऽतिसन्निकृष्टमागच्छन्तं । तत्रहेतुः त्वरितविक्रमइति । शस्त्रसन्धानावकाशार्थं त्वरितविक्रमतया किंचिदपासर्पदित्यर्थः । हेत्वन्तरमाह—रुधिराप्लुतमिति । तद्देहरुधिरस्य खस्मिन्संश्लेषोभवेदिति जुगुप्सयेत्यर्थः । इदमेवाभिप्रेत्य वेदान्ताचार्यैरुक्तं क्वचिदतिसंकटविषये सुभटानामभिमतोऽयमपसर्पणेति । शि० कृतास्त्रः कृतानि छिन्नादि अस्त्राणि शरायुधानियेनसः । ति० आपतन्तं बाणक्षेपावकाशोपयोगात्भवति तथोपर्यापतन्तंशरंशङ्क्या अल्पासत्तौधनुर्व्यापारो नस्यादिति स्वशरीरे तद्रुधिरपातभियाच द्वित्रीणिपदानित्वरितपदन्यासोबाणंसंदधदेव पृष्ठतोपासर्पत । अनेन महाबलत्वंशरस्योक्तं । नह्यन्यथा रामधनुश्छेदोऽनन्ततद्भागसहत्वेन शुशकं । अतएवाग्रे तद्बधाय विशिष्यस्वशक्तिरूपवैष्णवबाणग्रहणं ॥ २३ ॥ स० सधर्मात्मा धर्मेणात्मा मनः धर्मात्मा तेनसहितः सधर्मात्मा ॥ २५ ॥

[पा०] १ क. ग. व्यवलोकयन्. २ क. ङ. ञ. ट. संदष्टदशनच्छदं. ३ क.—ट. विनर्दित्वा. ४ ख. महाबलं. ५ च. तथा. क. ख. त्तदा. ६ क. ङ. ट. रोषरक्तान्त. ७ ग. चिभेदच. क. ख. तं विभेद. ८ क. च. छ. तस्मिन्बाणान्तरे रक्तं. ग. तत्र बाणान्तररक्तं. ९ क. प्रस्रवतोयद्रुत्. १० क. ङ. ट. धाराणां च परिस्रवः. ११ क. ङ. ट. विकलः. १२ च. छ. ज. ञ. मेवाभ्यपतत्. क. तमेवाभ्यागमत्. १३ क. ग. क. ङ. ट. संक्रुद्धं. च. छ. ज. ञ. संप्रेक्ष्य. १४ क. ग. रुधिरौघपरिप्लुतं. १५ क. ङ. अपासर्पद्विपदं. १६ क. ग. सिवोद्यतं. १७ ग. च. छ. ज. ञ. सदुद्यतं. क. ङ. ट. सतद्दत्तं. १८ क. ग. क.—ट. चसधर्मात्मा. १९ ख. समुमोच.

स विमुक्तो महाबाणो निर्घातसमनिस्वनः ॥ रामेण धनुरायम्य खरस्योरसि चापतत् ॥ २६ ॥
स पपात खरो भूमौ दह्यमानः शराग्निना ॥ रुद्रेणेव विनिर्दग्धः श्वेतारण्ये यथान्तकः ॥ २७ ॥
स इत्र इव वज्रेण फेनेन नमुचिर्यथा ॥ बलो वेन्द्राशनिहतो निपपात हतः खरः ॥ २८ ॥
ततो राजर्षयः सर्वे संगताः परमर्षयः ॥ सभाज्य मुदिता रामामिदं वचनमब्रुवन् ॥ २९ ॥
एतदर्थं महातेजा महेन्द्रः पाकशासनः ॥ शरभङ्गाश्रमं पुण्यमाजगाम पुरंदरः ॥ ३० ॥
आनीतस्त्वमिमं देशमुपायेन महर्षिभिः ॥ एषां वधार्थं क्रूराणां रक्षसां पापकर्मणाम् ॥ ३१ ॥
तदिदं नः कृतं कार्यं त्वया दशरथात्मज ॥ सुखं धर्मं चरिष्यन्ति दण्डकेषु महर्षयः ॥ ३२ ॥
एतस्मिन्नन्तरे देवाश्चारणैः सह संगताः ॥ दुन्दुभींश्चाभिनिघ्नन्तः पुष्पवर्षं समन्ततः ॥
रामस्योपरि संहृष्टा ववृषुर्विस्मितास्तदा ॥ ३३ ॥
अर्धाधिकमुहूर्तेन रामेण निशितैः शरैः ॥ चतुर्दशसहस्राणि रक्षसां भीमकर्मणाम् ॥ ३४ ॥
खरदूषणमुख्यानां निहतानि महाहवे ॥ अहो बत महत्कर्म रामस्य विदितात्मनः ॥ ३५ ॥
अहो वीर्यमहो दार्ढ्यं विष्णोरिव हि दृश्यते ॥ इत्येवमुक्त्वा ते सर्वे यथुर्देवा यथागतम् ॥ ३६ ॥
एतस्मिन्नन्तरे वीरो लक्ष्मणः सह सीतया ॥ गिरिदुर्गाद्विनिष्क्रम्य संविवेशाश्रमं सुखी ॥ ३७ ॥
ततो रामस्तु विजयी पूज्यमानो महर्षिभिः ॥ प्रविवेशाश्रमं वीरो लक्ष्मणेनाभिपूजितः ॥ ३८ ॥
तं दृष्ट्वा शत्रुहन्तारं महर्षीणां सुखावहम् ॥ बभूव हृष्टा वैदेही भर्तारं परिषस्वजे ॥ ३९ ॥

॥ २५ ॥ रामेण धनुरायम्य आकृष्य । विमुक्त इत्यन्वयः ॥ २६ ॥ स खरः शराग्निना दह्यमानः सन् रुद्रेण वह्निनाग्निना । दग्धोन्तक इव श्वेतारण्येयथा श्वेतारण्य इव । भूमौ पपात ॥ २७ ॥ सः रामबाणेन हतः खरः । असोघबाणहतत्वज्ञापनाय प्रथमो दृष्टान्तः । लीलया हतत्वज्ञापनाय द्वितीयः । समर्थाधिष्ठितत्वज्ञापनाय तृतीयः । आर्द्रच्छुष्काद्यवध्यत्वं नमुचेर्बध्यं तदर्थं फेनेन हतः । बलो बेति वाशब्द इवार्थः । वृत्रादित्रयमिन्द्रेणैव हतं ॥ २८ ॥ परमर्षयः ब्रह्मर्षयः । सभाज्य संपूज्य ॥ २९ ॥ एतदर्थं एतद्भावाय ॥ ३० ॥ इदमुपपादयति—आनीत इति । उपायेन तत्तदाश्रमदर्शनव्याजेन ॥ ३१—३२ ॥ एतस्मिन्नित्याद्यर्धत्रयमेकान्वयं ॥ ३३ ॥ रामं स्तुवन्ति—अर्धेत्यादिना । अर्धाधिकमुहूर्तेन घटिकात्रयेण ॥ ३४—३५ ॥ दार्ढ्यं सर्वसंहारचातुर्यम् ॥ ३६ ॥ अन्तरे अवसरे । गिरिदुर्गात् गिरिदुर्गप्रदेशात् । सुखी रामपराक्रमदर्शनजन्यसंतोषवान् ॥ ३७—३८ ॥ चतुर्दशसहस्रराक्षसनिरयमेकाकी किं करिष्यतीत्युद्विग्ना सीता रामेण जिते वीरतारतम्याभिज्ञकुलप्रसूततया सबहुमानं परिषस्वजे

ति० श्वेतारण्येयथान्धकः अन्धकासुरः श्वेतारण्ये रुद्रेणहतइति पुराणप्रसिद्धं । रुद्रेणेवेतीवशब्दो वाक्यालङ्कारे । श्वेतारण्येयथान्तकइति प्रचुरः पाठः । तत्र काश्मेरीतीरवर्तिनिश्वेतारण्ये मार्कण्डेयचिरजीविताख्यान्तकसंहारो रुद्रेणकृतइति तन्माहात्म्येप्रसिद्धिः । कौर्मेतूत्तरखण्डे—श्वेतस्यराजर्षेः परमशैवस्य कालञ्जरेपर्वते तपस्यतिरतस्य मारणायागतस्यान्तकस्य शिवेन वामपादप्रहारेण संहारः कृतइति षट्त्रिंशेऽध्यायेऽउक्तं ॥ २७ ॥ ति० फेनेन तदाच्छादितवज्रेण । एवंचान्तकादिवधस्य रुद्रेन्द्रातिरिक्तसाध्यत्ववस्खरवधस्य रामातिरिक्तसाध्यत्वं प्रकाशितंकविना ॥ २८ ॥ इ० विदितात्मनः विख्यातस्वरूपस्य विष्णोरिवेत्यन्वयः । "खड्गश्चन्तोहरेर्भवेत्" इतिरुद्रभाष्यं ॥ ३५ ॥ ती० "तेतुयावन्तएवाजौ तावांस्तु दशशेसतैः" इत्युक्तरीत्या तात्कालिकस्वेच्छागृहीत-

[पा०] १ क. स्योरस्यपातत्, २ घ. रुद्रेणपरिनिर्दग्धः. ३ ग. च. ज्ञ. ञ. यथान्धकः. ४ ग. बलोवज्राग्निहतो. ख. बलोवज्राभिनिहतो. च. छ. ज. बलोयथाऽशनिहतो. ५ च. छ. ज. ञ. संगताश्चमहर्षयः. ६ घ. समेत्य. ७ क. ज्ञ. ट. सागस्त्याद्दमब्रुवन्. ८ ङ. ज्ञ. ट. शत्रूणां. क. च. छ. ज. ञ. शूराणां. ९ घ. क्रूरकर्मणां. १० ङ. ज्ञ. ट. स्वधर्मंप्रचरिष्यन्ति. ११ एतस्मिन्नन्तरेदेवाश्चारणैरित्यारभ्य. यथुर्देवायथागतमित्यन्तं विधमानाश्चत्वारःश्लोकाः ङ. ज्ञ. ट. पुस्तकेषु ततो राजर्षयः सर्वे इति श्लोकात्पूर्वं समुपलभ्यन्ते. १२ क. ग. ङ—ट. कामरूपिणां. १३ क. ग. ङ—ट. महाबले. १४ ख. यथासुखं. १५ ख. गिरिदुर्गात्. १६ च. छ. ज. सुखं. १७ क. ग. घ. प्रविवेशाश्रमपदं. १८ क. च. छ. ज. ञ. व. दितः. ग. वन्दितः.

मुदा परमया युक्ता दृष्ट्वा रक्षोगणान्हतान् ॥ रामं चैवाव्ययं दृष्ट्वा तुतोष जनकात्मजा ॥ ४० ॥

इत्याह । तं दृष्ट्वा पूर्वं महासमरे अदृश्यतया स्थितं इदानीं दृष्ट्वा । तं दृष्ट्वा "वीरश्रमेण विगलद्रुधिरेण रोमकूपोल्लसद्भिरपि घर्मपयःकणौघैः । कोदण्डदण्डमवलम्ब्य विनीय घर्मं किंचित्परिश्रमभृतं प्रियमीक्षमाणा" इत्युक्तप्रकारं दृष्ट्वा । तं दृष्ट्वा ततोद्भूतितजटामण्डलेन दृढबद्धकक्ष्यतया स्कन्धावलम्बितूणीरेण रणावसाननिर्वापितकोपाग्नितया प्रसन्नवदनेन सीतालक्ष्मणमार्गावलोकनेन पुनरपि किमागमिष्यन्ति राक्षसा इति दत्तावधानेन च लक्षितं दृष्ट्वा । तं दृष्ट्वा । पूर्वं वीर इति श्रुतं इदानीं निर्वर्तितवीरकृत्यं दृष्ट्वा । दर्शनप्रकारमाह शत्रुहन्तारं हननव्यापारे कर्मभावः शत्रूणां । स्वस्य तु कर्तृभाव एव । हन्तारं हननव्यापार एव दृष्टः नतु शरसंधानादिव्यापार इत्यर्थः । शत्रुपदेन देवगन्धर्वादिसङ्गेसत्यपि शत्रूनेव हतवानित्युच्यते । दुष्टनिग्रह उक्तः । शिष्टपरिपालनमाह—महर्षीणां सुखावहं महर्षीणां तपोलेशेन हन्तुं सामर्थ्येपि रक्षकस्वरूपस्वरक्ष्यभूतस्वस्वरूपस्य च हानिर्मा भूदिति केवलं रक्षकव्यापारप्रतीक्षाणां रामप्रतिज्ञामेवावलोकयतां । सुखावहं "एहि पश्य शरीराणि" इत्युक्तदुःखगन्धं निवर्त्य सुखस्यैव प्रापकं । बभूव बहुतरशत्रुगणाक्रमणाद्रामस्यैकाकितया च पूर्वं सत्तारहिता सीता संप्रति सत्तां लेभे जगत्प्राणस्य रामस्य सत्तालाभात् स्वयमपि सत्तामवाप । "आत्मा वै पुरुषस्य दाराः" इत्युक्तरीत्या रामसत्तालाभात्स्वस्या अपि सत्ता जातेति भावः । यद्वा भूप्राप्तावित्यस्माद्भिदि व्यत्ययेन परस्मैपदं । भर्तारं विजयिनमालोक्य सरभसं गुहान्तरादागतेत्यर्थः । हृष्टा "सति धर्मिणि धर्माः" इति न्यायेन धर्मिलाभानन्तरं तद्धर्महर्षोभूदित्यर्थः । यद्वा आन्तरप्रीत्यङ्कुरोपमरोमाञ्चाञ्चितेत्यर्थः । एवं शौर्यावलोकनप्रीतत्वेहेतुमाह वैदेही । "मिथिलाधिपतिर्वीरः" इत्युक्तरीत्या वीरकुलप्रसूतत्वादित्यर्थः । भर्तारं परिषस्वजे तादृशनिरवधिकप्रेमभारभरितया स्वयमालिलिङ्ग । भर्तारं लोकभर्तारं । सर्वलोकमातृत्वेन सर्वप्रजारक्षणं दृष्ट्वा परिषस्वजे । आयुधक्षतव्रणेषु सुखोष्णाभ्यां स्तनाभ्यां पस्पर्श परिषस्वजे पर्याप्तं सस्वजे । पश्चात् पुरस्तात् पार्श्वतश्च पस्पर्शेत्यर्थः । यद्यपि रणे अपलायमानस्य पृष्ठे शरपातप्रसङ्ग एव नास्ति तथापि सर्वतः समावृत्य आयुधप्रक्षेपात् पृष्ठतोपि व्रणसंभवः बाणानां सम्यक्क्षिप्तानां पृष्ठतो निर्गमोपि संभवति । महर्षीणां सुखावहं परिषस्वजे पुत्रविषये स्वभर्त्रोपकारकरणे पुत्रवात्सल्याद्धर्तरि संतुष्टा भार्येव ऋषिजनसंरक्षणेन प्रीता परिषस्वजे । रामं विना गुहागता सीता ततो निर्गत्य निरस्तसमस्तशत्रुं रामं परिषस्वज इत्यनेन हृदयगुहागतो जीवः परतन्त्रः आचार्यमुखेन परमशेषिणं दृष्ट्वा तेन सकलविरोधिवर्गे निवर्तिते ततो निर्गत्य नित्यसूरिपरिषदासीनं शेषिणमासाद्य तद्भोगपरिवाहमनुबभूवेति ध्वन्यते ॥ ३९ ॥ उक्तमेवार्थं

चतुर्दशसहस्रदिव्यमङ्गलविग्रहत्वतया प्रतिराक्षसंप्रत्येकं रामइवस्थित्वा दृश्यमानमिति तच्छब्दार्थः । यद्वा इन्द्रादिभिरपि संभूयाप्रधृष्यान्बलीयसश्चतुर्दशसहस्रराक्षसानेकएवार्धाधिकमुहूर्तेन स्वयमक्षतएव लीलयासंहृत्य स्वपुरस्थितं । "राम जामातरंप्राप्य स्त्रियंपुरुषविग्रहं" इत्यात्मनाऽज्ञानात्पूर्वंविप्रलब्धस्मितिवा तच्छब्दार्थः । "तैर्धनूंष्यिच्यजाप्राणि वर्माणिचशिरांसिच । बाहून्सहस्राभरणान्रूरूकरिकरोपमान् । चिच्छेद समरेरामः" इत्युक्तप्रकारेण शत्रुहन्तारंदृष्ट्वेत्यर्थः । किंच "परित्राणायसाधूनां विनाशायच दुष्कृतां । धर्मसंस्थापनार्थाय संभवामियुगेयुगे" इति स्वप्रतिज्ञां परिपालयन्नवतीर्यासतोराक्षसान्हत्वा सतामृष्यादीनां जगन्मोहनदिव्यमङ्गलस्वमूर्तिसाक्षात्कारेण परमानन्दं संपादितवानित्याह—महर्षीणांसुखावहमिति ॥ ३९ ॥ सनि० रक्षोगणान्हतानिति वीर्यगुणविवरणं । तत्र रामंचैवाव्ययमिति वीर्यलक्षणे स्वयमक्षतइति विशेषविवरणं । रक्षोगणान्हतानित्यनेन यः पराजयतीति लक्षणगतविशेष्यविवरणं ॥ ४० ॥

[पा०] १ क. ग. ङ-ट, चैवाव्ययं.

ततस्तु तं राक्षससङ्घमर्दनं सभाज्यमानं मुदितैर्महर्षिभिः ॥
पुनः परिष्वज्य शशिप्रभानना बभूव हृष्टा जनकात्मजा तदा ॥ ४१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे त्रिंशः सर्गः ॥ ३० ॥

एकत्रिंशः सर्गः ॥ ३१ ॥

अकंपननाम्नाराक्षसेनलङ्कामेत्यरावणंप्रतिश्रीरामेणखरादिसकलराक्षसक्षपणनिवेदनम् ॥ १ ॥ तथारामवधप्रतिज्ञानेन जनस्थानप्रस्थानोन्मुखंदशमुखंप्रतिराममहिमानुवर्णनेनतस्यसर्वावध्यत्वकथनपूर्वकंसीतापहारस्यतद्वधोपायत्वकथनम् ॥ २ ॥ रावणेनमारीचाश्रममेत्यतंप्रतिरामेणखरादिनिधननिवेदनपूर्वकंसीतापहरणेसाहाय्यकरणप्रार्थना ॥ ३ ॥ मारीचेनरावणंप्रति रामप्रभावप्रतिपादनपूर्वकंतस्याजय्यत्वकथनेनतस्यपुनर्लङ्कांप्रतिनिवर्तनम् ॥ ४ ॥

त्वरमाणस्ततो गत्वा जनस्थानादकम्पनः ॥ प्रविश्य लङ्कां वेगेन रावणं वाक्यमब्रवीत् ॥ १ ॥
जनस्थानस्थिता राजन्राक्षसा बहवो हताः ॥ खरश्च निहतः सङ्ख्ये कथंचिदहमागतः ॥ २ ॥
एवमुक्तो दशग्रीवः क्रुद्धः संरक्तलोचनः ॥ अकम्पनमुवाचेदं निर्दहन्निव चक्षुषा ॥ ३ ॥

विशदं दर्शयति द्वाभ्यां—मृदेत्यादि ॥४०—४१॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रिंशः सर्गः ॥ ३० ॥

एवं शरणागतिमन्त्रविवरणरूपे श्रीरामायणे इयता ग्रन्थसंदर्भेण उत्तरखण्डार्थो विवृतः। अनुष्ठानदशायां हि प्रथमखण्डार्थस्य प्राथम्यं व्युत्पत्तिदशायां तूत्तरखण्डार्थस्य फलानुसारेणोपायप्रवृत्तेः। अतो द्वितीयखण्डार्थः प्रथमं विवृतः। तत्र बालकाण्डे प्रथमपदार्थभूतपुरुषकारयोगो दर्शितः। अयोध्याकाण्डे द्वितीयपदार्थभूतसौलभ्यादिगुणयोगः। आरण्यकाण्डे शूर्पणखागमनात्पूर्वभाविवृत्तान्तेन चतुर्थ्यर्थभूता किंकरवृत्तिरुक्ता। ततः खरवधान्तवृत्तान्तेन चरमपदार्थभूता विरोधिनिवृत्तिरिति। अथ पूर्वखण्डार्थ उच्यते शास्त्रशेषेण। तत्र चारण्यकाण्डशेषेण विभीषणस्य पुरुषकारसान्निध्यमुच्यते। किष्किन्धाकाण्डेन नारायणपदार्थभूतं वात्सल्यं। सुन्दरकाण्डेन चरणशब्दोक्तदिव्यमङ्गलविग्रहवैशिष्ट्यं। "रामःकमलपत्राक्षः" इत्यादिना तथोक्तेः। युद्धकाण्डे शरणागतिः। उत्तरकाण्डे प्रपन्नचर्येति बोध्यं। एवमानुषङ्गिकमुनिजनशरणागतिफलं देवशरणागतिकार्यरावणवधाङ्गत्वेनोक्त्वा अथ तन्निमित्तभूतसीतापहाररूपबीजमुपक्षिपति—त्वरमाण इत्यादिना ॥ संहृत्य सकलं लोकं पुनः स्रष्टुं च यः क्षमः। तमहं शिरसा वन्दे जानकीप्राणनायकम् ॥ त्वरमाणः शूर्पणखागमनापेक्षयेति शेषः। अकम्पनो रावणचारः। त्वरमाणो गत्वा वेगेनाब्रवीदित्यन्वयः ॥ १ ॥ कथंचिदिति स्त्रीवेषधारणेनेति भावः। अतएव शूर्पणखा वक्ष्यति। "एका कथंचिन्मुक्ताहं परिभूय महात्मना। स्त्रीवधं शङ्कमानेन राघवेण महात्मना" इति ॥ २ ॥ क्रुद्धत्वं नारोपितमितिज्ञापयितुं संरक्तलोचन इत्युक्तं कोपा-

ति० हर्षातिशयात्पुनरालिङ्गनं। इदयुद्धंप्रायश्शिशिरार्धे ॥ ४१ ॥ टीका० सर्गफलंस्कान्दे—"श्रुत्वा श्रीरामविजयं पापबन्धात्प्रमुच्यते। तथैव शृङ्खलाबन्धादृणबन्धाद्विमुच्यते। श्रुत्वा पुष्पवतीनारी तनयं वंशवर्धनं। लभते राघवेन्द्रस्य प्रसादात्कीर्तिवर्धनम्।" इति ॥ इतित्रिंशस्सर्गः ॥ ३० ॥

स० जनस्थानात् तदन्तर्गतगोदावरीतीरात्। गत्वा शूर्पणखागमनात्पूर्वमितिशेषः ॥ १ ॥ स० कथंचित् पलायनादिना। ति० कथंचित् केवलंप्रेक्षकतया स्थितत्वाद्रामबाणाविषयीकृतइत्याशयः ॥ तनि० लङ्काया जनस्थानं पुरद्वारसदृशंखलु। लङ्कायाराज्यं जनपदग्रामादिसंकुलंकिंचिदपि नास्तिखलु। एकालङ्का तस्यारक्षाभूतं जनस्थानमेकं। तस्य नाशाल्लङ्कायाअपावृतंद्वारंसंवृतं राजंस्तवैव सत्ताहानिःखलु। राक्षसाः राक्षसराजस्य तव। तन्नाशेराजत्वंनाशितंकिल। बहवः एकद्वित्रिनाशेपि हानिर्भवत्येव किमुत बहूनांनाशे। हताः मारिताः। नतु सप्राणाः। सर्वराक्षसनाशे खरेणकिंकृतमित्यत्राह—खरश्चेति। चकारेण

[पा०] १ ङ. झ. ट. संपूज्यमानं. २ ङ. झ. ट. महात्मभिः. ३ ङ. झ. ट. मुदान्विताननाः. ४ ङ.—ट. तेजसा.

केन रम्यं जनस्थानं हतं मम परासुना ॥ को हि सर्वेषु लोकेषु गतिं चाधिगमिष्यति ॥ ४ ॥
न हि मे विप्रियं कृत्वा शक्यं मघवता सुखम् ॥ प्राप्तुं वैश्रवणेनापि न यमेन न विष्णुना ॥ ५ ॥
कालस्य चाप्यहं कालो दहेयमपि पावकम् ॥ मृत्युं मरणधर्मेण संयोजयितुमुत्सहे ॥ ६ ॥
दहेयमपि संक्रुद्धस्तेजसाऽऽदित्यपावकौ ॥ वातस्य तरसा वेगं निहन्तुमहमुत्सहे ॥ ७ ॥
तथा क्रुद्धं दशग्रीवं कृताञ्जलिरकम्पनः ॥ भयात्संदिग्धया वाचा रावणं याचतेऽभयम् ॥ ८ ॥
दशग्रीवोऽभयं तस्मै प्रददौ रक्षसां वरः ॥ स विस्रब्धोऽब्रवीद्वाक्यमसंदिग्धमकम्पनः ॥ ९ ॥
पुत्रो दशरथस्यास्ति सिंहसंहननो युवा ॥ रामो नाम वृषस्कन्धो वृत्तायतमहाभुजः ॥ १० ॥
वीरः पृथुयशाः श्रीमानतुल्यबलविक्रमः ॥ हतं तेन जनस्थानं खरश्च सहदूषणः ॥ ११ ॥
अकम्पनवचः श्रुत्वा रावणो राक्षसाधिपः ॥ नागेन्द्र इव निःश्वस्य वचनं चेदमब्रवीत् ॥ १२ ॥
स सुरेन्द्रेण संयुक्तो रामः सर्वामरैः सह ॥ उपयातो जनस्थानं ब्रूहि कच्चिदकम्पन ॥ १३ ॥
रावणस्य पुनर्वाक्यं निशम्य तदकम्पनः ॥ आचचक्षे बलं तस्य विक्रमं च महात्मनः ॥ १४ ॥
रामो नाम महातेजाः श्रेष्ठः सर्वधनुष्मताम् ॥ दिव्यास्त्रगुणसंपन्नः पुरंदरसमो युधि ॥ १५ ॥
तस्यानुरूपो बलवान्रक्ताक्षो दुन्दुभिस्वनः ॥ कनीयाँल्लक्ष्मणो नाम भ्राता शशिनिभाननः ॥ १६ ॥
स तेन सह संयुक्तः पावकेनानिलो यथा ॥ श्रीमान्राजवरस्तेन जनस्थानं निपातितम् ॥ १७ ॥
नैव देवा महात्मानो नात्र कार्या विचारणा ॥ १८ ॥
शरा रामेण तूत्सृष्टा रुक्मपुङ्खाः पतत्रिणः ॥ सर्पाः पञ्चानना भूत्वा भक्षयन्ति स्म राक्षसान् ॥ १९ ॥
येन येन च गच्छन्ति राक्षसा भयकर्शिताः ॥ तेन तेन स्म पश्यन्ति राममेवाग्रतः स्थितम् ॥
इत्थं विनाशितं तेन जनस्थानं तवानघ ॥ २० ॥

तिरेकं दृष्टान्तमुखेनाह—निर्दहन्निवेति ॥ ३ ॥ परायताः असवः प्राणाः यस्य तेन परासुनेति परुषभाषणमात्रं । गम्यत इति गतिः स्थानं ॥ ४—५ ॥ कालस्यापि काल इत्यत्रोपपत्तिमाह—मृत्युमिति ॥ ६ ॥ आदित्यपावकौ परस्परसाहाय्येन संयुक्तावपीत्यर्थः । अतो न पुनरुक्तिः ॥ ७ ॥ संदिग्धया सदिग्धाक्षरया । याचते अयाचत । अभयमिति छेदः ॥ ८—११ ॥ नागेन्द्रः सर्पेन्द्रः ॥ १२ ॥ स रामः सुरेन्द्रेणामरैश्च युक्तः सन् जनस्थानमुपयातः कच्चित् । अन्यथा तस्यैतादृशसामर्थ्यं न युज्यत इति भावः ॥ १३—१४ ॥ इन्द्रादिसहायानपेक्षो राम इत्याशयेनाह—रामो नामेत्यादिना । दिव्यास्त्रगुणसंपन्नः दिव्यास्त्रकृतातिशययुक्तः ॥ १५ ॥ रक्ताक्षः रक्तरेखाञ्चितनयनः । दुन्दुभिस्वनः दुन्दुभिवत् गम्भीरस्वनः । संयुक्त इति वर्तत इति शेषः ॥ १६—१७ ॥ नैव देवा इति । सहायार्थमागता इतिशेषः ॥ १८ ॥ पञ्चाननाः विस्तृताननाः भूत्वा भक्षयन्ति स्मेत्युत्प्रेक्षा ॥ १९ ॥ राक्षसाः भयकर्शिताः भयपीडिताः सन्तो येन येन

दूषणत्रिशिरसावुच्येते ॥ २ ॥ स० परासुना मृतेन । तस्यमरणंनिश्चित्येयमुक्तिः । गतिं त्रातारं ॥ ४ ॥ स० सिंहसंहननः वराङ्गरूपोपेतः । " वराङ्गरूपोपेतोयस्सिंहसंहननोहिसः " इत्यमरः ॥ १० ॥ स० हे इन रावण सता लक्ष्मणेन य श्रीमान्राजवरोरामःसंयुक्तः तेन जनस्थाननिपातितं । शि० संयुक्तः अतिविचारवान् ॥ १७ ॥ स० ससुरेन्द्रेणसंयुक्तइत्यस्योत्तरमाह—नैवेति । देवाः एतदपेक्षया महात्मानोनैव । तस्माद्युक्तंतेषां तेन हननमितिभावः ॥ १८ ॥ स० पञ्चाननास्सर्पाभूत्वा तद्वन्मारकाः ॥ १९ ॥ तनि० येनयेन मार्गेणेत्यर्थः । अथवा येनयेन यद्यद्वस्त्वन्तर्धानसाधनत्वबुद्ध्यागच्छन्ति तेनतेन तस्मिंस्त-

[पा०] १ ख. ङ. झ. ट. भीमं. २ क. ग. घ. छ. ज. ञ. कोद्य. ३ क. ग.—ट. नाधिगमिष्यति. ४ ग. यमेनवरुणेनवा. ङ. झ. ट. नयमेनच. ५ च. छ. ज. ञ. दहेयंवास्वयंक्रुद्धः. ६ ङ. झ. मपिचोत्सहे. ७ ख. स्यासीत्. ङ. झ. ट. स्यास्ते. ८ ङ—ट. महास्कन्धो. ९ ख. ङ—ट. श्यामः. १० ग. ङ. झ. ञ. ट. हतस्तेनजनस्थाने. ११ छ. मृगेन्द्रइव. १२ क.—ट. इदंवचनमब्रवीत्. १३ क. ङ. झ. ट. परंधर्मगतो. ख. परंधामयुतो. १४ ख. भक्तास्यो. १५ ङ. झ. ट. भ्राताराकाशशिनिभाननः. १६ क. येनहि. १७ क. भयशङ्किताः. १८ क. तेनच.

अकम्पनवचः श्रुत्वा रावणो वाक्यमब्रवीत् ॥ जनस्थानं गमिष्यामि हन्तुं रामं सलक्ष्मणम् ॥२१॥
अथैवमुक्ते वचने प्रोवाचेदमकम्पनः ॥ शृणु राजन्यथावृत्तं रामस्य बलपौरुषम् ॥ २२ ॥
असाध्यः कुपितो रामो विक्रमेण महायशाः ॥ आपगायाः सुपूर्णाया वेगं परिहरेच्छरैः ॥ २३ ॥
सताराग्रहनक्षत्रं नभश्चाप्यवसादयेत् ॥ असौ रामस्तु मज्जन्तीं श्रीमानभ्युद्धरेन्महीम् ॥ २४ ॥
भित्त्वा वेलां समुद्रस्य लोकानाप्लावयेद्विभुः ॥ वेगं वाऽपि समुद्रस्य वायुं वा विधमेच्छरैः ॥ २५ ॥
संहृत्य वा पुनर्लोकान्विक्रमेण महायशाः ॥ शक्तः स पुरुषव्याघ्रः स्रष्टुं पुनरपि प्रजाः ॥ २६ ॥
न हि रामो दशग्रीव शक्यो जेतुं त्वया युधि ॥ रक्षसां वाऽपि लोकेन स्वर्गः पापजनैरिव ॥ २७॥

मार्गेण गच्छन्ति तेन तेन मार्गेणाग्रतः स्थितं राममेव पश्यन्ति स्म । अत्र विशेषणासामर्थ्याद्रामदर्शनं भयकृतमिति व्यज्यते ॥ २०—२१ ॥ यथावृत्तं परमार्थभूतमित्यर्थः ॥ २२ ॥ असाध्यः अनिग्राह्यः ॥२३॥ ग्रहाः नवग्रहाः । नक्षत्राणि सप्तविंशतिनक्षत्राणि । ताराः तदन्यज्योतींषि । अवसादयेत् विशीर्णं कुर्यात् । मज्जन्तीं समुद्र इति शेषः ॥ २४ ॥ विप्लावयेत् सिञ्चेत् । विधमेत् दहेत् । ध्मा शब्दाग्निसंयोगयोरिति धातोर्लिङि धमादेशः ॥ २५ ॥ लोकान् भूरादीन् । संहृत्य पुनः स्रष्टुं शक्तः इमाः प्रजाश्च संहृत्य पुनः स्रष्टुं शक्त इत्यर्थः ॥ २६ ॥ लोकेन समूहेन ॥२७॥

स्मिन्वस्तुनि राममेवाग्रतस्स्थितंपश्यन्ति । अत्रप्रतिराक्षसमिच्छागृहीतदेहत्वंध्वन्यते ॥ २० ॥ तनि० यथावृत्तं तत्कृतातिमानुषकर्मानतिक्रमेण । यद्वा रामस्यवृत्तं इतिहासपुराणोक्तवृत्तान्तं यथा यथावत् . बलं पराभिभवसामर्थ्यं । पौरुषं महापुरुषकर्म । कुपितः मर्यादोल्लङ्घनविषयनिग्रहवान् रामइति कोपस्यापरिहार्यत्वंव्यज्यते । विक्रमेणासाध्यः विक्रमेप्रवृत्ते निवारयितुमशक्यइत्यर्थः ।० असाध्यइतिनिरुपपदेन ब्रह्मरुद्रेन्द्रादिभिरसाध्यत्वंध्वन्यते । महायशाः लोकेवेदेचप्रसिद्धविभवः । अनेन त्रिविक्रमावतारोव्यज्यते । आपगायास्सुपूर्णायावेगंपरिहरेदित्यनेन भविष्यत्कृष्णावतारो भूतकृष्णावतारोवा व्यज्यते । "भयानकावर्तशताकुलानदी मार्गं ददौसिन्धुरिवश्रियःपतेः" इति श्रीभागवतोक्तेः । अनेन मत्स्यावतारइति केचित् ॥२३॥ तनि० सताराग्रहनक्षत्रं ताराः अश्विन्यादयः । ग्रहाः सूर्यादयः । तदितराणि नक्षत्राणि । नभश्चापीति तदधिष्ठानाण्डकोशउच्यते । तमप्यवसादयेदित्यनेनापित्रिविक्रमावतारध्वनिः । तथाचश्रुतिः "योअस्कभायदुत्तरंसधस्थविचक्रमाणस्त्रेधोरुगाय." इति । सीदन्तीं मज्जन्तीं । महीमभ्युद्धरेदसाविति वराहावतारोव्यज्यते "तांवराहोभूत्वाऽहरत्" इतिश्रुतेः । श्रीमानित्यवतारेषुसर्वत्रानुवृत्तिर्लक्ष्म्यास्सूच्यते । "अन्येषुचावतारेषु विष्णोरेषानपायिनी" इतिपराशरवचनात् । श्रीमानिति लक्ष्मीसमभिव्याहारबलेन संसारेमज्जन्तंचेतनमभ्युद्धरेदिति परत्वासाधारणलिङ्गमोक्षप्रदत्वंव्यञ्जितं । श्रीमान्महीमभ्युद्धरेदिति लक्ष्म्यास्सहकारित्वश्रवणेन सपत्नीद्वेषाभावोव्यज्यते ॥ २४ ॥ तनि० भित्त्वेति । समुद्रवेलाभेदेन लोकानाप्लावयेदिति संकर्षणावतारोध्वन्यते । समुद्रस्यवेगमपिविधमेदिति करिष्यमाणसमुद्रबन्धनं व्यज्यते । वायुंवाविधमेदिति पृथिव्यादिभूतोपलक्षणं । "पृथिव्यप्सुप्रलीयते, आपस्तेजसिलीयन्ते" इत्याद्युक्तप्रकारेण प्रलयं कुर्यादितिध्वन्यते । संहृत्येत्यनन्तरमनुवादात् ॥ २५ ॥ तनि० पुनस्संहृत्येत्यनेन पूर्वसंहारसृष्ट्योरप्येतत्कर्तृकत्वव्यज्यते । "यभूवभूयश्चयथा महाभागभविष्यती"ति प्रश्नवल्लोकानितिबहुवचनस्यासंकोचेन साण्डास्सर्वेलोकाविवक्षिताः । विक्रमेण संकल्पमात्रेणेत्यर्थः । "एतस्यवाअक्षरस्य—" इत्यादिश्रुतेः । महायशाः षड्गुणैश्वर्यकृतप्रसिद्धिः । शक्तः अनन्तशक्तिमान् । "परास्यशक्तिः" इतिश्रुतेः । ननु नारायणस्य "एकोहवैनारायणः" इत्यादिना सृष्ट्यादिकर्तृत्वंश्रूयते कथमेतस्येति तत्राह—सपुरुषव्याघ्रइति । "सहिदेवैरुदीर्णस्य" इत्यादिना सएवायंनारायणोरामात्मनाऽवतीर्णइत्युक्तत्वात् । स्रष्टुंपुनरित्यत्रापि पुनश्शब्दःपूर्वसृष्टेरेतदधीनत्वव्यञ्जकः । प्रजाइतिप्रकृतिसंसृष्टेचेतनवर्गस्समष्टिकारणभूतउच्यते । अकंपनस्यापि भगवत्प्रसादादेवंज्ञानं ॥ २६ ॥ स० स्वर्गपक्षे जेतुं प्राप्तुमित्यर्थः ॥ तनि० रामः विक्रमैरञ्जनीयः । दशग्रीवः अनितरसाधारणदशवदनत्वंखलु तवावलेपहेतुः रामरामानुजौतु सहस्रशीर्षावितिव्यज्यते । त्वयाजेतुंयुधिनशक्यः अल्पशक्तिस्त्वं अपरिमितानन्तशक्तिमान्रामः कथंजेतुंशक्यः । रक्षसां नमुचिहिरण्यकशिपुशंबरबलिप्रभृतीनां । लोकेन जनेन । "कोमब्बतोरणुकुलाचलयोर्विशेषः" इति न्यायसाम्यंद्योतयितुं त्वयालोकेनेत्येकवचननिर्देशः । जयस्यात्यन्तासंभावनाद्योतयितुं स्वर्गःपापजनैरिवेत्युक्तं । प्रसिद्धैर्बहुभिरेकः

[पा०] १ क—ङ. झ. ट. गमिष्यामिजनस्थानं. २ क—ङ. झ. ट. रामंहन्तुं. ३ क. अवध्यः. ४ ङ. झ. ट. आपगायास्तु. ५ क. ग. ङ. छ—ट. सीदन्तीं. ६ ख. ग. घ. छ. ज. ञ. नाप्लावयेदिमान्. ७ च. चापि. घ. सोपि. ८ ङ. झ. ट. शक्तश्श्रेष्ठस्सपुरुषः. घ. शक्तश्च. ९ ङ. झ. ट. रणेत्वया. १० घ. चापि.

न तं वध्यमहं मन्ये सर्वैर्देवासुरैरपि ॥ अयं तस्य वधोपायस्तं ममैकमनाः शृणु ॥ २८ ॥
भार्या तस्योत्तमा लोके सीता नाम सुमध्यमा ॥ श्यामा समविभक्ताङ्गी स्त्रीरत्नं रत्नभूषिता ॥ २९ ॥
नैव देवी न गन्धर्वी नाऽप्सरा नाऽपि दानवी ॥ तुल्या सीमन्तिनी तस्या मानुषीषु कुतो भवेत् ॥३०॥
तस्यापहर भार्यां त्वं प्रमथ्य तु महावने ॥ सीतया रहितः कामी रामो हास्यति जीवितम् ॥ ३१ ॥
अरोचयत तद्वाक्यं रावणो राक्षसाधिपः ॥ चिन्तयित्वा महाबाहुरकम्पनमुवाच ह ॥ ३२ ॥
बाढं काल्यं गमिष्यामि ह्येकः सारथिना सह ॥ आनयिष्यामि वैदेहीमिमां हृष्टो महापुरीम् ॥३३॥

मम मत्तः । एकमनाः सावधानः ॥२८॥ "श्यामा यौवनमध्यस्था" इत्युत्पलः । समं यथा तथा विभक्तानि नेत्रकर्णाद्यङ्गानि यस्याः सा तथोक्ता । स्त्रीरत्नं स्त्रीश्रेष्ठा अस्तीति शेषः ॥ २९ ॥ देवी देवस्त्री । "पुंयोगादाख्यायां" इति ङीप् । एवमुत्तरत्रापि । अप्सरःशब्द एकवचनान्तोप्यस्ति । सीमन्तिनी स्त्री ॥ ३० ॥ महावने प्रमथ्य विलोड्य । येनकेनाप्युपायेन रामं वञ्चयेत्यर्थः ॥ ३१ ॥ चिन्तयित्वा रामोच्चाटनोपायमिति शेषः ॥ ३२ ॥ बाढमित्यङ्गीकारे । काल्यं

कथंजेतुमशक्यइत्यत्राह—स्वर्गःपापजनैरिवेति ॥ २७ ॥ तनि० इन्द्रजिता निर्जिता इन्द्रादयोस्मत्सहायाभविष्यन्तीत्याशां वारयति—नतमिति । देवासुरैरितिबहुवचनेन सर्वदेवासुरग्रहणे पुनस्सर्वशब्दो भूतभविष्यद्वर्तमानकालिकेन्द्रजात्यादिसमुदायवाचकः । अहंमन्ये राक्षसजातित्वेपि सुकृतपरिपाकवशेन श्रीराममहत्त्वविषयंज्ञानमुत्पन्नं । तदतु " आसुरीयोनिमापन्ना मूढा जन्मनिजन्मनि " इतिशास्त्ररीत्या दुष्कर्मवशेननोत्पन्नमिति । इदंचाकंपनस्यपरत्वज्ञानं सनत्कुमारादिप्रोक्तेतिहासश्रवणादिनावा मास्यवत्प्रभृतिभिरुक्तसुमालिमालिवधादिवृत्तान्तादिनावा विश्वरूपादिदर्शनवच्चतुर्दशसहस्रराक्षसयुद्धे प्रतिराक्षसं रामविग्रहाभेदादिप्रतिपत्त्यावा संजातमितिवा अकंपनापदेशेन ऋषिरेवपरत्वख्यापनकृतवानितिवा न कोपिविरोधः । स० समुद्रमथनकाले सख्यस्यापिदर्शनेन विरोधस्य शाश्वतिकत्वाभावाद्देवासुरैरितिसाधु ॥ २८ ॥ स० उत्तमेति सामान्यतःप्रतिज्ञा । शिष्टं तद्विवरणं ॥ शि० उत्तमा उद्गतःतमः आकाङ्क्षा यस्याः रामातिरिक्तसर्वाकाङ्क्षारहिता ॥ २९ ॥ ती० अरोचयततद्वाक्यमित्यस्य वास्तवार्थस्तु—चिन्तयित्वा अकम्पनाद्रामवृत्तान्तश्रवणानन्तरंचिन्तयित्वा त्रेतायुगे श्रीरामोऽवतरिष्यतीति सनत्कुमारवाक्यंस्मृत्वेत्यर्थः । श्रीरामहस्ताद्वधेच्छूरावणः तद्वाक्यं तस्याकम्पनस्यवाक्यं सीतामाहरेत्येवंरूपंवचनं । अरोचयत अनुकूलत्वेनाङ्गीचकारेतिसंबन्धः । अस्मिन्नर्थे उत्तररामायणोक्ता सनत्कुमाररावणसंबन्धिनी अगस्त्यरामसंवादरूपा कथाऽनुसंधेया । तथाहि रामंप्रत्यगस्त्यवचनं—" अथापरां कथां दिव्यां शृणु राजन्पुरातनीम् । यदर्थं राम वैदेही रावणेनहृतापुरा । पुरा कृतयुगे राम प्रजापतिसुतं प्रभुम् । सनत्कुमारमासीनं रावणो वाक्यमब्रवीत् । दैत्यदानवरक्षांसि ये हतास्समरेऽरयः । कां गतिं प्रतिपद्यन्ते केन ते हरिणा हताः । सनत्कुमारः । येये हताश्चक्रधरेण राजंस्त्रैलोक्यनाथेन जनार्दनेन । तेते गतास्तन्निलयं नरेन्द्राः क्रोधोपि देवस्य वरेण तुल्यः । श्रुत्वा ततस्तद्वचनं निशाचरस्सनत्कुमारस्य मुखाद्विनिर्गतम् । तदा प्रहृष्टस्स बभूव विस्मितः कथंनु यास्यामि हरिं महाहवे । मुनिः मनसश्चेप्सितं यत्तद्भविष्यति तदाहवे । सुखीभव महाबाहो किंचित्कालं प्रतीक्षय । अथवा राक्षसेन्द्र त्वं यदीदं प्रष्टुमिच्छसि । कथयिष्यामि ते सर्वं श्रूयतां यदि रोचते । कृतेयुगे व्यतीते वै मुखे त्रेतायुगस्य तु । हितार्थं देवमर्त्यानां भविता नृपरिग्रहः । इक्ष्वाकूणां च यो राजा भाव्यो दशरथो भुवि । तस्य सूनुर्महातेजा रामो नाम भविष्यति । एवं श्रुत्वा महाबाहू राक्षसेन्द्रः प्रतापवान् । त्वया सह विरोधेच्छुश्चिन्तयामास राघव । सनत्कुमारात्तद्वाक्यं चिन्तयानो मुहुर्मुहुः । रावणो मुमुदे मोहाद्युद्धार्थी विचचार ह । एतदर्थं महाबाहो रावणेन दुरात्मना । सुता जनकराजस्य हृता राम महामते । लङ्कामानीय यत्नेन मातेव परिरक्षिता । " इत्यादि ॥ अतएव रावणस्य सीतारामभृत्यत्वेन तावुद्दिश्य तेनवक्ष्यमाणानि बाह्यदृष्ट्यादुर्भाषणवत्प्रतीयमानान्यपि वाक्यानि वस्तुतस्स्तुतिपराण्येव । तथा तत्रतत्रव्याख्यास्यामः ॥ ३२ ॥ ति० उत्तमस्त्रीलाभोभविष्यतीति हृष्टइत्यर्थउचितः । श्रुतस्यापितस्यार्थस्य तामसत्वेनविस्मरणात् । तेपद्येतु नयथाश्रुतार्थे । वक्ष्यमाणविष्णुपुराणविरोधात् । किंतु श्रीरामस्य स्वमृत्योरवतारंश्रुत्वा त्वयासहमृत्युविघातकविरोधेच्छुस्तांहृतवान् । तद्वियोगे तवमरणमित्याशयेनेतितयोरर्थइत्यन्ये । वस्तुतस्त्वेतेषांश्लोकानां तद्वतांसर्गाणांच प्रक्षिप्तत्वान्नते प्रमाणभूताः । अतएव तेसर्गा कतकादिभिस्तीर्थेनच नव्याख्याताः । एतेन " एतदर्थंमहाबाहो रावणेनदुरात्मना । विज्ञायापहृतासीता त्वत्तोमरणकाङ्क्षया " इति तत्रपाठोदृश्यते तत्रचत्वदुक्तार्थासंभवइत्यपास्तं ॥ कल्यं प्रातः ।

[पा०] १ क. ङ—ट. स्तन्ममैक. २ च. छ. ज. झ. सर्वविभक्ताङ्गी. ३ ङ. झ. ट. नचपन्नगी. ग. नापिपन्नगी. ४ ङ. झ. ट. मानुषीतु. ५ ग. तस्याहरस्व. ६ च. छ. ज. तां. ७ ङ. झ. ट. तंप्रमथ्य. ८ ख. घ. सतया. ९ ङ. झ. ट. रहितोरामोनचैवहिभविष्यति. १० क. लोकरावणः. ख. कालचोदितः. ११ ङ. झ. ट. आनेष्यामिच. ग. आनेष्यामितु.

अथैवमुक्त्वा प्रययौ खरयुक्तेन रावणः ॥ रथेनादित्यवर्णेन दिशः सर्वाः प्रकाशयन् ॥ ३४ ॥
स रथो राक्षसेन्द्रस्य नक्षत्रपतगो महान् ॥ संचार्यमाणः शुशुभे जलदे चन्द्रमा इव ॥ ३५ ॥
स मारीचाश्रमं प्राप्य ताटकेयमुपागमत् ॥ मारीचेनार्चितो राजा भक्ष्यभोज्यैरमानुषैः ॥ ३६ ॥
तं स्वयं पूजयित्वा तु आसनेनोदकेन च ॥ अर्थोपहितया वाचा मारीचो वाक्यमब्रवीत् ॥ ३७ ॥
कच्चित्सुकुशलं राजँल्लोकानां राक्षसेश्वर ॥ आशङ्के नाथ जाने त्वं यँतस्त्वर्णमिँहागतः ॥ ३८ ॥
एवमुक्तो महातेजा मारीचेन स रावणः ॥ ततः पश्चादिदं वाक्यमब्रवीद्वाक्यकोविदः ॥ ३९ ॥
आरक्षो मे हृतस्तात रामेणाक्लिष्टकर्मणा ॥ जनस्थानमवध्यं तत्सर्वं युधि निपातितम् ॥
तस्य मे कुरु साचिव्यं तस्य भार्यापहारणे ॥ ४० ॥
राक्षसेन्द्रवचः श्रुत्वा मारीचो वाक्यमब्रवीत् ॥ ४१ ॥
आख्याता केनँ सीता सा मित्ररूपेण शत्रुणा ॥ त्वया राक्षसशार्दूल को न नन्दति "निन्दितः ॥
सीतामिहानयस्वेति को ब्रवीति ब्रवीहि मे ॥ ४२ ॥
रक्षोलोकस्य सँर्वस्य कः शृङ्गं छेत्तुमिँच्छति ॥ प्रोत्साहयति कँश्चित्त्वां सँहि शैँत्रुरसंशयः ॥ ४३ ॥
आशीविषमुखादंष्ट्रामुद्धर्तुं चेच्छति त्वया ॥ कँर्मणा तेन केनाऽसि कापथं प्रतिपादितः ॥ ४४ ॥

प्रातः ॥ ३३ ॥ खराः अश्वतराः । तत्स्वरूपमुक्तमश्वशास्त्रे । "अश्वसूग्भ्यः समुत्पन्नास्तस्मादश्वतराः खराः । खरवृक्षखरास्तीक्ष्णाः खरशीलाः खराह्वयः" इति ॥ ३४ ॥ नक्षत्रपथगः आकाशगः । संचार्यमाणः प्रेर्यमाणः ॥३५॥ ताटकेयं ताटकापुत्रं । भक्ष्यभोज्यैः पेयखाद्यैः । अमानुषैः मनुष्यलोकदुर्लभैः ॥ ३६ ॥ अर्थोपहितया अर्थेन प्रयोजनेन उपहितया विशिष्टया ॥ ३७ ॥ हे राजन् । लोकानां राक्षसलोकानां । राक्षसेश्वरेतिसमभिव्याहारादयमर्थोलभ्यते । सुकुशलंकच्चिदिति सामान्येन प्रश्नः । अथ अथवा । त्वं यतस्त्वर्णमिहागतः ततः कारणात्किंचिदत्याहितमस्तीत्याशङ्के । तद्विशिष्य न जाने । महत्कार्यं विना भवतस्त्वर्णमागमनं नोपपद्यत इति भावः । यद्वा लोकानां कच्चित्सुकुशलं । अथ अथवा । तेषां कुशलं नेत्याशङ्के यतस्त्वंत्वर्णमागतः । न जाने तद्विशिष्य न जान इत्यर्थः ॥३८॥ ततःपश्चात् तद्वाक्यादनन्तरं ॥ ३९॥ आरक्षः अन्तपालः । उक्तमुपपादयति—जनस्थानमित्याद्यर्धेन । जनस्थानशब्देन तत्स्थो रक्षोगणो लक्ष्यते । तत् प्रसिद्धं । साचिव्यं साहाय्यं । तस्य मे हृतस्वजनस्य मे ॥ ४०—४१ ॥ आख्यातेत्यादयर्धत्रयमेकान्वयं । यः सीतायाः आख्याता स मित्ररूपः शत्रुः । यश्च तामानयेत्युपदेष्टा सः त्वया निन्दितः सन् तिरस्कृतः सन् । त्वदैश्वर्यं न नन्दति तावुभौ ब्रूहीत्यर्थः । ब्रवीहीत्यत्र ईडागमश्छान्दसः ॥ ४२ ॥ शृङ्गं प्राधान्यं । "शृङ्गं प्राधान्यसान्वोश्च" इत्यमरः । प्रोत्साहयति सीताऽऽनयनं प्रतीति शेषः । सच सएव ॥ ४३ ॥ आशीविषः सर्पविशेषः । उद्धर्तुं उद्धारयितुं । क इति शेषः । तेन कर्मणा सीतापहारलक्ष-

मान्तमव्ययं ॥ ३३ ॥ ति० चमूर्यमाणः सशंचरन् ॥ ३५ ॥ स० अमानुषैः राक्षसयोग्यैः ॥ ३६ ॥ ति० आशङ्के भयमितिशेषः । नाधिजाने क्षेममितिशेषः ॥ ३८ ॥ ति० स० आरक्षः रक्षणीयःखरादिः । "आरक्षंरक्षणीयेस्यात्" इतिविश्वः ॥ ४० ॥ ति० सासीता केनाख्याता हर्तव्यत्वेनकथिता । येनकथिता समित्ररूपस्तेशत्रुः । त्वयादानादिना निन्दितः कोननन्दति । निन्दितइतिपाठे निन्दितः अवमानितः । कस्त्वांननन्दति नसंतुष्यति कुप्यतीतियावत् । त्वयातिरस्कृतस्त्वावकमैश्वर्यमसहमानस्संस्त्वयासह कृत्रिममित्रभावंत्रासस्संस्त्ववेदशीबुद्धिमुपदिशतीतिभावः ॥ ४२ ॥ स० शृङ्गं प्रभुत्वमुत्कर्षवा । "शृङ्गंप्रभुत्वे

[पा०] १ ङ. झ. ट. तदेवमुक्त्वा. २ ङ. झ. ञ. ट. चमूर्यमाणः. क. ग. छ. ज. संचर्यमाणः. ३ ङ. झ. दूरेचाश्रमं ४ क. च. छ. झ. ञ. ट. गत्वा. ५ क. ङ—ट. राक्षसाधिप. ६ ग. ङ. झ. ट. नाधिजाने. ७ क. यतश्शीघ्रं. ८ ङ. झ. ट. सुपागतः. ९ ङ. झ. ट. कारणं. १० घ. ङ. झ. केनवासीता. च. छ. ज. ञ. ट. केनसासीता. ११ ङ. च. छ. झ. ञ. ट. निन्दितः. १२ च. छ. ज. कःशृङ्गंछेत्तुमिच्छतिसोप्रतं. १३ घ. महति. १४ क. ग. ङ—ट. यश्चलां. १५ च. छ. ज. ञ ट. सचशत्रुर्नसंशयः. क. ख. ग. ङ. झ. सचशत्रुरसंशयं. १६ ग. कस्त्वयेच्छति. १७ ख—ट. कर्मणानेन.

सुखसुप्तस्य ते राजन्प्रहृतं केन मूर्धनि ॥ ४५ ॥
विशुद्धवंशाभिजनाग्रहस्तस्तेजोमदः संस्थितदोर्विषाणः ॥
उदीक्षितुं रावण नेह युक्तः स संयुगे राघवगन्धहस्ती ॥ ४६ ॥
असौ रणान्तस्थितिसन्धिवालो विदग्धरक्षोमृगहा नृसिंहः ॥
सुप्तस्त्वया बोधयितुं न युक्तः शराङ्गपूर्णो निशितासिदंष्ट्रः ॥ ४७ ॥
चापावहारे भुजवेगपङ्के शरोर्मिमाले सुमहाहवौघे ॥
न रामपातालमुखेऽतिघोरे प्रस्कन्दितुं राक्षसराज युक्तम् ॥ ४८ ॥
प्रसीद लङ्केश्वर राक्षसेन्द्र लङ्कां प्रसन्नो भव साधु गच्छ ॥
त्वं स्वेषु दारेषु रमस्व नित्यं रामः समार्यो रमतां वनेषु ॥ ४९ ॥

णकर्मणा । कापथं कुमार्गं । "ऋक्पूरब्धूःपथामानक्षे" इति समासान्तोऽप्रत्ययः । प्रतिपादितः उपदिष्टोसि । कर्मणा केनेति पाठे केन पुरुषेण केन कर्मणा केनोपायेन । कापथं प्रतिपादितोसीत्यन्वयः । मूर्ध्नि केन प्रहृतं केन प्रहारः कृतः । वृथैव केन दुःखमुत्पादितमित्यर्थः ॥ ४४—४५ ॥ रामे कं गुणं दृष्ट्वैवं वदसीत्याशङ्क्याह—विशुद्धेति । अनेन रामस्य मत्तगजसमाधिरुच्यते । विशुद्धवंशे अभिजनः अभिजननं यदेवाग्रहस्तो यस्य स तथा । द्वयोरपि तत्करत्वसाम्याद्रूपकं निरूढं । तेजोमदः तेजःप्रताप एव मदो यस्य सः । तेजोमदयोर्दुर्धर्षताहेतुत्वसाम्याद्रूपकोत्पत्तिः । षष्ठ्यन्तपदे संस्थितत्वसाम्याद्रूपकं । संस्थितौ समीचीनसंस्थानवन्तौ दोषौ बाहू एव विषाणे यस्य सः । राघव एव गन्धहस्ती मदगजः । यस्य गन्धमात्रेणान्ये गजाः पलायन्ते स गन्धहस्तीत्युच्यते । उदीक्षितुमपि इहास्मिन्देशे काले च न युक्तः ॥ ४६ ॥ पुनरप्यतिशयं वक्तुं रामस्य सिंहसाम्यमाह—असाविति । रणान्तो रणाग्रं तत्र स्थितिर्नासीरावस्थानं सैव संधिवालो यस्य स तथा । संदधातीति संधिः । "उपसर्गे घोः किः" इति किः । संधिभूतः लोमसंघभूत इत्यर्थः । वालो लाङ्गूलं । यद्वा संधिर्मध्यः तद्वतो वालो लाङ्गूलं यस्य स तथेति वा । सिंहस्य लाङ्गूलं क्रोधदशायां मध्योपरिप्रदेशे वर्तत इति प्रसिद्धिः । तस्य मृगाणां गर्वहेतुत्वेन रणाग्रस्थितिसाम्यं । विदग्धानि पटूनि रक्षांस्येव मृगाः तान् हन्तीति तथा । ब्रह्मादिव्यतिरिक्तेष्युपपदे प्रयोगानुसारात् किप् । शराङ्गपूर्णः शरा एवाङ्गानि नखाद्यवयवाः तैः पूर्णः । निशितासिरेव दंष्ट्रे यस्य स तथा । नृसिंहो नरश्रेष्ठः । सिंह इत्यपि ध्वन्यते । यद्वा नृसिंह एव सिंह इत्येकशेषः । यद्वा विद्वन्मानसहंस इतिवत् श्लिष्टं रूपकं । यद्वा नृसिंहो रामः पुरुषसिंह इति व्यङ्ग्यं ॥ ४७ ॥ सिंहामिमुखगमनेपि दैवादृष्टिवैषम्यान्निवर्तितुं शक्यं न तु रामाहवगमन इत्याशयेन रामस्य पातालसाम्यमाह—चापेति । चाप एवावहारो ग्राहो यस्मिन् स तथा । "ग्राहोवहारः" इत्यमरः । अनेन पतनकाल एव ग्रहणसामग्र्युक्ता । भुजवेगः शरमोक्षणवेगः स एव पङ्को यस्य स तथा । अनेन मज्जने निर्गमायोग्यतोक्ता । शरा एवोर्मिमाला तरङ्गपङ्क्तिर्यस्य स तथा । अनेन मज्जनसामग्र्युक्ता । सुमहाहवौघ एव ओघो जलपूरो यस्य स तथा । अनेन दुस्तरत्वमुक्तं । अतिघोरे राम एव पातालं महाविलं तस्य मुखे मध्ये । प्रस्कन्दितुं पतितुं न युक्तं ॥ ४८ ॥ एवं वस्तुस्थितिमुक्त्वा प्रेमातिशयेन पुनः पुनः सान्त्वयति

विषाणोत्कर्षयोरपि " इतिविशेषः ॥ ४३ ॥ ती० सुप्तः परद्रोहविमुखतयाऽवस्थानमेव सुप्तत्वं रामपक्षेद्रष्टव्यं ॥ शि० सुप्तः खदपकारविषयकबोधरहितः ॥ ४७ ॥ इत्येकत्रिंशस्सर्गः ॥ ३१ ॥

[पा०] १ घ. आवीक्षितुं. च. छ. ज. ञ. उद्वीक्षितुं. २ ङ. रणाग्रस्थिति. ३ क. ङ. ट. शक्यः. ४ ग. वेगनागे. ५ ग. जाले. ङ. मालेतु. ६ ग. प्रपन्नो.

एवमुक्तो दशग्रीवो मारीचेन स रावणः ॥ न्यवर्तत पुरीं लङ्कां विवेश च गृहोत्तमम् ॥ ५० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

द्वात्रिंशः सर्गः ॥ ३२ ॥

खरादिनिधनखिन्नयाशूर्पणखयालंकामेत्यरावणायस्वरूप्यप्रदर्शनम् ॥ १ ॥

ततः शूर्पणखी दृष्ट्वा सहस्राणि चतुर्दश ॥ हतान्येकेन रामेण रक्षसां भीमकर्मणाम् ॥ १ ॥
दूषणं च खरं चैव हतं त्रिशिरसा सह ॥ दृष्ट्वा पुनर्महानादं ननाद जलदो यथा ॥ २ ॥
सा दृष्ट्वा कर्म रामस्य कृतमन्यैः सुदुष्करम् ॥ जगाम परमोद्विग्ना लङ्कां रावणपालिताम् ॥ ३ ॥
सा ददर्श विमानाग्रे रावणं दीप्ततेजसम् ॥ उपोपविष्टं सचिवैर्मरुद्भिरिव वासवम् ॥ ४ ॥
आसीनं सूर्यसंकाशे काञ्चने परमासने ॥ रुक्मवेदिगतं प्राज्यं ज्वलन्तमिव पावकम् ॥ ५ ॥
देवगन्धर्वभूतानामृषीणां च महात्मनाम् ॥ अजेयं समरे शूरं व्यात्ताननमिवान्तकम् ॥ ६ ॥
देवासुरविमर्देषु वज्राशनिकृतव्रणम् ॥ ऐरावतविषाणाग्रैरुद्भृष्टकिणवक्षसम् ॥ ७ ॥
विंशद्भुजं दशग्रीवं दर्शनीयपरिच्छदम् ॥ विशालवक्षसं वीरं राजलक्षणशोभितम् ॥ ८ ॥
स्निग्धवैदूर्यसंकाशं तप्तकाञ्चनकुण्डलम् ॥ सुभुजं शुक्लदशनं महास्यं पर्वतोपमम् ॥ ९ ॥
विष्णुचक्रनिपातैश्च शतशो देवसंयुगे ॥ अन्यैः शस्त्रप्रहारैश्च महायुद्धेषु ताडितम् ॥ १० ॥
आहताङ्गं समस्तैश्च देवप्रहरणैस्तथा ॥ अक्षोभ्याणां समुद्राणां क्षोभणं क्षिप्रकारिणम् ॥ ११ ॥

प्रसीदेति ॥ ४९—५० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकत्रिंशः सर्गः ॥ ३१ ॥

तपोबाहुबलोपेतं सर्वभूतभयंकरम् । यो हनिष्यति दुर्बुद्धिं रावणं सोस्तु मे मुदे ॥ शूर्पणखीत्यार्षोङीषादिः । महानादमिति क्रियाविशेषणं ॥ १—२ ॥ कृतं कर्म पर्याप्तं कर्म । परमोद्विग्ना अत्यन्तभीता ॥ ३ ॥ विमानाग्रे पुष्पकविमानाग्रे । उपोपविष्टं उपोपेत्येकनिपातः । उपनिविष्टमित्यर्थः । मरुद्भिः देवैः ॥ ४ ॥ रुक्मवेदिगतं हिरण्मेष्टकचितवेदिगतं । तदुक्तमापस्तम्बेन "सावित्रं स्वर्गकामश्चिन्वीत पञ्चाशीतिशतं हिरण्मेष्टकाः" इत्यादिना । प्रभूतमाज्यं यस्य तं प्राज्यं प्रभूतेनाज्येन वर्धितमित्यर्थः । अत एव ज्वलन्तं ॥ ५—६ ॥ विमर्देषु युद्धेषु । वज्राशनिकृतव्रणमित्यनेन तदवध्यत्वमुक्तं । उद्भृष्ट उल्लेखनं भावे क्तः । तेन जातो यः किणः तदङ्कितवक्षसं ॥ ७ ॥ विंशद्भुजं विंशतिभुजं । दर्शनीयपरिच्छदं दर्शनीयच्छत्रचामरादिकं ॥ ८ ॥ स्निग्धवैदूर्यैः कान्तियुक्तवैदूर्यरत्नैः आभरणैः संकाशं भासमानं । सुभुजं दीर्घवृत्तभुजं ॥ ९ ॥ विष्णुचक्रनिपातैरित्यत्र ताडितमित्यनुषज्यते ॥ १० ॥ क्षोभणं

स० विष्णुचक्रक्षेपनिपातोयेषांतैः । यद्वा विष्णुचक्रैः आयुधान्तरैः । अन्यैः पूर्वोक्तेभ्यः । कर्तृभिः । शस्त्रप्रहारैः करणैस्ताडितं ॥ १० ॥

[पा०] १ अयंश्लोकः च. छ. ज. पाठेषु ३२ तमाध्यायारंभेदृश्यते. २ ग. राक्षसः. ३ घ. ततो. ४ छ. ज. ञ, प्रविवेश. ५ ख. घ. पुरोत्तमं. ६ घ. तत्र. ७ ख. ट. क्रूरकर्मणां. ८ ख. ञ. हतौ. ९ ङ. झ. ट. त्रिशिरसंरणे. ग. त्रिशिरसंतथा. १० ङ. झ. महानादान्नाद. ११ ङ—ट. जलदोपमा. १२ ख. उपोपविष्टैः. १३ क. कृतं. १४ ग. पूर्व्यं. १५ ङ. झ. ट. घोरं. १६ क. ग. घ. व्यक्तानन. १७ ग. च—ट. रुत्कृष्ट. क. रुत्कृत्त. घ. रुत्सृष्ट. १८ ङ. झ. ट. लक्षितं. १९ ङ. झ. ट. नद्धवैदूर्य. २० ग. भूषितं. क. झ. ट. भूषणं. २१ घ. कृष्णदशनं. २२ ग. चक्रप्रहारैश्च. २३ घ. छ. ज. ञ. शस्त्रप्रहारैश्च. झ. शस्त्रैःप्रहारैश्च. २४ ङ. झ. आहताङ्गैः. २५ ग. समर्थैश्च. ङ. झ. समस्तैस्तं. घ. छ. ज. ञ. समस्तैस्तु. २६ क. ख. क्षोभकं.

क्षेप्तारं पर्वतेन्द्राणां सुराणां च प्रमर्दनम् ॥ उच्छेत्तारं च धर्माणां परदाराभिमर्शनम् ॥
सर्वदिव्यास्त्रयोक्तारं यज्ञविघ्नकरं सदा ॥ १२ ॥
पुरीं भोगवतीं प्राप्य पराजित्य च वासुकिम् ॥ तक्षकस्य प्रियां भार्यां पराजित्य जहार यः ॥१३॥
कैलासपर्वतं गत्वा विजित्य नरवाहनम् ॥ विमानं पुष्पकं तस्य कामगं वै जहार यः ॥ १४ ॥
वनं चैत्ररथं दिव्यं नलिनीं नन्दनं वनम् ॥ विनाशयति यः क्रोधाद्देवोद्यानानि वीर्यवान् ॥ १५ ॥
चन्द्रसूर्यौ महाभागावुत्तिष्ठन्तौ परंतपौ ॥ निवारयति बाहुभ्यां यः शैलशिखरोपमः ॥ १६ ॥
दशवर्षसहस्राणि तपस्तप्त्वा महावने ॥ पुरा स्वयंभुवे धीरः शिरांस्युपजहार यः ॥ १७ ॥
देवदानवगन्धर्वपिशाचपतगोरगैः ॥ अभयं यस्य संग्रामे मृत्युतो मानुषादृते ॥ १८ ॥
मन्त्रैरभिष्टुतं पुण्यमध्वरेषु द्विजातिभिः ॥ हविर्धानेषु यः सोममुपहन्ति महाबलः ॥ १९ ॥
आप्तयज्ञहरं क्रूरं ब्रह्मघ्नं दुष्टचारिणम् ॥ कर्कशं निरनुक्रोशं प्रजानामहिते रतम् ॥ २० ॥
रावणं सर्वभूतानां सर्वलोकभयावहम् ॥ राक्षसी भ्रातरं शूरं सा ददर्श महाबलम् ॥ २१ ॥
तं दिव्यवस्त्राभरणं दिव्यमाल्योपशोभितम् ॥ आसने सूपविष्टं च कालकालमिवोद्यतम् ॥२२॥
राक्षसेन्द्रं महाभागं पौलस्त्यकुलनन्दनम् ॥ रावणं शत्रुहन्तारं मन्त्रिभिः परिवारितम् ॥
अभिगम्याब्रवीद्वाक्यं राक्षसी भयविह्वला ॥ २३ ॥

तमब्रवीद्दीप्तविशाललोचनं प्रदर्शयित्वा भयमोहमूर्च्छिता ॥

क्षोभकर्तारं ॥ ११ ॥ योक्तारं प्रयोक्तारं । यज्ञेति । उच्छेत्तारमित्यत्र उच्छास्त्रवर्तित्वमुक्तं । अत्र परयज्ञध्वंसकत्वं ॥ १२ ॥ भोगवतीं सर्पनगरीं । पराजित्य बलात्कृत्येति यावत् ॥ १३ ॥ नरवाहनं कुबेरं ॥१४॥ नलिनीं कुबेरस्य पुष्करिणीं । नन्दनं वनं इन्द्रोद्यानं । देवोद्यानानि नन्दनवनादन्यानि ॥ १५ ॥ उत्तिष्ठन्तौ उद्यन्तौ ॥ १६ ॥ उपजहार पूजोपकरणानि चकार ॥ १७ ॥ देवदानवेति देवादिभिः कर्तृभिः । मृत्युतः मृत्योः । षष्ठ्यर्थे तसिः । अभयं भयाभावः । अस्तीति गम्यमानत्वादप्रयोगः । मनुष्यादृते मनुष्यं विना मनुष्यात्तु भयमस्तीत्यर्थः ॥ १८ ॥ अध्वरेषु यागेषु । हविर्धानेषु सोमाभिषवशालासु । मन्त्रैः प्रातरनुवाकग्रावस्तोत्रादिभिः करणैः । द्विजातिभिः कर्तृभिः । अभिषुतं क्षरितं । सोमं उपहन्ति होमकाले नाशयतीत्यर्थः ॥ १९ ॥ आप्तयज्ञहरं आप्तान् दक्षिणाकालं प्राप्तान् यज्ञान् हरतीति तथा । कर्कशं निर्दाक्षिण्यं । निरनुक्रोशं निर्दयं ॥ २० ॥ रावणं रावकं । सा ददर्शमहाबलमित्युपसंहारः । अतो न सर्गादिस्थेन ददर्शेति पदेन पौनरुक्त्यं ॥ २१ ॥ कालकालं मृत्योरपि मृत्युं । उद्यतं उद्युक्तं ॥ २२ ॥ पौलस्त्यानां कुलं नन्दयतीति तथा ॥ २३ ॥ पुनः सर्गान्ते संग्रहश्लोकः—तमिति । प्रदर्शयित्वा स्वकं वैरूप्य-

शि० मानुषात् नित्यनराकृतिपरमात्मनः । मृत्युतोमरणात् यस्याभयं । अतएवदेवादिभ्यश्चाभयं ॥ स० देवदानवादिभिस्सहमृत्युतोऽभयं । तत्रापवादमाह—मानुषादृते भक्ष्यत्वेनालक्ष्यत्वात्ततोऽवध्यत्वाप्रार्थनादितिभावः ॥ १८ ॥ ति० काले प्रलयकाले ॥ २२ ॥ शि० भयलोभमोहिता भयेनराक्षसविनाशजनितभीत्या लोभेन अतिसुन्दररामविषयकप्राप्त्युत्कटेच्छयाच मोहिता कर्तव्यविषयकाविवेकंप्राप्ता ॥ २४ ॥ इतिद्वात्रिंशस्सर्गः ॥ ३२ ॥

[पा०] १ ङ—ट. पर्वताग्राणां. २ ग. परेषांच. क. परेषांपुरमर्दनं. घ. परचक्रप्रमर्दनं. ३ क—ट. गत्वा. ४ क. ग—ट. कैलासंपर्वतं. ५ क. ग. क्रुद्धोदेवोद्यानानि. ६ घ. महावेगावुत्तिष्ठन्तौ ७ ख. घ. वीरः. ८ घ. देवर्षिपतगो. ९ ख. सर्वभूतेभ्यो. १० ङ—ट. प्राप्तयज्ञहरंदुष्टं. ख. सर्वयज्ञहरं. ११ ङ. झ. ट. क्रूरकारिणं. १२ ख. च. ज. ञ. सर्वलोकानां. १३ च. ञ. सर्वभूत. क. ग. सर्वभूतभयंकरं. १४ क. राक्षसं. १५ क. ग. ङ. छ—ट. क्रूरं. १६ क. सादिव्य. १७ ख—ट. सूपविष्टंतं. १८ क ख. ग. ङ. च. छ. झ. ञ. ट. कालेकाल. १९ रावणंशत्रुहन्तारं. अभिगम्याब्रवीद्वाक्यं. इत्यनयोरर्धयोःपौर्वापर्यं ङ. झ. ट. पाठेषुदृश्यते. २० ङ झ. ट. उपगम्य. २१ च. छ. ज. भयशोकमोहिता. ङ. झ. ञ. ट. भयलोभमोहिता. क. भयशोकमूर्च्छिता.

सुदारुणं वाक्यमभीतचारिणी महात्मना शूर्पणखा विरूपिता ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

शूर्पणखयाऽसभामध्येरावणंप्रतिजनस्थानवृत्तान्तनिवेदनपूर्वकंतत्स्त्रीराजगुणराहित्यप्रतिपादनेनोपालंभः ॥ १ ॥

ततः शूर्पणखा दीना रावणं लोकरावणम् ॥ अमात्यमध्ये संक्रुद्धा परुषं वाक्यमब्रवीत् ॥ १ ॥
प्रमत्तः कामभोगेषु स्वैरवृत्तो निरङ्कुशः ॥ समुत्पन्नं भयं घोरं बोद्धव्यं नावबुध्यसे ॥ २ ॥
सक्तं ग्राम्येषु भोगेषु कामवृत्तं महीपतिम् ॥ लुब्धं न बहुमन्यन्ते श्मशानाग्निमिव प्रजाः ॥ ३ ॥
स्वयं कार्याणि यः काले नानुतिष्ठति पार्थिवः ॥ स तु वै सह राज्येन तैश्च कार्यैर्विनश्यति ॥ ४ ॥
अयुक्तचारं दुर्दर्शमस्वाधीनं नराधिपम् ॥ वर्जयन्ति नरा दूरान्नदीपङ्कमिव द्विपाः ॥ ५ ॥
ये न रक्षन्ति विषयमस्वाधीना नराधिपाः ॥ ते न वृद्ध्या प्रकाशन्ते गिरयः सागरे यथा ॥ ६ ॥
आत्मवद्भिर्विगृह्य त्वं देवगन्धर्वदानवैः ॥ अयुक्तचारश्चपलः कथं राजा भविष्यसि ॥ ७ ॥
त्वं तु बालस्वभावश्च बुद्धिहीनश्च राक्षस ॥ ज्ञातव्यं तु न जानीषे कथं राजा भविष्यसि ॥ ८ ॥
येषां चारश्च कोशश्च नयश्च जयतां वर ॥ अस्वाधीना नरेन्द्राणां प्राकृतैस्तैः समाः ॥ ९ ॥
यस्मात्पश्यन्ति दूरस्थान्सर्वानर्थान्नराधिपाः ॥ चारेण तस्मादुच्यन्ते राजानो दीर्घचक्षुषः ॥ १० ॥

मिति शेषः । विरूपितेत्युक्तेः । अभीततया सर्वपुरुषेषु सर्वलोके च चारोस्या अस्तीति सा ॥ २४ ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्वात्रिंशः सर्गः ॥ ३२ ॥

अमर्यादो भृशं मूर्खो वध्यो यस्य निशाचरः । तमहं नीतिसंपन्नं रघुनाथं समाश्रये ॥ दीना रामपरिभूतत्वात् । स्वपरिभवदर्शनेपि भ्रातुर्निश्चलतया संक्रुद्धा ॥ १ ॥ कामभोगेषु स्वैरवृत्तः स्वतन्त्रः । सदा कामपरवश इत्यर्थः । निरङ्कुशः कामभोग एव निष्प्रतिबन्धः । घोरंभयं शृण्वतामपि भयंकरमित्यर्थः । बोद्धव्यं चारमुखेनेति शेषः ॥ २ ॥ एवं कामवृत्तस्य संभावितां हानिं लोकरीत्या दर्शयति—सक्तमित्यादिना । ग्राम्येषु मैथुनादिषु । कामवृत्तं यथेच्छव्यापारं ॥ ३ ॥ कार्याणि पालनादीनि ॥ ४ ॥ अयुक्तचारं अनियोजितचारं । दुर्दर्शं उचितकाले सभायां प्रजादर्शनप्रदानरहितं । अस्वाधीनं पत्न्यादिपरतन्त्रं परप्रत्ययनेयबुद्धिं वा । पङ्केपि विशेषणद्वयं योज्यं । अयुक्तचारो यस्मिन् स्वस्य संचारकर्तुरधीनो न भवतीत्यर्थः ॥ ५ ॥ विषयं स्वराज्यं । वृद्ध्या वर्तमानयाऽपीति शेषः ॥ ६ ॥ आत्मवद्भिः यत्नवद्भिः स्वतन्त्रीकारदत्तावधानैरित्यर्थः । चपलः विषयचपलः ॥७॥ उक्तमेवार्थं पुनरपि प्रलपति रावणस्याप्रहोत्पादनाय—बालस्वेति । बालस्येव स्वभावो विवेकशून्यत्वं यस्य स तथा । बुद्धिहीनः विवेकहेतुर्बुद्धिः तयाहीनः ॥८॥ स्वपरराष्ट्रकार्याकार्यज्ञापकद्वारः । कोशो धनसमृद्धिः । नयो नीतिः । प्राकृतैर्जनैः साधारणैर्जनैः ॥ ९ ॥ चार-

---

स० लोकरावणं जनरोदक ॥ १ ॥ स० बोद्धव्यं अवश्यंज्ञातव्यं ॥ २ ॥ स० ग्राम्येषुभोगेषु स्त्र्यादिभोगेषु । विहितमर्यादोल्लङ्घनेनासक्तं । कामवृत्तं परनार्यादिनिरतं । श्मशानाग्निं शवाग्निं । ति० श्मशानाग्निमिव अस्पृश्यत्वेनसादरं ॥ ३ ॥ स० राज्येनकार्यैश्च सहेतिसंबन्धः । ति० तैः कार्यैः अननुष्ठितैः ॥ ४ ॥ ति० अस्वाधीनं स्वभिन्नाधीनं । पूर्वस्वाधीनं देशं पश्चात्प्रायत्तं ये नरक्षन्ति स्वाधीनीकरणेनेतिशेषः ॥ ६ ॥ ती० आत्मवद्भिः प्रशस्तधैर्यैः ॥ ७ ॥ टीका० चारः देशा-

[पा०] १ ङ. ञ. दीना. २ ग. समुत्पन्नमिदं. ३ ङ. ञ. ञ. ट. अस्वाधीनं. ४ क. वृद्ध्या. ५ च. छ. ज. झ. सागरे गिरयोयथा. ६ क. ञ. ट. ज्ञातव्यंतं. ख. झ. ज्ञातव्यंच. ७ ख. स्तैःसमाजनैः. घ. स्तैर्जनैस्समाः.

अयुक्तचारं मन्ये त्वां प्राकृतैः सचिवैर्वृतम् ॥ खजनं तु जनस्थानं हतं यो नावबुध्यसे ॥ ११ ॥
चतुर्दश सहस्राणि रक्षसां क्रूरकर्मणाम् ॥ हतान्येकेन रामेण खरश्च सहदूषणः ॥ १२ ॥
ऋषीणामभयं दत्तं कृतक्षेमाश्च दण्डकाः ॥ धर्षितं च जनस्थानं रामेणाक्लिष्टकर्मणा ॥ १३ ॥
त्वं तु लुब्धः प्रमत्तश्च पराधीनश्च रावण ॥ विषये स्वे समुत्पन्नं भयं यो नावबुध्यसे ॥ १४ ॥
तीक्ष्णमल्पप्रदातारं प्रमत्तं गर्वितं शठम् ॥ व्यसने सर्वभूतानि नाभिधावन्ति पार्थिवम् ॥ १५ ॥
अतिमानिनमप्राप्तमात्मसंभावितं नरम् ॥ क्रोधिनं व्यसने हन्ति स्वजनोपि महीपतिम् ॥ १६ ॥
नानुतिष्ठति कार्याणि भयेषु न बिभेति च ॥ क्षिप्रं राज्याच्युतो दीनस्तृणैस्तुल्यो भविष्यति ॥१७॥
शुष्कैः काष्ठैर्भवेत्कार्यं लोष्टैरपि च पांसुभिः ॥ न तु स्थानात्परिभ्रष्टैः कार्यं स्याद्वसुधाधिपैः ॥१८॥
उपभुक्तं यथा वासस्स्रजो वा मृदिता यथा ॥ एवं राज्यात्परिभ्रष्टः समर्थोपि निरर्थकः ॥ १९ ॥
अप्रमत्तश्च यो राजा सर्वज्ञो विजितेन्द्रियः ॥ कृतज्ञो धर्मशीलश्च स राजा तिष्ठते चिरम् ॥ २० ॥
नयनाभ्यां प्रसुप्तोपि जागर्ति नयचक्षुषा ॥ व्यक्तक्रोधप्रसादश्च स राजा पूज्यते जनैः ॥ २१ ॥
त्वं तु रावण दुर्बुद्धिर्गुणैरेतैर्विवर्जितः ॥ यस्य तेऽविदितश्चारैः रक्षसां सुमहान्वधः ॥ २२ ॥

परावमन्ता विषयेषु संगतो नदेशकालप्रविभागतत्त्ववित् ॥
अयुक्तबुद्धिर्गुणदोषनिश्चये विपन्नराज्यो नचिराद्विपत्स्यसे ॥ २३ ॥

प्रयोजनमाह—यस्मादिति ॥ १० ॥ एवं लोकरीत्योक्तं रावणे उपसंहरति—अयुक्तेत्यादिना । जनस्थानं जनस्थानस्थं ॥ ११—१२ ॥ स्वजनवधादपि दुःसहं कार्यान्तरमाह—ऋषीणामिति ॥ १३ ॥ लुब्धः चारादीनामभिमतप्रदाता ॥ १४ ॥ तीक्ष्णं क्रूरं । शठं गूढविप्रियकारिणं । व्यसने व्यसनकाले । सर्वभूतानि भृत्यामात्यादीनि । नाभिधावन्ति तद्रक्षणाय न प्रवर्तन्ते ॥ १५ ॥ अप्राप्तं सद्भिरितिशेषः । आत्मना स्वेनैव बहुमानंप्राप्तः सोयमात्मसंभावितः तं । क्रोधिनं अस्थाने क्रोधवन्तं । व्यसने व्यसनकाले । स्वजनोपि अमात्यादिरपि ॥ १६ ॥ भयेषु भयहेतुषु न बिभेति साशङ्को नवर्ततइत्यर्थः ॥ १७—१८ ॥ उपभुक्तवदादिदृष्टान्तः परेषामयोग्यत्वप्रदर्शनाय ॥ १९ ॥ चिरं तिष्ठत इत्यत्र आर्षमाख्यानेपदं ॥ २० ॥ जागर्ति अप्रमत्तो भवतीत्यर्थः ॥ २१ ॥ यस्य ते येन त्वया । अविदित इति च्छेदः ॥ २२ ॥ सर्गार्थमेकेन संगृह्णाति—परेति । परावमन्ता शत्रूपेक्षावान् । विषयेषु शब्दादिषु । सङ्गतः संगवान् । नदेशकालप्रविभागतत्त्ववित्येकंपदं । नञनैकादिवन्नसमासः । देशकालभेदातत्त्वज्ञ इत्यर्थः । गुणदोषनिश्चये विषये । अयुक्तबुद्धिः अनियोजितबुद्धिः अप्रवृत्तबुद्धिरित्यर्थः । नचिरात् क्षिप्रं । विपत्स्यसे आपदं प्राप्स्यसीत्यर्थः ।

न्तरवर्तमानकार्यवक्ता ॥ ९ ॥ ति० स्वजनं स्वस्वजनाःयस्मिंस्तत् । शि० प्राकृतैः प्रकृतिस्वभावएवयेषांतैः शास्त्रसंस्काररहितैरित्यर्थः ॥ ११ ॥ ती० तीक्ष्णं प्रत्यक्षदृश्यमानं ॥ १५ ॥ ती० सर्वज्ञः स्वराष्ट्रपरराष्ट्रवृत्तान्तज्ञः ॥ २० ॥ ती० व्यक्तक्रोधप्रसादश्च व्यक्तौ सार्थकत्वेनाभिव्यक्तौ क्रोधप्रसादौ यस्यसतथोक्तः । शि० व्यक्तौ दण्डदानाभ्यांप्रकटितौ क्रोधप्रसादौयस्यसः ॥ २१ ॥

[पा०] १ क—ट शुतं. २ क. ग. ङ—ट. स्वजनंच. ३ क. ख. घ. च. छ. ज. जनस्थाने. झ. यतस्स्थानं. ४ क. झ. ट. निहतंनाव. ५ क. ख. ग. ङ. झ. ट. भीमकर्मणां. च. छ. ज. ञ. कामरूपिणां. ६ क. झ. कारिणा. ७ झ. राक्षस. ८ क. झ. ट. यद्भयंनाव. ९ च. छ. ज. ञ. नाभिधावन्तिसर्वभूतानि. १० च. छ. ज. ञ. अभिमानिनं. ११ क—ट. क्रोधनं. १२ ख. ङ—ट. नराधिपं. १३ क. झ. ञ. ट. भवेदिह. १४ क—ट. शुष्ककाष्ठैः. १५ ग. नहि. १६ च. उपयुक्तं. १७ झ. प्रसुप्तोवा. १८ क. ख. घ—ट. सङ्गवासदेश.

इति स्वदोषान्परिकीर्तितांस्तया समीक्ष्य बुद्ध्या क्षणदाचरेश्वरः ॥
धनेन दर्पेण बलेन चान्वितो विचिन्तयामास चिरं स रावणः ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

चतुस्त्रिंशः सर्गः ॥ ३४ ॥

रावणेनशूर्पणखांप्रतिरामगुणविषयकप्रश्नपूर्वकंतेनतद्वैरूप्यकरणकारणप्रश्नः ॥ १ ॥ शूर्पणखयारामलक्ष्मणसीतागुणानुवर्णनपूर्वकंरावणंप्रतितदर्थंस्वेनसीतापहरणोपायसख्यवैरूप्यकरणकारणत्वोक्तयासीतापहारचोदना ॥ २ ॥

ततः शूर्पणखां क्रुद्धां ब्रुवन्तीं परुषं वचः ॥ अमात्यमध्ये संक्रुद्धः परिपप्रच्छ रावणः ॥ १ ॥
कश्च रामः कथंवीर्यः किंरूपः किंपराक्रमः ॥ किमर्थं दण्डकारण्यं प्रविष्टः स दुरासदम् ॥ २ ॥
आयुधं किंच रामस्य निहता येन राक्षसाः ॥ खरश्च निहतः संख्ये दूषणस्त्रिशिरास्तथा ॥
[तत्त्वं ब्रूहि मनोज्ञाङ्गि केन त्वं च विरूपिता ॥ ३ ॥]
इत्युक्ता राक्षसेन्द्रेण राक्षसी क्रोधमूर्च्छिता ॥ ततो रामं यथातत्त्वमाख्यातुमुपचक्रमे ॥ ४ ॥
दीर्घबाहुर्विशालाक्षश्चीरकृष्णाजिनाम्बरः ॥ कन्दर्पसमरूपश्च रामो दशरथात्मजः ॥ ५ ॥
शक्रचापनिभं चापं विकृष्य कनकाङ्गदम् ॥ दीप्तान्क्षिपति नाराचान्सर्पानिव महाविषान् ॥ ६ ॥
नाददानं शरान्घोरान्न मुञ्चन्तं शिलीमुखान् ॥ न कार्मुकं विकर्षन्तं रामं पश्यामि संयुगे ॥ ७ ॥
हन्यमानं तु तत्सैन्यं पश्यामि शरवृष्टिभिः ॥ इन्द्रेणेवोत्तमं सस्यमाहतं त्वश्मवृष्टिभिः ॥ ८ ॥
रक्षसां भीमरूपाणां सहस्राणि चतुर्दश ॥ निहतानि शरैस्तीक्ष्णैस्तेनैकेन पदातिना ॥ ९ ॥
अर्धाधिकमुहूर्तेन खरश्च सहदूषणः ॥ ऋषीणामभयं दत्तं कृतक्षेमाश्च दण्डकाः ॥ १० ॥

स्वमिति शेषः ॥ २३—२४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

परगोष्ठीप्रसिद्धानां गुणानामाकरो महान् । अनुजो यस्य सौमित्रिस्तमहं राममाश्रये ॥ संक्रुद्धः शत्रुविषयेऽतीव क्रोधवान् ॥ १ ॥ कथंवीर्यः कीदृशवीर्यः ॥२॥ येन खरदूषणत्रिशिरःप्रभृतयो राक्षसा निहतास्तादृशं तदीयमायुधं किं किंरूपं । इति परिपप्रच्छेति पूर्वेणान्वयः ॥ ३—४ ॥ रामानुजपरवशहृदयापि तदप्रशक्तमहोन्मादहेतुभूतं रामलावण्यं संग्रहेणाभिधत्ते —दीर्घबाहुरित्यादिना ॥ ५ ॥ कनकाङ्गदं कनकमयपट्टबन्धं ॥ ६ ॥ नाददानमिति अस्त्रादानमोचनविकर्षणानि लक्ष्यन्ते । वेगातिशयेनादानादिकं नपश्यामि किंतु हननमेवेति भावः । अश्मवृष्टिभिः करकामयवर्षैः ॥ ७—९ ॥ अर्धाधिकमुहूर्तेन घटिकाद्वय-

---

ती० विचिन्तयामासेति मारीचस्समरोमास्तितिमूढे इयंमयिनीतु समरप्रोत्साहयति किमत्रकर्तव्यमिति चिन्तयामासेत्यर्थः ॥ ३४ ॥ इतित्रयस्त्रिंशस्सर्गः ॥ ३३ ॥

शि० हेमनोज्ञाङ्गि त्वं केनहेतुनाविरूपिता । तत् त्वंब्रूहि ॥ ३ ॥ स० विकर्षन्तंरामंनपश्यामीत्यस्य " सविशेषणे—" [पा०] १ च. छ. ज. ञ. ट. चिरेण. २ क. ङ. ञ. ट. दृष्ट्वा. च. छ. घोरां. ३ ब. ङ. ट. ब्रुवतीं. ग. वदन्तीं. ४ ख. च. छ. ज. राक्षसः. ५ क. ख. ग. ङ—ट. प्रविष्टश्च. ६ क. ङ. ट. सुदुस्तरं. क. ग. च. छ. ज. ञ. सुदुश्चरं. ७ ङ. ञ. ट. येनतेराक्षसाहताः. ८ ख. दूषणःसैन्येहतस्त्रिशिरसासह. ९ इदमर्धं ङ—ट. पुस्तकेपुदृश्यते. १० क. ग. ङ—ट. यथान्यायं. ११ ख. श्रीमाञ्छत्रुनिबर्हणः. १२ च. छ. ज. कनकाङ्गितं. १३ क. ङ. ट. घोरान्विसृजन्तं. १४ क. ग. ङ—ट. महाबलं. १५ घ. दह्यमानंतुमत्सैन्यं. १६ च. ज. त्वतिवृष्टिभिः. १७ क. ग. ङ. छ—ट. भीमवीर्याणां. १८ ख. स्त्रीशैरामेणाक्लिष्टकर्मणा.

एका कथंचिन्मुक्ताऽहं परिभूय महात्मना ॥ स्त्रीवधं शङ्कमानेन रामेण विदितात्मना ॥ ११ ॥
भ्राता चास्य महातेजा गुणतस्तुल्यविक्रमः ॥ अनुरक्तश्च भक्तश्च लक्ष्मणो नाम वीर्यवान् ॥ १२ ॥
अमर्षी दुर्जयो जेता विक्रान्तो बुद्धिमान्बली ॥ रामस्य दक्षिणो बाहुर्नित्यं प्राणो बहिश्चरः ॥ १३ ॥
रामस्य तु विशालाक्षी पूर्णेन्दुसदृशानना ॥ धर्मपत्नी प्रिया भर्तुर्नित्यं प्रियहिते रता ॥ १४ ॥
सा सुकेशी सुनासोरुः सुरूपा च यशस्विनी ॥ देवतेव वनस्यास्य राजते श्रीरिवापरा ॥ १५ ॥
तप्तकाञ्चनवर्णाभा रक्ततुङ्गनखी शुभा ॥ सीता नाम वरारोहा वैदेही तनुमध्यमा ॥ १६ ॥
नैव देवी न गन्धर्वी न यक्षी न च किन्नरी ॥ नैवंरूपा मया नारी दृष्टपूर्वा महीतले ॥ १७ ॥
यस्य सीता भवेद्भार्या यं च दृष्ट्वा परिष्वजेत् ॥ अतिजीवेत्स सर्वेषु लोकेष्वपि पुरंदरात् ॥ १८ ॥
सो सुशीला वपुश्श्लाघ्या रूपेणाप्रतिमा भुवि ॥ तवानुरूपा भार्या स्यात्त्वं च तस्यास्तथा पतिः ॥ १९ ॥
तां तु विस्तीर्णजघनां पीनश्रोणीपयोधराम् ॥ भार्यार्थे च तवानेतुमुद्यताऽहं वरानना ॥
विरूपिताऽस्मि क्रूरेण लक्ष्मणेन भृशं भुज ॥ २० ॥
तां तु दृष्ट्वाऽद्य वैदेहीं पूर्णचन्द्रनिभाननाम् ॥ मन्मथस्य शराणां वै त्वं विधेयो भविष्यसि ॥ २१ ॥

येण । ससैन्यः खरो हत इत्यर्थः ॥ १० ॥ स्त्रीवधं शङ्कमानेन स्त्रीवधोभविष्यतीति शङ्कमानेनेत्यर्थः ॥ ११ ॥ अनुरक्तः अनुरागवान् । भक्तः तत्कार्यभजनशीलः ॥ १२ ॥ दक्षिणो बाहुरित्यनेन सर्वकार्यधुरंधरत्वमुक्तं । प्राणत्वरूपणेन निरतिशयप्रेमास्पदत्वं । अनुरक्त इत्यस्य दृष्टान्तोयमिति न पुनरुक्तिः ॥ १३ ॥ रामस्य प्रिया अस्तीत्यन्वयः ॥ १४ ॥ तां वर्णयति—सेत्यादिना । यशस्विनी उक्तरूपादिमत्त्वकीर्तिमती । वनस्य देवतेव स्थिता श्रीरिव राजते ॥ १५ ॥ तप्तकाञ्चनवर्णाभा तप्तकाञ्चनवर्णतुल्या आभा यस्याः सा । वैदेही विदेहराजेन पुत्रीकृता ॥ १६ ॥ एवंरूपा देवी च न दृष्टपूर्वा गन्धर्वी च न दृष्टपूर्वा यक्षी च न दृष्टपूर्वा किन्नरी च न दृष्टपूर्वा एवंरूपा नारी महीतलेपि न दृष्टपूर्वा इत्यन्वयः । उत्तरार्धे महीतल इत्यनेन पूर्वार्धे स्वर्गलोक इति सिद्धं । देव्यादीनां तत्रैव वाससंभवात् । यद्वा महीतल इति सर्वलोकोपलक्षणं ॥ १७ ॥ परिष्वङ्गं विना भार्यात्वेन स्थिता चेत् सः सर्वेषु लोकेषु सर्वानपि लोकान् । अतिजीवेत् अतीत्य जीवेत् सर्वलोकोत्तीर्णपरमसुखमयजीवन इत्यर्थः । परिष्वङ्गाभावेपि सदा सन्निधानादिसौख्यादिति भावः । भार्यात्वं विनापि यं सकृत् परिष्वजेत् । सः पुरंदरादपि पुरंदरमपि । अतिजीवेत् अतिशय्य जीवेत् ॥ १८ ॥ वपुश्श्लाघ्या वपुषा श्लाघ्या सर्वानवद्याङ्गीत्यर्थः ॥ १९ ॥ विस्तीर्णजघनां विशालजघनां ।

इतिन्यायेनविशेषणेतात्पर्यं ॥ ७ ॥ ति० पूर्वतनंशूलवृत्तंगोपयन्त्याह—एकेति ॥ ११ ॥ शि० तुल्यविक्रमोमहातेजा लक्ष्मणो नामास्यभ्राता गुणतः रामनिष्ठातिसौशील्यादेर्हेतोः अनुरक्तः रामविषयकाल्यनुरागवान् ॥ स० रामगुणसदृशगुणान्तरतीतिगुणात् तेनतुला सास्तीतितत्तुली । सोपिकंकंहतमानित्यतआह—अविक्रमः इदानीमिति ॥ १२ ॥ शि० यथारूपानारी सीता । मयामहीतलेदृष्टपूर्वा दृष्टदर्शनपूर्वयास्सा तथारूपानारी देव्यादिर्न ॥ १७ ॥ ति० यंचदृष्टापरिष्वजेत् सएवसर्वेषुकालेषुलोकेषुच पुरन्दरादप्यधिकजीवेत् । तस्मात्तस्यवतारत्वादितिभावार्थं ॥ १८ ॥ ति० तवानेतुमुद्यताऽहमितिमृषावचोरावणसंतोषार्थं ॥ २० ॥ स० विधेयः अधीनः ॥ २१ ॥

[पा०] १ ख. परिभूता. २ ठ. गुणात्तुल्यविक्रमः. क. ग. गुणतस्तुल्यलक्षणः. ३ ख. पूर्णचन्द्रनिभानना. ४ क. ग. ङ—ट. निलंभर्तुः. घ. मर्तुर्नित्या. ५ ख. काञ्चनोज्ज्वलवर्णाभा. ६ क. ग. ङ—ट. तथारूपा. ७ क. ख. ट. अभिजीवेत्. ८ घ, छ, ज अ. देवेष्विवपुरन्दरः. ख. ग. लोकेष्विवपुरन्दरः. ९ घ. साधुशीला. क. यासुशीला. १० क. ग. च छ. ज. ञ. णाप्रतिदर्शना. ११ क. ग. ङ—ट. भार्यासत्वं. ख. भार्यार्थेत्वं. १२ ङ. ञ. ट. चतस्याःपतिर्वरः. ग. चैवास्यास्तथापतिः. ख. चतस्याःपतिस्तम. १३ क. ञ. ट. पीनोत्तुङ्गपयोधरां. १४ ग. ङ. छ. ज. ञ. ट. भार्यार्थेतु. घ. भार्यार्थेतु. १५ क. ग. मुद्युक्ताहं. १६ ख. विरूपिताहि. १७ ग. च. छ. ज. महात्मना. १८ ग. तांदृष्ट्वाच. क. ख. तांचदृष्ट्वैव. १९ क. ख. ग. ङ—ट. शराणांच.

यदि तस्यामभिप्रायो भार्यार्थे तव जायते ॥ शीघ्रमुद्ध्रियतां पादो जयार्थमिह दक्षिणः ॥ २२ ॥
कुरु प्रियं तथा तेषां रक्षसां राक्षसेश्वर ॥ वधात्तस्य नृशंसस्य रामस्याश्रमवासिनः ॥ २३ ॥
तं शरैर्निशितैर्हत्वा लक्ष्मणं च महारथम् ॥ हतनाथां सुखं सीतां यथावदुपभोक्ष्यसि ॥ २४ ॥
रोचते यदि ते वाक्यं ममैतद्राक्षसेश्वर ॥ क्रियतां निर्विशङ्केन वचनं मम रावण ॥ २५ ॥
विज्ञायेहात्मशक्तिं च ह्रियतामबला बलात् ॥ सीता सर्वानवद्याङ्गी भार्यार्थे राक्षसेश्वर ॥ २६ ॥
निशम्य रामेण शरैरजिह्मगैर्हतान् जनस्थानगतान्निशाचरान् ॥
खरं च बुद्ध्वा निहतं च दूषणं त्वमत्र कृत्यं प्रतिपत्तुमर्हसि ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

पञ्चत्रिंशः सर्गः ॥ ३५ ॥

रावणेनसीतापहरणनिर्धारणेनरथाधिरोहिणा समुद्रानूपचारिणा मध्येमार्गमप्सरोविमानाद्यद्भुतावलोकिनाचलता पुनस्सागरोत्तरतीरेमारीचाश्रममेत्यतदवलोकनम् ॥ १ ॥

ततः शूर्पणखावाक्यं तच्छ्रुत्वा रोमहर्षणम् ॥ सचिवानभ्यनुज्ञाय कार्यं बुद्ध्वा जगाम सः ॥ १ ॥
तत्कार्यमनुगम्याथ यथावदुपलभ्य च ॥ दोषाणां च गुणानां च संप्रधार्य बलाबलम् ॥ २ ॥

तव चेत्यन्वयः ॥ २०—२४ ॥ ते तुभ्यं । "रुच्यर्थानांप्रीयमाणः" इति चतुर्थी । निर्विशङ्केन त्वयेति शेषः ॥ २५ ॥ आत्मशक्तिं स्वबलं । "शक्तिर्बले प्रभावादौ" इति विश्वः । विज्ञाय पर्यालोच्य । बलात् पौरुषेण । सीता भार्यार्थे ह्रियतां ॥ २६ ॥ उक्तमर्थं सर्गान्ते पुनः संगृह्णाति—निशम्येति । प्रतिपत्तुं ज्ञातुं ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुस्त्रिंशः सर्गः ॥ ३४ ॥

यद्वाहनस्य माहात्म्यं सर्वेषां विस्मयावहम् । अवतीर्णं रघोर्वंशे तमहं विष्णुमाश्रये ॥ रोमहर्षणं भयोत्पादकत्वेन रोमाञ्चकरं । सचिवमुखेन कार्यं बुद्ध्वा तानभ्यनुज्ञाय विसृज्य ॥ १ ॥ तदित्यादिश्लोकद्वयमेकान्वयं । अनुगम्य स्वयमनुसंधाय पर्यालोच्येत्यर्थः । यथावदुपलभ्य इदमित्थमिति निश्चित्य । पुनरपि दार्ढ्याय गुणदोषप्राबल्यदौर्बल्यविषयचिन्तां निर्णयान्तां दर्शयति—दोषाणां चेति । इदमत्र संप्रधार्य स्वेन चिकीर्षितं सीतापहारलक्षणं कार्यं किं पौरुषेण सुकरं आहोस्विच्चौर्येण कर्तव्यमिति । कतरस्मिन्पक्षे दोषाल्पत्वं गुणभूयस्त्वमिति । तत्रपौरुषेण कर्तुमशक्यं । खरादियुद्धे रामस्याचिन्त्यपराक्रमत्वेन श्रुतत्वात् । उपायपरिकल्पितचौर्याश्रयणेतादात्विकदोषा न लक्ष्यन्ते । सीतारहितेनतद्व्यसनिना रामेण कापि हानिर्न संभाव्यते । तस्मादयमेव पक्षः सम्यगित्येवं निश्चित्य प्रावर्ततेत्यर्थः । स्थिरबुद्धिः निश्चलबुद्धिः ।

स० भार्यात्वे भार्यात्वेनादाने । ति० भार्यात्वे भार्यात्वेनसंपादने ॥ २२ ॥ ति० एषां रामादीनां । अशक्तिं । तेषां राज्याद्यभावात् । चकारात्तवशक्तिंच । विज्ञाय सीतातवभार्यात्वेक्रियतां । भार्यात्वे तद्व्यवहारेयथाविषयोभवति तथाक्रियतां यत्यतामित्यर्थः ॥ २६ ॥ इतिचतुस्त्रिंशस्सर्गः ॥ ३४ ॥

ती० शूर्पं शोणितभाजनं तेनयज्ञादिसत्क्रियां नखयति विदूषयतीति शूर्पणखा । नखविदूषणइतिधातुः ॥ ति० शूर्पणखावाक्यस्य कामविकारजनकतयारोमाञ्चकरत्वं ॥ १ ॥ ति० तत्कार्यं सीतापहरकार्यं । अन्तः चित्ते । अनुगम्य उद्दिश्य ॥ २ ॥

[पा०] १ ङ. झ. ट. भार्यात्वे. २ ख. जृंभते. ३ २३—२४ एतच्छ्लोकद्वयं. झ. ट. पुस्तकयोर्नदृश्यते. ४ च. छ. ज. ञ. रामस्यवनवासिनः. ५ ग. महाबलं. ६ ख. सीतामानीयलङ्कात्वंयथावदुपसेवसे. ७ क. ग. घ. च. छ. ज. ञ. भोक्ष्यसे. ८ ङ. झ. ट. विज्ञायैषामशक्तिं. ख. विचार्येहात्म. ९ ङ. झ. ट. क्रियतांचमहाबल. १० क—ट. तवानवद्याङ्गी. ११ ख. ङ. झ. ट. भार्यात्वे. १२ ग. राक्षसाधिप. १३ ङ. झ. ट. दृष्ट्वा. १४ क. ख. ङ—ट. त्वमद्य. १५ ख. राक्षसाधिप. १६ ग. ङ. कार्यबुद्ध्या. १७ क—च. ञ. ट. जगामह. १८ क. मुपगम्याथ. ङ. झ. ट. मनुगम्यान्तर्यथा.

इतिकर्तव्यमित्येव कृत्वा निश्चयमात्मनः ॥ स्थिरबुद्धिस्ततो रम्यां यानशालां जगाम ह ॥ ३ ॥
यानशालां ततो गत्वा प्रच्छन्नो राक्षसाधिपः ॥ शूतं संचोदयामास रथः संयोज्यतामिति ॥ ४ ॥
एवमुक्तः क्षणेनैव सारथिर्लघुविक्रमः ॥ रथं संयोजयामास तस्याभिमतमुत्तमम् ॥ ५ ॥
काञ्चनं रथमास्थाय कामगं रत्नभूषितम् ॥ पिशाचवदनैर्युक्तं खरैः काञ्चनभूषणैः ॥ ६ ॥
मेघप्रतिमनादेन स तेन धनदानुजः ॥ राक्षसाधिपतिः श्रीमान्ययौ नदनदीपतिम् ॥ ७ ॥
स श्वेतवालव्यजनः श्वेतच्छत्रो दशाननः ॥ स्निग्धवैदूर्यसंकाशस्तप्तकाञ्चनकुण्डलः ॥ ८ ॥
विंशद्भुजो दशग्रीवो दर्शनीयपरिच्छदः ॥ त्रिदशारिर्मुनिन्द्रघ्नो दशशीर्ष इवाद्रिराट् ॥ ९ ॥
कामगं रथमास्थाय शुशुभे रोषसेश्वरः ॥ विद्युन्मण्डलवान्मेघः सबलाक इवाम्बरे ॥ १० ॥
सशैलं सागरानूपं वीर्यवानवलोकयन् ॥ नानापुष्पफलैर्वृक्षैरनुकीर्णं सहस्रशः ॥ ११ ॥
शीतमङ्गलतोयाभिः पद्मिनीभिः समन्ततः ॥ विशालैराश्रमपदैर्वेदिमद्भिः समावृतम् ॥ १२ ॥
कदल्याढकिसंबाधं नालिकेरोपशोभितम् ॥ सालैस्तालैस्तमालैश्च पुष्पितैस्तरुभिर्वृतम् ॥ १३ ॥
नागैः सुपर्णैर्गन्धर्वैः किन्नरैश्च सहस्रशः ॥ अजैर्वैखानसैर्माषैर्बालखिल्यैर्मरीचिपैः ॥ १४ ॥
अत्यन्तनियताहारैः शोभितं परमर्षिभिः ॥ जितकामैश्च सिद्धैश्च चारणैरुपशोभितम् ॥ १५ ॥
दिव्याभरणमाल्याभिर्दिव्यरूपाभिरावृतम् ॥ क्रीडारतिविधिज्ञाभिरप्सरोभिः सहस्रशः ॥ १६ ॥
सेवितं देवपत्नीभिः श्रीमतीभिः श्रिया वृतम् ॥ देवदानवसङ्घैश्च चरितं त्वमृताशिभिः ॥ १७ ॥

यानशालां अश्वशालां ॥ २—३ ॥ प्रच्छन्न इति प्रकाशश्चेद्वृद्धा मन्दोदर्यादयश्च वारयिष्यन्तीति भावः । यद्वा पौरुषं विहाय चौर्यमार्गाश्रयणं लज्जावहमिति प्रच्छन्नमार्गाश्रयणं । यद्वा तत इत्यादि । सचिवान् तद्वानी सभास्थितान् । विसृज्य स्वयं कार्यं बुद्ध्येत्यर्थः । अतएव सचिवैः पर्यालोचनाभावात्प्रच्छन्न इत्युक्तं । अतएव कुम्भकर्णादिभिरुच्यते । सचिवैरमन्त्रयित्वा कृतस्य कर्मणिदानी प्रतीकार इति । लक्षणं पूर्वमुक्तं ॥ ४—९ ॥ विद्युत्स्थाने आभरणानि । मेघस्थाने रावणः । बलाकास्थाने अलंकृतरथः ॥ १० ॥ सशैलं शैलसहितं । सागरानूपं समुद्रतीरं ॥ ११ ॥ मङ्गलतोयाभिः शुभजलाभिः । पद्मिनीभिरिति समावृतमित्यनुकर्षः ॥ १२ ॥ आढकिः सूपोपयुक्तधान्यलम्बः ॥ १३ ॥ सुपर्णैः गरुडैः । अजैः अयोनिजैः वैखानसैः ब्रह्मनखजैः । "ये नखास्ते वैखानसाः" इति श्रुतेः । माषैः माषगोत्रजैः । बालखिल्यैः ब्रह्मबालजैः । "ये बालास्ते बालखिल्याः" इति श्रुतेः । मरीचिपैः रविकिरणपानव्रतनिष्ठैः ॥ १४—१६ ॥ अमृताशिभिः देवैरिति शेषः । यद्वा "ऋतामृताभ्यां जीवेत" इत्युक्तायाचितलब्धाशिभिः । "ऋतमुञ्छशिलं

ति० प्रच्छन्नं गूढं ॥४॥ ति० बलाकास्थाने छत्रं ॥ १० ॥ ति० शैलसहितसागरानूपं तत्कूलं । नक्षैर्ववर्णनंनानापुष्पैरित्यादिना ॥ ११ ॥ ति० कदल्यटविः कदलीवनं सेनशोभावत् ॥१३॥ स० आजैः ब्रह्मपुत्रैर्योनिजैः । वैखानसैः अयोनिजब्रह्मपुत्रैः । माषैः तत्संज्ञिकैः । शि० आजैः अजसमब्रह्मणदमे तैः । किंच शरीरसंबन्धेनोत्पत्तिरहितैः मानसैरित्यर्थः । आदीक्षदर्थे । किंच सर्वविद्याऽनेकशरीरधारिभिः । बालखिल्यैः ब्रह्मकेशजैः । तथाचश्रुतिः "येवालास्तेबालखिल्याः" इति ॥१४॥ स० जितकामैः

[पा०] १ च. छ. ज. ञ. शालामुपागमत्. २ क. ग—ट. प्रच्छन्नं. ३ क. ख. ग. ङ—ट. संयुज्यतामिति. ४ ख. घ. संचोदयामास. ५ क. ग. ङ. छ. झ. ट. कनकभूषणं . ख. शीघ्रवैखदा. ६ क. ङ—ट. भूषणः. ७ च. छ. ज. ञ. दशास्योविंशतिभुजो. क. ख. दशग्रीवोविंशतिभुजो. ८ ख. च. छ. ज. ञ. दशशुङ्गः. ९ क—ट. राक्षसाधिपः. १० च. छ. ज. ञ. वेदिमद्भिर्विराजितं. ङ. झ. ट. वेदिमद्भिरलंकृतं. ११ ङ. झ. ञ. ट. कदल्यटविसंशोभं ग. कदल्यटविसंबाधं. घ. कदलीवनसंबाधं. १२ क. ख. घ. ङ. झ. ट. तरुभिश्चसुपुष्पितैः. १३ नागैःसुपर्णैः. अजैर्वैखानसैः. अत्यन्तनियताहारैः. जितकामैश्चेत्यपीनि क—ट. पुस्तकेषु. अत्यन्तनियताहारैः. नागैस्सुपर्णैः. जितकामैश्च. अजैर्वैखानसैः इतिक्रमभेदेनदृश्यन्ते. १४ ग. ङ. झ. ट. चारणैश्चोप. १५ क. च. छ. ज. ञ. विधिरसज्ञाभिः. ङ. झ. रतविधिज्ञाभिः. ट. रसविधिज्ञाभिः. १६ क. ख. श्रीमतीभिस्समावृतं. ङ. झ. ट. श्रीमतीभिरुपासितं.

हंसक्रौञ्चप्लवाकीर्णं सारसैः संप्रणादितम् ॥ वैडूर्यप्रस्तरं रम्यं स्निग्धं सागरतेजसा ॥ १८ ॥
पाण्डराणि विशालानि दिव्यमाल्ययुतानि च ॥ तूर्यगीताभिजुष्टानि विमानानि समन्ततः ॥१९॥
तपसा जितलोकानां कामगान्यभिसंपतन् ॥ गन्धर्वाप्सरसश्चैव ददर्श धनदानुजः ॥ २० ॥
निर्यासरसमूलानां चन्दनानां सहस्रशः ॥ वनानि पश्यन्सौम्यानि घ्राणदृष्टिकराणि च ॥ २१ ॥
अंगरूणां च मुख्यानां वनान्युपवनानि च ॥ तक्कोलानां च जात्यानां फैलानां च सुगन्धिनाम् ॥२२॥
पुष्पाणि च तमालस्य गुल्मानि मरिचस्य च ॥ मुक्तानां च समूहानि शुष्यमाणानि तीरतः ॥२३॥
शंङ्खानां प्रस्तरं चैव प्रवालनिचयं तथा ॥ काञ्चनानि च शैलानि राजतानि च सर्वशः ॥ २४ ॥
प्रस्रवाणि मनोज्ञानि प्रसन्नानि ह्रदानि च ॥ घनघान्योपपन्नानि स्त्रीरत्नैः शोभितानि च ॥२५॥
हस्त्यश्वरथगाढानि नगराण्यवलोकयन् ॥ तं समं सर्वतः स्निग्धं मृदुसंस्पर्शमारुतम् ॥
अनूपं सिन्धुराजस्य ददर्श त्रिदिवोपमम् ॥ २६ ॥
तत्रापश्यत्स मेघाभं न्यग्रोधमृषिभिर्वृतम् ॥ समन्ताद्यस्य ताः शाखाः शतयोजनमायताः ॥ २७॥
यस्य हस्तिनमादाय महाकायं च कच्छपम् ॥ भक्षार्थं गरुडः शाखामाजगाम महाबलः ॥ २८ ॥
तस्य तां सहसा शाखां भारेण पतगोत्तमः ॥ सुपर्णः पर्णबहुलां बभञ्ज च महाबलः ॥ २९ ॥
तत्र वैखानसा मापा बालखिल्या मरीचिपाः ॥ अजा बभूवुर्धूम्राश्च संगताः परमर्षयः ॥ ३० ॥

प्रोक्तमृतं स्यादयाचितं" इति मनुः ॥ १७ ॥ प्लवाः जलकुक्कुटाः । मण्डूका इत्यप्याहुः । वैडूर्यप्रस्तरं वैडूर्यमयाः प्रस्तराः शिलाः यस्मिन् तं । "पाषाणप्रस्तरप्रावोपलाश्मानः शिलादृषत्" इत्यमरः ॥ १८ ॥ तपसा जितलोकानां पुरुषाणां विमानानीत्यन्वयः । अभिसंपतन् मार्गवशात् प्राप्नुवन् । सशैलं नानापुष्पफलैर्वृक्षैरनुकीर्णमित्यारभ्य सागरतेजसा स्निग्धमित्यन्तविशेषणविशिष्टं सागरानूपमवलोकयन् पाण्डुरस्त्रादिविशेषणविशिष्टानि तपसाजितलोकानांविमानान्यभिसंपतन् गन्धर्वाप्सरसो ददर्शेत्यन्वयः ॥ १९—२० ॥ निर्यासरसमूलानामित्यादिसार्धश्लोकषट्कमेकान्वयं । निर्यासरसमूलानां हिङ्गुरूपनिर्यासरसयुक्तमूलानां मूलाख्यौषधीविशेषाणां । मूलाख्यौषधीमूलाद्धिङ्गुरूपनिर्यासा उत्पद्यन्त इति प्रसिद्धिः । वनानि अकृत्रिमाणि । उपवनानि कृत्रिमाणि । तक्कोलानां गन्धद्रव्याणां । जात्यानां जातिभवानां । फलानां जातिफलानामित्यर्थः । सुगन्धिनां उपवनानीत्यन्वयः । गुल्मानि स्तम्बान् । मरिचस्य मरीचस्य । समूहानीति नपुंसकत्वमार्षं । शुष्यमाणानि चिरसङ्गतत्वेनानार्द्रीणीत्यर्थः । तीरतः तीरे । शैलानीति नपुंसकत्वमार्षं । तथा प्रस्रवह्रदशब्दयोः । प्रस्तरं समूहं । निचयं समूहं । प्रस्रवाणि प्रस्रवणानि निर्झरानित्यर्थः । गाढानि निबिडानि । एवं बहुधा सागरानूपवर्णनं पुनर्बहुदूरमार्गगमनप्रयासेनमारीचोपदेशानिवर्त्याध्यवसायविशेषं व्यञ्जयितुं ॥ २१—२६ ॥ यस्य बाहुनप्रभावोप्यपरिच्छेद्यत्वेन रामेण विरुणद्धि रावणो मूढ इति परिहसन्नाह—तत्रापश्यदित्यादिना । ताः प्रसिद्धाः ॥ २७ ॥ गरुडः महाकायं महाप्रमाणं । हस्तिनं गजं । कच्छपं चादाय यस्य शाखामाजगामेत्यन्वयः ॥ २८ ॥ भारेण बभञ्ज नतु यत्नेनेत्यर्थः । महागजकच्छपवहनात् भारेण शाखा भग्नाभूदित्यर्थः ॥ २९ ॥ तत्र शाखाया अधःप्रदेशे ये सङ्गताः मरी-

---

प्रामनोरथैः पराजितमन्मथैर्वा ॥ १५ ॥ ति० सागरतेजसा सागरोर्मिवेगवेन । स्निग्धं स्नान्द्रशीतलं ॥ १८ ॥ स० शोभनश्वासौगन्धश्च सोस्त्रियेषांतेषां ॥ २२ ॥ ति० शैलानि शिलासमूहान् ॥ २४ ॥ ति० समं समभूतलंदेशं ॥ २६ ॥

[पा०] १ क. ख. ट. प्रसादितं. २ च. छ. ज. ञ. दिव्यं. क. ख. ट. स्निग्धंसान्द्रं. ३ क. पुष्पानि. ४ च. छ. ज. ञ. ट. अंकोलानांच. ५ च. छ. ज. ञ. पलाशानां. ६ ख. मलयस्यच. ७ क. ख. ट. शैलानिप्रवरांश्चैवप्रवालनिचयांस्तथा. ८ च. प्रकरं. ९ क. ट. शुभ्राणि. १० क. ख. ट. सर्वेचव. घ. सहस्रशः. ११ च—ञ. प्रसन्नान्यद्भुतानिच. १२ क. ख. ग. ङ—ट. रत्नैराकुलानिच. १३ क. ख, ट. नगरान्यविलोकयन्. १४ ख. अनूपे. १५ ङ—ट. न्यग्रोधंमुनिभिः. १६ क. ख, ङ. च. ञ. ञ. ट. बभञ्जाथ.

तेषां दयार्थं गरुडस्तौ शाखां शतयोजनाम् ॥ जग्राहादाय वेगेन तौ चोभौ गजकच्छपौ ॥
एकपादेन धर्मात्मा भक्षयित्वा तदामिषम् ॥ ३१ ॥
निषादविषयं हत्वा शाखया पतगोत्तमः ॥ प्रहर्षमतुलं लेभे मोक्षयित्वा महामुनीन् ॥
[शाखानिपातभीतांश्च शाखां चोत्सृज्य सर्ववित् ॥ ३२ ॥]
स तेनैव प्रहर्षेण द्विगुणीकृतविक्रमः ॥ अमृतानयनार्थं वै चकार मतिमान्मतिम् ॥ ३३ ॥
अयोजालानि निर्मथ्य भित्त्वा रत्नमयं गृहम् ॥ महेन्द्रभवनाद्गुप्तमाजहारामृतं ततः ॥ ३४ ॥
तं महर्षिगणैर्जुष्टं सुपर्णकृतलक्षणम् ॥ न्यग्रोधं ददृशे घनदानुजः ॥ ३५ ॥
तं तु गत्वा परं पारं समुद्रस्य नदीपतेः ॥ ददर्शाश्रममेकान्ते रम्ये पुण्ये वनान्तरे ॥ ३६ ॥
तत्र कृष्णाजिनधरं जटावल्कलधारिणम् ॥ ददर्श नियताहारं मारीचं नाम राक्षसम् ॥ ३७ ॥
स रावणः समागम्य विधिवत्तेन रक्षसा ॥ मारीचेनार्चितो राजा सर्वकामैरमानुषैः ॥ ३८ ॥
तं स्वयं पूजयित्वा तु भोजनेनोदकेन च ॥ अर्थोपहितया वाचा मारीचो वाक्यमब्रवीत् ॥ ३९ ॥
कच्चित्सुकुशलं राजञ्छङ्कायां राक्षसेश्वर ॥ केनार्थेन पुनस्त्वं वै तूर्णमेवमिहागतः ॥ ४० ॥
एवमुक्तो महातेजा मारीचेन स रावणः ॥ तं तु पश्चादिदं वाक्यमब्रवीद्वाक्यकोविदः ॥४१॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

चिपाः रविकिरणपानव्रताः । धूम्राः धूमपाः । तेषां दयार्थं शाखापातेन पीडा माभूदिति तदनुग्रहार्थमित्यर्थः । एकपादेन आदाय अवष्टभ्येत्यर्थः । भक्षयित्वा आकाश एवेति शेषः । आमिषं गजकच्छपरूपं मांसं ॥ ३०—३१ ॥ निषादविषयं निषादग्रामं । शाखया हत्वा तानपि भक्षयित्वा । महामुनीन् वैखानसादीन् निषादविषयस्थब्राह्मणान्वा निषादैः पीड्यमानान्वा । तद्रक्षणार्थमेव तद्भक्षणमिति भावः । तादृशशाखारूपप्रहरणलाभेन तदैव मुनिबाधकनिषादवधेन सर्वं हत्वा शिष्टपालनाद्दुष्टनिग्रहाच्चातुलं प्रहर्षं लेभ इति भावः ॥ ३२ ॥ तेनैव भक्षणजन्येनेत्यर्थः ॥ ३३ ॥ अयोजालानि अयोनिर्मितजालकानि । निर्मथ्य ध्वंसयित्वा । तदन्तर्वर्तिरत्नमयं गृहं भित्त्वा ततः तदन्तरे गुप्तममृतं महेन्द्रभवनादाजहार ॥३४॥ सुपर्णकृतलक्षणं सुपर्णेन गरुडेन कृतं भग्नैकशाखत्वरूपं लक्षणं चिह्नं यस्य ॥ ३५—३६ ॥ कृष्णाजिनेत्यादिना रामभक्तत्वया जनितवैराग्यचिह्नोक्तिः ॥३७॥ समागम्य मारीचं प्राप्य सर्वकामैः सर्वभोग्यवस्तुभिः । अर्चितो बभूव ॥ ३८—३९ ॥ एवं तूर्णं एकाकितया शीघ्रं ॥ ४० ॥ इदं उत्तरसर्गे वक्ष्यमाणं ॥ ४१ ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ॥ ३५ ॥

शी० अयोजालानि अयस्पञ्जरनिर्मितानिजालानि रत्नमयगेहोपरिपक्षिराजप्रवेशपरिहारायबद्धानि निर्मथ्य ॥ ३४ ॥ इतिपञ्चत्रिंशस्सर्गः ॥ ३५ ॥

[पा०] १ ङ. ञ. ट. भ्रमामादाय. २ क. पतगाधिपः. ३ ख. तदामुनीन्. ४ इदमर्धं ख. पाठेदृश्यते. ५ क. ञ. ट. सहुतेन. ६ ग. ञ. गमनेमति. ७ ग. अयोजालंतु. क. अयोजालैर्विनिर्मथ्य. ८ ङ. छ—ट. रत्नगृहंवरं. ख. रत्नगृहं महत्. ९ क. ग. ङ—ट. पुण्येरम्ये. १० ङ—ट. जटामण्डल. ११ ख. रावणस्सहसागम्य. घ. राक्षणस्तं. १२ ङ. ञ. ट. पूजयित्वाच. १३ क. ग. भोजनेनासनेनच. १४ घ. बुध्या. १५ क. ञ. ट. कच्चित्तेकुशलं. घ. कच्चित्सुकुशली. १६ च. छ. ज. केनैवचार्थजातेन. ख. केनचैवार्थजातेन. १७ ख. च. छ. ज. तूर्णमेवत्वमागतः. ङ. ञ. ण. ट. तूर्णमेवहागतः. १८ क. ग. ङ—ट. ततःपश्चात्.

षट्त्रिंशः सर्गः ॥ ३६ ॥

रावणेनमारीचंप्रतिपुनर्जनस्थानवृत्तान्तकथनपूर्वकंस्वचिकीर्षितसीतापहरणेसाहाय्यप्रकारनिवेदनेनतत्करणप्रार्थना ॥ १ ॥ रामवार्ताश्रवणमात्रेणत्रस्तविषण्णचेतसामारीचेनरावणायहितोपदेशसमुद्यमः ॥ २ ॥

मारीच श्रूयतां तात वचनं मम भाषतः ॥ आर्तोस्मि मम चार्तस्य भवान्हि परमा गतिः ॥ १ ॥
जानीषे त्वं जनस्थाने यथा भ्राता खरो मम ॥ दूषणश्च महाबाहुः स्वसा शूर्पणखा च मे ॥ २ ॥
त्रिशिराश्च महातेजा राक्षसः पिशिताशनः ॥ अन्ये च बहवः शूरा लब्धलक्षा निशाचराः ॥ ३ ॥
वसन्ति मन्नियोगेन नित्यवासं च राक्षसाः ॥ बाधमाना महारण्ये मुनीन्वै धर्मचारिणः ॥ ४ ॥
चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् ॥ शूराणां लब्धलक्षाणां खरचित्तानुवर्तिनाम् ॥ ५ ॥
ते त्विदानीं जनस्थाने वसमाना महाबलाः ॥ संगताः परमायत्ता रामेण सह संयुगे ॥
नानाप्रहरणोपेताः खरप्रमुखराक्षसाः ॥ ६ ॥
तेन संजातरोषेण रामेण रणमूर्धनि ॥ अनुक्त्वा परुषं किंचिच्छरैर्व्यापारितं धनुः ॥ ७ ॥
चतुर्दश सहस्राणि रक्षसामुग्रतेजसाम् ॥ निहतानि शरैस्तीक्ष्णैर्मानुषेण पदातिना ॥ ८ ॥
खरश्च निहतः संख्ये दूषणश्च निपातितः ॥ हतश्च त्रिशिराश्चापि निर्भया दण्डकाः कृताः ॥ ९ ॥
पित्रा निरस्तः क्रुद्धेन सभार्यः क्षीणजीवितः ॥ स हन्ता तस्य सैन्यस्य रामः क्षत्रियपांसनः ॥१०॥
दुःशीलः कर्कशस्तीक्ष्णो मूर्खो लुब्धोऽजितेन्द्रियः ॥ त्यक्तधर्मो ह्यधर्मात्मा भूतानामहिते रतः॥११॥

महासमरमध्येपि गाम्भीर्यं यस्य निश्चलम् । तमहं शिरसा वन्दे जानकीप्राणवल्लभम् ॥ भाषतः भाषमाणस्य ॥ १ ॥ कर्तव्यं वक्ष्यन्पूर्ववृत्तं स्मारयति—जानीष इत्यादिना । अनुवर्तिनामित्यन्तमेकं वाक्यं । खरादयश्चतुर्दशसहस्रराक्षसान्ताः जनस्थाने नित्यवासं यथा तथा वसन्तीति जानीष इत्यन्वयः । रतिवासमिति पाठे रत्या प्रीत्या वासो यस्मिन्कर्मणि तत्तथा ॥ २—५ ॥ वसमानाः ताच्छील्ये शानच् । संयुगे रामेण सह संगताः रामेण सह युद्धमकुर्वन्नित्यर्थः । परं अत्यन्तं । आयत्ताः सन्नद्धाः । प्रहरणं आयुधं ॥६॥ अनुक्त्वा परुषंकिंचिदित्यनेन गाम्भीर्यं विवक्ष्यते । व्यापारितं संधानमोक्षणव्यापारविशिष्टं कृतं ॥७—८॥ संख्ये युद्धे । "युद्धमायोधनं इत्यारभ्य मृधमास्कन्दनं संख्यं" इत्यमरः ॥ ९—१० ॥ कर्कशः कठिनहृदयः

ति०तातेत्युपलालने ॥ १ ॥ ति० जानीषइति भ्रात्रादयो मन्नियोगाज्जनस्थानंप्राप्यवसन्तीति त्वंजानीषेकिलेत्यन्वयः ॥२॥ ती० लब्धलक्षाः लब्धावसराः । प्राप्तयुद्धोत्साहाइतियावत् ॥३॥ ति० अथतत्रस्थित्वाक्रियमाणंवृत्तंच जानीषेइत्याह—अधिवासंचेति । मुनीन्बाधमानाः बाधहेतवे । हेतौशानच् । अधिवासंचकुर्वन्ति । मन्नियोगादितिशेषः । कतक० । अधिवासः उपद्रवः ॥४॥ स० वसमानाः । आर्षश्शानच् । व समानाइतिपदद्वयंवा । ममसमानाः सदृशाः मानेन मत्कृतमानेन सहितावा ॥ ६ ॥ ती० वस्तुतस्तु क्रुद्धेनपित्रानिरस्तः निष्कासितः किं । किंतु कैकेयीवरदानमोहितेनपित्राप्रार्थितस्सन्वनमागतः । सभार्यः सभायामार्यः सभ्यः । क्षीणजीवितःकिं । किंतु तस्यखरस्यसैन्यस्यसंहर्ता । कुतः क्षत्रियपांसनः क्षत्रियान्पातीतिक्षत्रियपः । सचासावंसनश्च शत्रुनाशकः अंससमाघातइतिधातुः । अतएव अशीलःकिं किंतुसद्वृत्तः । तथापि कर्कशः कठिनः । शत्रुविषयइतिशेषः । तीक्ष्णः कार्येष्वनलसः । अतएव अमूर्खः अलुब्धः । जितेन्द्रियइतिच्छेदः । त्यक्तधर्मः त्यक्ताः विरुद्धाः धर्मायेनेति मध्यमपदलोपिसमासः । अतएवाधर्मात्माकिं किंतु धार्मिकएव । अतएव भूतानामहिते अरतः सर्वभूतदयापरइत्यर्थः ॥ १०—११ ॥

[पा०] १ ग. वत्स. २ क—ङ. झ. ञ. ट. जनस्थानं. ३ क—ट. भ्रातायत्र. ४ ङ.—ट. महाबाहूराक्षसः. ५ ग. महाबलाः. ६ ग. ङ. झ. ञ. ट. अधिवासंच. ख. तन्निवासंच. क. च. कृतवासाश्च. घ. निवासंचैव. छ. ज. रतिवासाश्च. ७ ङ. झ. ट. मुनीन्ये. क. ग. मुनींस्तान्धर्मं. ८ ख. वर्तमानाः. ९ ख. संयताः. १० ङ. झ. ट. शस्त्रप्रहरणाः. ११ ख. रक्षसांभीमकर्मणां. १२ क. ग. ङ—ज. ट. शरैर्दीप्तैः. १३ ग. महाबलः. १४ च. छ. ज. ञ. हत्वात्रिशिरसंचैव. क. ख. ग. ङ. झ. ट. हत्वात्रिशिरसंचापि. १५ क. ङ—ट. अशीलः. १६ ख. घ. त्यक्त्वाधर्ममधर्मात्मा. ङ. झ. ट. त्यक्तधर्मा त्वधर्मात्मा. क. च. छ. ज. ञ. त्यक्तधर्मस्त्वधर्मात्मा.

येन वैरं विनाऽरण्ये सत्त्वमाश्रित्य केवलम् ॥ कर्णनासापहरणाद्भगिनी मे विरूपिता ॥ १२ ॥
तस्य भार्यां जनस्थानात्सीतां सुरसुतोपमाम् ॥ आनयिष्यामि विक्रम्य सहायस्तत्र मे भव ॥ १३ ॥
त्वया ह्यहं सहायेन पार्श्वस्थेन महाबल ॥ भ्रातृभिश्च सुरान्युद्धे समग्रान्नाभिचिन्तये ॥ १४ ॥
तत्सहायो भव त्वं मे समर्थो ह्यसि राक्षस ॥ वीर्ये युद्धे च दर्पे च न ह्यस्ति सदृशस्तव ॥ १५ ॥
उपायज्ञो महाञ्शूरः सर्वमायाविशारदः ॥ एतदर्थमहं प्राप्तस्त्वत्समीपं निशाचर ॥ १६ ॥
शृणु तत्कर्म साहाय्ये यत्कार्यं वचनान्मम ॥ १७ ॥
सौवर्णस्त्वं मृगो भूत्वा चित्रो रजतबिन्दुभिः ॥ आश्रमे तस्य रामस्य सीतायाः प्रमुखे चर ॥१८॥
त्वां तु निःसंशयं सीता दृष्ट्वा तु मृगरूपिणम् ॥ गृह्यतामिति भर्तारं लक्ष्मणं चाभिधास्यति ॥१९॥
ततस्तयोरपाये तु शून्ये सीतां यथासुखम् ॥ निराबाधो हरिष्यामि राहुश्चन्द्रप्रभामिव ॥ २० ॥
ततः पश्चात्सुखं रामे भार्याहरणकर्शिते ॥ विस्रब्धः प्रहरिष्यामि कृतार्थेनान्तरात्मना ॥ २१ ॥
तस्य रामकथां श्रुत्वा मारीचस्य महात्मनः ॥ शुष्कं समभवद्वक्त्रं परित्रस्तो बभूव सः ॥ २२ ॥
ओष्ठौ परिलिहञ्शुष्कौ नेत्रैरनिमिषैरिव ॥ मृतभूत इवार्तस्तु रावणं समुदैक्षत ॥ २३ ॥
स रावणं त्रस्तविषण्णचेता महावने रामपराक्रमज्ञः ॥
कृताञ्जलिस्तत्त्वमुवाच वाक्यं हितं च तस्मै हितमात्मनश्च ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

॥ ११ ॥ सत्त्वं बलं केवलमाश्रित्य नतु धर्ममित्यर्थः । "सत्त्वं बले च जन्तौ च" इति विश्वः । आनयिष्यामि आनेष्यामि इडार्षः ॥ १२—१३ ॥ भ्रातृभिः कुम्भकर्णादिभिः । समग्रान् संपूर्णान् । नाभिचिन्तये न गणयामि ॥ १४—१६ ॥ शृणुतत्कर्मेत्यत्र तदिति भिन्नं पदं । प्रकृते कार्यसाहाय्येयत्कर्म कार्यं कर्तव्यं । तन्मम वचनाच्छृण्विति संबन्धः ॥ १७ ॥ प्रमुखे अग्रे ॥ १८ ॥ गृह्यतामिति अयमिति शेषः ॥ १९ ॥ तयोः रामलक्ष्मणयोः । अपाये अपगमे सति शून्ये प्रदेशे । निराबाधः अप्रतिबन्धः ॥ २० ॥ विस्रब्धः निःशङ्कः । अन्तरात्मना अन्तस्थधैर्येण ॥ २१ ॥ सः मारीचः । रामकथां श्रुत्वा परित्रस्तो बभूव । तेन त्रासेन तस्य वक्त्रं शुष्कं समभवदित्यन्वयः ॥ २२ ॥ भयकार्यान्तरमाह—ओष्ठाविति । शुष्कौ ओष्ठौ परिलिहन् सः अनिमिषैः निमेषरहितैः । नेत्रैः नेत्रव्यापारैः । मृतभूत इव मृतजन्तुरिवार्तः सन् रावणं समुदैक्षत ॥ २३ ॥ उत्तरसर्गार्थं संगृह्णाति—स इति । त्रस्तविषण्णचेताः भीतदुःखितमनाः । तत्र हेतुः—

स० क्षीणजीवितः मत्संगमनावधिकत्वात्तज्जीवनक्षयस्येतिभावः । ति० अथभगिनीवैरूप्यंनिष्कारणंमन्यमानःक्रोधाद्दूषयतिरामं—पित्रेत्यादिना । क्षीणजीवितः निरपराधंस्त्रीवैरूप्यकरणादेवतथात्वंमन्यते । ती० वस्तुतस्तु सनत्कुमारवचनाद्विष्णुरूपश्रीरामाद्वधंप्राप्यतत्पदंप्राप्तुं तस्यभार्यामानयिष्यामि नतुद्रोहबुद्ध्येतिभावः ॥ ति० अतएवाशीलोऽजितेन्द्रियश्च । अस्थानेक्रोधात् ॥ ११ ॥ ति० उपायतः उपायेष्वित्यर्थः ॥ १६ ॥ ती० वस्तुतस्तु रामेभार्याहरणकर्शिते रामएवेभः रामेभस्य आर्यासीता तस्याआहरणं तेनहेतुना कर्शिते नाशितेसति । रामेणमच्छरीरे इतिशेषः । ततः कृतार्थेनान्तरात्मना उपलक्षितस्सन् पश्चाद्विस्रब्धं निष्कलङ्कं । सुखं परमानन्दसुखं मोक्षमितियावत् । प्रहरिष्यामि प्रकर्षेणाहरिष्यामि प्राप्स्यामीत्यर्थः । इदमात्मगतं ॥२१॥ ती० मृतभूतइव मृतसदृशः । नेत्रैः नेत्रव्यापारैः । अन्यथाबहुवचनायोगात् । स० भयेनपुनःपुनःपरिभ्रमणाद्बहुवचनं नेत्रैरिति । यद्वा अनिमिषैर्नेत्रैरुपलक्षितंरावणं समुदैक्षतेत्यध्याहारेणान्वयः ॥ २३ ॥ इतिषट्त्रिंशस्सर्गः ॥ ३६ ॥

[पा०] १ ङ. झ. ट. मास्थाय. २ ङ—ट. नासापहारेणभगिनी. ३ ङ. झ. ट. अस्य. ४ क. यिष्याम्यतिक्रम्य. ५ ट. सह. ६ ङ. ट. सुरान्सर्वान्नाहमत्रानुचिन्तये. झ. सुरान्सर्वान्नाहमत्राभिचिन्तये. ख. सुरान्सर्वान्समग्रान्. ७ ख. दर्पेचयुद्धेच. ८ झ. ञ. ट. उपायतो. ९ घ. ङ. ञ. ट. महाशूरः. १० ङ. झ. ञ. ट. महामाया. ख. सर्वशास्त्रविशारदः. ११ च. छ. ज. ञ. त्सकाशं. १२ क. त्वांहि १३ च. छ. ज. ञ. दृष्ट्वासीताच. १४ क. निराबाधं. घ. निरायासो. ग. निरापायो. १५ ङ. झ. ट. विस्रब्धं. १६ क. तस्माद्राम. १७ च. छ. ज. ञ. सराक्षसस्तत्र. क. ख. सरावणंतत्र. १८ ञ. त्रस्तमुवाच.

सप्तत्रिंशः सर्गः ॥ ३७ ॥

मारीचेनरावणंप्रतिसीतारामयोःप्रभावातिशयानुवर्णनपूर्वकंसीताहरणस्यस्वमरणकारणत्वोक्त्यातस्मान्निवृत्तिरूपहितोपदेशः ॥ १ ॥

तच्छ्रुत्वा राक्षसेन्द्रस्य वाक्यं वाक्यविशारदः ॥ प्रत्युवाच महाप्राज्ञो मारीचो राक्षसेश्वरम् ॥ १ ॥
सुलभाः पुरुषा राजन्सततं प्रियवादिनः ॥ अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ २ ॥
न नूनं बुध्यसे रामं महावीर्यं गुणोन्नतम् ॥ अयुक्तचारश्चपलो महेन्द्रवरुणोपमम् ॥ ३ ॥
अपि स्वस्ति भवेत्तात सर्वेषां भुवि रक्षसाम् ॥ अपि रामो न संक्रुद्धः कुर्याल्लोकमराक्षसम् ॥ ४ ॥
अपि ते जीवितान्ताय नोत्पन्ना जनकात्मजा ॥ अपि सीतानिमित्तं च न भवेद्व्यसनं मम ॥ ५ ॥
अपि त्वामीश्वरं प्राप्य कामवृत्तं निरङ्कुशम् ॥ न विनश्येत्पुरी लङ्का त्वया सह सराक्षसा ॥ ६ ॥
त्वद्विधः कामवृत्तो हि दुःशीलः पापमन्त्रितः ॥ आत्मानं स्वजनं राष्ट्रं स राजा हन्ति दुर्मतिः ॥७॥
नैनं च पित्रा परित्यक्तो नामर्यादः कथंचन ॥ न लुब्धो न च दुःशीलो न च क्षत्रियपांसनः ॥८॥
न च धर्मगुणैर्हीनः कौसल्यानन्दिवर्धनः ॥ नैष तीक्ष्णो न च भूतानां सर्वेषामहिते रतः ॥ ९ ॥

रामपराक्रमज्ञइति । पूर्वं दण्डकारण्ये यो रामपराक्रम आसीत् तज्ज्ञ इत्यर्थः । तस्मै रावणाय । हितं अनपायं । "हितयोगे च" इति वार्तिकेन चतुर्थी ॥२४॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षट्त्रिंशः सर्गः ॥ ३६ ॥

सीतापतिस्वसंभूतमप्रमेयं महन्महः । समस्तापायरहितो रामो जयतु मे धनम् ॥ तच्छ्रुत्वेत्यादि ॥ १ ॥ सततं आपत्प्राप्तावपि । प्रियवादिनः स्वामिहिताहितविमर्शमुपेक्ष्य केवलं स्वप्रयोजनाय यथेच्छावादशीलाः । पुरुषाः सुलभाः । राज्ञः अप्रियस्य तु अप्रियस्यापि तत्काले श्रवणकटुतया प्रतीयमानस्यापि । कालान्तरे पथ्यस्य हितस्य शुभोदर्कस्येत्यर्थः । वचनस्य वक्ता भूयः तथाविधवचनस्य श्रोता च पथ्यभक्षणवन्ममेदं हितमिति गृहीता राजा च दुर्लभः । अतो मयोच्यमानमप्रियमिवस्थितमपि परमहितमिति गृहाणेति भावः ॥ २ ॥ पथ्यवचनमेवाह—ननूनमित्यादिना । अयुक्तचारः अनियोजितचारः । चपलतया अयुक्तचारत्वाद्वा तद्वीर्यं सम्यङ्न जानासीत्यर्थः ॥ ३ ॥ अथैव निर्गत्यपुनरागमनान्नूनं मे वचनंश्रोष्यतीतिनिश्चित्य रावणचापलेन संभावितानर्थानाह—अपीत्यादिना । अपिः संभावनायां । काकुस्वरो द्रष्टव्यः । एवमुत्तरवाक्येष्वपि स्वरपर्यवसानेनार्थपरिच्छेदः कार्यः । रक्षसां सजातीयानां । स्वस्ति भवेदपि । आर्षी षष्ठी । अकार्यनिवृत्त्यर्थं सातेति संबोधनं ॥४—५॥ ईश्वरं स्वामिनं । कामवृत्तं यथेच्छव्यापारं । निरङ्कुशं अमर्यादं ॥ ६ ॥ य इत्यध्याहार्यं । पापं दुष्टं मन्त्रितं विचारो यस्य सः ॥ ७ ॥ पित्रा निरस्त इत्यादिनापूर्वं रावणोक्तदूषणानि परिहरति—न चेत्यादिना ॥ ८ ॥ कौसल्यानन्दिवर्धन इति । आनन्दिरानन्दः "सर्व-

---

स० अप्रियस्य तत्कालेतथाऽवभासमानस्य वचसः त्रिकटुकादेश्च वक्तेव मोक्तापिदुर्लभः । ति० भोक्ताऽहितवत्प्रतिभासमानमपीदंपथ्यमेवेतिग्रहीता राजाविवेकीदुर्लभः ॥ २ ॥ स० सर्वेषांरक्षसांस्वस्तीतिवक्ता नस्वस्तिभवतिरक्षोभ्यइत्यभिप्रैति ॥४॥ स० निरङ्कुशंगजमिवविषयमानं निरङ्कुशं निषेधकबुद्धिमत्पुरुषशून्यं ॥ ६ ॥ ति० तैरेष्यामावेहेतुः सर्वभूतहितेरतस्वं

[पा०] १ ङ.—ट. महातेजाः. २ घ. ङ—ट. अप्रियस्यच. ३ ङ. झ. मोक्ताच. ४ च—ञ. वीर्यगुणोन्नतं. ख. घ. वीर्यगुणान्वितं. ५ ङ.—ट. सर्वेषामपि. क. सर्वेषांरक्षसांभुवि. ६ घ. ङ. झ. ट. श्लोकानराक्षसान्. ७ च. छ. ज. ञ. निमित्तंते. ८ क. ग. ङ.—ट. महत्. ९ क. ख. च. छ. ज. यन्त्रितः. १० क. ख. घ. च. छ. ज. ञ. नस. ११ क. घ—ट. नन्दवर्धनः. १२ क. ख. ग. ङ.—झ. ट. नचतीक्ष्णोहिभूतानां. १३ ङ. झ. ट. सर्वभूतहिते. क. ख. ग. च. छ. ज. सर्वेषांचहिते.

वञ्चितं पितरं दृष्ट्वा कैकेय्या सत्यवादिनम् ॥ करिष्यामीति धर्मात्मा तात प्रव्रजितो वनम् ॥ १० ॥
कैकेय्याः प्रियकामार्थं पितुर्दशरथस्य च ॥ हित्वा राज्यं च भोगांश्च प्रविष्टो दण्डकावनम् ॥ ११ ॥
न रामः कर्कशस्तात नाविद्वान्नाजितेन्द्रियः ॥ अनृतं दुःश्रुतं चैव नैवं त्वं वक्तुमर्हसि ॥ १२ ॥
रामो विग्रहवान्धर्मः साधुः सत्यपराक्रमः ॥ राजा सर्वस्य लोकस्य देवानां मघवानिव ॥ १३ ॥
कथं त्वं तस्य वैदेहीं रक्षितां स्वेन तेजसा ॥ इच्छसि प्रसभं हर्तुं प्रभामिव विवस्वतः ॥ १४ ॥
शरार्चिषमनाधृष्यं चापखड्गेन्धनं रणे ॥ रामाग्निं सहसा दीप्तं न प्रवेष्टुं त्वमर्हसि ॥ १५ ॥
धनुर्व्यादितदीप्तास्यं शरार्चिषममर्षणम् ॥ चापपाशधरं वीरं शत्रुसैन्यप्रहारिणम् ॥ १६ ॥
राज्यं सुखं च संत्यज्य जीवितं चेष्टमात्मनः ॥ नात्यासादयितुं तात रामान्तकमिहार्हसि ॥ १७ ॥
अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा ॥ न त्वं समर्थस्तां हर्तुं रामचापाश्रयां वने ॥ १८ ॥
तेजसा सा नरसिंहस्य सिंहोरस्कस्य भामिनी ॥ प्राणेभ्योपि प्रियतरा भार्या नित्यमनुव्रता ॥ १९ ॥
न सा धर्षयितुं शक्या मैथिलेयोजस्विनः प्रिया ॥ दीप्तस्येव हुताशस्य शिखा सीता सुमध्यमा ॥ २० ॥
किमिदं व्यर्थमिमं व्यर्थं कृत्वा ते राक्षसाधिप ॥ दृष्टश्चेत्त्वं रणे तेन तदन्तं तव जीवितम् ॥ २१ ॥
जीवितं च सुखं चैव राज्यं चैव सुदुर्लभम् ॥ यदीच्छसि चिरं भोक्तुं मा कृथा रामविप्रियम् ॥ २२ ॥

धातुभ्य इन्' इति इन् ॥ ९ ॥ कैकेय्या वञ्चितं पितरं दृष्ट्वा तं सत्यवादिनं करिष्यामीति स्वयं प्रव्रजितः गतः । तातेति सान्त्वोक्तिः ॥ १० ॥ वनगमने हेत्वन्तरमाह—कैकेय्या इति । प्रियस्य कामः कामना स एवार्थो यस्मिन्कर्मणि ॥ ११ ॥ अनृतं असत्यं । दुःश्रुतं वैपरीत्येन श्रुतं च । स्ववक्तुं नार्हसीत्यन्वयः ॥ १२ ॥ रामः विग्रहवान् मूर्तो धर्म एव । तत्रदोषसंभावनाकथंचिदपिनकार्येतिभावः । यथा वासवो देवानां नायकस्तथा रामः सर्वेषां लोकानां नायक इत्यर्थः ॥ १३ ॥ स्वेन तेजसा पातिव्रत्यवैभवेन । प्रसभं बलात्कृत्य ॥ १४ ॥ शरार्चिषमिति शरपदं खड्गधारायाप्युपलक्षणं । चापखड्गेन्धनमिति रूपणात् । सहसा साहसेन ॥ १५ ॥ धनुरित्यादिश्लोकद्वयमेकान्वयं । धनुरेव व्यादितदीप्तास्यं । व्यादितं विवृतं । अत्यासादयितुं अत्यन्तमासन्नो भवितुं ॥ १६—१७ ॥ जनकात्मजा यस्य यत्संबन्धिनी । तत्तेजः तस्य तेजः । अप्रमेयं अपरिच्छेद्यं । "श्रद्धया देवो देवत्वमश्नुते" इत्युक्तरीत्या सीतासंबन्धेन रामस्यातिशय उक्तः । वने सावधानतयारक्षणीयप्रदेशे । रामचापाश्रयामिति रामवैभवोक्तिः । उभयथापि न हर्तुं शक्येत्यर्थः । जनकात्मजेति कुलप्रभावादपि न हर्तुं शक्येत्यर्थः ॥ १८—२० ॥ व्यर्थमिमामुद्यमं उद्योगं । कृत्वा ते किं किं फलं प्राप्तव्यमित्यर्थः । तदन्तं दर्शनान्तं ॥ २१ ॥ न केवलं जीवितं सुखादिकं च दुर्लभमित्याह—जीवितं

॥ ९ ॥ ति० अनृतंनश्रुतंचैव अनृतप्रसंगमपिनजानाति । तेन तत्कथनंदूरापास्तमित्यर्थः । एवंवक्तुं रामंदुर्गुणंवक्तुं ॥ १२ ॥ ति० अप्रमेयंहितत्तेजइत्यनेनाचिन्त्यसगोचरत्वंध्वनितं । अस्यसेत्यनेन तस्याश्रयितव्यंसूचितं ॥ १८ ॥ ति० नरसिंहस्येत्यनेन हिरण्यकशिपुप्रभृतिहन्ताऽयमेवेतिसूचितं । नित्यमनुव्रतेत्यनेन तस्यास्तच्छक्तित्वंसूचितं ॥ १९ ॥ शि० तदन्तं तेन रणेरामदर्शनेन अन्तोविध्वंसोयस्यतत् । उपजीवितं स्वजीवनं । विद्धीतिशेषः ॥ २१ ॥ इतिसप्तत्रिंशस्सर्गः ॥ ३७ ॥

[पा०] १ क—ट. ततः. २ क.—घ. छ. ञ. ट. प्रव्राजितो. ३ क. ख. घ. भोगंच. ४ ख. रामोनकर्कशः. ५ ख. घ. ङ. झ. ट. नश्रुतं. च छ ज. दुष्कृतं. ६ ख. ङ. झ. ञ. ट. नैवंत्वंवक्तुमर्हसि. ७ क ख. ग. च. छ. ज. ञ. धर्मोविग्रहवान्. ८ ग. रणे. ९ क ख. ग. ङ—ट. देवानामिवचासवः. १० क. ङ.—झ. ट. कथंतु. ख. ग. ञ. कथंतु. ११ ङ. झ. ट. इच्छसे. १२ ख. खड्गधरं. १३ ग. शरजिह्वं. १४ ख. ममर्षिणं. १५ क. झ. ट. चापबाणधरंतीक्ष्णं. घ. छ. ज. ञ. खड्गचापधरं. ङ. खड्गपाशधरं. १६ क. घ. सैन्यापहारिणं. ङ—ट. सेनापहारिणं. १७ ख. तंतु. १८ घ. मथार्हसि. १९ क. ख. घ. पादाश्रयां. २० ङ. झ. ट. तस्यैव. २१ ख. ग. च. छ. ज. ञ. मैथिलीजनकात्मजा. २२ ङ—ट. सुखं व्यर्थमिमं. २३ क. च. छ. ज. ञ. दृष्टश्चेत्तु. २४ ङ. झ. ट. तदन्तमुपजीवितं. ख. तदन्तंजीवितंतव. २५ क. सुखं.

स सर्वैः सचिवैः सार्धं विभीषणपुरोगमैः ॥ मन्त्रयित्वा तु धर्मिष्ठैः कृत्वा निश्चयमात्मनः ॥ २३ ॥
दोषाणां च गुणानां च संप्रधार्य बलाबलम् ॥ आत्मनश्च बलं ज्ञात्वा राघवस्य च तत्त्वतः ॥
हिताहितं विनिश्चित्य क्षमं त्वं कर्तुमर्हसि ॥ २४ ॥

अहं तु मन्ये तव न क्षमं रणे समागमं कोसलराजसूनुना ॥
इदं हि भूयः शृणु वाक्यमुत्तमं क्षमं च युक्तं च निशाचरेश्वर ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

अष्टत्रिंशः सर्गः ॥ ३८ ॥

मारीचेन रावणं प्रति यज्ञभङ्गादिरूपस्वकृतपीडामसहमानेन विश्वामित्रेण यज्ञरक्षणाय स्वाश्रमं प्रति रामानयनादिवृत्तान्तनिवेदनपूर्वकं रामेणैकशरेण सुदूरतरसागराम्भसि स्वस्य प्रक्षेपादिनिवेदनम् ॥ १ ॥ तथा सीताहरणस्यैहिकपारत्रिकमहानर्थहेतुत्वोक्त्या ततो निवर्तनोपदेशः ॥ २ ॥

कदाचिदप्यहं वीर्यात्पर्यटन्पृथिवीमिमाम् ॥ बलं नागसहस्रस्य धारयन्पर्वतोपमः ॥ १ ॥
नीलजीमूतसंकाशस्तप्तकाञ्चनकुण्डलः ॥ भयं लोकस्य जनयन्किरीटी परिघायुधः ॥
व्यचरं दण्डकारण्ये ऋषिमांसानि भक्षयन् ॥ २ ॥
विश्वामित्रोथ धर्मात्मा मद्वित्रस्तो महामुनिः ॥ स्वयं गत्वा दशरथं नरेन्द्रमिदमब्रवीत् ॥ ३ ॥
अद्य रक्षतु मां रामः पर्वकाले समाहितः ॥ मारीचान्मे भयं घोरं समुत्पन्नं नरेश्वर ॥ ४ ॥
इत्येवमुक्तो धर्मात्मा राजा दशरथस्तदा ॥ प्रत्युवाच महाभागं विश्वामित्रं महामुनिम् ॥ ५ ॥
बालो द्वादशवर्षोऽयमकृतास्त्रश्च राघवः ॥ कामं तु मम यत्सैन्यं मया सह गमिष्यति ॥ ६ ॥
बलेन चतुरङ्गेण स्वयमेत्य निशाचरान् ॥ वधिष्यामि मुनिश्रेष्ठ शत्रूंस्ते मनसेप्सितान् ॥ ७ ॥

चेति ॥ २२ ॥ स इत्यादि सार्धश्लोकद्वयमेकान्वयं । सत्यमित्यन्वयः । क्षमं साधु ॥ २३—२४ ॥ अधुना स्वबुद्धिं दर्शयति—अहं त्विति । युक्तं युक्तिसहितं ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तत्रिंशः सर्गः ॥ ३७ ॥

आबाल्यसिद्धसहजशौर्यादिगुणशेवधिः । रघुनाथो महाप्रीत्या परिस्फुरतु सर्वतः ॥ तद्गुणजातं नयुक्त्याकल्पयित्वोच्यते किंत्वनुभवसिद्धमित्याह—कदाचिदित्यादिना । सार्धश्लोकद्वयमेकान्वयं । अहंव्यचरमित्यन्वयः । नागो गजः । भयजनने हेतुमाह—नीलेत्यादिना ॥ १—२ ॥ मदिति पञ्चमी ॥ ३ ॥ पर्वकाले यज्ञसुत्याकाले ॥ ४—५ ॥ द्वादशवर्षः द्वादशवर्षवयस्कः । केचित्तु इदं रावणविभीषयोक्तं वस्तुत ऊनषोडशवर्ष इत्युक्तमित्यूचुः । कामं भृशं । यत्सैन्यं

ति० पञ्चदशवर्षोपि तथा दशरथेनानूदितोप्यत्यन्तबाल्यद्योतनायातिबालेनापीदृशं कृतं किमधुनावाच्यमिति रावणस्यात्यन्तभयाय मारीचेन तथा दशरथेनोक्तइत्यूनद्वादशवर्षइत्युक्तं । ऊनषोडशवर्षोयमितिपाठान्तरं । स० ऊनषोडशवर्षइत्येवपाठः । शि० ऊनद्वादशवर्षः किंचिन्मासोनषोडशवार्षिकइत्यर्थः । अयमर्थः द्वौचद्वौचद्वौचेत्येकशेषेणलब्धः । अत्रबीजंतु बालकाण्डघटकीभूतोनषोडश-

[पा०] १ च. छ. ज. ञ. सर्वैश्च. २ क. ग. ङ. झ. ञ. ट. पुरस्कृतैः. ३ क. ख. ग. च. छ. ज. ञ. धर्मिष्ठं. ४ घ. कार्यविनिश्चयं. ५ क. च—ट. हितंहितव. ङ. हिताहितंच. ६ ग. समागतं. ७ क. ग. ङ—ट. निशाचराधिप. ८ क. ग. ङ—झ. ट. दण्डकारण्यं. ९ ख. ग. विश्वामित्रोपि. १० ग. ङ. झ. ट. अयं. ११ ङ. झ. ठ. ऊनद्वादश. १२ ङ. झ. ट. तत्सैन्यं. १३ ङ—ट. निशाचरं. १४ ङ—ट. शत्रुंतवयथेप्सितं.

इत्येवमुक्तः स मुनी राजानमिदमब्रवीत् ॥ रामान्नान्यद्बलं लोके पर्याप्तं तस्य रक्षसः ॥ ८ ॥
देवतानामपि भवान्समरेष्वभिपालकः ॥ आसीत्तव कृतं कर्म त्रिलोके विदितं नृप ॥ ९ ॥
काममस्तु महत्सैन्यं तिष्ठत्विह परंतप ॥ १० ॥
बालोप्येष महातेजाः समर्थस्तस्य निग्रहे ॥ गमिष्ये राममादाय स्वस्ति तेस्तु परंतप ॥ ११ ॥
एवमुक्त्वा तु स मुनिस्तमादाय नृपात्मजम् ॥ जगाम परमप्रीतो विश्वामित्रः स्वमाश्रमम् ॥ १२ ॥
तं तदा दण्डकारण्ये यज्ञमुद्दिश्य दीक्षितम् ॥ बभूवोपस्थितो रामश्चित्रं विस्फारयन्धनुः ॥ १३ ॥
अजातव्यञ्जनः श्रीमान्पद्मपत्रनिभेक्षणः ॥ एकवस्त्रधरो धन्वी शिखी कनकमालया ॥ १४ ॥
शोभयन्दण्डकारण्यं दीप्तेन स्वेन तेजसा ॥ अदृश्यत ततो रामो बालचन्द्र इवोदितः ॥ १५ ॥
ततोऽहं मेघसंकाशस्तप्तकाञ्चनकुण्डलः ॥ बली दत्तवरो दर्पादाजगाम तदाश्रमम् ॥ १६ ॥
तेन दृष्टः प्रविष्टोऽहं सहसैवोद्यतायुधः ॥ मां तु दृष्ट्वा धनुः सज्यमसंभ्रान्तश्चकार सः ॥ १७ ॥
अवजानन्नहं मोहाद्बालोऽयमिति राघवम् ॥ विश्वामित्रस्य तां वेदिमभ्यधावं कृतत्वरः ॥ १८ ॥
तेन मुक्तस्ततो बाणः शितः शत्रुनिबर्हणः ॥ तेनाहं त्वाहतः क्षिप्तः समुद्रे शतयोजने ॥ १९ ॥
नेच्छता तात मां हन्तुं तदा वीरेण रक्षितः ॥ रामस्य शरवेगेन निरस्तोऽहमचेतनः ॥ २० ॥
पातितोहं तदा तेन गम्भीरे सागराम्भसि ॥ प्राप्य संज्ञां चिरात्तात लङ्कां प्रति गतः पुरीम् ॥ २१ ॥

तदित्याहार्यं ॥ ६—७ ॥ रामादन्यत् बलं सैन्यं तस्य न पर्याप्तं न समर्थं ॥ ८ ॥ दशरथस्य कोपो माभूदिति सान्त्वयति—देवतानामिति । तव कृतं त्वया कृतं कर्म । त्रिलोके लोकत्रये । आर्षत्वान्न ङीप् । विदितं प्रसिद्धं । यद्यपि महत्सैन्यमप्यस्तु तथापि तत्सर्वमिह तिष्ठतु । प्रकृतकार्यासामर्थ्यादितिभावः ॥ ९—१२ ॥ रामः चित्रं धनुः विस्फारयन् नयन्सन् उपस्थितः रक्षणाय समीपं प्राप्तो बभूवेत्यर्थः ॥ १३ ॥ अजातेत्यादिश्लोकद्वयमेकान्वयं । अजातव्यञ्जनः अनुत्पन्नयौवनलक्षणः । एकवस्त्रधरः ब्रह्मचर्यव्रते स्थित इत्यर्थः । शिखी कुलोचितशिखायुक्तः । व्रीह्यादित्वादिनिः । कनकमालयेत्युपलक्षणे तृतीया ॥ १४ ॥ शोभयन् मयूरकण्ठच्छायया व्याप्तं कुर्वन्नित्यर्थः । उदितचन्द्रौपम्येन विरोधिनिरसनोद्युक्तत्वं गम्यते । शत्रोरपि विग्रहवर्णनमाकर्षकतया ॥ १५ ॥ आजगामेत्युत्तमपुरुषः ॥ १६—१७ ॥ मोहात् अवजानन् तिरस्कुर्वन् ॥ १८ ॥ तेन रामेण । बाणो मुक्तः मयि क्षिप्त इत्यर्थः ॥ १९ ॥ नेच्छता अनिच्छता । नशब्दस्य " सुप्सुपा " इति समासः । अनिच्छाहेतुर्न ज्ञायते स्वयं हन्तुं समर्थ एवेति भावः । अचेतनः

वर्षमिदितिपद्येनिरूपितं । अतएवाकृतार्थः अस्माभ्यासरहितोस्तीतिशेषः ॥ ६ ॥ ति० रामादन्यद्बलं तस्यरक्षसोनपर्याप्तं । अतः कामं तवबलं यदस्ति तदत्रैवतिष्ठतु । तदुपयोगाभावात् । अतएव बालोपियतस्तन्निग्रहसमर्थः अतोदेयएवेतिशेषः ॥ १०—११ ॥ तनि० श्रीमान् अनपायश्रीकः । पद्मपत्रनिभेक्षणः रविकरविकसितपुण्डरीकदलायतेक्षणः । धन्वी बाल्योचितप्रशस्तधनुः ॥ १४ ॥ तनि० शोभयन्निति । स्वेन स्वासाधारणेनतेजसा दण्डकारण्यंशोभयन्निति । मयूरग्रीवासदृशस्वकान्त्या श्यामारुणकान्तिवर्धयन्नित्याचार्याः । तादृशतेजोवत्त्वेप्यनुद्वेगदायित्वमाह—बालचन्द्रइति ॥ १५ ॥ ति० आजगामेत्युत्तमपुरुषः । अत्र पारोक्ष्यार्थकलिटा दैवपारवश्यादेवाहमागतो नतु तदागमनं ममप्रत्यक्षमितिध्वनयति । यद्वा बहुकालिकत्वेनविस्मृतत्वाद्वा तत्रारोपः । आर्षोवालिट आश्रमान्तरं आश्रममध्यं । स० आजगामेति रामभयाद्व्यत्यासः ॥ १६ ॥ ति० नेच्छतेति । एतच्चरक्षणं केवलंकृपाजन्यमिति मारीचाशयः । भाविकार्यार्थमिति वस्तुतत्त्वं ॥ शि० अहंनिरस्तएव । " सर्ववाक्यंसावधारणंभवति " इति

[पा०] १ ङ. झ. ट. एवमुक्तस्सतुमुनिः. २ क. ग. च. छ. ज. राजानंपुनरब्रवीत्. ३ क. ग—ट. त्रिलोकविदितं. ४ ङ. झ. ट. काममस्ति. च. छ. ज. ञ. ममश्रीमान्पद्मपत्रनिभेक्षणः. ५ ख. रामोह्येष. क. बालोप्ययं. ६ ङ—ट. इत्येवमुक्त्वासमुनिः. ७ ङ. झ. ट. तथा. ८ ख. रक्षितुं. ९ क. ग. घ. च. छ. ज. ञ. बभूवावस्थितो. १० च. छ. ज. ञ. रामः सज्यं. ११ ङ—ट. श्रीमान्बालःश्यामःशुभेक्षणः. १२ क. ग. ङ—ट. तदा. १३ ख. भूषणः. १४ च. छ. ज. दागतोस्मि. ङ. झ. ट. दाजगामाश्रमान्तरं. ञ. दाजगामापराश्रमं. १५ ङ. झ. ट. श्चकारह. १६ ख. च. छ. ज. अवज्ञानादहं. १७ घ. मभ्यधावमतित्वरः. १८ च. छ. ज. ञ. स्तदा. १९ ख. ग. ङ—ट. ताडितः. २० ङ. झ. ट. निरस्तोभ्रान्तचेतनः.

एवमस्मि तदा मुक्तः सहायास्तु निपातिताः ॥ अकृतास्त्रेण बालेन रामेणाक्लिष्टकर्मणा ॥ २२ ॥
तन्मया वार्यमाणस्त्वं यदि रामेण विग्रहम् ॥ करिष्यस्यापदं घोरां क्षिप्रं प्राप्स्यसि रावण ॥ २३ ॥
क्रीडारतिविधिज्ञानां समाजोत्सवशालिनाम् ॥ रक्षसां चैव सन्तापमनर्थं चाहरिष्यसि ॥ २४ ॥
हर्म्यप्रासादसंबाधां नानारत्नविभूषिताम् ॥ द्रक्ष्यसि त्वं पुरीं लङ्कां विनष्टां मैथिलीकृते ॥ २५ ॥
अकुर्वन्तोपि पापानि शुचयः पापसंश्रयात् ॥ परपापैर्विनश्यन्ति मत्स्या नागह्रदे यथा ॥ २६ ॥
दिव्यचन्दनदिग्धाङ्गान्दिव्याभरणभूषितान् ॥ द्रक्ष्यस्यभिहतान्भूमौ तव दोषात्तु राक्षसान् ॥ २७ ॥
हृतदारान्सदारांश्च दश विद्रवतो दिशः ॥ हतशेषाननाथान्द्रक्ष्यसि त्वं निशाचरान् ॥ २८ ॥
शरजालपरिक्षिप्तामग्निज्वालासमावृताम् ॥ प्रदग्धभवनां लङ्कां द्रक्ष्यसि त्वं न संशयः ॥ २९ ॥
परदाराभिमर्शात्तु नान्यत्पापतरं महत् ॥ प्रमदानां सहस्राणि तव राजन्परिग्रहः ॥ ३० ॥
भव स्वदारनिरतः स्वकुलं रक्ष राक्षस ॥ मानमृद्धिं च राज्यं च जीवितं चेष्टमात्मनः ॥ ३१ ॥
सीताहेतोः समग्राणि विद्रविष्यन्ति भीतवत् ॥ ३२ ॥
आत्मनश्च दशग्रीव पुरस्यान्तःपुरस्य च ॥ रक्षसां च विनाशाय मैथिलीमानयिष्यसि ॥
मा नाशय त्वं राज्यं च जीवितं चेष्टमात्मनः ॥ ३३ ॥]
कलत्राणि च सौम्यानि मित्रैवर्गं तथैव च ॥ यदीच्छसि चिरं भोक्तुं मा कृथा रामविप्रियम् ॥३४॥
निवार्यमाणः सुहृदा मया भृशं प्रसह्य सीतां यदि धर्षयिष्यसि ॥
गमिष्यसि क्षीणबलः सबान्धवो यमक्षयं रामशरार्चितजीवितः ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे अष्टत्रिंशः सर्गः ॥ ३८ ॥

निश्चेष्टः मूर्छितो वा ॥ २०—२१ ॥ निपातिताः हताः ॥ २२—२३ ॥ क्रीडा लीला रतिः भोगः तयोर्विधिः क्रमः तज्ज्ञानां तत्र सक्तानामित्यर्थः । समाजः सभा । अनर्थं दुःखं । संतापः तत्कार्यं । आहरिष्यसि यत्नेन संपादयिष्यसि ॥ २४ ॥ हर्म्येति " हर्म्यादि धनिनां वासः प्रासादो देवभूभुजां " इत्यमरः । संबाधां निबिडां । रत्नविभूषितां गृहद्वारादौ ॥ २५ ॥ स्वदोषेण सकलराक्षसक्षयो भविष्यतीति दर्शयिष्यन् तदर्थमस्त्वन्नदोषन्यायारूढमुपवर्णयति—अकुर्वन्तोपीति । शुचयः परिशुद्धाः अपापा इत्यर्थः । पापान्यकुर्वन्तोपि पापसंश्रयात् पापपुरुषसंसर्गात् । परपापैर्विनश्यन्ति । यथा नागह्रदे सर्पह्रदे । नागनिग्रहाय प्रवृत्तेन मत्स्याअपि तत्सहवासाद्धन्यन्ते तद्वदित्यर्थः ॥ २६ ॥ तव दोषात्तु तव दोषादेव ॥ २७ ॥ हृतदारान् अकृतदारान् । अशरणान् रक्षकरहितान् ॥ २८ ॥ प्रदग्धभवनां प्रकर्षेण दग्धगृहां ॥ २९ ॥ एवं दृष्टदोषमुपपाद्यादृष्टदोषं दर्शयति—परदारेति । " परिग्रहःकलत्रे स्यात् " इतिशाश्वतः । जात्यभिप्रायेणैकवचनं ॥ ३० —३३ ॥ रामविप्रियं रामापराधं ॥ ३४ ॥ प्रसह्य बलात्कृत्य मामनादृत्येत्यर्थः । रामशरेण आर्त्तं आ-

---

न्यायेनैवकारलाभः । तेन इतरव्यवच्छेदः ॥ २० ॥ स० सह अयोगतिर्येषांते सहायाः ॥ २२ ॥ ति० नागह्रदे सर्पयुक्तह्रदे । सर्पनिग्रहायप्रविष्टेन राजप्रेरितधीवरादिना गरुडेनवा यथाप्रसङ्गान्मत्स्या नश्यन्ति तद्वत् ॥ २६ ॥ ति० तव परिग्रहे अन्तःपुरे । प्रमदानांसहस्राणि । अतस्त्वास्वेवरमस्व नान्यत्रमनोधेहीत्यर्थः ॥ ३० ॥ इत्यष्टत्रिंशस्सर्गः ॥ ३८ ॥

[पा०] १ ख. ङ. ज्ञ. ण. ट. सहायास्ते. २ क. ङ—ट. रामेणबालेनाक्लिष्ट. ३ क. च—ञ. वार्यमाणस्तु. ४ क. ग. ङ—ट. प्राप्स्यनशिष्यसि. ५ क. विधिरसङ्गानां. ६ ङ. ज्ञ. दर्शिनां. ७ क. ग. घ. छ. ज. ञ. लिप्ताङ्गान्. ८ ख. रावण. ९ ज्ञ. हृतदारान्. १० ख. नशेषेण. ११ ख. घ. ङ. ज्ञ. ट. स्वमसंशयं. १२ ङ. ज्ञ. ट. परिग्रहे. १३ ज्ञ. ट. राक्षसान्. ख. रावण. १४ ख. राहूं. च. १५ इदमर्धचतुष्टयं क. च. छ. ज. पाठेषुदृश्यते. १६ क. मित्रवर्गास्तथैव. १७ ख. ग. शरार्तजीवितः. ङ. ज्ञ. ट. शरास्तजीवितः.

CENTRAL ARCHAEOLOGICAL LIBRARY New Delhi

एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

मारीचेनरावणंप्रतिरामेपूर्ववैरानुस्मरणेनतज्जिघांसयामृगरूपधारिभ्यांराक्षसाभ्यांसहस्वेनापिमृगरूपस्वीकारेणदण्डकारण्यमेत्यतद्वधप्रयतनेतेनशरद्वयेनस्वसहचरद्वयहननेपलायनोपायेनतत्तृतीयशरादात्मरक्षणनिवेदनम् ॥ १ ॥ तथातंप्रतियुद्धेनक्षमयावावैरनिर्यातनकरणोक्तिपूर्वकंसीताहरणोद्यमान्निवर्तनोपदेशः ॥ २ ॥

एवमस्मि तदा मुक्तः कथंचित्तेन संयुगे ॥ इदानीमपि यद्वृत्तं तच्छृणुष्व निरुत्तरम् ॥ १ ॥
राक्षसाभ्यामहं द्वाभ्यामनिर्विण्णस्तथाकृतः ॥ सहितो मृगरूपाभ्यां प्रविष्टो दण्डकावनम् ॥ २ ॥
दीप्तजिह्वो महाकायस्तीक्ष्णदंष्ट्रो महाबलः ॥ व्यचरं दण्डकारण्यं मांसभक्षो महामृगः ॥ ३ ॥
अग्निहोत्रेषु तीर्थेषु चैत्यवृक्षेषु रावण ॥ अत्यन्तघोरो व्यचरं तापसान्संप्रधर्षयन् ॥ ४ ॥
निहत्य दण्डकारण्ये तापसान्धर्मचारिणः ॥ रुधिराणि पिबंस्तेषां तथा मांसानि भक्षयन् ॥ ५ ॥
ऋषिमांसाशनः क्रूरस्त्रासयन्वनगोचरान् ॥ तथा रुधिरमत्तोहं विचरन्धर्मदूषकः ॥ ६ ॥
आसादयं तदा रामं तापसं धर्मचारिणम् ॥ वैदेहीं च महाभागां लक्ष्मणं च महारथम् ॥ ७ ॥
तापसं नियताहारं सर्वभूतहिते रतम् ॥ सोहं वनगतं रामं परिभूय महाबलम् ॥ ८ ॥
तापसोऽयमिति ज्ञात्वा पूर्ववैरमनुस्मरन् ॥ अभ्यधावं हि संक्रुद्धस्तीक्ष्णशृङ्गो मृगाकृतिः ॥ ९ ॥
जिघांसुरकृतप्रज्ञस्तं प्रहारमनुस्मरन् ॥ तेन मुक्तास्त्रयो बाणाः शिताः शत्रुनिबर्हणाः ॥
विकृष्य बलवच्चापं सुपर्णानिलनिस्वनाः ॥ १० ॥
[तैर्बाणैर्दण्डकारण्ये मत्तैराशीविषोपमैः । कृतं वितिमिरं सर्वं रामेण क्लिष्टकर्मणा ॥ ११ ॥
ते बाणा वज्रसंकाशाः सुमुक्ता रक्तभोजनाः ॥ आजग्मुः सहिताः सर्वे त्रयः सन्नतपर्वणः ॥ १२ ॥

कृष्टं नाशितमिति यावत् । तादृशं जीवितं यस्य सः ॥३५॥ इतिश्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने अष्टत्रिंशः सर्गः ॥ ३८ ॥

अपराधविहीनेषु नापराधं करोति यः । दयालुं सर्वभूतेषु तमहं राममाश्रये ॥ इदानीमपि प्रौढावस्थायामपि । यद्वृत्तं मद्विषयमभूत् तत् निरुत्तरं शृणुष्व मध्ये वाक्यविच्छेदाकरणेन शृण्वित्यर्थः । यदुत्तरमिति पाठे यत्सर्वान्तोत्तरं तदतिरिक्तासाध्यं तदपिशृण्वित्यर्थः ॥ १ ॥ तथाकृतः उक्तरीत्या प्राणसंकटं प्रापितोपि । अनिर्विण्णः निर्वेदरहितः । निर्वेदोनिष्फलत्वधीः । अप्राप्ततद्विषयप्रवृत्तिवैराग्यइत्यर्थः ॥ २ ॥ दीप्तजिह्व इत्यादिविशेषणत्रयेण निरपेक्षहननसाधनभूयस्त्वं विवक्ष्यते ॥ ३—८ ॥ रामपराक्रमं जानन्नपि कथंतत्परिभवायोद्युक्त इत्यत्राह—तापसोयमितिज्ञात्वेति तापसत्वादहिंसापरेणभवितव्यमिति विश्वस्येत्यर्थः । एवंविधदुर्व्यापारप्रयोजकं वैरस्मरणं ॥९॥ अकृता अप्रवर्तिता प्रज्ञा बुद्धिर्यस्य सः ॥१०॥ सर्वे इति प्रयोगयौगपद्यार्थमुक्तं । सन्नतपर्वणः सन्नत-

---

स० यदुत्तरमितिपाठे यद्वृत्तं मदनुभवसिद्धं उत्तरं सर्वलोकासाध्यत्वेनोत्तमं । तच्छृणुष्वेत्यन्वयः । शि० यत् यत्नवान् योऽहमस्मि तस्यमे उत्तरं लोकविलक्षणं । यद्वृत्तं तच्छृणुष्व । अहंवक्ष्यामीत्यर्थः ॥ १ ॥ शि० तदारामं तदः अमृतदाता आरामो

[पा०] १ घ. तच्छृणुत्वं. २ ग. ङ—ट. यदुत्तरं. घ. निशाचर. ३ क. ख. ग. ङ—ट. महादंष्ट्रस्तीक्ष्णशृङ्गो. ४ क. दण्डकारण्ये. ५ च. छ. ज. ञ. ऋषिमांसानिभक्षयन्. ६ क. ख. ग. ङ—ट. तापसांस्तान्प्रधर्षयन्. ७ ङ. झ. ट. तन्मांसानिच. ८ तथारुधिरमत्तोहमित्यर्धस्थाने क. ङ—ट. पुस्तकेषु. तदारुधिरमत्तोहंव्यचरंदण्डकावनं । तदाहंदण्डकारण्येविचरन्धर्मदूषकः । इत्यर्धद्वयंदृश्यते. ९ क. घ. च. छ. ज. ञ. तथा. १० ग. ङ. झ. ञ. ट. माश्रितं. क. च. छ. ज. संश्रितं. ११ ग. च. छ. ज. ञ. महाबलं. १२ क. ख. ग. ङ—ट. सुसंक्रुद्धः. १३ ङ. झ. ट. त्यक्ताः. १४ ङ. झ. ट. सुमहच्चापं. १५ ङ. झ. ट. तुल्यगाः. १६ अयंश्लोकः क. पुस्तकेदृश्यते. १७ क. ग. ङ.—ट. सुघोराः.

पराक्रमज्ञो रामस्य शरो दृष्टभयः पुरा ॥ समुद्भ्रान्तस्ततो मुक्तस्तावुभौ राक्षसौ हतौ ॥ १३ ॥
शरेण मुक्तो रामस्य कथंचित्प्राप्य जीवितम् ॥ इह प्रव्राजितो युक्तस्तापसोह समाहितः ॥ १४ ॥
वृक्षेवृक्षे च पश्यामि चीरकृष्णाजिनाम्बरम् ॥ गृहीतधनुषं रामं पाशहस्तमिवान्तकम् ॥ १५ ॥
अपि रामसहस्राणि भीतः पश्यामि रावण ॥ रामभूतमिदं सर्वमरण्यं प्रतिभाति मे ॥ १६ ॥
राममेव हि पश्यामि रहिते राक्षसाधिप ॥ दृष्ट्वा स्वप्नगतं राममुद्भ्रमामि विचेतनः ॥ १७ ॥
रकारादीनि नामानि रामस्यास्य रावण ॥ रम्याणि च रथाश्चैव त्रासं संजनयन्ति मे ॥ १८ ॥
अहं तस्य प्रभावज्ञो न युद्धं तेन ते क्षमम् ॥ बलिं वा नमुचिं वापि हन्याद्धि रघुनन्दनः ॥१९॥
रणे रामेण युध्यस्व क्षमां वा कुरु राक्षस ॥ न ते रामकथा कार्या यदि मां द्रष्टुमिच्छसि ॥ २० ॥

पर्वाणः ॥११-१२॥ दृष्टं भयं येन करणेन स दृष्टभयः। उद्भ्रान्तः पलाय्यगतः । मुक्त इति पलायितेषु रामशराप्रवृत्तेरिति भावः । रामस्येतिपदं काकाक्षिन्यायात्पूर्वोत्तरपदयोरन्वेति । यतः मया रामस्य शरः पुरा दृष्टभयः ततः रामस्य पराक्रमज्ञोहं समुद्भ्रान्तः सन् मुक्तः । रामपराक्रमज्ञौ तावुभौराक्षसौ तु हतावित्यन्वयः ॥ १३ ॥ प्रव्राजितः कृतसकलदुर्वृत्तपरित्याग इत्यर्थः । युक्तः उचिताचरणः । तापसः तपोनिष्ठः । समाहितः नियतमनस्कः ॥ १४ ॥ वृक्षेवृक्ष इति । "हृदयान्नापयातोसि दिक्षु सर्वासु दृश्यसे ॥ रामभूतं जगदभूद्रामे राज्यं प्रशासति" इत्यादाविव शोकरागभयादिजनितनिरन्तरसंतन्यमानचिन्तासरूपस्य साक्षात्कारोपपत्तिः । भयस्योत्तरोत्तरभूमिकाभिप्रायेण दर्शनस्याप्युत्तरोत्तरदशेत्यनुसंधेयं ॥ १५ ॥ एकस्यैव रामस्य प्रतिवृक्षंगत्वागत्वा दृश्यमानत्वमुच्यत इति भ्रमं धारयति—अपीति । नकेवलं प्रतिवृक्षं किंतु सर्वत्रप्रदेश इत्याह—रामभूतमिति ॥ १६ ॥ नेदं रामस्य मायाकृतमित्याह—राममेवेति । रहिते रामरहिते प्रदेशे । न केवलं जाग्रद्दशायामेव प्रतीतोयं किंतु स्वप्नदशायामपीत्याह—दृष्ट्वेति । उद्भ्रमामि भ्रान्तं प्रलापं करोमीत्यर्थः ॥ १७ ॥ नकेवलं दर्शनदशायां भीतिकार्यं श्रवणदशायामपीत्याह—रकारादीनीति । कारप्रत्ययश्छान्दसः । रेफादीनि यानि रम्यादीनि नामानि तेषामाद्याक्षरोच्चारणे राममेवायमभ्रमीदिति त्रासोजायते । द्वितीयाक्षरोच्चारणे शनैः स निवर्तत इति भावः ॥ १८—१९ ॥ यदिवैरनिर्यातनं कर्तुमिच्छसि तदा रामेण रणे युध्यस्व । यद्वा क्षमां कुरु खरादिवधं सहस्व । सर्वथा चोरव्यापारो न कर्तव्य इति भावः । हितं चाह—न त इति । रामकथा रामप्रसङ्गोपि । ते त्वया । न कार्या ।

विहारोयस्य तं रामं । आसाद्यं अपीत्यर्थं ॥ ७ ॥ ति० शठः गूढविप्रियकारी । दृष्टभयः रामादितिशेषः । शि० समुत्क्रान्तः पलायितः ॥ शि० पलायनान्मुक्तइत्यनेन पलायनपरेरामबाणोनहन्तीतिसूचितं । तेनतद्बाणस्यापिपरमधर्मज्ञत्वंसूचितं ॥ १३ ॥ ति० युक्तः योगाभ्यासरतः ॥ १४ ॥ तत्रि० चीरकृष्णाजिनांबरमिति गृहीतधनुषमितिच शुभाश्रयसंश्लेषे पीतांबरशङ्खचक्रादियोगइव ज्ञानालंबनयोगोव्यज्यते ॥ १५ ॥ शि० रकारादीनि रम्यरथप्रभृतीनिनामानि । रामस्यास्यमे त्रिन्नासंजनयन्तिएतेन रकारोच्चारणमात्रेण राममेवोच्चारयतीति भ्रान्तिरुत्पद्यतइतिसूचितं । तेन रामेतिनाम्ना रामवाच्यमयमलंबोधितं तेन यदि रकारोच्चारणमात्रेणभीतिस्तर्हि रामोच्चारणेभीतिरिति किंवक्तव्यमिति काव्यार्थापत्तिरलंकारोध्वनितः । तेन रामसमीपगमनयोग्यस्य गमनास्तीतिसूचितं ॥ १८ ॥ स० यद्यपिलक्ष्मं तथापियुध्यस्वेत्युक्तिः विशिष्टनाशापेक्षयारावणमात्रनाशस्यलघीयस्त्वादिति भावेन ॥ २० ॥

[पा०] १ क. ख. ग. ङ. छ.—ट. शठो. २ क. झ. ट. समुत्क्रान्तः. ३ ख. स्तथा. ४ क. ख. ग. ङ.—ट. वृक्षेहि. ५ घ. राममेवाभि. ६ क.—ट. राक्षसेश्वर. ७ ख. रामंसहसोद्भ्रान्तचेतनः. ८ क. झ. ट. त्रिन्नासंजनयन्ति. ९ घ. क्षमांचकुरु. ख. नक्षमंतव. १० ख. ङ. छ. ट. रावण. ११ घ. नचैनंद्रष्टुमर्हसि.

बहवः साधवो लोके युक्ता धर्ममनुष्ठिताः ॥ परेषामपराधेन विनष्टाः सपरिच्छदाः ॥ २१ ॥
सोहं तेवापराधेन विनश्येयं निशाचर ॥ कुरु यत्ते क्षमं तत्त्वमहं त्वा नानुयामि ह ॥ २२ ॥
रामश्च हि महातेजा महासत्त्वो महाबलः ॥ अपि राक्षसलोकस्य नै भवेदन्तकोपि सः ॥ २३ ॥
यदि शूर्पणखाहेतोर्जनस्थानगतः खरः ॥ अतिवृत्तो हतः पूर्वं रामेणाक्लिष्टकर्मणा ॥ २४ ॥
अत्र ब्रूहि यथा तत्त्वं कौ रामस्य व्यतिक्रमः ॥ २५ ॥

इदं वचो बन्धुहितार्थिना मया यथोच्यमानं यदि नाभिपत्स्यसे ॥
सबान्धवस्त्यक्ष्यसि जीवितं रणे हतोद्य रामेण शरैरजिह्मगैः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

चत्वारिंशः सर्गः ॥ ४० ॥

रावणेनमारीचंप्रतिपरुषभाषणैरुत्तालंभर्त्सकंमायया चित्रमृगरूपधारणेनसीताप्रलोभनाकरणेसःवधारणंतस्यइतनोक्तिः १

मारीचेन तु तद्वाक्यं क्षेमं युक्तं निशाचरः ॥ उक्तो न प्रतिजग्राह मर्तुकाम इवौषधम् ॥ १ ॥
तं पथ्यहितवक्तारं मारीचं राक्षसाधिपः ॥ अब्रवीत्परुषं वाक्यमयुक्तं कालचोदितः ॥ २ ॥
धिक्किलैतदयुक्तार्थं मारीच मयि कथ्यते ॥ वाक्यं निष्फलमैत्यर्थमुप्तं बीजमिवोषरे ॥ ३ ॥
त्वद्वाक्यैर्न तु मां शक्यं भेत्तुं रामस्य संयुगे ॥ पौंपशीलस्य मूर्खस्य मानुषस्य विशेषतः ॥ ४ ॥

यदि मां द्रष्टुमिच्छसि जीवितुमिच्छसीत्यर्थः ॥ २० ॥ लोकन्यायमाह—बहव इति । युक्ताः सम्यगाचाराः । धर्मं अनुष्ठिताः अनुष्ठितवन्तः साधवोपि परेषामपराधेन विनष्टाः । असत्संसर्गदोषेणेत्यर्थः ॥ २१ ॥ सामान्यन्यायं स्वविषये दर्शयति—सोहमिति । सोहं साधुभूतोहं । यत्ते क्षमं यस्त्वया कर्तुं शक्यं तत् त्वमेव कुरु । अहं त्वा त्वां । नानुयामि अनर्थस्य निश्चितत्वादित्यर्थः ॥ २२ ॥ तत्र हेतुमाह—रामश्च हीति । हिः प्रसिद्धौ । अपिः कामचारकरणे । "अपिः संभावनाप्रश्नशङ्कागर्हासमुच्चये । तथा युक्तपदार्थेषु कामचारक्रियासुच" इति विश्वः । द्वितीयोपिशब्दः अवधारणे ॥ २३ ॥ खरवधेन नोग्रहः कार्य इत्याह—यदीति । सीतापरिभवकरणेन शूर्पणखाविरूपिता । खरश्चातिवृत्तः रामस्योपरि गत्वा प्रहारोद्युक्तो रामेण हतः । अत्र रामस्य व्यतिक्रमः कः न कोपीत्यर्थः ॥ २४—२५ ॥ अवश्यं वक्तव्यमर्थं पुनर्निष्कृष्य दर्शयति—इदमिति । यथोच्यमानं परमार्थत उच्यमानं । नाभिपत्स्यसे नाङ्गीकरोषि ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

यस्य तत्त्वंसमुद्दिष्टं नाभिजानन्ति दुर्जनाः । तमहं शिरसा वन्दे रघुनाथं गुणार्णवम् ॥ क्षमं निवर्तनसमर्थं । युक्तं कार्यं ॥ १ ॥ पथ्यं अनपायं । हितं सुखावहं । अयुक्तं अयुक्तार्थं ॥ २ ॥ अयुक्तार्थं राजचित्तप्रतिकूलत्वादनुचितार्थं । उप्तं निक्षिप्तं ॥ ३ ॥ रामस्य संयुगे विषये मां भेत्तुं सीताप्रहरणोपायाद्युद्धे

ती० सर्वफलश्रुतिस्तत्कन्दे । " मारीचोक्तिमुपश्रुत्य गुरुमानभवतिक्षितौ " इति ॥ २६ ॥ इत्येकोनचत्वारिंशस्सर्गः ॥३९॥
ति० मारीचस्य मारीचेन ॥ १ ॥ स० पथ्यवद्धितं । रोगिणोयथापथ्यान्नंहितंतद्वद्धितमितिभावः ॥ २ ॥ ति० शत्रोर्मानुषस्यसाधकत्वात्कोधेनाह—दुष्कुलेति । निष्फलं तमोगुणाक्रान्तेममहृदयेतस्यानवकाशात् ॥ ३ ॥

[पा०] १ ख. नष्टाःसर्वपरिच्छदाः. २ ङ. झ. ट. परापराधेन. ३ ग. ननश्येयं. ४ ख. रामश्चापि. ५ क. महावीर्यो. ख. महासत्त्वोमहातेजाः. ६ क. ग. घ. ट. भवेदन्तकरोहिसः. ख. भवेदन्तकरोपिहि. ७ ग. कुतोरामव्यतिक्रमः. ८ ङ. झ. ट. मारीचमनु. ९ क.—घ. च ज. क्षेमयुक्तंचरावणः, ङ. छ. झ. ञ. ट. क्षमंयुक्तंचरावणः. १० ङ. झ. ट. दुष्कुलैतत्. ११ ख. ग. ङ. च. झ. ञ. ठ. मल्पर्थंबीजमुप्तं. १२ ङ. झ. ट. मूर्खस्यापपशीलस्य.

यस्त्यक्त्वा सुहृदो राज्यं मातरं पितरं तथा ॥ स्त्रीवाक्यं प्राकृतं श्रुत्वा वनमेकपदे गतः ॥ ५ ॥
अवश्यं तु मया तस्य संयुगे खरघातिनः ॥ प्राणैः प्रियतरा सीता हर्तव्या तव सन्निधौ ॥ ६ ॥
एवं मे निश्चिता बुद्धिर्हृदि मारीच वर्तते ॥ न व्यावर्तयितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ ७ ॥
दोषं गुणं वा संपृष्टस्त्वमेवं वक्तुमर्हसि ॥ अपायं वाऽप्युपायं वा कार्यस्यास्य विनिश्चये ॥ ८ ॥
संपृष्टेन तु वक्तव्यं सचिवेन विपश्चिता ॥ उद्यताञ्जलिना राज्ञे य इच्छेद्भूतिमात्मनः ॥ ९ ॥
वाक्यमप्रतिकूलं तु मृदुपूर्वं हितं शुभम् ॥ उपचारेण युक्तं च वक्तव्यो वसुधाधिपः ॥ १० ॥
सावमर्दं तु यद्वाक्यं मारीच हितमुच्यते ॥ नाभिनन्दति तद्राजा मानार्हो मानवर्जितम् ॥ ११ ॥
पञ्च रूपाणि राजानो धारयन्त्यमितौजसः ॥ अग्नेरिन्द्रस्य सोमस्य वरुणस्य यमस्य च ॥ १२ ॥
औष्ण्यं तथा विक्रमं च सौम्यं दण्डं प्रसन्नताम् ॥ धारयन्ति महात्मानो राजानः क्षणदाचर ॥
तस्मात्सर्वास्ववस्थासु मान्याः पूज्याश्च पार्थिवाः ॥ १३ ॥
त्वं तु धर्ममविज्ञाय केवलं मोहमास्थितः ॥ अभ्यागतं मां दौरात्म्यात्परुषं वक्तुमिच्छसि ॥ १४ ॥

मां प्रवर्तयितुं । त्वद्वाक्यैर्न शक्यं । तत्र हेतुत्रयं—पापेत्यादि । पापशीलत्वान्मूर्खत्वाद्विशेषतो मानुषत्वाच्च तेन नाहं योद्धुमर्हः किंतु तद्भार्यापहरणमेव तदपकाराय प्रतिक्रियेति भावः ॥ ४ ॥ मूर्खत्वमुपपादयति—यदिति । प्राकृतं असारं । स्त्रीवाक्यं कैकेयीवाक्यं । एकपदे उत्तरक्षणे । प्राणैः प्राणेभ्यः । प्रियतरा तत्प्राणापहरणादपि वरं तत्स्त्रियाअपहरणमिति भावः । तव सन्निधौ सति हर्तव्या त्वत्सन्निधिमुखेन हर्तव्येत्यर्थः ॥ ५—६ ॥ निश्चिता निश्चयरूपा । सेन्द्रैः किं पुनस्त्वयेति भावः ॥ ७ ॥ अपिचापृष्टोत्तरप्रलापस्तवासंगत इत्याह—दोषमिति । कार्यनिश्चये विषये कौ गुणदोषौ तत्साधने कावुपायावितिपृष्टश्चेदुत्तरं वक्तुमर्हसि नास्माकं तज्जिज्ञासा ततो नैवं वक्तुं युक्तमित्यर्थः ॥ ८ ॥ प्रसङ्गाद्राजसन्निधौ विज्ञापनप्रक्रियां दर्शयति—संपृष्टेनेत्यादिना । विपश्चिता विदुषा राजसेवाप्रकारज्ञेनेति यावत् । भूतिं ऐश्वर्यं ॥ ९ ॥ एवं वक्तृगुणा उक्ताः अथ वचनप्रकारमाह—वाक्यमिति । उपचारेण युक्तं बहुमानेन पुरस्कृतं । हितमप्युपचारपूर्वं वक्तव्यमित्यर्थः ॥ १० ॥ प्रकारान्तरेण न वक्तव्यमित्याह—सावमर्दमिति । सावमर्दं तिरस्कारसहितं ॥ ११ ॥ पञ्च रूपाणि अग्न्यादिपञ्चकस्ययानिरूपाणि तानि धारयन्तीत्यर्थः ॥१२॥ तान्येवाह—औष्ण्यमिति । औष्ण्यं तैक्ष्ण्यं । सौम्यं आह्लादकरत्वं । दण्डं दुष्टनिग्रहं । मान्याः मनसा पूज्याः । पूज्याः वाचा बहुमन्तव्याः ॥ १३ ॥ सामान्यत उक्तमर्थं प्रकृते संगमयति—त्वं त्विति । धर्मं राजधर्मं । मोहं

ती० मारीचेनेत्यादेः हर्तव्यातवसंनिधावित्यन्तस्यग्रन्थस्यवास्तवार्थेऽयमर्थः । तद्वाक्यं सीतानाहरेतिवाक्यं । नजग्राह । तंप्रतिपरुषवाक्यंचाब्रवीत् । तदेवाह—यदिति । हेमारीच मयि सीताहरणकामेइत्यर्थः । अयुक्तार्थं अयोग्यार्थं । वाक्यंनिष्फलं । इदंचेद्युक्तमित्याह—त्वदिति । मानुषस्यमूर्खस्य विशेषतःपापशीलस्य । द्वितीयार्थेषष्ठी । भेत्तुंशक्यं । रामस्य रामंतु मयाभेत्तुंनशक्यमितियदुक्तं त्वद्वाक्यैः तत्सत्यमेवकरुणाशालितयाप्राकृतस्त्रीवाक्यमपिश्रुत्वा राज्यादिकंत्यक्त्वावनंगतः तस्यसीताभार्यात्ववश्यंमया आहर्तव्येतिसंबन्धः ॥ सीतापहरणाभावे स्वस्यरामहस्तान्मरणंनभविष्यतीतिहृद्गतः ॥ शि० प्राणैःप्रियतरेत्यनेन तद्दुःखार्थमेव सीताहरणमितिसूचितं ॥ ६ ॥ ति० अथवेति यद्यप्यर्थे । यद्यपिहितं तथापि नाभिनन्देत । त्वंत्वपृष्टएवममाहितमवमर्दसहितं मानहीनंवदसीत्यनुचितमितिभावः ॥ ११ ॥ शि० धारयन्तीति । एतेन राजा द्रोहिणोऽवश्यंविनाशयतीतिसूचितं ॥ १३ ॥ इतिचत्वारिंशत्सर्गः ॥ ४० ॥

[पा०] १ च. छ. ज. ञ. बुद्धिर्मारीचहृदि. २ ङ. झ. ट. विद्यते. ३ ङ. झ. ट. वाउपायंवा. ४ क. ख. ङ. झ. ट. राज्ञो. ५ घ. द्रुतिं. ६ क. ख. ङ. ट. शुभंहितं. ७ झ. वक्तव्योयुक्तंच. ८ क. घ. च. छ. ज. ञ. सोपमर्दं. ग. सावमानं. ९ ङ. झ. ञ. ट. वाक्यमथवाहितं. ख. वाक्यंमानहारीदं. ग. वाक्यंमानहानंनिशाचर. १० ङ—ट. नन्देत. ११ ङ. झ. ञ. ट. मानार्थी. १२ क. ग. घ. मानवर्जितः. १३ क. ख. ङ—ट. यमस्यवरुणस्यच. १४ ङ. झ. नित्यदा. १५ क. ग. ङ—ट. वदसीदृशं.

गुणदोषौ न पृच्छामि क्षेमं चात्मनि राक्षस ॥ मयोक्तं तव चैतावत्संप्रत्यमितविक्रम ॥ १५ ॥
अस्मिंस्तु त्वं महाकृत्ये साहाय्यं कर्तुमर्हसि ॥ शृणु तत्कर्म साहाय्ये यत्कार्यं वचनान्मम ॥ १६ ॥
सौवर्णस्त्वं मृगो भूत्वा चित्रो रजतबिन्दुभिः ॥ आश्रमे तस्य रामस्य सीतायाः प्रमुखे चर ॥ १७ ॥
प्रलोभयित्वा वैदेहीं यथेष्टं गन्तुमर्हसि ॥ १८ ॥
त्वां तु मायामृगं दृष्ट्वा काञ्चनं जातविस्मया ॥ आनयैनमिति क्षिप्रं रामं वक्ष्यति मैथिली ॥ १९ ॥
अपक्रान्ते तु काकुत्स्थे दूरं गत्वा व्युदाहर ॥ हा सीते लक्ष्मणेत्येवं रामवाक्यानुरूपकम् ॥ २० ॥
तच्छ्रुत्वा रामपदवीं सीतया चैव प्रचोदितः ॥ अनुगच्छति संभ्रान्तः सौमित्रिरपि सौहृदात् ॥ २१ ॥
अपक्रान्ते च काकुत्स्थे लक्ष्मणे च यथासुखम् ॥ आनयिष्यामि वैदेहीं सहस्राक्षः शचीमिव ॥ २२ ॥
एवं कृत्वा त्विदं कार्यं यथेष्टं गच्छ राक्षस ॥ राज्यस्यार्धं प्रदास्यामि मारीच तव सुव्रत ॥ २३ ॥
गच्छ सौम्य शिवं मार्गं कार्यस्यास्य विवृद्धये ॥ अहं त्वामनुगमिष्यामि सरथो दण्डकावनम् ॥ २४ ॥
प्राप्य सीतामयुद्धेन वञ्चयित्वा तु राघवम् ॥ लङ्कां प्रति गमिष्यामि कृतकार्यः सह त्वया ॥ २५ ॥
नो चेत्करोषि मारीच हन्मि त्वामहमद्य वै ॥ एतत्कार्यमवश्यं मे बलादपि करिष्यसि ॥
राज्ञो हि प्रतिकूलस्थो न जातु सुखमेधते ॥ २६ ॥

आसाद्य तं जीवितसंशयस्ते मृत्युर्ध्रुवो ह्यद्य मया विरुध्य ॥
एतद्यथावत्प्रतिगृह्य बुद्ध्या यदत्र पथ्यं कुरु तत्तथा त्वम् ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

आह्वानं । दौरात्म्यात् दौर्जन्यात् ॥ १४ ॥ तर्हि कथं मया वक्तव्यमित्यत्राह—गुणेति । गुणदोषौ आत्मनि क्षेमं च न पृच्छामि किंतु संप्रति मया तव तुभ्यं मयोक्तमेतावत् ॥ १५ ॥ किंतदित्यत्राह—अस्मिन्निति । कृत्ये कार्ये शृण्विति साहाय्ये करणीये यत्कार्यं तद्वचनं तद्विषयवचनं शृणु ॥ १६ ॥ प्रमुखे अग्रे ॥ १७—॥ १८ ॥ किं तस्य प्रयोजनं तत्राह—त्वामिति ॥ १९ ॥ अनुरूपकं स्वार्थे कप्रत्ययः ॥ २० ॥ पदवीं मार्गं ॥ २१ ॥ यथासुखं यत्नविना ॥ २२—२३ ॥ मार्गं मृगसंबन्धिरूपं । शिवं मनोहरं । गच्छ प्राप्नुहि ॥ २४—२५ ॥ बलादपि करिष्यसि अनिच्छतापि त्वया सर्वथाऽहमेतत्कार्यं कारयिष्यामीत्यर्थः । विपक्षे बाधकमाह—राज्ञ इति ॥ २६ ॥ कार्यकरणाकरणयोर्गुणदोषौ दर्शयति—आसाद्येति । तं रामं । आसाद्य मृगरूपेण प्राप्य । जीवितस्य संशयः दैवाज्जीवितं लभ्येतापि । मद्विरोधे तु जीवितहानिरेव स्यात् । प्रतिगृह्य निश्चित्य । अत्र कार्यद्वये । यत्ते पथ्यं तत्कुरु । मदुक्ताकरणे अवश्यं हननमित्यर्थः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चत्वारिंशः सर्गः ॥ ४० ॥

[पा०] १ क. ग. ङ—ट. मयोक्तमपिचैतावत्त्वां. २ क. ग. च. छ. झ, तद्भवान्कृत्ये. ङ. ञ. ट. सभवान्कृत्ये. ३ क. ग. ङ—ट. महंति. ४ ग. वचनंमम. ५ क. ख. च. छ. ज. ञ. त्वांहि. ६ क. जानकी. ७ घ—ट. अपक्रान्तेव. ८ क. च. छ. ज. ञ. गत्वाभ्युदाहर. ९ च. छ. ज. ञ. लक्ष्मणइति. १० च. छ. ज. ञ. प्रतिचोदितः. ११ क. ङ. च. ञ. ट. आहरिष्यामि. १२ क. ख. ग. ङ. ञ. ट. प्रदास्यामि. १३ ख. च. छ. ज. ञ. चानु. १४ च. छ. ञ. ञ. राघवौ. १५ ङ. ञ. ट. नोचेत्. १६ ङ. ञ. ट. राज्ञोविप्रति. १७ ङ. ञ. ट. त्वरिगम्य. ग. त्वतिगम्य. क. च. छ. झ. ञ. त्वरिएत्य. १८ ख. यद्येवंचेतत्कृत्यमाचिरेण.

एकचत्वारिंशः सर्गः ॥ ४१ ॥

मारीचेनरावणंप्रतिपुनर्वैयात्यात्परुषभाषणैरुपालंभपूर्वकंसीताहरणस्वमहानर्थहेतुत्वोक्त्यातंप्रतिपरिशोचनम् ॥ १ ॥

आज्ञप्तोऽराजवद्वाक्यं प्रतिकूलं निशाचरः ॥ अब्रवीत्परुषं वाक्यं मारीचो राक्षसाधिपम् ॥ १ ॥
केनायमुपदिष्टस्ते विनाशः पापकर्मणा ॥ सपुत्रस्य सराष्ट्रस्य सामात्यस्य निशाचर ॥ २ ॥
कस्त्वया सुखिना राजन्नाभिनन्दति पापकृत् ॥ केनेदमुपदिष्टं ते मृत्युद्वारमुपायतः ॥ ३ ॥
शत्रवस्तव सुव्यक्तं हीनवीर्या निशाचराः ॥ इच्छन्ति त्वां विनश्यन्तमुपरुद्धं बलीयसा ॥ ४ ॥
केनेदमुपदिष्टं ते क्षुद्रेणाहितवादिना ॥ यस्त्वामिच्छति नश्यन्तं स्वकृतेन निशाचर ॥ ५ ॥
वध्याः खलु न हन्यन्ते सचिवास्तव रावण ॥ ये त्वामुत्पथमारूढं न निगृह्णन्ति सर्वशः ॥ ६ ॥
अमात्यैः कामवृत्तो हि राजा कापथमाश्रितः ॥ निग्राह्यः सर्वथा सद्भिर्न निग्राह्यो निगृह्यसे ॥ ७ ॥
धर्ममर्थं च कामं च यशश्च जयतां वर ॥ स्वामिप्रसादात्सचिवाः प्राप्नुवन्ति निशाचर ॥ ८ ॥
विपर्यये तु तत्सर्वं व्यर्थं भवति रावण ॥ व्यसनं स्वामिवैगुण्यात्प्राप्नुवन्तीतरे जनाः ॥ ९ ॥
राजमूलो हि धर्मश्च जयश्च जयतां वर ॥ तस्मात्सर्वास्ववस्थासु रक्षितव्या नराधिपाः ॥ १० ॥
राज्यं पालयितुं शक्यं न तीक्ष्णेन निशाचर ॥ न चापि प्रतिकूलेन नाविनीतेन राक्षस ॥ ११ ॥
ये तीक्ष्णमन्त्राः सचिवा भज्यन्ते सह तेन वै ॥ विषमे तुरगाः शीघ्रा मन्दसारथयो यथा ॥ १२ ॥

येन सर्वात्मना वर्ज्यं प्रातिकूल्यं हितैषिणाम् । सर्वलोकानुकूलं तमाश्रये रघुनायकम् ॥ अराजवत् यदा रामप्रातिकूल्ये प्रवृत्तस्तदैव राजत्वं गतमिति मुनेराशयः । यद्वा राजवत् राजार्हं । "तदर्हं" इत्यर्हार्थे वतिः । यद्वा राजवदिति पूर्वसर्गोक्तमौद्धत्यं लक्ष्यते । वाक्यं वाक्यार्थानुष्ठानं मृगरूपमासाद्य त्वया गन्तव्यमित्येवंरूपं प्रतीत्यर्थः । यद्वा प्रतिकूलंवाक्यं आज्ञप्तः चोदितः उक्त इत्यर्थः ॥ १ ॥ विनाशः विनाशोपायः ॥ २ ॥ सुखिना त्वया अवस्थानमिति शेषः । मृत्युद्वारं मृत्युद्वारतुल्यमिदं कार्यं । उपायतः व्याजेन ॥ ३ ॥ बलीयसा रामेण उपरुद्धं आक्रान्तं । अतएव विनश्यन्तं त्वामिच्छन्ति त्वद्विनाशं रामविरोधमुखेनेच्छन्तीत्यर्थः ॥ ४ ॥ न केवलं शत्रवः तत्रापि क्षुद्रा एवेदं कार्यमिच्छन्तीत्याह—केनेति । स्वकृतेन त्वत्कृताकृत्येन ॥ ५ ॥ ये उत्पथं लोकशास्त्रविरुद्धमार्गं । आरूढं प्रविष्टं त्वां न निगृह्णन्ति तस्मान्मार्गान्न निवर्तयन्ति । ते सचिवाः वध्याः वधार्हाः ॥ ६ ॥ एतदुपयुक्तत्वेन सचिवकर्तव्यं दर्शयन् प्रकृते तदभावं चतुर्थपादेनाह—अमात्यैरिति । कापथं कुमार्गं । निग्राह्यः निवर्तनीयः ॥ ७ ॥ स्वामिप्रसादात् स्वामिनः प्रसन्नभावात् स्वामिसाद्गुण्यादित्यर्थः ॥ ८ ॥ विपर्यये स्वामिवैगुण्ये । स्वामिवैगुण्यान्न केवलममात्या एव नश्यन्ति किंतु तदितरेपि जना इत्याह—व्यसनमिति ॥ ९ ॥ उक्तमर्थमुपसंहरति—तस्मादिति ॥ १० ॥ तीक्ष्णेन क्रूरदण्डेन । प्रतिकूलेन प्रजाविरुद्धेन । अविनीतेन इन्द्रियजयरहितेन । "विनयो हीन्द्रियजयः" इति कामन्दकः ॥ ११ ॥ तीक्ष्णमन्त्राः तीक्ष्णोपायप्रयोक्तारः । तेन स्वमन्त्रग्राहिणाराज्ञा सह । विषमे निम्नोन्नतप्रदेशे । शीघ्रगास्तुरगाः मन्दसारथयः अपटुसारथयः सन्तः । यथा सारथिना सह नश्यन्ति

ती० यद्वा राजवदितिशब्देन पूर्वसर्गोक्तरावणगतमौद्धत्यंलक्ष्यते । तदस्मिन्वाक्ये प्रवर्तकत्वेनास्तीतिराजवदितियोज्यं । स० राज्ञातुल्यंराजवत् भयाभावाद्रावणोयथाऽवदत्तथैवाब्रवीदितिभावः । ति० मृत्योर्निश्शङ्कोमारीचः । परुषं शब्दतोऽर्थतश्च । वाक्यमब्रवीत् ॥ १ ॥ स० विनाशः विनाशहेतुर्व्यापारः ॥ २ ॥ स० पूर्वमुत्तरत्रचकेनेदमित्येकवचननिर्देशेपि शत्रवइतिबहुवचनं दुर्बुद्धिप्रवर्तकानांनाशयोग्यानांबहुत्वात्संभवति ॥ ४ ॥ शि० सः कापथमाश्रितः अतएवनिग्राह्यस्त्वं नगृह्यसे प्राह्यत्वेननस्वीक्रियसे ॥ ७ ॥

[पा०] १ ङ. झ. ट. आज्ञप्तोरावणेनेत्थंप्रतिकूलंचराजवत्. २ छ. त्सरुषं. ३ ङ. झ. ट. निश्शङ्को. ४ क. च. ज. ञ. सपुरस्य. ५ ङ. झ. ट. सराज्यस्य. ६ च. छ. ञ. निन्दितः. ७ क. ख. मपावृतं. ८ ङ. झ. ट. बुद्धिना. ९ क—ट. वध्यन्ते. १० क. ख. च. छ. ज. ञ. कुपथं. ११ ङ. झ. ट. सद्भिस्सनिग्राह्योनगृह्यसे. १२ क. ग. ङ.—ट. यशश्च. १३ च. ञ—ट. नचाति.

बहवः साधवो लोके युक्ता धर्ममनुष्ठिताः ॥ परेषामपराधेन विनष्टाः सपरिच्छदाः ॥ १३ ॥
स्वामिना प्रतिकूलेन प्रजास्तीक्ष्णेन रावण ॥ रक्ष्यमाणा न वर्धन्ते मेषा गोमायुना यथा ॥ १४ ॥
अवश्यं विनशिष्यन्ति सर्वे रावण राक्षसाः ॥ येषां त्वं कर्कशो राजा दुर्बुद्धिरजितेन्द्रियः ॥ १५ ॥
तदिदं काकतालीयं घोरमासादितं मया ॥ अत्रैव शोचनीयस्त्वं ससैन्यो विनशिष्यसि ॥ १६ ॥
मां निहत्य तु रामश्च नचिरात्त्वां वधिष्यति ॥ अनेन कृतकृत्योऽस्मि म्रिये येनरिणा हतः ॥ १७ ॥
दर्शनादेव रामस्य हतं मामुपधारय ॥ आत्मानं च हतं विद्धि हत्वा सीतां सबान्धवम् ॥ १८ ॥
आनयिष्यसि चेत्सीतामाश्रमात्सहितो मया ॥ नैव त्वंमसि नाहं च नैव लङ्का न राक्षसाः ॥ १९ ॥

निवार्यमाणस्तु मया हितैषिणा न मृष्यसे वाक्यमिदं निशाचर ॥
परेतकल्पा हि गतायुषो नरा हितं न गृह्णन्ति सुहृद्गिरीरितम् ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

सथेत्यर्थः ॥ १२ ॥ उत्तरश्लोके वक्ष्यमाणस्य सामान्यन्यायं दर्शयति—बहव इति । साधवो धर्मज्ञाः । युक्ताः नीतिमार्गनिष्ठाः । धर्मं अनुष्ठिताः अनुष्ठितवन्तः । "गत्यर्थाकर्मक—" इत्यादिना कर्तरि क्तः । सपरिच्छदाः सपरिवाराः ॥ १३ ॥ गोमायुना क्रोष्ट्रा । सहि मेषघातुक इति प्रसिद्धिः ॥ १४ ॥ कर्कशः क्रूरबुद्धिः ॥ १५ ॥ काकतालीयं यादृच्छिकं । घोरं भयंकरं इदं कृत्यं मया आसादितं ततो नाहं शोच्यः । नहि प्रमादविपन्नः शोच्य इति भावः । यद्वा ससैन्यस्त्वं विनशिष्यसीत्यत्रैव कृत्ये त्वं मे शोचनीयः बुद्धिपूर्वकारी त्वमेव हि शोच्य इति भावः । यद्वा ससैन्यो विनशिष्यसीति यत् तदिदं काकतालीयं घोरं कार्यं त्वया आसादितं । अत्रैव मया त्वं शोचनीयः हन्त दैवान्महानर्थो राक्ष उपस्थित इति शोचामीत्यर्थः ॥ १६ ॥ त्वयि विद्यमाने मम का हानिरित्याह—मामिति । नचिरात् क्षणेनैव । अहं न शोचनीय इत्यत्र हेतुमाह—अनेनेति । तत्कारिणा रामेण हतो म्रिये इति यत् अनेन हेतुना कृतकृत्योऽस्मि विश्वामित्रयागसंरक्षणप्रभृतिखरादिवधान्तातिमानुषचारित्रानुस्मृतिकृतासाधारणमहिमस्फूर्त्या राघवं परमपुरुषं निश्चितवतो मम तत्करप्रापितमरणस्य परमपुरुषार्थत्वादितिभावः । तथोक्तं नृसिंहपुराणे "रामादपि हि मर्तव्यं मर्तव्यं रावणादपि । उभयोरपि मर्तव्ये वरं रामान्न रावणात्" इति ॥ यद्वा त्वत्तो निरुपाधिकवधाच्छत्रुहस्ताद्वधो निःश्रेयसकर इति भावः ॥ १७—१९ ॥ उक्तमर्थं न्यायप्रदर्शनेन प्रतिपादयति—निवार्यमाण इति । हिहेतौ । यस्मात् गतायुषो नराः हितं न गृह्णन्ति तस्माद्वाक्यमिदं न मृष्यसे न सहसे । गतायुष्कत्वाद्धितं न गृह्णासीत्यर्थः । परेतकल्पाः आसन्नमरणाः । ईषदसमाप्तौ कल्पप्प्रत्ययः ॥ २० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकचत्वारिंशः सर्गः ॥ ४१ ॥

ति० राजतो बलान्मरणापेक्षया रणेशस्त्रतोमृत्योःस्वर्गदलादायमृत्योरपमृत्युत्वेनदुर्मरणत्वेनशास्त्रेऽके राक्षसामारितस्य शौचोदकदानाद्यभावश्रवणाद्रामतोमरणेन कृतकृत्योहमितिव्याख्यं । ईदृशज्ञानंचास्य तपसायोगेनचशुद्धचित्तत्वादितिबोध्यं ॥ १७ ॥ इत्येकचत्वारिंशस्सर्गः ॥ ४१ ॥

[पा०] १ ख. घ—ट. युक्तधर्मे. २ ग. ङ. छ. झ. ञ. ट. मृगाः. ३ क. थ. च. छ. ज. ञ. अत्रकिं. ङ. झ. ट. अत्रत्वंशोचनीयोसि. ४ घ. ङ. छ. झ. ञ. ड. रामोनाचिरात्. ५ ङ. झ. चाप्यरिणा. ६ घ. मांविद्धिरावण. ङ. झ. ढ. मामवधारय. ७ ब. त्वमपि. ८ ङ. झ. ञ. ट. नाहंवै. ९ ख. नापि.

द्विचत्वारिंशः सर्गः ॥ ४२ ॥

मारीचेनकृच्छ्राद्रावणनिदेशाभ्युपगमेनतेनसहरथाधिरोहणेनदण्डकारण्येरामाश्रमसमीपंप्रत्यागमनम् ॥ १ ॥ तथारावणस्वरूपराक्षसीदर्शनयोद्दीपनायसीतयाविचित्रमृगरूपपरिग्रहेणरामाश्रमद्वारिविक्रीडनम् ॥ २ ॥ कविनाचित्रमृगविहाराकाररामणीयकवर्णनम् ॥ ३ ॥ आश्रमाद्विर्गत्यकुसुमाभ्यवचिन्वन्त्यासीतयाऽद्भुततरंविहरमाणमायामृगविलोकनम् ॥ ४ ॥

एवमुक्त्वा तु वचनं मारीचो रावणं ततः ॥ गच्छावेत्यब्रवीद्दीनो भयाद्रात्रिंचरप्रभोः ॥ १ ॥
दृष्टश्चाहं पुनस्तेन शरचापासिधारिणा ॥ मद्बधोद्यतशस्त्रेण विनष्टं जीवितं च मे ॥ २ ॥
न हि रामं पराक्रम्य जीवन्प्रतिनिवर्तते ॥ वर्तते प्रतिरूपोसौ यमदण्डहतस्य ते ॥ ३ ॥
किंनु शक्यं मया कर्तुमेवं त्वयि दुरात्मनि ॥ एष गच्छाम्यहं तात स्वस्ति तेऽस्तु निशाचर ॥ ४ ॥
प्रहृष्टस्त्वभवत्तेन वचनेन स रावणः ॥ परिष्वज्य सुसंश्लिष्टमिदं वचनमब्रवीत् ॥ ५ ॥
एतच्छौण्डीर्ययुक्तं ते मच्छन्दादिव भाषितम् ॥ इदानीमसि मारीचः पूर्वमन्यो निशाचरः ॥ ६ ॥
आरुह्यतामयं शीघ्रं रथो रत्नविभूषितः ॥ मया सह तथा युक्तः पिशाचवदनैः खरैः ॥ ७ ॥
प्रलोभयित्वा वैदेहीं यथेष्टं गन्तुमर्हसि ॥ तां शून्ये प्रसभं सीतामानयिष्यामि मैथिलीम् ॥ ८ ॥
ततो रावणमारीचौ विमानमिव तं रथम् ॥ आरुह्य ययतुः शीघ्रं तस्मादाश्रममण्डलात् ॥ ९ ॥
तथैव तत्र पश्यन्तौ पत्तनानि वनानि च ॥ गिरींश्च सरितः सर्वा राष्ट्राणि नगराणि च ॥ १० ॥
समेत्य दण्डकारण्यं राघवस्याश्रमं ततः ॥ ददर्श सहमारीचो रावणो राक्षसाधिपः ॥ ११ ॥

क्षणं क्षणार्धमपि वा वियोगो यस्य दुःखदः । तमहं शिरसा वन्दे जानकीप्राणवल्लभम् ॥ भयात् रावणादधुनैव वधो भविष्यतीति भयात् ॥ १ ॥ दीन इत्युक्तं दौरात्म्यमुपपादयति—दृष्ट इत्यादिना । यद्यहं तेन दृष्टः तदा मे जीवितं विनष्टमित्यन्वयः ॥ २ ॥ यमदण्डहतस्य ते प्रतिरूपः सदृशः । असौ जनो वर्तते त्वमिवाहमपि यमदण्डहत इत्यर्थः ॥ ३—४ ॥ सुसंश्लिष्टं दृढं ॥ ५ ॥ शौण्डीर्यं वीरत्वं । "कृशृपृकटिपटिशौण्डिभ्यईरन्" इत्यौणादिकसूत्रेण शौण्डिगर्व इत्यस्मादीरन्प्रत्ययः । "शौण्डिरोवीरः" इति वृत्तिकारः । "शौण्डीरस्त्यागिनीरयोः" इति निघण्टुः । सत्कर्म तद्भावो वा शौण्डीर्यं । गुणवचनत्वात् ष्यञ् । शौण्डीर्ययुक्तमेतत्ते भाषितं मच्छन्दादिव मदभिप्रायादिव । भाषितं मत्सदृशं भाषितमित्यर्थः । पूर्वमन्यो यः कश्चन निशाचरोसि विक्लवभाषणात् । इदानीमारीचोसि मारीच इति लोकप्रसिद्धनामधेयानुरूपव्यापारोसि । स्वप्रकृतिं प्राप्तोसीत्यर्थः ॥ ६ ॥ तथेति समुच्चये । खरैर्युक्तो रत्नविभूषितश्चेत्यर्थः ॥ ७—८ ॥ तस्मात् मारीचयात् ॥ ९ ॥ तथैव रथरूढावेव । सहैव स्थितावित्यर्थः । पत्तनानि नगरविशेषान् । नगाः वृक्षाः सन्त्येष्विति नगराणि उद्यानाकीर्णपुराणीत्यर्थः । "नगपांसुपाण्डुभ्यश्च" इति मत्वर्थीयो रप्रत्ययः । नगरपत्तनादिलक्षणमुक्तं वास्तुशास्त्रे—"ग्रामश्च नगरं चैव पत्तनं खर्वटं पुरम् । खेटकं कुसुमं चैव शिबिरं राजवासिकम् । सेनामुखमितिख्यातं दशधा कीर्तितं बुधैः । विप्राणां च सभृत्यानां वासो ग्राम इतीरितः । स एव विप्रैराकीर्णस्त्वग्रहार इति स्मृतः । कुटुम्बिभेदैरेकोनत्रिंशद्भिश्च समन्वितः । अनेकनारीसंबद्धं नानाशिल्पिजनैर्वृतम् । क्रयविक्रयकैः कीर्णं सर्वदेवैः समन्वितम् । नगरं क्षिति विख्यातं पत्तनं शृणु साम्प्रतम् । द्वीपान्तरागतद्रव्यक्रयविक्रयकैर्युतम् । पत्तनं स्वब्धितीरे स्यात्तयोर्मिश्रं

स० यमदण्डहतस्य यमदण्डेनैवाहननस्य । प्रतिरूपः योग्यः ॥३ ॥ ति० मच्छन्दवशवर्तिनः मदभिप्रायवशवर्तिन ॥ ६ ॥ ति० खगः आकाशगामी रथः ॥ ७ ॥

[पा०] १ क. ख. ग. ङ—ट. परुषं. २ क. घ. ङ. ज. ञ. तदा. ३ ङ. ज्ञ. ट. निहतं. ४ ज्ञ. ट. किंतुकर्तुमयाशक्यमेवं. ५ ख. ग. ङ—ट. राक्षसः. ६ ज्ञ. ञ. ट. मच्छन्दवशवर्तिनः. ७ क. घ—ट. खगो. ८ क. ख. ग. ३—ट. रथो. ९ क. ख. घ. जानकीं. १० घ. विविधानिच.

अवतीर्य रथात्तस्मात्ततः काञ्चनभूषणात्॥ हस्ते गृहीत्वा मारीचं रावणो वाक्यमब्रवीत्॥ १२॥
एतद्रामाश्रमपदं दृश्यते कदलीवृतम्॥ कियतां तत्सखे शीघ्रं यदर्थं वयमागताः॥ १३॥
सं रावणवचः श्रुत्वा मारीचो राक्षसस्तदा॥ मृगो भूत्वाऽऽश्रमद्वारि रामस्य विचचार ह॥ १४॥
स तु रूपं समास्थाय महदद्भुतदर्शनम्॥ मणिप्रवरशृङ्गाग्रः सितासितमुखाकृतिः॥ १५॥
रक्तपद्मोत्पलमुख इन्द्रनीलोत्पलप्रभः॥ किंचिदभ्युन्नतग्रीव इन्द्रनीलदलाधरः॥ १६॥
कुन्देन्दुवज्रसंकाशमुदरं चास्य भास्वरम्॥ मेचकनिभपार्श्वश्च पद्मकिञ्जल्कसन्निभः॥ १७॥
वैदूर्यसंकाशखुरस्तनुजङ्घः सुसंहतः॥ इन्द्रायुधसवर्णेन पुच्छेनोर्ध्वं विराजता॥ १८॥
मनोहरः स्निग्धवर्णो रत्नैर्नानाविधैर्वृतः॥ क्षणेन राक्षसो जातो मृगः परमशोभनः॥
वनं प्रज्वलयन्रम्यं रामाश्रमपदं च तत्॥ १९॥
मनोहरं दर्शनीयं रूपं कृत्वा स राक्षसः॥ प्रलोभनार्थं वैदेह्या नानाधातुविचित्रितम्॥
विचरन्गच्छते तस्मिंश्छाद्वलानि समन्ततः॥ २०॥
रूप्यबिन्दुशतैश्चित्रो भूत्वा स प्रियदर्शनः॥ विटपीनां किसलयान्भक्षयन्विचचार ह॥ २१॥

स्तु खर्वटम्। क्रयविक्रयकैर्युक्तं नानाजातिसमन्वितम्। तन्तुवायसमायुक्तं तत्पुरं खिति कथ्यते। एतैरधिष्ठितं यत्तत्खेटकं परिकीर्तितम्। तेषामेकान्तरेष्वेव वासः कुसुममुच्यते—" इत्यादिना॥ १०—११॥ हस्ते गृहीत्येतेनावश्यकत्वं द्योत्यते॥ १२॥ यदर्थं यत्कार्यार्थं। सत् कार्यं। क्रियतां आगमप्रयोजननिर्वाहकं मृगरूपं भजस्वेत्यर्थः॥ १३—१४॥ संग्रहेणोक्तं विवृणोति—स खित्यादिना। अद्भुतं विस्मयावहं दर्शनं यस्य तत्तथा। मणिप्रवरः इन्द्रनीलस्तत्तुल्ये शृङ्गाग्रे यस्य स तथा। क्वचित्सिता—क्वचिदसिता च मुखस्याकृतिः शोभारेखा यस्य। "वर्णोवर्णेन" इति समानाधिकरणसमासः। अवयवद्वारेण सितासितशब्दौ समुदाये वर्तमानौ समानाधिकरणौ भवतः॥ १५॥ रक्तपद्मोत्पलमुखः मुखपुटयोरेकोरक्तपद्मवर्णः अन्यस्तूत्पलवर्ण इत्यर्थः। इन्द्रनीलोत्पलप्रभः अक्षसोरिन्द्रनीलसादृश्यं नीलभास्वररूपेण। उत्पलसादृश्यं रूपेण। इन्द्रनीलदलवदधरो यस्य स तथा॥ १६॥ अस्य मृगरूपस्य कुन्देन्दुवज्रसंकाशमुदरमासीत्। तस्मात्सादृश्योदर इति विपरिणमयितव्यं। अन्यथा पूर्वापरविरोधः। मधूकनिभपार्श्वः गुडपुष्पतुल्यवर्णैकपार्श्वः। पार्श्वान्तरे हेमवर्णस्य वक्ष्यमाणत्वात्। पद्मकिञ्जल्कसन्निभः उक्तावयवव्यतिरिक्तपृष्ठसर्वप्रदेशे पद्मकेसरवर्णः॥ १७॥ सुसंहतः सुश्लिष्टसंधिबन्धः। ऊर्ध्वं पुच्छोर्ध्वपार्श्वे। इन्द्रायुधसवर्णेन इन्द्रधनुर्वर्णानावर्णेन। पुच्छेनोपलक्षितः॥ १८॥ स्निग्धवर्ण इति पूर्वोक्तसर्ववर्णानां स्निग्धत्वं विशेषणं। रत्नैः रत्नाकारबिन्दुभिः। उपसंहरति—क्षणेनेति। प्रज्वलयन् प्रकाशयन्। मृगो जात इति पूर्वेणान्वयः॥ १९॥ मनोहरमित्यादिसार्धश्लोक एकान्वयः। धातुवर्णः। शाद्वलानि शादाः बालतृणानि "शादोऽस्त्रालशष्पयोः" इत्यमरः। तद्वन्ति स्थलानि शाद्वलानि। "नडशादाद्वलच्" इतिवलच्प्रत्ययः। विचरन् भक्षयन्। चर गतिभक्षणयोः। गच्छते गच्छति॥ २०॥ विटपीनामिति दीर्घश्छान्दसः। किस-

---

स० वयमितिबहुवचनं "अस्मदोद्वयोश्च" इतिसंभवति। विशेषविशेषणत्वात्सविशेषणस्यप्रयुक्तप्रतिषेधाभावश्च॥ १३॥ कलक० मणिशब्दः केवलइन्द्रनीले इतिकविसमयः॥ १५॥

[पा०] १ ख. तप्तकाञ्चन, २ क. ग. एतत्तदाश्रम. ३ ख. ज. ञ. ट. रावणस्यवचः, ४ ख. रक्तनीलोत्पलमुखः, ५ ख. नीलोपम. ६ क. ङ. दत्युन्नत. ७ क. ख. ङ—ट. निभोदरः, ग. घ. तलोदरः, ८ इदमर्धं क—ट. पुस्तकेषुनदृश्यते, ९ क. मयूरनिभपार्श्वश्च, ख. मयूरनिभपार्श्वयं. १० ङ. ङ, ट. कलकिञ्जल्क. ११ ख. ग. विचरंश्चवनंसर्वेशाद्वलानि. १२ क. च. छ. ज. ञ. सम्यक्छाद्वलानि. ङ. ङ. ट. शर्ष्पशाद्वलानि. १३ ङ—ट. रौप्यैर्बिन्दुशतैः क. ख. रूप्यबिन्दुशतैः. १४ क. ख. ग. ङ—ज. ञ. भूत्वाच. १५ क. ख. ग. ङ.—ट. प्रियनन्दन. १६ ङ. ङ. ट. भक्षयन्विचचार.

कदलीगृहकं गत्वा कर्णिकारानितस्ततः ॥ समाश्रयन्मन्दगतिः सीतासंदर्शनं तथा ॥ २२ ॥
राजीवचित्रपृष्ठः स विरराज महामृगः ॥ रामाश्रमपदाभ्याशे विचचार यथासुखम् ॥ २३ ॥
पुनर्गत्वा निवृत्तश्च विचचार मृगोत्तमः ॥ गत्वा मुहूर्तं त्वरया पुनः प्रतिनिवर्तते ॥ २४ ॥
विक्रीडंश्च क्वचिद्भूमौ पुनरेव निषीदति ॥ आश्रमद्वारमागम्य मृगयूथानि गच्छति
मृगयूथैरनुगतः पुनरेव निवर्तते ॥ २५ ॥
सीतादर्शनमाकाङ्क्षन्राक्षसो मृगतां गतः ॥ परिभ्रमति चित्राणि मण्डलानि विनिष्पतन् ॥
[समीपे मृगयूथस्य विस्मितानि विशेषतः] ॥ २६ ॥
समुद्वीक्ष्य च तं सर्वे मृगा ह्यन्ये वनेचराः ॥ उपागम्य समाघ्राय विद्रवन्ति दिशो दश ॥ २७ ॥
राक्षसः सोपि तान्वन्यान्मृगान्मृगवधे रतः ॥ प्रच्छादनार्थं भावस्य न भक्षयति संस्पृशन् ॥२८॥
तस्मिन्नेव ततः काले वैदेही शुभलोचना ॥ कुसुमापचयव्यग्रा पादपानभ्यवर्तत ॥ २९ ॥
कर्णिकारानशोकांश्च चूतांश्च मदिरेक्षणा ॥ कुसुमान्यपचिन्वन्ती चचार रुचिरानना ॥ ३० ॥
अनर्हाऽरण्यवासस्य सा तं रत्नमयं मृगम् ॥ मुक्तामणिविचित्राङ्गं ददर्श परमाङ्गना ॥ ३१ ॥
सा तं रुचिरदन्तोष्ठी रूप्यधातुतनूरुहम् ॥ विस्मयोत्फुल्लनयना सस्नेहं समुदैक्षत ॥ ३२ ॥

लयान् पल्लवान् । पुंल्लिङ्गत्वमार्षं ॥ २१ ॥ कदलीगृहकं कृत्रिमकदलीमयगृहं । तदनन्तरं कर्णिकारान् गत्वा ततः सीता संदृश्यतेऽस्मिन्निति सीतासंदर्शनं अधिकरणे ल्युट् । सीतासंदर्शनयोग्यस्थानमित्यर्थः । तथेति समुच्चये । तदपि गत्वा मन्दगतिः सन् इतस्ततः समाश्रयत् ॥ २२ ॥ राजीवचित्रपृष्ठः राजीवकेसरवदाश्चर्यकरपृष्ठदेशः । चित्रत्वं पूर्वस्माद्विशेषः । रामाश्रमपदाभ्याशे रामाश्रमस्थानसमीपे ॥ २३ ॥ पुनर्गत्वेति पुनर्निवृत्तश्चेत्यन्वयः । निवृत्य गमनमुक्त्वा गत्वानिवर्तनमाह—गत्वेति ॥ २४ ॥ एवं गमनागमनाभ्यां विक्रीडन्सन् पुनः क्वचित्तूष्णीं निषीदति ॥ २५ ॥ विनिष्पतन् संचरन् ॥ २६ ॥ समाघ्रायेति घ्राणेन विशेषं जानन्ति तिर्यञ्च इति प्रसिद्धिः ॥२७॥ भावस्य क्रौर्यस्य । प्रच्छादनार्थं मृगवधे रतोपि मृगान्न भक्षयति । किंतु संस्पृशन्नास्ते ॥ २८ ॥ ततः आश्रमात् । अभ्यवर्ततेत्यन्वयः ॥ २९ ॥ मदिरं आनन्दजनकं ईक्षणं यस्याः सा मदिरेक्षणा । अनेन रुचिराननेत्यनेन च वक्ष्यमाणकार्योपयोग्युल्लासो द्योत्यते ॥ ३० ॥ अरण्यवासस्यानर्हेत्यनेन सन्निहितव्रतसमाप्तिकालत्वकथनान्मृगग्रहणत्वरातिशयो द्योत्यते । रत्नमयं श्रेष्ठभूतं । स्वार्थे मयट् । "रत्नं स्वजातौ श्रेष्ठेपि" इत्यमरः । मुक्तामणिशब्देन तत्तुल्यबिन्दुमत्त्वमुक्तं ॥ ३१ ॥ रुचिरदन्तोष्ठीत्यनेन कुतुकानुभाव उक्तः । रूप्यं रजतं धातवः ताम्रगैरिकादयः तत्तुल्यतनूरुहं । "तनूरुहं रोम लोम" इत्यमरः

ति० कदलीगृहं कदलीवाटिकां कर्णिकारान् तद्वनंच गत्वा त्यक्त्वा । सीतासंदर्शनमपेक्ष्य इतस्ततोमन्दगतिंसमाश्रयन्विचचार विरराजच ॥ २२—२३ ॥ ति० अपचयः ग्रहणं । अत्राशोकचूतकुसुमानामपचयोक्त्या शिशिरान्तकालोयं । "गन्धवान्सुरभिर्मासो जातपुष्पफलद्रुमः" इति "संतापयतिसौमित्रे शूरश्चैत्रवनानिलः" इतिच पंपातीरेरामोक्तेश्च । किंच अग्रे द्वादशमासोत्तरंयद्येषा मां नाङ्गीकरोतितदैनांहन्मीतिरावणप्रतिज्ञा । ततोहनुमद्दर्शनकालेच तंप्रतिसीतावाक्यं "वर्ततेदशमो मासोद्वौतुशेषौप्लवङ्गम" इतिसंगच्छते । माघशुक्लाष्टम्यांहरणेहि मार्गशुक्लाष्टम्यां ततोऽर्वागेववा दशमसमाप्त्या तस्यवर्तमानत्वोक्तिरसंगतैवस्यात् । तच्छुक्लपक्षान्तेहनूमतस्तद्दर्शनात् ॥ ३० ॥

[पा०] १ झ. न्मन्दगतिं. २ च. छ. ज. ञ. तदा. ङ. झ. ट. ततः. ३ क. ङ.—ज. ञ. पृष्ठश्च. ४ च. छ. ज. मृगोत्तमः. ५ क—ट. पुनर्भूमौ. ६ ख. घ. मण्डलान्यभिनिष्पतन्. ७ इदमर्धं च. छ. ज. पाठेषुदृश्यते. ८ ङ—ट. उपगम्य. ९ ङ—ट. कुसुमापचये. १० झ. ञ. ट. नत्यवर्तत. ११ ङ. झ. ट. अनर्हावनवासस्य. १२ ख. रत्नविभूषितं. १३ ङ. झ. ट. तंवै. ख. तंसा. १४ ख. झ. रुचिरदन्तोष्ठं.

स च तां रामदयितां पश्यन्मायामयो मृगः ॥ विचचार पुनश्चित्रं दीपयन्निव तद्वनम् ॥ ३३ ॥
अदृष्टपूर्वं तं दृष्ट्वा नानारत्नमयं मृगम् ॥ विस्मयं परमं सीता जगाम जनकात्मजा ॥ ३४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

सीतयाहर्षादाह्वानेनरामलक्ष्मणाभ्यांमायामृगप्रदर्शनम् ॥ १ ॥ लक्ष्मणेनरामंप्रतिमृगस्यरत्नमयत्वासंभवरूपहेतूक्त्यामारीचमायामयत्वाभिधानेपिसीतयातन्निवारणपूर्वकंरामंप्रतिमृगेस्वस्योत्कण्ठाविष्करणेनतदानयनप्रार्थना ॥ २ ॥ रामेणलक्ष्मणंप्रतिमृगस्यमारीचत्वपक्षेपिअगस्त्येनवातापेरिवस्वेनतस्यावश्यंहन्तव्यत्वोक्त्यातद्धननेनतदीयचर्मानयनप्रतिज्ञानपूर्वकंतावत्सीतारक्षणचोदना ॥ ३ ॥

सा तं संप्रेक्ष्य सुश्रोणी कुसुमान्यपचिन्वती ॥ हैमराजतवर्णाभ्यां पार्श्वाभ्यामुपशोभितम् ॥ १ ॥
प्रहृष्टा चानवद्याङ्गी मृष्टहाटकवर्णिनी ॥ भर्तारमभिचक्रन्द लक्ष्मणं चापि सायुधम् ॥ २ ॥
[आहूयाहूय च पुनस्तं मृगं साधु वीक्षते ॥ आगच्छागच्छ शीघ्रं वै आर्यपुत्र सहानुजः] ॥ ३ ॥
तयाऽऽहूतौ नरव्याघ्रौ वैदेह्या रामलक्ष्मणौ ॥ वीक्षमाणौ तु तं देशं तदा ददृशतुर्मृगम् ॥ ४ ॥
शङ्कमानस्तु तं दृष्ट्वा लक्ष्मणो राममब्रवीत् ॥ तमेवैनमहं मन्ये मारीचं राक्षसं मृगम् ॥ ५ ॥
चरन्तो मृगयां हृष्टाः पापेनोपाधिना वने ॥ अनेन निहता राजन्राजानः कामरूपिणा ॥ ६ ॥
अस्य मायाविदो माया मृगरूपमिदं कृतम् ॥ भानुमत्पुरुषव्याघ्र गन्धर्वपुरसन्निभम् ॥ ७ ॥
मृगो ह्येवंविधो रत्नविचित्रो नास्ति राघव ॥ जगत्यां जगतीनाथ मायैषा हि न संशयः ॥ ८ ॥
एवं ब्रुवाणं काकुत्स्थं प्रतिवार्य शुचिस्मिता ॥ उवाच सीता संहृष्टा चर्मणा हृतचेतना ॥ ९ ॥

॥ ३२ ॥ दीपयन् प्रकाशयन् ॥ ३३—३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्विचत्वारिंशः सर्गः ॥ ४२ ॥

सीतायास्त्वेकनाथायाः पूरयिष्यन्मनोरथम् । मायामृगं योनुययौ श्रीरामं तमुपास्महे ॥ हैमराजतवर्णाभ्यामित्यनेन द्वयोः पार्श्वयोर्वर्णभेद उच्यते । मृष्टं शुद्धं हाटकं सुवर्णं तस्य वर्णोस्या अस्तीति तथा । " स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकं " इत्यमरः । अभिचक्रन्द उच्चैराह्वयत् । क्रदि आह्वाने रोदने चेति धातुः । सायुधमित्यनेन आयुधेनसहागन्तव्यमित्याहूतवतीति गम्यते ॥ १—५ ॥ मृगयां चरन्तः मृगयार्थं पर्यटन्तो राजानः । अनेन पापेन मृगरूपोपाधिनानिमित्तेन हताः ॥ ६ ॥ मायां वेत्तीति मायावित् अस्य । मायैव मृगरूपंकृतं मृगाकारेण परिणतं । भानुमत् प्रकाशवत् । गन्धर्वपुरं नानाविधविस्मयनीयाकारसंस्थानं क्षणभङ्गुरमभ्रं तत्सन्निभं तद्वद्विस्मयनीयमित्यर्थः ॥ ७ ॥ जगत्यां भूमौ ॥ ८ ॥ काकुत्स्थं प्रतिवार्य निवर्त्य । उवाच राममिति शेषः ।

स० विस्मयंजगाम जगामेव ॥ ३४ ॥ इतिद्विचत्वारिंशस्सर्गः ॥ ४२ ॥

स० हैमंचराजतंच । स्वार्थेऽण् । तयोर्वर्णाविववर्णोययोस्ताभ्यां ॥ १ ॥ चक्रन्देति रोदनार्थेन भाव्यशुभमितिसूचितंकविना ॥ २ ॥ स० अयंमायावीतिजानन्त्यपि छद्मनावञ्चनेनहृतचेतनेवोवाच ॥ ९ ॥

[पा०] १ क. ङ. झ. ञ. ट. ततस्तत्र. २ क.—ट. दृष्ट्वातं. ३ क.—ट. कुसुमानिविचिन्वती. ४ ङ. छ. झ. ञ. हेमराजत. ५ क. ख. घ. च. भर्तारमपिचाक्रन्दल्लक्ष्मणं. झ. भर्तारमपिचक्रन्द. ६ क—ट. चैव. ७ अयंश्लोकः ङ. झ. ट. पाठेषुदृश्यते. ८ ख. ङ. झ. ट. तावाहूतौ. ९ ङ. झ. ट. वाक्यमब्रवीत्. १० क. ख. ङ. झ. ट. रामराजानः. ११ ङ. झ. ट. पापरूपिण्या. १२ ग. मन्ये. १३ ख. घ. मायाविनो. १४ घ. सुमतेपुरुष. १५ क. सौमित्रिं. १६ च. छ. ज. ञ. परिवार्य. १७ झ. ञ. ट. छद्मना. क. च. छ. ञ. मृगेण. १८ ग. हृतलोचना.

आर्यपुत्राभिरामोसौ मृगो हरति मे[1] मनः ॥ आनयैनं महाबाहो क्रीडार्थं नो भविष्यति ॥ १० ॥
इहाश्रमपदेऽस्माकं बहवः पुण्यदर्शनाः ॥ मृगाश्चरन्ति सहिताः सैमराश्चमरास्तथा ॥ ११ ॥
ऋक्षाः पृषतसङ्घाश्च वानराः किन्नरास्तथा ॥ विचरन्ति महाबाहो रूपश्रेष्ठा मनोहराः ॥ १२ ॥
न चास्य सदृशो राजन्दृष्टपूर्वो मृगः पुरा ॥ तेजसा क्षमया दीप्त्या यथाऽयं मृगसत्तमः ॥ १३ ॥
नानावर्णविचित्राङ्गो रत्नबिन्दुसमाचितः ॥ द्योतयन्वनमव्यग्रं शोभते शशिसन्निभः ॥ १४ ॥
अहो रूपमहो लक्ष्मीः स्वरसंपच्च शोभना ॥ मृगोऽद्भुतो विचित्राङ्गो हृदयं हरतीव मे ॥ १५ ॥
यदि ग्रहणमभ्येति जीवन्नेव मृगस्तव ॥ आश्चर्यभूतं भवति विस्मयं जनयिष्यति ॥ १६ ॥
समाप्तवनवासानां राज्यस्थानां च नः पुनः ॥ अन्तःपुरविभूषार्थो मृग एष भविष्यति ॥ १७ ॥
भरतस्यार्यपुत्रस्य श्वश्रूणां मम च प्रभो ॥ मृगरूपमिदं व्यक्तं विस्मयं जनयिष्यति ॥ १८ ॥
जीवन्न यदि तेऽभ्येति ग्रहणं मृगसत्तमः ॥ अजिनं नरशार्दूल रुचिरं मे भविष्यति ॥ १९ ॥
निहतस्यास्य सत्त्वस्य जाम्बूनदमयत्वचि ॥ शष्पबृस्यां विनीतायामिच्छाम्यहमुपासितुम् ॥ २० ॥
कामवृत्तमिदं रौद्रं स्त्रीणामसदृशं मतम् ॥ वपुषा त्वस्य सत्त्वस्य विस्मयो जनितो मम ॥ २१ ॥

तत्र हेतुःचर्मणेति । हृतचेतना हृतप्रज्ञा ॥ ९ ॥ नो भविष्यति नः भविष्यति । नभविष्यतीत्यपि वा-दोषः ॥ १० ॥ सहिताः सङ्घीभूताः । सृमराः व्यालमृगाः । " सृमरः स्याद्व्यालमृगः " इति वैजयन्ती । चमराः चामरमृगाः । ऋक्षाः भल्लूकाः । पृषताः बिन्दुमृगाः । किन्नराः मृगविशेषाः ॥ ११—१२ ॥ तेजसा वर्णेन । क्षमया अवस्थया । दीप्त्या शारीरप्रकाशेन । यथाऽयं मृगो दृश्यते तथा तेजआदिभिः अस्य सदृशो मृगो न दृष्टपूर्वः । पुरा भाविकालेपि । न दृश्यत इति शेषः । " स्यात्प्रबन्धे चिरातीते निकटागामिके पुरा " इत्यमरः ॥ १३ ॥ समाचितः व्याप्तः । अव्यग्रं समग्रंयथा तथा शोभते । शशिसन्निभः आनन्दकरत्वेन शशिसाम्यं ॥ १४ ॥ रूपं वर्णः । लक्ष्मीः कान्तिः । उक्तानुवादपूर्वकं मनोहरत्वमाह—मृगइति । अतो न पूर्वार्धेन गतार्थता ॥ १५ ॥ श्लोकद्वयमेकान्वयं । तवमहणं त्वत्कर्तृकम-हणं । कर्तरि षष्ठी । तदा एष मृगः आश्चर्यभूतं अस्माकं विस्मयावहं सत्त्वं भवति इदानीमिति शेषः । समाप्तवनवासानां अतएव पुनः राज्यस्थानां च नः विस्मयं जनयिष्यति । किंच अन्तःपुरविभूषार्थोपि भविष्यति ॥ १६—१७ ॥ आर्यपुत्रस्य तव । श्वश्रूणां ममश्वश्रूणां चेति योजना । मृगरूपं प्रशस्तमृगः । प्रशंसायां रूपप् प्रत्ययः । मृगस्य रूपं वा ॥ १८ ॥ जीवतः अग्रहणेपि प्रयोजनमाह—जीवन्निति । अजिनं चर्म । रुचिरं प्रियं ॥ १९ ॥ प्रियत्वमेव विवृणोति—निहतस्येति । जाम्बूनदमयत्वचि स्वर्णस-दृशत्वचि । शष्पबृस्यां बालतृणैःकृतायांबृस्यां । मध्यम-पदलोपिसमासः । " प्रतिनासासनं बृसी " इत्यमरः । तस्यां विनीतायां आस्तृतायां । उक्तरूपत्वचि उपा-सितुं स्थातुं । इच्छामि त्वयासहेति शेषः ॥ २० ॥ अथ सविनयमाह—कामवृत्तमिति । रौद्रं घोरं । इदं कामवृत्तं भर्तृप्रेरणरूपस्वेच्छाव्यापारः । स्त्रीणां असदृशं अयुक्तं । कैकेयीवत् । तथाप्यस्य सत्त्वस्य तु वपुषा विलक्षणदेहेन । मम विस्मयो जनितः ममा-त्यन्तं कुतूहलं वर्तते । आनयेति वक्तुमप्ययुक्तं अतः स्वापि कुतूहलमस्ति चेत्तथा क्रियतामिति भावः ।

ति० नोस्माकं । अयोध्यागमनोत्सवं तत्रसख्यभिप्रायेण बहुवचनं ॥ १० ॥ ति० सृमरश्चमरौ कृष्णशुक्लपुच्छौ ॥ ११ ॥

[पा] १ ख. छ. ज. ञ. मन्मनः. २ ग—ट. चमरास्सृमरास्तथा. ३ क. झ. ट. विहरन्ति. ४ क. ख. ग. ङ—ट. महाबलाः. ५ क. झ. ट. चान्यः. ६ झ. न्दृष्टःपूर्व. ७ क. झ. ट. मृगोमया. ८ क. झ. रत्नभूतोमभाप्रतः. छ. ट. रत्नबिन्दुसमन्वितः. ९ ग. घ. च. छ. ज. ञ. मव्यप्र'. १० क. झ. ट. शोभते. ११ ग. घ. छ. ज. विचित्रोसौ. १२ ख. भूतो. घ. च. ज. रूपं. १३ झ. अन्तःपुरेविभूषार्थो. क. ट. अन्तःपुरेपिभूषार्थो. १४ ख. चमम. १५ क. झ. ट. दिव्यं. १६ क. झ. ट. रुचिरंतु.

तेन काञ्चनरौप्येण तु मणिप्रवरशृङ्गिणा ॥ तरुणादित्यवर्णेन नक्षत्रपथवर्चसा ॥
बभूव राघवस्यापि मनो विस्मयमागतम् ॥ २२ ॥
एवं सीतावचः श्रुत्वा तं दृष्ट्वा मृगमद्भुतम् ॥ लोभितस्तेन रूपेण सीतया च प्रचोदितः ॥
उवाच राघवो हृष्टो भ्रातरं लक्ष्मणं वचः ॥ २३ ॥
पश्य लक्ष्मण वैदेह्याः स्पृहां मृगगतामिमाम् ॥ रूपश्रेष्ठतया ह्येष मृगोऽद्य न भविष्यति ॥ २४ ॥
न वने नन्दनोद्देशे न चैत्ररथसंश्रये ॥ कुतः पृथिव्यां सौमित्रे योऽस्य कश्चित्समो मृगः ॥ २५ ॥
प्रतिलोमानुलोमाश्च रुचिरा रोमराजयः ॥ शोभन्ते मृगमाश्रित्य चित्राः कनकबिन्दुभिः ॥ २६ ॥
पश्यास्य जृम्भमाणस्य दीप्तामग्निशिखोपमाम् ॥ जिह्वां मुखान्निस्सरन्तीं मेघादिव शतह्रदाम् ॥२७॥
मैसारगल्वर्कमुखः शङ्खमुक्तानिभोदरः ॥ कस्य नाभिरूपोसौ न मनो लोभयेन्मृगः ॥ २८ ॥
कस्य रूपमिदं दृष्ट्वा जाम्बूनदमयं प्रभो ॥ नानारत्नमयं दिव्यं न मनो विस्मयं व्रजेत् ॥
[किं पुनर्मैथिली सीता बाला नारी न विस्मयेत् ॥ २९ ॥]
मांसहेतोरपि मृगान्विहारार्थं च धन्विनः ॥ घ्नन्ति लक्ष्मण राजानो मृगयायां महावने ॥ ३० ॥
धनानि व्यवसायेन विचीयन्ते महावने ॥ धातवो विविधाश्चापि मणिरत्नसुवर्णिनः ॥ ३१ ॥

अनेन पूर्वमानयेति प्रमादादुक्तस्य क्षमापणं कृतं ॥ २१ ॥ न केवलं स्त्रीपारवश्येन कृतवान् किंतु स्वविस्मयेनापीत्याह—तेनेत्यादिना । मणिप्रवरो नीलरत्नं । काञ्चनवर्णरोमत्वात् बालसूर्यवर्णत्वं । नक्षत्रपथः छायापथः तत्तुल्यवर्चसा । नक्षत्रसदृशबिन्दूपलक्षितत्वात् । आगतं प्राप्तं ॥ २२ ॥ रूपेण मृगेण । "रूपं मृगेपि विज्ञेयं" इतिहलायुधः ॥ २३ ॥ पश्येति । सीता स्पृहायुक्तेतिभावः । तत्र हेतुमाह—रूपेति । मृगेषुश्रेष्ठतयावा एष मृगः एतादृशमृगः । अद्य वनवासे न भविष्यति न स्थास्यति । दुर्लभ इत्यर्थः ॥ २४ ॥ नकेवलमत्र देशान्तरेपि दुर्लभ इत्याह—न वन इति । नन्दन इत्युद्देशः । कीर्तनं यस्य तस्मिन् वने चैत्ररथसंश्रये चैत्ररथाख्ये वने च । न भविष्यतीत्यनुषज्यते । पृथिव्यां कुतो हेतोर्भविष्यति ॥२५॥ प्रतिलोमाः तिर्यग्भूताः । अनुलोमाः अनुकूलाः । रोमराजयश्च मृगमाश्रित्य दृश्यन्ते । चित्राः आश्चर्यभूताः । कनकबिन्दवः कनकवर्णबिन्दवश्च । मृगमाश्रित्य शोभन्ते ॥ २६ ॥ शतह्रदां तटितं ॥२७॥ मसारः इन्द्रनीलः । गल्वर्कः चषकः । "गल्वर्कश्चानुतर्षश्च तर्षकश्चषकः स्मृतः" इति हलायुधः । इन्द्रनीलनिर्मितचषकाकारमुखसंपुट इत्यर्थः । अभिरूपः सुन्दरः ॥ २८ ॥ रूपं मृगं । जाम्बूनदमयेति स्वार्थे मयट् । नानारत्नमयं नानाबिन्दुप्रचुरं ॥ २९ ॥ मांसहेतोरपि विनोदार्थं च राजानो मृगान् घ्नन्ति । किं पुनरेवंविधविचित्रवस्तुलाभहेतोरिति भावः ॥ ३० ॥ एतन्मृगरूपं महद्धनं एतच्च वन एव संभवति तस्मादिदं व्यवसायेन स्वीकर्तव्यमित्यभिप्रायेणाह—धनानीति । मणिरत्नं मणिश्रेष्ठं सुवर्णं च मणिरत्नसुवर्णे ते येषु ते इति मणिरत्नसुवर्णिनः । मणयः सुवर्णानि च धातुषु भवन्तीति प्रसिद्धिः । तथाभूता विविधा धातवश्च धनानि करिमस्तकमुक्ताप्रभृतीनि । महावने व्यवसायेन मृगयोर्योगेन । राजभिः विचीयन्ते संगृह्यन्ते । यद्वा धनानि व्यवसायेन मृगयोद्योगेन । महावने विचीयन्ते । ननु कुतो वने

स्व० काञ्चनरूपेणेतिपाठे काञ्चनात्मकेन काञ्चनमृगेणेतिवा । "रूपंमृगेऽपिविज्ञेयं" इतिहलः । नक्षत्रपथवर्चसा नक्षत्रसदृशनानाबिन्दूपलक्षिततयातत्पथवर्चोःतेन ॥ २२ ॥ ति० सर्वश्रेष्ठरूपेणहेतुना अद्यैषमृगो नमविष्यति नजीविष्यति । जीवनमस्य नसंभावितमित्यर्थः ॥ कतक० प्रायेणमृगत्वमत्र नसंभावितमित्यर्थः ॥ २४ ॥ ति० योऽस्यकश्चित्समोमृगः सः पृथिव्यामस्तीतिकुतस्तंभाव्यतइत्यर्थः ॥ स्व० चैत्ररथसंश्रये चैत्ररथाभिख्यस्संश्रयः नानावृक्षाश्रयः कुबेरवनं ॥ २५ ॥

[पा०] १ ङ. ञ. ट. इति. २ क—ट. दृष्ट्वाच. ख. दृष्ट्वातु. ३ ग. बालार्कोभमुखःशङ्खमुक्तामणिमनोहरः क. ख. घ. मसारगल्वर्क. ४ ख. ग. नाभानुरूपः. ङ. छ—ट. नाभामिरूपोसौ. घ. नाभातिरूपोसौ. ५ क—ट. मयप्रभं. ६ ग. रम्यं. ७ इदमर्धं क—ट. पुस्तकेषुनदृश्यते. ८ घ. वैव.

तत्सारमखिलं नृणां धनं निचयवर्धनम् ॥ मनसा चिन्तितं सर्वं यथा शुक्रस्य लक्ष्मण ॥ ३२ ॥
अर्थी येनार्थकृत्येन संव्रजत्यविचारयन् ॥ तमर्थमर्थशास्त्रज्ञाः प्राहुरर्थ्याश्च लक्ष्मण ॥ ३३ ॥
एतस्य मृगरत्नस्य परार्ध्ये काञ्चनत्वचि ॥ उपवेक्ष्यति वैदेही मया सह सुमध्यमा ॥ ३४ ॥
न कादली न प्रियकी न प्रवेणी न चाविकी ॥ भवेदेतस्य सदृशी स्पर्शनेनेति मे मतिः ॥ ३५ ॥
एष चैव मृगः श्रीमान्यश्च दिव्यो नभश्चरः ॥ उभावेतौ मृगौ दिव्यौ तारामृगमहीमृगौ ॥ ३६ ॥
यदि वाऽयं तथा यन्मां भवेद्वदसि लक्ष्मण ॥ मायैषा राक्षसस्येति कर्तव्योऽस्य वधो मया ॥ ३७ ॥
एतेन हि नृशंसेन मारीचेनाकृतात्मना ॥ वने विचरता पूर्वं हिंसिता मुनिपुङ्गवाः ॥ ३८ ॥

धनसंग्रहप्रसक्तिरित्याह—धातव इति । यस्मादुक्तरूपा विविधा धातवः सन्ति तस्मादित्यर्थः ॥ ३१ ॥ सेषां धनानां सारं श्रेष्ठभूतं । अखिलं धनं नृणां निचयवर्धनं कोशवर्धनं भवेत् । किमिव शुक्रस्य मनसा चिन्तितं संकल्पितंवस्तुजातम् । तथैवाविर्भूयनिचयवर्धनंयथा । तद्वदित्यर्थः । यद्वा नृणां मनसा चिन्तितं वृथामनोरथकल्पितं सर्वं धनं यथा शुक्रस्य कोशं पूरयति तथेत्यर्थः । तदुक्तमुद्योगपर्वणि । " मनुष्येभ्यः समादत्ते शुक्रश्चिन्तार्जितं धनं " इति । यद्वा नृणां राजादिधनिनां । कोशवर्धनं तत् वन्यं धनं । सारं भवति । जानपदधनादपि वन्यं धनं सारं अतिप्रशस्तंभवति । अपूर्वत्वात् । अतोनियुक्तवनवासैरस्मामिर्वनादपूर्वधनतया पुरी नेतुमयं ग्रहीतव्य इति भावः ॥ ३२ ॥ अस्तिवं अथापिविचार्य कार्यमिति चेत्तत्राह—अर्थीति । अर्थी असन्निहितार्थापेक्षी ।"अर्थाद्वासन्निहिते" इति इनिप्रत्ययः । सः येन अर्थकृत्येन अर्थकार्येणहेतुना । अविचारयन् संव्रजति सम्यग्गच्छति यद्वस्तुसौन्दर्यजातोपकारलोभेन पुरुषस्तत्साधनेष्वयत्नःप्रवर्तते तमेवार्थं प्राहुः । अर्थशास्त्रज्ञाः नीतिशास्त्रज्ञाः । अर्थ्याः अर्थार्दनपेताश्च । "अर्थ्योभिक्षार्थशालिनोः" इत्यजयः । "धर्मपथ्यर्थन्यायादनपेते" इतियत्प्रत्ययः । यस्य गुणप्रीतः पुरुषः अभिनिविशते सएवार्थ इति नीतिशास्त्रज्ञा अर्थवन्तस्माहुः । अयंच तथाविधहृतिभावः ॥ ३३ ॥ एवं प्रयत्नसंपाद्यं वस्त्वयमेव मृग इत्यभिप्रायेणाह—एतस्येति । मृगरत्नस्य मृगश्रेष्ठस्य । परार्ध्ये श्राघ्ये । काञ्चनत्वचि काञ्चनसदृशत्वचि । पुंल्लिङ्गत्वमार्षं ॥ ३४ ॥ परार्ध्यत्वं विवृणोति—नेति । कदल्येव कादली मृगविशेषः । तल्लक्षणमुक्तं वैजयन्त्यां " कदली तु बिले क्षेते मृदुसूक्ष्मोष्णकर्बुरैः । नीलाभैर्लोमभिर्युक्ता सा विशल्यकुलायता ॥ प्रियकी लोमभिर्युक्ता मृदुश्च मसृणैर्घनैः " इति । प्रवेणी आस्तरणविशेषः मृगविशेषो वा । अविरेव अविकः " अवेः कः " इति स्वार्थे कप्रत्ययः । तस्येयमाविकी तल्लोमनिर्मिताशाटीत्यर्थः । स्पर्शनेन मार्दवेन ॥ ३५ ॥ दिव्यः श्राघ्यः । नभश्चरो मृगः मृगशीर्षः । दिव्यौ शोभमानौ ॥ ३६ ॥ एवं सीतामतमङ्गीकृत्य प्रवृत्तिरुक्ता । अथ लक्ष्मणमतमङ्गीकृत्याह—यदि वेति । मायैषा राक्षसस्येति यन्मां वदसि तथाऽयं यदि वा भवेत् एवमप्यस्य वधो मया कार्यः ॥ ३७ ॥ हनने हेतुत्वेन

ति० तत् वन्यंधनं नृणांसारं अतिप्रशस्तंभवति । शुक्रं ब्रह्म । " सपर्यगाच्छुक्रमकायमव्रणं " इतिश्रुतेः । एवंच शुक्रस्य ब्रह्मलोकंप्राप्तस्य तदुपमापन्नस्य मनसाचिन्तितंसर्वं संकल्पमात्रसिद्धंसर्वभोग्यवस्तु यथा सर्वस्मात्सारतरं तद्वत् ॥ स० तत् वन्यंधनं नृणां सारं वरेण्यं । तत्रदृष्टान्तमाचष्टे । मनसाचिन्तितं सर्वं तत्तन्यंशुक्रस्यउशनसःयथासारं तथेत्यर्थः ॥ वन्यसेनैवकृपनिर्माय मृतजीवनकर्तृत्वाच्छुक्रस्येतिभावः ॥ ३२ ॥ ति० अर्थीअर्थापेक्षःपुमान् । येनार्थकृत्येन अर्थनिमित्तेनकर्तव्येन कर्मणा । तत्सौन्दर्याद्याक्षिप्तहृदयः अविचारयन्नेवसंव्रजति तत्संपादनार्थंपरवश्येनव्रजतीत्यर्थः । तमेव अर्थ्याः अर्थसंपादनचतुराः । अर्थशास्त्रज्ञाः अर्थं अर्थपदवाच्यमाहुः ॥ ३३ ॥ ति० अतोऽविचारितैवात्रप्रवृत्तिरित्याह—एतस्येति । अत्रविचारोनकर्तव्यः । एतन्मूलेन महतोर्थस्यसिद्धिरितिगूढतात्पर्यम् ॥ ३४ ॥ ति० कदल्याइयंत्वक्कादली । प्रियकसेयंत्वक्प्रियकी । प्रवेणी अजविशेषसंबन्धिनी । आविकी अविलक् । प्रत्येकंनञ्श्लिष्टः सर्वथा सादृश्याभावबोधनाय । अनेन एतदीयत्वच्च ॥ शि० एतस्य मृगत्वचः । कादली मृगविशेषत्वक् सदृशीन । एतस्येतिसामान्येनपुंसकं । एतच्छब्देनमृगस्यैवपरामर्शो कादल्यादिशब्दैर्मृगविशेषाणामेवग्रहणेच एतच्छब्दस्यपुंल्लिङ्गत्वमितिदिक् ॥ ३५ ॥ शि० उभावेतौ तारामहीमृगौ दिव्यौ क्रीडायोग्यौ । एतेनतयोर्द्वयोरेवपरस्परमुपमानोपमेयभावस्सूचितः ॥ ३६ ॥

[पा०] १ ख. ग. शुक्रमतंतथा. २ . ख. भवान्वदति. ३. घ. मारीचेनदुरात्मना.

उत्थाय बहवो येन मृगयायां जनाधिपाः ॥ निहताः परमेष्वासास्तस्माद्ध्यस्तत्वयं मृगः ॥ ३९ ॥
पुरस्तादिह वातापिः परिभूय तपस्विनः ॥ उदरस्थो द्विजान्हन्ति स्वगर्भोश्वतरीमिव ॥ ४० ॥
स कदाचिच्चिराल्लीभादाससाद महामुनिम् ॥ अगस्त्यं तेजसा युक्तं भेक्षस्तस्य बभूव ह ॥ ४१ ॥
समुत्थाने च तद्रूपं कर्तुकामं समीक्ष्य तम् ॥ उत्सयित्वा तु भगवान्वातापिमिदमब्रवीत् ॥ ४२ ॥
त्वयाऽविगण्य वातापे परिभूताः स्वतेजसा ॥ जीवलोके द्विजश्रेष्ठास्तस्मादसि जरां गतः ॥ ४३ ॥
तदेतन्न भवेद्रक्षो वातापिरिव लक्ष्मण ॥ मद्विधं योतिमन्येत धर्मनित्यं जितेन्द्रियम् ॥
भवेद्धतोऽयं वातापिरगस्त्येनेव मां गतः ॥ ४४ ॥
इह त्वं भव सन्नद्धो यन्त्रितो रक्ष मैथिलीम् ॥ अस्मामायत्तमस्माकं यत्कृत्यं रघुनन्दन ॥ ४५ ॥
अहमेनं वधिष्यामि ग्रहीष्यामि वा मृगम् ॥ यावद्गच्छामि सौमित्रे मृगमानयितुं द्रुतम् ॥ ४६ ॥
पश्य लक्ष्मण वैदेह्यां मृगत्वचि गतस्पृहाम् ॥ स्वचा प्रधानया ह्येष मृगोद्य नभविष्यति ॥ ४७ ॥
अप्रमत्तेन ते भाव्यमाश्रमस्थेन सीतया ॥ ४८ ॥
यावत्पृषतमेकेन सायकेन निहन्म्यहम् ॥ हत्वैतच्चर्म चादाय शीघ्रमेष्यामि लक्ष्मण ॥ ४९ ॥

तदीयदौरात्म्यमाविष्करोति—एवेन हीति । मृगांसेन धातुकेन । अकृतात्मना दुष्टभावेन ॥ ३८ ॥ उत्थाय प्रादुर्भूय ॥ ३९ ॥ पूर्वोक्तमपि वातापिवृत्तान्तं मारीचस्य मायाव्यापारे दृष्टान्तत्वेनाह—पुरस्तादिति । पुरस्तात् पूर्वस्मिन्काले । इह दण्डकारण्ये । अश्वतरो नाम गर्दभाद्श्वायामुत्पन्न इति वृत्तिकारः । "गोखरोश्वतरोमतः" इति हलायुधः । तत्स्वरूपमुक्तं शालिहोत्रीये "खररूक्षस्वराक्षीक्ष्णाः खरशीलाः खरांघ्रयः" इति । तामश्वतरीं स्वगर्भो यथा हन्ति तथाऽयमपि गर्भस्थो द्विजान् हन्ति । अश्वतरी वृश्चिकेत्यप्याहुः ॥ ४० ॥ भक्षः आहारः ॥ ४१ ॥ समुत्थाने आद्यन्ते । तद्रूपं रक्षोरूपं । उत्सयित्वा । ईषत्स्मित्वा । स्यबभाव आर्षः ॥ ४२ ॥ अविगण्य अविचार्य । पापमिति शेषः । जीवलोके भूलोके । जरां जीर्णतां । इति वातापिमब्रवीदिति पूर्वेणान्वयः ॥ ४३ ॥ तदिति रक्षःशब्दाभिप्रायेण नपुंसकत्वं । अतिमन्येत अतिक्रामेत् । मां गत इति अगस्त्यो यथाऽजरूपंवातापिंलोकहितार्थं नाशितवान् तथाऽहमपि मृगरूपमेनंहनिष्यामीत्यर्थः ॥ ४४ ॥ सन्नद्धः धनुःकवचादिसन्नाहयुक्तः । यन्त्रितः व्याक्षेपान्तररहितः । अस्मामिति अस्माकं यत्कृत्यमावश्यकं तत्सर्वमस्मामायत्तं एतद्रक्षणप्रधानमित्यर्थः । एतन्मूलतया रावणवधादिकं कर्तव्यं । इयंहि पूर्वं वेदवतीभावे तथा संकल्पितवतीत्यपि सूचयति ॥ ४५ ॥ यावद्गच्छामि गमिष्यामि । "यावत्पुरानिपातयोः" इति भविष्यदर्थे लट् ॥ ४६ ॥ गतस्पृहां प्राप्तस्पृहां । प्रधानया प्रधानप्रयोजनभूतया । नभविष्यति मरिष्यतीत्यर्थः । अत्र सीताप्रार्थितमेव प्रधानप्रयोजनं अन्यदानुषङ्गिकमित्यर्थः ॥ ४७ ॥ सीतया हेतुभूतया । आश्रमस्थेन ते त्वया । अप्रमत्तेन भाव्यं । आश्रमस्थोऽप्रमत्तः सन्

ति० अश्वतरी गर्दभाद्श्वायामुत्पन्नेतितीर्थः । अश्वतरी कर्कटीतिपरे । वृश्चिकइतिकतकः । अत्राद्यव्याख्यैवज्यायसी । तस्या गर्भस्योदरपाटनंविना निस्सरणमिति सर्वजनप्रसिद्धेः ॥ ४० ॥ ति० अस्मार्कंयत्कृत्यमावश्यकंकर्तव्यं तदस्मा एतद्रक्षणविषये । आयत्तं स्थितं । तन्मूलकृत्ये त्वंसावधानस्तिष्ठ । सकर्तव्यमाह—अहमिति । अत्रपूर्वश्लोकचतुर्थचरणश्लेषेणश्रयित्वा यत्रक्षणं गृहीतः अतियत्नरहितः । सीतांरक्ष । यदस्माकंकृत्यं अवतारग्रहणप्रयोजनं । तदस्मामायत्तं अनयैवसाधनीयमित्यपिसूचितं ॥ ४५ ॥ ति० यावद्गच्छामि आनयितुं आनेतुं । तत्रहेतुः पश्येति ॥ शि० वैदेह्यांपश्य रक्षेत्यर्थः ॥ ४७ ॥ ति० सीतया सहेतिशेषः ॥ ४८ ॥ शि० हत्वा मृगंनिहत्य । चर्म तद्विषयकस्पृहां । आदाय छित्वा निवर्त्येत्यर्थः । अवखण्डनार्थकदोरूपं ॥ ४९ ॥ इतित्रिचत्वारिंशस्सर्गः ॥ ४३ ॥

[पा०] १ ख. ग. ङ. ञ. बहवोऽनेन. २ क. घ. छ. ञ. नराधिपाः. ३ घ. सदमामृगः. ४ क. ङ. झ. ट. श्लोकेऽासाद. ५ घ. तस्यभक्ष्यो. ६ क. ग. च. ज. झ. बभूवसः. ७ क. घ. ङ. च. ज.–ट. भूताश्चतेजसा. ग. भूताश्चदेवताः. ८ क. ख. घ. छ. एवंतमभवेद्रक्षो. ङ. झ. ट. तद्रक्षोनभवेदेव. च. ज. ञ. एवंतुनभवेद्रक्षो. ९ ग. इनिष्यामि. १० ङ. झ. ट. व्यथवा. ११ ख. मानेतुमुद्यतं. १२ वैदेह्याः. १३ झ. गतां.

प्रदक्षिणेनातिबलेन पक्षिणा जटायुषा बुद्धिमता च लक्ष्मण ॥
भवाप्रमत्तः परिगृह्य मैथिलीं प्रतिक्षणं सर्वत एव शङ्कितः ॥ ५० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

रामेणमृगग्रहणायधनुष्पाणिनासतातदनुधावनम् ॥ १ ॥ तथामृगेणमायथागतिवैचित्र्येणात्मप्रलोभनेकोपाच्छरेणतन्मारणम् ॥ २ ॥ म्रियमाणेनमारीचेनमृगशरीरपरित्यागपूर्वकंनिजशरीरपरिग्रहेणरामकण्ठस्वरानुकरणेनहासीतेलक्ष्मणेत्युच्चैराक्रोशनम् ॥३॥ रामेणमारीचाक्रोशनश्रवणेनसीतालक्ष्मणयोर्दुरवस्थासंभावनयासविषादंस्वाश्रमंप्रत्यभिनिवर्तनम् ॥ ४ ॥

तथा तु तं समादिश्य भ्रातरं रघुनन्दनः ॥ बबन्धासिं महातेजा जाम्बूनदमयत्सरुम् ॥ १ ॥
ततस्त्र्यवनतं चापमादायात्मविभूषणम् ॥ आबध्य च कलापौ द्वौ जगामोदग्रविक्रमः ॥ २ ॥
तं वञ्चयानो राजेन्द्रमापतन्तं निरीक्ष्य वै ॥ बभूवान्तर्हितस्त्रासात्पुनः संदर्शनेऽभवत् ॥
बद्धासिर्धनुरादाय प्रदुद्राव यतो मृगः ॥ ३ ॥
तं स्म पश्यति रूपेण द्योतमानमिवाग्रतः ॥ अवेक्ष्यावेक्ष्य धावन्तं धनुष्पाणिं महावने ॥ ४ ॥
अतिवृत्तमिषोः पाताल्लोभयानं कदाचन ॥ शङ्कितं तु समुद्भ्रान्तमुत्पतन्तमिवाम्बरे ॥ ५ ॥
दृश्यमानमदृश्यं च वनोद्देशेषु केषुचित् ॥ छिन्नाभ्रैरिव संवीतं शारदं चन्द्रमण्डलम् ॥ ६ ॥

सीतारक्षणं कुर्वित्यर्थः । पृषतं मृगं ॥ ४८—४९ ॥ प्रदक्षिणेन अत्यन्तसमर्थेन । जटायुषेति सहार्थे तृतीया । "वृद्धो यूना—" इति ज्ञापकात् । मैथिलीं परिगृह्य स्ववशीकृत्य । सर्वतः शङ्कित एव प्रतिक्षणमतिशङ्कयेवाप्रमत्तो भवेत्यन्वयः । अत्र पञ्चाशच्छ्लोकाः ॥ ५० ॥ इतिश्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रिचत्वारिंशःसर्गः ॥ ४३ ॥

अजानन्निव यो मायामृगं कार्यान्तरैकदृक् । अनुसृत्य जघानाशु तं लीलामानुषं भजे ॥ अथ मारीचवधः—तथात्वित्यादिना । त्सरुः खड्गमुष्टिः । "त्सरुः खड्गादिमुष्टिः स्यात्" इत्यमरः ॥ १ ॥ त्र्यवनतं त्रिषु स्थलेष्ववनतं शार्ङ्गमित्यर्थः । आत्मविभूषणं आत्मालंकारं । कलापौ द्वौ द्वौ तूणीरौ । "कलापो भूषणे बर्हे तूणीरे संहतेपि च" इत्यमरः ॥ २ ॥ वञ्चयानः वञ्चयमानः । अनित्यो मुमागमः । संदर्शने दृष्टिविषये । अभवत् स्थितः । यतः यस्मिन्प्रदेशे । मृगो वर्तते तत्र प्रदुद्राव ॥ ३ ॥ तमित्यादिश्लोकत्रयमेकं वाक्यं । रूपेण कान्त्या । अग्रे द्योतमानमिव स्थितं इषोः पातात् अतिवृत्तं अतिक्रान्तं । शङ्कितमिवेत्यन्वयः । धनुष्पाणिं दृष्ट्वा शङ्कितमिवेत्यनेन धनुष्पाणिदर्शनादन्यमृगाणामिवास्य शोको न भवतीतीवशब्दः प्रयुज्यते । यद्वा रामाद्भयं शङ्कमानं सन्तं उत्पतन्तमिव स्थितं । वस्तुतस्तत्राप्यदर्शनादिति भावः । लोभयानं हस्तप्राप्तमिवदृश्यमानमित्यर्थः । दृश्यमानमिति केषुचिद्दृश्यमानं केषुचिददृश्यं । अतएव छिन्नाभ्रैः संवीतं व्याप्तं चन्द्रमण्डलमिव स्थितं । शारदमिति

ति० मध्येस्थलत्रये विनतं त्रिविनतं । आत्मविभूषणं चापस्यवीरालङ्कारत्वात् । आत्मविभूषणमित्यनेनागस्त्यदत्तं वैष्णवमितिसूचितं ॥ २ ॥ ति० वन्यराजः वन्यानां मृगाणांराजा । विचित्रमृगत्वात् ॥ स० संदृश्यतइति संदर्शनः । कर्मणि ल्युट् । चक्षुर्विषयोऽभूत् । शि० वन्यराजः वन्येषुमृगेषुराजतेशोभते समारीचः । त्रासात् रामभयात् । अन्तर्हितोबभूव । पुनः त्रासात् रावणभयात् । संदर्शनेऽभवत् ॥ ३ ॥

[पा०] १ क. ख. घ. ङ. झ. ट. प्रतिगृह्य. २ ङ. झ. ट. दधारासिं. ३ क. ङ—ट. ततस्त्रिविनतं. ४ क. ग. जगामलघुविक्रमः. ५ क. ख. च. छ. ज. मावजन्तं. ६ ठ. संदर्शनो. ७ ख. तंपश्यतिस्म. ८ च. ज.—ट. द्योतयन्तमिव. ९ ख. ग. ङ. झ. ट. धनुष्पाणिर्महा. १० घ. कथंचन. ११ च. ज. ञ. कुत्रचित्.

मुहूर्तादेव ददृशे मुहुर्दूरात्प्रकाशते ॥ ७ ॥
दर्शनादर्शनादेवं सोपाकर्षत राघवम् ॥ सुदूरमाश्रमस्यास्य मारीचो मृगतां गतः ॥ ८ ॥
आसीत्क्रुद्धस्तु काकुत्स्थो विवशस्तेन मोहितः ॥ अथावतस्थे संभ्रान्तश्छायामाश्रित्य शाद्वले ॥९॥
स तमुन्मादयामास मृगरूपो निशाचरः ॥ मृगैः परिवृतो वन्यैरदूरात्प्रत्यदृश्यत ॥ १० ॥
ग्रहीतुकामं दृष्ट्वैनं पुनरेवाभ्यधावत ॥ तत्क्षणादेव संत्रासात्पुनरन्तर्हितोऽभवत् ॥ ११ ॥
पुनरेव ततो दूराद्वृक्षषण्डाद्विनिःसृतम् ॥ दृष्ट्वा रामो महातेजास्तं हन्तुं कृतनिश्चयः ॥
भूयस्तु शरमुद्धृत्य कुपितस्तत्र राघवः ॥ १२ ॥
सूर्यरश्मिप्रतीकाशं ज्वलन्तमरिमर्दनः ॥ सन्धाय सुदृढे चापे विकृष्य बलवद्बली ॥ १३ ॥
तमेव मृगमुद्दिश्य श्वसन्तमिव पन्नगम् ॥ मुमोच ज्वलितं दीप्तमस्त्रं ब्रह्मविनिर्मितम् ॥ १४ ॥
शरीरं मृगरूपस्य विनिर्भिद्य शरोत्तमः ॥ मारीचस्यैव हृदयं बिभेदाशनिसन्निभः ॥ १५ ॥
तालमात्रमथोत्प्लुत्य न्यपतत्स शरातुरः ॥ विनदन्भैरवं नादं धरण्यामल्पजीवितः ॥ १६ ॥
म्रियमाणस्तु मारीचो जहौ तां कृत्रिमां तनुम् ॥ स्मृत्वा तद्वचनं रक्षो दध्यौ केन तु लक्ष्मणम् ॥
इह प्रस्थापयेत्सीता शून्ये तां रावणो हरेत् ॥ १७ ॥
स प्राप्तकालमाज्ञाय चकार च ततः स्वरम् ॥ सदृशं राघवस्यैव हा सीते लक्ष्मणेति च ॥ १८ ॥
तेन मर्मणि निर्विद्धः शरेणानुपमेन च ॥ मृगरूपं तु तत्त्यक्त्वा राक्षसं रूपमात्मनः ॥
चक्रे स सुमहाकायो मारीचो जीवितं त्यजन् ॥ १९ ॥
ततो विचित्रकेयूरः सर्वाभरणभूषितः ॥ हेममाली महादंष्ट्रो राक्षसोऽभूच्छराहतः ॥ २० ॥

मेघशकलसंभावनार्थमुक्तं ॥ ४—६ ॥ समीपे मुहूर्तात् मुहूर्तं । ददृशे । दूरात् दूरं । मुहुः प्रकाशते ॥ ७ ॥ अतः एवं उक्तरीत्या । दर्शनादर्शनात् दर्शनादर्शनाभ्यां । सुदूरमपाकर्षत आकृष्टवान् ॥ ८ ॥ विवशः कुतूहलपरवशः । मोहितः वञ्चितः ॥ ९ ॥ उन्मादयामासेति उन्मादश्चित्तविभ्रमः । बहुदूराकर्षणेन चित्तमोहं चकारेत्यर्थः ॥ १०—११ ॥ भूयः अत्यर्थं । कुपितोभूत् ॥ १२ ॥ सूर्येत्यादिश्लोकद्वयमेकं वाक्यं ॥ १३—१४ ॥ प्र[illegible]स्यशरीरंविनिर्भिद्य ततः मारीच[illegible]न्तर्वर्तिस्वशरीरं । बिभेद ॥ १५ ॥ ताल[illegible] तालप्रमाणं । "प्रमाणे द्वयसच्—" इत्यादिना [illegible] मात्रच् ॥ १६ ॥ सीता केनोपायेन लक्ष्मणमिह प्रस्थापयेत् केनोपायेन रावणस्तां हरेदिति दध्यौ चिन्तयामास ॥ १७ ॥ प्राप्तकालं कालप्राप्तं कालोचितमर्थं । आज्ञाय निश्चित्य

स० दर्शनादर्शनेन । "सर्वोद्वन्द्वः" इत्येकवद्भाव इतिकेचित् । वस्तुतस्तु । "विप्रतिषिद्धं च—" इत्येकवद्भावः ॥ ८ ॥ शि० अविवशः क्रोधादिवशभिन्नः । तेनमोहितः ते नमश्शब्दोच्चारणमात्रेणैव हितकारी । काकुत्स्थोरामः क्रुद्धः क्रुद्धत्वेनप्रतीयमानआसीत् ॥ ९ ॥ ति० मृगरूपसदृशरूपस्यमायाकृतरूपेयक्षवत्प्रविश्यस्थितस्यमारीचस्यैवहृदयं नतुतत्कृतमायामृगाकारमात्रस्य ॥ स० मृगरूपस्यसदृशं विनिर्भिद्य अन्तर्विद्यमानमारीचशरीरं बिभेद ॥ ती० सदृशमिति । रूपमितिशेषः । मारीचस्यतदानींरूपमन्यदीयं । हृदयंतुस्वीयमेव । तथाचायमर्थः । मृगरूपस्यसदृशंरूपं तस्यास्वकीयं रूपंभित्वा पश्चात्स्वकीयंहृदयंबिभेदेतिभावः ॥ १५ ॥ ती० स्मृत्वेति । तांमतिं रावणोक्तसीतालक्ष्मणाह्वानोपायंस्मृत्वा । केन मत्कृतोपायेनेतिशेषः । सीता लक्ष्मणंप्रेषयेत् । तांसीतांशून्ये रावणोहरेदितिदध्यावितियोजना ॥ टीका० तांमतिं विश्वामित्रयागेरामकृतवैरबुद्धिं स्मृत्वावा ॥ १७ ॥

[पा०] १ क. ख. ग. ङ—ट. दर्शनादर्शनेनैव. २ क. ख. ग. ङ—ट. सुश्रान्तः. ३ ङ. झ. ट. वृतोधान्यैः. ४ ङ. झ. ट. दृष्ट्वातं. ख. घ. च. छ. ज. ञ. दृष्ट्वैव. क. ग. दृष्ट्वाच. ५ क. छ. ङ. ट. खण्डात्. ६ ख. ङ. च. ज—ट. मरिमर्दनं. ७ क. ख. ग. ङ—ट. ज्वलन्तमिव. ८ झ. ञ. ठ. सदृशं. ९ च. तांतुमतिं. १० ग. ङ—ट. तांशून्ये. ११ ख—ङ. छ. झ. ट. णानुपमेनहि. १२ क. ख. ङ. झ. ञ. ट. मास्थितः. १३ झ. ट. सुमहाकायं.

तं दृष्ट्वा पतितं भूमौ राक्षसं घोरदर्शनम् ॥ रामो रुधिरसिक्ताङ्गं वेष्टमानं महीतले ॥
जगाम मनसा सीतां लक्ष्मणस्य वचः स्मरन् ॥ २१ ॥
मारीचस्यैव मायैषा पूर्वोक्तं लक्ष्मणेन तु ॥ तत्तथा ह्यभवच्चाद्य मारीचोयं मया हतः ॥ २२ ॥
हा सीते लक्ष्मणेत्येवमाक्रुश्य च महास्वनम् ॥ ममार राक्षसः सोयं श्रुत्वा सीता कथं भवेत् ॥२३॥
लक्ष्मणश्च महाबाहुः कामवस्थां गमिष्यति ॥ इति संचिन्त्य धर्मात्मा रामो हृष्टतनूरुहः ॥ २४ ॥
तत्र रामं भयं तीव्रमाविवेश विषादजम् ॥ राक्षसं मृगरूपं तं हत्वा श्रुत्वा च तत्स्वरम् ॥ २५ ॥
निहत्य पृषतं चान्यं मांसमादाय राघवः ॥ त्वरमाणो जनस्थानं ससाराभिमुखस्तदा ॥ २६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

हासीतेलक्ष्मणेतिमारीचाक्रोशश्राविण्यासीतयासादृश्यात्तस्मिन्रामकण्ठस्वरत्वज्ञानेनतस्य विपत्संभावनयातद्रक्षणाय लक्ष्मणंप्रतितदनुधावनचोदना ॥१॥ लक्ष्मणेनसीतांप्रतिराममहिमानुवर्णनेनतस्यविपदभावप्रतिपादनम् ॥ २ ॥ सीतया तंप्रत्यश्राव्यानुचितपरुषभाषणेतदसहिष्णुतयालक्ष्मणेनराममार्गानुधावनम् ॥ ३ ॥

आर्तस्वरं तु तं भर्तुर्विज्ञाय सदृशं वने ॥ उवाच लक्ष्मणं सीता गच्छ जानीहि राघवम् ॥ १ ॥
न हि मे हृदयं स्थाने जीवितं वाऽवतिष्ठति ॥ क्रोशतः परमार्तस्य श्रुतः शब्दो मया भृशम् ॥२॥
आक्रन्दमानं तु वने भ्रातरं त्रातुमर्हसि ॥ तं क्षिप्रमभिधाव त्वं भ्रातरं शरणैषिणम् ॥
रक्षसां वशमापन्नं सिंहानामिव गोवृषम् ॥ ३ ॥

॥ १८—२१ ॥ मायैषेत्यत्र इतिकरणं बोध्यं ॥ २२—२३ ॥ हृष्टतनूरुहः भयात्पुलकितः । अभूदितिशेषः ॥ २४ ॥ विषादजं विषादोत्थं । विषादो भविष्यतीत्युत्पन्नं । हत्वा मरणानुकूलव्यापारं कृत्वा । ततस्तदुक्तं स्वरं श्रुत्वा ॥ २५ ॥ त्वरमाणो रामः जनस्थानं जनस्थानस्थस्वाश्रममुद्दिश्याभिमुखः सन् ससार ययौ । अत्र सार्धसप्तविंशतिश्लोकाः ॥२६॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

अस्थाने भयशङ्किन्या जानक्यापि सुहृज्जनम् । धिक्कृत्य चिन्तितं रामं नित्यापूर्वमहं भजे ॥ भर्तुः भर्तुः स्वरस्य ॥ १ ॥ हृदयं मनः । जीवितं प्राणः । वाशब्दः समुच्चये । स्थाने स्वस्थाने । मोहो जायत इति भावः । शरणैषिणं रक्षकार्थिनं । गोवृषमिति

स० कथंभवेत् किंप्रकाराभवेत् । ति० कथंभवेत् किं लक्ष्मणंप्रेषयेत् उतधीराभवेदित्यर्थः ॥ २३ ॥ ति० कामवस्थां अधैर्यादितिशेषः ॥ हृष्टतनूरुहः त्रासादिवरोमाञ्चिततनुः । वस्तुतएतन्मूलेन सर्वकार्यनिष्पत्तिरितिहर्षाद्रोमाञ्चिततनुः ॥ २४ ॥ ति० तत्रनटवद्भगवान्मनुष्यरूपत्वाद्भयशोकादिमत्त्वंनाटयतीतिकविरपि सर्वलोकवेद्यंतथैवाह—तत्रशमंभयमिति । तात्त्विकमर्थंतु हृष्टतनूरुहइतिहृष्टपदेन प्रागेवध्वनितवान् ॥ २५ ॥ इति चतुश्चत्वारिंशस्सर्गः ॥ ४४ ॥

ति० भर्तुस्स्वरेणसदृशंस्वरं भर्तुस्स्वरइत्येवज्ञात्वेत्यर्थः ॥ १ ॥ स० स्थाने एकस्मिन् । क्रोशतउपरीतिवा ॥ २ ॥ शि० शरणैषिणं स्वरक्षाकामं । सिंहानांगोवृषमिव रक्षसांवशमापन्नं अतएव आक्रन्दमानं तंजनं भ्रातरंच क्षिप्रंत्वं त्रातुमर्हसि । अतः भ्रातरमभिधाव । भ्रातरमभिधावेत्युक्त्या तदनुमत्यैवाक्रन्दमानजनस्यरक्षा कर्तव्येतिसूचितं । रक्षसांवशमापन्नमित्यनेन रावणप्रेरणयैव मारीचोत्रागतइतिसूचितं । तेन तस्यात्रागमने स्वातन्त्र्याभावोव्यञ्जितः । रामंत्रातुमर्हसीत्युक्त्या दूरगमनेन तद्विषय-

[पा०] १ ङ. झ. ट. भीमदर्शनं. २ ङ—ट. चेष्टमानं. ३ क—ट. मारीचस्यतु. ४ क. ग—ट. पूर्वोक्ता. ५ क. ख. ग. ङ—ट. माक्रुश्यतु. ६ ग. ममस्वरं. ७ घ. ङ. झ. ट. मुखंतदा. ८ च. छ. ज. ञ. वचः. ९ ङ. झ. ट. जीवितंस्थानेहृदयं. १० ङ. झ. ट. तिष्ठते. ११ क. ख. ज्ञातुमर्हसि.

न जगाम तथोक्तस्तु भ्रातुराज्ञाय शासनम् ॥ तमुवाच ततस्तत्र कुपिता जनकात्मजा ॥ ४ ॥
सौमित्रे मित्ररूपेण भ्रातुस्त्वमसि शत्रुवत् ॥ यस्त्वमस्मामवस्थायां भ्रातरं नाभिपत्स्यसे ॥ ५ ॥
इच्छसि त्वं विनश्यन्तं रामं लक्ष्मण मत्कृते ॥ लोभान्मम कृते नूनं नानुगच्छसि राघवम् ॥ ६ ॥
व्यसनं ते प्रियं मन्ये स्नेहो भ्रातरि नास्ति ते ॥ येन तिष्ठसि विस्रब्धस्तमपश्यन्महाद्युतिम् ॥ ७ ॥
किं हि संशयमापन्ने तस्मिन्निह मया भवेत् ॥ कर्तव्यमिह तिष्ठन्त्या यत्प्रधानस्त्वमागतः ॥ ८ ॥
इति ब्रुवाणां वैदेहीं बाष्पशोकपरिप्लुताम् ॥ अब्रवील्लक्ष्मणस्तां सीतां मृगवधूमिव ॥ ९ ॥
पन्नगासुरगन्धर्वदेवमानुषराक्षसैः ॥ अशक्यस्तव वैदेहि भर्ता जेतुं न संशयः ॥ १० ॥
देवि देवमनुष्येषु गन्धर्वेषु पतत्रिषु ॥ राक्षसेषु पिशाचेषु किंनरेषु मृगेषु च ॥ ११ ॥
दानवेषु च घोरेषु न स विद्येत शोभने ॥ यो रामं प्रतियुध्येत समरे वासवोपमम् ॥ १२ ॥
अवध्यः समरे रामो नैवं त्वं वक्तुमर्हसि ॥ न त्वामस्मिन्वने हातुमुत्सहे राघवं विना ॥ १३ ॥
अनिवार्यं बलं तस्य बलैर्बलवतामपि ॥ त्रिभिर्लोकैः समुद्युक्तैः सेश्वरैरपि सामरैः ॥ १४ ॥
हृदयं निर्वृतं तेऽस्तु संतापस्त्यज्यतामयम् ॥ आगमिष्यति ते भर्ता शीघ्रं हत्वा मृगोत्तमम् ॥१५॥
नैं च तस्य स्वरो व्यक्तं मायया केनचित्कृतः ॥ गन्धर्वनगरप्रख्या माया सा तस्य रक्षसः ॥१६॥

सामान्यविशेषयोःप्रयोगः करिकलभवत् । इति सीता लक्ष्मणमुवाचेतिसंबन्धः ॥ २—३ ॥ शासनं अप्रमत्तेन ते भाव्यमित्यादुक्तं ॥ ४ ॥ मित्ररूपेणोपलक्षितः रूपेण मित्रसदृशः क्रियया शत्रुवत्स्योसीत्यर्थः। शात्रवक्रियां दर्शयति—यस्त्वमिति ॥ ५ ॥ इच्छायां हेतुमाह—मत्कृत इति । मत्परिग्रहार्थमित्यर्थः । दार्ढ्याय पुनराह—लोभादिति । लोभो मत्कामेच्छा ॥ ६—७ ॥ स्वदक्षणं विहाय कथं गमिष्यामीत्यत्राह—किं हीति । यो रामः प्रधानं यस्य सः यत्प्रधानः त्वमिहागतः तस्मिन् रामे । संशयं प्राणसंशयमापन्ने सति । इहाश्रमपदे तिष्ठन्त्या मया किं कार्यं न किमपीत्यर्थः ॥ ८—१२ ॥ एवं उक्तप्रकारं पक्षपातवर्णं । राघवं विना स्थितां स्वामित्यन्वयः ॥ १३ ॥ समुद्युक्तैः सन्नाहवद्भिः । सेश्वरैः सेन्द्रैः ॥ १४ ॥ निर्वृतं निर्दुःखं ॥ १५ ॥ यस्य रामस्य । मायं स्वरः अपितु केनचिदन्येन मायया विचित्रशक्त्या कृतः ।

स्वसंशयस्वभावनिश्चितं । तेन तत्रैवेहातिशयोक्तितः । सार्धश्लोकएकान्वयी ॥ ३ ॥ द्वि० तमुवाचेत्यर्धमेकम् । सौमित्रेत्यादर्धद्वयमेकान्वयि । यद्वा इदमप्यर्धमेकम् । तथाहि भ्रातुर्मित्ररूपेणहेतुना लक्ष्मणिशत्रुवत् रामशत्रुत्वापन्नराक्षसशत्रुत्वमुक्तवती । शत्रुमित्रेपि शत्रुत्वहेतुर्लोकेप्रसिद्धत्वादितितात्पर्यं । एतेन यदि रामसमीपेत्वंनगमिष्यसि तर्हि एकाकिनंत्वामकस्मात्कश्चन हन्त्यापत्तिष्यन्तीतिध्वनितं । तेनैकत्रैव द्वाभ्यांस्थातव्यमितिध्वनितं ॥ ४ ॥ द्वि० यदिति । यत् यस्मादेतोः । विनश्यं रिपुमुखः । त्वं अस्यां सहायरहितायांअवस्थायां भ्रातरंरामंनाभिपत्स्यसे तस्मादेतोः हेलक्ष्मण मत्कृते मद्रक्षार्थं । अन्तं खविनाशं । इच्छसि इत्यनुभीयतइतिशेषः । एतेनास्मिन्समये रामसमीपगमनमन्तरा ते मद्रक्षणकीर्तिर्भविष्यतीतिध्वनितं ॥ मत्कृते मद्रक्षार्थमेवो लोभः मयिगते इमांकोरक्षिष्यतीतिचैवित्वं तस्मादेतोः राघवंमानुगच्छसिचेत्तर्हि अप्रियंव्यसनं अपवादकमदुःखं । भ्रातरि ते स्नेहोनास्तीतिचाहंमन्ये । स्व० लोभात् गार्ध्यात् । मत्कृते अहंकृताभिधायेन समस्कृत तस्मिन्भ्रातरीत्यन्वयः । व्यसनं रामदुःखं ॥ ५—७ ॥ ति० तस्मिन् रामे संशयमापन्नेसति मयातिष्ठन्त्या सत्यक्षणेनजीवन्त्या । किंकर्तव्यं भवेत् । तदभावे मरणमेवश्रेयः । अत्रार्थेभ्यनिः—राक्षससंहाररूपप्रधानकार्यकरणायागतस्यतव स्वभ्रातुर्वा तस्मिन्कार्ये इहमदवस्थितायासंशयमापन्ने इहजीवन्त्यामयाकिंकार्यंभवेत् । सर्वेषोत्पत्तिस्थितिसंहारेषु तवभ्रातुरहमेवसहकारिणी । प्रकृतसंहारोत्र मत्स्थित्या न निर्वर्तताइति ॥ स्व० संशयं सम्यग्माक्षसङ्कटमापन्ने इतिवा । हिंसंशयं गतसंशयंयथाभवतितथा तस्मिन् रामे आपत् न । यतोऽहं हे साक्षाल्लक्ष्मीः ततो मयाऽऽपत् प्राप्तेतिशेषः । नभवेत् इतिमानसिकोभावोपिशेषः ॥ ८ ॥ ति० एवंबोधितलक्ष्मणोपि मानुष्यभावनेनलोकव्यवहारानुसारात् लक्ष्मणोऽमदस्थिाह—अब्रवीदिति ॥ ९ ॥ ति० तव त्वया ॥ १५ ॥ ति० दैवक्त

[पा०] १ ङ. झ. ट. क्षुभिता. २ ट. यत्नं. ३ क. झ. ट. लोभात्तुमत्कृते. ४ ङ. रामं. ५ ख. लक्ष्मण. ६ क. झ. ट. विस्रब्धंतं. ७ क. झ. ट. एवं. ८ क. झ. ट. समन्वितां. ९ घ. देवमानव. क. ङ. झ. ट. देवदानव. १० च—ट. सेश्वरैस्सामरैरपि. ११ ङ. झ. ण. ट. सज्यतांतव. १२ ग—ट. नस्व. झ. मत्कथिदपिदैवतः.

न्यासभूतासि वैदेहि न्यस्ता मयि महात्मना ॥ रामेण त्वं वरारोहे न त्वां त्यक्तुमिहोत्सहे ॥ १७॥
कृतवैराश्च [1]वैदेहि वयमेतैर्निशाचरैः ॥ खरस्य [2]निधनादेव जनस्थानवधं प्रति ॥ १८ ॥
राक्षसा विविधा वाचो [3]विसृजन्ति महावने ॥ हिंसाविहारा वैदेहि न चिन्तयितुमर्हसि ॥ १९ ॥
लक्ष्मणेनैव[4]मुक्ता सा क्रुद्धा संरक्तलोचना ॥ अब्रवीत्परुषं वाक्यं लक्ष्मणं सत्यवादिनम् ॥ २० ॥
[5]अनार्याकरुणारम्भ नृशंस कुलपांसन ॥ अहं तव प्रियं मन्ये रामस्य व्यसनं महत् ॥ २१ ॥
रामस्य व्यसनं दृष्ट्वा तेनैतानि प्रभाषसे ॥ २२ ॥
नैत[6]च्चित्रं सपत्नेषु पापं लक्ष्मण यद्भवेत् ॥ त्वद्विधेषु नृशंसेषु नित्यं प्रच्छन्नचारिषु ॥ २३ ॥
सुदुष्टस्त्वं वने राममेकमेकोऽनुगच्छसि ॥ मम हेतोः प्रतिच्छन्नः प्रयुक्तो भरतेन वा ॥ २४ ॥
तन्न सिध्यति सौमित्रे [7]तव वा भरतस्य वा ॥ कथमिन्दीवरश्यामं [8]पद्मपत्रनिभेक्षणम् ॥
उपसंश्रित्य भर्तारं [9]कामयेयं पृथग्जनम् ॥ २५ ॥

वस्तुतस्तु मारीचस्यैवेयं मायेत्याह—गन्धर्वेति । तस्य रक्षसः मृगीभूतस्य रक्षसः । सा स्वरः । मायापेक्षया स्त्रीत्वं । गन्धर्वनगरप्रख्या गन्धर्वनगरतुल्या माया । यद्वा सा मृगरूपं । गन्धर्वनगरं नाम मेघादावारोपितं प्रासादवनादिकं । तत्कदाचिद्दृश्यते तद्यथा व्यामोहजनकं तथा चित्रवस्तुरूपा परव्यामोहजनिका काचिच्छक्तिर्माया सा तस्य रक्षसः मारीचस्यास्ति । यया मुह्यसीत्यर्थः । "गन्धर्वनगरं प्रोक्तमिन्द्रजालं मनीषिभिः" इत्यप्याहुः ॥ १६ ॥ न्यासभूतासि निक्षेपरूपासि । केन निक्षिप्तेत्यत आह—रामेणमयि न्यस्येति ॥१७॥ खरस्य स्वामिनो निधनात् जनस्थाने वधो यः तं प्रति वयमेतैर्निशाचरैः कृतवैराः एते अस्मासु वैरमाचरितवन्त इत्यर्थः ॥ १८ ॥ किं तत इत्यत्राह—राक्षसा इति । वाचो विसृजन्ति अस्मन्मोहनार्थमिति शेषः ॥ १९—२० ॥ अनार्य दुःशील । अकरुणारम्भ दयाप्रसक्तिरहित । तत्र युक्तिमाह—रामस्येति । तेन अनार्यत्वादिकारणेन । रामस्य व्यसनं दृष्ट्वा एतानि पूर्वोक्तवचनानि प्रभाषसे ॥२१—२२॥ प्रच्छन्नचारिषु त्वद्विधेषु सपत्नेषु पापं भवेदिति यत् एतन्न चित्रं । नृशंसत्वादिकमत्र हेतुत्वेनोपात्तं ॥ २३ ॥ प्रयुक्तः प्रेषितः ॥ २४ ॥ पृथग्जनं

अशरीरदेवतासंबन्धीकश्चित्स्वरइत्यपिनेत्यर्थः ॥ १६ ॥ ति० खरस्यनिधने रामेणकृतेसति जनस्थानवधं जनस्थानवर्तिस्वपरिकररक्षोवधंप्रतिलक्ष्य कृतवैराइत्यन्वयः ॥ १८ ॥ व्याहरन्ति अस्मद्व्यामोहनार्थं । अतस्त्वांत्यक्तुंनोत्सहे ॥ १९ ॥ ति० अनार्यकरुणारम्भ अनार्ययाकुत्सितयाकरुणया रामव्यसनेपिमद्विषयारम्भोमद्रक्षणारम्भोयस्य तत्संबोधनं ॥ शि० अनार्यकरुणारम्भ अनार्येषुक्षुद्रराक्षसेषु करुणायाआरम्भोयस्यतत्सदृशः तत्संबोधनं । अतएव नृशंसकुलपां राक्षससमूहपालकानां सनो रचयितेव तत्संबोधनं सन । रामस्यमहद्व्यसनंतवप्रियं त्वत्प्रीतिविषयीभूतंमन्ये । तेनहेतुना रामस्यव्यसनं सहायाभावप्रयुक्तदुःखाभासंदृष्ट्वा ज्ञात्वा । एतानि गमनाभावबोधकवचनानि प्रभाषसे । आचारक्रियासदृशलाभः ॥ वि० अकार्यकरणारम्भ अशोभनकृत्यकरणोद्युक्त ॥ स० आर्ये करुणारम्भोयस्य सनभवतीत्यनार्यकरुणारम्भः ॥ २१ ॥ ति० तेन रामव्यसनप्रियत्वेन । अत्ररामव्यसनं रामस्य प्रतिज्ञातार्थस्यसर्वरक्षोवधरूपस्यहानिस्तत्प्रियत्वेनेति गूढंतात्पर्यं । अतएवा मद्विषयाकरुणा अनार्या कुत्सिता । प्रधानकार्यविरोधित्वादितिबोध्यं ॥ २२ ॥ शि० त्वद्विधेषु अस्मद्धारणाभिन्नविविधधारणावत्सु । अतएव नृशंसेषु क्रूरेषु । अतएव नित्यंप्रच्छन्नचारिषु दुर्ज्ञेयाचरणविशिष्टेषुसपत्नेषु यत्पापं पापकर्मभवेत् । तत् नैवचित्रं । एतेन राक्षसानांविश्वासो न कार्यइतिध्वनितं ॥ २३ ॥ शि० शोभनाः दुष्टाः यस्मात्सः दुष्टध्वंसकइत्यर्थः । अतएव एकंरामं एकएवानुगच्छसि । अतएव हेतोः राममनकारणीभूतस्यमृगस्य भरतेन शोभानिरीक्षणरतिमता प्रयुक्तः अत्रसंस्थापितस्त्वं यदिप्रतिच्छन्नः राक्षसभियानिलीनः । नगच्छसीत्यर्थः ॥ तर्हि हेसौमित्रे ममतवच भरतस्य मृगशोभानिरीक्षणरतस्यरामस्यच तत् इहागमनप्रयोजनंनसिध्यति । रामस्यप्रयोजनं मुनिरिपुध्वंसः । आवयोःप्रयोजनं तत्सेवा । तयोस्सिद्धिर्नस्यादित्यर्थः । एतेन रागादर्शनासहिष्णुत्वंसीतायाव्यञ्जितं ॥ एको वा यद्यर्थे अपरोहेतौ । सार्धश्लोकएकान्वयी ॥ २४ ॥ शि० ननु रक्षकरहितांत्वांविहाय गन्तुमशक्यतया मत्कर्तृकगमनस्यावश्य-

[पा०] १ क. च—ट. कल्याणि. २ झ. निधनेदेवि. ३ झ. व्याहरन्ति. ङ—ट. ४ मुक्तातु. ५ च. छ. ज. ञ. अकार्यकरणारम्भ. ख. अनार्यकृपणारम्भ. ६ झ. ट. नैवचित्रं. ७ ख. च. छ. ज. ट. तवापि. ८ क. झ. रामंपद्मनिभेक्षणं. ९ च. छ. ज. ञ. कामयेम्यं. क. ग. कामयेप्राकृतंजनं.

समक्षं तव सौमित्रे प्राणांस्त्यक्ष्ये न संशयः ॥ रामं विना क्षणमपि न हि जीवामि भूतले ॥२६॥
इत्युक्तः परुषं वाक्यं सीतया रोमहर्षणम् ॥ अब्रवील्लक्ष्मणः सीतां प्राञ्जलिर्विजितेन्द्रियः ॥ २७ ॥
उत्तरं नोत्सहे वक्तुं दैवतं भवती मम ॥ वाक्यमप्रतिरूपं तु न चित्रं स्त्रीषु मैथिलि ॥ २८ ॥
स्वभावस्त्वेष नारीणामेवं लोकेषु दृश्यते ॥ विमुक्तधर्माश्चपलास्तीक्ष्णा भेदकराः स्त्रियः ॥ २९ ॥
न सहे हीदृशं वाक्यं वैदेहि जनकात्मजे ॥ श्रोत्रयोरुभयोर्मेऽद्य तप्तनाराचसन्निभम् ॥ ३० ॥
उपशृण्वन्तु मे सर्वे साक्षिभूता वनेचराः ॥ न्यायवादी यथाऽन्यायमुक्तोऽहं परुषं त्वया ॥ ३१ ॥
धिक्त्वामद्य प्रणश्य त्वं यन्मामेवं विशङ्कसे ॥ स्त्रीत्वं दुष्टं स्वभावेन गुरुवाक्ये व्यवस्थितम् ॥३२॥
गमिष्ये यत्र काकुत्स्थः स्वस्ति तेऽस्तु वरानने ॥ रक्षन्तु त्वां विशालाक्षि समग्रा वनदेवताः ॥३३॥
निमित्तानि हि घोराणि यानि प्रादुर्भवन्ति मे ॥ अपि त्वां सह रामेण पश्येयं पुनरागतः ॥
[न वेत्येतन्न जानामि वैदेहि जनकात्मजे] ॥ ३४ ॥
लक्ष्मणेनैवमुक्ता सा रुदन्ती जनकात्मजा ॥ प्रत्युवाच ततो वाक्यं तीव्रं बाष्पपरिप्लुता ॥ ३५ ॥
गोदावरीं प्रवेक्ष्यामि विना रामेण लक्ष्मण ॥ आबन्धिष्येऽथवा त्यक्ष्ये विषमे देहमात्मनः ॥ ३६॥
पिबाम्यहं विषं तीक्ष्णं प्रवेक्ष्यामि हुताशनम् ॥ न त्वहं राघवादन्यं पदाऽपि पुरुषं स्पृशे ॥ ३७॥

क्षुद्रपुरुषं ॥ २५—२६ ॥ इत्युक्तःपरुषं वाक्यमिति "अप्रधाने दुहादीनां-" इति कर्मण्यप्रधाने द्वितीया । सीतापारुष्येणप्रतिपारुष्यादिराहित्यंसूचयति—विजितेन्द्रिय इति ॥ २७ ॥ अप्रतिरूपं अत्यन्तानुचितं ॥ २८ ॥ विमुक्तधर्माः परित्यक्तविनयादिधर्माः । चपलाः चञ्चलचित्ताः । तीक्ष्णाः क्रूरहृदयाः । भेदकराः परस्परस्नेहकार्यविच्छेदकराः ॥ २९—३० ॥ मे साक्षिभूताः वनेचराः । न्यायवादी अहं त्वया अन्यायं परुषं । यथा उक्तः तथा उपशृण्वन्तु ॥ ३१ ॥ धिक्त्वामिति "उभसर्वतसोः—" इत्यादिना धिग्योगे द्वितीया ॥ ३२—३५ ॥ आबन्धिष्ये उद्बन्धनं करिष्यामि । विषमे भृग्वादिविषमस्थले । पातेनेति शेषः ॥ ३६ ॥ स्पृशे स्पृशामि

कतयाच युगपद्द्वयोर्विरोधेन त्वामयोध्यांशीघ्रंप्रापय्य रामसंनिधावहंगमिष्यामीत्यतआह—**कथमिति** । जनं साक्षाद्ब्रह्मादिद्वाराच सर्वेषांजनयितारं । भर्तारंरामं उपसंश्रित्य वनेसहागत्य । पृथक् तंविना कां सुखस्वरूपामप्ययोध्यां । कथं अयेयं रामंविहायगन्तुंनसमर्थेत्यर्थः । अतः हेसौमित्रे तवसमक्षं प्राणांस्त्यक्ष्यामि । असंशयं अत्रसंशयोन । तत्रहेतुः रामंविना भूतलेक्वचिदपिस्थले क्षणमपिनैवजीवामि ॥ अर्धचतुष्टयमेकान्वयि ॥ २५ ॥ २६ ॥ अत्रनशेर्नाशेच्छाऽर्थः । तेनराक्षसकुलस्यनाशेच्छावतींत्वांधिक् । यतोयदर्थंमामेवंविशङ्कसे वदसि इतिगूढं ॥ यद्वा विनश्यन्तीं शक्तितयाप्रतिक्षणंपरिणामरूपेणविनश्यन्तींत्वां धिक् । यन्मां त्वदस्पृष्टंत्वदाक्रमणायोग्यं एवंविशङ्कसे । त्वदाक्रान्तेषुकिलैवंसंभावनेति । ति० पुनर्वेषानुसारेणाह—**स्त्रीत्वादिति** । स्त्रीत्वाद्दुष्टस्वभावेनक्रौर्येणयुतात्वं गुरुवाक्ये ज्येष्ठनियोगे स्थितंमां एवंब्रूषेइतिशेषः । अतोयत्र काकुत्स्थः तत्रगच्छामि गमिष्यामि । तेस्वस्त्यस्तु सर्वतइतिशेषः ॥ ३२ ॥ ३३ ॥ ति० सर्वथाकर्तव्यमाह—प्रवेक्ष्यामिहुताशनं । अतएवात्र वाशब्दानुक्तिः । अनेन साक्षाद्रावणगृहंनगमिष्यामि किन्त्वहंस्वरूपेणाग्नौस्थित्वा माययैव तद्धस्तंगमिष्यामीतिध्वनितं । तदुक्तं कूर्मपुराणे—"रामस्यसुभगांभार्यां रावणोराक्षसेश्वरः । सीतांविशालनयनां चकमेकालनोदितः । गृहीत्वामाययावेषं चरन्तींविजनेवने । समाहर्तुं मनश्चक्रे तापसःकिलकामिनीं । विज्ञायसाचतद्भावं स्मृत्वादाशरथिंपतिम् ।" तद्भावं लङ्कायामेवहृदिकृतं । तापसोभूत्वा हरिष्यामीतिभावमित्यर्थः । "जगामशरणंवह्निमावसथ्यंशुचिस्मिता । प्रपद्येपावकंदेवं साक्षिणंविश्वतोमुखम् । आत्मानंदीप्तवपुषं सर्वभूतहृदिस्थितम् ।" इत्याद्यष्टश्लोकानुक्त्वा "इतिवन्ह्यष्टकंजप्त्वा रामपत्नीयशस्विनी । ध्यायन्तीमनसातस्थौ राममुन्मीलितेक्षणा । अथावसथ्याद्भगवान्हव्यवाहोमहेश्वरः । आविरासीत्सुदीप्तात्मा तेजसानिर्दहन्निव । सृष्ट्वामायामयींसीतां सरावणवधेच्छ-

[पा०] १ क. झ. ट. स्त्यक्ष्याम्यसंशयं. २ क. झ. ट. नैवजीवामि. ख. नजीवामीह. ३ क. झ. ट. प्राञ्जलिस्स. छ. प्राञ्जलिश्च. ४ क. ङ. छ.—ट. मेषुलोकेषु. ५ ख. तेसर्वे. ६ झ. ट. साक्षिणोहि. ७ क. ख. ग. ङ—ट. यथावाक्यं. ८ झ. विनश्यन्तीं. ९ झ. स्त्रीत्वाद्दुष्टस्वभावेन. १० क. झ. ट. गच्छामि. ११ ख. निमित्तानिच. क. ष. निमित्तानीह. १२ क. ग. ङ. झ. ट. मुक्तातु. १३ क. झ. ट. रुदती. १४ क. झ. ट. हीनारामेण. १५ क. ङ—ट. पिबामिवा.

इति लक्ष्मणमाक्रुश्य सीता दुःखसमन्विता ॥ पाणिभ्यां रुदती दुःखादुदरं प्रजघान ह ॥ ३८ ॥
तामार्तरूपां विमना रुदन्तीं सौमित्रिरालोक्य विशालनेत्राम् ॥
आश्वासयामास न चैव भर्तुस्तं भ्रातरं किंचिदुवाच सीता ॥ ३९ ॥
ततस्तु सीतामभिवाद्य लक्ष्मणः कृताञ्जलिः किञ्चिदभिप्रणम्य च ॥
अन्वीक्षमाणो बहुशश्च मैथिलीं जगाम रामस्य समीपमात्मवान् ॥ ४० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सीताचोदनयालक्ष्मणेरामंप्रतियातेलब्धावकाशेनरावणेनसंन्यासिवेषपरिग्रहेणसीतासमीपंप्रत्यागमनम् ॥ १ ॥ सीतया स्वसौन्दर्यप्रशंसनपूर्वकं स्ववनागमनकारणादिकंपृच्छतेरावणायपाद्यादिनापरिपूजनम् ॥ २ ॥

तया परुषमुक्तस्तु कुपितो राघवानुजः ॥ स विकाङ्क्षन्भृशं रामं प्रतस्थे नचिरादिव ॥ १ ॥

॥ ३७ ॥ आक्रुश्य विनिन्द्य ॥ ३८ ॥ भर्तुर्भ्रातरंन किंचिदुवाचेति आश्वासनव्याजेनगमनविलम्बंकरोतीति कोपेनेति शेषः ॥ ३९ ॥ किंचिदिति कोपमिश्रत्वात् किंचित्प्रणामः । बहुशोऽन्वीक्षमाण इति कथमेनामेकाकिनींत्यक्त्वा गमिष्यामीत्यनुशयेन बहुशोन्वीक्षणं । आत्मवान् धैर्यवान् । अस्मिन्सर्गे सार्धचत्वारिंशच्छ्लोकाः ॥ ४० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चचत्वारिंशः सर्गः ॥४५॥

अथ सीतायाः लक्ष्मणविषयपरुषभाषणफलं दर्शयत्येकादशभिः सर्गैः । रावणप्रलोभनमाह षट्चत्वारिंशे—तया परुषमित्यादिना । विकाङ्क्षन् अनिच्छन्नेव । राममुद्दिश्य प्रतस्थे । नचिरादिव अविलम्बितमेव । इवशब्दो वाक्यालङ्कार इति वा । यद्वा नचिरादिव सीतात्यागासहिष्णुतया पादौ पश्चादा-

या । सीतामादायरामेष्टां पावकोन्तरधीयत । कृत्यातुरावणवधं रामोलक्ष्मणसंयुतः । समादायाभवत्सीतां शङ्काकुलितमानसः । साप्रत्ययायभूतानां सीतामायामयीपुनः । विवेशपावकंदीप्तं ददाहज्वलनोपिताम् । दग्ध्वामायामयींसीतां भगवानुप्रदीधितिः । रामायादर्शयत्सीतां पावकोसौसुरप्रियः । एतत्पतिव्रतानांवै माहात्म्यंकथितंमया । स्त्रीणांसर्वाधिशमनं प्रायश्चित्तमिदंस्मृतम् ।" इत्युत्तरखण्डे चतुस्त्रिंशेऽध्याये । अनेन स्त्रीणांजातिभ्रंशकरापदि अग्निप्रवेशोनदोषाय सर्वप्रायश्चित्तंचेतिध्वनितं । कदाप्यन्यंपुरुषंनस्पृशे इत्यन्वयः ॥ अत्र पत्यसांनिध्यइतिशेषः । तेन विराधस्पर्शेपिनहानिः । तदा पतिसंनिधानात् । किंच साक्षाद्भगवतीस्पर्शे रावणोविराधवत्तत्क्षणादेवम्रियेत । एवंच सर्वराक्षसवधोनस्यादिति मायासीतारचना । किंचास्यकार्यं हनुमत्पुच्छाग्निनालङ्कादाहः । अन्यथा रावणवशेनलोकपालाग्निना कथं तन्नगरदाहस्स्यात् । एतच्छक्तिप्रवेशेनतु तत्कार्यसामर्थ्यंतस्येतिमन्तव्यं । किंचैवंप्रतिज्ञाय रावणस्पर्शेजगन्मातुः प्रतिज्ञाभङ्गस्स्यात् ॥ स० स्पृशे स्पर्शनंचपतित्वेनस्वीकरणं ॥ ३७ ॥ ति० आश्रुत्य लक्ष्मणंप्रतिप्रतिज्ञाय । दुःखात् सकलकरणतापादिव । उदरंप्रजघानेत्यनेन सर्वरक्षोमरणविना नमेउदरपूर्तिरितिसूचितं । अन्यथा शोके वक्षआघातस्यैवस्त्रीषुप्रसिद्ध्याऽसंगतिस्स्यात् ॥ ३८ ॥ ति० अभिवाद्य मनसेतिशेषः । किंचिदभिप्रणम्येतिकायिकस्सउक्तः । अत्रकिंचिदित्यनेन कोपस्सूचितः । यद्यपि कोपेपि यथोचितव्यवहारत्यागोलक्ष्मणस्यानुचितः । तथापि प्रतिज्ञोत्तरंतथैव स्वच्छायांसंदर्श्य तस्याअग्निप्रवेशोद्यमेनच्छायाबुद्ध्याकिंचित्प्राञ्जलित्वं किंचिदेवनमनमित्यनेनसूचितं । कथमेनारामेणविनात्यक्ष्यामीति बहुशोऽवेक्षमाणः अग्निंप्रविष्टानवेतिचवीक्षमाणः ॥ ४० ॥ इतिपञ्चचत्वारिंशस्सर्गः ॥ ४५ ॥

ति० नचिरादिव शीघ्रमेवेत्यर्थः । विकाङ्क्षन् विशेषेणकाङ्क्षमाणः तत्सविधगमनमिच्छन्नित्यर्थः । काङ्क्षिश्शङ्कायामपि । तेन रामंविरुद्धंशङ्कमानः । शीघ्रमितोऽनपसरणे कार्यनाशाद्रामोपि विरुद्धस्स्यादितिशङ्कमानः शीघ्रंजगामेतिव्यङ्ग्यं । अतएव व्यवहितपूर्वसर्गान्ते मारीचस्य तथाशब्दोत्तरं सीताविषयांमहतींचिन्तामुक्त्वा ततः पुनरपिमांसार्थमितर-

[पा०] १ ङ. झ. ट. माश्रुत्य. २ ङ. झ. ट. शोकसमन्विता. ३ क. ख. ग. रालक्ष्य. ४ ङ—ट. बहुशस्समैथिलीं. क. ग. बहुशश्चजानकीं. ५ ख. चिरादिह.

तदासाद्य दशग्रीवः क्षिप्रमन्तरमास्थितः ॥ अभिचक्राम वैदेहीं परिव्राजकरूपधृत् ॥ २ ॥
कृष्णकाषायसंवीतः शिखी छत्री उपानही ॥ वामे चांसेऽवसज्याथ शुभे यष्टिकमण्डलू ॥
परिव्राजकरूपेण वैदेहीं समुपागमत् ॥ ३ ॥
तामाससादातिबलो भ्रातृभ्यां रहितां वने ॥ रहितां चन्द्रसूर्याभ्यां सन्ध्यामिव महत्तमः ॥ ४ ॥
तामपश्यत्ततो बालां रामपत्नीं यशस्विनीम् ॥ रोहिणीं शशिना हीनां ग्रहवद्भृशदारुणः ॥ ५ ॥
तमुग्रतेजःकर्माणं जनस्थानरुहा द्रुमाः ॥ समीक्ष्य न प्रकम्पन्ते न प्रवाति च मारुतः ॥ ६ ॥
शीघ्रस्रोताश्च तं दृष्ट्वा वीक्षन्तं रक्तलोचनम् ॥ स्तिमितं गन्तुमारेभे भयाद्गोदावरीनदी ॥ ७ ॥
रामस्य त्वन्तरप्रेप्सुर्दशग्रीवस्तदन्तरे ॥ उपतस्थे च वैदेहीं भिक्षुरूपेण रावणः ॥ ८ ॥
अभव्यो भव्यरूपेण भर्तारमनुशोचतीम् ॥ अभ्यवर्तत वैदेहीं चित्रामिव शनैश्चरः ॥ ९ ॥
स पापो भव्यरूपेण तृणैः कूप इवावृतः ॥ अतिष्ठत्प्रेक्ष्य वैदेहीं रामपत्नीं यशस्विनीम् ॥ १० ॥
[तिष्ठन्संप्रेक्ष्य च तदा पत्नीं रामस्य रावणः] ॥ शुभां रुचिरदन्तोष्ठीं पूर्णचन्द्रनिभाननाम् ॥
आसीनां पर्णशालायां बाष्पशोकाभिपीडिताम् ॥११॥

कर्षतः रामप्राप्तित्वरा तु पुरतः कर्षतीतीवशब्दस्य भावः ॥ १ ॥ आस्थितः अवकाशं प्रतीक्षमाणस्थितो दशग्रीवः । तदेव अन्तरं अवकाशं । आसाद्य वैदेहीं अभिचक्राम आभिमुख्येनाजगाम । परिव्राजको भिक्षुः तस्य रूपं लिङ्गं धारयतीति परिव्राजकरूपधृत् ॥२॥ परिव्राजकलिङ्गान्याह—कृष्णेति । शिखी अदन्तत्वाभावेपि शीलादित्वादिनिः । छत्रीत्यत्र वाक्यसंधेरनित्यत्वेन वर्णभावः । उपानहीत्यत्र इनिरार्षः । यष्टिः त्रिदण्डं । शिखीत्यनेन साहचर्यात् । अत्र धर्मप्रधानजनककुलनन्दिन्याः सीताया विश्वासाय धृतत्वादित्थमेव यतिलिङ्गमिति दर्शितं । तथाहाङ्गिराः "यतेर्लिङ्गं प्रवक्ष्यामि येनासौ लक्ष्यते यतिः । ब्रह्मसूत्रं त्रिदण्डं च वस्त्रं जन्तुनिवारणं ॥ शिक्यं पात्रं कुसी चैव कौपीनं कटिवेष्टनम् । यस्यैतद्विद्यते लिङ्गं स यतिर्नेतरो यतिः" इति । परिव्राजकरूपेणेत्यनेन ब्रह्मसूत्रादिकमुक्तं । समुपागमदिति प्रतिपादार्थभेदात्पुनःपुनः क्रियापदप्रयोगः ॥ ३ ॥ भ्रातृभ्यां रामलक्ष्मणाभ्यां । महत्तम इत्यभूतोपमा । सन्ध्यायां महत्त्वमसोसंभवात् ॥ ४ ॥ ग्रहः अङ्गारकः शनैश्चरो वा । स रोहिणीमिव भृशदारुणो रावणस्तामपश्यत् । यथा रोहिण्याःक्रूरग्रहवीक्षणंलोकानर्थकरं तथा रावणस्यसीतावीक्षणमिति भावः ॥ ५ ॥ दारुणत्वं प्रकटयति—तमुग्रमिति ॥ ६ ॥ शीघ्रस्रोताः शीघ्रप्रवाह । वीक्षन्तं वीक्षमाणं । स्तिमितमिति क्रियाविशेषणं ॥ ७ ॥ रामस्यान्तरप्रेप्सुः विश्लेषान्वेषी । तदन्तरे तस्मिन्नवकाशे । प्रथमं सीतामुद्दिश्य गमनं अथाश्रमसमीपगमनं ततः सीतादर्शनं ततः सन्निकर्षगमनमिति क्रमः ॥ ८ ॥ अथाभिमुखगमनमाह—अभव्यइति । अभव्यः दुर्जनः । भव्यरूपेण सुजनरूपेण । अनुशोचतीमिति आगमशासनस्यानित्यत्वाशुभभावः ॥९॥ पापः अन्तःपापात्मा । भव्यरूपेण बाह्याकारेणोपलक्षितः ॥१०॥ बाष्पशो-

मृगवधप्रवृत्तिरुक्ता । सा विलंबायैव ॥ १ ॥ स० तेनैव रक्षोरूपेणाऽऽगमने न प्रत्यानयनं-सीतायास्त्यादिति वेषान्तरेणागमनंचेद्गृहस्थवेषेण कुतो नागतिरितिचेन्न । मध्येसंवादं रामागतौ समरसमारंभोभवेदितिमतिमान् अयं यतिवेषस्तदनारंभकइति तमदीधरदितिसंभवात् । हन्तर्हि रामरूपंकुतोनदधारेति परमवशिष्यतेशङ्केतिचेन्न । इदानीन्तना अपि यद्यद्वेषमिषेणायान्तस्तत्तदाचाराइति रामरूपग्रहणे नान्यकामिनीकामस्त्यादिति तत्त्यागइतिसंभवात् ॥ २ ॥ ति० शिखीति । अनेन त्रिदण्डिसंन्यासिविशेषस्मुचितः । तदुक्तं भारते—"रावणश्चयतिर्भूत्वा मुण्डः कुण्डीत्रिदण्डधृक्" इति । तत्रमुण्डइत्यनेन जटिलव्यावृत्तिः । यष्टिस्त्रिदण्डात्मिका ॥ ३ ॥ ति० भ्रातृभ्यां परस्परभ्रातृभ्यां ॥ ४ ॥ ति० बाष्पैः

[पा०] १ घ. दण्डकमण्डलु. २ क. ङ. ट. वैदेहीमन्ववर्तत, क. ध. म. वैदेहीमन्वपद्यत, ३ क. घ. छ. ज. ञ. माससादतदक्षो. ४ ङ. सूर्यचन्द्राभ्यां. ५ क. ख. ङ—ट. राजपुत्रीं. ६ ङ. ङ. ट. तमुग्रंपापकर्माणं. ७ ङ—ठ. जनस्थानगताः. ८ ङ. ङ. थ. ट. संदृश्य. ९ क. प्रवातिस्म. १० क. स्तिमिता. ११ ख. ङ. ङ. ठ. त्वन्तरंप्रेप्सुः. १२ ख. दशग्रीवो महाबलः. १३ ङ. ट. सहसाभव्य. १४ इदमर्धं क. ख. ग. ङ. ङ. पाठेषुदृश्यते.

स तां पद्मपलाशाक्षीं पीतकौशेयवासिनीम् ॥ अभ्यगच्छत वैदेहीं दुष्टचेता निशाचरः ॥ १२ ॥
स मन्मथशराविष्टो ब्रह्मघोषमुदीरयन् ॥ अब्रवीत्प्रश्रितं वाक्यं रहिते राक्षसाधिपः ॥ १३ ॥
तामुत्तमां स्त्रियं लोके पद्महीनामिव श्रियम् ॥ विभ्राजमानां वपुषा रावणः प्रशशंस ह ॥ १४ ॥
का त्वं काञ्चनवर्णाभे पीतकौशेयवासिनि ॥ कमलानां शुभां मालां पद्मिनीव हि बिभ्रती ॥ १५ ॥
ह्रीः कीर्तिः श्रीः शुभा लक्ष्मीरप्सरा वा शुभानने ॥ भूतिर्वा त्वं वरारोहे रतिर्वा स्वैरचारिणी ॥ १६ ॥
समाः शिखरिणः स्निग्धाः पाण्डुरा दशनास्तव ॥ विशाले विमले नेत्रे रक्तान्ते कृष्णतारके ॥ १७ ॥
विशालं जघनं पीनमूरू करिकरोपमौ ॥ १८ ॥
एतावुपचितौ वृत्तौ संहतौ संप्रवल्गितौ ॥ पीनोन्नतमुखौ कान्तौ स्निग्धौ तालफलोपमौ ॥
मणिप्रवेकाभरणौ रुचिरौ ते पयोधरौ ॥ १९ ॥
चारुस्मिते चारुदति चारुनेत्रे विलासिनि ॥ मनो हरसि मे कान्ते नदीकूलमिवाम्भसा ॥ २० ॥

कामिपीडितां रामार्तस्वरश्रवणेन बाह्याभ्यन्तरास्वास्थ्यवतीं । पीतकौशेयं वस्ते इति पीतकौशेयवासिनीं । णिन्यन्तात् ङीप् । अभ्यगच्छत पूर्वस्मादपि सन्निकर्षं प्राप्तः ॥ ११—१२ ॥ ब्रह्मघोषं "उपनिषदमावर्तयेत्" इत्युक्तपरिव्राजकोचितवेदघोषं । प्रश्रितं विनयान्वितं । रहिते विजनप्रदेशे ॥१३॥ लोके उत्तमां स्त्रियमित्यन्वयः । प्रश्रितं वाक्यमब्रवीदित्यस्यैव विवरणं—प्रशशंसेति ॥ १४ ॥ काञ्चनवर्णाभे काञ्चनतुल्यवर्णे । कमलानां मालां बिभ्रती पद्मिनीव स्थिता । पद्मतुल्यमुखनयनपाणिपादविशिष्टत्वादिति भावः ॥ १५ ॥ ह्रीः विष्णुपत्नी भूमिः । "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति श्रुतेः । श्रीः कमला । लक्ष्मीः कान्त्यधिष्ठानदेवता । रतिः मन्मथस्त्री । स्वैरचारिणी स्वतन्त्रा ॥ १६ ॥ समाः वैषम्यरहिताः । शिखराणि अग्राणि प्रशस्तानि सन्तीति शिखरिणः । प्रशंसायामिनिः । कुन्दकुड्मलवत्प्रशस्ताग्रा इत्यर्थः । स्निग्धाः मसृणाः । रक्तान्ते रक्तरेखायुक्तान्ते । जघनं कटिपुरोभागः । "पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः" इत्यमरः ॥ १७—१८ ॥ उपचितौ उन्नतौ । वृत्तौ वर्तुलौ । संहतौ अन्योन्यसंश्लिष्टौ । सम्यक् प्रकृष्टं वल्गितं चलनं ययोस्तौ संप्रवल्गितौ गुरुत्वौन्नत्याभ्यां किंचिच्चलन्ताविव स्थितावित्यर्थः । पीनोन्नतमुखौ क्वचित्स्तनयोः पीनत्वेप्यग्रे औन्नत्यं पीनत्वं च न स्तः तथा न भवत इमौ किंतु पीनं उन्नतं च मुखं ययोस्तौ । कान्तौ काम्यमानौ । मणिप्रवेकाभरणौ मणिप्रवेकाः मणिश्रेष्ठाः । "प्रवेकानुत्तमोत्तमाः" इत्यमरः । ते मालात्मकाः आभरणं ययोस्तौ । रुचिरौ शोभमानौ । सूक्ष्मतरकौशेयोत्तरीयचलनवशेन हठाद्दृष्टः प्रकारो दुरात्मना वर्ण्यते ॥ १९ ॥ चारवो दन्ता यस्याः सा चारुदती । आर्षो दन्तस्य दत्रादेशः । छन्दोवद्भावेन "छन्दसि च" इति सूत्रेण समासान्तो दन्तस्य दत्रादेशो वा "उगितश्च" इति ङीप् । समा इत्यादिना पूर्वोक्तस्य सामान्योक्तिरियं चारुस्मितत्वनिर्वाहाय । विलासोऽम्भ-

शोकेनचाभिपीडितां । स्वयमग्नौप्रविश्य मांरक्षसे दत्तवतीति शोकबाष्पौ । रामव्यसनशङ्कयेत्यापाततोर्थः ॥ ११ ॥ शि० अब्रवीत् प्रशंसितुमैच्छत् । अतएववक्ष्यमाणेन नपौनरुक्त्यं ॥ १३ ॥ टीका० कालमित्यादिप्रश्नस्तयासह सँल्लापार्थः नलक्षणार्थः । ति० रौप्यकाञ्चनं उत्तमकाञ्चनं ॥१५॥ शि० श्रीः शोभासंपत्तिः । लक्ष्मीरैश्वर्यसंपत्तिरिति नपौनरुक्त्यं ॥ ति० ह्रीः गौरी । श्रीः ऐश्वर्यप्रधानाभगवच्छक्तिः । भूतिरणिमादिसिद्धिः ॥१६॥ ति० संप्रगल्भितौ आलिङ्गनादौ संजातप्रागल्भ्यौ । संप्रवल्गितावितिपाठे आलिङ्गनोद्यतावित्यर्थः ॥ १९ ॥ स० हेरामे हेसीते । नदीतिकर्तृनिर्देशः । नदी स्वांभोलक्षणकरणे नकूलं

[पा०] १ ख. विशालाक्षीं. २ च. छ. ज. ञ. दुष्टचित्तो. ग. दुष्टरूपो. ३ ग. ङ. झ. ट. दृष्ट्वाकामशराविद्धो. ४ क. ङ—ट. त्रिलोकानां. ५ ङ. झ. ट. रौप्यकाञ्चन. ६ क. ङ—ट. श्रीःकीर्तिः. ७ च. छ. ज. ञ. वरानने. ८ क. ख. भूमिर्वा. ९ ग. गजकरोपमौ. १० क. ख. घ ङ—ञ. सहितौ. झ. संप्रगल्भितौ. ११ च. छ. ज. ञ. श्रेष्ठौ. क. ङ. झ. ट. स्निग्धताल. १२ ङ. झ. ट. रुचिरौतौ. १३ छ. झ. ञ. ठ. रामे.

करान्तमितमध्यासि सुकेशी संहतस्तनी ॥२१॥
नैव देवी न गन्धर्वी न यक्षी नच किन्नरी ॥ नैवंरूपा मया नारी दृष्टपूर्वा महीतले ॥ २२ ॥
रूपमग्र्यं च लोकेषु सौकुमार्यं वयश्च ते ॥ इह वासश्च कान्तारे चित्तमुन्मादयन्ति मे ॥ २३ ॥
सा प्रतिक्राम भद्रं ते न त्वं वस्तुमिहार्हसि ॥ राक्षसानामयं वासो घोराणां कामरूपिणाम् ॥२४॥
प्रासादाग्राणि रम्याणि नगरोपवनानि च ॥ संपन्नानि सुगन्धीनि युक्तान्याचरितुं त्वया ॥ २५ ॥
वरं माल्यं वरं भोज्यं वरं वस्त्रं च शोभने ॥ भर्तारं च वरं मन्ये त्वद्युक्तमसितेक्षणे ॥ २६ ॥
का त्वं भवसि रुद्राणां मरुतां वा वरानने ॥ वसूनां वा वरारोहे देवता प्रतिभासि मे ॥ २७ ॥
नेहैं गच्छन्ति गन्धर्वा न देवा न च किन्नराः ॥ राक्षसानामयं वासः कथं नु त्वमिहागता ॥ २८ ॥
इह शाखामृगाः सिंहा द्वीपिव्याघ्रर्क्षगास्तथा ॥ ऋक्षास्तरक्षवः कङ्काः कथं तेभ्यो न बिभ्यसि ॥२९॥
मदान्वितानां घोराणां क्रूराणां तरस्विनाम् ॥ कथमेका महारण्ये न बिभेषि वरानने ॥ ३० ॥
कासि कस्य कुतश्चित्वं किंनिमित्तं च दण्डकान् ॥ एका चरसि कल्याणि घोरान्राक्षससेवितान् ॥ ३१ ॥
इति प्रशस्ता वैदेही रावणेन दुरात्मना ॥ द्विजातिवेषेण हितं दृष्ट्वा रावणमागतम् ॥
सर्वैरतिथिसत्कारैः पूजयामास मैथिली ॥ ३२ ॥
उपनीयासनं पूर्वं पाद्येनाभिनिमन्त्र्य च ॥ अब्रवीत्सिद्धमित्येव तदा तं सौम्यदर्शनम् ॥ ३३ ॥

स्थानीयः । अतो न न्यूनोपमा ॥ २० ॥ करान्तेति करान्तेन करतलाङ्गुष्ठप्रदेशिनीचक्रमानेन मितं परिच्छिन्नं मध्यं यस्याः सा । संहतस्तनीति पूर्वं संहताविति युक्तकल्पेपि पुनरुक्तिर्दुर्लभलक्षणत्वविस्मयेन ॥ २१ ॥ एवंरूपा देवी देवस्त्री । देवलोके न दृष्टा । एवमुत्तरत्रापि योज्यं । नारी मनुष्यस्त्री ॥ २२ ॥ लोकेष्वग्र्यं श्रेष्ठं । रूपं लावण्यं । रूपादीनि कान्तारवासश्च उन्मादयन्ति परस्परविरुद्धत्वात् । किमत्र त्वदागमनमिति निर्णयबुद्धिं न जनयन्तीत्यर्थः ॥२३॥ प्रतिक्राम प्रतिनिवर्तस्व । निलयमिति शेषः । वस्तुं स्थातुं ॥ २४ ॥ संपन्नानि समृद्धानि । आचरितुं संचरितुम् ॥ २५ ॥ वरं श्रेष्ठं । माल्यादि त्वद्युक्तं तव योग्यं मन्ये । नतु यादृशतादृशं । एवमुत्तरत्रापि । यद्वा माल्यादिकं त्वद्युक्तं त्वत्संबद्धं सत् वरं प्रशस्तं भवतीति मन्ये ॥ २६ ॥ त्वं मे देवता देवस्त्रीति प्रतिभासि । तत्र कात्स्न्यं किं रुद्राणां संबन्धिनी उत मरुतां आहोस्विद्वसूनां संबन्धिनी । वाकारःसमुच्चयार्थः । तेन किमादित्यानामित्यपि सिध्यति ॥ २७ ॥ तत्रापि संशयनिवृत्तिमाह—नेहेति ॥ २८ ॥ भयहेत्वन्तरमाह—इहेति । शाखामृगाः वानराः । द्वीपं चर्म तद्योगात् द्वीपिनो बालव्याघ्राः । व्याजिघ्रन्तीति व्याघ्राः द्वीप्यपेक्षया किञ्चिन्महान्तोऽमी । तरक्षवो मृगादनामहाव्याघ्राः । न बिभ्यसि न बिभेषि । कङ्काः मांसादा भयंकराकृतयःपक्षिविशेषाः ॥ २९ ॥ पञ्चम्यर्थे षष्ठी । तरस्विनां बलवतां ॥ ३० ॥ कासि किंनामधेयासि । कस्य संबन्धिनी । कुतः कस्मादेशादागतासि ॥ ३१ ॥ द्विजातिवेषेण संन्यासिवेषेण हितं सहितं । सत्क्रियते एभिरिति सत्काराः पूजाद्रव्याणि तैः ॥ ३२ ॥ उक्तं विवृणोति—उपनीयेति । पाद्येन पादोदकेन । अभिनिमन्त्र्य सत्कृत्य । तदा पाद्यप्रदानानन्तरं सिद्धमि-

यथा तथेत्यर्थः । तैश्चारुस्मितादिभिर्मनोहरसीत्यर्थः । अरामे इतिच्छेदः । रामरहितदेशेवा ॥ २० ॥ ति० प्रतिक्राम निर्गच्छ । रामचन्द्राधिष्ठितस्थाने राक्षसपराक्रमासंभवादेवंवचनं ॥ २४ ॥ ति० द्वीपिव्याघ्रौ सबिन्दुनिर्बिन्दू ॥ २९ ॥ ति० द्विजातिवेषेण तमागतंदृष्ट्वा द्विजातिवेषोऽयंरावणइतिज्ञात्वापि । अतिथिसत्कारैः अतिथियोग्यसत्कारैः ॥ ३२ ॥

[पा०] १ ख. रूपमग्रप्रतिमंलोके. २ क. ख. घ. संप्रतिक्राम. ३ क. ङ. ट. गन्धर्व. ४ क. ग. ङ—ट. शुचिस्मिते. ख. शुभानने. ५ क. ख. ङ. च. ज. ञ. नेहागच्छन्ति. ६ क. ङ. ट. मृगाङ्काः. ७ क—ट. बिभ्यसे. ८ क. ङ. ट. महात्मना. ९ ख—क. ङ. ढ. उपनीय. १० क. सौम्यदर्शना.

द्विजातिवेषेण समीक्ष्य मैथिली समागतं पात्रकुसुम्भधारिणम् ॥
अशक्यमुद्वेष्टुमपायदर्शनं न्यमन्त्रयद्ब्राह्मणवत्तदाऽङ्गना ॥ ३४ ॥
इयं बृसी ब्राह्मण काममास्यतामिदं च पाद्यं प्रतिगृह्यतामिति ॥
इदं च सिद्धं वनजातमुत्तमं त्वदर्थमव्यग्रमिहोपभुज्यताम् ॥ ३५ ॥
निमन्त्र्यमाणः प्रतिपूर्णभाषिणीं नरेन्द्रपत्नीं प्रसमीक्ष्य मैथिलीम् ॥
प्रसह्य तस्या हरणे धृतं मनः समर्पयत्स्वात्मवधाय रावणः ॥ ३६ ॥
ततः सुवेषं मृगयागतं पतिं प्रतीक्षमाणा सहलक्ष्मणं तदा ॥
विवीक्षमाणा हरितं ददर्श तन्महद्वनं नैव तु रामलक्ष्मणौ ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

त्येवाब्रवीत् पक्वान्नं सिद्धमित्यब्रवीत् ॥३३॥ उक्तमर्थं सर्गान्तश्लोकाभ्यां विवृणोति द्विजातीति. द्विजातिवेषेण समागतं प्राप्तं । अलाबुप्रभृतिष्वेकं कुसुम्भं महारजताख्यरञ्जकद्रव्यविशेषरक्तं वस्त्रं । "तेन रक्तं—" इति प्राप्तस्याणो लोप आर्षः । यद्वा कुसुम्भः कमण्डलुः । "स्यान्महारजते क्लीबं कुसुम्भं करके पुमान्" इत्यमरः । तदुभयधारिणं । अपाये अपहरणे अनर्थकरणे वा दर्शनं बुद्धिर्यस्य तं । अत एव उद्वेष्टुं भोजयितुमशक्यं तं समीक्ष्य मैथिली ब्राह्मणवत् ब्राह्मणेन सदृशं यथा भवति तथा । न्यमन्त्रयत् ब्राह्मणातिथिवन्निमन्त्रितवतीत्यर्थः । यद्वा ब्राह्मणवत् ब्राह्मणाई । "तदर्ह" इति यतिः । यद्वा मैथिली जनककुलजातसया तद्व्यवहारपरिपाटीविज्ञातकपटवेषापि संन्यासिवेषधारणमात्रेण उद्वेष्टुं द्वेषं कर्तुं । अशक्यं तं न्यमन्त्रयत् । "कषायदण्डमात्रेण यतिः पूज्यो न संशयः" इति वचनादिति भावः ॥ ३४ ॥ सत्कारप्रकारमाह—इयमिति । इयं बृसी मुनीनामासनं । आस्यतां स्वदर्थं सिद्धं पक्वं । इदं वनजातं कन्दमूलफलादिकं । इह स्थले अव्यग्रमुपभुज्यतां । इतिकरणस्य उत्तरश्लोकेऽन्वयः ॥ ३५ ॥ इति प्रतिपूर्णभाषिणीं सर्वं संपन्नमित्यतिथये वक्तव्यवचनंभाषमाणां । धृतं धीरं यथा तथा मनोविशेषणं वा । तस्या हरणे मनः समर्पयत् निहितवान् ॥ ३६ ॥ सुवेषं शोभनाकारं मृगयागतं मृगयार्थगतं पतिं प्रतीक्षमाणा प्रतिपालयन्ती । हरितं यत्र गतौ तौ तां दिशं विवीक्षमाणा विविधं पश्यन्ती । महद्वनमेव ददर्श रामलक्ष्मणौ तु न ददर्श ॥३७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षट्चत्वारिंशः सर्गः ॥ ४६ ॥

शि० उपायानोब्राह्मणलप्रतिपत्त्यैरावणेनकृतानांकाषायवस्त्रब्राह्मणोपदण्डादीनांदर्शनात् । उद्वेष्टुंउपेक्षितुंअशक्यमितिविचार्यातिशेषः । तथागतं ब्राह्मणवेषेणागतं । रावणं ब्राह्मणवेष न्यमन्त्रयत् । पाठान्तरंलङ्काराजकल्पितं । अयमेवरक्षस्संहारोपाय इतिदर्शनादित्यपि गूढमत्र ॥ ३४ ॥ टीका० "यतीनांपूजनंकार्यं क्रियावापुरुषेणवा" इत्युक्तलात्सीता तमपूजयदितिभावः ॥ ३५ ॥ वि० मनस्समर्पयित्वात्मवधायेतिपाठे हरणेधृतंनिश्चितंमनस्समर्पयित्वा दत्तास्थितइत्यर्थः ॥ ३६ ॥ रामानु० हरितं श्यामं ॥ ३७ ॥ ही० फलश्रुतिस्स्कान्दे—"सीतारावणसंवादं येशृण्वन्तिनरोत्तमाः । तेषांपापराशिभ्यः पीडालोकेभविष्यति" इति ॥ ३८ ॥ इतिषट्चत्वारिंशस्सर्गः ॥ ४६ ॥

[पा०] १ क. च. छ. ज. ञ. तमागतं. २ क. घ. च. छ. ज. मुपायदर्शनं. क. ङ. झ. ञ. ट. मुपायदर्शनाभ्यमन्त्रयत्. ३ ङ. झ. ट. तथागतं. ४ ङ. झ. ञ ट. समर्पयामासवधाय. च. छ. ज. समर्पयित्वाऽऽत्मवधाय. क. ख. समर्पयन्नात्मवधाय. ५ ङ—ञ. निरीक्षमाणा. ग. समीक्षमाणा.

सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

सीतयारावणंप्रतिशापभीत्या स्वयाथात्म्येनसहवनागमनकारणकथनपूर्वकंतद्यायाच्ञ्यप्रभः ॥ १ ॥ लब्धावकाशेनरावणेन सीतांप्रतिस्वस्यरावणत्वाविष्करणेनस्वैरंभवप्रशंसनपूर्वकंस्वकलत्रीभवनप्रार्थना ॥ २ ॥ सीतयारावणंप्रतिरामगुणानुवर्णनेन स्वस्यतदन्यकामनाऽभावनिवेदनपूर्वकंसदृष्टान्ताभिधानंरामरावणयोस्तारतम्यप्रतिपादनेनबहुधातद्भर्त्सनम् ॥ ६ ॥

रावणेन तु वैदेही तथा पृष्टा जिहीर्षता ॥ परिव्राजकलिङ्गेन शशंसात्मानमङ्गना ॥ १ ॥
ब्राह्मणश्चातिथिश्चायमनुक्तो हि शपेत माम् ॥ इति ध्यात्वा मुहूर्तं तु सीता वचनमब्रवीत् ॥ २ ॥
दुहिता जनकस्याहं मैथिलस्य महात्मनः ॥ सीता नाम्नाऽस्मि भद्रं ते रामभार्या द्विजोत्तम ॥ ३ ॥
उषित्वा द्वादश समा इक्ष्वाकूणां निवेशने ॥ भुञ्जानान्मानुषान्भोगान्सर्वकामसमृद्धिनी ॥ ४ ॥
तस्त्रयोदशे वर्षे राजाऽमन्त्रयत प्रभुः ॥ अभिषेचयितुं रामं समेतो राजमन्त्रिभिः ॥ ५ ॥
तस्मिन्संभ्रियमाणे तु राघवस्याभिषेचने ॥ कैकेयी नाम भर्तारमार्या सा याचते वरम् ॥ ६ ॥
प्रतिगृह्य तु कैकेयी श्वशुरं सुकृतेन मे ॥ मम प्रव्राजनं भर्तुर्भरतस्याभिषेचनम् ॥
द्वावयाचत भर्तारं सत्यसन्धं नृपोत्तमम् ॥ ७ ॥

अथ मैथिली आर्जवेन स्वस्यरूपमुक्त्वा रावणानार्जवदर्शनेन स्वपातिव्रत्यानुरूपं तमुपालभते—रावणेन त्वित्यादिना । जिहीर्षता हर्तुमिच्छता । तेन कापट्येन पृष्टापि यतिचिह्नं पुरस्कृत्य स्वयाथात्म्यमुक्तवतीति भावः ॥ १ ॥ यतित्वेषंप्रत्यालब्धवंशं सा किमर्थमुक्तवतीत्यत्राह—ब्राह्मणश्चेति ॥ २ ॥ कासीत्यस्योत्तरमाह—दुहितेति । कस्येत्यस्योत्तरमाह—रामेति ॥ ३ ॥ कुत्रचिदित्यादेरुत्तरमाह—उषित्वेत्यादिना । विवाहानन्तरं इक्ष्वाकूणां निवेशने अयोध्यायां । द्वादशसमाः द्वादशवत्सरानुषित्वा तत्र सर्वकामसमृद्धिनी काम्यन्त इति कामाः भोगोपकरणस्रक्चन्दनादीनि तेषां समृद्धं समृद्धिः भावे निष्ठा । तद्वती सती मानुषान्भोगान् रतिक्रीडाः । अमान्यत्वाय मानुषानित्युक्तं । वस्तुतः स्वयं दिव्यभोगपरतया मानुषानित्यवशब्दयुक्तवती । यद्वा मानुषान् मनुष्यत्वेनावतीर्णरामकृतान् भोगान् । अमानुषानिति वा छेदः । मनुष्यदुर्लभान् दिव्यान्भोगानित्यर्थः । भुञ्जाना अभवमिति शेषः । सर्वकामसमृद्धिनि इति सप्तम्यन्तपाठे सर्वकामसमृद्धिनि इक्ष्वाकूणां इक्ष्वाकुवंश्यस्यरामस्य । पूजायां बहुवचनं । श्रीडया भर्तृनामाग्रहणं । निवेशने गृहे । द्वादश समाः द्वादश वत्सरान् । अत्यन्तसंयोगे द्वितीया । अमानुषान्भोगान् भुञ्जाना अनुभवन्ती सती उषित्वा उषितवत्यस्मि । व्यत्ययेन त्वाप्रत्ययः ॥ ४ ॥ राजा दशरथः । अमन्त्रयत् अकथयत् । राजमन्त्रिभिः मन्त्रिराजैः मन्त्रिश्रेष्ठैरिति यावत् । राजदन्तादित्वात्परनिपातः ॥ ५ ॥ तस्मिन् रामाभिषेचने । संभ्रियमाणे आरभ्यमाणे सति । आर्या पूज्या मम श्वश्रूरित्यर्थः । सा प्रसिद्धा कैकेयी वरं याचते अयाचत ॥ ६ ॥ कं वरं कमयाचतेत्यत्राह—प्रतिगृह्येति । सार्धश्लोक एकान्वयः । कैकेयी मे श्वश्रूः स्वस्य भर्तारं । सत्यसन्धं सत्यप्रतिज्ञं । नृपोत्तमं दशरथं सुकृतेन प्रतिगृह्य धर्मेणशापयित्वा । यद्वा । सुकृतेनोपकारेण प्रतिगृह्य वशीकृत्य । स्वकृतप्राणप्रदानोपकारस्मारणेन राजानं वशीकृत्येत्यर्थः । मम भर्तुः प्रव्राजनं भरतस्याभिषेचनमित्येवंरूपौ द्वौ

ति० ननु पूजामात्रकर्तव्यं किं प्रतिवचनेनेत्यत्राह—ब्राह्मणश्चेति । एषअनुक्तइत्यर्थोसन्धिः ॥ अनुक्तः अनुक्तप्रतिवचनः ॥ २ ॥ ति० ममार्या ममपूज्याश्वश्रूः । अनार्येतिक्वचित्पाठः ॥ ६ ॥

[पा] १ क. छ. ह. ञ. ट. तदा. २ च. ज. जिहीर्षया. क. ह. ञ. ट. जिहीर्षुणा. ३ ङ—ट. रूपेण. ४ क. ख. घ. ङ. छ. ञ. ट. स्मानमात्मना. ५ क. ख. च. छ. ज. ञ. स्रातिथिश्चैवशनुक्तो. घ. ङ. ह. ट. स्रातिथिश्चैषशनुक्तो. ६ ख. घ. रामस्यमहिषीद्विज. ङ. ह. ट. रामस्यमहिषीप्रिया. ७ क—ट. तत्रत्रयोदशे. ८ ख. सर्वेषांमतमास्थितः. ९ ख. मध्यमामहिषीविभोः. १० ङ—ट. भर्तारंममार्यायाचते. ख. भर्तारमनार्यायाचते. ११ ख. ग. ङ. छ. ह. ट. परिगृह्य. १२ च. छ. ज. ञ. सुकृतेनवै. १३ ख. विवासनंचमे.

नाद्य भोक्ष्ये न च स्वप्स्ये न पास्ये च कथंचन ॥ एष मे जीवितस्यान्तो रामो यद्यभिषिच्यते ॥ ८ ॥
इति ब्रुवाणां कैकेयीं श्वशुरो मे स मानदः ॥ अयाचतार्थैरन्वर्थैर्न च याञ्चां चकार सा ॥ ९ ॥
मम भर्ता महातेजा वयसा पञ्चविंशकः ॥ अष्टादश हि वर्षाणि मम जन्मनि गण्यते ॥ १० ॥
रामेति प्रथितो लोके गुणवान्सत्यवाञ्शुचिः ॥ विशालाक्षो महाबाहुः सर्वभूतहिते रतः ॥ ११ ॥
कामार्तस्तु महातेजाः पिता दशरथः स्वयम् ॥ कैकेय्याः प्रियकामार्थं तं रामं नाभ्यषेचयत् ॥ १२ ॥

वरावयाचत ॥ ७ ॥ पास्य इत्यात्मनेपदमार्षम् । एषः अभिषेकः ॥ ८ ॥ मानदः बहुमानप्रदः । अन्वर्थैः अर्थानुगतैः सप्रयोजनैरिति यावत् । उपभोगक्षमैरित्यर्थः । अर्थैः सुवर्णरत्नादिभिः । कैकेयीमयाचत वरद्वयप्रतिनिधित्वेनैतानर्थान्प्रतिगृहाणेति प्रार्थयामासेत्यर्थः । सा तां याञ्चां न चकार नाङ्गीचकार ॥ ९ ॥ वस्तुतो मम भर्ता प्रव्राजनायोग्यः बालत्वाद्गुणवत्त्वाच्चेत्याह—मम भर्तेति । पञ्चोत्तरा विंशतिः पञ्चविंशतिः वयसा पञ्चविंशतिवर्षाण्यर्हतीति पञ्चविंशकः । "विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायां" इत्यार्हीयो ड्वुन्प्रत्ययः । "संख्यापूर्वपदानां तदन्तग्रहणमलुकि" इति तदन्तविधिः । पञ्चविंशतिवर्ष इत्यर्थः । वयःपरिमाणं वननिर्गमनकालिकं । मम जन्मनि सति वर्षाण्यष्टादशेति गण्यते । रामस्य जन्मारभ्य द्वादशे वर्षे विश्वामित्रागमनं । तदनन्तरं वैदेह्या सह नगरे द्वादशवर्षाणि वासं कृतवान् । ततः परं त्रयोदशे वर्षे यौवराज्याभिषेकारम्भः । ततश्च वनप्रवेशसमये रामः पञ्चविंशतिवर्षार्हः । ततो मुनीनामाश्रमेषु दश वत्सराः पञ्चवट्यां त्रयः वनवासस्य चतुर्दशे वर्षे सीताहरणं । सीतायाश्च भूगर्भादाविर्भावानन्तरं मिथिलायां षट् संवत्सराः ततो विवाहानन्तरमयोध्यायां द्वादश इत्येवमष्टादश वर्षा गता वनवासारम्भ इत्युक्तं । विस्तरेणायमर्थः "ऊनषोडशवर्षोमे" इत्यत्र प्रत्यपादि । इदानीं तु रामः अष्टत्रिंशद्वर्षः मम त्वेकत्रिंशद्वर्षाः गताः । इदानीं तु द्वात्रिंशो वर्षो वर्तते । अस्मिञ्श्लोके मम भर्तेत्यत्र भकारो गायत्र्याः नवमाक्षरं । अष्टसहस्रश्लोका गताः ॥ १० ॥ एवं वनवासायोग्यं वय इत्युक्त्वा गुणवत्तया प्रव्राजनानर्हत्वमाह—रामेतीति । गुणवान् सौशील्यवान् ॥ ११ ॥ एवंभूतस्य प्रव्राजनं दशरथदोषकृतमित्याह—कामार्त इति । नाभ्यषेचयत् कैकेयीसंमतिं विनेति शेषः । तत्र हेतुः—प्रियकामार्थमिति । प्रियकरणकामाय प्रतिज्ञातकैकेयीप्रियकरणनिर्वाहायेत्यर्थः । तव प्रियं करिष्यामीति प्रथमप्रतिज्ञाकरणे हेतुः—कामार्त इति । कामार्ततया प्रथमं तव यत्प्रियं तत्करिष्यामीति प्रतिज्ञाय पश्चाद्रामप्रव्राजनेतया वृते

ति० वयसापञ्चविंशकः । वननिर्गमनकालइतिशेषः । नन्विदमयुक्तं—ऊनषोडशवर्षोयमिति विश्वामित्रंप्रतिदशरथोक्तेः उषित्वाद्वादशसमाइत्यत्रोक्तेश्चेतिचेन्न । अल्पान्तरत्वात् . अतितरुणावस्थायामपिराज्यंत्यक्तवानित्यर्थेतात्पर्येणास्थयातथोक्तेः । यद्वाऽतिक्रान्तपञ्चविंशकइत्यर्थः । ममभर्तावयसा महातेजाः । अतितरुणइत्यर्थः । पञ्चविंशकः साङ्ख्यसिद्धंपञ्चविंशतत्वंचैतन्मंसोयमेव । एतच्चैत्यन्येनैवजगद्व्याप्तं । नततोऽधिकंकिञ्चिदस्तीतिसूचयितुंतथोक्तिरितितत्वं । ममजन्मतोवनप्रवेशसमयेअतीतानीत्यर्थः । गण्यतइत्यार्षमेकत्वं । ममपञ्चतन्मात्रपञ्चमहाभूतपञ्चेन्द्रियाहङ्कारबुद्धिमनोरूपाण्यष्टादशवर्षाणिपर्वाणि जन्मनि कार्येगण्यन्तइति तन्मूलीभूता प्रकृतिरहमितिसूचितम् । स० वयसापञ्चविंशकः तदानीं । यदत्रवक्तव्यंतदुक्तमयोध्याकाण्डे । एतज्जन्मनि ममवर्षाण्यष्टादशेति गण्यते गण्यन्ते । यद्वा जन्मेतिद्वितीयान्तं । आरभ्येतिशेषः । जन्मारभ्य ममवर्षाण्यष्टादशेत्यन्वयः । लोकेयोरामेतिप्रथितोनिगण्यते प्रथमतश्शरेषुयश्चगुणवान् इति यच्छब्दाध्याहारेण एतच्छ्लोकस्य कैकेय्याःप्रियकामार्थंराममित्यत्रत्यतच्छब्देनान्वयः । एतादृशगुणवन्तमपिरामंकामार्तस्सन्नाभ्यषेचयदिति स्तोतुंरामं प्रवृत्तत्वादनयोश्श्लोकयोर्नासंगतिरिति बोध्यं ॥ शि० वयसापञ्चविंशकः पञ्चविंशेनयुक्ताः काः त्रयोयस्यसः अष्टाविंशतिवार्षिकइत्यर्थः । अयोध्यातोनिर्गमनसमये इतिशेषः । अतएव "ऊनषोडशवर्षोमे रामोराजीवलोचनः" इतिविश्वामित्रंप्रतिदशरथोक्त्या "उषित्वाद्वादशसमा इक्ष्वाकूणांनिवेशने" इति रावणंप्रतिसीतोक्त्याच सिद्धस्य वनप्रवेशसमये अष्टाविंशतिवार्षिकत्वस्य नापलापः । निरूपितंचैतत् "ऊनषोडशवर्षोमे" इत्यत्रत्यव्याख्याने । ममजन्मनि प्रादुर्भावेसतितु अष्टादशवर्षाणिगण्यन्ते । अयोध्यातोनिर्गमनसमयेअष्टादशवर्षाणिमेव्यतीतानीत्यर्थः ॥ १० ॥ शि० कामार्तः कामेनकिञ्चिद्विषयकेच्छयाआर्तोयुक्तः ॥ १२ ॥

[पा०] १ क. ख. ग. ङ. च. ज—ट. कदाचन. २ ङ. झ. ट. यदभिषिच्यते. ३ ङ. झ. ट. पार्थिवः. ४ ङ. झ. ट. सत्यवाञ्शीलवाञ्शुचिः. ५ च. छ. ज. ञ. कामार्तश्च. ख. कामार्थंच. ६ ङ. झ. ट. महाराजः. ख. महाबाहुः.

अभिषेकाय तु पितुः समीपं राममागतम् ॥ कैकेयी मम भर्तारमित्युवाच धृतं वचः ॥ १३ ॥
तव पित्रा समाज्ञप्तं ममेदं शृणु राघव ॥ भरताय प्रदातव्यमिदं राज्यमकण्टकम् ॥ १४ ॥
त्वया हि खलु वस्तव्यं नव वर्षाणि पञ्च च ॥ वने प्रव्रज काकुत्स्थ पितरं मोचयानृतात् ॥ १५ ॥
तैरेवमुक्त्वा च तां रामः कैकेयीमकुतोभयः ॥ चकार तद्वचस्तस्या मम भर्ता दृढव्रतः ॥ १६ ॥
दद्यान्न प्रतिगृह्णीयात्सत्यं ब्रूयान्न चानृतम् ॥ एतद्ब्राह्मण रामस्य ध्रुवं व्रतमनुत्तमम् ॥ १७ ॥
तस्य भ्राता तु द्वैमात्रो लक्ष्मणो नाम वीर्यवान् ॥ रामस्य पुरुषव्याघ्रः सहायः समरेऽरिहा ॥ १८ ॥
स भ्राता लक्ष्मणो नाम धर्मचारी दृढव्रतः ॥ अन्वगच्छद्धनुष्पाणिः प्रव्रजन्तं मया सह ॥ १९ ॥
जटी तापसरूपेण मया सह सहानुजः ॥ प्रविष्टो दण्डकारण्यं धर्मनित्यो जितेन्द्रियः ॥ २० ॥
ते वयं प्रच्युता राज्यात्कैकेय्यास्तु कृते त्रयः ॥ विचराम द्विजश्रेष्ठ वनं गम्भीरमोजसा ॥ २१ ॥
समाश्वस मुहूर्तं तु शक्यं वस्तुमिह त्वया ॥ आगमिष्यति मे भर्ता वन्यमादाय पुष्कलम् ॥
[हत्वा मृगान् गोधान्वराहांश्च हत्वाऽऽदायामिषान्बहून्] ॥ २२ ॥
स त्वं नाम च गोत्रं च कुलं चाचक्ष्व तत्त्वतः ॥ एकश्च दण्डकारण्ये किमर्थं चरसि द्विज ॥२३॥
एवं ब्रुवन्त्यां सीतायां रामपत्न्यां महाबलः ॥ प्रत्युवाचोत्तरं तीव्रं रावणो राक्षसाधिपः ॥ २४ ॥

प्रतिज्ञाभङ्गं कर्तुमक्षमो नाभ्यषेचयदित्यर्थः ॥ १२ ॥ सामान्यतआज्ञानेनाभिषेकाय भवितुमर्हति मदाज्ञानमित्यागतमित्यर्थः । धृतं धैर्ययुक्तमिति क्रियाविशेषणं ॥ १३ ॥ तवेत्यादिश्लोकद्वयमेकान्वयं । त्वद्विषये पित्रा समाज्ञप्तं समाज्ञापनं । मम मत्तः । शृणु । इदं राज्यं भरताय प्रदातव्यं तदर्थं त्वया नवपञ्चच वर्षाणि चतुर्दशवर्षाणीत्यर्थः । वने वस्तव्यं तदर्थं प्रव्रज अनृतात् प्रतिज्ञाभङ्गरूपात् ॥ १४—१५ ॥ अकुतोभयः राज्यत्यागवनवासाभ्यां भयरहितः ॥१६॥ दृढव्रत इत्युक्तमुपपादयति—दद्यादिति । ध्रुवं निश्चलं । अनुत्तमं अवश्यपरिपालनीयं ॥ १७ ॥ द्वयोर्मात्रोरपत्यं पुमान् द्वैमात्रः । अण् प्रत्ययः । "मातुरुत्सङ्ख्या—" इत्युदादेशाभाव आर्षः । गुर्वक्षरं च छान्दसम् । अरिहेतिछन्दोवद्भावात् " बहुलं छन्दसि " इति सूत्रेण ब्रह्मादिभिन्नेभ्युपपदे किप् । अन्येभ्योपि दृश्यते " इत्यत्र दृशिग्रहणस्य विध्यन्तरोपसंग्रहार्थत्वाद्वा किप् ॥ १८ ॥ मया सह अन्वगच्छदित्यन्वयः ॥ १९ ॥ तापसरूपस्यानेकरूपत्वाज्जटीति विशेषयति ॥ २० ॥ कृते प्रयोजनाय । क्रियते संपाद्यत इति कृत् । संपदादित्वात् किप् । गम्भीरं दुष्प्रवेशं । ओजसा बलेन । "ओजो दीप्तौ बले—"इत्यमरः ॥ २१ ॥ समाश्वस समाश्वसिहि विश्रान्तिं कुर्वित्यर्थः । वस्तुं स्थातुं । शक्यं पवित्रदेशत्वादिति भावः । पुष्कलं समग्रं ॥ २२ ॥ स त्वं एवं समाश्वस्तस्त्वं । कुलं गृहं । "कुलमन्वयसंघातगृहपर्यायमेष्वपि—" इति निघण्टुः । ननु संन्यासिनं प्रति कुलगोत्रप्रश्नोनुपपन्नः एकाकितयारण्ये संचारश्च यतेर्धर्म एव अतोसङ्गत इव प्रतिभातीति चेन् उच्यते । पूर्वाश्रमनामगोत्रप्रश्नोयं । " भिक्षार्थं ग्रामं प्रविशेत्" इति श्रुत्या भिक्षोर्ग्रामसमीपारण्ये वस्तव्यं नतु ग्रामप्रसङ्गरहितेरण्य इति कथं भवान् भिक्षाप्रदजनरहितेचरतीति प्रश्न उपपद्यते ॥ २३ ॥ आत्मवै-

---

तानि० दद्यादित्यनेन अर्थिनांयावदपेक्षितंदानंविवक्षितं । नत्रप्रतिगृह्णीयादित्यनेनायाचितसमस्तकामत्वमुच्यते ॥ १७ ॥ गो० द्वैमात्रः द्वयोर्मात्रोरपत्यं सापत्नीकमातृपुत्रइत्यर्थः ॥ ति० वैमात्रः शुभ्रादिषुविमातृशब्दपाठेप्यार्षोऽण् । असहोदरोभ्रातेत्यर्थः । विभिन्नायामातुरपत्यंवैमात्रः ॥ १८ ॥ स० दत्त्वंफलाद्यादाय आमिषमादायेति वैलक्षण्यद्योतनायद्विधारमुक्तिः ॥

[पा०] १ क. ग. च. छ. ज. ञ. दृढं. ख. ङ. ञ. ट. धृतं. २ क—ट. त्वयातु. ३ ग. मोचयत्वमृणात्. ४ ङ. ञ. ठ. तथेत्युक्त्वा. ५ च. छ. ज. ञ. वचनंतस्या.. ङ. ञ. ट. तद्वचःश्रुत्वा. ६ क. ख. ग. ङ. ञ. ट. भर्तामम. ७ ख. घ—ज. ञ. ट. व्रतंध्रुवं. ञ. व्रतंधृतं. ८ ङ. ञ—ठ. वैमात्रो. ९ च. छ. ज. ञ. तद्भ्राता. १० ङ. ञ. ट. ब्रह्मचारी. ११ क. धर्मंयुक्तो. १२ ग. ङ—ट. दृढव्रतः. १३ ख. ग. विचरामो. १४ दृदमर्धं ख. ङ. ञ. ट. पाठेषुदृश्यते. १५ ख. ङ. ञ. ठ. यामिषंबहु. १६ ख. ग. ङ. ञ. ट. कुलमाचक्ष्व. १७ च. छ. ज. दण्डकारण्यं. १८ ङ. राजपत्न्यां. १९ ख. राक्षसेश्वरः.

येन विश्रासिता लोकाः सदेवासुरपन्नगाः ॥ अहं तु रावणो नाम सीते रक्षोगणेश्वरः ॥ २५ ॥
त्वां तु काञ्चनवर्णाभां दृष्ट्वा कौशेयवासिनीम् ॥ रतिं स्वकेषु दारेषु नाधिगच्छाम्यनिन्दिते ॥ २६ ॥
बहीनामुत्तमस्त्रीणामाहृतानामितस्ततः ॥ सर्वासामेव भद्रं ते ममाग्रमहिषी भव ॥ २७ ॥
लङ्का नाम समुद्रस्य मध्ये मम महापुरी ॥ सागरेण परिक्षिप्ता निविष्टा नैगमूर्धनि ॥ २८ ॥
तत्र सीते मया सार्धं वनेषु विहरिष्यसि ॥ न चोत्सारण्यवासस्य स्पृहयिष्यसि भामिनि ॥ २९ ॥
पञ्च दास्यः सहस्राणि सर्वाभरणभूषिताः ॥ सीते परिचरिष्यन्ति भार्यां मे यदि भवसि ॥ ३० ॥
रावणेनैवमुक्ता तु कुपिता जनकात्मजा ॥ प्रत्युवाचानवद्याङ्गी तमनादृत्य राक्षसम् ॥ ३१ ॥

भवप्रकटनावसरप्रतीक्षकतया तीव्रं झटितीत्युक्तं ॥ २४ ॥ लोकाः जनाः ॥ २५ ॥ काञ्चनवर्णाभां स्वर्णवर्णतुल्यकान्तिं ॥ २६ ॥ उत्तमस्त्रीणामिति निर्धारणे षष्ठी ॥ २७ ॥ समुद्रमध्ये वर्तमाने नगमूर्धनि गिरिशृङ्गप्रदेशे । निविष्टा कृतनिवेशा । सागरेण सगरनिर्मितेनसमुद्रेण । परिक्षिप्ता परिवृता । पुरी मम अस्तीति शेषः ॥ २८ ॥ वनेषु उद्यानेषु । अरण्यवासस्येति चतुर्थ्यर्थे षष्ठी ॥ २९ ॥ पञ्च सहस्राणि दास्यस्त्वां परिचरिष्यन्ति ॥३०॥ दुरुक्तैः न पूर्वोक्तोपचारवचनविलक्षणवचना ॥ ३१ ॥

मद्वा अवलक्षणहत्यस्मादाद्वेषमि आदाय अक्षणार्थमित्यर्थोबोध्यः ॥ २२ ॥ वी० वस्तुतस्तु त्वां अमेरदेवतामित्यर्थः । दृष्ट्वा स्वकेषुपुत्रमित्रादिषुदारेषुच । रतिं इच्छां । नाधिगच्छामि । ममेष्टदेवतायास्तवदर्शनेनानन्दपूर्णोऽहं सर्वतोनिवृत्तोऽस्मीतिभावः ॥ २६ ॥ वी० किंच पञ्चेति । पञ्चसहस्राणिदास्यो मेममयासार्धं परिचरिष्यन्ति यदि । तदेतिशेषः । तथा भार्यां मया कान्त्या आर्यां पूज्यामवसीतिसंबन्धः ॥३०॥ ति० पञ्चेत्यादि । रक्षोयोनीतमोगुणप्रधानायांजातायादुष्टिकृतमसः भगवन्मायया ज्ञानाच्छादनादेवमुक्तिः । सर्वथा तवद्योरावणः कथमेवंवदेदितिचु अद्यताज्ञयैव । तत्तद्विहायुपलंभात् । सीतारामौ सर्वेश्वरावित्येतन्मात्रज्ञाने रावणस्यापवेत्यपि अद्यताज्ञयैव । विष्णुपुराणादिविरोधात् । तथाचोक्तंविष्णुपुराणे—मैत्रेयसवाच "हिरण्यकशिपुश्चैव रावणश्चैवविष्णुना । अवापनिहतो भोगानप्राप्यानमरैरपि । सलब्धजन्मभिर्नैव निहतस्सकथंपुनः । संप्राप्तविशदुपाकरणे सायुज्यमाश्वहेतरी । एतदिच्छाम्यहंश्रोतुं सर्वधर्मभृतांवर । कौतूहलपरेणैतत्पृष्टोमे वक्तुमर्हसि । पराशरवाच । वैरेश्वरस्तुवधायाखिललोकोत्पत्तिस्थितिविनाशकारिणा पूर्वोक्तपुंसृता नृसिंहरूपमाविष्कृतं । तत्र हिरण्यकशिपोर्विष्णुरयमित्येवं ममनस्यभूत् । निरतिशयपुण्यजातसंभूतमेतत्सत्यमिति रजउद्रेकप्रेरितैकाग्रमतिलब्धज्ञानयोगात्ततोवासवधहेतुकौ निरतिशयामेधाखिलत्रैलोक्याधिक्यधारिणीं इक्षानलेभोगसंपदमवाप । नातस्सिद्धिमनादिनिधने परब्रह्मभूते भगवत्यनासंबन्धीकृते मनस्तत्त्रलयम् । इक्षानलेप्यनङ्गपराधीनतया जानकीसमासक्तचेतसो दाशरथिरूपधारिणस्तूपदर्शनमेवासीत् । बाढमप्युत्तरस्मात्सिद्धिर्विपर्ययतोन्तःकरणस्य मानुषबुद्धिरेवकेवलमभूत् । विपर्ययतइति विपर्ययतोपीत्यर्थः । तस्मिन्विषमये विष्णुबुद्धिर्नासीदितिभावः । पुनरच्युतविनिपातनमात्रफलमखिलभूमण्डलसाध्यचेदिराजकुलजन्माभ्यार्हतैश्वर्यं शिशुपालस्येवाभाव । तत्रापिखिलाभ्येव भगवन्नामकारणान्यभवन् । नामानि गोविन्दादीनि । कारणानि गवांरक्षणादीनीत्यर्थः । ततश्च तत्कारणकृतान्तेषामशेषाणामेवाच्युतनामानामनवरतमनेकजन्मसंवर्धितविद्वेषानुबन्धिचित्तो विनिघ्नन्तंजनाविषूचारणमकरोत् । तच्च रूपमुत्फुल्लपद्मदलाभसंक्षोभमत्युज्ज्वलपीतवस्त्रभार्यानलकिरीटकेयूरकटकोपशोभितमुदारपीवरचतुर्बाहु शङ्खचक्रगदाधरमतिप्रौढवैरानुभावादटनभोजनशयनासनस्नेहनादिष्वनुस्यान्तरेषु नैवापपद्यमानत्वात्मचेतसः । ततस्तमेवानुक्रोशेपूर्वारंभमेवहृदयेधारयन्नामभाय भगवद्भक्तचक्रांशुमालोज्ज्वलमक्षय्यतेजस्करं परमब्रह्मरूपमपगतरागद्वेषादिदोषं भगवन्तमद्राक्षीत् । तावच्च भगवच्चक्रेणाशुव्यापादितः । तेन तत्स्मरणदग्धाखिलाघसंचयो भगवतैवान्तमुपनीतस्तस्मिन्नेवलयमुपययौ । एतत्सर्वाभिहितं । भगवान्हरिकीर्तितः संस्मृतश्च दुरितानुबन्धेनाप्यखिलसुरासुरादिदुर्लभंफलंप्रयच्छति किमुतसम्यगभिगन्तं " इति । लोकदृष्ट्यातु सीतासादृश्यात्सीतायुज्याहरणाद्यातताखिलसंपत्या तद्वधेभगवत्प्रवृत्तिः । एवंचेदशोकीनां यद्यतद्वाप्रकारेणान्यथायोजनप्रयासस्तीर्थादीनां विफलएव । विष्णुपुराणोक्तरीत्यैवभागवतवर्त्म—" एतेचांशकलाःपुंसः कृष्णस्तुभगवान्स्वयम्" इति । एतदभिप्रायेण पूर्वोक्तावतारा ऋष्यादयश्च परामृश्यन्ते । पुंसः परमेश्वरस्य । तत्रावतारा अंशाः । ऋष्यादयः कलाः । यद्यपि कृष्णोप्यंशएव । तथैव दशमे " तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणिशंस नः " इत्याद्युक्तेः । " उज्जहारात्मनःकेशौ सितकृष्णौमहामुने । " इति विष्णुपुराणाद्युक्तेः । द्वितीये-

[पा०] १ क. ख. ट. मानुषा॰. २ क. ख. ग. ङ—ट, अहंस. ३ क. ग. ङ. ट. गिरिमूर्धनि. ४ ङ.—ट. विचरिष्यसि. ५ ङ—ट, चास्यवनवासस्य. ६ ख. ग. दासीसहस्राणि.

महागिरिमिवाकम्प्यं महेन्द्रसदृशं पतिम् ॥ महोदधिमिवाक्षोभ्यमहं राममनुव्रता ॥ ३२ ॥
सर्वलक्षणसंपन्नं न्यग्रोधपरिमण्डलम् ॥ सत्यसन्धं महाभागमहं राममनुव्रता ॥ ३३ ॥
महाबाहुं महोरस्कं सिंहविक्रान्तगामिनम् ॥ नृसिंहं सिंहसंकाशमहं राममनुव्रता ॥ ३४ ॥
पूर्णचन्द्राननं रामं राजवत्सं जितेन्द्रियम् ॥ पृथुकीर्तिं महात्मानमहं राममनुव्रता ॥ ३५ ॥
त्वं पुनर्जम्बुकः सिंहीं मामिच्छसि सुदुर्लभाम् ॥ नाहं शक्या त्वया स्प्रष्टुमादित्यस्य प्रभा यथा ॥ ३६ ॥
पादपान्काञ्चनान्नूनं बहूपश्यसि मन्दभाक् ॥ राघवस्य प्रियां भार्यां यस्त्वमिच्छसि रावण ॥ ३७ ॥
क्षुधितस्य हि सिंहस्य मृगशत्रोस्तरस्विनः ॥ [आस्यं प्रविश्य तरसा जिह्वामाहर्तुमिच्छसि ॥
वल्मीकान्ताद्विनिस्सृत्य प्रत्याशां वीक्षितस्य च ॥] आशीविषस्य वदनाद्दंष्ट्रामादातुमिच्छसि ॥३८॥

महेन्द्रसदृशं पतिं पतित्वे स्वामित्वे महेन्द्रतुल्यमित्यर्थः । अनुव्रता अनुकूलं व्रतं यस्याः सा राममुद्दिश्यानुव्रता ॥३२॥ न्यग्रोधपरिमण्डलं वटवृक्षमिव महापरिणाहं । यद्वा न्यग्रोधवत् बहुशाखबन्धुस्तोमं । तद्वत्सर्वसमाश्रयणीयमितिवा । यद्वा " कूपोदकं वटच्छाया युवतीनां स्तनद्वयम् । शीतकाले भवत्युष्णमुष्णकाले च शीतलं " इत्युक्तरीत्या सर्वकालेपि सर्वजनानुकूलमित्यर्थः ॥ ३३ ॥ सिंहवद्विक्रान्तं पराक्रमयुक्तं सगर्वमिति यावत् । तथा गच्छतीति सिंहविक्रान्तगामिनं । सिंहसंकाशं पराक्रमे सिंहतुल्यं । नृसिंहं पुरुषश्रेष्ठं ॥ ३४ ॥ राजवत्सं राजकुमारं ॥ ३५ ॥ एवं स्वभर्तुरतिशयमुक्त्वा तस्य हीनत्वमाह—त्वमित्यादिना । त्वं तु जम्बुकः गोमायुः । निगीर्याध्यवसानं । तथा सिंहीमित्यत्रापि । आदित्यस्य प्रभेव रामस्याविनाभूताहं त्वया स्प्रष्टुं न शक्येत्यर्थः ॥ ३६ ॥ आसन्नमरणाः वृक्षान् स्वर्णमयान्पश्यन्तीति प्रसिद्धिः । मन्दभाक् मन्दभाग्यः । यद्वा मन्दं क्षीणं आयुरादिकं भजतीति मन्दभाक् । मदभिलाषयुक्तस्त्वं सद्यो मरिष्यसीति भावः ॥ ३७ ॥ सर्वात्मना आदानस्याशक्यत्वज्ञापनाय विशेषणानि । आशीविषस्य सर्पस्य । चकारो द्रष्टव्यः । क्षुधितस्य तरस्विन इति चाशीविषस्यापि विशेषणं । अत्र सदृशयोर्वाक्यार्थयोरैक्या-

भागवतेप्येवमेव । भारतेप्येवमेव । एतेन " तत्रांशेनावतीर्णस्य " इत्यादिदशमस्थलोकव्याख्यानमपास्तं । तथापि तत्तत्कारणकृतनाम्नां तत्रलाभाद्बहुशोऽज्ञानकार्यनाटनाच्च । शङ्खचक्रादीनां प्रत्यक्षतोदर्शनाच्च स्वयंभगवानित्युक्तिः । नैतावता रामाद्यवताराणां ततोन्यूनत्वमितिभ्रमःकार्यः । श्रीधरोपि—मत्स्याद्यवताराणां सर्वज्ञत्वसर्वशक्तिमत्त्वेपि यावदुपयोगमेवज्ञानशक्त्या विष्कारः । अज्ञानाविष्कारश्च बहुशः । कृष्णत्वेन्त्योल्पः । यथाऽभिमन्युमरणे नाहं तत्रसंनिहितआसं अतस्तस्यमरणमिति । यथा द्रौपद्यास्सभायांनयनकाले नाहंद्वारकायांसंनिहितः किंतु सौभवधार्थंगतोतोभवतामयंक्लेशइति । सौभवधेच मायिकं मृतवसुदेवशरीरंदृष्ट्वा मोहइत्याद्यज्ञाननाट्यमल्पं । रामावतारेपि ज्ञानाविष्कारस्तत्रतत्रदर्शितोदर्शयिष्यतेच । अवताराश्चेमे विराजएवांशाः । भागवतेप्रथमे तृतीयेऽध्याये—" जगृहेपौरुषंरूपं भगवान्महदादिभिः । संभूतंषोडशकलमादौ लोकसिसृक्षया " इत्यादिनाविराजंरूपमुक्त्वा " एतन्नानावताराणां निधानंबीजमव्ययम् । यस्यांशांशेनसृज्यन्ते देवतिर्यङ्नरादयः" इत्युक्तेः । एतदुक्तंवैराजनिधानं कार्यावसानेप्रवेशस्थानं । बीजंउद्गमकारणं अव्ययं स्वयंचिरस्थायि । नकेवलमवताराणामेवबीजं किंतु सर्वेषामित्याह—यस्येति । यद्यपि विराट्जीवएव तथापि तदन्तर्यामिणस्तयोपासनायैवमुक्तं । सितकृष्णकेशोद्धारेणच तेषांमूर्धन्यत्वेन मुख्यत्वात्तद्वन्मुख्ययो प्रधानयोर्मदंशयोस्तत्वज्ञयोस्तद्वर्णयोर्वैकुण्ठस्थभूतलस्थयोर्विष्णुशेषयोरवतारइति सूचितम् । अतएवान्ते कृष्णंप्रति देवदूतेन । त्वांविनास्वर्गोनशोभतेऽतस्त्वमागच्छेति निवेदितमिति स्पष्टंपुराणेषु । अत्र रामंप्रत्यपितद्यैवोक्तं । अंशत्वंचैषामौपाधिकं । मायायास्सांशत्वादित्यलम् ॥३१॥ स० न्यग्रोधपरिमण्डलं न्यग्रोधोव्यामः तत्परिमण्डलं तत्परिमाणं । " व्यामोबाह्वोस्सकरयोस्ततयोस्तिर्यगन्तरम् " इत्यभिधानं । 'व्यामोवटश्चन्यग्रोधौ' इत्यमरसिंहः । यत्तु न्यग्रोधवृक्षवद्विशालं बहुजनाश्रयइतियावदिति नागोजिभट्टादिव्याख्यानं तदभिधानज्ञानदारिद्र्यमूलमित्युपेक्ष्यं ॥ ३३ ॥ ति० नृसिंहमित्यस्य हिरण्यकशिपुहन्तृत्वंव्यङ्ग्यम् ॥३४॥ शि० आदित्यस्यप्रभेव त्वयास्प्रष्टुं रामात्पृथक्कृत्यनेतुं नाहंशक्या । एतेनस्वस्यरामतेजोरूपवह्निनाऽऽवृतत्वं सूचितं । अतएवलक्ष्मणप्रेषणसमये अग्निंवा-

[पा०] १ क. ख. घ. च. छ. ज. ञ. सदृशद्युतिं. २ ख. घ. महाबाहुमहं. ३ ख. ग. घ. वीरं. ४ घ. राजीवाक्षं. ५ ग. ङ—ट. महाबाहुमहं. ख. महावीर्यमहं. ६ क. ख. घ. ङ—ट. मामिहेच्छसिदुर्लभां. ७ ग. भार्यांसत्त्वं. छ. ञ. भार्यामभिगन्तुत्वमिच्छसि. ८ ङ. झ. ट. राक्षस. ९ क. घ. ङ. च. ज—ट. क्षुधितस्यच. ख. ग. क्षुधितस्येव. १० इदमर्धद्वयं. ख. पुस्तकेदृश्यते. ११ क. घ. तुमुखात्.

मन्दरं पर्वतश्रेष्ठं पाणिना हर्तुमिच्छसि ॥ कालकूटं विषं पीत्वा स्वस्तिमान्गन्तुमिच्छसि ॥ ३९ ॥
अक्षि सूच्या प्रमृजसि जिह्वया लेक्षि च क्षुरम् ॥ राघवस्य प्रियां भार्यां योऽधिगन्तुं त्वमिच्छसि ॥४०॥
अवसज्य शिलां कण्ठे समुद्रं तर्तुमिच्छसि ॥ सूर्याचन्द्रमसौ चोभौ पाणिभ्यां हर्तुमिच्छसि ॥
यो रामस्य प्रियां भार्यां प्रधर्षयितुमिच्छसि ॥ ४१ ॥
अग्निं प्रज्वलितं दृष्ट्वा वस्त्रेणाहर्तुमिच्छसि ॥ कल्याणवृत्तां रामस्य यो भार्यां हर्तुमिच्छसि ॥ ४२ ॥
अयोमुखानां शूलानामग्रे चरितुमिच्छसि ॥ रामस्य सदृशीं भार्यां योऽधिगन्तुं त्वमिच्छसि ॥४३॥

यदन्तरं सिंहसृगालयोर्वने यदन्तरं स्यन्दिनिकासमुद्रयोः ॥
सुराग्र्यसौवीरकयोर्यदन्तरं तदन्तरं वै तव राघवस्य च ॥ ४४ ॥
यदन्तरं काञ्चनसीसलोहयोर्यदन्तरं चन्दनवारिपङ्कयोः ॥
यदन्तरं हस्तिबिडालयोर्वने तदन्तरं दाशरथेस्तवैव च ॥ ४५ ॥
यदन्तरं वायसवैनतेययोर्यदन्तरं मद्गुमयूरयोरपि ॥
यदन्तरं सारसगृध्रयोर्वने तदन्तरं दाशरथेस्तवैव च ॥ ४६ ॥
तस्मिन्सहस्राक्षसमप्रभावे रामे स्थिते कार्मुकबाणपाणौ ॥
हृताऽपि तेहं न जरां गमिष्ये वज्रं यथा मक्षिकयाऽवगीर्णम् ॥ ४७ ॥

रोपान्निदर्शनालङ्कारः ॥ ३८ ॥ मन्दरमिति अत्रापि राघवस्य भार्यां यस्त्वमिच्छसीत्यनुषज्यते । स्वस्तिमान् सुखित इत्यर्थः॥ ३९॥ स्वाक्षि प्रमृजसि प्रकर्षेण मार्जनं करोषि । लेक्षि लेहनं करोषि । लिह आस्वादन इत्यस्माल्लुग्विकरणस्थाद्धातोर्लटि मध्यमपुरुषैकवचनं । क्षुरं तीक्ष्णधारं शस्त्रं । अधिगन्तुं प्राप्तुं ॥ ४० ॥ अवसज्येति सार्धश्लोक एकान्वयः । अवसज्य बद्ध्वा ॥ ४१ ॥ कल्याणवृत्तां शुभाचारां ॥ ४२ ॥ अयोमुखानां अयोमयाग्राणां । शूलानामग्रे शूलाग्रपङ्क्तिषु । संचरितुमिच्छसीत्यर्थः ॥ ४३ ॥ उक्तं रामोत्कृष्टत्वं रावणनिकृष्टत्वं च सदृष्टान्तमाह—यदन्तरमित्यादिना । सिंहसृगालयोः । " सृगालो वञ्चकः क्रोष्टा " इत्यमरः । यत् अन्तरं भेदः तारतम्यमिति यावत् " अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्येन्तरात्मनि च " इत्यमरः । वने जले विषये । " जीवनं भुवनं वनं " इत्यमरः । स्यन्दिनिका स्यन्दितुं प्रस्रवितुं शीलमस्या अस्तीति स्यन्दिनिका । ताच्छील्ये णिनिः । अल्पार्थे कप्रत्ययः । केण इति ह्रस्वः । क्षुद्रनदी स्यन्दिनिका । सुराग्र्यं श्रेष्ठमद्यं । सौवीरकं काञ्जिकं । " आरनालकसौवीरकुल्माषाभिषुतानि च । अवन्तीसोमधान्याम्लकुञ्जलानि च काञ्जिकं " इत्यमरः ॥ ४४ ॥ काञ्चनसीसलोहयोरित्यत्र लोहशब्दः प्रत्येकमभिसम्बध्यते । काञ्चनस्यापि नवलोहेषु परिगणनात् । चन्दनवारि चन्दनपङ्कः । बिडालो मार्जारः ॥ ४५ ॥ मद्गुः जलवायसः । सारसो हंसविशेषः॥४६॥ तस्मिन् रामे स्थिते सति जरां जीर्णतां । मक्षिकया अवगीर्णं ग्रस्तं । वज्रं हीररत्नं । मक्षिकया तण्डुलखण्डभ्रान्त्या ग्रस्तं हीररत्नमित्यर्थः । यथा न जीर्णं भवति । यद्वा मक्षिकया सहावगीर्णं भुक्तं वज्रं आज्यं " वज्रो वा आज्यं" इति श्रुतेः। यथा न जीर्णं भवतीत्यर्थः। तथा अहं त्वया हृतापि ते जीर्णतां न गमिष्ये न गमिष्यामि ।

प्रवेक्ष्यामि अन्यंपुरुषं नस्प्रक्ष्यामीति तत्कृतप्रतिज्ञाया न हानिः ॥ ३६ ॥ ति० लेढि लेक्षि ॥ ४० ॥ ति० जरां जीर्णावस्थां । मक्षिकयाऽवगीर्णं भुक्तं आज्यं यथा तां नाशयति तद्वत् ॥ ४७ ॥ स० भयकारणार्थं भयरूपंयत्कारणं स्ववशीकरणकारणं तदर्थं ॥ ती० फलश्रुतिस्स्कान्दे-" यदन्तरेत्यादिवाक्यश्रवणादघनाशनम् " इति ॥ ४९ ॥ इतिसप्तचत्वारिंशस्सर्गः ॥ ४७ ॥

[पा०] १ ग. पाणिभ्यां. २ ग. घ. झ. ञ. कालकूटविषं. ३ क—ट. लेढि. ४ ख. ग. ङ—ट. भार्यामधिगन्तुं. ५ ग. दीप्तं. घ. स्पृष्ट्वा. ६ ङ. झ. योभार्यांरामस्याहर्तुं. ७ ङ. झ. ट. शूलानामध्ये. ८ च. छ. ज. योऽभिगन्तुं. ९ ख. ङ. छ. झ. ञ. ट. तदन्तरंदाशरथेस्तवैवच. १० ङ. झ. ट. हंसकगृध्रयोः. ११ ङ—झ. ट. आज्यंयथा.

इतीव तद्वाक्यमदुष्टभावा सुदृष्टमुक्त्वा रजनीचरं तम् ॥
गात्रप्रकम्पव्यथिता बभूव वातोद्धता सा कदलीव तन्वी ॥ ४८ ॥
तां वेपमानामुपलक्ष्य सीतां स रावणो मृत्युसमप्रभावः ॥
कुलं बलं नाम च कर्म च स्वं समाचचक्षे भयकारणार्थम् ॥ ४९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

सीतयात्मनिन्दितेनरावणेनपुनस्तांप्रतिस्वकुलप्रतापसंपन्नमांसनेनसहरामेदोषारोपपूर्वकं स्वभजनप्रार्थना ॥ १ ॥ सीतयार्तं प्रतिसक्रोधगर्हणंस्वकामनायाआत्मविनाशहेतुत्वोक्तिः ॥ २ ॥

एवं ब्रुवन्त्यां सीतायां संरब्धः परुषं वचः ॥ ललाटे भ्रुकुटीं कृत्वा रावणः प्रत्युवाच ह ॥ १ ॥
भ्राता वैश्रवणस्याहं सापत्न्यो वरवर्णिनि ॥ रावणो नाम भद्रं ते दशग्रीवः प्रतापवान् ॥ २ ॥
यस्य देवाः सगन्धर्वाः पिशाचपतगोरगाः ॥ विद्रवन्ति भयाद्भीता मृत्योरिव सदा प्रजाः ॥ ३ ॥
येन वैश्रवणो राजा द्वैमात्रः कारणान्तरे ॥ द्वन्द्वमासादितः क्रोधाद्रणे विक्रम्य निर्जितः ॥ ४ ॥
येनेन्द्रयार्तः परित्यज्य स्वमधिष्ठानमृद्धिमत् ॥ कैलासं पर्वतश्रेष्ठमध्यास्ते नरवाहनः ॥ ५ ॥
यस्य तत्पुष्पकं नाम विमानं कामगं शुभम् ॥ वीर्यादेवार्जितं भद्रे येन यामि विहायसम् ॥ ६ ॥
मम सङ्गातरोषस्य भ्रुवं दृष्ट्वैव मैथिलि ॥ विद्रवन्ति परित्रस्ताः सुराः शक्रपुरोगमाः ॥ ७ ॥

प्रत्युत तवैव मरणं प्रापयिष्यामीत्यर्थः ॥४७॥ इतीव उक्तप्रकारसदृशं तद्वाक्यं । सुदृष्टं यथा तथा उक्त्वा सा सीता वातोद्धता वाताहता कदलीव गात्रप्रकम्पव्यथिता शरीरकम्पेन पीडिता बभूव ॥४८॥ वेपमानां कम्पमानां । उपलक्ष्य तत्कम्पेन तद्भयमुपलक्ष्य भूयो भयजननेन एषा स्ववशीकर्तुं शक्येति मत्वा भयकारणार्थं । भयोत्पादनार्थं । स्वं स्वकीयं कुलादिकमाचचक्षे । कर्म पौरुषं ॥ ४९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

एवं ब्रुवन्तीं सीतां रावणो भर्त्सयति—एवमित्यादिना । संरब्धः कुपितः संभ्रमाविष्टो वा ॥ १ ॥ वैश्रवणस्य सपत्न्या मातुरपत्यं पुमान् सापत्नः सापत्न एव सापत्न्यः । स्वार्थे ष्यञ् ॥ २ ॥ यस्य संबन्धिनो भयात् देवादयः मृत्योर्भीताः प्रजा इव विद्रवन्ति ॥ ३ ॥ द्वयोर्मात्रोरपत्यं द्वैमात्रः सपत्नीमातृपुत्र इत्यर्थः । कारणान्तरे कस्मिंश्चित्कारणावकाशे । द्वन्द्वं युद्धं । "द्वन्द्वं कलहयुग्मयोः" इत्यमरः ॥ ४ ॥ स्वमधिष्ठानं स्वां पुरीं । कैलासमध्यास्ते प्रबलावष्टम्भार्थमिति भावः । "अधिशीङ्स्थासां कर्म" इत्यधिकरणस्य कर्मसंज्ञा । नरवाहनः कुबेरः ॥५॥ तत् प्रसिद्धं कामेन गच्छतीति कामगं अधिष्ठातृकामानुरूपं गच्छतीत्यर्थः । येन पुष्पकेन विहायसं आकाशं । एतादृशविशेषणविशिष्टो यो रावणो नाम रावण इति प्रसिद्धः सोऽहमितिपूर्वेणान्वयः ॥ ६ ॥ विद्रवन्ति

ति० परुषं क्रोधावेशेन वर्णानां वर्षणेनैवोच्चारणाच्छ्रुतिकटूक्षरमित्यर्थः ॥ १ ॥ स० द्वितीयामाता द्विमाता तस्याअयं द्वैमात्रः । आर्षमनुलं । यद्वा पूरणार्थकतीयप्रत्ययान्तार्धशब्दस्य केवलसंख्यार्थलाभाभावोऽत्रमितिकेचित् । वैमात्रइतिपाठोवा ॥ कारणान्तरे मन्मातृवाक्यपरिपालनरूपकारणान्तरे ॥ ४ ॥ ति० वीर्यादार्जितं आच्छिद्यगृहीतं । मयेतिशेषः ॥

[पाठ०] १ क. घ—ट. सुदुष्टं. ग. सुदुःखं. २ ग—च. ज. ट. प्रकंपाव्यथिता. ३ क—ट. कर्मचात्मनः. ४ ग. घ. संरब्धपरुषाक्षरं. च. छ. ज. संरब्धःपरुषाक्षरं. ५ छ. भ्रुकुटीकृत्य. ६ ङ ञ. ण. सापत्नो. ७ च. छ. ज. ण पिशाचाः पन्नगोरगाः. ८ ङ. ञ. ट. सदाभीताः. ९ ख. ग. ङ. ञ. ट. भ्राता. १० क—ङ. ञ. ण. ट. मद्भयार्तः. च, छ. ज, मद्भयात्तत्परि. ११ ग. वीर्यादपिजितं. ख. वीर्येणचार्जितं. ङ, छ. ञ. ण. ट. वीर्यादावर्जितं. १२ ख. दृष्ट्वाथ.

यत्र तिष्ठाम्यहं तत्र मारुतो वाति शङ्कितः ॥ तीव्रांशुः शिशिरांशुश्च भयात्संपद्यते रविः ॥ ८ ॥
निष्कंपपत्रास्तरवो नद्यश्च स्तिमितोदकाः ॥ भवन्ति यत्र यत्राहं तिष्ठामि विचरामि च ॥ ९ ॥
मम पारे समुद्रस्य लङ्का नाम पुरी शुभा ॥ संपूर्णा राक्षसैर्घोरैर्यथेन्द्रस्यामरावती ॥ १० ॥
प्राकारेण परिक्षिप्ता पाण्डुरेण विराजता ॥ हेमकक्ष्या पुरी रम्या वैडूर्यमयतोरणा ॥ ११ ॥
हस्त्यश्वरथसंबाधा तूर्यनादविनादिता ॥ [शतयोजनविस्तीर्णा त्रिंशद्योजनमायता ॥]
सर्वकालफलैर्वृक्षैः संकुलोद्यानशोभिता ॥ १२ ॥
तत्र त्वं वसती सीते राजपुत्रि मया सह ॥ न स्मरिष्यसि नारीणां मानुषीणां मनस्विनी ॥ १३ ॥
भुञ्जाना मानुषान्भोगान्दिव्यांश्च वरवर्णिनि ॥ न स्मरिष्यसि रामस्य मानुषस्य गतायुषः ॥ १४ ॥
स्थापयित्वा प्रियं पुत्रं राज्ञा दशरथेन यः ॥ मन्दवीर्यः सुतो ज्येष्ठस्ततः प्रस्थापितो ह्ययम् ॥ १५ ॥

विद्रवेयुः ॥ ७ ॥ यत्र देशे तीव्रांशुश्च तीक्ष्णांशुरपि । रविः मद्भयात् शिशिरांशुः शीतलांशुः संपद्यते ॥ ८ ॥ निष्कंपेति पत्राण्यपि न चलन्तीत्यर्थः ॥ ९ ॥ पारे पारसदृशे त्रिकूटे । समुद्रस्य मध्य इति पूर्वमुक्तत्वात् । यथेन्द्रस्यामरावती तथा मम लङ्का पुरी असाधारणेत्यर्थः । अस्तीति शेषः ॥ १० ॥ लङ्कां वर्णयति—प्राकारेणेति । रजतमयत्वात्पाण्डुरेण । हेममय्यः कक्ष्याः हर्म्याङ्गणादयो यस्याः सा । "कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने" इत्यमरः । तोरणो बहिर्द्वारं । संबाधा संकुला । तूर्यनादेन वाद्यशब्देन विनादिता । सर्वः कालो येषां तानि सर्वकालानि सर्वकालसंभवानीत्यर्थः । तादृशानि फलानि येषां तैः सर्वकालफलैः । संकुलोद्यानैः व्याप्तोद्यानैः शोभिता एतादृशी सा पुरी रम्येत्यन्वयः ॥ ११—१२ ॥ वसती वसन्ती । अनित्यमागमशासनमिति नुमभावः । नारीणामिति "अधीगर्थ—" इति षष्ठी । मनस्विनी तत्समासक्तेत्यर्थः ॥ १३ ॥ मानुषान् मनुष्यलोकसंभवान् । दिव्यान् स्वर्गसंभवान् । गतायुषः गतप्रायायुषः । अल्पायुष इत्यर्थः । अनेन "भुञ्जाना मानुषान्भोगान्" इति पूर्वं सीतोक्तस्य परिहार उक्तः ॥ १४ ॥ अथ रामस्य स्वापेक्षया उक्तमतिशयं प्रतिवक्ति—स्थापयित्वेत्यादिना । श्लोकद्वयमेकान्वयं । प्रियं पुत्रं भरतं । राज्ये स्थापयित्वा ततो राज्यात् प्रव्राजितः । ज्येष्ठत्वेपि प्रव्राजनान्मन्दवीर्यत्वं सिद्धमित्याह—तेनेति । तेन मन्दवीर्येण । गतचेतसा कर्तव्याकर्तव्यमूढमनसा । तापसेन "भग्नाः कृषेर्भागवता भवन्ति" इति न्यायेन अशूरेण । तपस्विना शोच्येन । "तपस्वी तापसः

॥ ६ ॥ ती० तत्रत्वंवसतीसीतेत्यारभ्य तवभाग्येनसंप्राप्तंभजस्ववरवर्णिनीत्यन्तस्यग्रन्थसंदर्भस्य प्रातीतिकार्थस्स्पष्टः । वस्तुतस्तु तत्र लङ्कायां वसती त्वं मयामृत्येन समर्पितानितिशेषः । मानुषान्दिव्यांश्चभोगान् सह एकदैव भुञ्जानासती । मानुषीणांनारीणामिति द्वितीयार्थे षष्ठी । नस्मरिष्यसि । किंच मानुषस्य मनुष्यत्वेनावतीर्णस्य । गतायुषः गतंप्राप्तमङ्गीकृतं एकादशसहस्रवत्सरायुर्येन तस्यरामस्य भगवतः श्रीमन्नारायणस्य संबन्धिनइतिशेषः । नः अस्मान् स्मरिष्यसि । स्थापयित्वेति यः मन्दवीर्यः तमप्रियमपिपुत्रंभरतं अन्तर्यामिप्रेरितेनराज्ञा स्थापयित्वा । राज्यइतिशेषः । ततस्तेनैवप्रेरितेनराज्ञा । ज्येष्ठः श्रीमन्नारायणश्श्रीरामः । "ज्येष्ठश्श्रेष्ठःप्रजापतिः" इतिसहस्रनामोक्तेः । सर्वराक्षससंहाराय वनंप्रस्थापितः । तेनेति । भ्रष्टराज्येन भ्रष्टमरीणांराज्यंयेनतेन । गतचेतसा मायोपाधिकेश्वरस्यश्रीरामस्यान्तःकरणाभावाद्गतचेतस्कत्वं । "नतस्यकार्यंकरणंचविद्यते" इतिश्रुतेः । तापसेनतपस्विना तापसानामिनस्तापसेनः सचासौतपस्वीच तेनश्रीरामेणसह करिष्यसिकिं । अयमस्मदीयइति विज्ञापनामितिशेषः ॥ सर्वेति । सर्वराक्षसभर्तारं । प्रतिशब्दइवार्थे । कामात् तवभृत्योभविष्यामीतिमनोरथात् । आगतंमांमन्मथशराविष्टंजनमिव । स्वयं ममेष्टदेवतात्वमेवमाख्यातुंवक्तुंनार्हसीत्यर्थः ॥ प्रत्याख्यायेति । कामुकंपुरूरवसमुर्वशी चरणेनाभिहत्य पश्चात्तापमगमदिति यत्तद्युक्तं । अकामुकंभृत्यंमां ममभातृरूपात्वं चरणेनाभिहत्य तिरस्कृत्येत्यर्थः । परितापंगमिष्यसीत्येतदयुक्तमित्यर्थः । उर्वशीपुरूरवसंचरणेनाभिहत्यपश्चात्तापंगतेतिपुराणेषुयथाप्रसिद्धं तथापश्चात्तापंगमिष्यसि । रामंविनालङ्कांप्रत्यागन्तुमनिच्छन्तीं प्रत्याह—अङ्गुल्येति । युद्धेयस्याङ्गुल्यासमःकोपिनास्ति । कुतः यस्सरामः श्रीमन्नारायणएव मानुषः मनुष्यरूपेणावतीर्णः । तं मम

[पा०] १ क. ख. घ. तीव्रांशुरमृतांशुश्च. २ क. झ. ट. दिवि. ३ क—ट. तत्राहं. ४ क—ट. तिष्ठामिचचरामिच. ५ इदमर्धं घ. च. छ. ज. पाठेषुदृश्यते. ६ क. ग. ङ—ट. कामफलैः. ७ क. झ. ट. भूषिता. ८ ग. झ. वसहेसीते. ९ ग. झ. राज्ये. १० ग. च. ज—ट. वीर्यैस्ततोज्येष्ठस्सुतः. ११ क.-ट. वनं.

तेन किं भ्रष्टराज्येन रामेण गतचेतसा ॥ करिष्यसि विशालाक्षि तापसेन तपस्विना ॥ १६ ॥
सर्वराक्षसभर्तारं कामात्स्वयमिहागतम् ॥ न मन्मथशराविष्टं प्रत्याख्यातुं त्वमर्हसि ॥ १७ ॥
प्रत्याख्याय हि मां भीरु परितापं गमिष्यसि ॥ चरणेनाभिहत्येव पुरूरवसमुर्वशी ॥ १८ ॥
अङ्गुल्या न समो रामो मम युद्धे स मानुषः ॥ तव भाग्येन संप्राप्तं भजस्व वरवर्णिनि ॥ १९ ॥
एवमुक्ता तु वैदेही क्रुद्धा संरक्तलोचना ॥ अब्रवीत्परुषं वाक्यं रहिते राक्षसाधिपम् ॥ २० ॥
कथं वैश्रवणं देवं सर्वभूतनमस्कृतम् ॥ भ्रातरं व्यपदिश्य त्वमशुभं कर्तुमिच्छसि ॥ २१ ॥
अवश्यं विनशिष्यन्ति सर्वे रावण राक्षसाः ॥ येषां त्वं कर्कशो राजा दुर्बुद्धिरजितेन्द्रियः ॥ २२ ॥
अपहृत्य शचीं भार्यां शक्रस्येन्द्रस्य जीवितुम् ॥ न च रामस्य भार्यां मामपनीयास्ति जीवितम् ॥ २३ ॥
जीवेच्चिरं वज्रधरस्य हस्ताच्छचीं प्रधृष्याप्रतिरूपरूपाम् ॥
न मादृशीं राक्षस दूषयित्वा पीतामृतस्यापि तवास्ति मोक्षः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

शोच्यः" इति विश्वः । अनेन इतः परं राज्यं साधयिष्यतीत्याशा न कर्तव्येत्युक्तं ॥ १५—१६ ॥ सर्वराक्षसभर्तारं त्वया प्रार्थनीयमित्यर्थः । स्वयं कामात् अर्थितया इहागतं । प्रत्याख्यातुं निराकर्तुं । स्वयमागमने हेतुः—मन्मथेति ॥ १७ ॥ प्रत्याख्यानफलमाह—प्रत्याख्यायेति । भीरु इत्यनेन रामाद्भीतिः प्रत्याख्यानमूलमिति मम मन इति व्यज्यते । परितापं पश्चात्तापं । पुरूरवसं राजानं चरणेनाभिहत्य । उर्वशीव उरून् महतो वशीकरोतीत्युर्वशी । वश कान्तौ । इगुपधादिलाद्रुकारलोपः । गौरादिलात् ङीष् । एवं ह्रस्वादिस्तालव्यान्तश्च । तथाच माघयमकं "दधत्युरोजद्वयमुर्वशीतलं भुवो गतेव स्वयमुर्वशीतलं" इति । नारायणस्य ऊरौ वसतीति व्युत्पत्तावपि पृषोदरादिलाद्वर्णलोपादिना ह्रस्वादिस्तालव्यान्त एव च युक्तः । उर्वशी किल स्वयमेव प्रार्थयन्तं पुरूरवसं प्रथमं निरस्य पश्चात्तापेन पुनस्तमागतेति पौराणिकी कथा ॥ १८ ॥ अङ्गुल्या अङ्गुलिबलेन । न समः न समबलः । संप्राप्तं मामिति शेषः ॥ १९ ॥ संरक्तेति कोपातिशयो द्योत्यते । रहिते निर्जने वने । " रागं विविक्तादिति वर्धयन्तीः " इति रागजननौचित्येपि परुषमब्रवीत् । हन्त सीतायाः पातिव्रत्यमेतदिति ऋषिर्विस्मयते ॥ २० ॥ कथमिति पुण्यात्मनःकुबेरस्य भ्राता सन् कथं पापकर्मणि प्रवर्तस इत्यर्थः ॥ २१ ॥ कर्कशः क्रूरः ॥ २२ ॥ अपनीय स्थितस्य तवेति शेषः ॥ २३ ॥ क्रोधातिशयेनोक्तमेव पुनराह—जीवेदिति । अप्रतिरूपं अनुपमं रूपं यस्यास्तां मादृशीं । अश्लीलप्रलपरिहाराय न मामित्यनुक्तिः । मोक्षः मरणादिति शेषः । अमृतमपि न त्वद्रक्षणसमर्थमित्यर्थः ॥ २४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

भाग्येनतत्रैवसंप्राप्तं तव पतिमितिशेषः । भजस्वेतिसंबन्धः ॥ १३—१९ ॥ स० तापसानामयंतापसः तद्वेषः तेन । तपस्विना तद्वद्विषमानेन ॥ १६ ॥ ति० रक्ष पालय ॥ १७ ॥ ति० ईदृशवंश्यस्येदृशंकृत्यमनुचितमिति भिप्यैवान्यवंशं स्ववंशत्वेन कथयसीत्याशयं ॥ २१ ॥ ति० अत्रसर्गेरावणोक्तौ—"ससप्तसप्तकनेत्राहमष्टाष्टकविभूषितः । पञ्चपञ्चकतत्त्वज्ञो रावणोहंभजस्व माम् " इतिश्लोकः क्वचित्पठ्यते । तमेवंव्याचक्षते—सप्तसप्तकं षड्वक्त्रसहितचतुर्दशविद्यारूपं तद्वेत्ता । अष्टाष्टकविभूषितः चतुष्षष्टिकलाभूषितः । पञ्चपञ्चकतत्त्वज्ञः पञ्चविंशतितत्त्वस्वरूपवेत्ता । नित्यानित्यवस्तुविवेकवानितियावत् । इति । स कृतकायव्याख्यातत्वात्प्रक्षिप्तइति ज्ञायते । आर्यपादेऽर्थांचंगतिरपि । परपादपर्यालोचनया तृतीयपादोक्तज्ञानवतईदृशेकर्मणिप्रवृत्तिरप्यनुचितेतिभाति ॥ इत्यष्टचत्वारिंशस्सर्गः ॥ ४८ ॥

[पा०] १ क.—घ. यक्षराक्षस. ङ. ज्ञ. ट. रक्षराक्षस. २ च. छ. ज. ञ. तुमां. ३ ग. घ. ङ. ज्ञ. ट. पश्चात्तापं. ४ ङ. ज्ञ. ट. सर्वदेव. ५ ग. महंसि. ६ क.—घ. च. छ. ज. ञ. ट. मतु. ङ. ज्ञ. नहि. ७ ङ. ज्ञ. ट. मामानीयस्वसिमान्भवेत्. ८ ङ. ज्ञ. ट. पश्चाच्छचीं. ९ ख. ङ.—ट. धर्षयित्वा.

एकोनपञ्चाशः सर्गः ॥ ४९ ॥

भिक्षुरूपपरित्यागेननिजरूपधारिणारावणेनसान्त्वोक्त्यासीतायाः केशग्रहणेनरथारोपणपूर्वकंलङ्कांप्रतिप्रस्थानम् ॥ १ ॥ गिरितरुगोदावरीप्रभृतीन्प्रतिरामायस्ववृत्तान्तनिवेदनप्रार्थनापूर्वकंबहुधाक्रन्दन्त्यास्यन्दनस्थयासीतयामार्गेदृष्टंजटायुषंप्रत्युच्चैराक्रन्दनेनरामायस्ववृत्तान्तनिवेदनप्रार्थना ॥ २ ॥

सीताया वचनं श्रुत्वा दशग्रीवः प्रतापवान् ॥ हस्ते हस्तं समाहत्य चकार सुमहद्वपुः ॥ १ ॥
स मैथिलीं पुनर्वाक्यं बभाषे च ततो भृशम् ॥ नोन्मत्तया श्रुतौ मन्ये मम वीर्यपराक्रमौ ॥ २ ॥
उद्वहेयं भुजाभ्यां तु मेदिनीमम्बरे स्थितः ॥ आपिबेयं समुद्रं च हन्यां मृत्युं रणे स्थितः ॥ ३ ॥
अर्कं रुन्ध्यां शरैस्तीक्ष्णैर्विभिन्द्यां हि महीतलम् ॥ कामरूपिणमुन्मत्ते पश्य मां कामदं पतिम् ॥४॥
एवमुक्तवतस्तस्य सूर्यकल्पे शिखिप्रभे ॥ क्रुद्धस्य हरिपर्यन्ते रक्ते नेत्रे बभूवतुः ॥ ५ ॥
सद्यः सौम्यं परित्यज्य भिक्षुरूपं स रावणः ॥ स्वंरूपं कालरूपाभं भेजे वैश्रवणानुजः ॥ ६ ॥
संरक्तनयनः श्रीमांस्तप्तकाञ्चनकुण्डलः ॥ क्रोधेन महताऽविष्टो नीलजीमूतसन्निभः ॥
दशास्यः कार्मुकी बाणी बभूव क्षणदाचरः ॥ ७ ॥

यश्चिन्तनीयः सततमापत्सु परमासु च । नान्योस्ति चिन्तनीयस्तं सीतापतिमुपास्महे ॥ हस्ते हस्तं समाहत्य संयोज्य । अयं च कोपाकृतिविशेषः ॥ १ ॥ स इत्यादिश्लोकत्रयमेकान्वयं । ततः रूपकरणानन्तरं । उन्मत्तया त्वयेति शेषः । वीर्यपराक्रमौ पूर्वोक्ताविति शेषः। उद्वहेयं उद्धरेयं। विभिन्द्यां विदारयेयं । महद्वपुरित्युक्तं दर्शयति—कामेति ॥ २—४ ॥ अथ सीतापहारोपयोगिरूपान्तरपरिग्रहमाह—एवमित्यादिना । सूर्यकल्पे शिखिप्रभे इति तेजस्यौष्ण्ये चोपमाद्वयं । हरिपर्यन्ते पिङ्गलवर्णपर्यन्ते । "यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषुहरिर्नाकपिलेत्रिषु" इत्यमरः ॥ ५ ॥ स्वं स्वासाधारणं । कालरूपाभं मृत्युशरीराभं । वैश्रवणानुज इत्यनेन जन्मकारणे तुल्येपि हन्तान्यतरस्य क्रौर्यमित्युच्यते ॥ ६ ॥ सार्धश्लोक एकान्वयः । श्रीमान् विचित्रशक्तिसंपन्नः । क्षणदाचरः संरक्तनयनत्वादिविशिष्टो

ती० महापुण्यस्यपरमभागवताग्रगण्यस्य श्रीहनुमतोपि रूपान्तरस्वीकरणसमये आग्रहपूर्वकत्वस्यश्रूयमाणत्वेनाग्रहंविना क्रूररूपस्वीकारायोगाद्रावणोपि देवीनिकटेकपटमनुचितमितिमत्वा देव्यैस्वरूपंदर्शयितुं स्वसामर्थ्यप्रशंसापूर्वकंनिजरूपंस्वीकरोति । सीतायाइत्यारभ्य वसनाभरणोपेतामित्यन्तस्यप्रकृतार्थस्स्पष्टः । वास्तवार्थस्तु—वीर्यपराक्रमौ वीर्यसमरेऽभीरुत्वं । पराक्रमः पराभिभवनसामर्थ्यं । उन्मत्तया मत्तजनानुद्गताउन्मत्ता उन्मत्तभिन्ना । तादृश्यापि नश्रुतौ । योऽहमेतादृग्विशेषणविशिष्टस्तं । कामरूपिणं कामदं । पतिं रक्षसामिति शेषः। मांपश्येतिबभाषेइतिपूर्वेणान्वयः ॥ ४ ॥ एवमिति । अस्मिञ्श्लोके पूर्वश्लोकस्थमुन्मत्तइतिपदमाकृष्य श्लोकोयोजनीयः । तथासत्येवंयोजना । एवमुक्तवतोरावणस्य क्रुद्धस्य उन्मत्ते हरिपर्यन्ते हरिःपिङ्गलवर्णः पर्यन्तयोरुपान्तयोर्ययोस्ते । शिखिप्रभे अग्निसदृशे । नेत्रे बभूवतुः ॥७॥ ति० हस्तेहस्तं समाहन्य समाहत्येत्यर्थः । विनिष्पीड्येतियावत् । महिषादयः स्त्रियैवहताः तथा कदाचिदेषा हरणसमयेक्रौर्यंकुर्यादितिशङ्कया क्रूरस्वीयमहारूपाङ्गीकारः । यद्वा कपटेनापि शान्तस्वभावयतिवेषधारणात्तद्वेषस्वाभाव्येनहरणे स्वस्यप्रतिबद्धतांदृष्ट्वा स्वरूपग्रहणं । ममरावणस्याप्ययंवेषः क्रौर्यप्रतिबन्धकइत्यतश्च हस्तेहस्ताघातइतिबोध्यं ॥ १ ॥ शि० अ इत्यव्ययं । तदत्र त्वर्थे । एवंच रणेस्थितोऽहंतु मृत्युंहन्यां । स०अपिबेयमिति पाठेआर्षोऽडागमः । वि० अपिबेयमिति । अ इतिपृथक् विस्मयार्थंद्रष्टव्यं ॥३॥ ति० कामेन चित्तजेन रूपेणच । उन्मत्ते इत्यर्थः। स० तुद्यां व्यथायुक्तंकरोमि ॥ शि० कामरूपेण स्वेच्छाचारेण उपलक्षिते । अतएव हेउन्मत्ते कामरूपिणं स्वेच्छारूपधारिणं ।

[पा०] १ झ. समाहन्य. २ ङ.—ट. बभाषेवाक्यकोविदः. ३ ख. ग. छ. ञ. ट. अपिबेयं. ४ क. ख. ग. ङ.—ट. मृत्युंहन्यां. ५ झ. ट. तुद्यां. ६ घ. च. ज. ञ. विनिर्भिन्ध्यांमहीतलं. ७ ङ. झ. ट. कामरूपेणउन्मत्ते. ८ ङ. झ. ट. कामरूपिणं. ९ क. ग. ङ.—ट. रावणस्यशिखि. १० ङ. झ. तीक्ष्णरूपं. ११ क. ख. घ. च. संमतं. १२ क.—ज. ञ. ट. स्वरूपं. १३ च. छ. ज. ञ. कालसंकाशं. १४ ङ. झ. ट. भूषणः. १५ ङ. झ. ट. दशास्योविंशतिभुजो.

स परिव्राजकच्छद्म महाकायो विहाय तत् ॥ प्रतिपद्य स्वकं रूपं रावणो राक्षसाधिपः ॥ ८ ॥
संरक्तनयनः क्रोधाज्जीमूतनिचयप्रभः ॥ रक्ताम्बरधरस्तस्थौ स्त्रीरत्नं प्रेक्ष्य मैथिलीम् ॥ ९ ॥
सैं तामसितकेशान्तां भास्करस्य प्रभामिव ॥ वसनाभरणोपेतां मैथिलीं रावणोऽब्रवीत् ॥ १० ॥
त्रिषु लोकेषु विख्यातं यदि भर्तारमिच्छसि ॥ मामाश्रय वरारोहे तवाहं सदृशः पतिः ॥ ११ ॥
मां भजस्व चिराय त्वमहं श्लाघ्यः प्रियस्तव ॥ नैवं चाहं कचिद्भद्रे करिष्ये तव विप्रियम् ॥१२॥
त्यज्यतां मानुषो भावो मयि भावः प्रणीयताम् ॥ राज्याच्युतमसिद्धार्थं रामं परिमितायुषम् ॥१३॥
कैर्गुणैरनुरक्तासि मूढे पण्डितमानिनि ॥ यः स्त्रिया वचनाद्राज्यं विहाय ससुहृज्जनम् ॥ १४ ॥
अस्मिन्व्यालानुचरिते वने वसति दुर्मतिः ॥ १५ ॥
इत्युक्त्वा मैथिलीं वाक्यं प्रियार्हां प्रियवादिनीम् ॥ अभिगम्य सुदुष्टात्मा राक्षसः काममोहितः ॥
जग्राह रावणः सीतां बुधः खे रोहिणीमिव ॥ १६ ॥

बभूव ॥ ७ ॥ उक्तानुवादपूर्वकं क्रौर्यान्तरमाह द्वाभ्यां । परिव्राजकच्छद्म परिव्राजकरूपं । परिव्राजकरूपेण परिवृतं मां प्रेक्ष्य तस्थौ । किमेवंरूपं दृष्ट्वापि मां भजिष्यतीति प्रत्याशयेति भावः ॥ ८—९ ॥ असितकेशान्तां नीलकेशाग्रां । केशाग्रे पैङ्गल्यं दुर्लक्ष्यं । भास्करस्यप्रभामित्यनेन दुष्प्रसहत्वमुच्यते । वसनेत्यादिना दुस्त्यजत्वमुच्यते ॥ १० ॥ वरारोहे वरजघने ॥ ११ ॥ पुनस्त्यागशङ्कां मा कार्षीरित्याह —मामिति । कचिन् कापीत्यर्थः ॥ १२ ॥ सार्धश्लोकद्वयमेकान्वयं । मानुषः मनुष्यरामविषयः । भावः स्नेहबन्धः । व्यालाः हिंस्राः । तमिति पूर्वेणान्वयः ॥ १३—१५ ॥ इतीत्यादिसार्धश्लोक एकान्वयः ।

मापिदम् । एतेन पृथिवीपरिमितरूपस्यापि धारणसामर्थ्यमप्यस्तीतिसूचितं ॥ ४ ॥ ती० परिव्राजकच्छद्म मायात्मकं यतिवेषं ॥८॥ स० असितकेशान्तां कृष्णकेशान्तां । आदित्यप्रभायाश्चासितत्वं "असौयआदित्यःपिङ्गलः एषशुक्रः एषनीलः" इत्यादिच्छान्दोगवाक्यसिद्धं ॥ १० ॥ स० पण्डितमात्मानंमन्यतइति पण्डितमानिनी तस्यास्संबुद्धिः । रामःपण्डितइति ज्ञानिनीतिवा ॥ १४ ॥ ती० त्रिषुलोकेषुविख्यातमित्यादिसार्धश्लोकचतुष्टयस्य प्रातीतिकार्थस्स्पष्टः । कुलकं । वस्तुतस्तु—भर्तारं भुवनादिमात्मानंबिभर्तीतिभर्ता तमात्मानं । पतिः रक्षसामितिशेषः । यद्यप्यहंरक्षसांपतिः तथापि तवसदृशः अनुरूपःकिं । श्लाघ्यइतिशेषः । अनुरूपोभूत्वोपभजामि । तथापि श्लाघ्यमिच्छसियदि त्रिषुलोकेषुविख्यातं यथाभवतितथा मामाश्रय श्लाघ्यत्वेनाङ्गीकुरु । कुतः चिराय चिरकालादारभ्य । तव श्लाघ्यः प्रियः प्रीणयतिह्लादयतीतिप्रियः श्लाघ्यः । जनस्थेरावणरूपेणोत्पन्नत्वात् । अतोमांभूत्वाहइति भजस्व जानीहीत्यर्थः । अतएव नैवाहमितिमानुषेभावस्त्यज्यतां । मनुष्यएवरक्षणीयश्लाघ्यमिप्रायस्त्यज्यतामित्यर्थः । किंतु प्राचीनकृपया मूढे पण्डितमानिन्यपि राक्षसेभूत्वेमयि भावःप्रणीयतां । अयमपिरक्षणीयश्लाघ्यइत्यनुसन्धीयतामित्यर्थः । किंच राज्याच्युतं भ्रष्टीकृतराज्यभोगमित्यर्थः । कुतः असिद्धार्थं अद्यापिसिद्धार्थत्वं अवाप्तसमस्तकामंविष्णुमित्यर्थः । परिमितायुषं परिगतंक्षयकं मितमल्पमायुर्येनतं अपरिमितायुषमित्यर्थः । किंच कैर्गुणैः अनिर्वचनीयैर्गुणैः अनन्तकल्याणगुणैरित्यर्थः । युक्तमितिशेषः । अनुरक्तासि । कृतएवं दुर्मतिः दुष्टेष्वपिमतिः अशुभाहिकायस्यसः । अतएवहि स्त्रियावचनात्सुहृज्जनंराज्यंविहाय वनेवसति । तादृशंत्वमनुरक्तासियतः अतस्सर्वोत्तमा लक्ष्मीस्त्वं । अतएव मांभूत्वत्वेनाङ्गीकुर्वितितात्पर्यं ॥ १५ ॥ ती० वस्तुतस्तु रावणः अन्यत्र सुदुष्टात्मा काममोहितश्चयद्यपि तथाप्यत्रनतथा । अतएव बुधःरोहिणीमिवजग्राह । बुधस्यमातरंयथापूजार्थंगृह्णाति तथा रावणोपि सीतां जग्राह । स्वगृहेसंस्थाप्य स्वेष्टदेवतामुद्दिश्यपूजयितुमेवेत्यर्थः । " जग्राहरावणस्सीतां बुधःखेरोहिणीमिव" इति । नन्वत्र नलकूबरवेदवतीशापादुलातकर्षपरदारस्पर्शहेतिचोक्तत्वं । रावणस्सीतांसाक्षाज्जग्राह नस्पृष्टवान् । परंतु जानुकेशादिच्छायामेवजग्राह । राक्षसानां छायाग्राहित्वात् । तदुक्तंस्कान्दे—"छायाग्राहित्वमप्यस्ति सर्वविद्याविशारदे । केशच्छायांपरामृश्य जानुच्छायांतथैवच । गृहीत्वाजानकीं हृष्टो जग्राहप्रायात्सरावणः । सीतापहरणंचैव वेश्मध्वन्तिनरोत्तमाः । नतेषामशुभंदेवि भविष्यतिकदाचन" । इति ॥ ति० सीतया सप्तोमरणपर्यंतसाधिशापादन्तु समूलनाशनस्य वेदवत्यंशेनप्रतिज्ञातत्वान्निर्बाधाय ऋणीणांदेवानामग्रे रामप्रतिज्ञातस्वनिर्वो-

[पा०] १ ख. ग. ङ. झ. ट. प्रतिपेदे. २ घ. क. प्रेक्ष्य. ३ ख. घ. च. छ. ज. सीतां. ४ ख. वाक्यमब्रवीत्. ५ ख. भर्तारंयदिविख्यातं. घ. छ. ज. ञ. विख्यातंभर्तारंवंयदिच्छसि. ६ क. ख. ग. च. ज. ञ. श्लाघ्यस्तवप्रियः. क. झ. ट. श्लाघ्यःपतिस्तव. ७ छ. ञ. नैवाहंतु. ८ क. ङ.—ञ. रावणः. ९ ग. कालचोदितः.

वामेन सीतां पद्माक्षीं मूर्धजेषु करेण सः ॥ ऊर्वोस्तु दक्षिणेनैव परिजग्राह पाणिना ॥ १७ ॥
तं दृष्ट्वा मृत्युसंकाशं तीक्ष्णदंष्ट्रं महाभुजम् ॥ प्राद्रवन्गिरिसंकाशं भयार्ता वनदेवताः ॥ १८ ॥
स च मायामयो दिव्यः खरयुक्तः खरस्वनः ॥ प्रत्यदृश्यत हेमाङ्गो रावणस्य महारथः ॥ १९ ॥
ततस्तां परुषैर्वाक्यैर्भर्त्सयन्स महास्वनः ॥ अङ्केनादाय वैदेहीं रथमारोपयत्तदा ॥ २० ॥
सा गृहीता विचुक्रोश रावणेन यशस्विनी ॥ रामेति सीता दुःखार्ता रामं दूरगतं वने ॥ २१ ॥
तामकामां स कामार्तः पन्नगेन्द्रवधूमिव ॥ विवेष्टमानामादाय उत्पपाताथ रावणः ॥ २२ ॥
ततः सा राक्षसेन्द्रेण ह्रियमाणा विहायसा ॥ भृशं चुक्रोश मत्तेव भ्रान्तचित्ता यथाऽऽतुरा ॥ २३ ॥
हा लक्ष्मण महाबाहो गुरुचित्तप्रसादक ॥ ह्रियमाणां न जानीषे रक्षसा माममर्षिणा ॥ २४ ॥
जीवितं सुखमर्थांश्च धर्महेतोः परित्यजन् ॥ ह्रियमाणामधर्मेण मां राघव न पश्यसि ॥ २५ ॥
ननु नामाविनीतानां विनेताऽसि परंतप ॥ कथमेवंविधं पापं न त्वं शास्सि हि रावणम् ॥ २६ ॥
नतु सद्यो ऽविनीतस्य दृश्यते कर्मणः फलम् ॥ कालोप्यङ्गीभवत्यत्र सस्यानामिव पक्तये ॥ २७ ॥

प्रियार्हत्वे हेतुः—प्रियवादिनीमिति । अत्र मुहूर्तं तिष्ठ भूयः सत्करिष्यामीति प्रियभाषिणीं मैथिलीं । इत्युक्त्वा एवं परुषमुक्त्वा । तत्र हेतुः—सुदुष्टात्मेति । बुधः खे रोहिणीमिवेत्यभूतोपमा । बुधः स्वपितृपत्नीत्वेन मातरं खे आकाशे सुखेनसंचरन्तींरोहिणींयदि गृह्णीयात् तत्तुल्यमिदं पापमित्यर्थः ॥ १६ ॥ शापकृतदोषो भविष्यतीति मूर्धजेषूर्वोश्च ग्रहणं ॥ १७ ॥ तमिति गृह्णन्तमित्यर्थः ॥ १८ ॥ सः पूर्वं गुप्तः । मायामयः अन्तर्धानाद्यर्हतया आश्चर्यमयः । खरयुक्तः अश्वतरयुक्तः । हेमाङ्गः स्वर्णमयचक्रः । चक्रं हि रथाङ्गमित्युच्यते ॥ १९ ॥ अङ्केन ऊरुभागेन ॥ २० ॥ वनेदूरगतं राममुद्दिश्य रामेति विचुक्रोश । क्रुश आह्वाने रोदने च ॥ २१ ॥ अकामां विरागिणीं । विवेष्टमानां रथोपरिस्थले लुठन्तीं । आदाय पुनरङ्केनादाय । उत्पपात रथेन सहित इति शेषः ॥ २२ ॥ आतुरा सा मत्तेव मदयुक्तेव । भ्रान्तचित्ता यथा भ्रान्तचित्तेव च चुक्रोश ॥ २३ ॥ अमर्षिणा खरवधकृतामर्षवता ॥ २४ ॥ धर्महेतोः आश्रितसंरक्षणरूपधर्महेतोः । जीवितं सुखमर्थांश्च परित्यजन् जीवितादिपरित्यागशीलः ॥ २५ ॥ ननु नामेति प्रसिद्धौ । अविनीतानां दुर्जनानां । विनेता शिक्षकः । पापं पापिष्ठं । कथं न शास्सि न शिक्षयसि ॥ २६ ॥ अशासने स्वयमेव हेतुमुन्नयति—नत्विति । अविनीतस्य दुर्जनस्य । कर्मणः पापस्य । सद्यः फलं न

हाय ॥ स० प्रियः स्वप्रियोरामः तस्यैवार्हां । अतएव तमेववदतीति प्रियवादिनी तां ॥ १६ ॥ ती० मूर्धजेषुकरेण मूर्धजाः श्रेष्ठाः इषवःयस्मिंस्तेनकरेण दक्षिणेन वामेनच ऊर्वोः पादयोः परिजग्राह । पादौगृहीत्वा सङ्कांप्रत्यागन्तव्यमितिप्रार्थितवानिति भावः ॥ स० अत्रानुक्तं मायासीताकृतिनिर्माणमित्यादिकं पुराणान्तरादवगन्तव्यं । तथाचोक्तं कूर्मपुराणेचतुस्त्रिंशेऽध्याये—"सृष्ट्वामायामयींसीतां सरावणवधेच्छया । सीतामादायरामेष्टां पावकोन्तरधीयत ।" इत्यादि । तथा आग्नेयपुराणे षट्सप्ततितमाध्याये "इत्युक्त्वास्वप्रभावेन प्रतिबिंबंमनोमयं । यथारूपंयथावेषं कल्पयित्वातिसुन्दरम् । वह्नावाच्छादयन्ती स्वमग्नावेव समास्थिता । अथमायामयीसीता" इत्याद्युक्तं । एतच्च द्वारप्रदर्शनपरं महाभारततात्पर्यनिर्णयादौ कैलासगमनोक्तेः । ति० वामेनेति अननुरक्ततया शापदानभिया स्ववामाङ्गासनस्वनिवारणायैवंग्रहणमित्याहुः ॥ १७ ॥ स० दिव्यः आकाशगामी ॥१९॥ ती० वस्तुतस्तु—परुषैर्वाक्यैः यदिमां भृत्यत्वेननाङ्गीकरोषि तर्हि तवाग्रतःप्राणांस्त्यक्ष्यामीत्यादिवाक्यैः । भर्त्सयन् भीतिमुत्पादयन् रथमारोपयत् ॥ २० ॥ ती० सागृहीतेत्यादीनांवास्तवार्थेसीतायादैन्यवत्प्रतीयमानानिवाक्यानिसर्वाणि सीतया लौकिकरीतिमनुसृत्योक्तानीति द्रष्टव्यानि । ति० अतिचुक्रोशेत्यादि तच्छायायाअपि मनुष्यभावनाढ्यं ॥ २१ ॥ ति० अत्र इवयथाभ्यां सर्वचेष्टानांनाट्यत्वंसूचितं ॥ २३ ॥ ति० नशाधि प्राप्तकालंशासनं नकरोषि । हिर्वाक्यालङ्कारे । शोकातुरत्वाद्वाऽधिकपदं

[पा०] १ च. छ. ज. ञ. गिरिसंकाशं. क. ग. ङ. झ. ट गिरिशृङ्गाभं. २ क. ग. ङ—ट. न्मृत्युसंकाशं. घ. गिरिशृङ्गाभं. ३ क. ङ. झ. ट. वाक्यैरभितर्ज्य. च. छ. ज. ञ. वाक्यैस्तर्जयित्वा. ४ ग. ङ.—ज. ञ. अङ्केनोद्यम्य ५ क.—घ. च.—ञ. मारोहयत्. ६ ख. ततः. ७ च. छ. ज. ञ. रामकामां. ट. तामकामांच. ८ क. ङ.—ट. कामरूपिणा. ९ ख. ङ.—ट. मर्षंच. १० झ. शाधि.

सं कर्म कृतवानेतत्कालोपहतचेतनः ॥ जीवितान्तकरं घोरं रामाव्यसनमाप्नुहि ॥ २८ ॥
हन्तेदानीं सकामाऽस्तु कैकेयी सह बान्धवैः ॥ [2]ह्रिये यद्धर्मकामस्य धर्मपत्नी यशस्विनः ॥ २९ ॥
आमन्त्रये जनस्थाने कर्णिकारान्सुपुष्पितान् ॥ क्षिप्रं रामाय शंसध्वं सीतां हरति रावणः ॥ ३० ॥
माल्यवन्तं शिखरिणं वन्दे प्रस्रवणं गिरिम् ॥ क्षिप्रं रामाय शंसं त्वं सीतां हरति रावणः ॥ ३१ ॥
हंससारण्डवाकीर्णां वन्दे गोदावरीं नदीम् ॥ क्षिप्रं रामाय शंसं त्वं सीतां हरति रावणः ॥ ३२ ॥
दैवतानि च यान्यस्मिन्वने विविधपादपे ॥ नमस्करोम्यहं तेभ्यो भर्तुः शंसत मां हृताम् ॥ ३३ ॥
यानि कानि चिदप्यत्र सत्त्वानि निवसन्त्युत ॥ सर्वाणि शरणं यामि मृगपक्षिगणानपि ॥ ३४ ॥
ह्रियमाणां प्रियां भर्तुः प्राणेभ्योपि गरीयसीम् ॥ विवशाऽपहृता सीता रावणेनेति शंसत ॥ ३५ ॥
[10]विदित्वा मां महाबाहुरमुत्रापि महाबलः ॥ आनेष्यति पराक्रम्य वैवस्वतहृतामपि ॥ ३६ ॥
सा [11]तदा करुणा वाचो विलपन्ती सुदुःखिता ॥ वनस्पतिगतं गृध्रं ददर्शायतलोचना ॥ ३७ ॥
सा तमुद्वीक्ष्य सुश्रोणी रावणस्य वशं गता ॥ समाक्रन्दद्भयपरा [13]दुःखोपहतया गिरा ॥ ३८ ॥
जटायो पश्य मामार्य ह्रियमाणामनाथवत् ॥ अनेन राक्षसेन्द्रेण करुणं पापकर्मणा ॥ ३९ ॥
नैनं [15]वारयितुं शक्यस्तवैव क्रूरो निशाचरः ॥ सत्त्ववाञ्जितकाशी च सायुधश्चैव दुर्मतिः ॥ ४० ॥

दृश्यते । कुतः अत्र फलदर्शने । कालोप्यङ्गीभवति सहकारिकारणं भवति । अभूततद्भावे च्विः । पक्तये पाकाय ॥ २७ ॥ सः स्वमित्यर्थः । व्यसनं भ्रंशं । " व्यसनं विपदि भ्रंशे " इत्यमरः ॥ २८ ॥ वने राक्षसादिभिर्हृता भवेदिति मां कैकेयी वनं प्रेषितवतीति वैदेह्या हृदये सर्वदास्थितं । तदिदानीं " सुप्तप्रमत्तकुपितानां भावज्ञानं दृष्टं " इति न्यायेनोद्घाटयति—हन्तेति । अत्र हेतुमाह—ह्रिये यदिति ॥ २९ ॥ अथ चित्तविभ्रमातिरेकादचेतनानपि रामायाख्यातेत्यभ्यर्थयते—आमन्त्रय इत्यादिभिः सप्तश्लोकैः । आमन्त्रये संबोधयामि । जनस्थाने स्थितानितिशेषः । कर्णिकारान् परिव्याधाख्यान्पुष्पवृक्षान् । रावणः सीतां हरतीति यत् एतच्छंसध्वं कथयत । एवमुत्तरत्रापि योज्यं ॥ ३० ॥ माल्यवन्तं पुष्पवन्तं । शिखरिणं प्रशस्तशिखरं । प्रस्रवणं प्रस्रवणाख्यं ॥ ३१ ॥ संघुष्टाः हंसाः सारसाश्च यस्यां सा हंससारससंघुष्टा । कर्तरि क्तः । हंसकारण्डवाकीर्णामिति शुद्धः पाठः ॥ ३२ ॥ तेभ्यः युष्मभ्यमिति शेषः ॥ ३३ ॥ यानीत्यादिश्लोकद्वयमेकान्वयं । सत्त्वानि जन्तवः । उतेति संबोधने समुच्चये वा । ह्रियमाणां प्राणेभ्योपि गरीयसीं प्रियां मां सीता रावणेन हृतेति भर्तुः शंसत । रावणाच्च भेतव्यं तत्त्वं कथयतेति भावः ॥ ३४—३५ ॥ कथने किं प्रयोजनं तत्राह—विदित्वेति । भवदुक्तप्रकारेण मां विदित्वा अमुत्र स्वर्गलोके गतामपि वैवस्वतहृतामपि पराक्रम्यानेष्यति । तस्मादवश्यं शंसतेति भावः ॥ ३६ ॥ करुणाः दीनाः । तात्कालिकहर्षं सूचयति—आयतलोचनेति ॥ ३७ ॥ समाक्रन्दत् क्रदि आह्वाने रोदने च । दुःखोपहतया दुःखगद्गदया ॥ ३८ ॥ आर्येति श्वशुरवत्संबोधनं । करुणं यथा तथा ह्रियमाणां ॥ ३९ ॥ अशक्यत्वे हेतुः—सत्त्ववानित्यादिकं । जितकाशी

नदोषाय ॥ २६ ॥ ति० सकामातु जातेतिशेषः । यतइत्यादिः ॥ २९ ॥ स० सीतांरावणेहरतीतिपारोक्ष्योक्त्या आकृतेरेव ग्रहणमिति सूचयति ॥ ३० ॥ शि० वन्दे तत्प्रयोजनमाह । क्षिप्रंरामायशंसध्वं । अत्र वन्द्यमानयोरद्भुतावयवविवक्षया बहुवचनं । एवमुत्तरत्रापि ॥ ३१ ॥ शि० वनस्पतिगतं वृक्षेस्थितं । स० करुणयन्तीतिकरुणाः ॥ ३७ ॥ इत्येकोनपञ्चाशस्सर्गः ॥ ४९ ॥

[पा०] १ क. ङ.—ट. त्वंकर्म. २ क्ष. म. ट. सकामातु. ३ क. ख. ग. ङ.—ट. बान्धवैस्सह. ४ क.—ट. ह्रियेयधर्म. ५ अयंश्लोको झ. पाठेनदृश्यते. ६ ग. घ. छ. ट. शंसध्वं. ७ ख.—ट. हंससारससंघुष्टां. ८ ख. ट. घ. झ. ट. शंसध्वं. ९ ङ. झ. ट. विविधानिच. १० ङ. झ. ट. विदित्वातु. ११ क.—घ. च. छ. ज. ञ. तथा. १२ च. छ. ज. ञ. वशानुगा. १३ घ. छ. ञ. शब्दोपहतया. १४ क. ङ.—ञ. नैव. १५ क. घ. छ. ज. ञ. स्त्वयाक्षेप. ङ. झ. ट. स्त्वयाक्रूरो.

रामाय तु यथातत्त्वं जटायो हरणं मम ॥ लक्ष्मणाय च तत्सर्वमाख्यातव्यमशेषतः ॥ ४१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

पञ्चाशः सर्गः ॥ ५० ॥

सीतासमाक्रन्दनश्रवणात्त्वरापातशुद्धेनजटायुषासीतारावणयोर्दर्शनम् ॥ १ ॥ तथाक्षनामकीर्तनादिपूर्वकंरावणंप्रति सीतामोचनयाचनेपितेनतदकरणे सगर्हणंसक्रोधंयुद्धायतत्प्रतिरोधनम् ॥ २ ॥

तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे ॥ निरीक्ष्य रावणं क्षिप्रं वैदेहीं च ददर्श सः ॥ १ ॥
ततः पर्वतकूटाभस्तीक्ष्णतुण्डः खगोत्तमः ॥ वनस्पतिगतः श्रीमान्व्याजहार शुभां गिरम् ॥ २ ॥
दशग्रीव स्थितो धर्मे पुराणे सत्यसंश्रयः ॥ [भ्रातस्त्वं निन्दितं कर्म कर्तुं नार्हसि साम्प्रतम्] ॥
जटायुर्नाम नाम्नाऽहं गृध्रराजो महाबलः ॥ ३ ॥
राजा सर्वस्य लोकस्य महेन्द्रवरुणोपमः ॥ लोकानां च हिते युक्तो रामो दशरथात्मजः ॥ ४ ॥
तस्यैषा लोकनाथस्य धर्मपत्नी यशस्विनी ॥ सीता नाम वरारोहा यां त्वं हर्तुमिहेच्छसि ॥ ५ ॥
कथं राजा स्थितो धर्मे परदारान्परामृशेत् ॥ रक्षणीया विशेषेण राजदारा महाबल ॥ ६ ॥
निवर्तय मतिं नीचां परदाराभिमर्शनात् ॥ न तत्समाचरेद्धीरो यत्परोऽस्य विगर्हयेत् ॥
यथाऽऽत्मनस्तथाऽन्येषां दारा रक्ष्या विपश्चिता ॥ ७ ॥

जयावहः । दुर्मतिः कूटयोधी ॥ ४० ॥ तर्हि मया किं कर्तव्यं तत्राह—रामाय स्थिति । तत् अस्य दुर्जयत्वादेव हेतोः ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकोनपञ्चाशः सर्गः ॥ ४९ ॥

अथ स्वामिविषये दासेन यावच्छक्ति शेषवृत्तिरवश्यं कर्तव्येत्यमुमर्थं लोके प्रवर्तयितुं जटायुवृत्तान्तमुपक्षिपति सर्गद्वयेन । अत्र प्रथमं जटायुः सान्त्वनभर्त्सनाभ्यां रावणमनुकूलयितुमिच्छतीत्याह—तं शब्दमित्यादिना । अवसुप्तः ईषत्सुप्तो जटायुः । अथ सीतावचनानन्तरं । तं शब्दं शुश्रुवे । आत्मनेपदमार्षम् । ततः प्रथमं महाशरीरतया रावणं निरीक्ष्य सः वैदेहीं ददर्श ॥ १ ॥ तीक्ष्णतुण्डः तीक्ष्णमुखः । "वक्त्रास्ये वदनं तुण्डं" इत्यमरः । श्रीमान् कैङ्कर्यश्रीसमृद्धः । शुभां रावणस्य शोभनावहां ॥ २ ॥ पुराणे सनातने । धर्मे दास्यवृत्तावित्यर्थः । स्थितः तदेकपरायणः । सत्यं "सत्यं ज्ञानमनन्तं ब्रह्म" इत्युक्तः परमात्मा संश्रयः आलम्बनं यस्य सः भगवदेकोपायनिष्ठ इत्यर्थः । नाम्ना जटायुर्नाम जटायुरिति प्रसिद्धः । तथाच मयि दासे स्थिते तव सीतापहरणं न युक्तमिति भावः ॥ ३ ॥ स्वस्वरूपमुक्त्वा स्वामिस्वरूपमाह—राजेति । महेन्द्रवरुणोपमस्त्वमेकदेशसाम्यात् । सर्वलोकस्य राजा स्वामी भवतोपि स्वामीत्यर्थः ॥ ४ ॥ तथाच राजदारापहारो न युक्त इत्याह—तस्येति । सहधर्मचारिणीति धर्मपत्नीशब्दार्थः ॥ ५ ॥ मा भूत्तव रामे स्वामित्वबुद्धिः मनुष्यमात्रबुद्धिं राजबुद्धिं वा कृत्वा सीतां परिहरेत्याह—कथमिति । राजा भवानिति शेषः ॥ ६ ॥ राजत्वबुद्धिस्तव रामे मा भूत् तथापि परदाराभिमर्शनं न कार्यमित्याह—निवर्त-

---

ति० अहं सत्यसंश्रवः सत्यप्रतिज्ञः । सीतारक्षणेऽहंसहायइत्युक्त्वादितिभावः । नाम्नाजटायुरिति प्रसिद्धः । अतो मत्समक्षमीदृशंकर्म कर्तुंनार्हसि । भ्रातरितिसाम्प्रयोगः । यथेवंसत्यसि तदा सत्यप्रतिज्ञत्वान्मयासहयुद्धंआवीति दण्डप्रयोगश्चेत्यर्थः ॥ ३ ॥ ती० रक्षणीयाविशेषेणराजदाराः इत्यनेन राजदारापहरणस्य गुरुतल्पसमत्वादितिभावः ॥ ६ ॥

[पा०] १ ङ. माख्यातव्यंविशेषत . २ ग. जटायुरपि. ३ क. ग. घ. ङ. झ. ठ. निरैक्षद्रावणं. ४ क. च. छ. ज. ञ. यशस्विनीं. ५ ख. च. छ. ज. ञ. संकाशः. झ. रक्षाभः. ६ ख. छ. ज. ञ. खगेश्वरः. ७ ङ. झ. ठ. सत्यसंश्रवः. ८ इदमर्धं ङ. झ. ट. पाठेषुदृश्यते. ९ ग. रक्ष्यादाराः. १० क. ध. विमर्शता. ङ.—ट. विमर्शनात.

अर्थं वा यदि वा कामं शिष्टाः शास्त्रेष्वनागतम् ॥ व्यवस्यन्ति न राजानो धर्मं पौलस्त्यनन्दन ॥८॥
राजा धर्मश्च कामश्च द्रव्याणां चोत्तमो निधिः ॥ धर्मः शुभं वा पापं वा राजमूलं प्रवर्तते ॥ ९ ॥
पापस्वभावश्चपलः कथं त्वं रक्षसांवर ॥ ऐश्वर्यमभिसंप्राप्तो विमानमिव दुष्कृतिः ॥ १० ॥
कामं स्वभावो यो यस्य न शक्यः परिमार्जितुम् ॥ न हि दुष्टात्मनामार्यभावसत्यालये चिरम् ॥११॥
विषये वा पुरे वा ते यदा रामो महाबलः ॥ नापराध्यति धर्मात्मा कथं तस्यापराध्यसि ॥ १२ ॥
यदि शूर्पणखाहेतोर्जनस्थानगतः खरः ॥ अतिवृत्तो हतः पूर्वं रामेणाक्लिष्टकर्मणा ॥ १३ ॥
अत्र ब्रूहि यथातत्त्वं को रामस्य व्यतिक्रमः ॥ यस्य त्वं लोकनाथस्य भार्यां हृत्वा गमिष्यसि ॥१४॥
क्षिप्रं विसृज वैदेहीं मा त्वा घोरेण चक्षुषा ॥ दहेद्दहनभूतेन वृत्रमिन्द्राशनिर्यथा ॥ १५ ॥
सर्पमाशीविषं बद्ध्वा वस्त्रान्ते नावबुध्यसे ॥ ग्रीवायां प्रतिमुक्तं च कालपाशं न पश्यसि ॥ १६ ॥

येति । परदारामिमर्शनान्मतिं निवर्तय । तद्विषयमतिं न कुर्वित्यर्थः । नीचत्वमेवाह—नेति । धीरः धीमान् । तत्कर्म नसमाचरेत् । अस्य धीरस्य यत् कर्म । परो विगर्हयेत् निन्देत् । विपश्चिता विवेकिना ॥ ७ ॥ शिष्टाः सन्तः । राजानः शास्त्रेष्वनागतमनुपदिष्टं धर्ममर्थवा यदिवाकामं कामं वा न व्यवस्यन्ति नेच्छन्तीत्यर्थः । लोके यथातथावा भवतु राज्ञस्तद्धुरं नेदमुचितमिति भावः ॥ ८ ॥ नकेवलंस्वार्थं लोकानुग्रहार्थं चेदं परिहर्तव्यमित्याह—राजेति । अत्रधर्मादिशब्दौ धर्मादिप्रवर्तकपरौ । द्रव्याणामर्थानामुत्तमो निधिराश्रयः । यस्मादेवं तस्मात् धर्मः धर्मादिः । राजमूलंयथातथाप्रवर्तते । शुभं शुभाचारः । पापं वा राजमूलं प्रवर्तते । राजानुसारेण लोकाः धर्माधर्मादिषु प्रवर्तन्ते । अतोराज्ञा पापं विहाय धर्मादिकमेव कर्तव्यमित्यर्थः ॥ ९ ॥ परदारामिमर्शनमैश्वर्यांकुशकं चेत्याह—पापस्वभाव इति । पापं स्वभावःसहजधर्मो यस्य स पापस्वभावः । अतएव चपलः विषयप्रवणः । त्वं दुष्कृतिः । विमानं देवार्हं विमानमिव । ऐश्वर्यमभि ऐश्वर्यप्रति । कथं संप्राप्तः योग्यः । एवं विषयचपलश्चैदैश्वर्याद्भ्रष्टो भविष्यसीति भावः ॥ १० ॥ एवं बहुसान्त्वनेपि सीताविसर्जनाकरणात् भवादृशे उपदेशो निरर्थक इत्याह—काममिति । यो यस्य स्वभावः औत्पत्तिकः । स धर्मः । कामं अत्यन्तं । परिमार्जितुं न शक्यः । उपदेशेन निवर्तयितुं न शक्य इत्यर्थः । तथाहि आर्यं सदुपदेशः । दुष्टात्मनां आलये हृदये । चिरं नावसति न तिष्ठति ॥ ११ ॥ शत्रुभार्यापहरणं मम स्वभाव इत्याशङ्क्य शास्त्रवप्रसक्तिरत्र नास्तीत्याह—विषये वेति । विषये राज्ये । यदा नापराध्यति तदा तस्य कथमपराध्यसि ॥ १२ ॥ खरवध एव ममापराध इत्याशङ्क्याह द्वाभ्यां । वृत्तं मर्यादामतिक्रान्तोतिवृत्तः । अत्र हननविषये । यस्येति तस्येति पूर्वशेषः ॥ १३—१४ ॥ प्रकृतमुपसंहरति—क्षिप्रमिति । अत्र राम इत्यध्याहार्यं । चक्षुषेत्यनेन दर्शनमात्रेण वधो लक्ष्यते । अशनिः वज्रं ॥ १५ ॥ सीताग्रहणमवश्यं मृत्युकरमित्याह—सर्पमित्यादिना । आशीविषं आशीविषाख्यं । प्रतिमुक्तं आमुक्तं । यथा वस्त्रबद्धः सर्पोऽवश्यं नाशयति तद्वदियं सीता गृहीता त्वां

ति० शास्त्रेष्वनागतं शास्त्रेष्वनवगतं परमसूक्ष्मत्वाच्छास्त्रतोनवगतमप्यर्थवा राजानमनुसृत्य व्यवस्यन्ति । शास्त्रेऽसंकुटमपि राज्ञआचरणंदृष्ट्वाप्रजाआचरन्ति । तस्माद्राज्ञोऽधर्मप्रवृत्तिरनुचितेतितात्पर्यं . नव्यवस्यन्तिराजानहतिपाठे शास्त्रेष्वनागतं तत्राप्रतिपादितंधर्मं राजानोनव्यवस्यन्ति नेच्छन्तीत्यर्थः । तस्माच्छास्त्रानुसरिधर्मेएव मतिंकुर्याविस्याशयः ॥ ८ ॥ स्व० कार्यगौरवादार्येति रावणसंबोधनं । दुष्टात्मनामालये श्रीलक्ष्मीः चिरंबहुकालं नवसति । किंतु आर्यमा ज्येष्ठलक्ष्मीर्वसति । पूर्वत्र मा वसतीतिच्छेदः ॥ ११ ॥

[पा०] १ च. छ. ज. ञ. धर्ममर्थंचकामंच. २ क. ङ. ट. व्यवस्यन्त्यनुराजानं. क. घ. छ. ज. ञ. नव्यवस्यन्ति. ३ घ. छ. ज. ञ. द्रव्याणामुत्तमो. ४ क. घ. छ. ज. कामोवा. ५ घ. ऐश्वर्यमिह. ६ क. ङ. ट. यस्सोसौ. ७ क. ङ. ठ. शक्यःसंप्रमार्जितुं. घ. शक्यःपरिमार्जितुं. ८ घ. मार्याह्यावसन्त्यालये. ९ ख. ग. यथा. ग. पवि. १० ख. घ. छ. ज. तत्रब्रूहियथासत्यं. ११ क. ख. ग. ङ.—ट. हत्वाभार्यां. १२ च. छ. ज. ञ. त्वां. १३ क. ख. च. छ. ज. ञ. दृढमकल्पेन. १४ घ. प्रतिसक्तं. छ. प्रतियुक्तं.

स भारः सौम्य भर्तव्यो यो नरं नावसादयेत् ॥ तदन्नमपि भोक्तव्यं जीर्यते यदनामयम् ॥१७॥
यत्कृत्वा न भवेद्धर्मो न कीर्तिर्न यशो भुवि ॥ शरीरस्य भवेत्खेदः कस्तत्कर्म समाचरेत् ॥ १८ ॥
षष्टिर्वर्षसहस्राणि मम जातस्य रावण ॥ पितृपैतामहं राज्यं यथावदनुतिष्ठतः ॥ १९ ॥
वृद्धोऽहं त्वं युवा धन्वी सेशरः कवची रथी ॥ तथाऽप्यादाय वैदेहीं कुशली न गमिष्यसि ॥२०॥
न शक्तस्त्वं बलाद्धर्तुं वैदेहीं मम पश्यतः ॥ हेतुभिर्न्यायसंयुक्तैर्ध्रुवां वेदश्रुतीमिव ॥ २१ ॥
युध्यस्व यदि शूरोसि मुहूर्तं तिष्ठ रावण ॥ शयिष्यसे हतो भूमौ यथा पूर्वं खरस्तथा ॥ २२ ॥
असकृत्संयुगे येन निहता देवदानवाः ॥ नचिराच्चीरवासास्त्वां रामो युधि वधिष्यति ॥ २३ ॥

नाशयिष्यतीति भावः । व्याजस्तुतिरलंकारः ॥ १६ ॥ भारः भारद्रव्यं । नावसादयेत् न पीडयेत् । अनामयं व्याध्यनुत्पादकं । अत्रापिपूर्ववद्व्याजस्तुतिः ॥ १७ ॥ यत्कार्यं कृत्वा स्थितस्य न धर्मो भवेत् । कीर्तिः ऐश्वर्यादिजनिता प्रथावा । न भवेत् । यशः भोगित्वकृतप्रथावा । न भवेत् । प्रत्युत शरीरदुःखमेव भवेत् । तत्कर्म कः समाचरेत् । मूढ एवाचरेत् । तथाविधकर्मकरणाद्भवान्मूढ एवेति भावः ॥१८॥ मयि वृद्धत्वेनाक्षमतिं मा कृथा इत्याशयेनाह द्वाभ्यां । षष्टिर्वर्षसहस्राणि गतानीति शेषः । जातस्येत्यनेन वयसा जीर्णत्वमुच्यते । राज्यं यथावत् अनुतिष्ठतः पालयत इत्यनेन कर्मणा जीर्णत्वमुक्तं । अहं धनुराद्युपकरणरहितः ॥१९—२०॥ एतदेव दृष्टान्तमुखेन द्रढयति—न शक्त इति । मम पश्यतः मयि पश्यति सति । सीतां बलाद्धर्तुं नशक्तः न समर्थः । कथमिव । न्यायसंसिद्धैः न्यायशास्त्रसंसिद्धैः । हेतुभिः अनुमानैः । ध्रुवां निश्चलां । अविचाल्यप्रामाण्यामिति यावत् । वेदश्रुतीमिव वेदश्रुतिमिव । दीर्घ आर्षः । वेदयतीति वेदः । स्वतःप्रमाणभूतां श्रुतिमित्यर्थः । यथा वेदविदग्रेसरो वेदश्रुतिमन्यथा नीयमानामवलोकयन् तदसहमानो यावच्छक्ति निवर्तयति । तथाऽहमपि त्वया बलान्नीयमानामपि सीतां यावच्छक्ति निवर्तयिष्यामीत्यर्थः ॥ २१ ॥ यदि शूरोसि मुहूर्तं तिष्ठ मा पलायस्व । युद्धे मया हतस्त्वं पूर्वरामेण हतः खर इव भूमौ शयिष्यसे । यद्वा यदि शूरोसि तदा मया युध्यस्व । अथवा रामागमनपर्यन्तं मुहूर्तं तिष्ठ तेन हतः शयिष्यस इति । यद्वा यदि शूरोसि मुहूर्तं तिष्ठ स्थित्वा तेन युध्यस्व ॥ २२ ॥ न केवलं स्वापराधप्रतीकारः किन्तु "देवानां दानवानां च सामान्यमधिदैवतं" इत्युक्तस्य रामस्य स्वकीयापराधप्रतीकारोपि भविष्यतीति० मैवैवेहीं दशरथमित्रात्मसम्बन्धावैदेहीमादाय नकुशलीगमिष्यसीत्यर्थः ॥२०॥ गो० यथा नसुरापिवेदित्यादिकां ध्रुवानिक्षां निरपेक्षलक्षणांश्रुतिं—सुरावेया इवद्रव्यलाक्षीरवदित्यादिभिः न्यायसंयुक्तैः तर्कसहितैः हेतुभिः हर्तुमशक्तेति । किंतु अत्रैवहेतवः कालात्ययापदिष्टाभवन्ति । तत्रैव हेतुशक्तिसमानमाबलसंपन्नत्वं श्रुतिसदृशीसीतां हर्तुनशक्तः । किंतु तत्रैव नश्यसीत्यर्थः । स० न्याययुक्तैः आपाततः । हेतुभिः हेत्वाभासैः । श्रुतीमिवात्र दीर्घआर्षः । यद्वा श्रुतिः क्रियाप्रत्ययान्तोऽयं । ततश्च "कृदिकारात्—" इतिङीष् ॥ शि० न्यायसंयुक्तैः न्यायत्वेनप्रतीयमानैः हेतुभिः नास्तिकादियुक्तिभिः ईश्वरोनास्ति अदृश्यत्वादित्यादिहेत्वाभासैः ध्रुवां क्षित्यङ्कुरादिकंसकर्तृकं कार्यत्वादित्यायनुमानेन "यतोवाइमानिभूतानिजायन्ते" इत्यादिशब्देनच "दृश्यतेत्वग्र्यया बुद्ध्या" इत्युक्त्या प्रत्यक्षेणच कल्पासंपुष्करीकमिवेत्यायुक्तयोपमानेनच सिद्धां । वेदश्रुतीं वेदानांसामादीनां श्रुतयः तात्पर्यवृत्त्या यस्यांपरदेवतायां तामिव । दीर्घआर्षः ॥ २१ ॥ स० नचिरात् अल्पकाले । ति० संयुगे रामेणेति

[पा०] १ क. ङ. ट. ध्रुवं. २ घ. नतत्कर्म. ३ ङ.—ञ. षष्टिवर्ष. ४ ख. ङ.—ट. जातस्यमम. ५ क. ख. ग. ङ. छ. झ. ञ. ट. सरथःकवचीशरी. ६ ङ. झ. ट. नचाप्यादायकुशलीवैदेहींमे. ख. नचाप्यादायवैदेहींकुशलीमे. ७ च. छ. ज. ञ. मागमिष्यसि. ८ झ. दैत्य.

किंनु शक्यं मया कर्तुं गतौ दूरं नृपात्मजौ ॥ क्षिप्रं त्वं नश्यसे नीच तयोर्भीतो न संशयः ॥२४॥
नहि मे जीवमानस्य नयिष्यसि शुभामिमाम् ॥ सीतां कमलपत्राक्षीं रामस्य महिषीं प्रियाम् ॥२५॥
अवश्यं तु मया कार्यं प्रियं तस्य महात्मनः ॥ जीवितेनापि रामस्य तथा दशरथस्य च ॥ २६ ॥
तिष्ठतिष्ठ दशग्रीव मुहूर्तं पश्य रावण ॥ युद्धातिथ्यं प्रदास्यामि यावत्प्राणं निशाचर ॥ २७ ॥
वृन्तादिव फलं त्वां तु पातयेयं रथोत्तमात् ॥ २८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

एकपञ्चाशः सर्गः ॥ ५१ ॥

जटायुषासहयुध्यतारावणेन तेननिजरथादिभञ्जनेभूमौनिपतनम् ॥ १ ॥ किंचित्परिश्रान्तेजटायुषि लब्धावकाशेनरावणेन पुनःसीतामादायपलायनम् ॥ २ ॥ पुनरमर्षात्तदनुधाविनाजटायुषा खरतरनखरैस्तत्पृष्ठविदारणपूर्वकंतुण्डेनतदीयभुजमण्डलखण्डनम् ॥ ३ ॥ पुनःप्ररूढभुजमण्डलेनतेनसीताविसर्जनपूर्वकंमुहूर्तंनियुध्यखड्गेनजटायुषःपक्षपादच्छेदनम् ॥ ४ ॥ सीतयाभूशायिनोमन्दजीवितस्यजटायोरालिङ्गनेनपरिदेवनम् ॥ ५ ॥

इत्युक्तस्य यथान्यायं रावणस्य जटायुषा ॥ क्रुद्धस्याग्निनिभाः सर्वा रेजुर्विंशतिदृष्टयः ॥ १ ॥
संरक्तनयनः कोपात्तप्तकाञ्चनकुण्डलः ॥ राक्षसेन्द्रोऽभिदुद्राव पतगेन्द्रममर्षणः ॥ २ ॥
स संप्रहारस्तुमुलस्तयोस्तस्मिन्महावने ॥ बभूव वातोद्धतयोर्मेघयोर्गगने यथा ॥ ३ ॥
तद्बभूवाद्भुतं युद्धं गृध्रराक्षसयोस्तदा ॥ सपक्षयोर्माल्यवतोर्महापर्वतयोरिव ॥ ४ ॥
ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः ॥ अभ्यवर्षन्महाघोरैर्गृध्रराजं महाबलः ॥ ५ ॥

त्याह—असकृदिति ॥ २३ ॥ एवमुक्तेपि पुनः पलायमानंप्रत्याह—किंन्विति । किंनु शक्यंकिंवा शक्यं । नश्यसे अदर्शनं प्राप्नोषि । तयोः ताभ्यां ॥ २४ ॥ तथापि त्वां नाहं गमयामीत्याह—नहीति । जीवमानस्य जीवतः । मयि जीवतीत्यर्थः ॥२५॥ त्वया किं कर्तुं शक्यमित्यत्राह—अवश्यमिति । जीवितेनापि जीवितव्ययेनापि ॥ २६ ॥ यथाप्राणं यथाबलं ॥ २७ ॥ वृन्तादित्यर्धमेकान्वयं । " वृन्तं प्रसवबन्धनं " इत्यमरः ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

अथ स्वामिकार्याय प्राणत्यागमकरोज्जटायुरित्याह—इतीत्यादिना ॥१॥ अमर्षणः असहनः ॥२॥ सः युध्यस्वेति पूर्वंप्रवर्तितः । संप्रहारः युद्धं । वा ताभ्यां प्रतिकूलवायुभ्यां उद्धतयोः प्रेरितयोः । मेघपक्षे संप्रहारः संघट्टनमात्रं ॥ ३ ॥ सपक्षयोः पक्षसहितयोः । माल्यवतोः माल्यवन्नामानौ द्वौपर्वतौ एको दण्डकारण्ये पूर्वमुक्तः "माल्यवन्तं शिखरिणं"इति । अन्यः किष्किन्धासमीपे । वक्ष्यति वर्षावर्णने ॥ ४ ॥ नालीकैः नालमात्रशरैः । नाराचैः आयसशरैः । विक-

---

शेषः । नवधिष्यति अपितु वधिष्यतीत्यर्थः । अनेन रामस्येश्वरत्वंव्यङ्ग्यं ॥२३॥ स० अल्पकालव्यवधानमपि कुतइत्यतआह—किंनुशक्यमिति । तयोः ताभ्यां ॥ २४ ॥ इतिपञ्चाशस्सर्गः ॥ ५० ॥

ति० माल्यवतोः द्वौमाल्यवन्तौ एको दण्डकारण्ये । अपरोमेरुपार्श्वे । यद्वा यद्यर्थोक्ता कल्पनेयं । यदिद्वौमाल्यवन्तौ सपक्षौयुध्येयातां तदा तत्सदृशमिदमिति । तेनानुपमत्वंफलति ॥ ४ ॥ स० नालीकाः अव्यर्थीभवन्तश्चते नाराचाश्चतैः । रूढोवा

[पा०] १ ख. ग. ङ. च. छ. ट. किंतु. २ ग. क्षिप्रंच. ३ च. छ. ज. ञ. नमेत्वं. ४ युद्धातिथ्यं. वृन्तादिवेत्यनयोरर्धयोःपौर्वापर्यं ङ.—ट. पाठेषुदृश्यते. ५ क.—ट. यथाप्राणं. ६ घ. फलंपक्वं. ७ ग. घ. ङ. झ. ञ. ट. इत्युक्तः क्रोधताम्राक्षस्तप्त. ८ क. च. ज. क्रोधात्. ९ ख. भूषणः. १० ङ.—ट. महामृधे. ११ ङ. झ. वातोद्धुतयोः. १२ ङ. च. ज. झ. ट. महाबलं.

स तानि शरजालानि गृध्रः पत्ररथेश्वरः ॥ जटायुः प्रतिजग्राह रावणास्त्राणि संयुगे ॥ ६ ॥
तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः ॥ चकार बहुधा गात्रे व्रणान्पतगसत्तमः ॥ ७ ॥
अथ क्रोधाद्दशग्रीवो जग्राह दश मार्गणान् ॥ मृत्युदण्डनिभान्घोराञ्शत्रुमर्दनकाङ्क्षया ॥ ८ ॥
स तैर्बाणैर्महावीर्यः पूर्णमुक्तैरजिह्मगैः ॥ बिभेद निशितैस्तीक्ष्णैर्गृध्रं घोरैः शिलीमुखैः ॥ ९ ॥
स राक्षसरथे पश्यञ्जानकीं बाष्पलोचनाम् ॥ अचिन्तयित्वा तान्बाणान्राक्षसं समभिद्रवत् ॥ १० ॥
ततोस्य सशरं चापं मुक्तामणिविभूषितम् ॥ चरणाभ्यां महातेजा बभञ्ज पतगेश्वरः ॥ ११ ॥
ततोन्यद्धनुरादाय रावणः क्रोधमूर्च्छितः ॥ ववर्ष शरवर्षाणि शतशोथ सहस्रशः ॥ १२ ॥
शरैरावारितस्तस्य संयुगे पतगेश्वरः ॥ कुलायमुपसंप्राप्तः पक्षीव प्रबभौ तदा ॥ १३ ॥
स तानि शरवर्षाणि पक्षाभ्यां च विधूय च ॥ चरणाभ्यां महातेजा बभञ्जास्य महद्धनुः ॥ १४ ॥
तच्चापमसदृशं दीप्तं रावणस्य शरावरम् ॥ पक्षाभ्यां स महावीर्यो व्याधुनोत्पतगेश्वरः ॥ १५ ॥
काञ्चनोरश्छदान्दिव्यान्पिशाचवदनान्खरान् ॥ तस्याश्व जवसंपन्नान्बभञ्ज च समरे बली ॥ १६ ॥
वरं त्रिवेणुसंपन्नं कामगं पावकार्चिषम् ॥ मणिहेमविचित्राङ्गं बभञ्ज च महारथम् ॥ १७ ॥
पूर्णचन्द्रप्रतीकाशं छत्रं च व्यजनैः सह ॥ पातयामास वेगेन ग्राहिभी राक्षसैः सह ॥ १८ ॥
सारथेश्चास वेगेन तुण्डेनैव महच्छिरः ॥ पुनर्व्यपाहरच्छीमान्पक्षिराजो महाबलः ॥ १९ ॥
स भग्नधन्वा विरथो हताश्वो हतसारथिः ॥ अङ्केनादाय वैदेहीं पपात भुवि रावणः ॥ २० ॥
दृष्ट्वा निपतितं भूमौ रावणं भग्नवाहनम् ॥ साधुसाध्विति भूतानि गृध्रराजमपूजयन् ॥ २१ ॥

णिभिः अङ्कुशाग्रशरैः ॥ ५ ॥ पत्ररथेश्वरः पक्षीश्वरः । प्रतिजग्राह सेहे । रावणास्त्राणि रावणप्रयुक्तास्त्राणि ॥ ६ ॥ तस्य रावणस्य गात्रे ॥ ७ ॥ मार्गणान् बाणान् ॥ ८ ॥ पूर्णं आकर्णाकृष्टं यथा तथा मुक्तैः अजिह्मगैः ऋजुगामिभिः । निशितैः शाणोल्लीढैः । अतएव तीक्ष्णैः घोरैः भयङ्करैः । शिलीमुखैः शिलीशल्यं मुखे येषां तैः बाणैः । गृध्रं बिभेद ॥ ९ ॥ समभिद्रवत् समभ्यद्रवत् ॥ १० ॥ सशरं संहितशरं ॥ ११ ॥ क्रोधमूर्च्छितः क्रोधेन व्याप्तः ॥ १२ ॥ आवारितः आसमन्ताद्व्याप्तः । कुलायं नीडं । प्राप्तः पक्षीव बभौ ॥ १३ ॥ तानि च पक्षाभ्यां विधूय चरणाभ्यां धनुर्बभञ्ज चेत्यन्वयः ॥ १४ ॥ शरावरं कवचं पक्षाभ्यां पक्षघातेन । व्याधुनोत् प्राच्यावयत् ॥ १५ ॥ काञ्चनोरश्छदान् स्वर्णमयकवचयुक्तान् । "उरश्छदः कङ्कटको जागरः कवचोऽस्त्रियां" इत्यमरः । बली जटायुः ॥ १६ ॥ त्रिवेणुः युगन्धरः । कामं यथेच्छं गच्छतीति कामगं ॥ १७ ॥ ग्राहिभिः छत्रचामरादिग्राहकैः । "नन्दिग्रहि—" इत्यादिना णिनिः ॥ १८ ॥ व्यपाहरत् खण्डितवान् । पुनरित्यनेन छत्रादिखण्डनं तुण्डेनेति सूच्यते ॥ १९ ॥ भग्नधन्वा "धनुषश्च" इत्यनङ् ॥ २० ॥ अपूजयन् मनसेति शेषः ॥ २१ ॥

नालीकशब्दः । शरविशेषस्तदर्थः ॥ ५ ॥ ति० रावणास्त्राणिरावणक्षिप्तानीतिशरजालविशेषणं । असतेरौणादिकत्रन् । रावणास्त्राणीतिपाठस्त्वसुगमएव ॥ ६ ॥ ती० बाणाजिह्मगशब्दौ गुणवचनौ । बाणयन्तिरोधयन्तिशत्रुमितिबाणाः ॥ ९ ॥ ति० शरासनमितिपाठे शरप्रक्षेपकारणं । तच्च द्वितीयंधनुश्च बभञ्जेत्यन्वयः ॥ व्याधुनोत् कंपयतिस्म । रावणमितिशेषः ॥ १५ ॥ ति० अङ्केन कटिभागेन ॥ २० ॥

[पा०] १ ग. चरणाभ्यामपोथयत्. २ च. छ. ज. त्विहगसत्तमः. ३ घ. क्रुद्धोदशग्रीवो. ४ ङ.—ट. शत्रोर्निधन. ५ ट. रावणरथे. ६ ङ.—ट. बाणांस्तान्. ७ ङ.—ट. पतगोत्तमः. ८ ग. ङ.—ट. अभिसंप्राप्तः. ९ ङ. झ. ट. पक्षिवचबभौ. ख. ग. च. छ. ज. ञ. पक्षीवसबभौ. १० ङ. झ. ट. शरजालानि. ११ ग. घ. च. ज.—ट. तुविधूयह. १२ ख. च. ज. शरासनं. १३ ङ.—ट. पक्षाभ्यांच. १४ ङ. झ. ञ. ट. महातेजाः. १५ झ. व्यधुनोत्. १६ ङ. झ. ट. अथत्रिवेणु. १७ ङ. झ. मणिसोपानचित्राङ्गं. १८ ख. च. छ. ज. ञ. बभञ्जाथ. १९ घ. खस्य. २० ङ. झ. ट. तुण्डेनच. २१ ग. ञ. छ. झ. व्यपहृत्. २२ घ. भग्नधन्वास.

परिश्रान्तं तु तं दृष्ट्वा जरया पक्षियूथपम् ॥ उत्पपात पुनर्हृष्टो मैथिलीं गृह्य रावणः ॥ २२ ॥
तं प्रहृष्टं निधायाङ्के गच्छन्तं जनकात्मजाम् ॥ गृध्रराजः समुत्पत्य समभिद्रुत्य रावणम् ॥
समावार्य महातेजा जटायुरिदमब्रवीत् ॥ २३ ॥
वज्रसंस्पर्शबाणस्य भार्यां रामस्य रावण ॥ अल्पबुद्धे हरस्वेनां वधाय खलु रक्षसाम् ॥ २४ ॥
समित्रबन्धुः सामात्यः सबलः सपरिच्छदः ॥ विषपानं पिबस्वेतत्पिपासित इवोदकम् ॥ २५ ॥
अनुबन्धमजानन्तः कर्मणामविचक्षणाः ॥ शीघ्रमेव विनश्यन्ति यथा त्वं विनशिष्यसि ॥ २६ ॥
बद्धस्त्वं कालपाशेन क गतस्तस्य मोक्ष्यसे ॥ वधाय बडिशं गृह्य सामिषं जलजो यथा ॥ २७ ॥
न हि जातु दुराधर्षौ काकुत्स्थौ तव रावण ॥ धर्षणं चाश्रमस्थास्य क्षमिष्येते तु राघवौ ॥ २८ ॥
यथा त्वया कृतं कर्म भीरुणा लोकगर्हितम् ॥ तस्करेणेव तस्करो मार्गो नैष वीरनिषेवितः ॥ २९ ॥
युध्यस्व यदि शूरोसि मुहूर्तं तिष्ठ रावण ॥ शयिष्यसे हतो भूमौ यथा भ्राता खरस्तथा ॥ ३० ॥
परेतकाले पुरुषो यत्कर्म प्रतिपद्यते ॥ विनाशायात्मनोऽधर्म्यं प्रतिपन्नोसि कर्म तत् ॥ ३१ ॥
पापानुबन्धो वै यस्य कर्मणः कर्म को नु तत् ॥ कुर्वीत लोकाधिपतिः स्वयंभूर्भगवानपि ॥ ३२ ॥
एवमुक्त्वा शुभं वाक्यं जटायुस्तस्य रक्षसः ॥ निपपात भृशं पृष्ठे दशग्रीवस्य वीर्यवान् ॥ ३३ ॥
तं गृहीत्वा नखैस्तीक्ष्णैर्विरराद समन्ततः ॥ अधिरूढो गजारोहो यथा स्याद्दुष्टवारणम् ॥ ३४ ॥

गृह्य गृहीत्वा ॥ २२ ॥ तमित्यादिसार्धश्लोक एकान्वयः । समुत्पत्य ऊर्ध्वं गत्वा । समभिद्रुत्य अभिमुखं गत्वा । समावार्य सम्यगवरुध्य ॥ २३ ॥ वज्रसंस्पर्शाः वज्रसमस्पर्शाः बाणाः यस्य ॥ २४ ॥ पीयत इति पानं पानकरसादि । विषयुक्तं पानमिति मध्यमपदलोपिसमासः । यद्वा । विषस्य पानं विषपानं । एतत्सीताहरणरूपं विषपानं पिबसि करोषि । ओदनपाकं पचतीतिवत् प्रकृतेः प्रत्ययोपस्थानमात्रं प्रयोजनं ॥ २५ ॥ अनुबध्यत इत्यनुबन्धः फलं । अविचक्षणाः असमर्थाः । कर्मणां आत्मना क्रियमाणानां । फलमजानन्तः शीघ्रं विनश्यन्ति । तत्रोदाहरणं भवानित्याह—यथेति ॥ २६ ॥ कालपाशेन बद्धस्त्वं क देशे गतः सन् तस्य तस्मात्कालपाशान्मोक्ष्यसे सहानुवर्तमानाद्बन्धात्क्वयं ते मुक्तिर्भविष्यतीत्यर्थः । सामिषं मांससहितं । बडिशं मत्स्यबन्धनं । "बडिशं मत्स्यबन्धनं" इत्यमरः । आमिषलोभेन गृह्य गृहीत्वा । जलजो मत्स्यो यथा देशान्तरं गतोपि न जीवति बडिशामोक्षणात् तद्वत् ॥ २७ ॥ आश्रमकर्मैकं त्वत्कर्तृकं धर्षणं परिभवं । आश्रमशब्देन आश्रमस्था सीतोच्यते । मन्थाःक्रोशन्तीतिवत् ॥ २८ ॥ लोकगर्हितं कर्म भीरुणा त्वया यथा कृतं तथा तस्करावरितो मार्गः । तस्करकृत्यतुल्यं त्वत्कृत्यमित्यर्थः । तस्मादेष मार्गः वीरनिषेवितो न भवतीत्यर्थः ॥ २९ ॥ युध्यस्वेति पूर्वसर्गान्ते व्याख्यातोयं ॥ ३० ॥ परेतकाले मृत्युकालइत्यर्थः । यत्कर्म यादृशं कर्म । पुरुषः आत्मविनाशाय प्रतिपद्यते प्राप्नोति । अधर्म्यं अधर्मादनपेतं । तत्कर्म सीताहरणरूपं प्रतिपन्नोसि । एतादृशकर्मकरणादवश्यमविलम्बितं मृत्युं प्राप्नोषीत्यर्थः ॥ ३१ ॥ यस्य कर्मणः पापानुबन्धः पापफलसंबन्धो भवति तत्कर्म लोकाधिपतित्वादिविशिष्टोपि को नु कुर्वीत ॥ ३२ ॥ पृष्ठ इत्यनेन जटायुषमनादृत्य रावणस्य पलायमानत्वं गम्यते ॥ ३३ ॥ तं गृहीत्वा पलायनवर्त्याधिरूढः सन् जटायुः गजारोहो यन्ता दुष्टवारणं पलायितं अङ्कुशैर्निरुध्य यथाविदारयति तथा नखैः

ति० सबलः सचतुरङ्गबलः । परिच्छदः दासीदासादि । निदर्शनालङ्कारोत्र । तत्सहितो नशिष्यसीतितात्पर्यम् ॥ २५ ॥ ति० दुष्टवारणमधिरूढो गजारोहो हास्तिपको गजविषयेयथास्यात् यादृशव्यापारोभवेत् गजक्षतकरणव्यापारोभवेत् तथा ॥ ३४ ॥

[पा०] १ क. ख. ट. रावणंजनकात्मजां. एतदनन्तरं. गच्छन्तंखड्गशेषंच प्रनष्टहतसाधनं, इत्यर्धमधिकंदृश्यते. २ क.—ट. रावणंसमभिद्रुत्य. ३ क. ङ.—ज. ञ. समावार्यं. ४ क.—ड. कोनुतत्समान्. ५ ग. भगवानिव. ६ ख. ग. च.—ट. विंददार.

विरराद नखैरस्य तुण्डं पृष्ठे समर्पयन् ॥ केशांश्चोत्पाटयामास नखपक्षमुखायुधः ॥ ३५ ॥
स तथा गृध्रराजेन क्लिश्यमानो मुहुर्मुहुः ॥ अमर्षस्फुरितोष्ठः सन्प्राकम्पत स रावणः ॥ ३६ ॥
स परिष्वज्य वैदेहीं वामेनाङ्केन रावणः ॥ तलेनाभिजघानाशु जटायुं क्रोधमूर्च्छितः ॥ ३७ ॥
जटायुस्तमभिक्रम्य तुण्डेनास्य खगाधिपः ॥ वामबाहून्दश तदा व्यपाहरदरिंदमः ॥ ३८ ॥
संच्छिन्नबाहोः सद्यैव बाहवः सहसाऽभवन् ॥ विषज्वालावलीयुक्ता वल्मीकादिव पन्नगाः ॥३९॥
ततः क्रोधाद्दशग्रीवः सीतामुत्सृज्य रावणः ॥ मुष्टिभ्यां चरणाभ्यां च गृध्रराजमपोथयत् ॥ ४० ॥
ततो मुहूर्तं संग्रामो बभूवातुलवीर्ययोः ॥ राक्षसानां च मुख्यस्य पक्षिणां प्रवरस्य च ॥ ४१ ॥
तस्य व्यायच्छमानस्य रामस्यार्थे स रावणः ॥ पक्षौ पार्श्वौ च पादौ च खड्गमुद्धृत्य सोच्छिनत् ॥४२॥
स च्छिन्नपक्षः सहसा रक्षसा रौद्रकर्मणा ॥ निपपात हतो गृध्रो धरण्यामल्पजीवितः ॥ ४३ ॥
तं दृष्ट्वा पतितं भूमौ क्षतजार्द्रं जटायुषम् ॥ अभ्यधावत वैदेही स्वबन्धुमिव दुःखिता ॥ ४४ ॥

तं नीलजीमूतनिकाशकल्पं सुपाण्डुरोरस्कमुदारवीर्यम् ॥
ददर्श लङ्काधिपतिः पृथिव्यां जटायुषं शान्तमिवाग्निदावम् ॥ ४५ ॥
ततस्तु तं पत्ररथं महीतले निपातितं रावणवेगमर्दितम् ॥
पुनः परिष्वज्य शशिप्रभानना रुरोद सीताजनकात्मजा तदा ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

विरराद । स्यादिति संभावनायां ॥ ३४ ॥ नखपक्षमुखायुधो गृध्रः अस्य रावणस्य पृष्ठे नखैः सह तुण्डं समर्पयन् व्यापारयन्सन् । विरराद व्यदारयदित्यर्थः । केशांश्चोत्पाटयामास ॥३५॥ अमर्षेण क्रोधेन । स्फुरितोष्ठः चलितोष्ठः । प्राकम्पत प्रहारार्थं प्रदक्षिणं प्राचलदित्यर्थः॥३६॥ अङ्केन ऊरुभागेन । जटायुं जटायुरित्युकारान्तोप्यस्ति ॥ ३७ ॥ अभिक्रम्य अभितोगत्वा । अवसरंप्रतीक्ष्येत्यर्थः । अस्य वामबाहून् यैःसीतापरिष्वक्ता तानित्यर्थः । व्यपाहरत् अच्छिनत् ॥ ३८ ॥ संछिन्नबाहोः रावणादिति शेषः । सद्यैवेत्यार्षे सलोपे वृद्धिः । अभवन् प्रादुरभवन् । विषज्वालेत्युपमानविशेषणाद्बाहूनांसायुधत्वं गम्यते ॥ ३९ ॥ अपोथयत् अताडयत् ॥ ४० ॥ संग्रामो युद्धं ॥ ४१ ॥ व्यायच्छमानस्य व्यायामं कुर्वतः । "आङोयमहनः" इत्यात्मनेपदं "शरीरायासजनकं कर्मव्यायामउच्यते" इति वाग्भटः । युद्धं कुर्वतः इत्यर्थः । पार्श्वौ पक्षमूले ॥ ४२ ॥ अल्पजीवितः द्वित्रिक्षणावस्थानोचितप्राण इत्यर्थः ॥ ४३ ॥ क्षतजं शोणितं ॥ ४४ ॥ नीलजीमूतनिकाशकल्पं नीलमेघप्रकाशतुल्यं । अग्निदावं दावाग्निं ॥ ४५ ॥ परिष्वज्य बाहुभ्यामिति शेषः ॥ ४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकपञ्चाशः सर्गः ॥ ५१ ॥

स० अग्निदावं अग्निषुदावं दावाग्निमिव ॥ ३५ ॥ ती० सर्गफलश्रुतिःस्कान्दे—श्रुत्वाखगेश्वरस्यापि रक्षसामीश्वरस्य च । आयोधनमृणान्मुक्तो मृत्यस्स्वामिकृताद्भवेत् ॥ इत्येकपञ्चाशस्सर्गः ॥ ५१ ॥

[पा०] १ ख. च. छ. ज. ञ. विददारनखैस्तुण्डंतस्य. घ. ङ. झ. ट. विंददार. २ तदा. ३ ख. ट. च. राक्षसः. ४ ख. परिष्वज्यच. क. घ. ङ. च. ज.—ट. संपरिष्वज्य. ५ क.—ट. जघानार्तो. ६ क. ख. ङ. झ. ञ. ट. मतिक्रम्य. ७ क. घ. ङ. छ. झ. ञ. ट. सद्योवै. ८ क. ख. ङ.—ट. वीर्यवान्. ९ ख. च. छ. ज. ञ. स्यार्थेऽप. १० ङ. छ. झ. ट. पादौच. पार्श्वौच. ११ घ. मुद्यम्य. १२ च. छ. ज. ञ. घोरकर्मणा. १३ ङ. झ. ट. महागृध्रो. छ. ततोगृध्रो. १४ ङ. झ. ट. पुनश्चसंगृह्य.

द्विपञ्चाशः सर्गः ॥ ५२ ॥

जटायुंप्रतिरामलक्ष्मणयोः स्ववृत्तान्तनिवेदनावधिप्राणधारणरूपवरदानपूर्वकं तदङ्गपरामर्शेन परिदेवयमानांसीतामेत्य रावणेनपुनःकेशग्रहणेन तदपहरणपूर्वकं गगनमार्गेणगमनम् ॥ १ ॥ तदानीं हरिणादिप्राणिगणैरावणगर्हणपूर्वकं दुःखात्परिदेवनम् ॥ २ ॥ रावणस्यगतेर्वेगात्सीताङ्गेभ्योहारनूपुराद्याभरणानांधरणीतलेपरिभ्रंशनम् ॥ ३ ॥

तमल्पजीवितं गृध्रं स्फुरन्तं राक्षसाधिपः ॥ ददर्श भूमौ पतितं समीपे राघवाश्रमात् ॥ १ ॥
सा तु ताराधिपमुखी रावणेन समीक्ष्य तम् ॥ गृध्रराजं विनिहतं विललाप सुदुःखिता ॥ २ ॥
आलिङ्ग्य गृध्रं निहतं रावणेन बलीयसा ॥ विललाप सुदुःखार्ता सीता शशिनिभानना ॥ ३ ॥
निमित्तं लक्षणज्ञानं शकुनिस्वरदर्शनम् ॥ अवश्यं सुखदुःखेषु नराणां प्रतिदृश्यते ॥ ४ ॥
नूनं राम न जानासि महद्व्यसनमात्मनः ॥ धावन्ति नूनं काकुत्स्थं मदर्थं मृगपक्षिणः ॥ ५ ॥
अयं हि पापचारेण मां त्रातुमभिसंगतः ॥ शेते विनिहतो भूमौ ममाभाग्याद्विहंगमः ॥ ६ ॥
[रावणेन हृतां मां हि कथयित्वा विहंगम ॥ राघवाभ्यां यथातत्त्वमथो हास्यसि जीवितं ॥ ७ ॥
आदेहपातं पक्षीश युध्यता रावणेन यत् ॥ त्वया विदर्शितस्नेहौ श्वशुरे मम राघवौ ॥ ८ ॥
जटायो हरणं यावन्मम रामाय वक्ष्यसि ॥ तावच्छरीरे ते प्राणाः संचरिष्यन्ति धीरपि ॥ ९ ॥
इति पक्षिं समालिङ्ग्य स्मृत्वा श्वशुरमेव च ॥ उच्चैस्स्वरेण चुक्रोश हा राघव न पश्यसि] ॥ १० ॥
त्राहि मामद्य काकुत्स्थ लक्ष्मणेति वराङ्गना ॥ सुसंत्रस्ता समाक्रन्दच्छृण्वतां तु यथाऽन्तिके ॥ ११ ॥
तां क्लिष्टमाल्याभरणां विलपन्तीमनाथवत् ॥ अभ्यधावत वैदेहीं रावणो राक्षसाधिपः ॥ १२ ॥

जटायुर्युद्धकाले विसृष्टायाः सीतायाः पुनरपि रावणेन हरणप्रकारमाह । राघवाश्रमादित्यवधित्वात्पञ्चमी ॥ १ ॥ रावणेन विनिहतं समीक्ष्येत्यन्वयः ॥ २ ॥ विशेषान्तरं वक्तुं पुनरनुवदति—आलिङ्ग्येति । कराभ्यांसंस्पृश्येत्यर्थः ॥ ३ ॥ लक्षणानि अक्षिस्पन्दनादीनि तेषां ज्ञानं । शकुनीनां पिङ्गल्यादीनां स्वरस्य दर्शनं ज्ञानं । नराणां सुखदुःखेषु निमित्तं ज्ञापकं प्रतिदृश्यते ॥ ४ ॥ ततःकिमित्यत्राह—नूनमिति । हे राम आत्मनो महद्व्यसनं न जानासि किमिति काकुः । जानास्येव । यस्मान्मदर्थं मदपहरणसूचनप्रयोजनमुद्दिश्य । मृगपक्षिणः काकुत्स्थं त्वामभिधावन्ति । नूनं संप्रतिमद्व्यसनसूचका मृगपक्षिणः काकुत्स्थंत्वामभिधावन्ति । तेन निमित्तेन मद्व्यसनं जानास्येवेत्यर्थः ॥ ५ ॥ व्यसनमेवाह—अयं हीति । अयं विहङ्गमः । पापचारेण रावणेन । विनिहतः शेते ॥ ६—१० ॥ शृण्वतामन्तिकेयथा शृण्वतांसमीप इव । दूरस्थितं रामं लक्ष्मणं च रामेति लक्ष्मणेति च संबोध्य आक्रन्दत् ॥ ११ ॥ क्लिष्टमाल्याभरणां मृदितमाल्याभरणां । क्षणंविश्रान्तः अभ्यधावत

ती० अन्येतु—निमित्तंलक्षणंज्ञानमितिपाठमङ्गीकृत्यएवंव्याचक्षते । निमित्तं गोमाय्वादिकं । लक्षणं अङ्गस्पन्दनादिकं । ज्ञानं यदृच्छयातथाप्रतिभासः ॥ ति० नराणांसुखदुःखेषुनिमित्तं सूचनं वामदक्षिणाङ्गस्पन्दनादिरूपंलक्षणं चिह्नं । तथाजलादर्शादावात्मनोशिरसोदर्शनंचलक्षणं । स्वप्नं "स्वप्नेयःपुरुषंकृष्णंकृष्णदन्तंप्रपश्यति । सएनंहन्ति" इत्यादिस्वप्नाध्यायोपदिष्टं । तथाशकुनीनां वामदक्षिणगमनविशेषदर्शनं । तथातेषांस्वराणांदर्शनमनुभवः । एतत्सर्वंयथायोगंपरिदृश्यतेसर्वेण । लक्षणज्ञानमिति पाठे अङ्गस्फुरणादिज्ञानमित्यर्थः । शकुनिग्रहणंमृगाद्युपलक्षणं ॥ ४ ॥ ति० मदर्थंमृगपक्षिणोशुभसूचनमार्गेणधावन्ति । त्वंतु तैस्सूचितमपिस्वस्यमहद्व्यसनंनजानासिनूनं । जानीथाश्चेत्रोपेक्षेथाइतितात्पर्यमितिलोकाभिनयेनरामोपालंभः ॥ ५ ॥ ति० यथान्तिकेनिकटस्थितानांशृण्वतांश्रवणंभवेत्तथासमाक्रन्दत् नतूच्चैः । शीघ्रंरामागमनंमाभूदितितात्पर्येण ॥ ११ ॥

[पा०] १ अत्रत्यौप्रथमतृतीयौश्लोकौ झ. ञ. ट. पुस्तकेषुनदृश्येते. २ क. ख. च. छ. ज. ञ. भूमौ. ३ क. ख. च. छ. ज. ञ. गृध्रं. ४ झ. लक्षणंस्वप्नं. ५ क. च.—ञ. संप्रदृश्यते. झ. ट. परिदृश्यते. ६ झ. ञ. ट. काकुत्स्थ. ७ क. ग. ञ. ट. पापाचारेण. ख. ङ. झ. कृपयाराममांत्रातुं. ८ ख. ङ. झ. ट. मिहसंगतः. ९ इदंश्लोकचतुष्टयं ख. पाठेदृश्यते.

तां लतामिव वेष्टन्तीमालिङ्गन्तीं महाद्रुमान् ॥ मुञ्चमुञ्चेति बहुशः प्रवदन्राक्षसाधिपः ॥ १३ ॥
क्रोशन्तीं रामरामेति रामेण रहितां वने ॥ जीवितान्ताय केशेषु जग्राहान्तकसन्निभः ॥ १४ ॥
प्रधर्षितायां सीतायां बभूव सचराचरम् ॥ जगत्सर्वममर्यादं तमसाऽन्धेन संवृतम् ॥ १५ ॥
न वाति मारुतस्तत्र निष्प्रभोऽभूद्दिवाकरः ॥ १६ ॥
दृष्ट्वा सीतां परामृष्टां दीनां दिव्येन चक्षुषा ॥ कृतं कार्यमिति श्रीमान्व्याजहार पितामहः ॥ १७ ॥
प्रहृष्टा व्यथिताश्चासन्सर्वे ते परमर्षयः ॥ दृष्ट्वा सीतां परामृष्टां दण्डकारण्यवासिनः ॥
रावणस्य विनाशं च प्राप्तं बुद्ध्वा यदृच्छया ॥ १८ ॥
स तु तां रामरामेति रुदन्तीं लक्ष्मणेति च ॥ जगामादाय चाकाशं रावणो राक्षसेश्वरः ॥ १९ ॥
तप्ताभरणवर्णाङ्गी पीतकौशेयवासिनी ॥ रराज राजपुत्री तु विद्युत्सौदामिनी यथा ॥ २० ॥
उद्धूतेन च वस्त्रेण तस्याः पीतेन रावणः ॥ अधिकं प्रतिबभ्राज गिरिर्दीप्त इवाग्निना ॥ २१ ॥
तस्याः परमकल्याण्यास्ताम्राणि सुरभीणि च ॥ पद्मपत्राणि वैदेह्या अभ्यकीर्यन्त रावणम् ॥ २२ ॥
तस्याः कौशेयमुद्धूतमाकाशे कनकप्रभम् ॥ बभौ चादित्यरागेण ताम्रमभ्रमिवातपे ॥ २३ ॥
तस्यास्तत्सुनसं वक्त्रमाकाशे रावणाङ्कगम् ॥ न रराज विना रामं विनालमिव पङ्कजम् ॥ २४ ॥
बभूव जलदं नीलं भित्त्वा चन्द्र इवोदितः ॥ सुललाटं सुकेशान्तं पद्मगर्भाभमव्रणम् ॥ २५ ॥

अभ्यधावत् ॥ १२ ॥ तामित्यादि द्वावेकान्वयौ । लतामिव भूतले वेष्टन्तीं वेष्टमानां ॥ १३—१४ ॥ अमर्यादं भिन्नसत्त्वप्रकृतिकं । अन्धेन गाढेन । तमसा अज्ञानान्धकारेण । तदा जगत्सर्वं संवृतं विमूढं चासीदित्यर्थः ॥ १५ ॥ न वातीत्यर्धमेकं वाक्यं ॥ १६ ॥ परामृष्टां अपहृतां । दिव्येन चक्षुषा ज्ञानेन । दृष्ट्वा ज्ञात्वा । कार्यं बालकाण्डे विष्णुना प्रतिज्ञातं । कृतमिति व्याजहार । प्रीत्यतिशयेन पुरुषान्तरासन्निधानेप्युदाहरत् ॥ १७ ॥ प्रहृष्टाइति रावणवधस्य सिद्धप्रायत्वेन हर्षः । तादात्विकसीतादशावलोकनेन व्यथा । सीतां परामृष्टां दृष्ट्वा । यदृच्छया दैवगत्या । रावणस्य प्राप्तं सन्निहितं विनाशं च बुद्ध्वा व्यथिताः प्रहृष्टाश्चासन्नित्यन्वयः ॥ १८ ॥ सत्विति तुशब्देन ऋष्यादिभ्यो व्यावृत्तिः ॥ १९ ॥ तप्ताभरणं तप्तं काञ्चनाभरणं तत्तुल्यवर्णाङ्गी । विद्युत् विशेषेण द्योतमाना । सौदामिनी तटित् । अनेन तटिद्यथा मेघे क्षणं तिष्ठति तथा रावणे सीतेति सूचितम् ॥ २० ॥ उद्धूतेति । अत्रापि सीताग्रहणेन रावणस्य संतापो भविष्यतीत्यलंकारेण वस्तुध्वनिः ॥ २१ ॥ रावणमभ्यकीर्यन्त रावणाङ्के पतितानीत्यर्थः । अत्र रावणैश्वर्यं क्षणाद्विशीर्णं भविष्यतीति वस्तुना वस्तुध्वनिः ॥ २२ ॥ आतपे मध्याह्ने । आदित्यरागेण ताम्रं अरुणमभ्रमिव बभौ । अनेन रावणविनाशपिशुनोत्पातः सूचितः ॥ २३ ॥ "उपसर्गाच्च" इति नासिकाशब्दान्ताद्बहुव्रीहेरच्समासान्तः । नासिकाशब्दस्य नसादेशश्च । अत्र सीताया मुखविवर्णत्वोक्त्या स्वेदातिशय उच्यते ॥ २४ ॥ अथ त्वरितगमनमाह—बभूवेति । अत्र मुखमिति शेषः । जलदं भित्त्वा उदितः प्रकाशमानश्चन्द्र इव । मेघरन्ध्रे भासमान इत्यर्थः । अत्र प्रतिचन्द्रदर्शनरूपोत्पातः सूच्यते । पद्मगर्भाभं विकसितपद्माभमित्यर्थः ।

ति० वेष्टन्तीं लतामिववृक्षानालिङ्गन्तीं मामुञ्चमुञ्चेति बहुशोवृक्षान्वदन्तीमितिशेषः । मोचयमोचयेत्यर्थोवा । प्रप्र इतस्ततोधावन्तीं समीपगतआसीत् ॥ १३ ॥ ति० जीवितान्ताय अनेन परस्त्रीकेशस्पर्शो यस्यकस्यापि जीवितापहारीतिबोधितं ॥ १४ ॥ ति० सुदाम्नोबहुरत्नादिमत्त्वात्तद्भवाविद्युदतिप्रकाशमानाभवति तद्वत्सीतेत्यर्थः ॥ २० ॥ ती० तरुप्रवालरत्नेतिपाठे प्रवालसदृशरत्ना ॥ २१ ॥

[पा०] १ ङ. झ. ट. प्रापतांराक्षसाधिपः. २ क. ख. ग. ङ.—ट. वैदेह्यां. ३ क. ख. दीनां. घ. हितां. ४ क. ख. घ. सीतां. ङ. छ. झ. ञ. ट. देवोदिव्येन. ५ ग. दृष्ट्वा. ६ क. ख. ग. च. छ. ज. ञ. जगामाकाशमादाय. ७ क.—घ. च. ज. ञ. सर्वाङ्गी. ८ क. पुत्रीसा. ९ क. ख. ग. ङ.—ट. परिबभ्राज. १० ग. च. छ. ञ. अवाकीर्यन्त. ११ क. ख. ग. ङ.—ट. स्तद्विमलं. १२ च. छ. ज. भित्त्वानीलं.

शुक्लैः सुविमलैर्दन्तैः प्रभावद्भिरलंकृतम् ॥ तस्यास्तद्विमलं वक्त्रमाकाशे रावणाङ्गनम् ॥ २६ ॥
रुदितं व्यपमृष्टाक्षं चन्द्रवत्प्रियदर्शनम् ॥ सुनासं चारु ताम्रोष्ठमाकाशे हाटकप्रभम् ॥ २७ ॥
राक्षसेन समाधूतं तस्यास्तद्वदनं शुभम् ॥ शुशुभे न विना रामं दिवा चन्द्र इवोदितः ॥ २८ ॥
सा हेमवर्णा नीलाङ्गं मैथिली राक्षसाधिपम् ॥ शुशुभे काञ्चनी काञ्ची नीलं मणिमिवाश्रिता ॥ २९ ॥
सा पद्मगौरी हेमाभा रावणं जनकात्मजा ॥ विद्युद्घनमिवाविश्य शुशुभे तप्तभूषणा ॥ ३० ॥
तरुप्रवालरक्ता सा नीलाङ्गं राक्षसेश्वरम् ॥ प्राशोभयत वैदेही गजं कक्ष्येव काञ्चनी ॥ ३१ ॥
तस्या भूषणघोषेण वैदेह्या राक्षसाधिपः ॥ बभौ सचपलो नीलः सघोष इव तोयदः ॥ ३२ ॥
उत्तमाङ्गाच्युता तस्याः पुष्पवृष्टिः समन्ततः ॥ सीतायाः ह्रियमाणायाः पपात धरणीतले ॥ ३३ ॥
सा तु रावणवेगेन पुष्पवृष्टिः समन्ततः ॥ समाधूता दशग्रीवं पुनरेवाभ्यवर्तत ॥ ३४ ॥
अभ्यवर्तत पुष्पाणां धारा वैश्रवणानुजम् ॥ नक्षत्रमाला विमला मेरुं नगमिवोत्तमम् ॥ ३५ ॥
चरणाभ्यूरुं भ्रष्टं वैदेह्या रत्नभूषितम् ॥ विद्युन्मण्डलसङ्काशं पपात मधुरस्वनम् ॥ ३६ ॥

अत्रर्ण निर्दोषं ॥ २५ ॥—शुक्लैरिति । न शुशुभ इति वक्ष्यमाणमनुषज्यते । रावणाङ्गनं सत् न शुशुभे । अननुरूपत्वादिति भावः ॥ २६ ॥ रुदितं रोदनयत् । अतएव व्यपमृष्टाक्षं अनियुक्ताक्षुकं । हाटकप्रभं हिरण्यप्रभं "हिरण्यं हेम हाटकं" इत्यमरः । पूर्वं मनोज्ञं मुखं इदानीं रुदितादिमत्त्वात्कथं शुशुभ इति भावः ॥२७॥ राक्षसेन निमित्तेन समाधूतं भयकम्पितं ॥ २८ ॥ राक्षसाधिपमाश्रिता सा सीता नीलं मणिमाश्रिता काञ्चनी काञ्चनमयी । काञ्ची मेखलेव शुशुभे । रजतमेव नीलस्य परभागकरमिति प्रसिद्धिः । तेन काञ्चनस्य नीलमणिशोभातिरस्कारकत्वात् शुशुभ इति व्यतिरेकोक्त्या न शुशुभ इत्यर्थः । नेत्यनुषङ्गो वा ॥ २९ ॥ पद्मगौरी पद्मवत्पीतवर्णा । अनेन सुकुमारवर्णतोक्ता । हेमाभेत्यनेन स्थिरवर्णतोक्ता । तप्तभूषणा तपनीयभूषणा । विद्युदिव सीता तस्मिन् क्षणं स्थितापि सौहृदं नाकार्षीत्यर्थः ॥ ३० ॥ तरुविशेषप्रवालवत् रक्ता पीतवर्णा । "तेन रक्तं रागात्" इत्यत्र रागशब्दोहि वर्णमात्रे प्रयुक्तः । कक्ष्या हस्तबन्धनी । यथा कक्ष्या गजगता गजं यन्तुर्निग्राह्यं करोति तथेयं रावणं प्राप्य रामनिग्राह्यमकरोदिति भावः ॥ ३१ ॥ सचपलः सविद्युत् । यथा सगर्जितो मेघ आशु निस्सारो भविष्यति तथेति भावः ॥ ३२ ॥ उत्तमाङ्गात् शिरसः ॥३३॥ सा पुष्पवृष्टिः रावणवेगेन रावणवेगजनितवातेन । समाधूता पुनर्दशग्रीवमेव अभ्यवर्तत अभितः प्रावर्तिष्ट । अनेन रावणस्य खरितगमनमुक्तम् ॥ ३४ ॥ उक्तां पुष्पवृष्टिं वर्णयति—अभ्यवर्ततेति । धारा पङ्क्तिः ॥ ३५ ॥ चरणादिति वामचरणादित्यर्थः । भ्रष्टं शिथिलं पपात ॥ ३६ ॥

ति० अभूत्सचपलोनीलइतिपाठे चपला विद्युत् । तयासहितोघोषवान्मेघइवाभूदित्यर्थः ॥ ३२ ॥ ति० उत्तमाङ्गेति । मातस्तया संपादितोसन्मनोरथइति हर्षादेवैः क्रियमाणापुष्पवृष्टिस्तदुत्तमाङ्गाच्युता तत्कालेभूमौपपातेतिकतकः । वस्तुतोरावणसंनिधौ देवानांतयावीर्यांशंभवात् उत्तमाङ्गे धृतपुष्पाणां तद्वेगेन ततस्खल्या उत्तमाङ्गाच्युतेत्युक्तं । अतएवाग्रे भूमौपुष्पयुतंमार्गंदृष्ट्वा रामोवक्ष्यति— "अभिजानाम्यहंपुष्पाण्येतानीमानीहलक्ष्मण । अपिनद्धानिवैदेह्यामयादस्तानिकानने" इति ॥ ३३ ॥

[पा०] १ क. ख, ग. च. छ. ज. ञ. स्तस्सुनसं. क. झ. ट. स्सुनयनं. २ क. ग. सुनेत्रं. ३ ख. च. छ. ज. ञ. चारुदन्तोष्ठं. ४ क.—ट. राक्षसेन्द्रसमा. ५ ख. नीलाभं. ६ क. च. छ. झ. ञ. ट. गजमिवा. ७ क. झ. ट. पद्मपीता. ग. पद्मगौरा. ८ अयंश्लोकः क.—ट. पुस्तकेषु. चरणाभ्यूरुमितिश्लोकात्परं तांमहोल्कामितिश्लोकात्पूर्वंदृश्यते. ९ क. ख. ग. ङ.—ट. राक्षसेश्वरः. १० क. ख. ङ.—ट. बभूवविमलो. ११ ग. ङ.—झ. ट. उत्तमाङ्गच्युता. १२ ख. पृथिवीतले. १३ ख. रेवाभ्यघावत. घ. रेवाभ्यवर्षत. १४ च. छ. ज. ञ. मेरुशृङ्गमिवोत्तमं. ख. ग. ङ. झ. ट. मेरुंनगमिवोत्तमं. १५ क. झ. ट. चरणीतले. ख. ञ. मधुरस्वरं.

तां महोल्कामिवाकाशे दीप्यमानां स्वतेजसा ॥ जहाराकाशमाविश्य सीतां वैश्रवणानुजः ॥ ३७ ॥
तस्यास्तान्यग्निवर्णानि भूषणानि महीतले ॥ सघोषाण्यवकीर्यन्त क्षीणास्तारा इवाम्बरात् ॥ ३८ ॥
तस्यास्स्तनान्तराद्भ्रष्टो हारस्ताराधिपद्युतिः ॥ वैदेह्या निपतन्भाति गङ्गेव गगनाच्च्युता ॥ ३९ ॥
उत्पन्नवाताभिहता नानाद्विजगणायुताः ॥ मा भैरिति विधूताग्रा व्याजह्रुरिव पादपाः ॥ ४० ॥
नलिन्यो ध्वस्तकमलास्त्रस्तमीनजलेचराः ॥ सखीमिव गतोच्छ्वासामन्वशोचन्त मैथिलीम् ॥ ४१ ॥
समन्तादभिसंपत्य सिंहव्याघ्रमृगद्विजाः ॥ अन्वधावंस्तदा रोषात्सीतां छायानुगामिनः ॥ ४२ ॥
जलप्रपातास्रमुखाः शृङ्गैरुच्छ्रितबाहवः ॥ सीतायां ह्रियमाणायां विक्रोशन्तीव पर्वताः ॥ ४३ ॥
ह्रियमाणां तु वैदेहीं दृष्ट्वा दीनो दिवाकरः ॥ प्रतिध्वस्तप्रभः श्रीमानासीत्पाण्डरमण्डलः ॥ ४४ ॥
नास्ति धर्मः कुतः सत्यं नार्जवं नानृशंसता ॥ यत्र रामस्य वैदेहीं भार्यां हरति रावणः ॥
इति सर्वाणि भूतानि गणशः पर्यदेवयन् ॥ ४५ ॥
वित्रस्तका दीनमुखा रुरुदुर्मृगपोतकाः ॥ उद्वीक्ष्योद्वीक्ष्य नयनैरास्रपाताविलेक्षणाः ॥ ४६ ॥
सुप्रवेपितगात्राश्च बभूवुर्वनदेवताः ॥ विक्रोशन्तीं दृढं सीतां दृष्ट्वा दुःखं तथा गताम् ॥ ४७ ॥
तां तु लक्ष्मण रामेति क्रोशन्तीं मधुरस्वरम् ॥ अवेक्षमाणां बहुशो वैदेहीं धरणीतलम् ॥ ४८ ॥
स तामाकुलकेशान्तां विप्रमृष्टविशेषकाम् ॥ जहारात्मविनाशाय दशग्रीवो मनस्विनीम् ॥ ४९ ॥

उत्पातसूचकातारा महोल्का ॥ ३७ ॥ भूषणानि उपात्तनूपुरादिभिन्नानि ॥ ३८ ॥ भाति भातिस्म ॥ ३९ ॥ उत्पन्नेति रावणवेगोत्पन्नेत्यर्थः । वातकम्पिताग्रत्वात् । पक्षिगणरववत्त्वाच्च विधूताग्राः आश्वासनाय चलितशिरसः सन्तः । मा भैरिति व्याजह्रुरिव ॥ ४० ॥ गतोच्छ्वासां गतप्राणां मूर्च्छितामिति यावत् । तादृशीं सखीमिव मैथिलीमुद्दिश्य अशोचन्त अशोचन् । ध्वस्तकमलाः कान्तिहीना इत्यर्थः । त्रस्ताः भीताः मीनाः मत्स्याः जलेचराः नक्रादयश्च यासु ताः । त्रस्तेत्यादिना आकुलनेत्रत्वादिकमुच्यते ॥ ४१ ॥ तदा व्याघ्रादयः समन्तान्नानादेशात् अभिसम्पत्य आगत्य । रावणे रोषाच्छायानुसारिणः सन्तोऽन्वधावन् ॥४२॥ जलप्रपातरूपाण्यस्राणि मुखे येषां ते उच्छ्रितबाहवः उन्नतबाहवः । विक्रोशन्तीव व्याक्रोशन्निव ॥ ४३ ॥ श्रीमान् प्राप्तविषयशोक एव श्रीः ॥ ४४ ॥ नास्तीति सार्धश्लोक एकान्वयः । अनृशंसता दया । यत्र यस्मात् । गणशः संघशः । पर्यदेवयन् व्यलपन् ॥४५॥ वित्रस्तका इति स्वार्थे कः । मृगपोतकाः मृगशावाः । आविलं कलुषं ॥ ४६ ॥ सुप्रवेपितेत्यादिश्लोकद्वयमेकान्वयं । तथा वाचामगोचरं दुःखं । धरणीतलं बहुशोऽवेक्षमाणां रामलक्ष्मणप्रत्याशयेति भावः ॥ ४७—४८ ॥ विप्रमृष्टं विलुलितं विशेषकं तिलकं यस्यास्तां । "तमालपत्रतिलकचित्रकाणिविशेषकं" इत्यमरः । मनस्विनीं दृढमनस्कां पतिव्रतामित्यर्थः

ति० तांसीतामित्यन्वयः । अत्रप्रकरणेवारंवारंवैश्रवणानुजत्वोक्त्याईदृशक्रियायाअस्यनौचित्यप्रदर्शनेनशीघ्रफलदत्वंसूचयति ॥ ३७ ॥ इतिद्विपञ्चाशस्सर्गः ॥ ५२ ॥

[पा०] १ ख. ङ. झ. ण्यवकीर्यन्त. २ ख. ग. ङ. ट. स्तनान्तरभ्रष्टो. ३ ङ. झ. ट. गगनच्युता. ४ ख. ग. ङ.—ट. उत्पातवाताभि. ५ क. ख. ग. ङ. झ. ट. गतोत्साहांशोचन्तीवस्म. च. छ. ज. गतोच्छ्वासांशोचन्तीहस्म. ६ ख. द्विपाः. ७ च. छ. ज. ञ. स्ततोरोषात्. ८ ख. सीतांचायानु. ङ. छ. झ. ञ. ट. सीताच्छायानु. ९ घ. ङ. झ. ट. बाहुभिः. १० क. ख. ग. ङ.—ट. प्रविध्वस्त. ११ ख. प्रियांरामस्य. १२ ङ.—ट. सीतां. १३ ङ.—ट. भूतानिसर्वाणि. १४ क. ख. घ. वित्रस्ताङ्गा. १५ च. छ. ज. ञ. रश्रु. ङ. झ. ट. मयादिवविलक्षणैः. १६ क. दुःखसमाहतां. १७ क. ङ.—ट. मधुरस्वरां. १८ छ. ज. धरणीतले. १९ ख. छ. सीतामाकुल. २० क. दशग्रीवस्तपस्विनीं. ख. दशग्रीवोयशस्विनीं.

ततस्तु सा चारुदती शुचिस्मिता विनाकृता बन्धुजनेन मैथिली ॥
अपश्यती राघवलक्ष्मणावुभौ विवर्णवक्त्रा भयभारपीडिता ॥ ५० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

त्रिपञ्चाशः सर्गः ॥ ५३ ॥

रावणेनगगनमार्गेणनीयमानयासीतयाभयेमार्गेबहुधाविलपनम् ॥ १ ॥

सम्पतन्तं तं दृष्ट्वा मैथिली जनकात्मजा ॥ दुःखिता परमोद्विग्ना भये महति वर्तिनी ॥ १ ॥
रोषरोदनताम्राक्षी भीमाक्षं राक्षसाधिपम् ॥ रुदन्ती करुणं सीता ह्रियमाणेदमब्रवीत् ॥ २ ॥
न व्यपत्रपसे नीच कर्मणाऽनेन रावण ॥ ज्ञात्वा विरहितां यन्मां चोरयित्वा पलायसे ॥ ३ ॥
त्वयैव नूनं दुष्टात्मन्मीरुणा हर्तुमिच्छता ॥ ममापवाहितो भर्ता मृगरूपेण मायया ॥ ४ ॥
यो हि मामुद्यतस्त्रातुं सोप्यर्यं विनिपातितः ॥ गृध्रराजः पुराणोऽसौ श्वशुरस्य सखा मम ॥ ५ ॥
परमं खलु ते वीर्यं दृश्यते राक्षसाधम ॥ विश्राव्य नामधेयं हि युद्धेनाजिं जिता त्वया ॥ ६ ॥
ईदृशं गर्हितं कर्म कथं कृत्वा न लज्जसे ॥ स्त्रियाश्च हरणं नीच रहिते तु परस्य च ॥ ७ ॥
कथयिष्यन्ति लोकेषु पुरुषाः कर्म कुत्सितम् ॥ सुनृशंसमधर्मिष्ठं तव शौण्डीर्यमानिनः ॥ ८ ॥
धिक्ते शौर्यं च सत्त्वं च यस्त्वं कथितवांस्तदा ॥ कुलाक्रोशकरं लोके धिक्ते चारित्रमीदृशम् ॥ ९ ॥

॥ ४९ ॥ शुचिस्मितेति भूतपूर्वाभिप्रायेण स्वाभाविकहसितत्वाद्वा । विवर्णवक्त्रा बभूवेतिशेषः ॥ ५० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

अथ सीता रावणस्य चौर्यवृत्त्यादिकं बहुशो निन्दति—स्मित्यादिना । दुःखिता बभूवेति शेषः । परमोद्विग्ना कम्पिता । ओविजी भयचलनयोरित्यस्मान्निष्ठा । वर्तिनी वर्तमाना ॥ १ ॥ रोषबद्रोदनमपि रक्षिमहेतुः ॥ २ ॥ नीचेति संबोधनं । न व्यपत्रपसे न लज्जसे । विरहितां रामलक्ष्मणाभ्यामिति शेषः ॥३॥ हर्तुमनसेति शेषः । अपवाहितः अपनीतः । मृगरूपेण मायया मायारूपमृगेणेत्यर्थः ॥ ४ ॥ पुराणो वृद्ध इतिव्यङ्ग्योक्तिः । अतिवृद्धं हत्वा शूरोहमिति मन्यस इतिभावः ॥ ५ ॥ परममिति सोद्धुण्ठनं वचनं अतिनीचमित्यर्थः । तत्रहेतुमाह—विश्राव्येति । हि यस्मात्स्वनामधेयं विश्राव्य अहं रावणोस्मीति स्वनाम प्रख्याप्य युद्धेनास्मद्यं जितेति व्यतिरेकोक्तिः । यद्वा ते परमं अवीर्यं क्लीबत्वं हि । यस्माद्युद्धे न जिताऽसि ॥ ६ ॥ रहिते स्वामिरहितप्रदेशे । परस्यस्त्रियाः हरणरूपमीदृशं गर्हितं निन्दितं कर्म कृत्वा कथं नलज्जसे ॥ ७ ॥ शौण्डीर्यमानिनः तव कर्म कुत्सितं सुनृशंसं अधर्मिष्ठं च कथयिष्यन्तीत्यन्वयः ॥ ८॥ तदा हरणकाले । यच्छौर्यं सत्त्वं बलं च कथितवानसि तद्धिक् । " बद्धवैरं भुजाभ्यां तु मेदिनीमम्बरे स्थितः" इत्यादि स्वदुक्तमनृतप्रलपनमित्यर्थः । कुलाक्रोशकरं कुलनि-

ति० वर्तिनीत्यनुप्यधिनिरार्षः । स० अभयेरामेसद्भावेत्यपिइदानींपरमोद्विग्नासतीदुःखिताभूत् । यद्वा महतिभयेऽपरमोद्विग्नापि इदानींदुःखिता । यद्वा अमेनगच्छताहतौ रामवियोगेवर्ततइतितथा । एतत्पक्षेणिनेरार्षत्वं वक्तव्यं ॥ १ ॥ स० नीचेति कर्मविशेषणंसंबुध्यन्तंच ॥ ३ ॥ ति० स्त्रियाहरणमेवगर्हितं । राक्षसादिविवाहानांशास्त्रेगर्हितत्वात् । तत्रापिपरस्य विवाहितायाः ।

[पा०] १ ख. सीतारुदती. २ ख. घ. ङपश्यपसे. ३ ख. भर्त्राविरहितां. ४ ख. ग. ङ.—ट. योमां. ५ ख. यस्त्वयैवहि. ६ क. युद्धेनापहृता. ७ क. घ. ङ. ञ. ट. स्त्रियाश्चाहरणं. ८ क. ख. ग. ङ. छ. ज्ञ. ञ. ट. रहितेच. घ. रहितेहि. ९ च. छ. ज. ञ. वीर्यंचशौर्यंच. १० ख. यस्त्वयाकथितंतम. ङ. ज्ञ. ट. यस्त्वयाकथितंतदा.

किं कर्तुं शक्यमेवं हि यज्ञवेनैव धावसि ॥ [त्वयैव नूनं दुष्टात्मन्यद्वीर्यं कथितं मम ॥]
मुहूर्तमपि तिष्ठस्व न जीवन्प्रतियास्यसि ॥ १० ॥
न हि चक्षुष्पथं प्राप्य तयोः पार्थिवपुत्रयोः ॥ ससैन्योपि समर्थस्त्वं मुहूर्तमपि जीवितुम् ॥ ११ ॥
न त्वं तयोः शरस्पर्शं सोढुं शक्तः कथंचन ॥ वने प्रज्वलितस्येव स्पर्शमग्नेर्विहङ्गमः ॥ १२ ॥
साधु कृत्वाऽऽत्मनः पथ्यं साधु मां मुञ्च रावण ॥ १३ ॥
मत्प्रधर्षणरुष्टो हि भ्रात्रा सह पतिर्मम ॥ विधास्यति विनाशाय त्वं मां यदि न मुञ्चसि ॥ १४ ॥
येन त्वं व्यवसायेन बलान्मां हर्तुमिच्छसि ॥ व्यवसायः स ते नीच भविष्यति निरर्थकः ॥ १५ ॥
न ह्यहं तमपश्यन्ती भर्तारं विबुधोपमम् ॥ उत्सहे शत्रुवशगा प्राणान्धारयितुं चिरम् ॥ १६ ॥
न नूनं चात्मनः श्रेयः पथ्यं वा संप्रवेक्षसे ॥ मृत्युकाले यथा मर्त्यो विपरीतानि सेवते ॥ १७ ॥
मुमूर्षूणां हि सर्वेषां यत्पथ्यं तन्न रोचते ॥ पश्याम्यद्य हि कण्ठे त्वां कालपाशावपाशितम् ॥ १८ ॥
यथा चाभिनमस्थाने न विभेषि दशानन ॥ व्यक्तं हिरण्मयान्हि त्वं संपश्यसि महीरुहान् ॥ १९ ॥
नदीं वैतरणीं घोरां रुधिरौघनिवाहिनीम् ॥ असिपत्रवनं चैव भीमं पश्यसि रावण ॥ २० ॥

न्दाकरं ॥ ९ ॥ यत् यदा । एवं जवेनैव धावसि तदा रामेण त्वयि किं कर्तुं शक्यं । तर्हि कथाशक्यमित्यत आह—मुहूर्तमिति । मुहूर्तमपि मुहूर्तमेव । तिष्ठस्व तिष्ठ । तदा जीवन्सन् न प्रतियास्यसि मृतो भविष्यसीत्यर्थः ॥ १० ॥ उक्तमुपपादयति—न हीति ॥ ११ ॥ दर्शनप्राप्तिमात्रेण कथं जीवितुमशक्यत्वं तत्राह—न त्वमिति ॥ १२ ॥ अथ कर्तव्यमुपदिशति—साध्विति । अर्धश्लोक एकान्वयः । आत्मनः पथ्यं हितं । साधु कृत्वा विचार्य । कृतिर्हि नानार्थो धातुवृत्तिकृतोक्तः । यथा उरसिकृत्वा मनसिकृत्वेति । मां साधु सम्यक् आर्जवपूर्वकं मुञ्च ॥ १३ ॥ अमोचने बाधकमाह—मदिति । त्वं मां यदि न मुञ्चसि तदा मम पतिः मत्प्रधर्षणेन मत्परिभवेन । रुष्टः सन् भ्रात्रासह त्वद्विनाशाय यत्नं विधास्यति ॥ १४ ॥ अहमपि सफलयत्नो भविष्यामीत्याशङ्क्याह—येनेति । व्यवसायेन भोगव्यवसायेनेत्यमाम्योक्तिः ॥ १५ ॥ नैरर्थक्यमेवाह—न हीति । इदानीं कथं धारयसीत्यत्रपरिहारः—चिरमिति ॥ १६ ॥ किंच त्वमात्मनः श्रेयः प्रियं । पथ्यं हितं वा । न समवेक्षसे न पर्यालोचयसि । किन्तु मृत्युकालेमर्त्योयथा विपरीतानि सेवते तथा त्वमपिविपरीतानिसेवस इत्यर्थः ॥ १७ ॥ त्वां कण्ठे कालपाशावपाशितं कालपाशेन बद्धं पश्यामि ॥ १८ ॥ किंच येन प्रकारेण नबिभेषि तेनप्रकारेण महीरुहान् हिरण्मयान् संपश्यसीति मन्य इति योजना ॥ १९ ॥ रुधिरौघैःरक्तौघैःसह निवहति प्रवहतीति तथा । असिपत्रवनं असिमयपत्रयुक्तवनमिति नरकविशेषस्य नाम ।

तत्रापि रहिते पतिरहितेकालेदेशेचेत्यतिनिन्द्यतेकर्मेतिभावः ॥ ७ ॥ गो० मयेनचावसीदियत् एवंकर्तुंशक्यंकिं । नशक्यमित्यर्थः । श्रीरामभयेनलयपलायनं क्रियते तदेतन्मयानिवारयितुंनशक्यं । स्त्रीत्वादितिभावः । यद्वाइहभयेनचावसीदियत् एवंकर्तुंशक्यंनशक्यं । शत्र्यभिमानपलायनयोरन्योन्यविरोधादित्यर्थः । तिष्ठस्व यदिशूरइतिशेषः ॥ १० ॥ शि० प्राणान् जीवनं । चिरंधारयितुंनोत्सहे । एतेन शीघ्रमेवरामस्त्वांहनिष्यतीतिसूचितं ॥ १६ ॥ गो० पथ्यं सुखोदर्कंश्रेयः । वासं लङ्कारूपंनिवासंच मावेक्षसे उभयंत्यक्तुमिच्छसीत्यर्थः ॥ १७ ॥ स० सुवर्णवृक्षादिदर्शनस्मृतिसूचकत्वं "स्वप्नप्रतीतिर्दृक्षेषु" इतिपूर्वार्धभागवशे स्पष्टं ॥ १९ ॥ इतिश्रिपक्षाश्सर्गः ॥ ५३ ॥

[पा०] १ ख. ग. ङ.—ट. शक्यंकर्तुमेवं. २ ख. म. यज्ञवेनेह. ३ इदमर्धं क. पुस्तकेदृश्यते. ४ ख. मुपतिष्ठत्वं. क. ङ.—ट. मपितिष्ठत्वं. ५ ख. मुहूर्तमिह. ६ क. मत्प्रधर्षणरुष्टोहि क. ख. ट. मत्प्रधर्षणसंक्रुद्धो. ७ क. ख. ट. व्यवसायस्तु. ग. व्यवसायश्च. ८ क. च. छ. ज. झ. बासवोपमं. ९ च. छ. पथ्यंवासंवा. १० ख. नसमीक्षसे. क. समुदीक्षसे. ११ ख. ग. ङ.—ट. मुमूर्षूणांतु. १२ क. ङ. च. छ. झ. पश्यामेवहि. ख. ट पश्यामीहहि. ख. ग. पश्कामीवहि. १३ ग. कदाचन. ङ. च. छ. ख. ज. ट. निशाचर. १४ ङ—ट. हिरण्मयांस्त्वंहि. १५ ख. प्रवाहिनीं. ङ. ख. ट. विवाहिनीं. १६ क. ख. च.—ट. जङ्घपत्र.

तप्तकाञ्चनपुष्पां[1] च वैडूर्यप्रवरच्छदाम् ॥ द्रक्ष्यसे शाल्मलीं तीक्ष्णामायसैः[2] कण्टकैश्चिताम् ॥ २१ ॥
न हि त्वमीदृशं कृत्वा तस्यालीकं महात्मनः ॥ धरितुं[3] शक्ष्यसि चिरं विषं पीत्वेव निर्घृणः ॥२२॥
बद्धस्त्वं कालपाशेन दुर्निवारेण रावण ॥ क्व गतो लप्स्यसे शर्म भर्तुर्मम[4] महात्मनः ॥ २३ ॥
निमेषान्तरमात्रेण विना भ्रात्रा[5] महावने ॥ राक्षसा निहता येन सहस्राणि चतुर्दश ॥ २४ ॥
स[6] कथं राघवो वीरः सर्वास्त्रकुशलो बली ॥ न त्वां हन्याच्छरैस्तीक्ष्णैरिष्टभार्यापहारिणम्[7] ॥ २५ ॥
एतच्चान्यच्च परुषं वैदेही रावणाङ्कगा ॥ भयशोकसमाविष्टा करुणं विललाप ह ॥ २६ ॥
तथा भृशार्तां बहु[8] चैव भाषिणीं विलापपूर्वं करुणं च भामिनीम् ॥
जहार पापः[9] करुणं [10]विवेष्टतीं नृपात्मजामागतगात्रवेपथुम्[11] ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

रावणेनगगनेनीयमानयासीतयाऋष्यमूकशिखरे दृष्टानांसुग्रीवादिवानराणां मध्ये रावणाविदितमाभरणगर्भनिजकौशेयोत्तरीयप्रक्षेपणम् ॥ १ ॥ रावणेनत्वरयालङ्कामेत्य निजान्तःपुरेसीतास्थापनपूर्वकं रामवृत्तान्तपरिज्ञानायजनस्थानंप्रति निजभटाष्टकप्रेषणम् ॥ २ ॥

ह्रियमाणा तु वैदेही कंचिन्नाथमपश्यती ॥ ददर्श गिरिशृङ्गस्थान्पञ्च वानरपुङ्गवान् ॥ १ ॥
तेषां मध्ये विशालाक्षी कौशेयं कनकप्रभम् ॥ उत्तरीयं वरारोहा शुभान्याभरणानि च ॥
मुमोच यदि रामाय शंसेयुरिति [12]मैथिली ॥ २ ॥

पश्यसीति वर्तमानसामीप्ये वर्तमाननिर्देशः ॥ २० ॥ पारदारिकस्यासाधारणनरकानुभवं दर्शयति—तप्तेति । तप्तानि सद्योग्निनिष्टप्तानि काञ्चनमयानि पुष्पाणि यस्यास्तां । स्वर्णस्य तप्तत्वेऽतीवौष्ण्यं भवति । वैडूर्यप्रवराः वैडूर्यमणिश्रेष्ठमयाः छन्दाः पर्णानि यस्यास्तां । अत्रापि तप्तेति विशेषणं बोध्यं । शाल्मलीं पारदारिकालिङ्गयत्वेन यमलोकोत्पन्नां शाल्मलीवृक्षाकारस्थूणां । द्रक्ष्यसे द्रक्ष्यसि । आलिङ्गितुमिति शेषः ॥ २१ ॥ भवत्वेवं कालान्तरे सद्यो लब्धंहि सुखमित्यत्राह—न हीति । तस्य अलीकमप्रियं कृत्वा । "अलीकं त्वप्रियेऽनृते" इत्यमरः । धरितुं जीवितुं ॥ २२ ॥ त्वामादाय देशान्तरं गमिष्यामि तदा न मे रामभयं तत्राह—बद्ध इति । भर्तुरिति हेतौ पञ्चमी । तस्माद्धेतोः क्व गतः सन् शर्म लप्स्यसे नक्वचिदपीत्यर्थः ॥ २३ ॥ कथं तस्य तादृशी शक्तिरित्यत्राह द्वाभ्यां । निमेषान्तरमात्रेण निमेषावकाशमात्रेण । भ्रात्रा विना एकाकिनेत्यर्थः ॥ २४—२५ ॥ एतच्चान्यच्च वचनं करुणं परुषं च यथा भवति तथा विललाप परिदेवनमकरोत् ॥२६॥ सीतोक्तं सर्वं पापिष्ठस्य तस्य समुद्रघोषतुल्यमासीदित्याह—तथेति । तथेति वाचामगोचरत्वोक्तिः । विलापपूर्वं करुणं च यथा तथा भाषिणीं करुणं यथा तथाविवेष्टन्तीं विवेष्टमानां । आगतगात्रवेपथुं उत्पन्नशरीरकम्पां ॥२७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

अथसीताया अशोकवनिकायां स्थापनमाह । नाथं रक्षकं ॥ १ ॥ तेषामित्यादिसार्धश्लोक एकान्वयः । उत्तरीयं उत्तरीयभूतं कौशेयं । आभरणानि कौशेये बद्ध्वा मुमोचेत्यर्थः । किमर्थं मुमोचेत्यत्राह—यदिरामायशंसेयुरिति । यदृच्छया दृष्टाय रामाय स्वस्य रावणापहरणं कथयेयुरिति प्रत्याशयेत्यर्थः । "आशंसा-

---

[पा०] १ क. चित्रांच. २ ग. तीक्ष्णैरायसैः. ३ क. ग. घ. चरितुं. झ. धारितुं. ४ क. ग. ङ. च. झ. ट. ममभर्तुः. ५ क. ग. ङ. च. ज.—ट. भ्रातरमाहवे. ६ ग. ङ. झ. ट. कथंस. ७ च. छ. ञ. स्तीक्ष्णैर्दृष्टामार्यां. ८ क. च. छ. ञ. बहुरूप. ९ ग. ङ. झ. ट. पापस्तरुणीं. १० ख.—ञ. विचेष्टतीं. ११ ख. ग. ङ. झ. वेपथुः. १२ ङ. झ. ट. भामिनी.

वस्त्रमुत्सृज्य तन्मध्ये निक्षिप्तं सहभूषणम् ॥ संभ्रमात्तु दशग्रीवस्तत्कर्म ने स बुद्धवान् ॥ ३ ॥
पिङ्गाक्षास्तां विशालाक्षीं नेत्रैरनिमिषैरिव ॥ विक्रोशन्तीं तथा सीतां ददृशुर्वानरर्षभाः ॥ ४ ॥
स च पम्पामतिक्रम्य लङ्कामभिमुखः पुरीम् ॥ जगाम क्रन्दतीं गृह्य वैदेहीं राक्षसेश्वरः ॥ ५ ॥
तां जहार सुसंहृष्टो रावणो मृत्युमात्मनः ॥ उत्सङ्गेनैव भुजगीं तीक्ष्णदंष्ट्रां महाविषाम् ॥ ६ ॥
वनानि सरितः शैलान्सरांसि च विहायसा ॥ स क्षिप्रं समतीयाय शरश्चापादिव च्युतः ॥ ७ ॥
तिमिनक्रनिकेतं तु वरुणालयमक्षयम् ॥ सरितां शरणं गत्वा समतीयाय सागरम् ॥ ८ ॥
संभ्रमात्परिवृत्तोर्मी रुद्धमीनमहोरगः ॥ वैदेह्यां ह्रियमाणायां बभूव वरुणालयः ॥ ९ ॥
अन्तरिक्षगता वाचः सस्रुश्चारणास्तदा ॥ एतदन्तो दशग्रीव इति सिद्धास्तदाऽब्रुवन् ॥ १० ॥
स तु सीतां विवेष्टन्तीमङ्केनादाय रावणः ॥ प्रविवेश पुरीं लङ्कां रूपिणीं मृत्युमात्मनः ॥ ११ ॥
सोभिगम्य पुरीं लङ्कां सुविभक्तमहापथाम् ॥ संरुद्धकक्ष्याबहुलं स्वमन्तःपुरमाविशत् ॥ १२ ॥
तत्र तां मसितापाङ्गां शोकमोहपरायणाम् ॥ निदधे रावणः सीतां मयो मायामिवै स्त्रियम् ॥ १३ ॥
अब्रवीच्च दशग्रीवः पिशाचीर्घोरदर्शनाः ॥ यथा नेमां पुमान्स्त्री वा सीतां पश्यत्यसंमतः ॥ १४ ॥

बचने लिङ्" इति लिङ् ॥ २ ॥ सहभूषणं भूषणान्तरितं वस्त्रं । उत्सृज्य उन्मुच्य । तन्मध्ये सीतया निक्षिप्तमिति यत् सत्कर्म । संभ्रमात्सीतापहारजनितक्षोभात् न बुद्धवान् । यदि बुध्येत गृह्णीयादेवेति भावः ॥ ३ ॥ पिङ्गाक्षाः वानराः । न केवलं वानराः अपि तु वानरर्षभाः वानरश्रेष्ठाः । अनिमिषैरिव निमेषरहितैरिव । तथा विक्रोशन्तीं राम रामेति विक्रोशन्तीमित्यर्थः ॥ ४ ॥ पम्पां पम्पोपर्यवकाशं । लङ्कामभिमुख इत्यनेन एतावत्पर्यन्तं रामाश्रमदत्तदृष्टिर्गतः ततः स्वच्छन्दं गतवानिति गम्यते । अतएव सुसंहृष्ट इति वक्ष्यते ॥ ५ ॥ उत्सङ्गेनेत्यस्य उभयत्राप्यन्वयः । मृत्युं मृत्युहेतुभूतां ॥ ६ ॥ विहायसा आकाशमार्गेण ॥ ७ ॥ तिमीति तिमयो मत्स्यविशेषाः नक्राः ग्राहाः तेषां निकेतं वासस्थानं । वरुणस्य आलयं वासः । शरणं प्राप्यं । गत्वा प्राप्य । क्रमेण सागरं समतीयाय ॥ ८ ॥ संभ्रमात् रावणदर्शनक्षोभात् परिवृत्तोर्मिः । रुद्धमीनमहोरगः बहिःसंचाररहितमत्स्यसर्पः ॥ ९ ॥ अन्तरिक्षगताश्चारणाः दशग्रीवः एतदन्तः एतत्सीतापहरणावसानइति वाचः सस्रुजुः ऊचुरित्यर्थः । अन्तरिक्षगताःसिद्धाश्च एतदन्तो दशग्रीव इत्यब्रुवन् ॥ १० ॥ आत्मनः रूपिणीं रूपवतीमृत्युमिति सीताविशेषणं ॥ ११ ॥ संरुद्धाः जनाकीर्णाः कक्ष्याः द्वारप्रकोष्ठाः ताभिः बहुलं निबिडं ॥ १२ ॥ तत्र अन्तःपुरे शोकमोहपरायणां शोकमोहपरतन्त्रां । निदधे स्थापितवान् । मयः त्रिपुराधिपतिः । मायां मायामयीं आश्चर्यशक्तियुक्तामित्यर्थः । स्त्रियं स्वयंप्रभां बिले यथानिदधे तथेत्यर्थः ॥१३॥ पिशाचीः पिशाच्याकाराः राक्षसीः । यथेमां स्त्री वा पुमान्वा असंमतः अननुज्ञातः । नपश्यति तथाऽब्रवीत् । एनामन्यो न पश्येदित्यब्रवीत्यर्थः

ति० वस्तुतोऽयंयदिशब्दः"वेदाःप्रमाणंयदिस्युः" इतिवत् ॥ स० संभ्रमात् रामश्रमच्छेदितिमनश्चाञ्चल्यात् । शि० सहभूषणंवस्त्रमुत्सृज्यक्षिप्यमानायास्सीतायाः संभ्रमात् तदुक्तिहेतुकोद्वेगादेतोः । निक्षिप्तं निक्षेपरूपं । तत्कर्मैदशग्रीवोनबुद्धवान् ॥ ३ ॥ ति० सुसंहृष्टः मृत्योस्तत्त्वेनाहानात् । केचित्—लब्धरामहस्तान्मृत्युद्वारमितिसंहृष्टः । विनाचोत्कटंपापंपुण्यक्षयाभावेननमृत्युरसंनिहितःस्यादितितमोगुणावृतसन्मात्रर्यपिविरुद्धशब्दव्यवहारंकृतवानितिवदन्ति । तेषामेतत्सर्गान्तेवक्ष्यमाणं"बभूवमोहान्मुदितः" इत्यसङ्गतंस्यात् । तथा "आत्मानंबुद्धिवैक्लव्यात्कृतकृत्यममन्यत" इत्युत्तरसर्गादिसंचासंगतंस्यात् ॥६॥ ति० संरुद्धकक्ष्याः बहुजनाकीर्णद्वाराः । बहुलां विपुलां । संरुद्धकक्ष्याबहुलामितिपाठे तादृशबहुतरद्वारवतइत्यन्तःपुरविशेषणं ॥ १२ ॥

[पा०] १ क. ख. ग. विनिक्षिप्तंसभूषणं. २ ब.—ट. वनबुद्धवान्. क. ख. ग. नचबुद्धवान्. ३ ख. ग. ङ. झ. ट. तदा. ४ ङ. छ. ज. झ. मैथिलींगृह्यरुदतीं. च. ब. ट. मैथिलींगृह्यरुदन्तीं. ५ क. ख. ग. मैथिलीं. ६ क. ग. च. छ. ज. एभ्यं. ७ ङ. झ. ट. सथा. ८ ख. प्रवेष्टन्तीं. क.—ट. विचेष्टन्तीं. ९ ख. सुसंरुद्ध. १० क. ङ. छ. झ. ट. संरुद्धकक्ष्यांबहुलां. ११ क. ङ.—ट. मसितापाङ्गीं. १२ ङ. झ. ट. मोहसमन्वितां. १३ क.—ट. मिवासुरीं.

मुक्तामणिसुवर्णानि वस्त्राण्याभरणानि च ॥ यद्यदिच्छेत्तदेवास्या देयं मच्छन्दतो यथा ॥ १५ ॥
या च वक्ष्यति वैदेहीं वचनं किंचिदप्रियम् ॥ अज्ञानाद्यदि वा ज्ञानान्न तस्या जीवितं प्रियम्॥१६॥
तथोक्त्वा राक्षसीस्तास्तु राक्षसेन्द्रः प्रतापवान् ॥ निष्क्रम्यान्तःपुरात्तस्मात्किं कृत्यमिति चिन्तयन् १७
ददर्शाष्टौ महावीर्यान्राक्षसान्पिशिताशनान् ॥ १८ ॥
स तान्दृष्ट्वा महावीर्यो वरदानेन मोहितः ॥ उवाचैतानिदं वाक्यं प्रशस्य बलवीर्यतः ॥ १९ ॥
नानाप्रहरणाः क्षिप्रमितो गच्छत सत्वराः ॥ जनस्थानं हतस्थानं भूतपूर्वं खरालयम् ॥ २० ॥
तत्रोष्यतां जनस्थाने शून्ये निहतराक्षसे ॥ पौरुषं बलमाश्रित्य त्रासमुत्सृज्य दूरतः ॥ २१ ॥
बलं हि सुमहद्यन्मे जनस्थाने निवेशितम् ॥ सदूषणखरं युद्धे हतं रामेण सायकैः ॥ २२ ॥
तत्र क्रोधो ममामर्षाद्धैर्यस्योपरि वर्तते ॥ वैरं च सुमहज्जातं रामं प्रति सुदारुणम् ॥ २३ ॥
निर्यातयितुमिच्छामि तच्च वैरमहं रिपोः ॥ न हि लप्स्याम्यहं निद्रामहत्वा संयुगे रिपुम् ॥ २४ ॥
तं त्विदानीमहं हत्वा खरदूषणघातिनम् ॥ रामं शर्मोपलप्स्यामि धनं लब्ध्वेव निर्धनः ॥ २५ ॥
जनस्थाने वसद्भिस्तु भवद्भी राममाश्रिता ॥ प्रवृत्तिरुपनेतव्या किङ्करोतीति तत्त्वतः ॥ २६ ॥
अप्रमादाच्च गन्तव्यं सर्वैरपि निशाचरैः ॥ कर्तव्यश्च सदा यत्नो राघवस्य वधं प्रति ॥ २७ ॥
युष्माकं च बलज्ञोऽहं बहुशो रणमूर्धनि ॥ अतश्चास्मिञ्जनस्थाने मया यूयं नियोजिताः ॥ २८ ॥
ततः प्रियं वाक्यमुपेत्य राक्षसा महार्थमष्टावभिवाद्य रावणम् ॥
विहाय लङ्कां सहिताः प्रतस्थिरे यतो जनस्थानमलक्ष्यदर्शनाः ॥ २९ ॥

॥ १४ ॥ एषा यद्यदिच्छेत्तत्तद्देयं यथामच्छन्दतः मदिच्छानुसारेण । यथा मह्यं दीयते तद्वद्देयमित्यर्थः ॥ १५ ॥ जीवितं न प्रियं मारयेयमित्यर्थः ॥ १६ ॥ चिन्तयन् महावीर्यान्राक्षसान् ददर्श अपश्यत् ॥१७—१८ ॥ वरदानेन ब्रह्मवरदानेन । तानेतानित्यन्वयः ॥ १९ ॥ नानेति "आयुधं तु प्रहरणं" इत्यमरः । हतस्थानं शून्यसन्निवेशं । खरालयं भूतपूर्वं पूर्वं खरालयमित्यर्थः । "भूतपूर्वे चरट्" इति निर्देशात्समासः ॥ २० ॥ पौरुषं बलं न केवलं नीतिबलमित्यर्थः ॥ २१ ॥ पौरुषबलाश्रयणे हेतुमाह—बलं हीति । यत् बलं सैन्यं निवेशितं तद्धतमित्यन्वयः ॥ २२ ॥ तत्र वधनिमित्तं । अमर्षात् असहनात् ॥ २३ ॥ निर्यातयितुं अवसितुं ॥ २४ ॥ शर्म सुखं । उपलप्स्यामि प्राप्स्यामि ॥ २५ ॥ प्रवृत्तिर्वार्ता । रामः किं करोतीति तत्त्वतो वार्ता मत्सकाशमुपनेतव्येत्यर्थः ॥२६॥ अप्रमादादिति अवधानादित्यर्थः ॥ २७ ॥ खरादिस्थाने अस्माभिः कथं स्थातुं शक्यं तत्राह—युष्माकं चेति ॥ २८ ॥ महानर्थोभिधेयो यस्य तं महार्थं प्रियं श्लाघारूपं वाक्यं । उपेत्य लब्ध्वा । रावणतः स्तुतिं प्राप्येत्यर्थः । यतो यत्र जनस्थानं तद्वनमुद्दिश्य प्रतस्थिरे । अलक्ष्यदर्शनाः वेगातिशयेन दुष्प्रेक्ष्यस्वरूपाः

ति० मायामिवासुरीमित्यनेन मायारूपैवैषासीतायालङ्कामागतेतिध्वनितं । मुख्यसीतास्वग्निप्रविष्टेतिपूर्वमेवध्वनितं । अत एवरावणस्यवहनीयैषाजाता । मायात्वादेवरावणस्यतदज्ञानं ॥ १३ ॥ ति० मच्छन्दतइत्यस्यमद्वशप्राप्तिसिद्ध्यर्थमित्यर्थइति कतकः ॥ १५ ॥

[पा०] १ घ. राक्षसाः. २ ङ. झ. ट. तत्रास्यतां. ३ क. ङ.—ट. बहुसैन्यंमहावीर्यं. ४ क. ख. ङ. च. छ. झ. ञ. ट. निहतंरामसायकैः. ५ ख. ङ.—ट. ततःक्रोधोममापूर्वोधैर्यस्योपरिवर्धते. क. ततःक्रोधोमयापूर्वोधैर्येणपरिवर्धते. ६ घ. ङ.—ट. तच्चवैरंमहारिपोः. ख. वैरंममरिपोर्वधात्. ७ क. नाभिगच्छाम्यहं. ख. च. छ. ज. नाभिपत्स्याम्यहं. घ. नैवलप्स्याम्यहं. ८ क.—ट. सर्वैरेव. ९ ग. युष्माकंहि. ङ. छ. झ. ट. युष्माकंतु. १० ङ. झ. ट. बलंज्ञातं. ११ क. ख. ग. ङ.—ट. निवेशिताः. १२ घ. अतः. १३ च. छ. ज. ञ. वभिवन्द्य.

ततस्तु सीतामुपलभ्य रावणः सुसंप्रहृष्टः परिगृह्य मैथिलीम् ॥
प्रसज्य रामेण च वैरमुत्तमं बभूव मोहान्मुदितः स राक्षसः ॥ ३० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

रावणेनसीतासमीपमेत्यबलात्तस्यास्तत्रतत्रसमानयनेनविचित्रतरभवनप्रासादोद्यानादिप्रदर्शनपूर्वकं तत्प्रलोभनेच्छयाबहुधाचाटुवचनोपन्यासः ॥ १ ॥

संदिश्य राक्षसान्घोरान्रावणोष्टौ महाबलान् ॥ आत्मानं बुद्धिवैक्लव्यात्कृतकृत्यममन्यत ॥ १ ॥
स चिन्तयानो वैदेहीं कामबाणसमर्पितः ॥ प्रविवेश गृहं रम्यं सीतां द्रष्टुमभित्वरन् ॥ २ ॥
स प्रविश्य तु तद्वेश्म रावणो राक्षसाधिपः ॥ अपश्यद्राक्षसीमध्ये सीतां शोकपरायणाम् ॥ ३ ॥
अश्रुपूर्णमुखीं दीनां शोकभाराभिपीडिताम् ॥ वायुवेगैरिवाक्रान्तां मज्जन्तीं नावमर्णवे ॥ ४ ॥
मृगयूथपरिभ्रष्टां मृगीं श्वभिरिवावृताम् ॥ अधोमुखमुखीं सीतामभ्येत्य च निशाचरः ॥ ५ ॥
तां तु शोकपरां दीनामवशां राक्षसाधिपः ॥ स बलाद्दर्शयामास गृहं देवगृहोपमम् ॥ ६ ॥
हर्म्यप्रासादसंबाधं स्त्रीसहस्रनिषेवितम् ॥ नानापक्षिगणैर्जुष्टं नानारत्नसमन्वितम् ॥ ७ ॥
काञ्चनैस्तापनीयैश्च स्फाटिकै राजतैरपि ॥ वज्रवैडूर्यचित्रैश्च स्तम्भैर्दृष्टिमनोहरैः ॥ ८ ॥

॥ २९ ॥ सर्गार्थं संगृह्य दर्शयति—ततस्त्विति । उपलभ्य दृष्ट्वा । सुसंप्रहृष्टः कामविकारवान् । परिगृह्य गृहीत्वा । रामेण वैरं प्रसज्य प्राप्यापि । मोहान्मुदितो बभूव । अत्र त्रिंशच्छ्लोकाः ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

पूर्वं स्वप्रभावकथनमुखेन प्रलोभनं कृतवान् अथ भोगोपकरणप्रदर्शनमुखेन रावणः सीतां प्रलोभयति पञ्चपञ्चाशे । बुद्धिवैक्लव्यात् बुद्धिदौर्बल्यात् अकृतबुद्धित्वादित्यर्थः ॥ १ ॥ समर्पितः पीडित इत्यर्थः । अभित्वरन् अभित्वरमाणः ॥ २ ॥ वेश्म अन्तःपुरं ॥३॥ अश्वित्यादिश्लोकत्रयमेकं वाक्यं । अधोमुखमवनतं मुखं यस्यास्तां । "स्यादवाङ्प्यधोमुखः" इत्यमरः । शोकभाराभिपीडितामभ्येत्य शोकपरां दर्शयामासेति क्रियाभेदादपुनरुक्तिः । अवशां दर्शनमनिच्छन्तीं ॥ ४—६ ॥ गृहं वर्णयति द्वाभ्यां । हर्म्येत्यादि । हर्म्यैः ह्रस्वविमानैः । प्रासादैः उन्नतविमानैश्च संबाधं निबिडं । काञ्चनैः स्वर्णमयैः । तापनीयैः तप्तस्वर्णमयैः । स्तम्भैरुपलक्षितं ॥ ७—८ ॥

ति० मोहान्मुदितः खरहन्तुर्वधोममसुकरः स्त्रीवियोगेनातिखिन्नस्येतिहर्षितः ॥ ती० वस्तुतस्तुरावणस्यश्रीरामेणसहवैरंलोकदृष्ट्याऽनर्थवत्प्रतीयमानमपिसीताहरणद्वाराश्रीरामहस्तात्स्ववधस्येष्टतमत्वाद्रामेणवैरंप्राप्यमुमुदइतिभावः । सर्गश्रवणफलं—"सीतापहारमारभ्यलङ्कायांस्थापनावधि । श्रवणाच्छास्त्रविहिताज्ज्येष्ठादेवीविनश्यति" इतिस्कान्दे ॥ ३० ॥ इतिचतुष्पञ्चाशस्सर्गः ॥ ५४ ॥

ति० शोकोवायुस्थाने । अश्रुचार्णवजलस्थाने । अनेनाश्रुवेगातिशयउक्तः ॥ ४ ॥ ती० अधोमुखमुखीं अधोमुखे अधःप्रदेशे

[पा०] १ च. छ. ज. ञ. मैथिलीं. २ च. छ. ज. ञ. प्रतिगृह्यरावणः. क. सनिगृह्य. ३ क. झ. ट. रावणः. ४ क. छ. झ. ञ. ट. बाणैःप्रपीडितः. क. च. ज. बाणावपीडितः. ५ ग. सविवेश. ६ ख. संप्रविश्य. ७ क. च. छ. ज. ञ. राक्षसेश्वरः. ८ क. झ. ट. दुःखपरायणां. ९ क. घ.—छ. झ. ञ. ट. भारावपीडितां. १० क. झ. ट. अधोगतमुखीं. ११ च. ज. दीनांतामभ्येत्य. ग. दीनामभ्येत्यस. ख. दीनांसीतामभ्येत्य. १२ क. ग. च. छ. ज. ञ ट. शोकवशां. क. झ. शोकवशाद्दीनां. १३ ख. सनिशाचरः. क. राक्षसेश्वरः. १४ ग. विविधंदर्शयामास. ख. स्वबलंदर्शयामास. १५ ग. विभूषितं. १६ क. झ. ञ. ट. दान्तकैः. १७ ग. ङ. च. छ. झ. ञ. ट. राजतैस्तथा. १८ क. स्तम्भैर्जुष्टंमनोहरं. ख. ङ.—ट. स्तम्भैर्दृष्टिमनोरमः.

दिव्यदुन्दुभिनिर्हादं तप्तकाञ्चनतोरणम् ॥ सोपानं काञ्चनं चित्रमारुरोह तया सह ॥ ९ ॥
दान्तिका राजताश्चैव गवाक्षाः प्रियदर्शनाः ॥ हेमजालावृताश्चासंस्तत्र प्रासादपङ्क्तयः ॥ १० ॥
सुधामणिविचित्राणि भूमिभागानि सर्वशः ॥ दशग्रीवः स्वभवने प्रादर्शयत मैथिलीम् ॥ ११ ॥
दीर्घिकाः पुष्करिण्यश्च नानावृक्षसमन्विताः ॥ रावणो दर्शयामास सीतां शोकपरायणाम् ॥ १२ ॥
दर्शयित्वा तु वैदेह्याः कृत्स्नं तद्भवनोत्तमम् ॥ उवाच वाक्यं पापात्मा सीतां लोभितुमिच्छया ॥१३॥
दश राक्षसकोट्यश्च द्वाविंशतिरथापराः ॥ तेषां प्रभुरहं सीते सर्वेषां भीमकर्मणाम् ॥ १४ ॥
वर्जयित्वा जरावृद्धान्बालांश्च रजनीचरान् ॥ सहस्रमेकमेकस्य मम कार्यपुरस्सरम् ॥ १५ ॥
यदिदं राजतं मे त्वयि सर्वं प्रतिष्ठितम् ॥ जीवितं च विशालाक्षि त्वं मे प्राणैर्गरीयसी ॥ १६ ॥
बहूनां स्त्रीसहस्राणां मम योऽसौ परिग्रहः ॥ तासां त्वमीश्वरा सीते मम भार्या भव प्रिये ॥ १७ ॥
साधु किं तेऽन्यथाबुद्ध्या रोचयस्व वचो मम ॥ भजस्व मामभित्तप्तस्य प्रसादं कर्तुमर्हसि ॥१८ ॥

दिव्यदुन्दुभिनिर्हादं निर्हादवत्। अर्शआद्यच्। यद्वा दिव्यदुन्दुभेरिव निर्हादः शब्दो यस्य तत्। आरोहणकाले दुन्दुभिवत् ध्वनतीति भावः। तोरणो बहिर्द्वारं। चित्रं आश्चर्यभूतं। "आलेख्याश्चर्ययोश्चित्रं" इत्यमरः। तया सहारुरोह तामादायारुरोहेत्यर्थः ॥ ९ ॥ वक्ष्यमाणभूभागदर्शनसाधनान्याह—दान्तिका इति। दान्तिकाः दन्तविकृताः। तत्र सोपानमार्गे। गवाक्षा आसन् तदुपरि हेममयैः जालैः जालकैः आवृताःप्रासादपङ्क्तयश्चासन् ॥ १० ॥ सुधावलेपनेन मणिभिश्च विचित्राणि भूमिभागानीति स्त्रीत्वमार्षं। भावदर्शयत् प्रदर्शयामास। तैर्गवाक्षैरिति शेषः ॥ ११ ॥ दीर्घिकाः वाप्यः। पुष्करं जलमासामस्तीति पुष्करिण्यः। द्वितीयार्थे प्रथमा। "पुष्करादिभ्यो देशे" इति इनिप्रत्ययः। शोकपरायणामित्यनेन तस्या असत्त्वं द्योत्यते ॥ १२ ॥ लोभितुं लोभयितुं। अन्तर्भावितण्यर्थोयं ॥ १३ ॥ दशेति। दश द्वाविंशतिश्चेति द्वात्रिंशत्कोटयः तेषां द्वात्रिंशत्कोटिराक्षसानां। शुणीभूतानामपि राक्षसानां तच्छब्देन परामर्शः। "अथशब्दानुशासनं। केषां शब्दानां" इत्यादौतथा दर्शनात् ॥ १४ ॥ —वर्जयित्वेति। बालवृद्धानृविना ममैकस्य पुरः सरतीति पुरःसरं परिचारकजातं। एकसहस्रमस्ति ॥ १५ ॥ मम यदिदं राजतं राजपरिकरः। तत्सर्वं त्वयि प्रतिष्ठितं त्वदधीनं मम जीवितं च त्वदधीनं। त्वयि प्रतिष्ठितं। त्वं मे मम। प्राणैः प्राणेभ्यः गरीयसी ॥ १६ ॥ अन्तःपुरचारिणां स्त्रीसहस्राणां मध्ये योसौ मम परिग्रहः या भार्येत्यर्थः। "परिग्रहः कलत्रे स्यात्" इति शाश्वतः। नियतपुंलिङ्गः। जात्यभिप्रायेणैकवचनं। तासामित्यत्र स्त्रीणामित्यभिप्रायेण स्त्रीलिङ्गनिर्देशः। मम भार्यासती तासामीश्वरा स्वामिनी भव। "स्त्रेशभासपिसकसोवरच्" इति वरच्। ततष्टाप् ॥ १७ ॥ मम वचो रोचयस्व मदुक्तं स्वीकुरु।

मुखंवस्त्रात्त्रो ॥ ५ ॥ त्रि० बालवृद्धाजनान्वर्जयित्वाद्वात्रिंशत्सहस्रसंख्याकेपुरःसरेषुमध्येएकैकस्यकार्यपुरस्सरंकार्यकरंएकैकसहस्रंतिष्ठति। एतच्चरावणगृहमध्येपरिचारसङ्ख्यानं। एतदतिरिक्तावबहवश्चूरास्सन्ति। अतोनाधीतिकोटियूथपमित्यादिविरोधः ॥१५॥ शी० योममपरिग्रहः यामम भार्याइत्यर्थः। परिग्रहशब्दोनियतपुंलिङ्गः, अत्रार्यजात्येकवचनेयोसौपरिग्रहइतिनिर्दिश्यतासामितिस्त्रीलिङ्गेनस्त्रीणांनिर्देशः। परमार्थतःपरिग्रहशब्दवाच्यालास्त्रीलादितिहेयं। मेममभार्यासतीतासामीश्वराखामिनीभवेत्यन्वयः। वस्तुतस्तु अभवप्रियेइतिच्छेदः। मोक्षप्रिये। भार्येत्यत्रभा आर्येतिच्छेदः। भा चिद्रूपिणी आर्याश्रेष्ठा त्वंममतासांचेश्वराभवेतियोजना। त्रि० इन्द्रियेतासांयःपरिग्रहः मूलं असौत्वमेवेतियोजना। "परिग्रहःस्त्रीकारमूलयोः"इतिविश्वः ॥ १७ ॥ शी० वस्तुतस्तु—कामाभितप्तस्य कामेनत्वद्मूलोभविष्यामीत्येवंरूपेणमनोरथेन। अभितप्तस्येत्यर्थः ॥ शि० ननुरामंविनाऽहंनस्यास्यामीत्यतआह।

[पा०] १ क.—ट. निर्घोषं. २ क. घ. छ. ज. ञ. भूषणं. ३ क, ग. क. ञ. ट. दान्तकाः. ४ क, ग. चित्राश्च भूमिभागान्सहस्रशः. ५ क.—ट. पुष्पसमावृताः. ग. वृक्षसमावृताः. ६ ख. ग. क. च. छ. ञ. ट. वैदेह्याः. ७ क. ग. घ. छ. ज. रावणोजनकात्मजां. ८ क. कोट्यस्तु. ९ क. ख. ग. च. छ. ज. येषां. १० क. छ.—ट. जनान्वृद्धान्, ११ च.—ट. राज्यतन्त्रं. १२ क.—ट. बहूनामुत्तमस्त्रीणां. १३ ज. क.—ट. सीश्वरी. १४ ख. भार्याभवमम. १५ क. ग. ज. सेऽन्यथा. १६ च. छ. भजकामाभितप्तस्य. क. भजस्वमेऽभितप्तस्य.

परिक्षिप्ता सहस्रेण लङ्केयं शतयोजना ॥ नेयं धर्षयितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ १९ ॥
न देवेषु न यक्षेषु न गन्धर्वेषु पक्षिषु ॥ अहं पश्यामि लोकेषु यो मे वीर्यसमो भवेत् ॥ २० ॥
राज्यभ्रष्टेन दीनेन तापसेन गतायुषा ॥ किं करिष्यसि रामेण मानुषेणाल्पतेजसा ॥ २१ ॥
भजस्व सीते मामेव भर्ताऽहं सदृशस्तव ॥ यौवनं ह्यध्रुवं भीरु रमस्वेह मया सह ॥ २२ ॥
दर्शने मा कृथा बुद्धिं राघवस्य वरानने ॥ काऽस्य शक्तिरिहागन्तुमपि सीते मनोरथैः ॥ २३ ॥
न शक्यो वायुराकाशे पाशैर्बद्धुं महाजवः ॥ दीप्यमानस्य वाऽप्यग्नेर्गृहीतुं विमला शिखा ॥ २४ ॥
त्रयाणामपि लोकानां न तं पश्यामि शोभने ॥ विक्रमेण नयेद्यस्त्वां मद्बाहुपरिपालिताम् ॥ २५ ॥
लङ्कायां सुमहद्राज्यमिदं त्वमनुपालय ॥ त्वत्प्रेष्या मद्विधाश्चैव देवाश्चापि चराचराः ॥ २६ ॥
अभिषेकोदकक्लिन्ना तुष्टा च रमयस्व माम् ॥ २७ ॥

इदं साधु समीचीनं । ते अन्यथाबुद्ध्या किं । रामविषया बुद्धिर्मा भूदित्यर्थः । तस्मात् मा मां । भजस्व । अभितप्तस्य कामाभितप्तस्य । मे प्रसादं कर्तुमर्हसि । अर्हसि किं नार्हसीत्यपि ध्वनिः ॥ १८ ॥ रामागमनप्रसक्तिरेव नास्तीत्याशयेनाह—परिक्षिप्तेति । "शतं सहस्रमयुतं सर्वमानन्त्यवाचकं" इति वचनात् सहस्रेण अनेकराक्षसैः । परिक्षिप्ता परिवृता । इयं लङ्का शतयोजना शतयोजनपरिमिता । तस्मान्नेयं धर्षयितुं शक्या ॥ १९ ॥ माभूत्पुरस्य दुर्धर्षता मम पुनर्वीर्यं शृण्वित्याह—न देवेष्विति । मे वीर्ये यःसमोभवेत् तं देवेषु न पश्यामि । यक्षेषु न पश्यामि । गन्धर्वेषु न पश्यामि । पक्षिषु च न पश्यामि ॥२०॥ गतायुषा अल्पायुषेत्यर्थः ॥ २१ ॥ इह भवने ॥ २२ ॥ राघवस्य दर्शने बुद्धिं मा कृथाः । तद्दर्शनं च दुर्लभमित्यर्थः । तदेव स्पष्टयति—कास्येति । अत्र आगन्तुं मानसिकव्यापारोपि नशक्यः किंपुनः कायिक इत्यर्थः ॥ २३ ॥ अशक्यत्वे दृष्टान्तमाह—न शक्य इति । विमला निर्धूमा । शिखा ज्वाला ॥ २४ ॥ लोकानामिति निर्धारणे षष्ठी ॥ २५ ॥ त्वत्प्रेष्याः त्वत्परिचारिकाः । भविष्यन्तीति शेषः ॥ २६ ॥ अभिषेकेत्यर्धमेकं वाक्यं । अभिषेकोदकेन पट्टमहिषी-

साध्विति । साधु स्वहितंममवचोरोचयस्व । अन्यथारामविषयिण्याबुद्ध्यातेकिं नकिमपीत्यर्थः । अतएव स्वमा ममनित्यमाता । त्वंभज सेवांकारय । अभितप्तस्य भ्रात्रादिवधेनपीडितस्यममप्रसादंप्रसन्नतांकर्तुंत्वमर्हसि ॥ १८ ॥ ती० राज्यभ्रष्टेनेत्यादिश्लोकद्वयस्यवाक्यार्थस्स्पष्टः । वस्तुतस्तु—राज्यभ्रष्टेन राज्याद्भ्रष्टाः रिपवोयस्मात्तेन । दीनेनतापसेनगतायुषेत्यन्तमेकंपदं । दीनानामिनः । तापसानामिनः । दीनेनश्चासौतापसेनश्चदीनेनतापसेनः । तादृशस्सन् । गतंप्राप्तंआयुः एकादशसहस्रवत्सरपरिमितंयेनतेन । दीनजनानांतापसानांचरक्षणार्थमवतीर्णेनेत्यर्थः । मानुषेण मनुष्यरूपेणावतीर्णेन । अल्पतेजसा अल्पमितरेषांतेजोयस्मात्तेन । "तमेवभान्तमनुभातिसर्वंतस्यभासासर्वमिदंविभाति" इतिश्रुतेः । रामेणकिं एतादृशंपरमपुरुषमुद्दिश्यकिमर्थंविलापःक्रियतइति भावः ॥—॥ भजस्वेति । मामेवेतिच्छेदः । यौवनं यौवनशब्देनसर्वाअवस्थालक्ष्यन्ते । ताभिस्सर्वमायुर्लक्ष्यते । तथाचयतःमे मम । त्वत्सेवानुकूलंसर्वमायुरध्रुवं । भर्ता बिभर्तिशुश्रूषादिनास्वामिनमितिभर्ताभृत्यः । सदृशः अनुरूपः । यतस्तवाहमनुरूपोभृत्यः अतोमां मांभजस्व भृत्यत्वेनाङ्गीकुरु । अव रक्षच । तदर्थमिहलङ्कायांमयासहराज्यलक्ष्म्यासह रमस्व ॥ २१–२२ ॥ शि० रामविषयकविरक्तिमुत्पादयन्नाह—राज्येति । राज्यभ्रष्टेन अतएव अल्पतेजसा रामेण किंकरिष्यसि । एतेन रामकर्तृकराज्यप्राप्त्यनन्तरंतत्संगमःकर्तव्यइतिव्यञ्जितं ॥२१॥ ती० दर्शनइत्यादिश्लोकत्रयस्यप्रातीतिकार्थस्स्पष्टः । वस्तुतस्तु—यथावायुर्बद्धुंनशक्यते अग्नेःशिखागृहीतुंयथानशक्यते । एवंमनोरथैरपिइहलङ्कांप्रत्यागन्तुंकस्यशक्तिः नकस्यापि ॥ रामंविनेतिशेषः । तथामद्बाहुपरिपालितांत्वांयोहरेत् तंनपश्यामि । रामं विनेतिशेषः । श्रीरामश्चेदागन्तुंशक्नुयात्त्वामाहर्तुंचशक्नुयात् । अतस्सएवागत्यत्वांप्राप्स्यति । त्वंतुश्रीरामंकदाद्रक्ष्यामीत्युत्कण्ठांमाकुर्वित्यर्थः ॥ २३—२५ ॥ ती० लङ्कायामित्यारभ्यअलंक्रीडेनेत्यन्तश्लोकानांप्रातीतिकार्थस्स्पष्टः । वस्तुतस्तु—कुलदेवतायैदेव्यैरावणस्स्वात्मात्मीयसमर्पणंकरोति लङ्कायामित्यादिश्लोकद्वयेन । मद्विधाइत्यनेनात्मसमर्पणं । लङ्कायांराज्यमनुपालयेत्यनेनात्मीयसमर्पणमितिज्ञेयम् ॥ २६—२७ ॥

[पा०] १ क.—ट. समुद्रेण. २ क. च. छ. ज. ञ. गन्धर्वेषूरगेषुच. ३ ग. ङ. झ. ट. नर्षिषु. ४ ङ. छ. झ. ट. पदातिना. ५ ख. चेतसा. ६ ङ. झ. ट. ह्यध्रुवं. ७ ख. रथागन्तुं. ८ ख. मनोजवः. ९ क. ख. च. छ. ज. चाप्यग्नेः. १० ङ. झ. ट. विमलाःशिखाः. ११ क. ख. बलपालितां. १२ ङ. झ. ञ. लङ्कायाः. १३ ङ. झ. ञ. ट. चराचरं. १४ ङ. झ. ट. अभिषेकजलक्लिन्ना.

दुष्कृतं यत्पुरा कर्म वनवासेन तद्गतम् ॥ यश्च ते सुकृतो धर्मस्तस्येह फलमाप्नुहि ॥ २८ ॥
इह माल्यानि सर्वाणि दिव्यगन्धानि मैथिलि ॥ भूषणानि च मुख्यानि सेवस्व च मया सह ॥२९॥
पुष्पकं नाम सुश्रोणि भ्रातुर्वैश्रवणस्य मे ॥ विमानं सूर्यसंकाशं तरसा निर्जितं मया ॥ ३० ॥
विशालं रमणीयं च तद्विमानमनुत्तमम् ॥ तत्र सीते मया सार्धं विहरस्व यथासुखम् ॥ ३१ ॥
वदनं पद्मसंकाशं विमलं चारुदर्शनम् ॥ शोकार्तं तु वरारोहे न भ्राजति वरानने ॥ ३२ ॥
एवं वदति तस्मिन्सा वस्त्रान्तेन वराङ्गना ॥ पिधायेन्दुनिभं सीता मुखमश्रूण्यवर्तयत् ॥ ३३ ॥
ध्यायन्तीं तामिवास्वस्थां दीनां चिन्ताहतप्रभाम् ॥ उवाच वचनं पापो रावणो राक्षसेश्वरः ॥ ३४ ॥
अलं व्रीडेन वैदेहि धर्मलोपकृतेन च ॥ आर्षोयं दैवनिष्यन्दो यस्त्वामभिगमिष्यति ॥ ३५ ॥
एतौ पादौ महास्निग्धौ शिरोभिः परिपीडितौ ॥ प्रसादं कुरु मे क्षिप्रं वश्यो दासोऽहमस्मि ते ॥३६॥

त्वेनाभिषेकोदकेन क्लिन्ना सिक्ता ॥ २७ ॥ पुरा पूर्वजन्मनि । यद्दुष्कृतं कर्मास्ति तत् वनवासेन वनवासक्लेशेन । दत्तफलत्वात् गतं नष्टं ॥ २८ ॥ भूषणानि च मुख्यानि सेवस्व धारयेत्यर्थः ॥ २९ ॥ तरसा बलेन ॥ ३० ॥ विशालं वेशनयोग्यं । "वेः शालच्छङ्कटचौ" इत्यनेन शालच् प्रत्ययः । असंकोचन्यायाद्यावदुपवेशेष्वसंभावनमुपवेशार्हमित्यर्थः ॥ ३१ ॥ न भ्राजति न भासते ॥ ३२ ॥ वदतीति सतिसप्तमी । पिधाय आच्छाद्य ॥ ३३ ॥ इवशब्दोऽवधारणे । यद्वा अस्वस्थामिव भूताविष्टामिवेत्यर्थः ॥ ३४ ॥ हे वैदेहि धर्मलोपकृतेन व्रीडेनालं व्रीडा माभूदित्यर्थः । कुत इत्यत्राह—आर्ष इति । यो दैवनिष्यन्दः दैवकृतसंबन्धः । त्वामभिगमिष्यति । अयं संबन्धः आर्षः ऋषिप्रोक्तः । न त्वधर्म्य इत्यर्थः । अत्र नारदः—"परपूर्वा स्त्रियस्त्वन्याः सप्त प्रोक्ताः स्वयंभुवा । पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्विधा ॥ कन्यावाक्षतयोनिर्वा पाणिग्रहणदूषिता । पुनर्भूः प्रथमा प्रोक्ता पुनःसंस्कारकर्मणा ॥ देशधर्मानपेक्ष्य स्त्री गुरुभिर्या प्रदीयते । उत्पन्नसाहसाऽन्यस्मै सा द्वितीया प्रकीर्त्यते ॥ मृते भर्तरि तु प्राप्ता देवरादीनपास्य या । उपगच्छेत्परं कामात्सा तृतीया प्रकीर्तिता ॥ प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा च या । तवाहमित्युपगता सा चतुर्थी प्रकीर्तिता" इति ॥ ३५ ॥ एताविति

शि० अभिषेकजलक्लिन्ना अभिषेकजलैःस्नानोदकैः क्लिन्ना स्नाता । तुष्टा लङ्काराज्यप्राप्त्याप्राप्तसंतोषाच्चत्वंमां लङ्कासंपत्तिं । रमयस्वयथेच्छंपालय । एतेनापहरणसमयादारभ्यतावत्कालपर्यन्तंस्नानं तयानकृतमितिसूचितम् ॥ २७ ॥ ती० सुकृतफलमपिसमर्पयति—दुष्कृतमिति । वनवासेन वनं जलं । जलमध्यस्थलङ्काद्वीपवासिना । मयेति शेषः । पुरायद्दुष्कृतं कर्म कृतमितिशेषः । तद्गतं नष्टं । मदिष्टदेवतायास्तवदर्शनमात्रेणेतिशेषः । पुरामयासुकृतोयोधर्मस्तस्यफलंतेतुभ्यंनिवेदयामि । आप्नुहि गृहाणेत्यर्थः ॥ २८ ॥ ती० इहेति । मयासमर्पितानीतिशेषः । सह एकदैव ॥ २९ ॥ ती० पुष्पकमित्यादिश्लोकद्वयमेकंवाक्यं । अत्रपुष्पके मयासमर्पितेपुष्पकइत्यर्थः । सार्धं । सर्वसंपद्भिरितिशेषः । विहरस्व ॥ ३०—३४ ॥ ती० अलंव्रीडेनेति । वैदेहि धर्मलोपकृतेनालं । व्रीडामाभूदित्यर्थः । कुतइति चेत् । दैवनिष्यन्दः दैवनिपातः यस्संबन्धःत्वामभिगमिष्यति सोयं दैवनिष्यन्दः आवयोर्निष्कारणस्संबन्धइतियावत् । आर्षः ऋषिदृष्टः । अनादिसिद्धइतियावत् । वस्तुतस्तु अलंव्रीडेनेति । भृत्यलक्षणविषयेव्रीडानोचितेत्यर्थः । कोवातोधर्मलोपोभविष्यति । कुत योदैवनिष्यन्दः आवयोर्दैवेनसंपादितदासदासवद्भावः अयंसंबन्धः आर्षः अनादिसिद्धः । सएवत्वामभिगमिष्यति नतुनवीन । अतोव्रीडामाभूदित्यर्थः ॥ ति० हेदेवि त्वामभि त्वामुद्दिश्य । मयाक्रियमाणोनिष्यन्दः स्नेहबन्धः प्रार्थनारूपः । यश्चाप्रेभविष्यति सोयमार्षः ऋषिदृष्टएव । क्षत्रियाणामुचितत्वेनवेदोक्तएव । "बलात्कारेणराक्षसः"इतिविवाहेषुस्मृत्यागणनात् । एवमुक्तिरपितमोगुणप्राधान्येनैव । कन्यायाबलात्कारे-

[पा०] १ ङ.—ट. यच्चतेसुकृतंकर्मतस्येह. २ क.—ट. सर्वाणिमाल्यानि. ३ ङ. च. छ. झ. ञ. ट. तानिसेव. क. निषेवय. ४ ख. चार्जितं. ५ ङ. झ. ञ. ट. रणे. ६ ख. ङ—ट. द्विमानंमनोजवं. ७ च. छ. पुष्पकेऽत्रमया. ८ ख.—ङ. झ. ट. मन्दमश्रूणि. ९ ङ. झ. ट. सीतांचिन्ता. क. च. छ. ज. दीनचित्तां. १० क. च. छ. ज. ञ. सीतांरावणो. ग. ङ. झ. ट. वीरोरावणो. ११ ख. ग. ङ.—ट. रजनीचरः. १२ ख. लोपेनतेनते. क. ग. ङ.—ट. लोपकृतेनते. १३ झ. देविनिष्यन्दो. १४ ख. ग. ङ—ट. मयास्निग्धौ.

इमाः शून्या मया वाचः शुष्यमाणेन भाषिताः ॥ न चापि रावणः कांचिन्मूर्ध्ना स्त्रीं प्रणमेत ह ॥३७॥
एवमुक्त्वा दशग्रीवो मैथिलीं जनकात्मजाम् ॥ कृतान्तवशमापन्नो ममेयमिति मन्यते ॥ ३८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मिकीये आदिकाव्ये आरण्यकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

षट्पञ्चाशः सर्गः ॥ ५६ ॥

रावणप्रलोभनैरविकृतमानसयासीतया तृणमन्तरतःकृत्वा तंप्रतिबहुधोपालंभपूर्वकं रामप्रभाववर्णनेन तेनतद्वधस्याव-श्यंभावित्वोक्त्या पश्चात्तूष्णींभावः ॥ १ ॥ रावणेनसीतांप्रति तदादित्रयोदशमासादर्वाक्तनकाले स्वभजनाभावे हननप्रति-ज्ञानपूर्वकं राक्षसीःप्रति सीतायाअशोकवनप्रापणेनतत्र तर्जनप्रलोभनाद्युपायैर्वशीकरणचोदना ॥ २ ॥ राक्षसीभिः सीतायाअशोकवनप्रापणेनाप्रमादेनपरिरक्षणं ॥ ३ ॥

सा तथोक्ता तु वैदेही निर्भया शोककर्शिता ॥ तृणमन्तरतः कृत्वा रावणं प्रत्यभाषत ॥ १ ॥
राजा दशरथो नाम धर्मसेतुरिवाचलः ॥ सत्यसन्धः परिज्ञातो यस्य पुत्रः स राघवः ॥ २ ॥
रामो नाम स धर्मात्मा त्रिषु लोकेषु विश्रुतः ॥ दीर्घबाहुर्विशालाक्षो दैवतं हि पतिर्मम ॥ ३ ॥
इक्ष्वाकूणां कुले जातः सिंहस्कन्धो महाद्युतिः ॥ लक्ष्मणेन सह भ्रात्रा यस्ते प्राणान्हरिष्यति ॥ ४ ॥
प्रत्यक्षं यद्यहं तस्य त्वया स्यां धर्षिता बलात् ॥ शयिता त्वं हतः संख्ये जनस्थाने यथा खरः ॥ ५ ॥
य एते राक्षसाः प्रोक्ता घोररूपा महाबलाः ॥ राघवे निर्विषाः सर्वे सुपर्णे पन्नगा यथा ॥ ६ ॥
तस्य ज्याविप्रमुक्तास्ते शराः काञ्चनभूषणाः ॥ शरीरं विधमिष्यन्ति गङ्गा कूलमिवोर्मयः ॥ ७ ॥
असुरैर्वा सुरैर्वा त्वं यद्यवध्योसि रावण ॥ उत्पाद्य सुमहद्वैरं जीवंस्तस्य न मोक्ष्यसे ॥ ८ ॥

तवेति शेषः ॥ ३६ ॥ शुष्यमाणेन अनङ्गेनतप्यमानेन मया । इमाः शून्याः नीचाः वाचो भाषिताः । कुतः यस्माद्रावणः स्त्रीं न प्रणमेत न प्रणमेत् । अदृष्टपूर्व-त्वात्स्वस्यापि नीचोक्तिर्विस्मयावहा जातेति भावः ॥३७॥ मन्यते अमन्यत ॥३८॥ इति श्रीगोविन्दराज-विरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आर-ण्यकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

तथैतच्छ्रुत्वा परुषं भाषमाणायाः सीतायाः पुन-रशोकवनिकानयनं षट्पञ्चाशे । अन्तरतो मध्ये । पतिव्रतायाः परपुरुषं प्रत्यभिमुखतया भाषणायोगात् ॥ १ ॥ धर्मसेतुः धर्मस्य सेतुरिव । मर्यादास्थापक इत्यर्थः । अचलः स्थिरः । परिज्ञातः प्रसिद्धः । कथ-मेतादृशकुलं प्राप्ताऽतिचरेदिति भावः ॥ २ ॥ सः दशरथपुत्रः । दैवतं सर्वलोकानामिति शेषः । य एवंभूतः स मे पतिरिति योजना । कथमेवंभूतभ-र्तृकातिचरेदिति भावः ॥ ३ ॥ इक्ष्वाकूणामिति । त्वद्वधार्थमेव भ्रात्रा सह इक्ष्वाकुकुलेऽवतीर्ण इति भावः । तथाच न मे त्वत्तो भयमितिभावः ॥ ४ ॥ तर्हि कथमिदानीं स तूष्णीं स्थित इत्याशङ्क्याह— प्रत्यक्षमिति । प्रत्यक्षं यथातथा यदिधर्षितास्यां तदा त्वं हतः सन् युद्धे शयिता म्रियेथा इत्यर्थः ॥ ५ ॥ निर्विषाः निर्वीर्या इति राक्षसपक्षे ॥ ६ ॥ विधमि-ष्यन्ति ध्मास्यन्ति निपातयिष्यन्तीत्यर्थः । गङ्गेत्यवि-भक्तिकनिर्देशः । गङ्गाया ऊर्मय इत्यर्थः ॥ ७ ॥ त्वं सुरासुरैर्यद्यप्यवध्यः तथापि तस्य रामस्य । सुमह-

---

णग्रहणस्यैवराक्षसविवाहपदार्थादितिबोध्यं ॥ ३५ ॥ ति० इमाः दासोहमित्यन्ताः । शुष्यमाणेन कामपीडितेनमया । भाषिताः उक्तावाचः । शून्यायथानभवन्ति तथाकुर्वितिशेषः ॥ ३७ ॥ इतिपञ्चपञ्चाशस्सर्गः ॥ ५५ ॥

ति० निर्भया स्त्रियाबलादुपभोगे "मूर्धातेनिपतिष्यति" इत्यप्सरसो रावणंप्रति शापंचित्तेविज्ञायनिर्भया । बलात्कारेयोगवशादर-श्याऽस्पृश्याच भविष्यामीतिधियानिर्भयावा ॥ स० तृणमन्तरतः मध्येकृत्वा । प्रत्यभाषतेत्यर्थः । अनेनरावणस्याभाष्यत्वं द्योत्यते । वायसासुरशासनंतृणेनैवममपत्याकृतं तवापिदशानन दशातथास्यादितिद्योतयितुमितिवा ॥ १ ॥

[पा०] १ क. ख. घ. छ. ज. ञ. मेमाः. २ झ. शून्यमयाः. ३ क.—ट. सपतिः. ४ ङ. छ.—ट. न्वधिष्यति. ५ ङ. झ. ट. त्वयावै. ६ ख. एतेते. ७ ङ. सुरैर्वापि. ८ ग. सुमहावैरं.

स ते जीवितशेषस्य राघवोऽन्तकरो बली ॥ पशोर्यूपगतस्येव जीवितं तव दुर्लभम् ॥ ९ ॥
यदि पश्येत्स रामस्त्वां रोषदीप्तेन चक्षुषा ॥ रक्षस्त्वमद्य निर्दग्धो गच्छेः सद्यः पराभवम् ॥ १० ॥
यश्चन्द्रं नभसो भूमौ पातयेन्नाशयेत वा ॥ सागरं शोषयेद्वाऽपि स सीतां मोचयेदिह ॥ ११ ॥
गतायुस्त्वं गतश्रीको गतसत्त्वो गतेन्द्रियः ॥ लङ्घा वैधव्यसंयुक्ता त्वत्कृतेन भविष्यति ॥ १२ ॥
नैं ते पापमिदं कर्म सुखोदर्कं भविष्यति ॥ याहं नीता विनाभावं पतिपार्श्वात्त्वया वने ॥ १३ ॥
सं हि दैवतसंयुक्तो मम भर्ता महाद्युतिः ॥ निर्भयो वीर्यमाश्रित्य शून्ये वसति दण्डके ॥ १४ ॥
स ते दर्पं बलं वीर्यमुत्सेकं च तथाविधम् ॥ अपनेष्यति गात्रेभ्यः शरवर्षेण संयुगे ॥ १५ ॥
यदा विनाशो भूतानां दृश्यते कालचोदितः ॥ तदा कार्ये प्रमाद्यन्ति नराः कालवशं गताः ॥ १६ ॥
मां प्रधृष्य स ते कालः प्राप्तोऽयं राक्षसाधम ॥ आत्मनो राक्षसानां च वधायान्तःपुरस्य च ॥ १७ ॥
न शक्या यज्ञमध्यस्था वेदिः स्रुग्भाण्डमण्डिता ॥ द्विजातिमन्त्रपूता च चण्डालेनावमर्दितुम् ॥ १८ ॥
तथाऽहं धर्मनित्यस्य धर्मपत्नी पतिव्रता ॥ त्वया स्प्रष्टुं न शक्याऽसि राक्षसाधम पापिना ॥ १९ ॥
क्रीडन्ती राजहंसेन पद्मषण्डेषु नित्यदा ॥ हंसी सा हीनषण्डस्थं कथं पश्येत मद्विधम् ॥ २० ॥

दैवैः कोपमुत्पाद्य स्थितस्त्वं जीवन्सन् तच्छरपातान्न मोक्ष्यसे नमुक्तोभविष्यसीत्यर्थः ॥ ८ ॥ स राघवः । ते जीवितशेषस्य अन्तकरः नाशं कर्तुं समर्थः । तस्मात् यूपगतस्यपशोरिव रामापराधिनस्तव । जीवितं दुर्लभं ॥ ९ ॥ हे रक्षः स रामः त्वां रोषदीप्तेनचक्षुषा यदिपश्येत् तदा त्वं निर्दग्धःसन् सद्यः पराभवं गच्छेः । निर्दग्धशब्देनातीव पीडितत्वमुच्यते ॥१०॥ नभसः आकाशात् । पातयेत् नाशयेतवा अदर्शनं प्रापयेद्वा । सागरमपि शोषयेत् । सः सीतांमोचयेदिति किमुत ॥ ११ ॥ त्वत्कृतेन परदारामिमर्शनरूपपापेन । त्वं आयुरादिहीनोभविष्यसि । लङ्घाच वैधव्यसंयुक्ता अनाथत्वयुक्ता भविष्यति । "आयुर्बलं यशो लक्ष्मीः परदारामिमर्शनात् । सद्यएव विनश्यन्ति"इति स्मृतेः ॥ १२ ॥ याऽहं वने पतिपार्श्वात् विनाभावं वियोगं । नीता । तस्यां मयि ते इदं पापं कर्म सुखोदर्कंनभविष्यति । किंतु दुःखोदर्कमेव भविष्यतीत्यर्थः ॥ १३ ॥ दैवतसंयुक्तः दैवबलसंयुक्तः । दीनस्तापसो रामो मां किं करिष्यतीति पूर्वं रावणेनोक्तस्य परिहारोयम् ॥ १४ ॥ दर्पं मदं । उत्सेकं बलस्य कार्यकारित्वं । गात्रेभ्य इत्युक्तिर्दर्पादीनां देहविशिष्टगुणत्वात् ॥१५॥ लोकन्यायमाह—यदेति । कालचोदितो दैवकृतः विनाशोयदा दृश्यते सन्निहितो भवतीत्यर्थः । तदा कार्ये कृत्ये । प्रमाद्यन्ति वैपरीत्यं प्राप्नुवन्ति ॥ १६ ॥ उक्तं लोकन्यायं प्रकृते योजयति—मामिति । मां प्रधृष्य स्थितस्यतव कालोप्ययमेव वर्तमानएव नतुचिरायेत्यर्थः । आत्मनो राक्षसानामन्तःपुरस्य च वधाय प्राप्तः ॥ १७ ॥ न शक्येत्यादिश्लोकद्वयमेकान्वयं । यज्ञो यज्ञपुरुषः तन्मध्यस्था गार्हपत्याहवनीयमध्यगता । वेदिः ऐष्टिकीमहावेदिः । स्रुग्भाण्डमण्डिता स्रुगाद्युपकरणालंकृता । द्विजातिमन्त्रैः ब्रह्मजनादिमन्त्रैः । पूता शुद्धा यथा चण्डालेनावमर्दितुं पादेनाक्रमितुं । न शक्या नार्हा । तथाहं धर्मनित्यस्य नित्यधर्मस्य यज्ञस्थानीयस्य । धर्मपत्नी पतिव्रता । त्वयास्प्रष्टुं न शक्या ॥ १८—१९ ॥ नित्यदा नित्यं ।

सी० त्वत्कृतेन त्वन्नाशनिमित्तेन ॥ १२ ॥ ति० तेन रामस्यातिसामर्थ्यविशिष्टत्वेनहेतुना इदमपहरणरूपं पापंकर्मैतु सोदर्कं भविष्यति । नतेइतिपाठे काकुर्वोध्या । अतएव याहंपतिपार्श्वात्विनाभावं पतिसेवाराहित्यं । बलात् हठात् नीता प्रापिता । तां मां रामोनेष्यतीतिशेषः ॥१३॥ ति० देवरसंयुक्तः लक्ष्मणसंयुतः । सः खरादिहन्ता ॥१४॥ ति० खमरणेनवैधव्यमेवान्तःपुरस्यः ॥ १७ ॥ ति० द्रक्ष्येत पश्येत् ॥ २० ॥

[पा०] १ ख. रोषादीप्तेन. २ ङ. झ. ट. यथाक्रोधमन्मथः. ३ ख. च. छ. ञ. शोषयेच्चापि. ४ क. छ. झ. ञ. ट. गताश्रुस्त्वं. ५ क. ट. तेन. ६ क. ट. दुःखोदर्कं. ७ क. ख. ग. च. ञ. बलात्. ङ. छ. झ. ट. बलात्. ८ क. योहि. ९ ङ. झ. ञ. ट. देवरसंयुक्तो. १० क. च. छ. झ. ञ. ट. वीर्यबलंदर्पं. ११ ङ. झ. ट. व्यपनेष्यति. १२ ख. च. छ. ज. ट. मन्त्रसंपूता. १३ ख. नाभिमर्शितुं. १४ क.—ट. दृढव्रता. ग. यशस्विनी. १५ ख. शक्यासा. ग. ङ. झ. शक्याहं. १६ क. ङ. छ.—ट. निश्चयः. १७ क. ङ. छ.—ट. तृणमध्यस्थं. १८ क. ग. ङ.—ट. द्रक्ष्येत.

इदं शरीरं निस्संज्ञं बन्ध वा खादयस्व वा ॥ नेदं शरीरं रक्ष्यं मे जीवितं वाऽपि राक्षस ॥ २१ ॥
न तु शक्ष्याम्युपक्रोशं पृथिव्यां दातुमात्मनः ॥ २२ ॥
एवमुक्त्वा तु वैदेही क्रोधार्त्तापरुषं वचः ॥ रावणं मैथिली तत्र पुनर्नोवाच किंचन ॥ २३ ॥
सीताया वचनं श्रुत्वा परुषं रोमहर्षणम् ॥ प्रैत्युवाच ततः सीतां भयसंदर्शनं वचः ॥ २४ ॥
शृणु मैथिलि मद्वाक्यं मासान्द्वादश भामिनि ॥ कालेनानेन नाभ्येषि यदि मां चारुहासिनि ॥
ततस्त्वां प्रातराशार्थं सूदाश्छेत्स्यन्ति लेशशः ॥ २५ ॥
इत्युक्त्वा परुषं वाक्यं रावणः शत्रुरावणः ॥ राक्षसीश्च ततः क्रुद्ध इदं वचनमब्रवीत् ॥ २६ ॥
शीघ्रमेव हि राक्षस्यो विकृता घोरदर्शनाः ॥ दर्पमस्या विनेष्यध्वं मांसशोणितभोजनाः ॥ २७ ॥
वचनादेव तस्यास्य सुघोरा राक्षसीगणाः ॥ कृतप्राञ्जलयो भूत्वा मैथिलीं पर्यवारयन् ॥ २८ ॥
स तासीः प्रोवाच राजा तु रावणो घोरदर्शनः ॥ प्रचाल्य चरणोत्कर्षैर्दारयन्निव मेदिनीम् ॥ २९ ॥
अशोकवनिकामध्ये मैथिली नीयतामियम् ॥ तत्रेयं रक्ष्यतां गूढं युष्माभिः परिवारिता ॥ ३० ॥

नित्यशब्दस्य सर्वैकादिष्वपाठेप्यार्षोदाम्रलयः । सा प्रसिद्धा । तृणषण्डस्थं जलजनडादितृणकदम्बमध्यस्थं । महुकं जलकाकं ॥ २० ॥ निःसङ्गं निश्चेष्टं । बन्ध बधान । खादयस्व भक्षय ॥ २२ ॥ न त्वित्यर्धमेकं वाक्यं । आत्मनः अपक्रोशं अपवादं । पृथिव्यां दातुं नशक्ष्यामि ॥ २२ ॥ तत्र तद्विषये । क्रियाभेदात्पुनर्मैथिलीशब्दप्रयोगः ॥ २३ ॥ रोमहर्षणं क्रोधावहत्वाद्रोमाञ्चकरं । भयसंदर्शनं भयोत्पादकं ॥२४॥ शृण्विलादिसार्धश्लोक एकान्वयः । द्वादश मासानित्यत्यन्तसंयोगे द्वितीया । प्रतीक्ष इति शेषः । प्रातराशार्थं प्रातर्भक्षणार्थं । सूदाः पाचकाः "सूदौदनिकौ गुणाः" इत्यमरः । सीताहरणं चैत्रमास इत्यवगन्तव्यं । संवत्सरान्ते रावणवधकरणात् । तेन श्रीन्धर्वान्पञ्चवट्यां रामःस्थित इति गम्यते । हेमन्तवर्णनं तु रामतपोविशेषज्ञापनाय नशूर्पणखागमनज्ञापनाय ॥२५॥ शत्रून् रावयति क्रोशयतीति शत्रुरावणः ॥२६॥ विनेष्यध्वं विनयध्वं । व्यत्ययेन स्वादेशः ॥२७॥ कृतप्राञ्जलयः रावणवाक्याङ्गीकारे कृतप्रकृष्टाञ्जलयः ॥२८॥ चरणोत्कर्षैः चरणाघातैः । मेदिनीं भुवं । दारयन्निव भिन्दन्निव । प्रचाल्य गत्वा उत्थायवा ताः प्रोवाच ॥ २९ ॥ युष्माभिःपरिवारिता युष्माभिः रक्ष्य-

---

ति० निस्संज्ञं स्वतोजडं ॥ २१ ॥ गो० वस्तुतस्तु हेवैदेहि मेवाक्यंशृणु । तत्किं द्वादशमासान् द्वादशमासपर्यन्तं । प्रतीक्षइतिशेषः । अनेनकालेननाभ्येषि । द्वादशमासपर्यन्तं श्वत्वानुग्रहार्थमत्रस्थातुंनाङ्गीकरोषियदीत्यर्थः । ततस्त्वामुदिश्य प्रातराशार्थं प्रात- प्रातरेव आशार्थं आशासुस्थितपूषार्थं । सूदाः माछेत्स्यन्ति । मदाज्ञयेतिशेष । देवि मांभृत्यत्वेननाङ्गीकरोषियदि अहमित-परं जीवितुंनेच्छामि । मांशश्वैदिछत्वाकाकपूषार्थंप्रयच्छतेतिसमाज्ञयैवसूदास्तथाकरिष्यन्तीतिभावः । ति० वस्तुपाथे—"दशमासात्परंसीतेयदिमांनभजिष्यसि । तदाहन्मि" इत्युक्तं तत्तु पुनस्सीतासविधगमनकालिकंनचहतिनविरोधः । नाभ्येषि स्वास्येनेतिशेषः ॥ स० पद्मपुराणे "दशमासात्परंसीते" इत्येवकथनात् द्वादशमासानन्तर्यस्यापिदशमासानन्तर्यसंभवान्नविरोधः । यद्वा दशचमासौचतेषांसमाहारः । दशपदार्थेमासपदार्थस्यबुध्याविवेकेनान्वयः । अतोद्वादशमाससंपत्तिरितिनविरोधः ॥ २५ ॥ गो० वस्तुतस्तु हेराक्षस्यः मांसशोणितभोजनाः घोरदर्शनाश्चयूयंक्षीघ्रमविकृताः अविरूपामूत्वा । दर्पंविनाअस्यास्समीपे स्थयूयं सेवार्थंस्थातुमिच्छतेत्यर्थः । छादेशाभावादिरार्षः ॥ २७ ॥

[पा०] १ ध. रक्षिष्ये. २ च. छ. ज. झ. चापि. ३ ख. ङ. छ. ट. शक्ष्याम्यपक्रोशं. झ. शक्यमपक्रोशं. ४ क. ख. त्वपरुषं. ५ ङ. छ. झ. ट. जानकी. ६ घ. परुषंश्रुत्वाहचनं. ७ ख. रावणःपरमःकुद्धइदंवचनमब्रवीत्. ८ ख. तदा. ९ ङ. च. छ. झ. ञ. ट. विरूपाः. १० क.—ट. मस्यापनेष्यन्तु. क. ग. मस्याविनेष्यन्तु. ख. मस्यापनेष्यध्वं. ११ क. ग. च. छ. ज. ञ. विकृताः. १२ क. ग. ङ.—ट. घोरदर्शनाः. १३ ख. तत-प्राञ्जल्यो. १४ क. च. छ. ज. ञ. जानकीं. १५ ग. ताब्रोवाच. १६ ख. ङ. झ. ट. राजासौ. १७ ङ. झ. ट. प्रचल्य. घ. छ. ज. प्रचार्य. १८ ग. ङ. झ. ट. मिति. ख घ. मितः.

तत्रैनां तर्जनैर्घोरैः पुनः सान्त्वैश्च मैथिलीम् ॥ आनयध्वं वशं सर्वा वन्यां गजवधूमिव ॥ ३१ ॥
इति प्रतिसमादिष्टा राक्षसो रावणेन ताः ॥ अशोकवनिकां जग्मुर्मैथिलीं प्रतिगृह्य तु ॥ ३२ ॥
सर्वकालफलैर्वृक्षैर्नानापुष्पफलैर्वृताम् ॥ सर्वकालमदैश्चापि द्विजैः संसेवितां ॥ ३३ ॥
सा तु शोकपरीताङ्गी मैथिली जनकात्मजा ॥ राक्षसीवशमापन्ना व्याघ्रीणां हरिणी यथा ॥३४॥
शोकेन महता ग्रस्ता मैथिली जनकात्मजा ॥ न शर्म लभते भीरुः पाशबद्धा मृगी यथा ॥ ३५ ॥
न विन्दते तत्र तु शर्म मैथिली विरूपनेत्राभिरतीव तर्जिता ॥
पतिं स्मरन्ती दयितं च दैवतं विचेतनाऽभूद्भयशोकपीडिता ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

अथ प्रक्षिप्तसर्गः ।

प्रवेशितायां सीतायां लङ्कां प्रति पितामहः ॥ तदा प्रोवाच देवेन्द्रं परितुष्टं शतक्रतुम् ॥ १ ॥
त्रैलोक्यस्य हितार्थाय रक्षसामहिताय च ॥ लङ्कां प्रवेशिता सीता रावणेन दुरात्मना ॥ २ ॥
पतिव्रता महाभागा नित्यं चैव सुखैधिता ॥ अपश्यन्ती च भर्तारं पश्यन्ती राक्षसीजनम् ॥ ३ ॥
राक्षसीभिः परिवृता भर्तृदर्शनलालसा ॥ निविष्टा हि पुरी लङ्का तीरे नदनदीपतेः ॥ ४ ॥

तां ॥ ३० ॥ अत्यन्तभयेन प्राणवियोगो मा भूदिति पुनः सान्त्वैरित्युक्तं ॥३१॥ प्रतिगृह्य आदाय ॥३२॥ सर्वस्मिन्नपि काले फलानि येषां ते सर्वकालफलाः तैः। एवमुत्तरत्रापि जग्मुरिति पूर्वेणान्वयः ॥३३॥ राक्षसीत्यविभक्तिकनिर्देशः। राक्षसीनामित्यर्थः ॥३४॥ लभते अलभत ॥ ३५ ॥ तत्र अशोकवनिकायां। दयितं प्राणवल्लभं। ननु सीता लक्ष्म्याअवतार इति सिद्धं। वक्ष्यति हि "सीतालक्ष्मीर्भवान्विष्णुः" इति। विष्णुपुराणे चोक्तं "राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनि" इति। एवंभूतांसीतां समरसीमनिजनिसमूर्च्छालक्षणंलक्ष्मणमप्युद्धर्तुमसमर्थो रावणः कथं बलात्करोति स्म। वक्ष्यति हि "हिमवान्मन्दरो मेरुर्लोकयंवासहामरैः। शक्यं भुजाभ्यामुद्धर्तुं न संख्ये भरतानुजः" इति। उच्यते। वेदवतीरूपपूर्वजन्मनि देवी तथा संकल्पितवती। उक्तं ह्युत्तरकाण्डे "यस्मात्तु धर्षिता चाहं त्वया पापात्मना वने। तस्मात्तव वधार्थं वै उत्पत्स्येहं महीतले" इति ॥ देवकार्यनिर्वाहाय स्वयमेव स्वधर्षणमङ्गीचकार। प्रजायां कूपपतितायां यथा माता स्वयंतदुपरिपतति वात्सल्यातिशयेन तथा रावणवन्दीकृतदेवस्त्रीरक्षणाय स्वयं तत्रस्वगमनमनुमतवती। वक्ष्यति सुन्दरकाण्डे "नापहर्तुमहं शक्या तस्य रामस्य धीमतः। विधिस्तव वधार्थाय विहितो नात्र संशयः" इति ॥ तर्हि सीता प्रलापादिकं किमर्थं कृतवतीति चेत् शृणु। पतिविरहे पतिव्रतयैवं वर्तितव्यमिति लोकहितप्रवर्तनाय प्रलापादिकमकरोदिति ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षट्पञ्चाशः सर्गः ॥ ५६ ॥

शी० घोरैस्तर्जनैः विनेतिविशेषः पुनस्सान्त्वैरेववशमानयध्वं ॥ ३१ ॥ शि० सर्वकामफलैः सर्वान्कामान्फलन्तितैर्वृक्षैः कल्पतरुभिः ॥ ३३ ॥ शी० सर्गश्रवणफलंस्कान्दे—"सीतारावणसंवादं राक्षसीनांचतर्जनम् । सीताप्रत्युक्तिकथनं येशृण्वन्तिनरोत्तमाः । विधूतपापास्तेयान्तिब्रह्मलोकंसनातनम्" इति ॥ ३६ ॥ इतिषट्पञ्चाशस्सर्गः ॥ ५६ ॥

[पा०] १ च. छ. ज. ञ. आनयध्वंहिविवशां. २ ग. ङ. झ. ट. परिगृह्यतु. ण. परिगृह्यतां. च. छ. ज. परिगृह्यताः. ३ ग.—ट. कामफलैः. ४ घ. युतां. ५ क. कामप्रदैश्चापि. ६ क. ङ.—ञ. ग्रस्ता. ७ ख. ङ. झ. ट. चचेतसं. ग. घ. छ. ज. ञ. सलक्ष्मणं. क. चराघवं. ८ अयंप्रक्षिप्तसर्गः ङ. झ. पुस्तकयोर्दृश्यते.

कथं ज्ञास्यति तां रामस्तत्रस्थां तामनिन्दिताम् ॥ दुःखं संचिन्तयन्ती सा बहुशः परिदुर्लभा ॥५॥
प्राणयात्रामकुर्वाणा प्राणांस्त्यक्ष्यत्यसंशयम् ॥ स भूयस्संशयो जातः सीतायाः प्राणसंक्षये ॥ ६ ॥
स त्वं शीघ्रमितो गत्वा सीतां पश्य शुभाननाम् ॥ प्रविश्य नगरीं लङ्कां प्रयच्छ हविरुत्तमम् ॥७॥
एवमुक्तोथ देवेन्द्रः पुरीं रावणपालिताम् ॥ आगच्छन्निद्रया सार्धं भगवान्पाकशासनः ॥ ८ ॥
निद्रां चोवाच गच्छ त्वं राक्षसान्संप्रमोहय । सा तयोक्ता मघवता देवी परमहर्षिता ॥
देवकार्यार्थसिद्ध्यर्थं मामोहयत राक्षसान् ॥ ९ ॥
एतस्मिन्नन्तरे देवस्सहस्राक्षः शचीपतिः ॥ आससाद वनस्थां तां वचनं चेदमब्रवीत् ॥ १० ॥
देवराजोस्मि भद्रं ते इह चास्मि शुचिस्मिते ॥ अहं त्वां कार्यसिद्ध्यर्थं राघवस्य महात्मनः ॥ ११ ॥
साहाय्यं कल्पयिष्यामि मा शुचो जनकात्मजे ॥ मत्प्रसादात्समुद्रं स तरिष्यति बलैस्सह ॥ १२ ॥
मयैवेह च राक्षस्यो मायया मोहिताश्शुभे ॥ तस्मादन्नमिदं सीते हविष्यान्नमहं स्वकम् ॥ १३ ॥
स त्वां संगृह्य वैदेहि आगतः सह निद्रया ॥ एतदत्स्यसि भद्रन्ते न त्वां बाधिष्यते शुभे ॥ १४ ॥
क्षुधा तृषा च रंभोरु वर्षाणामयुतैरपि ॥ एवमुक्ता तु देवेन्द्रमुवाच परिशङ्किता ॥ १५ ॥
कथं जानामि देवेन्द्रं त्वामिहस्थं शचीपतिम् ॥ देवलिङ्गानि दृष्टानि रामलक्ष्मणसंनिधौ ॥ १६ ॥
तानि दर्शय देवेन्द्र यदि त्वं देवराट् स्वयम् ॥ सीतायाः वचनं श्रुत्वा तथा चक्रे शचीपतिः ॥१७॥
पृथिवीं न स्पृशत्पद्भ्यामनिमेषेक्षणानि च ॥ अरजोंऽबरधारी च नम्लानकुसुमस्तथा ॥ १८ ॥
तं ज्ञात्वा लक्षणैः सीता वासवं परिहर्षिता ॥ उवाच वाक्यं रुदती भगवद्राघवं प्रति ॥ १९ ॥
सह भ्रात्रा महाबाहुर्दिष्ट्या मे श्रुतिमागतः ॥ यथा मे श्वशुरो राजा यथा च मिथिलाधिपः ॥ २० ॥
तथा त्वामद्य पश्यामि सनाथो मे पतिस्त्वया ॥ तवाज्ञया च देवेन्द्र पयोभूतमिदं हविः ॥
अश्निष्यामि त्वया दत्तं रघूणां कुलवर्धनम् ॥ २१ ॥
इन्द्रहस्ताद्गृहीत्वा तत्पायसं सा शुचिस्मिता ॥ न्यवेदयत भर्त्रे सा लक्ष्मणाय च मैथिली ॥ २२ ॥
यदि जीवति मे भर्ता सह भ्रात्रा महाबलः ॥ इदमस्तु ततोभक्त्या तदाश्नात्पायसं स्वयम् ॥२३॥

इतीव तत्प्राश्य हविर्वरानना जहौ क्षुधादुःखसमुद्भवं च तम् ॥
इन्द्रात्प्रवृत्तिमुपलभ्य जानकी काकुत्स्थयोः प्रीतमना बभूव ॥ २४ ॥
स चापि शक्रस्त्रिदिवालयं तदा प्रीतो ययौ राघवकार्यसिद्धये ॥
आमन्त्र्य सीतां स ततो महात्मा जगाम निद्रासहितः स्वमालयम् ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे प्रक्षिप्तः सर्गः ॥

सप्तपञ्चाशः सर्गः ॥ ५७ ॥

मारीचमारणानन्तरं स्वकण्ठरवानुकारिमारीचकण्ठरवश्रवणाद्दुर्निमित्तदर्शनाच्च सीतया विपदाशङ्क्या त्वरितमागच्छता रामेण मध्येमार्गं लक्ष्मणदर्शनं ॥ १ ॥ तथा लक्ष्मणमंत्रति विजनेसीतात्यागेनागमस्थानौचित्योक्त्योपालंभपूर्वकं दुर्निमित्तप्रदर्शनेन सीताया राक्षसैर्हरणमारणादिसंभावना ॥ २ ॥

राक्षसं मृगरूपेण चरन्तं कामरूपिणम् ॥ निहत्य रामो मारीचं तूर्णं पथि निवर्तते ॥ १ ॥

एवमियता ग्रन्थसंदर्भेण सीताहरणवृत्तान्तमुपवर्ण्य । अथ रामस्य मृगानुसरणकथाशेषं दर्शयितुमारभते—

स० राक्षसमिति । प्रवेशितायामित्यादिर्ग्रन्थे एकःसर्गः प्रक्षिप्तः क्वचित्पुस्तकेदृश्यते । सचमूलकोशेष्वदर्शनान्नव्याख्यातः
[पा०] १ क. च.—ङ. न्यवर्तत.

तस्य संत्वरमाणस्य द्रष्टुकामस्य मैथिलीम् ॥ क्रूरस्यनोथ गोमायुर्विननादास्य पृष्ठतः ॥ २ ॥
स तस्य स्वरमाज्ञाय दारुणं रोमहर्षणम् ॥ चिन्तयामास गोमायोः स्वरेण परिशङ्कितः ॥ ३ ॥
अशुभं बत मन्येहं गोमायुर्वाश्यते यथा ॥ स्वस्ति स्यादपि वैदेह्या राक्षसैर्भक्षणं विना ॥ ४ ॥
मारीचेन तु विज्ञाय स्वरमालम्ब्य मामकम् ॥ विक्रुष्टं मृगरूपेण लक्ष्मणः शृणुयाद्यदि ॥ ५ ॥
स सौमित्रिः स्वरं श्रुत्वा तां च हित्वा च मैथिलीम् ॥ तयैव प्रहितः क्षिप्रं मत्सकाशमिहैष्यति ॥ ६ ॥
राक्षसैः सहितैर्नूनं सीताया ईप्सितो वधः ॥ काञ्चनश्च मृगो भूत्वा व्यपनीयाश्रमात्तु माम् ॥ ७ ॥
दूरं नीत्वा तु मारीचो राक्षसोऽभूच्छराहतः ॥ हा लक्ष्मण हतोस्मीति यद्वाक्यं व्याजहार च ॥ ८ ॥
अपि स्वस्ति भवेत्ताभ्यां रहिताभ्यां महावने ॥ जनस्थाननिमित्तं हि कृतवैरोस्मि राक्षसैः ॥ ९ ॥
निमित्तानि च घोराणि दृश्यन्तेऽद्य बहूनि च ॥ इत्येवं चिन्तयन्रामः श्रुत्वा गोमायुनिस्स्वनम् ॥ १० ॥
[निवर्तमानस्त्वरितो जगामाश्रममात्मवान् ॥]
आत्मनश्चापनयनान्मृगरूपेण रक्षसा ॥ आजगाम जनस्थानं राघवः परिशङ्कितः ॥ ११ ॥
तं दीनमनसो दीनमासेदुर्मृगपक्षिणः ॥ सव्यं कृत्वा महात्मानं घोरांश्च ससृजुः स्वरान् ॥ १२ ॥
तानि दृष्ट्वा निमित्तानि महाघोराणि राघवः ॥ न्यवर्तताथ त्वरितो जवेनाश्रममात्मनः ॥ १३ ॥
सं तु सीतां वरारोहां लक्ष्मणं च महाबलम् ॥ आजगाम जनस्थानं चिन्तयन्नेव राघवः ॥ १४ ॥

राक्षसमित्यादिना । निवर्तते स्म निवर्तत ॥ १ ॥ द्रष्टुकामस्य । तदर्थंत्वरमाणस्येति संबन्धः । गोमायुः क्रोष्टा । एकस्य गोमायोः पृष्ठतः क्रूरस्वरकरणं दुर्निमित्तमिति भावः ॥ २ ॥ भयंकरत्वेन रोमहर्षणमित्युच्यते । पूर्वमेव मारीचस्वरेण परिशङ्कितः संजातशङ्कः । स रामः तस्य गोमायोः स्वरं आज्ञाय श्रुत्वा । चिन्तयामास ॥ ३ ॥ चिन्तामेवाह—अशुभमित्यादिना । गोमायुः यथा येन प्रकारेण । वाश्यते शब्दायते । तेन प्रकारेणाशुभं मन्ये । अपिः संभावनायां ॥ ४ ॥ मारीचेनेत्यादिश्लोकद्वयमेकान्वयं । मृगरूपेण मारीचेन मामकं मदीयं । स्वरंविज्ञाय मामकं स्वरं आलम्ब्य अनुसृत्य । विक्रुष्टं हा सीते लक्ष्मणेत्याह्वानेनोद्घोषितंस्वरं । लक्ष्मणः शृणुयाद्यदि तदा स सौमित्रिर्मामकं स्वरं श्रुत्वा तं स्वरं श्रुतवत्या तया सीतया च प्रेषितः सन् इहदेशे मत्सकाशं मत्समीपं एष्यति ॥ ५—६ ॥ राक्षसैरित्यादिश्लोकद्वयमेकान्वयं । यस्मान्मारीचः काञ्चनः मृगो भूत्वा मामाश्रमाद्व्यपनीय दूरं नीत्वा मया हतःसन् राक्षसोभूत् लक्ष्मण हतोस्मीति वाक्यं व्याजहार च तस्मात्कश्चित्सहितैः राक्षसैः सीताया वधः ईप्सितः । नूनं ॥ ७—८ ॥ जनस्थाननिमित्तं जनस्थानवासनिमित्तेन । निमित्तकारणहेतूनां सर्वेषामिष्टिः ॥ ९ ॥ निमित्तानीत्यादिश्लोकद्वयमेकान्वयं । गोमायुनिस्वनं श्रुत्वा मृगरूपेण रक्षसाऽऽत्मनः अपनयनात् आश्रमादपकर्षणाच्च । परिशङ्कितः सन् जनस्थानं आजगाम ॥ १०—११ ॥ सव्यंकृत्वा अप्रदक्षिणंकृत्वा आसेदुः ॥ १२ ॥ त्वरितः मानसिकत्वरासहितः । जवेन कायिकत्वरया ॥ १३ ॥ सीतां लक्ष्मणं च

॥ १ ॥ शि० तस्यगोमायोःस्वरं दारुणं दारुणकर्मसूचकं । आज्ञाय निश्चित्य । स्वरेण स्वशब्दानुकारकमारीचस्वनेन । परिशङ्कितः ॥ ३ ॥ ति० मारीचेन मामकस्वरं विज्ञाय मामकस्वरध्वनिंज्ञात्वा । आलक्ष्य मदपकारोपायमवधार्य । यन्मृगरूपेणतेनाकृष्टं हासीतेलक्ष्मणेतिच । तद्यदिलक्ष्मणःश्रृणुयात् ॥ ५ ॥

[पा०] १ क.—घ. छ. ञ. स्वरोप. २ क. ग. तस्यसस्वरं. च. छ. ज. ञ. तस्यस्वरमथालक्ष्य. क. तस्यसस्वरमालक्ष्य. ३ क. ङ. शङ्कयामास. ख. च. छ. ज. ञ. रामःप्रोवाचगोमायोः. ४ ख. घ. छ. ज. ञ. स्यादय. ५ क.—ट. मालक्ष्य. ६ क. ङ. च. ज.—ट. हित्वाथ. घ. छ. हित्वातु. ७ ङ. ञ. ट. नीत्वाथ. ८ क.—ट. व्याजहारह. ९ ङ. ञ. ट. भवेद्ताभ्यां. १० घ. राक्षसानां. ११ क. ख. ग. ङ.—ट. मयावने. १२ क. च. छ. ज. ञ. दृश्यन्तेत्र. १३ इदमर्धं ख.—ट. पाठेषु दृश्यते. १४ क. ग. ङ.—ट. स्वापनयनंमृगरूपेण. १५ ख. ग. ङ. ञ. ण. ट. दीनमानसं. १६ क. घ. सीतांसतु.

ततो लक्ष्मणमायान्तं ददर्श विगतप्रभम् ॥ १५ ॥
ततोऽविदूरे रामेण समीयाय स लक्ष्मणः ॥ विषण्णः सुविषण्णेन दुःखितो दुःखभागिना ॥१६॥
सञ्जगर्हेथ तं भ्राता ज्येष्ठो लक्ष्मणमागतम् ॥ विहाय सीतां विजने वने राक्षससेविते ॥ १७ ॥
गृहीत्वा च करं सव्यं लक्ष्मणं रघुनन्दनः ॥ उवाच मधुरोदर्कमिदं परुषमार्तिमत् ॥ १८ ॥
अहो लक्ष्मण गर्ह्यं ते कृतं यैस्त्वं विहाय ताम् ॥ सीतामिहागतः सौम्य क्वचित्स्वस्ति भवेदिह ॥ १९ ॥
न मेऽस्ति संशयो वीर सर्वथा जनकात्मजा ॥ विनष्टा भक्षिता वापि राक्षसैर्वनचारिभिः ॥
अशुभान्येव भूयिष्ठं यथा प्रादुर्भवन्ति मे ॥ २० ॥
अपि लक्ष्मण सीतायाः सामग्र्यं प्राप्नुयावहे ॥ जीवन्त्याः पुरुषव्याघ्र सुतायाः जनकस्य वै ॥२१॥
यथा वै मृगसंघाश्च गोमायुश्चैव भैरवम् ॥ वाश्यन्ते शकुनाश्चापि प्रदीप्तामभितो दिशम् ॥ २२ ॥
अपि स्वस्ति भवेत्तस्या राजपुत्र्या महाबल ॥ २३ ॥

इदं हि रक्षो मृगसन्निकाशं प्रलोभ्य मां दूरमनुप्रयान्तम् ॥
हतं कथंचिन्महता श्रमेण स राक्षसोभून्म्रियमाण एव ॥ २४ ॥
मनश्च मे दीनमिहाप्रहृष्टं चक्षुश्च सव्यं कुरुते विकारम् ॥
असंशयं लक्ष्मण नास्ति सीता हृता मृता वा पथि वर्तते वा ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

चिन्तयन्नेवाजगाम ॥ १४ ॥ तत इत्यर्धमेकं वाक्यं ॥ १५ ॥ ततो दर्शनानन्तरं । अविदूरे समीपे । समीयाय संगतः । दुःखभागिनेत्यर्थः "संज्ञा—"इत्यादिसूत्रेण घिनुण्प्रत्ययः ॥ १६ ॥ विजने स्वजनरहिते ॥ १७ ॥ सव्यं करं गृहीत्वा लक्ष्मणमुवाच । कथं परुषं अथ मधुरोदर्कं मधुरोत्तरं । आर्तिमत् आर्तियुक्तं । सर्वमिदं क्रियाविशेषणं । अहो इत्यादि परुषं । लक्ष्मणेत्यादि मधुरं ॥१८॥ ते त्वया । इत्युवाचेत्यन्वयः ॥ १९ ॥ केनापिहेतुना विनष्टा वा राक्षसैर्भक्षिता वा । उक्तार्थे हेतुमाह—अशुभानीत्यर्धेन । भूयिष्ठं बहुलं यथा तथा ॥ २० ॥ अपिः प्रश्ने । सामग्र्यं अक्षतत्वं । क्षेममिति यावत् । हे लक्ष्मणेति सम्बन्धः ॥ २१ ॥ सामग्र्यप्राप्तिसंशये कारणमाह—यथेति । प्रदीप्तां दिशं सूर्याधिष्ठिता तत्पार्श्वद्वयदिशौ च प्रदीप्ता सामभिमुखं वाश्यन्ते नदन्ति। तेन वायसादिपक्षिणां शृगालादीनां कृष्णसारादिमृगाणां च सूर्याधिष्ठितदिशि कूजनं दुःखसूचकमित्युक्तं ॥ २२ ॥ चिन्तातिशयेन पुनरप्याह—अपि स्वस्तीति । अर्धमेकान्वयं ॥ २३ ॥ लक्ष्मणाय दर्शयति—इदमिति । मृगसन्निकाशं पूर्वं मृगवद्भ्रान्तं । इदं रक्षः महता श्रमेण उपलक्षितं मां प्रलोभ्य कथंचिद्धतं । कथंचिदित्यनेन चिरं लक्ष्यमाणप्राप्तिर्द्योत्यते । मृगत्वं कुतो गतमित्यत्राह—स इति । सः म्रियमाणः सन् राक्षस एवाभूदित्यर्थः ॥ १४ ॥ निमित्तान्तरेणापि सीताहानिमनुमिनोति—मनश्चेति । इह सीतावियोगविषये । अप्रहृष्टं विकारं स्फुरणं । नास्तीति आश्रम इति शेषः ॥ २५ ॥ इति श्रीगोवि-

---

ति० यद्वा मधुरोदर्कं तात्पर्यतोमधुरं । आपाततः परुषं ॥ १८ ॥ शि० जनकस्यसुतायास्सीतायाः सामग्र्यं अविच्छिन्नावयवत्वं । प्राप्नुयामहेअपि । अपिस्संभावनार्थकः ॥ २१ ॥ स० कथंचित् महताश्रमेणेतिलोकानुकरणं ॥ २४ ॥ शि० सीतानास्ति अभावप्रतियोगिनी । ननुनित्यायाःकथमभावप्रतियोगित्वमित्यतआह । अमृता नित्यापिसीता असंशयंयथाभवतितथाहतासतीपथ्येवतिष्ठते । एकोवाशब्दोप्यर्थे द्वितीयएवार्थे ॥ २५ ॥ इतिसप्तपञ्चाशस्सर्गः ॥ ५७ ॥

[पा०] १ ङ. ञ. सन्निषण्णेन. ख. घ. सन्निषण्णेन. २ क. ग. ङ.—ट. दृष्ट्वा. ३ ख. तस्य. ४ ख. घ. ङ. छ. झ. ञ. ट. मार्तवत्. ५ क. च. छ. ज. ञ. यत्तु. यत्त्वं. ६ ख. ग. ङ. च. झ ञ. ट. भवेदिति. ७ ख. ग. घ. सकाशं. ८ ङ—ट. प्राप्नुयामहे. ९ ख. जनकस्यच. १० च. छ. ज. ञ. गोमायुश्चाप. क. ख. गोमायुश्चापि. ११ च. छ. ज. ञ. भवेदस्माः,

अष्टपञ्चाशः सर्गः ॥ ५८ ॥

रामेण लक्ष्मणंप्रति सीतागुणानुवर्णनपूर्वकं तद्वियोगे स्वस्यदुर्जीवत्वोक्त्या बहुधाशोचनं ॥ १ ॥ तथा मारीचाक्रोशनश्रवणात्सीतया लक्ष्मणप्रेषणसंभावनापूर्वकं स्वकृतखरवधप्रतिचिकीर्षया राक्षसैः सीताहननसंभावना ॥ २ ॥

स दृष्ट्वा लक्ष्मणं दीनं शून्ये दशरथात्मजः ॥ पर्यपृच्छत धर्मात्मा वैदेहीमागतं विना ॥ १ ॥
प्रस्थितं दण्डकारण्यं या मामनुजगाम ह ॥ क सा लक्ष्मण वैदेही यां हित्वा त्वमिहागतः ॥ २ ॥
राज्यभ्रष्टस्य दीनस्य दण्डकान्परिधावतः ॥ क सा दुःखसहाया मे वैदेही तनुमध्यमा ॥ ३ ॥
यां विना नोत्सहे वीर मुहूर्तमपि जीवितुम् ॥ क सा प्राणसहाया मे सीता सुरसुतोपमा ॥ ४ ॥
पतित्वमर्मराणां वा पृथिव्याश्चापि लक्ष्मण ॥ तां विना तपनीयाभां नेच्छेयं जनकात्मजाम् ॥५॥
कच्चिज्जीवति वैदेही प्राणैः प्रियतरा मम ॥ कच्चित्प्रव्राजनं सौम्य न मे मिथ्या भविष्यति ॥ ६ ॥
सीतानिमित्तं सौमित्रे मृते मयि गते त्वयि ॥ कच्चित्सकामा सुखिता कैकेयी सा भविष्यति ॥ ७ ॥
सपुत्रराज्यां सिद्धार्थां मृतपुत्रा तपस्विनी ॥ उपस्थास्यति कौसल्या कच्चित्सौम्य न कैकयीम् ॥ ८ ॥
यदि जीवति वैदेही गमिष्याम्याश्रमं पुनः ॥ सुवृत्ता यदि वृत्ता सा प्राणांस्त्यक्ष्यामि लक्ष्मण ॥ ९ ॥
यदि मामाश्रमगतं वैदेही नाभिभाषते ॥ पुनः प्रहसिता सीता विनशिष्यामि लक्ष्मण ॥ १० ॥
ब्रूहि लक्ष्मण वैदेही यदि जीवति वा न वा ॥ त्वयि प्रमत्ते रक्षोभिर्भक्षिता वा तपस्विनी ॥११॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तपञ्चाशः सर्गः ॥५७॥

अथ सीताप्राप्तिसंदेहकृतशोकप्रलापोऽष्टपञ्चाशे । शून्ये वने वैदेही विना आगतं वैदेही विसृज्यागतं । लक्ष्मणं पर्यपृच्छत पर्यपृच्छत् ॥ १ ॥ प्रश्नस्वरूपमाह—प्रस्थितमित्यादिना । दण्डकारण्यं प्रति प्रस्थितं ॥ २ ॥ दुःखसहाया समानदुःखेत्यर्थः ॥ ३ ॥ सुरसुता सुरस्त्री ॥ ४ ॥ तपनीयं स्वर्णं । इच्छेयं इच्छामि ॥५॥ प्राणैः प्राणेभ्यः । प्रव्राजनं चतुर्दशवर्षवनवासः । मिथ्या असत्यं । न भविष्यतीति कचित् । चतुर्दशवर्षसमाप्तावेव सीतावियोगजं जीववियोगं किं प्राप्स्यामीत्यर्थः ॥६॥ सीतानिमित्तं सीताविनाशनिमित्तं । त्वयिगते अयोध्यामिति शेषः । सकामेत्यनेन रामस्य हृदये कैकेयी स्वविनाशार्थमेव वनं प्रेषितवतीति सदा वर्तते । तदिदानीं " सुप्तप्रमत्तकुपितानां भावज्ञानं दृष्टं" इति न्यायेन व्यक्तीकृतं ॥ ७ ॥ तपस्विनी शोच्या ॥ ८ ॥ वृत्ता परेता । सुवृत्ता स्वाचारा ॥९॥ प्रहसिता प्रहसितमुखी ॥ १० ॥ यदि जीवति तदा ब्रूहि वद । वैदेही जीवतिवा नवा । न

ति० शून्यं संतोषादिहीनचित्तं ॥ स० यादुःखसहाया कष्टकालेऽपिसहायभूता ॥ ३ ॥ ति० प्राणसहाया तांविनाअसहायाः प्राणाः कर्मस्यास्यन्तीतिभावः ॥ ४ ॥ शि० ममप्राणैः प्रियतरावैदेही कच्चिज्जीवति । मेप्रव्राजनं प्रव्राजनसंबन्धिव्रतं । नगरप्रवेशाभावादि मिथ्या असत्यंकच्चिन्नभविष्यति । एतेन यदिनगरमध्येएवसीताऽपहृत्यसंस्थापिता तर्हितदानयनं नगरप्रवेशमन्तरा कथंसंभवेदितिरामविचारस्सूचितः । तेनापहृतापिनगराद्बहिः संस्थापिताचेच्छोभनमितितदभिप्रायोव्यञ्जितः ॥ ६ ॥ शि० हेसौमित्रे सीतानिमित्तं मयित्वयिच मृते राक्षसमृतत्वे गते प्राप्तेसति । सकामा राक्षसवधविषयकेच्छावतीकैकेयी सुखिताकच्चिद्भविष्यति ॥ ७ ॥ शि० सपुत्रराज्यांमद्विषयकातिप्रीतिपुत्रशोभासहितां । सिद्धार्थां सिद्धोर्थः राक्षसवधरूपंप्रयोजनंयस्यास्तां कैकेयीं । मृतःराक्षसघातकः पुत्रोयस्यास्सा कौसल्या कच्चिदुपस्थास्यति प्रशंसिष्यति ॥ सी० सौम्येन विनयेन ॥ ८ ॥ शि० आश्रमगतंमां प्रहसितावैदेही यदिपुनर्नोभिभाषते नाभिभाषिष्यते राक्षसकृतपीडाजनितमूर्छादिनायदिकिंचिन्नवक्ष्यतीत्यर्थः । तर्हिविनशिष्यामि राक्षसान्विनाशयिष्यामि ॥ १० ॥

[पा०] १ ग. दृष्ट्वा. २ घ. दीनः. ३ ग. ङ. झ. ट. शून्यं. ४ ङ. झ. ट. ममराणांहि. क. च. छ. ञ. ञ. ममराणांच. ५ ग. ङ.—ट. विनातां. ६ क. तपनीयाङ्गीं ७ ङ. झ. ट. वीर. ८ ख. च. छ. ञ. तांपुत्रराज्यसिद्धार्थां. ९ च. छ. सौम्येन. १० ख. क. ङ. प्रतिः ११ झ. संवृत्ता. १२ झ. पुरः.

सुकुमारी च बाला च नित्यं चादुःखदर्शिनी ॥ मद्वियोगेन वैदेही व्यक्तं शोचति दुर्मनाः ॥ १२ ॥
सर्वथा रक्षसा तेन जिह्मेन सुदुरात्मना ॥ वदता लक्ष्मणेत्युच्चैस्त्वयापि जनितं भयम् ॥ १३ ॥
श्रुतस्तु शङ्के वैदेह्या स्वरः सदृशो मम ॥ त्रस्तया प्रेषितस्त्वं च द्रष्टुं मां शीघ्रमागतः ॥ १४ ॥
सर्वथा तु कृतं कष्टं सीतामुत्सृजता वने ॥ प्रतिकर्तुं नृशंसानां रक्षसां दत्तमन्तरम् ॥ १५ ॥
दुःखिताः खरघातेन राक्षसाः पिशिताशनाः ॥ तैः सीता निहता घोरैर्भविष्यति न संशयः ॥ १६ ॥
अहोस्मिन्व्यसने मग्नः सर्वथा शत्रुसूदन ॥ किंन्विदानीं करिष्यामि शङ्के प्राप्तव्यमीदृशम् ॥ १७ ॥
इति सीतां वरारोहां चिन्तयन्नेव राघवः ॥ आजगाम जनस्थानं त्वरया सहलक्ष्मणः ॥ १८ ॥

विगर्हमाणोनुजमार्तरूपं क्षुधा श्रमाच्चैव पिपासया च ॥
विनिःश्वसञ्शुष्कमुखो विवर्णः प्रतिश्रयं प्राप्य समीक्ष्य शून्यम् ॥ १९ ॥
स्वमाश्रमं संप्रविगाह्य वीरो विहारदेशाननुसृत्य कांश्चित् ॥
एतत्तदित्येव निवासभूमौ प्रहृष्टरोमा व्यथितो बभूव ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे अष्टपञ्चाशस्सर्गः ॥ ५८ ॥

वेत्यस्य विवरणं—त्वयीति । प्रमत्ते अनवहिते ॥११॥ दुःखं पश्यतीति दुःखदर्शिनी सा नभवतीत्यदुःखदर्शिनी । शोचति अशोचत् । वनवास इति शेषः । दुर्मनाः चिन्ताकुलेति यावत् ॥ १२ ॥ जिह्मेन कपटेन । त्वयापि अतिशूरस्यापि ॥ १३ ॥ मम स्वरेण यस्मादागतः तस्मात् सः स्वरो वैदेह्या श्रुतः त्रस्तया तया त्वं प्रेषितश्चेति शङ्क इति योजना ॥ १४ ॥ कष्टमेवाह—प्रतीति । प्रतिकर्तुं मत्कृतापकारस्य प्रत्यपकारं कर्तुं । अन्तरं अवकाशो दत्तः ॥ १५ ॥ प्रतीकारमेवाह -दुःखिता इति । पिशिताशनत्वं निहनने हेतुः ॥ १६ ॥ अहोस्मिन्निति संधिरार्षः । ईदृशं व्यसनमज्जनं प्राप्तव्यमिति शङ्के ॥ १७ ॥ वरारोहामितिचिन्ता हेतुसौन्दर्यातिशयोक्तिः ॥ १८ ॥ विगर्हमाण इत्यादिश्लोकद्वयमेकान्वयं वक्ष्यमाणानेकसगार्थसंग्रहरूपं । श्रमात् बहुदूरधावनात् । प्रतिश्रयं स्वाश्रमप्रदेशं । शून्यं सीतारहितं । प्रतिश्रयमित्यनुषज्यते । अनन्तरं स्वाश्रमं संप्रविगाह्य प्रविश्य । तमपि शून्यं समीक्ष्येति शेषः । तदनु सीतायाः कांश्चिद्विहारदेशाननुसृत्य विचित्य । तानपि शून्यान्समीक्ष्य तत्रत्यनिवासभूमौ क्रीडास्थाने तदेतदिति तादृशमेतादृशमिति विहारविशेषं स्मृत्वा प्रहृष्टरोमा सन् शोकेन व्यथितो बभूव ॥ १९—२० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने अष्टपञ्चाशः सर्गः ॥ ५८ ॥

ति० तवापि ज्ञातमद्बलवीर्यादिमतोपि ॥ १३ ॥ ति० जनस्थानं तद्वर्तिस्वाश्रमं ॥ १८ ॥ ति० प्रतिश्रयं आश्रमसमीपदेशं ॥ १९ ॥ प्रतिश्रयंप्रेक्ष्यानन्तरंस्वाश्रमंप्रविगाह्य ॥ २० ॥ इत्यष्टपञ्चाशस्सर्गः ॥ ५८ ॥

[पा०] १ घ. सादुःखदर्शिनी. वादुःखदर्शिनी. ङ. झ. चादुःखभागिनी. ञ. चादुःखकर्शिनी. २ क. दुःखिता. ३ ङ. झ. ट. श्रुतश्चमन्ये. क.—घ. च. छ. ज. ञ. श्रुतश्चशङ्के. ४ घ. स्वरस्स. ५ च. छ. ज. ञ. त्रातुं. ६ क. ग. ङ.—ट. अहोस्मिन्व्यसने. ७ ख. ग. ङ.—ट. रिपुनाशन. क. रिपुकर्शन. ८ ख.—ट. किन्विदानीं. क. किंचेदानीं. ९ घ. चिन्तयामास. १० ङ. झ. ट. श्रमेणैव. ११ ख. ग. ङ.—ट. विषण्णः. १२ घ. धीरो.

एकोनषष्टितमः सर्गः ॥ ५९ ॥

रामेणलक्ष्मणंप्रति सीतात्यागेनागमनेकारणप्रश्नः ॥ १ ॥ लक्ष्मणेनतंप्रति मारीचाक्रोशनश्रवणेनविषीदन्तींसीतांप्रति स्वकृतसान्त्वनप्रकारस्य स्वंप्रतितस्याःपरुषभाषणप्रकारस्यचानुवादपूर्वकं तद्वचनस्यतत्कारणत्वोक्तिः ॥ २ ॥ रामेणतंप्रति सकोपंतदागमनस्यानौचित्योक्तिपूर्वकं स्वानुसृतमायामृगवृत्तान्तकथनं ॥ ३ ॥

अथाश्रमादुपावृत्तमन्तरा रघुनन्दनः ॥ परिपप्रच्छ सौमित्रिं रामो दुःखार्दितं पुनः ॥ १ ॥
तमुवाच किमर्थं त्वमागतोपास्य मैथिलीम् ॥ यदा सा तव विश्वासाद्वने विरहिता मया ॥ २ ॥
दृष्ट्वैवाभ्यागतं त्वां मे मैथिलीं त्यज्य लक्ष्मण ॥ शङ्कमानं महत्पापं यत्सत्यं व्यथितं मनः ॥ ३ ॥
स्फुरते नयनं सव्यं बाहुश्च हृदयं च मे ॥ दृष्ट्वा लक्ष्मण दूरे त्वां सीताविरहितं पथि ॥ ४ ॥
एवमुक्तस्तु सौमित्रिर्लक्ष्मणः शुभलक्षणः ॥ भूयो दुःखसमाविष्टो दुःखितं राममब्रवीत् ॥ ५ ॥
न स्वयं कामकारेण तां त्यक्त्वाहमिहागतः ॥ प्रचोदितस्तयैवोग्रैस्त्वत्सकाशमिहागतः ॥ ६ ॥
आर्येणेव पराक्रुष्टं हा सीते लक्ष्मणेति च ॥ परित्राहीति यद्वाक्यं मैथिल्यास्तच्छ्रुतिं गतम् ॥ ७ ॥
सा तमार्तस्वरं श्रुत्वा तव स्नेहेन मैथिली ॥ गच्छ गच्छेति मामाह रुदन्ती भयविह्वला ॥ ८ ॥
प्रचोद्यमानेन मया गच्छेति बहुशस्तया ॥ प्रत्युक्ता मैथिली वाक्यमिदं त्वत्प्रत्ययान्वितम् ॥ ९ ॥
न तत्पश्याम्यहं रक्षो यदस्य भयमावहेत् ॥ निर्वृता भव नास्त्येतत्केनाप्येवमुदाहृतम् ॥ १० ॥
विगर्हितं च नीचं च कथमार्योभिधास्यति ॥ त्राहीति वचनं सीते यस्त्रायेत्त्रिदशानपि ॥ ११ ॥

एवं संग्रहेणोक्तमर्थं पुनर्विस्तरेण वक्तुमुपक्रमते—अथेत्यादि । अन्तरा मध्येमार्गं । दुःखार्दितमिति क्रियाविशेषणं । मारीचवधस्थानात्स्वाश्रमं गच्छन्मध्ये पप्रच्छेत्यर्थः ॥ १ ॥ तं सौमित्रिमुवाच । तत्र प्रश्नप्रकारमाह—किमर्थमिति । यदा तु त्वया रक्षितायाः का हानिरिति विश्वासात् मया विरहिता कृता तदा तामपास्य विहाय किमर्थमागतः ॥ २ ॥ उवाचेत्युक्तार्थमाह—दृष्ट्वेति । त्वां दृष्ट्वा पापं सीतानिष्टरूपं । शङ्कमानं मे मम मनः व्यथितमिति यत् तत्सत्यं ॥३॥ एतच्च कथं निश्चीयत इत्यत्राह—स्फुरत इति । बाहुः सव्य इत्यनुषज्यते । हृदयं वक्षोमध्यं ॥ ४ ॥ भूयो दुःखेन बहुतरदुःखेन समाविष्टः पूर्वं सीतावचनाद्दुःखाक्रान्तः सम्प्रति रामेण त्वया अकृत्यं कृतमित्युच्यमानत्वात् भूयोदुःखसमाविष्टत्वं ॥ ५ ॥ कामकारेण स्वेच्छाकरणेन । स्वयमित्यस्य विवरणमिदं । उग्रैः वचोभिरित्यर्थसिद्धं ॥ ६ ॥ हा सीते लक्ष्मणेति परित्राहीतिच यद्वाक्यं आर्येणेव भवतेव । केनचित्पराक्रुष्टं आह्वानपुरःसरं घोषितं तत् । मैथिल्याः श्रुतिं गतं ॥ ७ ॥ तव स्नेहेन त्वयि स्नेहेन ॥ ८ ॥ त्वत्प्रत्ययान्वितं त्वयि प्रत्ययः दुराधर्षत्वदैन्यराहित्यविषयो विश्वासः तेनान्वितं । इदं वक्ष्यमाणलक्षणं वाक्यं । मैथिली प्रत्युक्ता ॥ ९ ॥ निर्वृता सुखिता भव । नास्त्येतत् रामवाक्यत्वेन यच्छङ्कितं एतत् रामवाक्यं न भवति ॥ १० ॥ रामवचनत्वेऽनुपपत्तिमाह—विगर्हितमिति । विगर्हितं दैन्यावहत्वान्महाकुलप्रसूतस्य निन्दितं । नीचं आपत्काले स्त्रीसमाह्वानस्य क्षुद्रकृतत्वात्कुत्सितं । वचनं कथमभिधास्यति । यस्त्रिदशानपि त्रायेत् कथं सः सीते

स० कामकारेण स्वेच्छया । अहंतां त्यक्त्वा इहनागतः । किंतुतयासीतया उग्रैः प्रचोदितः इहत्वत्सकाशमागतः । प्रलापकालइति त्रिवारमहमित्युक्तिः द्विवारमिहेत्युक्तिश्चसंभवतः । त्रिवारंकामकारेणनेतिवक्तुं त्रिरहमित्युक्तिः । "जहिहि जहाहि जहीहि रामभार्यां" इतिवत् ॥ ६ ॥

[पा०] १ ग. छ. ञ. तथा. २ ङ. झ. ट. दुःखादिदंवचः. क.—घ. दुःखादिदंपुनः. ञ. दुःखार्दितंवचः. ३ घ. मैथिलीरहितं. च. छ. ज. ञ. तयाविरहितं. ४ ङ. ट. ठ. नह्यहंकामचारेण. ५ ङ. ट. स्तयैवाहंत्वत्सकाशं. ६ क. ख. ङ. झ. परिक्रुष्टं. ७ ङ. झ. ट. लक्ष्मणेतिसुविस्वरं. ८ क. च. छ. ज. ञ. वैदेह्याः. ९ ग. ङ. झ. रुदती. १० ख. ङ. च. ज.—ट. विक्लवा. ११ ख. स्तदा. १२ क. च. छ. ज. ञ. मानयेत्. १३ क. ख. ङ. झ. ट. प्येतदुदाहृतं.

किंनिमित्तं तु केनापि भ्रातुरालम्ब्य मे स्वरम् ॥ राक्षसेनेरितं वाक्यं त्राहित्राहीति शोभने ॥ १२ ॥
विस्वरं व्याहृतं वाक्यं लक्ष्मण त्राहि मामिति ॥ न भवत्या व्यथा कार्या कुनारीजनसेविता ॥ १३ ॥
अलं वैक्लव्यमालम्ब्य स्वस्था भव निरुत्सुका ॥ न सोस्ति त्रिषु लोकेषु पुमान्वै राघवं रणे ॥
जातो वा जायमानो वा संयुगे यः पराजयेत् ॥ १४ ॥
न जय्यो राघवो युद्धे देवैः शक्रपुरोगमैः ॥ १५ ॥
एवमुक्ता तु वैदेही परिमोहितचेतना ॥ उवाचाश्रूणि मुञ्चन्ती दारुणं मामिदं वचः ॥ १६ ॥
भावो मयि तवात्यर्थं पाप एव निवेशितः ॥ विनष्टे भ्रातरि प्राप्तुं न च त्वं मामवाप्स्यसि ॥ १७ ॥
संकेताद्भरतेन त्वं रामं समनुगच्छसि ॥ क्रोशन्तं हि यथात्यर्थं नैनमभ्यवपद्यसे ॥ १८ ॥
रिपुः प्रच्छन्नचारी त्वं मदर्थमनुगच्छसि ॥ राघवस्यान्तरप्रेप्सुस्तथैनं नाभिपद्यसे ॥ १९ ॥
एवमुक्तो हि वैदेह्या संरब्धो रक्तलोचनः ॥ क्रोधात्प्रस्फुरमाणोष्ठ आश्रमादभिनिर्गतः ॥ २० ॥
एवं ब्रुवाणं सौमित्रिं रामः सन्तापमोहितः ॥ अब्रवीद्दुष्कृतं सौम्य तां विना यत्त्वमागतः ॥ २१ ॥
जानन्नपि समर्थं मां रक्षसां विनिवारणे ॥ अनेन क्रोधवाक्येन मैथिल्या निस्सृतो भवान् ॥२२॥
नहि ते परितुष्यामि त्यक्त्वा यद्यासि मैथिलीम् ॥ क्रुद्धायाः परुषं श्रुत्वा स्त्रियाश्च त्वमिहागतः ॥२३॥

त्राहीति वचनमभिधास्यति ॥ ११ ॥ किं निमित्तं किमपि प्रयोजनमुद्दिश्य । केनापि दुर्जनेन राक्षसेन मे भ्रातुः स्वरं स्वरसदृशं स्वरं । आलम्ब्य अवलम्ब्य । त्राहि त्राहीति वाक्यं ईरितं उक्तं । शोभने इति सीतासंबोधनं ॥ १२ ॥ विस्वरमिति स्वरप्रकारविशेषशोधनेऽपि नायं रामस्वर इत्यर्थः ॥ १३ ॥ अलमित्यादिसार्धश्लोक एकान्वयः । वैक्लव्यं विक्लवत्वं । " विक्लवो विह्वलस्तथा " इति हलायुधः । निरुत्सुका मत्प्रस्थापनोद्योगरहिता भव । नास्ति नविद्यते ॥ १४ ॥ नेत्यर्थमेकं वाक्यं । पूर्वमेकैकेनाजय्यत्वमुक्तं संप्रति मिलितैरिति विशेषः ॥ १५ ॥ परिमोहितचेतना कलुषितबुद्धिः ॥ १६ ॥ भ्रातरि विनष्टे सति मां प्राप्तुं पापः कुत्सितः । भावः मयि तव त्वया निवेशित एव । त्वं च मां नावाप्स्यसि ॥ १७ ॥ भरतेन कृतात्संकेतात् कुतश्चिदवकाशे राममवश्यं हनिष्यामीत्येवंरूपात् । रामं समनुगच्छसि न तु रामभक्त्या । अत्र हेतुमाह—क्रोशन्तमिति । क्रोशन्तमेनं यथा नाभ्यवपद्यसे न प्राप्नोषि । तेन प्रकारेण संकेतादनुगच्छसीत्यन्वयः ॥ १८ ॥ अन्तरप्रेप्सुः रन्ध्रान्वेषी । येन प्रकारेण एनमनुगच्छसि तथा नाभिपद्यसे इत्यन्वयः ॥ १९ ॥ क्रोधादिति काकाक्षिन्यायेनोभयत्रान्वेति ॥ २० ॥ तां विना त्वमागत इति यत् तद्दुष्कृतं अकृत्यं ॥ २१ ॥ उक्तं विवृणोति —जानन्नपीति ॥ २२ ॥ अनेनेत्युक्तं विशदयति—नहीति । स्त्रिया इत्यविवेकसंभावनासूचनं । स्त्रीष्वपि विशेषज्ञापनाय क्रुद्धाया इति । यस्त्वं क्रुद्धायाः

ति० किंनिमित्तं कुत्सितंकिंचिन्निमित्तमाश्रित्य केनापिरक्षसेरितं ॥ १२ ॥ ति० जायमानइत्यनेन जनिष्यमाणइत्यर्थकेनभाविनोपिवारणं । अतःसंयुगइत्यस्यनपौनरुक्त्यं ॥ १४ ॥ शि० संकेतात् संकेतंप्राप्य । यथा यथावत् । नसमनुगच्छसि । तर्हिभरते भरतसमीपेपि । त्वंनाभ्यवपद्यसे नस्थास्यसि । भरतो निस्सारयिष्यतीतितात्पर्यं ॥ १८ ॥ ती० सीताप्रेरणयामयिराक्षससंहारसामर्थ्याभावमाशङ्क्यागतोसिवा सीतापरुषवाक्यैस्तवलोकगर्हितामविष्यतीतिवा परुषवाक्यासहनमात्रेणवा समागतोसीतिप्रेषाविकल्प्याद्यं पराकरोति दुष्कृतमित्यादि ॥ २१ ॥

[पा०] १ ङ. झ. ट. त्रासात्राहीति. २ ग. ङ. झ. ट. विक्लवतांगन्तुं. च. ज. विक्लवमालंब्य. क. विक्लवमागन्तुं. ३ क. ख. ग. ङ. च. ज.—ट. नचास्ति. घ. सनास्ति. ४ क. ख. ङ. झ. ञ. ट. अजेयो. घ. अजय्यो. ५ क. च. छ. ज. ञ. पापाचारनिवेशितः. ख. पापभाव. ६ ङ.—ट. मवाप्स्यसे. ७ ख. तवात्यर्थं. घ. यदत्यर्थं. ८ छ. झ. ञ. ट. स्यान्तरप्रेप्सुः. ९ ख. मुक्तोस्मि. ङ. झ. ट. मुक्तस्तु. १० ख. ङ. झ. ञ. ट. त्वमिहागतः. ११ ङ. झ. ट. रक्षसामपवारणे. १२ क. ङ. च. झ. ट. निर्गतो. ञ. गर्हितो. १३ ङ. झ. ञ. ट. यदसि. १४ ग.—च. ज. झ. ट. विहायत्वमिहागतः. क. ञ. स्त्रियायस्त्वमिहागतः.

सर्वथा त्वपनीतं ते सीतया यत्प्रचोदितः ॥ क्रोधस्य वशमापन्नो नाकरोः शासनं मम ॥ २४ ॥
असौ हि राक्षसः शेते शरेणाभिहतो मया ॥ मृगरूपेण येनाहमाश्रमादपवाहितः ॥ २५ ॥
विकृष्य चापं परिधाय सायकं सलीलबाणेन च ताडितो मया ॥
मार्गीं तनुं त्यज्य सविक्लबस्वरो बभूव केयूरधरः स राक्षसः ॥ २६ ॥
शराहतेनैव तदाऽऽर्तया गिरा स्वरं ममालम्ब्य सुदूरसंश्रवम् ॥
उदाहृतं तद्वचनं सुदारुणं त्वमागतो येन विहाय मैथिलीम् ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

षष्टितमः सर्गः ॥ ६० ॥

रामेणदुर्निमित्तदर्शनात्सीतायाविपदाशङ्कयात्वरितं लक्ष्मणेनसहस्वपर्णशालाप्रवेशः ॥ १ ॥ तथा सीताविहारार्हस्थलेष्वन्वेषणेपि तददर्शनाद्दुःखेन तरुमृगादीन्प्रति सीतादर्शनप्रश्नः ॥२॥ तथा सीतायाःक्वाप्यदर्शने राक्षसैर्भक्षणादिनानाप्रकारविकल्पपूर्वकं बहुधा विलापेन पुनःपुनस्तदन्वेषणाय वनेपरिभ्रमणं ॥ ३ ॥

भृशमाव्रजमानस्य तस्याधोवामलोचनम् ॥ प्रास्फुरच्चास्खलद्रामो वेपथुश्चाप्यजायत ॥ १ ॥

स्त्रियाःपरुषं श्रुत्वा इहागतः तस्य ते मैथिलीं त्यक्त्वा यासीति यत्तत्कर्म न परितुष्यामि॥२३॥ नाकरोःशासनंममेतियत्तत्सर्वथा ते अपनीतं अपनयः। क्रुद्धया स्त्रिया यत्किंचित्परुषमुक्तं चेत्तत्सोढव्यं । कथंचिदसहने बहिरागत्यान्तर्हितो भूत्वा तत्परिपालनं कर्तव्यं । केवलमागमनं तवापनीतिरेवेति भावः ॥ २४ ॥ अपनीतिमेवोपपादयितुं स्वरान्यथाभावं दर्शयति—असावित्यादिश्लोकत्रयेण ॥ २५ ॥ परिधाय संधाय । सलीलबाणेन लीलार्धबाणेन । मार्गीं मृगसंबन्धिनीं । त्यज्य त्यक्त्वा । सविक्लबस्वरः सदीनस्वरः । केयूरधरः अङ्गदधरः । आसीदित्यनेन दुरातीतत्वं गम्यते ॥ २६ ॥ तदेति च्छेदः । सुदूरे संश्रवः श्रवणं यस्य तं । मम स्वरं मत्स्वरसदृशं स्वरं । आलम्ब्य आश्रित्य । आर्तया गिरा दीनया वाचा । शराहतेन तेनैव तदा तस्मिन्काले। सुदारुणं तद्वचनमुदाहृतं । येन वचनेन श्रुतेन मैथिलीं विहाय आगतोसि । अस्मिन्सर्गे सप्तविंशतिश्लोकाः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकोनषष्टितमः सर्गः ॥ ५९ ॥

एवमियता प्रबन्धेन संभोगशृङ्गारो वर्णितः । अथ विप्रलम्भशृङ्गारमासुवेलारोहणाद्वर्णयितुमारभते । तदङ्गत्वेन रसान्तराणि दर्शितानि । " संयुक्तयोस्तु संभोगो विप्रलम्भो वियुक्तयोः " इति लक्षणात् । तत्र " अभिलाषमनःसङ्गौ संकल्पो गणसंस्तुतिः प्रद्वेषः । तापाभिमतत्यागावुन्मादो मूर्छना च मृतिः " इत्युक्तविप्रलम्भावस्थास्वष्टमीं दशामाह—सर्गत्रयेण । आव्रजमानस्य आगच्छतः । अधोवामलोचनं वामनेत्रस्याधःपक्ष्म प्रास्फुरत् । " अधोवामदृशः स्फूर्तौ बह्वनिष्टो भवेत्पुमान् " इति लक्षणात् । स्वयमस्खलत् । " प्रयाणकाले स्खलनं करोतीष्टस्य भञ्जनं "

ती० सर्गश्रवणफलंस्कान्दे—"सीतादुरुक्तिकथनं लक्ष्मणस्यमुखाच्च्युतम् । श्रुत्वानजातुपीडास्यादभिशापकृतेमहत्" इति ॥ २७ ॥ इत्येकोनषष्टितमस्सर्गः ॥ ५९ ॥

शि० यद्यपिसीतावियोगस्यसंभोगशृङ्गारपोषकत्वेनानिष्टत्वाभावाद्दुर्निमित्तानुभवोनसंभवति तथापि तात्कालिकवियोगजनित-

[पा०] १ ख. त्वाविनिन्दन्ते. घ. च. ज. त्वविनीतं. २ क. ग. ङ.—ट. वशमागम्य. ख. वशमागत्य. ३ क. ख. प्रणिधाय. ४ क. सएषबाणेन. ५ क. ग. ङ.—ट. त्यज्यच. ६ घ. समालम्ब्य. ७ ख. व्रजमानस्य तस्याधोवामलोचनमस्फुरत् । प्रास्खलच्चासकृत्पादेवेपथुश्चास्यजायत. ८ घ. ङ. ञ. श्चास्यजायत. क. च. ज. झ. ट. श्चास्यजायते.

उपालक्ष्य निमित्तानि सोशुभानि मुहुर्मुहुः ॥ अपि क्षेमं नु सीताया इति वै व्याजहार च ॥ २ ॥
त्वरमाणो जगामाथ सीतादर्शनलालसः ॥ शून्यमावसथं दृष्ट्वा बभूवोद्विग्नमानसः ॥ ३ ॥
उद्भ्रमन्निव वेगेन विक्षिपन्रघुनन्दनः ॥ तँस्ततस्तोटजस्थानमेभिवीक्ष्य समन्ततः ॥ ४ ॥
ददर्श पर्णशालां च रहितां सीतया तदा ॥ श्रिया विरहितां ध्वस्तां हेमन्ते पद्मिनीमिव ॥ ५ ॥
रुदन्तमिव वृक्षैश्च म्लानपुष्पमृगद्विजम् ॥ श्रिया विहीनं विध्वस्तं संत्यक्तवनदेवतम् ॥ ६ ॥
विप्रकीर्णाजिनकुशं विप्रविद्धबृसीकटम् ॥ दृष्ट्वा शून्यं निजस्थानं विललाप पुनःपुनः ॥ ७ ॥
हृता मृता वा नष्टा वा भक्षिता वा भविष्यति ॥ निलीनाऽप्यथवा भीरुरथवा वनमाश्रिता ॥ ८ ॥
गता विचेतुं पुष्पाणि फलान्यपि च वा पुनः ॥ अथवा पद्मिनीं याता जलार्थं वा नदीं गता ॥ ९ ॥
बलान्मृगयमाणस्तु नाससाद वने प्रियाम् ॥ शोकरक्तेक्षणः शोकोदुन्मत्त इव लक्ष्यते ॥ १० ॥

इति प्रसिद्धिः । वेपथुः कम्पः ॥ १ ॥ अशुभानि अशुभसूचकानि ॥ २ ॥ लालसः साभिलाषः । आवसथं गृहं । "स्थानावसथवास्तु च" इत्यमरः ॥ ३ ॥ श्लोकद्वयमेकान्वयं । वेगेन उद्भ्रमन्निव उत्पतन्निव । विक्षिपन् इतस्ततोनिवानितस्ततः क्षिपन् ॥ ४—५ ॥ श्लोकद्वयमेकान्वयं । वृक्षैः रुदन्तमिव स्थितं हीनस्वरभृङ्गवत्त्वादिति भावः । पुष्पाणि सीतया पूर्वमपचितानि । द्विजाः पक्षिणः । म्लानाः पुष्पमृगद्विजाः यस्मिंस्तत् तथोक्तं । श्रिया कान्त्या । विहीनं विध्वस्तं विशीर्णं । रावणसंन्यासिने दत्तत्वेन विप्रकीर्णाः अयथास्थानस्थिताः अजिनकुशाः यस्मिन् तत्तथा । ग्रहणकाले सीताया अवलम्बितत्वेन विप्रविद्धबृसीकटं विपर्यस्तमुन्यासनास्तरणं । शून्यं सीतारहितं । विललाप पर्यदेवयत् ॥ ६—७ ॥ विलापमाह द्वाभ्यां । हृता अपहृता । नष्टा यादृच्छिकमदर्शनं गता । निलीना विनोदाय व्यवहिता । अथवा निर्जनतया भीरुः सती गूढं वनमाश्रिता । पद्मिनीं याता स्नानार्थमिति शेषः । नदीं गतेत्यन्तरमितिकरणं द्रष्टव्यं ॥ ८—९ ॥ शोकाद्धेतोः उन्मत्त इव लक्ष्यते अल-

---

ङ्गुःखाभासस्यावश्यंभावित्वादुनिमित्तदर्शनंसंभवत्येवेतिदिक् ॥ १ ॥ ति० रुदन्तमित्यादेराश्रमोविशेष्यः । वर्णनीयसमोभावेन कवेरपिसंनिहितत्वेपरीत्यं । स० रुदन्तमित्यादेर्पुंल्लिङ्गत्वं ॥६॥ शि० विप्रकीर्णाजिनकुशमित्यनेन भूकंपादिर्जातइतिध्वनितं ॥७॥ ति० नष्टा अदर्शनंगता । स्वयोगशक्त्यापुनरलभ्यदर्शनाआहेतितात्पर्यं ॥ ८ ॥ ति० नदींगतेत्यादिसंतत्यर्थं तत्रतत्रयत्नान्मृगयमाणोपिनाससाद । उन्मत्तइवेत्ययमिवशब्दो मृग्यमाण प्रधावन्भ्रामेत्यादौसर्वत्रसंबध्यः । एतत्सर्वलोकव्यवहारनटनं भगवत्तत्त्वरूपस्य लोकेसर्वतो मायाप्रियतमेतिबोधयितुं । अतएव मातापितृवियोगोनैतावच्छोककारणं । तदुक्तंभागवते—"समनुजोऽजभवार्चिताङ्घ्रिरलङ्घवीर्य" इत्यादिनाविधिशंरामसुपक्रम्य "रक्षोऽधमेनहृकवद्विपिनेऽसमक्षं वैदेहराजदुहितर्यपवाहितायाम् । आत्रावनेकृपणवत्प्रिययावियुक्तः स्त्रीसङ्गिनांगतिमितिप्रथयंश्चचार"इति "नेदंयशोरघुपतेस्सुरयाच्ञयातो लीलातनोरधिकसाम्यविमुक्तधाम्नः । रक्षोवधोजलधिबन्धनमस्तपौरैर्यत्स्वशक्तिभिरनेकपरिवारसहायैः" इतिच । यथाशुग्रीवाद्याश्रमणवदिदमपिलीलैवेतिन्यतस्तत्स्तुतिरितितदर्थः । लीलाप्रयोजनंचतच्छ्रवणेनलोकोद्धारः । एतच्चमेएकादशाध्यायस्थेपद्ये । तथापञ्चमेपि—"मर्त्यावतारस्त्विहमर्त्यशिक्षणंरक्षोवधायैवनकेवलंविभोः । कुतोन्यथास्यूरमतःस्वआत्मन्सीताकृतानिव्यसनानीश्वरस्य"इति ॥ ती० वस्तुतस्तुनतादृशः श्रीरामइत्यर्थः । अतएवसीतादीन्प्रतिविलापादिकं । सीतान्वेषणसमयेसीतामुद्दिश्यवृक्षमृगादीन्प्रतिप्रश्नादिकंसर्वंश्रीरामेणलोकशिक्षार्थंनटनंकृतमितिप्रदर्शयितुमेवसर्वत्रेनभगवताश्रीवाल्मीकिना उद्भ्रमन्निव उन्मत्तइवेत्यादौतत्रतत्रेवशब्दःप्रयुक्तः । अतएवश्रीशुकोप्याह "रक्षोधमेनहृकवद्विपिनेसमक्षंवैदेहराजदुहितर्यपवाहितायां । आत्रावनेकृपणवत्प्रिययावियुक्तः स्त्रीसङ्गिनांगतिमितिप्रथयंश्चचार ॥ मर्त्यावतारस्त्विहमर्त्यशिक्षणंरक्षोवधायैवनकेवलंविभोः । कुतोन्यथास्यूरमतस्स्वआ-

---

[पा०] १ क. ख. च. ज. ञ. उपलक्ष्य. २ क.—ट. क्षेमंनु. ३ ख. घ. ज. ञ. व्याजहारपुनःपुनः. ग, ङ. झ. ट. इतिवैव्याजहारह. ४ ख. घ. ज. ञ. तत्रतत्रजनस्थानं. ५ घ. ज. ञ.—ट. मनुवीक्ष्य. ६ घ, ङ. च. ञ.—ट. सीतयारहितां. ७ घ. हिमान्ते. ८ क. ङ. च. ज.—ट. संत्यक्तवनदैवतैः. ९ क. ख, प्रविध्वस्तबृसी. ग. विप्रकीर्णबृसी. १० ग. ङ. घ. ज —ट. शून्योटजस्थानं. ११ ग. सुदुःखितः. १२ ग. च. ज. ञ. विनष्टवा. १३ घ. भीरुर्गहनंवासमाश्रिता. १४ ख. हिवा. १५ क. घ. ज.—ट. श्रीमानुन्मत्तइव.

वृक्षाद्वृक्षं प्रधावन्स गिरेश्चाद्रिं नदान्नदीम् ॥ बभूव विलपन्रामः शोकपङ्कार्णवाप्लुतः ॥ ११ ॥
अपि कच्चित्त्वया दृष्टा सा कदम्बप्रिया प्रिया ॥ कदम्ब यदि जानीषे शंस सीतां शुभाननाम् ॥ १२ ॥
स्निग्धपल्लवसंकाशा पीतकौशेयवासिनी ॥ शंसस्व यदि वा दृष्टा बिल्व बिल्वोपमस्तनी ॥ १३ ॥
अथवाऽर्जुन शंस त्वं प्रियां तामर्जुनप्रियाम् ॥ जनकस्य सुता भीरुर्यदि जीवति वा न वा ॥ १४ ॥
ककुभः ककुभोरूं तां व्यक्तं जानाति मैथिलीम् ॥ यथा पल्लवपुष्पाढ्यो भाति ह्येष वनस्पतिः ॥ १५ ॥
भ्रमरैरुपगीतश्च यथा द्रुमवरो ह्ययम् ॥ एष व्यक्तं विजानाति तिलकस्तिलकप्रियाम् ॥ १६ ॥
अशोक शोकापनुद शोकोपहतचेतसम् ॥ त्वन्नामानं कुरु क्षिप्रं प्रियासंदर्शनेन माम् ॥ १७ ॥
यदि ताल त्वया दृष्टा पक्वतालफलस्तनी ॥ कथयस्व वरारोहां कारुण्यं यदि ते मयि ॥ १८ ॥

क्ष्यतेत्यर्थः ॥ १० ॥ नदान् पश्चिमप्रवाहात् । शोकपङ्कार्णवाप्लुतो बभूव ॥ ११ ॥ अथ शोकमोहातिरेकेणाचेतनेषु चेतनबुद्ध्या तान्प्रतिभाषते—अपीत्यादिना । कदम्बानि कदम्बपुष्पाणि प्रियाणि यस्याः सा कदम्बप्रिया । प्रिया मत्कान्ता । अपिः प्रश्ने । एवं प्रश्नेऽपि प्रतिवचनादानमनादरकृतमिति मत्वाह—कदम्बेति । शुभाननामिति चिह्नकीर्तनं । कदम्बप्रियेत्यनेन दर्शनसंभावनोच्यते ॥ १२ ॥ स्निग्धपल्लवसंकाशेत्यनेन कोमलाङ्गित्वमुक्तं । बिल्वोपमस्तनीत्यनेन पद्मिनीजातिरुक्ता । तदुक्तं रतिरहस्ये पद्मिनीलक्षणे "स्तनयुगमपि यस्याः श्रीफलश्रीविडम्बि" इति ॥ १३ ॥ बिल्वेनानुक्तौ अयं मत्सरान्न कथयतीत्यर्जुनवृक्षं पृच्छति । यदि ज्ञातं यदीत्यर्थः ॥ १४ ॥ प्रतिवचनादानेनायं न जानातीति मत्वा वृक्षान्तरे तज्ज्ञानं संभावयति—ककुभ इति । ककुभोऽर्जुनविशेषः । स च स्त्रीणामूरुतुल्यो भवति अत एवमुच्यते—कुकुभोरूमिति । केचित्करभोरूमिति वदन्ति तत्प्रकृतशैलीविरुद्धम् । कदम्ब कदम्बप्रिया बिल्व बिल्वोपमस्तनीत्येवं ह्युच्यते । ज्ञाने हेतुमाह—यथेति । अनेन परिचयसंभावनोक्ता । जानाति कथंनकथयतीत्यर्थसिद्धं । एवमुत्तरत्रापि श्लोके द्रष्टव्यं ॥ १५ ॥ उप समीपे गीतः कृतवेदघोष इति ध्वन्यते । यथा येन कारणेन । एवंभूतो द्रुमवरोऽयं । तेन कारणेनमन्ये एष जानातीतिलोकः ॥ १६ ॥ स्ववचनकरणाय स्तौति—शोकापनुदेति । पचाद्यच् । गुणाभाव आर्षः । त्वन्नामानं कुरु अशोकं कुरु । संदर्शनेन ज्ञापनेन । शोकनिवृत्त्यर्थं प्रियां संदर्शयेत्यर्थः ॥ १७ ॥ पक्वतालेति

त्मन्सीताकृतानिव्यसनानीश्वरस्य । सर्वेनआत्मात्मवतामधीश्वरःसक्तस्त्रिलोक्यांभगवान्वासुदेवः । नस्त्रीकृतंकश्मलमश्रुवीतनलक्ष्मणंचापिविहातुमिच्छति । "इति । तथाचस्कान्दे उमासंहितायां देवान्प्रतिविष्णुवचनं—"अहंदाशरथिर्भूत्वा हन्मिरावणमाहवे । श्रीमद्रामावतारेऽस्मिन्नहंवक्तिक्रियतेमया । तत्रशङ्कानकर्तव्यासर्वज्ञेनापिमायया । मन्मायामोहितंरक्षो मनुष्यंमामवेक्ष्यति । अन्यथातस्यसानूनं नभवेद्यत्रकुत्रचित्" इति । किंच बहुविधदुःखप्रलापस्यदेहादावात्मबुद्धिपूर्वकत्वात्तद्बुद्धेरज्ञानमूलकत्वात् स्वकृतलीलाश्रवणद्वारासर्वलोकानांमुक्तिप्रदानाय । नृपरूपेणावतीर्णस्यसच्चिदानन्दघनविग्रहस्यपरमात्मनः श्रीरामस्यमायाधिष्ठातुःपरमेश्वरस्यमृगुशापादिनाप्यज्ञानगन्धोप्यस्तीतिवक्तुमशक्यत्वादेतद्विधविलापादिकंसर्वंश्रीरामेणलोकशिक्षार्थमेवकृतमितिवेदितव्यं । अन्यत्राप्येतादृशस्थलेष्वेवमेवाऽर्थोऽनुसन्धेयः ॥ १० ॥ नदीनदं नदीसंबन्धिनंनदं । जातावेकवचनं । नाराइतिलोकप्रसिद्धं । नदाः पश्चिमप्रवाहाइति कतकः । पश्चिमप्रवाहायाअपिनर्मदायानदत्वव्यवहाराभावाच्चिन्त्यंतत् ॥ स० नद्यश्चनदाश्चतेषांसमाहारः । "जातिरप्राणिनां" इत्येकवद्भावोवा । नदीसहितश्चासौनदश्चेतिवा ॥ ११ ॥ ति० उपसमीपेगीतः क्रियमाणझङ्कारइत्यर्थः । तथा द्रुमवरोह्यसीतिस्तौति । ततउत्तरमलब्ध्वाऽन्यंप्रत्याह—एषइति । तत्प्रियत्वात्तज्ज्ञेयत्वसंभावना ॥ १६ ॥ तनि० शोकोयस्मान्नभवतिस अशोकइतिव्युत्पत्तिमभिप्रेत्यशोकापनुदेत्युक्तिः । त्वन्नामानं शोकरहितमित्यर्थः ॥ १७ ॥

[पा०] १ ङ. झ. ञ. ट. गिरींश्चापिनदीनदं. २ क. ङ. झ. ट बभ्रामविलपन्रामः. च. ज. ञ. बभ्रामविलपन्दीनः ३ क. ख. शोकार्णवपरिप्लुतः. ४ ग. ङ. झ. ञ. ट. अस्तिकच्चित् ५ च. ज. ञ. कदंबवनप्रिया. क. ख. कदम्बप्रियामम. ६ ग.—च. ज.—ट. संकाशां. ७ ग.—च. ज.—ट. वासिनीं. ८ ङ. झ. यदिसा. ९ ख. ग. ञ. शंसस्व. १० ङ. झ. ट. तन्वीयदि. क. सीतायदि. ११ ख. ग. घ. करभोरूं. १२ ख.—ट. लतापल्लव. १३ ङ.—ट. तथाद्रुमवरोह्यसि. १४ ट. हृतचेतनं. ङ. झ. हतचेतनं. १५ ग. च. छ. ज. ञ. संदर्शनाद्धिमां. १६ क. ग. ङ. झ. ट. तालोपमस्तनी.

यदि दृष्टा त्वया सीता जम्बु जम्बुफलोपमाम् ॥ प्रियां यदि विजानीषे निःशङ्कं कथयस्व मे ॥ १९ ॥
अहो त्वं कर्णिकाराद्य सुपुष्पैः शोभसे भृशम् ॥ कर्णिकारप्रिया साध्वी शंस दृष्टा प्रिया यदि ॥२०॥
चूतनीपमहासालान्पनसान्कुरवान्धवान् ॥ दाडिमानसनान्गत्वा दृष्ट्वा रामो महायशाः ॥ २१ ॥
मल्लिका माधवीश्चैव चम्पकान्केतकीस्तथा ॥ पृच्छन्रामो वने भ्रान्त उन्मत्त इव लक्ष्यते ॥ २२ ॥
अथवा मृगशावाक्षीं मृग जानासि मैथिलीम् ॥ मृगविप्रेक्षणी कान्ता मृगीभिः सहिता भवेत् ॥२३॥
गज सा गजनासोरूर्यदि दृष्टा त्वया भवेत् ॥ तां मन्ये विदितां तुभ्यमाख्याहि वरवारण ॥ २४ ॥
शार्दूल यदि सा दृष्टा प्रिया चेन्द्रनिभानना ॥ मैथिली मम विस्रब्धं कथयस्व न ते भयम् ॥ २५ ॥
किं धावसि प्रिये नूनं दृष्टाऽसि कमलेक्षणे ॥ वृक्षैराच्छाद्य चात्मानं किं मां न प्रतिभाषसे ॥२६॥
तिष्ठतिष्ठ वरारोहे न तेस्ति करुणा मयि ॥ नात्यर्थं हास्यशीलाऽसि किमर्थं मामुपेक्षसे ॥ २७ ॥
पीतकौशेयकेनाँसि सूचिता वरवर्णिनि ॥ धावन्त्यपि मया दृष्टा तिष्ठ यद्यस्ति सौहृदम् ॥ २८ ॥
नैव सा नूनमथवा हिंसिता चारुहासिनी ॥ कृच्छ्रं प्राप्तं न मां नूनं नोपेक्षितुमर्हति ॥ २९ ॥

संबन्धोक्तिः ॥ १८ ॥ जम्बु "अम्बार्थनद्योर्ह्रस्वः" इति ह्रस्वत्वं । "एङ्ह्रस्वात्सम्बुद्धेः" इति सुलोपः । स्निग्धताकारेण जम्बुफलौपम्यं । विजानीषे विद्धत इति शेषः ॥ १९ ॥ सुपुष्पैरिति धार्मिकस्योक्तिः ॥ २० ॥ श्लोकद्वयमेकान्वयं । क्रियाभेदाद्रामपदद्वयं । नीपः कदम्बः । कुरवान् कुरवकान् । रामः चूतादीन् गत्वा दृष्ट्वा पृच्छन् आधावनेन सर्वत्र भ्रान्तः कृतभ्रमणःरामः उन्मत्तः चित्तविभ्रमवानिव । लक्ष्यते अलक्ष्यत ॥२१—२२ ॥ इति वृक्षान्पृच्छा मृगान्पृच्छति—अथेति । वृक्षा मा कथयन्तु त्वं तु कथयेत्याशयेनाथवाशब्दप्रयोगः । मृगशावस्य मृगबालस्याक्षिणी इवाक्षिणीयस्यास्तां । मृगस्य सीताज्ञाने योग्यतामाह—मृगेति । मृगवद्विविधं प्रेक्षत इति मृगविप्रेक्षणी । सहिता भवेदिति संभावनायां लिङ् ॥ २३ ॥ गजनासोरूः करिकरोरूः । वरवारण वारणश्रेष्ठ । हे गज तां सीतां । तुभ्यं तव । विदितां मन्ये शङ्के । गजनासोरूः सा त्वया यदि दृष्टा भवेत्तदाख्याहि ॥ २४ ॥ शार्दूलेति । अत्र तुल्यगतिस्वरूपः संबन्धो बोध्यः । न ते भयं शूरस्यतव भयं नास्ति । एतेन पूर्वोक्ताः सर्वे भीत्या न प्रत्यूचुरिति रामस्याशयः ॥ २५ ॥ पुनरवस्थाविशेषं दर्शयति—किं धावसीति । प्रिये किमर्थं धावसि धावन्ती दृष्टासि नूनं । अथादर्शनादाह—वृक्षैरिति । इदं च पूर्वोपेक्षयातिरिक्तं दर्शनान्तरं ॥ २६—२७ ॥ अन्तर्हितापि पीतकौशेयेन सूचितासि । इदमपि प्रत्ययान्तरं । पुनरपि प्रत्ययान्तरमाह—धावन्त्यपीति ॥२८॥ अथ सर्वात्मनादर्शनाभावात्प्रकारान्तरमुत्प्रेक्षते—नैवेति । अथवा सात्र नैव विद्यते किंतु हिंसिता । अत्र हेतुमाह—कृच्छ्रमिति । कृच्छ्रं दुःखं । प्राप्तंमां यथा येन कारणेन । उपेक्षितुं नार्हति नूनं । तेन कारणेन हिंसितैव

शि० उन्मत्तइवलक्ष्यते । इवेनविप्रलंभदशायाउन्मादाद्विलक्षण्यंसूचितं ॥ २२ ॥ ति० पुनर्गोधावस्था । नूनंसानैवयादृष्टा । तर्हिसाकेत्यत्राह । अथवाहिंसिता रक्षोभिः । तत्रहेतुः—यथा । एवंप्रकारेण । कृच्छ्रंनूनं मां प्राप्तं सापेक्षितुमर्हति । नापक्षते तस्मान्नैवसेत्यर्थः । उपेक्षितुमितिपाठेकाकुः ॥ २९ ॥

[पा०] १ क. ङ. ञ. ट. जंबोजांबूनदसमप्रभा. ख. घ. घ. सीताजंबुजांबूनदप्रभा. च. ज. जंबोजांबूफलप्रिया. छ. जंबुजांबूफलप्रिया. २ ख. विजानीषे. ङ. ञ. ट. विजानासि. ३ ख. कर्णिकाराद्य. ४ ङ. ञ. पुष्पितः. ग. सुपुष्पैरुपशोभितः. ५ ग. ङ.—ट. प्रियासाध्वी. ६ ङ. ञ. ट. यदिप्रिया. ७ क. ख. ग. ङ. छ. ज. झ. ट. कुरवांस्तथा. ८ च. ज. दाडिमान्पनसान्. ख. ङ. ञ. ट. दाडिमानपितान्गत्वा. ९ ग. घ. ङ. छ. ञ. ण. ट. बकुलानथपुन्नागांश्चन्दनान्केतकांस्तथा. च. ज. बकुलानथपुन्नागांश्चपंकान्केतकांस्तया. १० ङ. ट. गच्छत्रामो. ११ क. ख. यदिवा. १२ घ. छ. ज. झ. चन्द्रसमानना. १३ क. ङ. च. छ. ञ. ण. ट. विस्रब्धः. १४ ख. मेऽद्य. १५ क. ख. ग. वृक्षेणाच्छिद्य. १६ ग. ऽतिनभाषसे. १७ घ. नापि. १८ च. छ. ज. चारुवर्णिनी. १९ क. ख. घ.—ट. प्राप्तंहि. ग. प्राप्तंतु. २० घ. ङ. ञ. यथापेक्षितुं.

व्यक्तं सा भक्षिता बाला राक्षसैः पिशिताशनैः ॥ विभज्याङ्गानि सर्वाणि मया विरहिता प्रिया ॥३०॥
नूनं तच्छुभदन्तोष्ठं सुनासं चारुकुण्डलम् ॥ पूर्णचन्द्रमिव प्रस्तं मुखं निष्प्रभतां गतम् ॥ ३१ ॥
सा हि चम्पकवर्णाभा ग्रीवा ग्रैवेयशोभिता ॥ कोमला विलपन्त्यास्तु कान्तायाः भक्षिता शुभा ॥३२॥
नूनं विक्षिप्यमाणौ तौ बाहू पल्लवकोमलौ ॥ भक्षितौ वेपमानाग्रौ सहस्ताभरणाङ्गदौ ॥ ३३ ॥
मया विरहिता बाला रक्षसां भक्षणाय वै ॥ सार्थेनैव परित्यक्ता भक्षिता बहुबान्धवा ॥ ३४ ॥
हा लक्ष्मण महाबाहो पश्यसि त्वं प्रियां क्वचित् ॥ हा प्रिये क्व गता भद्रे हा सीतेति पुनःपुनः ॥३५॥
इत्येवं विलपन्त्रामः परिधावन्वनाद्वनम् ॥ क्वचिदुद्भमते वेगात्क्वचिद्विभ्रमते बलात् ॥
क्वचिन्मत्त इवाभाति कान्तान्वेषणतत्परः ॥ ३६ ॥
स वनानि नदीः शैलान्गिरिप्रस्रवणानि च ॥ काननानि च वेगेन भ्रमत्यपरिसंस्थितः ॥ ३७ ॥
तेषां स गत्वा विपुलं महद्वनं परीत्य सर्वं त्वथ मैथिलीं प्रति ॥
अनिष्ठिताशः स चकार मार्गणे पुनः प्रियायाः परमं परिश्रमम् ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे षष्टितमः सर्गः ॥ ६० ॥

नूनं ॥ २९ ॥ एतदेव दृढयति—व्यक्तमिति ॥ ३० ॥ वक्ष्यमाणदशामनुसंधाय प्रलपति—नूनमिति । पूर्णचन्द्रमिव प्रस्तं राहुग्रस्तं पूर्णचन्द्रमिव स्थितमित्यर्थः । एवंभूतं मुखं निष्प्रभतां गतं । नूनमित्यन्वयः ॥ ३१ ॥ ग्रैवेयकं कण्ठभूषणं । या उक्तविशेषणा ग्रीवा सा भक्षिता भवेदित्यन्वयः ॥ ३२ ॥ हस्ताभरणं कटकं ॥ ३३ ॥ भक्षणाय विरहितासीदिति पूर्वार्धेऽन्वयः । सार्थेन पथिकसमुदायेन ॥ ३४ ॥ लक्ष्मणमामन्त्र्य पृच्छति—हा लक्ष्मणेति । पश्यसि पश्यसिकिं । हा सीत इति वक्तव्ये हा सीतेति सन्धिरार्षः । इतिकरणस्य सर्गारम्भस्थेन विललापेत्यनेनान्वयः ॥ ३५ ॥ इत्येवमिति सार्धश्लोक एकान्वयः । प्रथमार्धं पूर्वानुवादरूपं । क्वचिन् अधिष्ठाने सादृश्याभावेपि वेगात् शोकवेगादेव । उद्भमते सीताप्रतीतिरूपं भ्रमं प्राप्नोति । क्वचित् लतादौ । बलात् सादृश्यबलात् । विभ्रमते तत्प्रतीतिभ्रमं लभते । मत्त इवाभाति मत्तवत्परिभ्रमतीत्यर्थः ॥ ३६ ॥ सुगमानि वनानि । दुर्गमानि काननानि । गिरेरुद्भूतानिप्रस्रवणानि गिरिप्रस्रवणानि । " वत्सः प्रस्रवणं वारिप्रवाहः " इत्यमरः । अपरिसंस्थितः अप्रतिष्ठितः ॥ ३७ ॥ सरामः तथा क्वचिदुद्भमत इत्यादिरीत्या । विपुलं विशालं महत् निरन्तरं । वनं गत्वा सर्वं वनस्थसर्वप्रदेशं परीत्य पुनःपुनश्चरित्वा अथ मैथिलीं प्रति मैथिलीलाभं प्रति । अनिष्ठिताशः अनिष्पन्नाशः सन् । पुनरपि प्रियाया मार्गणे परमं परिश्रमं चकार ॥ ३८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रङ्गमेखलाख्याने आरण्यकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

शि० आविरहिता आविभिः स्वजनरूपरक्षकैः रहिता शून्यासातं राक्षसैर्यदिभक्षिता तर्हि अङ्गानि राक्षसावयवान् विभज्य भक्षयित्वा मय मां प्रायुङ्क्ष्व ॥ ३० ॥ इतिषष्टितमस्सर्गः ॥ ६० ॥

[पा०] १ ग. विभिन्याङ्गानि. २ क. ग. ङ.—ट. शुभकुण्डलं. ३ क. ख. ग. घ. ज.—ट. चन्द्रनिभं. ४ क. ङ. ट. ग्रैवेयकोचिता. ५ ख. बलात्. ६ च. छ. ज. ञ. सहस्राभरणौगतौ. ७ ग. सावनेस्मिन्परित्यक्ता. क. सावनेस्मिन्परिक्षिप्ता. ख. सावनेऽस्मिन्परित्रष्टा. ८ क. ख. ङ.—ट. पश्यसे. ९ ख. पर्यधावत्. १० च. छ. ज. ञ. भ्रमन्विपरि. ११ ङ. ञ. ट. तदा. १२ च. छ. ज. ञ. अधिष्ठिताशः.

एकषष्टितमः सर्गः ॥ ६१ ॥

पर्णशालादावन्वेषणेपिसीतायाअलाभाद्दुःखाविलापेन शोकान्तरासंप्रतिलक्ष्मणेनसत्सान्त्वनंसमग्रवनभागेषुपुनरन्वेषणस्य कर्तव्यत्वोक्तिः ॥ १ ॥ पुनर्वनगिरिदर्यादिषुगवेषणेपिसीतामलब्धवतारामेणलक्ष्मणेनसान्त्वनेपिशोकात्सीतांप्रत्याक्रोशनं ॥ २ ॥

दृष्ट्वाऽऽश्रमपदं शून्यं रामो दशरथात्मजः ॥ रहितां पर्णशालां च विध्वस्तान्यासनानि च ॥ १ ॥
अदृष्ट्वा तत्र वैदेहीं सन्निरीक्ष्य च सर्वशः ॥ उवाच रामः प्राकुश्य प्रगृह्य रुचिरौ भुजौ ॥ २ ॥
क्व नु लक्ष्मण वैदेही कं वा देशमितो गता ॥ केनाहृता वा सौमित्रे भक्षिता केन वा प्रिया ॥ ३ ॥
घृणेनाच्छाद्य यदि मां सीते हसितुमिच्छसि ॥ अलं ते हसितेनाद्य मां भजस्व सुदुःखितम् ॥ ४ ॥
यैः सह क्रीडसे सीते विश्वस्तैर्मृगपोतकैः ॥ एते हीनास्त्वया सौम्ये ध्यायन्त्यास्ताविलेक्षणाः ॥५॥
सीतया रहितोऽहं वै नहि जीवामि लक्ष्मण ॥ ६ ॥
मृतं शोकेन महता सीताहरणजेन माम् ॥ परलोके महाराजो नूनं द्रक्ष्यति मे पिता ॥ ७ ॥
कथं प्रतिज्ञां संश्रुत्य मया त्वमभियोजितः ॥ अपूरयित्वा तं कालं मत्सकाशमिहागतः ॥ ८ ॥
कामवृत्तमनार्यं मां मृषावादिनमेव च ॥ धिक्त्वामिति परे लोके वक्ष्यति मे पिता ॥ ९ ॥
विवशं शोकसंतप्तं दीनं भग्नमनोरथम् ॥ मामिहोत्सृज्य करुणं कीर्तिर्नरमिवानृजुम् ॥ १० ॥
क्व गच्छसि वरारोहे मां नोत्सृज सुमध्यमे ॥ त्वया विरहितश्चाहं भोक्ष्ये जीवितमात्मनः ॥११॥
इतीव विलपन्रामः सीतादर्शनलालसः ॥ न ददर्श सुदुःखार्तो राघवो जनकात्मजाम् ॥ १२ ॥

अथ रामस्य नवमीमवस्थां दर्शयत्येकषष्टितमे । दृष्ट्वेत्यादिश्लोकद्वयमेकान्वयं । शून्यं सीतारहितं । रहितां सीतयेति शेषः । विध्वस्तानि रावणाक्रान्तत्वादिति भावः । सर्वशः सर्वत्र । तत्र वनप्रदेशे । वैदेहीं संनिरीक्ष्य विचित्य । तत्रादृष्ट्वा पुनरपि रामग्रहणं क्रियाभेदात् । प्राकुश्य सीतामुद्दिश्याहूय उवाच । भुजग्रहणं शोककृतविकारविशेषः । प्रगृह्य उत्क्षिप्य ॥ १—२ ॥ क्व नु अत्र वने कुत्र प्रदेशे वर्तते । कं वा देशान्तरं गता ॥ ३ ॥ आच्छाद्य स्वमिति शेषः । हसितुं अन्तर्हितां मां ज्ञातुमसमर्थोसीत्येवं परिहसितुं । अद्य शोककाले ॥ ४ ॥ क्रीडसे क्रीडसि । विश्वस्तैः चिरोपलालनेन विश्वासं प्राप्तैः । मृगपोतकैः बालमृगैः । "पोतः पाकोऽर्भको डिम्भः" इत्यमरः । ध्यायन्त्यास्ताविलेक्षणाः किमपि ध्यायन्तीति वा ॥५॥ सीतयेति इदमर्धमेकं वाक्यं ॥६॥ परलोके स्वर्गे ॥७॥ श्लोकद्वयमेकान्वयं । प्रतिज्ञां चतुर्दशवर्षवनवासप्रतिज्ञां । संश्रुत्य अङ्गीकृत्य । मया अभियोजितः नियुक्तस्त्वं तं कालमपूरयित्वा कथमागतः । कामवृत्तं यथेष्टाचारं । अनार्यं दुर्जनं मां धिक्त्वामिति वक्ष्यति । अहमुपालम्भयोग्य एव कामवृत्तत्वादिति भावः ॥८—९॥ विवशमित्यादश्लोकद्वयं । विवशं अस्वाधीनं स्वत्परतन्त्रमित्यर्थः । करुणं यथा भवति तथा उत्सृज्य त्यागकालेऽपि तव दयास्त्येवेति भावः । अनृजुं कपटाचारं । मां नोत्सृज सुमध्यमे इदं मदुत्सर्जनं स्वल्पक्षणस्थानानुरूपमिति भावः । उत्सर्जने को दोष इत्यत्राह—त्वयेति ॥१०—११॥ इतीवेति । एवंप्रकारेणेत्यर्थः ।

ति० प्राकुश्य ह्वइतिशब्दंकृत्वा ॥ २ ॥

[पा०] १ क.—ट. प्रविद्धान्यासनानिच. ख. ग. विप्रविद्धासनानिच. २ ग. घ. ङ. म. सर्वतः. ३ ट. परिष्वज्यभुजौ भुजौ. ४ ङ. कथादिशं. ५ क. ख. ग. नाहृताच. ६ च. छ. म. केनवाभक्षिता. ७ क.—ट. वृक्षेणाच्छाद्य. ८ क. ङ. ट. परिक्रीडसे. ९ च. छ. ज. ञ. सीते. १० ग. ङ. ङ. ञ. ट. ध्यायन्त्यस्ताविले. क. घ. ज. ध्यायन्त्यस्ताविले. ११. क. ख. ग. अभिचोदितः. १२ ख. मितोगतः. १३ ङ. ङ. मन्यर्थवा. १४ ग. नूनं. १५ ग. ङ. ञ. ट. मामेवोत्सृज. क. घ. मामुत्सृज्य. १६ क. ङ. ट. लक्ष्ये. १७ क. ङ.—ज. म. इतेवं.

अनासादयमानं तं सीतां दशरथात्मजम् ॥ पङ्कमासाद्य विपुलं सीदन्तमिव कुञ्जरम् ॥
लक्ष्मणो राममत्यर्थमुवाच हितकाम्यया ॥ १३ ॥
मा विषादं महाबाहो कुरु यत्नं मया सह ॥ इदं च हि वनं शूर बहुकन्दरशोभितम् ॥ १४ ॥
प्रियकाननसंचारा वनोन्मत्ता च मैथिली ॥ सा वनं वा प्रविष्टा स्यान्नलिनीं वा सुपुष्पिताम् ॥ १५ ॥
सरितं वाऽपि संप्राप्ता मीनवञ्जुलसेविताम् ॥ स्नातुकामा निलीना स्याद्वासकामा वने क्वचित् ॥१६॥
वित्रासयितुकामा वा लीना स्यात्काननेऽपि क्वचित् ॥ जिज्ञासमाना वैदेहीं त्वां मां च पुरुषर्षभ ॥ १७ ॥
तस्या ह्यन्वेषणे श्रीमन्क्षिप्रमेव यतावहै ॥ १८ ॥
वनं सर्वं विचिनुवो यत्र सा जनकात्मजा ॥ मन्यसे यदि काकुत्स्थ मा स्म शोके मनः कृथाः ॥१९॥
एवमुक्तस्तु सौहार्दाल्लक्ष्मणेन समाहितः ॥ सह सौमित्रिणा रामो विचेतुमुपचक्रमे ॥ २० ॥
तौ वनानि गिरींश्चैव सरितश्च सरांसि च ॥ निखिलेन "विचिन्वानौ सीतां दशरथात्मजौ ॥२१॥
तस्य शैलस्य सानूनि गुहाश्च शिखराणि च ॥ निखिलेन "विचिन्वानौ नैव तामभिजग्मतुः॥२२॥
विचित्य सर्वतः शैलं रामो लक्ष्मणमब्रवीत् ॥ नेह पश्यामि सौमित्रे वैदेहीं पर्वते शुभाम् ॥ २३ ॥
ततो दुःखाभिसंतप्तो लक्ष्मणो वाक्यमब्रवीत् ॥ विचरन्दण्डकारण्यं भ्रातरं दीप्ततेजसम् ॥ २४ ॥

लालसः साभिलाषः ॥ १२ ॥ अनासाद्यमानमित्यादिसार्धश्लोक एकान्वयः । अप्राप्नुवन्तमित्यर्थः । अत्यर्थं हितकाम्ययेत्यन्वयः ॥ १३ ॥ विषादं मा कुरु अन्वेषणे यत्नं कुर्विरित्युभयत्रान्वयः । अन्वेषणयोग्यतामाह—इदं हीति । बहुकन्दरैः कन्दरतुल्यलतागृहैः शोभितं ॥ १४ ॥ प्रियः काननसंचारो यस्याः सा । वनोन्मत्ता च । वनं जलं "जीवनं भुवनं वनं" इत्यमरः । वनेनवनदर्शनेन उन्मादवती अतिप्रियसलिलेत्यर्थः । यथाक्रमं तत्कार्यमाह—सेति ॥ १५ ॥ बञ्जुलो वेतसः । सरितं स्नातुकामा संप्राप्ता स्यात् । हासकामा परिहासकामा । क्वचिद्वने लीना स्याद्वा ॥१६॥ वित्रासयितुकामेति । पूर्वं हासार्थं गूढेति शङ्का अत्र वित्रासनार्थमिति भिदा । मां त्वां च जिज्ञासमाना आवयोरन्वेषणादिसामर्थ्यं जिज्ञासमानेत्यर्थः ॥१७॥ तस्या इत्यर्थं पृथक् । श्रीमन् भार्यावियोगलक्षणं ते नास्तीति भावः॥१८॥ यदि मन्यसे यदीच्छसि । तदा विचिनुवः त्वं शोके मनो मा कृथाः ॥१९॥ लक्ष्मणेनैवमुक्तः अतएव समाहितः कृतचित्तसमाधानः । विचेतुं अन्वेष्टुं ॥२०॥ वनानि स्वल्पानि महान्ति च पुष्पाद्यचयव्यग्रान्न सन्निहिता भवेदिति । गिरीन् विचित्रधातुसंग्रहसक्ताऽत्र भवेदिति । सरितः हंसकारण्डवाविलोलितपुलिनतया तदवलोकनकुतुकिनी भवेदिति । सरांसि च फुल्लकमलषण्डमण्डिततया तद्विहारपरान्न भवेदिति । निखिलेन भावप्रधानो निर्देशः । कात्स्न्र्येन विचिन्वानौ । सीता न लब्धेति त्यक्तव्यापारौ न भवतः । तौ दशरथात्मजौ न दृष्टेति तूष्णीं तिष्ठन्तौ न भवतः । मृदुप्रकृतिकत्वात् । नैव तामभिजग्मतुरिति वक्ष्यमाणमन्त्राप्यनुषज्यते ॥२१॥ तस्य शैलस्य प्रस्रवणगिरेः । सानूनि प्रस्थान् । शिखराणि शृङ्गाणि ॥ २२ ॥ शैलं सर्वतः सर्वत्र शैले । "उभसर्वतसोः—"इति द्वितीया । अन्त इतिकरणं ॥ २३ ॥ दीप्ततेजसमिति वक्ष्यमाणसीतालाभहेतुलक्षणोक्तिः

ती० वनोन्मत्ता वनसंचारकोविदा ॥ ति० वनोन्मत्ता वनस्यपुष्पितत्वदर्शनादुन्मत्ता हर्षवती ॥ १५ ॥ शि० असकामा अन्यत्रवासविषयकेच्छाभावत्वात्पिवैदेही । मां त्वां च जिज्ञासमाना आवयोरन्वेषणसामर्थ्यज्ञानेच्छावतीसती वनेक्वचिद्वलीना निलीना स्याद्वा । तत्र बञ्जुलोवेतसः ॥ १६ ॥

[पा०] १ ङ. ञ. ट., शोकपरायणं. २ च. ज. माविषीद. ३ ङ. ञ. ट. महाबुद्धे. ४ ङ. ञ. ट. इदंगिरिवनं. ५ क. ङ.—ज. ञ. ट. वीर. ६ क. च. छ. ज. ञ. अननंवा. ७ क. ग. अस्याः. ८ क.ट. यतावहे. ९ ङ. ञ. ट. मुक्तस्त. १० क. ग. ङ—ट. विचिन्वन्तौ. ११ ङ. ञ. ट. शिलाश्च. १२ क. ग. ङ.—ट. विचिन्वन्तौ. १३ घ. अधिजग्मतुः.

प्राप्स्यसि त्वं महाप्राज्ञ मैथिलीं जनकात्मजाम् ॥ यथा विष्णुर्महाबाहुर्बलिं बद्ध्वा महीमिमाम् ॥२५॥
एवमुक्तस्तु सौहार्दाल्लक्ष्मणेन स राघवः ॥ उवाच दीनया वाचा दुःखाभिहतचेतनः ॥ २६ ॥
वनं सर्वं सुविचितं पक्षिन्यः फुल्लपङ्कजाः ॥ गिरिश्चायं महाप्राज्ञ बहुकन्दरनिर्झरः ॥ २७ ॥
न हि पश्यामि वैदेहीं प्राणेभ्योपि गरीयसीम् ॥ २८ ॥
एवं स विलपन्रामः सीताहरणकर्शितः ॥ दीनः शोकसमाविष्टो मुहूर्तं विह्वलोऽभवत् ॥ २९ ॥
संतप्तो ह्यवसन्नाङ्गो गतबुद्धिर्विचेतनः ॥ निःश्वसादातुरो दीनो निःश्वासाशीतमायतम् ॥ ३० ॥
बहुलं स तु निःश्वस्य रामो राजीवलोचनः ॥ हा प्रियेति विचुक्रोश बहुशो बाष्पगद्गदः ॥३१॥
तं ततः सान्त्वयामास लक्ष्मणः प्रियबान्धवः ॥ बहुप्रकारं धर्मज्ञः प्रश्रितं प्रश्रिताञ्जलिः ॥३२॥
अनादृत्य तु तद्वाक्यं लक्ष्मणोष्ठपुटाच्युतम् ॥ अपश्यंस्तां प्रियां सीतां प्राक्रोशत्स पुनःपुनः ॥३३॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

द्विषष्टितमः सर्गः ॥ ६२ ॥

सीतामपश्यन्रामेणलक्ष्मणंप्रतिसंबोधनेनबहुपाविलापः ॥ १ ॥

सीतामपश्यन्धर्मात्मा कामोपहतचेतनः ॥ विललाप महाबाहू रामः कमललोचनः ॥ १ ॥
पश्यन्निव स तां सीतामपश्यन्मदनार्दितः ॥ उवाच राघवो वाक्यं विलापाश्रयदुर्वचम् ॥ २ ॥

॥२४॥ प्राप्स्यसीति । सीताहर्तारं बद्ध्वेति शेषः ॥२५॥ दुःखाभिहतचेतनः दुःखोपहतहृदय इत्यर्थः ॥२६॥ पक्षिन्य इत्यादौ सुविचिताः सुविचित इति विपरिणामः कार्यः ॥२७॥ न हीत्यर्धमेकं वाक्यं ॥२८॥ विह्वलः परवशः ॥ २९ ॥ अवसन्नाङ्गः कृशाङ्गः । गतबुद्धिः निस्संज्ञः । विचेतनः निश्चेष्टः । अशीतं उष्णं आयतं दीर्घमितिनिश्वासक्रियाविशेषणं ॥ ३० ॥ विचुक्रोश उच्चैस्स्वरेणाहूतवान् ॥ ३१ ॥ प्रश्रितं सविनयमिति क्रियाविशेषणं । प्रश्रिताञ्जलिः बद्धाञ्जलिः ॥ ३२ ॥ लक्ष्मणोष्ठपुटाच्युतं लक्ष्मणोक्तमित्यर्थः । पुनः प्राक्रोशत् उद्घोषणाहूतवान् ॥३३॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकषष्टितमः सर्गः ॥ ६१ ॥

अथ रामस्य "दह्यमानःसङ्कल्पैर्जागरः कृशताऽरतिः । ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश" इत्युक्तावस्थासु रतिं नाम षष्ठीमवस्थां प्रदर्शयति द्विषष्टितमे । धर्मात्मा कामोपहतचेतन इत्याभ्यां धर्मविरुद्धकामस्यानिन्द्यत्वमुक्तं । महाबाहुरित्यूर्ध्वबाहुत्वमुच्यते । कमललोचन इत्यनेन समधुपद्मसाम्यादश्रुकालुष्यमुच्यते । कामेन सीताविप्रलम्भजनितव्यामोहेन उपहता अप्रकृतिस्था चेतना चैतन्यं यस्य स तथा ॥ १ ॥ पुरोवर्तित्वाभावेन सीतामप-

---

स० द्वाविंशे अतीतिच्छेदः । तस्य विचुक्रोशेत्यनेनान्वयः । इतीतिशेषः ॥ २९ ॥ इत्येकषष्टितमस्सर्गः ॥ ६१ ॥
शि० मन्मथार्दितः स्वप्रेयसीविषद्वारान्मन्मथार्दकोराघवः ॥ २ ॥

[पा०] १ क. ङ. ञ. ट. प्राप्स्यसे. २ क. ङ. ट. वीरेणलक्ष्मणेन. ३ क. ग. ट. सुविचितंसर्वं. च. ज. सर्वंतु-विचितं. ४ संतप्तोह्यवसन्नाङ्गो. बहुलंसतुनिश्वस्य. इत्यनयोःश्लोकयोःपौर्वापर्यं च. छ. ज. पाठेषुदृश्यते. ख. ङ.—ट. सविह्वलितसर्वाङ्गो. ५ ङ.—ट. विषसादातुरो. ६ ख. निश्वस्यसंज्ञमुहुर्मुहुः. क. निश्वस्याधिकं. ७ ङ.—ज. मारुतं. ग. मारुतः. ८ क.—ट. बहुशः. ९ क.—ट. तंसान्त्वयामाससतदा. ख. ग. तंसान्त्वयामाससदा. १० ङ. प्रियबान्धवं. ११ घ. ङ. ङ. ञ. ट. शोकार्तः. १२ क.—ङ. ङ. ण. ट. प्रश्रितः. १३ क. छ. ङ. ण. ठ. पुटच्युतं. १४ क. ङ.—ट. शोकोपहत. १५ क.—ट. पश्यन्निवच. १६ ङ. ङ. ट. न्मन्मथार्दितः. १७ ग. विरहाश्रय.

त्वमशोकस्य शाखाभिः पुष्पप्रियतया[1] प्रिये ॥ आवृणोषि शरीरं ते मम शोकविवर्धनी ॥ ३ ॥
कदलीकाण्डसदृशौ[2] कदल्या संवृतावुभौ ॥ ऊरू पश्यामि ते देवि नासि शक्ता निगूहितुम् ॥ ४ ॥
कर्णिकारवनं भद्रे हसन्ती देवि सेवसे ॥ अलं[3] ते परिहासेन मम बाधावहेन वै ॥ ५ ॥
परिहासेन किं सीते परिश्रान्तस्य मे प्रिये ॥ अयं[4] स परिहासोपि साधु देवि न रोचते ॥ ६ ॥
विशेषेणाश्रमस्थाने हासोऽयं न प्रशस्यते ॥ अवगच्छामि ते[5] शीलं परिहासप्रियं प्रिये ॥ ७ ॥
आगच्छ त्वं विशालाक्षि शून्योऽयमुटजस्तव ॥ ८ ॥
सुव्यक्तं राक्षसैः सीता भक्षिता वा हृताऽपि वा ॥ नहि सा विलपन्तं मामुपसंप्रैति लक्ष्मण ॥ ९ ॥
एतानि मृगयूथानि साश्रुनेत्राणि लक्ष्मण ॥ शंसन्तीव हि [6]वैदेहीं भक्षितां रजनीचरैः ॥ १० ॥
हा ममार्ये क्व यातासि हा साध्वि वरवर्णिनि ॥ हा सकामा[7] त्वया [8]देवी कैकेयी सा भविष्यति ॥ ११ ॥
सीतया सह निर्यातो विना सीतामुपागतः ॥ कथं नाम प्रवेक्ष्यामि शून्यमन्तःपुरं पुनः[9] ॥ १२ ॥
निर्वीर्य इति [10]लोको मां निर्दयश्चेति वक्ष्यति ॥ कातरत्वं प्रकाशं हि सीतापनयनेन मे ॥ १३ ॥
निवृत्तवनवासश्च जनकं मिथिलाधिपम् ॥ कुशलं [11]परिपृच्छन्तं कथं शक्ष्ये निरीक्षितुम् ॥ १४ ॥
विदेहराजो नूनं मां दृष्ट्वा विरहितं [12]तया ॥ [13]सुतास्नेहेन संतप्तो मोहस्य वशमेष्यति ॥
[[14]तात एव कृतार्थः स तत्रैव वसताद्गतः ॥ १५ ॥]

श्यन्नपि मदनार्दितो मदनपरवशः तां पश्यन्निव संबोध्योवाच । तद्वाक्यं विलापाश्रयत्वेन दुर्वचं गद्गदकण्ठत्वादिति भावः । यद्वा विलापसंबन्धादस्माभिर्वक्तुमशक्यं अनुवदितुमशक्यमित्यर्थः ॥ २ ॥ पश्यन्निवेत्युक्तमुपपादयति—सार्धैस्त्वमित्यादिपञ्चभिः । त्वं अशोकस्य शाखाभिः पुष्पिततया स्वर्णसदृशीभिः स्वयं पुष्पप्रियतया स्वशरीरं मम शोकविवर्धनी सती आवृणोषि । किंतेनावरणेन । मया दृष्टत्वादिति भावः ॥ ३ ॥ कदलीकाण्डसदृशौ कदलीदण्डतुल्यत्वेन कदल्यासंवृतावपि ते ऊरू पश्यामि तेन तौ निगूहितुं आच्छादितुं । नशक्तासि दृष्टस्याच्छादनासंभवादिति भावः ॥ ४ ॥ हसन्ती हासार्थं कर्णिकारवनं सेवसे ॥ ५ ॥ हे सीते परिहासेन किं किं प्रयोजनं । हि यस्मात् परिश्रान्तस्य मे मह्यं । सः पूर्वं प्रियः । अयं परिहासः साधु सम्यक् । न रोचते ॥ ६ ॥ शीलं स्वभावः । परिहासेन प्रीणातीति परिहासप्रियं । "इगुपधज्ञाप्रीकिरः कः" इति कः ॥ ७ ॥ आगच्छेत्यर्धमेकं वाक्यं ॥ ८ ॥ हिर्हेतौ । उपसंप्रैति उपेक्षत इत्यर्थः ॥ ९ ॥ शंसनप्रकारः साश्रुनेत्राणीति ॥ १० ॥ मम मदीये । आर्ये पूज्ये । लोकैरिति शेषः । सकामा स्वाभीष्टास्मन्मरणसिद्धेरिति भावः ॥ ११ ॥ सीतां विनाऽऽगतत्वाच्छून्यं ॥ १२ ॥ कातरत्वं अधीरत्वं । जीवितधारणाशक्तेरिति भावः ॥ १३ ॥ निवृत्तवनवासः समाप्तवनवासः । "समाप्तौ वृत्त इत्यदः" इति शब्दार्णवे । निरीक्षितुं प्रतिवक्तुं सुतरामिति भावः ॥ १४ ॥ तया

शि० हेप्रिये यद्यपिपरिहासप्रियंतेशीलं स्वभावं । अवगच्छामि जानामि । तथापि आश्रमस्थाने विशेषश्रमस्थित्यर्थं विशेषेणायंतेपरिहासः नप्रशस्यते । यद्यपीत्यध्याहृतं ॥ ७ ॥ ति० उपसंप्रैति हासरसेनोपेक्षते ॥ ९ ॥ शि० मेदेवी माता । अद्यसकामा तदीप्सितराक्षसवधस्यसंनिहितत्वात्प्राप्तमनोरथाभविष्यति । स० अममार्येइतिपदं । निर्ममाधिके ॥ ११ ॥ स० कातरत्वं अवीरत्वं । प्रकाशं प्रकाशतइतितया । प्रकटं अभूदिति शेषः ॥ १३ ॥ ति० "तत एवकृतार्थः सतत्रैववसतादिति" इत्यर्धमधिकं कतकपाठे । ततोदशरथएवकृतार्थः । वसतादितिलोहव्यत्ययेन । यतस्तत्रैवस्वर्गएववसति । नतुजीवन्तीकौसल्ये-

[पा०] १ ङ. झ. प्रियतरा. २ ग. च. छ. ज. ञ. स्कन्धसदृशौ. क. स्तंभसदृशौ. ३ ख. अलतेबाधयाभीरुपश्याम्यसितलोचने. ४ क. अलंतेपरिहासेन. ५ क. शीलंते. ६ ङ—ट. मेदेवीं. ७ क. ख. सकामाद्यकैकेयीदेवीमेसा. च. छ. ज. सकामाद्यकैकेयीदेवीसाद्य. ग. सकामाद्यकैकेयीसापिदेवी. ङ. झ. ट. सकामाद्यकैकेयीदेवीमेऽद्य. ञ. सकामाद्यकैकेयीदेवीसाद्य. ८ घ. सीते. ९ ङ. झ. ट. मम. १० ख. च. छ. ञ. लोकोयं. क. मांलोको. ११ ख. ममपृच्छन्तं. १२ ख. ग. च. छ. त्वया. १३ क. ख. ग. च. छ. ज. दुहितृस्नेहसंतप्तो. ङ. झ. ट. सुताविनाशसंतप्तो. १४ इदमर्धं ख. पाठेदृश्यते.

अथवा न गमिष्यामि पुरीं भरतपालिताम् ॥ स्वर्गोपि सीतया हीनः शून्य एव मतो मम ॥ १६ ॥
मामिहोत्सृज्य हि वने गच्छायोध्यां पुरीं शुभाम् ॥ न त्वहं तां विना सीतां जीवेयं हि कथंचन ॥ १७ ॥
गाढमाश्लिष्य भरतो वाच्यो मद्वचनात्त्वया ॥ अनुज्ञातोसि रामेण पालयेति वसुंधराम् ॥ १८ ॥
अम्बा च मम कैकेयी सुमित्रा च त्वया विभो ॥ कौसल्या च यथान्यायमभिवाद्या ममाज्ञया ॥ १९ ॥
रक्षणीया प्रयत्नेन भवता सोक्तकारिणा ॥ २० ॥
सीतायाश्च विनाशोयं मम चामित्रकर्शन ॥ विस्तरेण जनन्या मे विनिवेद्यस्त्वया भवेत् ॥ २१ ॥
इति विलपति राघवे सुदीने वनमुपगम्य तया विना सुकेश्या ॥
भयविकलमुखस्तु लक्ष्मणोपि व्यथितमना भृशमातुरो बभूव ॥ २२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

त्रिषष्टितमः सर्गः ॥ ६३ ॥

सीतामपश्यतारामेणलक्ष्मणंप्रतिसंबोधनेनतस्याराक्षसैर्नानादुरवस्थासंपादनसंभावनापूर्वकं तांप्रतिशोचनं ॥ १ ॥ लक्ष्मणेनोन्मत्तवद्बहुधाप्रलापेनशोचन्तंरामंप्रतिसमाश्वासनं ॥ २ ॥

स राजपुत्रः प्रियया विहीनः कामेन शोकेन च पीड्यमानः ॥
विषादयन्भ्रातरमार्तरूपो भूयो विषादं प्रविवेश तीव्रम् ॥ १ ॥
स लक्ष्मणं शोकवशाभिपन्नं शोके निमग्नो विपुले तु रामः ॥
उवाच वाक्यं व्यसनानुरूपमुष्णं विनिश्श्वस्य रुदन्सशोकम् ॥ २ ॥

सीतया ॥ १५ ॥ भरतपालितां सुसमृद्धामपीत्यर्थः ॥ १६ ॥ कथंचन त्वत्कृताश्वासनेनापीत्यर्थः ॥ १७ ॥ पालयेति वाच्य इत्यन्वयः ॥ १८ ॥ अम्बेति प्रथमोक्तिः शोकजाग्रहात् ॥ १९ ॥ रक्षणीयेत्यर्धं । सा कौसल्या ॥ २० ॥ मम विनाशः भावीतिशेषः ॥ २१ ॥ तया विनाकृतं वनमुपगम्येत्यर्थः । सुकेश्येति विलापहेतुः । भयेन विकलमुखः विवर्णमुखः । आतुरः तप्तशरीरः ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्विषष्टितमः सर्गः ॥ ६२ ॥

अथ तापाख्यां मदनावस्थां दर्शयति त्रिषष्टितमे— स राजपुत्र इत्यादि । कामेन प्रियास्मरणजन्येन । शोकेन प्रियाविरहजन्येन । भ्रातरं भूयो विषादयन् । आर्तरूपः पीडितशरीरः । सः रामः । तीव्रं विषादं प्रविवेश स्वशोकलक्ष्मणशोकाभ्यामधिकतरं शोकं गत इत्यर्थः ॥ १ ॥ विपुले शोके निमग्नः लक्ष्मणशोकदर्शनजशोकेन विपुले शोके सीताशोके निमग्नः । व्यसनानुरूपं लोकवद्दुःखप्रसङ्गोचितं । उष्णं यथा तथा विनिश्श्वस्य रुदन् सशोकं वाक्यमुवाच ॥ २ ॥

स्यर्थः ॥ स० तत्रैवस्वर्गएववसतात् । मयासाकमितिशेषः । इति उक्त्वागतः ततोदशरथः कृतार्थः । स्नुषादर्शनं तत्रैवजातमितिकृतार्थ इतिभावः ॥ १५ ॥ इतिद्विषष्टितमस्सर्गः ॥ ६२ ॥

ति० इष्टवियोगजः शोकः । कामजंचित्तविवशत्वं मोहः ॥ १ ॥ स० सशोपि ससुखोपि अकं असुखंयथाभवतितथा ।

[पा०] १ क. च. छ. ज. ञ. स्वर्गोपिचतया. ख. ग. ङ. झ. ट. स्वर्गोपिहितया. २ घ. तामिहोत्सृज्य. ङ. झ. तन्मामुत्सृज्य. ३ क. नह्यहं. ४ क. ख. ग. च. छ. ज. ञ. युक्तकारिणा. घ. सूक्तकारिणा. ङ. झ. ट. सूक्तचारिणा. ५ ख. ङ.—ट. सूदन. ६ ङ. झ. ट. राघवेतुदीने. ७ च. छ. ज. ञ. मुखश्च. ८ ग. लक्ष्मणोवै. ९ घ ङ. झ. ट. शोकेनमोहेन. च. ख. ञ. कामेनशोकेनच. ज. शोकेनकामेनच. १० च. छ. ञ. विपुलेहि. ११ क. छ. ज. न्सशोकः.

न मद्विधो दुष्कृतकर्मकारी मन्ये द्वितीयोस्ति वसुंधरायाम् ॥
शोकेन शोको हि परम्पराया मामेति भिन्दन्हृदयं मनश्च ॥ ३ ॥
पूर्वं मया नूनमभीप्सितानि पापानि कर्माण्यसकृत्कृतानि ॥
तत्रायमद्यापतितो विपाको दुःखेन दुःखं यदहं विशामि ॥ ४ ॥
राज्यप्रणाशः स्वजनैर्वियोगः पितुर्विनाशो जननीवियोगः ॥
सर्वाणि मे लक्ष्मण शोकवेगमापूरयन्ति प्रविचिन्तितानि ॥ ५ ॥
सर्वं तु दुःखं मम लक्ष्मणेदं शान्तं शरीरे वनमेत्य शून्यम् ॥
सीतावियोगात्पुनरप्युदीर्णं काष्ठैरिवाग्निः सहसा प्रदीप्तः ॥ ६ ॥
सा नूनमार्या मम राक्षसेन बलाद्धृता खं समुपेत्य भीरुः ॥
अपस्वरं सस्वरविप्रलापा भयेन विक्रन्दितवत्यभीक्ष्णम् ॥ ७ ॥
तौ लोहितस्य प्रियदर्शनस्य सदोचितावुत्तमचन्दनस्य ॥
वृत्तौ स्तनौ शोणितपङ्कदिग्धौ नूनं प्रियाया मम नाभिभातः ॥ ८ ॥

द्वितीयो मद्विधो दुष्कृतकर्मकारी पापकर्मकारी । वसुंधरायां नास्तीति मन्ये । शोकेनेति । नमद्विधः इत्यादिनोक्तमनेनार्धेन स्पष्टीक्रियते । परम्परायाः परम्परारूपेणागतः । शोकेन शोकः शोकाच्छोकः । हृदयं मनश्च भिन्दन् मामेति । मनोऽधिष्ठानं हृदयं ॥ ३ ॥ एवं शोकपारम्पर्ये हेतुमुत्प्रेक्षते—पूर्वमिति । पूर्वं पूर्वजन्मनि । अभीप्सितानि प्रार्थितानि । तत्र तेषु पापेषु । विपाकः कार्योन्मुख्यं । आपतितः प्राप्तः ॥ ४ ॥ दुःखानिपरिगणयति—राज्येति । राज्यप्रणाशो राज्यभ्रंशः । स्वजनैः बन्धुभिः । सर्वाणीति सामान्ये नपुंसकं । शोकवेगं शोकराशिं । प्रविचिन्तितानि स्मृतानि ॥ ५ ॥ शून्यं निर्जनं वनमेत्य स्थितस्य मम शरीरे शान्तं शरीरक्लेशेन विस्मृतमित्यर्थः । उदीर्णं उद्रिक्तं । प्रदीप्तोग्निः पुनः काष्ठैरिव ॥ ६ ॥ मम संबन्धिनी आर्या सा राक्षसेन केनचित् बलाद्धृता सती खमाकाशमुपेत्य भीरुतया सस्वरविप्रलापा सती उच्चैर्ध्वनियुक्तविप्रलापा सती । भयेन अपस्वरं अपगतनिजस्वरं यथा तथा । अभीक्ष्णमत्यर्थं आक्रन्दितवती उद्घोषितवतीत्युत्प्रेक्षा ॥ ७ ॥ लोहितस्य लोहिताख्यस्य उत्तमचन्दनस्य । "रक्तं तु चन्दनं विद्याल्लोहितं हरिचन्दनं" इति । यद्वा कुङ्कुमादिना रक्तस्य उत्तमचन्दनस्य सदा उचितौ योग्यौ । वृत्तौ वर्तुलौ । मम प्रियायाः स्तनौ शोणितपङ्कदिग्धौ राक्षसेन भक्षणाय विशसनादिति भावः । एवंभूतौ सन्तौ नाभिभातः न प्रकाशेते । वर्तमानसामीप्ये वर्तमानवत्प्रयोगः । मम नाभिपात इति पाठान्तरे

रुदनुवाचेत्यन्वयः ॥ २ ॥ ति० शोकमनुप्रवृत्तः शोक शोकानुशोकः । सः । परंपरायाः तृतीयार्थेषष्ठी । परंपरया । अविच्छेदेन । हियतो मां हृदयं तदधिष्ठानमात्मानंमनश्चभिन्दन् एति प्राप्नोति ॥ ३ ॥—शि० असकृत् वारंवारं कृतानि राक्षसैराचरितानि । पापानि कर्माणि । पूर्वं स्वाप्राकट्यसमयेतत्रसाकेतेविद्यमानेनमया । यत् यस्मात् । अभीप्सितानि मदिच्छाविषयीभूतानि । तस्मादयंविपाकः इच्छामात्रजनितफलं । अद्यापतितः । अतएवदुःखेनदुःखं अहं विशामि । एतेन यदिमदिच्छानस्यात्तर्हिराक्षसानां ब्रह्मादिप्रेरितदुष्कृतकर्मप्रवृत्तिर्नस्यादितिसूचितं । तेनसकलजनकर्तृत्वादीनांस्वायत्तत्वंध्वनितं । तथाचश्रुतिः " कर्तृत्वंकरणत्वंचस्वभावश्चेतनाधृतिः । यत्प्रसादादिमेसन्ति नसन्ति यदुपेक्षया " इति ॥ स० दुःखेनदुःखं तत्परंपरामित्यर्थः ॥ ३ ॥ ति० वनमेत्य शरीरेक्लेशमनुभूयापि । सीतासंनिधानात्सर्वंशान्तं । अद्यसीतावियोगात्पुनरुदीर्णं वृद्धिंप्राप्तं । प्रियावियोगएव दुस्सह इतिभावः ॥ स० एत्यक्लेशमितिगुर्वक्षरोक्त्या क्लेशातिशयोद्योत्यते ॥ ६ ॥ स० अनूनमार्या पूर्णसंपत्स्वामिनी । " अर्यः स्वामिवैश्ययोः " इतिनिपातनात् ॥ ७ ॥

[पा०] १ ग. घ. कामकारी. २ ख. ङ.—ट. शोकानुशोको. ३ घ. सर्वाण्यसकृत्. ४ ङ. झ. ट. क्लेशं. ५ ख. घ. ङ. झ. ञ. ट. रभ्युदीर्णं. ६ क. ख. घ. झ. ञ. ट. सहसोप्रदीप्तः. ७ ख. घ. ङ. झ. ञ. ट. ह्यभ्याहृता. क. च. छ. बालाहृता. ८ ज. दुःखमपेत्य. ९ झ. अप्यस्वरं. १० क.—ञ. ञ. ट. सुस्वर.

तच्छ्लक्ष्णसुव्यक्तमृदुप्रलापं तस्या मुखं कुञ्चितकेशभारम् ॥
रक्षोवशं नूनमुपागताया न भ्राजते राहुमुखे यथेन्दुः ॥ ९ ॥
तां हारपाशस्य सदोचिताया ग्रीवां प्रियाया मम सुव्रतायाः ॥
रक्षांसि नूनं परिपीतवन्ति विभिद्य शून्ये रुधिराशनानि ॥ १० ॥
मया विहीना विजने वने या रक्षोभिराहृत्य विकृष्यमाणा ॥
नूनं विनादं कुररीव दीना सा मुक्तवत्यायतकान्तनेत्रा ॥ ११ ॥
अस्मिन्मया सार्धमुदारशीला शिलातले पूर्वमुपोपविष्टा ॥
कान्तस्मिता लक्ष्मण जातहासा त्वामाह सीता बहुवाक्यजातम् ॥ १२ ॥
गोदावरीयं सरितां वरिष्ठा प्रिया प्रियाया मम नित्यकालम् ॥
अप्यत्र गच्छेदिति चिन्तयामि नैकाकिनी याति हि सा कदाचित् ॥ १३ ॥
पद्मानना पद्मविशालनेत्रा पद्मानि वाऽनेतुमभिप्रयाता ॥
तदप्ययुक्तं न हि सा कदाचिन्मया विना गच्छति पङ्कजानि ॥ १४ ॥

एवमपि मम देहपातो न जायत इत्यर्थः ॥ ८ ॥ तत् पूर्वमनुभूतं श्लक्ष्णो मधुरः सुव्यक्तः अर्थव्यक्तियुक्तः मृदुः अपरुषः प्रलापो यस्य तत् ॥ ९ ॥ हारपाशस्य हारमालायाः । सदोचितायाः सुव्रतायाः मदन्यं स्प्रष्टुमनिच्छन्त्याः । मम प्रियायाः ग्रीवां शून्ये एकान्ते । विभिद्य रुधिररूपाणि अशनानि पानानि परिपीतवन्ति । नूनं ॥ १० ॥ या विजने वने मया विहीना सा कुररीव क्रौञ्चीव । विनादं मुक्तवती । आयतकान्तनेत्रेत्यनेन तत्काले मदागमनमार्गव्यग्रतोक्ता ॥ ११ ॥ पूर्वं गोदावर्यां सीतया सह सरसलीलाविहारो यस्मिन्कृतस्तस्मिन्प्रदेशे गत्वा तद्दर्शनेन जातपूर्वस्मरणो लक्ष्मणं प्रत्याह । अस्मिन् एवं शून्यतया स्थिते प्रदेशे हि मया पूर्वं निधिर्लब्धः । मया सार्धं प्रणयधारायामहं पण्डितमानी तादृशोहमप्यप्रधानोऽभवं तदीयविदग्धव्यवहारेषु । उदारशीला पूर्वं नगरवासे श्वश्र्वादिसन्निधानेन सङ्कुचितविहारा स्थिता । सीतया सार्धमिति ह्युक्तं । साम्प्रतं तु एकान्तस्थलतया सरसभोगेषु सर्वस्वदानं कृतवती । शिलातले पूर्वमुपोपविष्टा गोदावरीसलिले चिरं सलिलविहारे प्रवृत्ते । खिन्नो रामः प्रदेशान्तरे निस्तरणायोगात् केनचिच्छिलातलमार्गेण निर्गन्तुमालोकितवान् । सीता तु " प्रेक्षितज्ञास्तु कोसलाः " इति न्यायेन कान्तस्य प्रेक्षणातिशयमवगम्य तं पुनः क्लेशयितुं तच्छिलातलं पूर्वमधिरूढा उपोपविष्टा । तत्र यं यं कोणमवलम्ब्योत्थातुमिच्छति तत्तदाक्रम्य मुखे सलिलमभिषिञ्चन्ती स्थिता । वीप्सयैवमवगम्यते । कान्तस्मिता सहजमधुरहासवती । जातहासा स्वविजयकृतहर्षेण संजातहासा । त्वामाह इतःपूर्वं कुत्रापि पराजयाभावात् अधुना स्त्रीतोऽभिनवपराजयाद्रामो लज्जानम्रवदनोऽभूत् । तं विहाय भ्रातरं बहुधा प्रशंसन्तं लक्ष्मणं प्रत्युक्तवती बहुवाक्यजातं । युवां संकल्पितं सर्वं निर्वर्तितवन्तौ हि युवामतिबलपराक्रमशालिनौ पुरुषधौरेयौ वयमबलाजनाः युवां मृगयायै शत्रुहत्यायै चाभियातारौ वयं गृहादनिर्गच्छन्त्यः । युवयोः संकल्पितं सर्वं कर्तुं शक्यं युष्मदग्रजो जितवान्हि इत्येवं बहुमुखं वचनमवोचत् ॥ १२ ॥ नित्यकालं सर्वकालं । अत्र गोदावर्यां । चिन्तयामि तन्न युक्तमिति शेषः ॥ १३ ॥ अभिप्रयाता गोदावरीमिति शेषः । पङ्कजानीत्यत्राप्यानेतुमित्यनुषज्यते ॥ १४ ॥

शि० आयतकान्तनेत्रा आयतेविस्तृते कान्ताय पत्यन्वेषणायनेत्रेयस्यास्स्या ॥ ११ ॥

[पा०] १ घ. केशपाशं. २ क. झ. ट. सदोचितांतां. ३ क. ट. रुधिरंपिबन्ति. च. छ. ज. ञ. परिपीडयन्ति. ४ क.—ट. शून्येहिभित्त्वा. ५ घ. पिशिताशनानि. ६ क. ख. ङ.—ट. वनेसा. ७ क. ङ.—ट. राहुत्य. ८ ख. घ. मिहोपविष्टा. ९ क. घ. च. छ. झ. ञ. ट. मामाह. १० क. ङ.—ट. पद्मपलाशनेत्रा.

कामं त्विदं पुष्पिततरुषण्डं नानाविधैः पक्षिगणैरुपेतम् ॥
वनं प्रयाता तु तदप्ययुक्तमेकाकिनी सांऽतिविभेति भीरुः ॥ १५ ॥
आदित्य भो लोककृताकृतज्ञ लोकस्य सत्यानृतकर्मसाक्षिन् ॥
मम प्रिया सा क्व गता हृता वा शंसस्व मे शोकवशस्य नित्यम् ॥ १६ ॥
लोकेषु सर्वेषु च नास्ति किंचिद्यत्ते न नित्यं विदितं भवेच्चत् ॥
शंसस्व वायो कुलशालिनीं तां हृता मृता वा पथि वर्तते वा ॥ १७ ॥
इतीव तं शोकविधेयदेहं रामं विसंज्ञं विलपन्तमेवम् ॥
उवाच सौमित्रिरदीनसत्त्वो न्याये स्थितः कालयुतं च वाक्यम् ॥ १८ ॥
शोकं विमुंञ्चार्य धृतिं भजस्व सोत्साहता चास्तु विमार्गणेऽस्याः ॥
उत्साहवन्तो हि नरा न लोके सीदन्ति कर्मस्वतिदुष्करेषु ॥ १९ ॥
इतीव सौमित्रिमुदग्रपौरुषं ब्रुवन्तमार्तो रघुवंशवर्धनः ॥
न चिन्तयामास धृतिं विमुक्तवान्पुनश्च दुःखं महदभ्युपागमत् ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

अतिविभेति अत्यन्तं बिभेति ॥१५॥ भो इत्यादित्यस्य संबोधनं । लोकस्य कृताकृते जानातीति तथा । सत्यानृतयोः पुण्यपापयोः कर्मणोः साक्षिन् । "कर्मसाक्षी जगच्चक्षुः" इत्यमरः । मम प्रिया क्वगता अथवा हृता केनचिदपहृतेति शंसस्व शंस ॥ १६ ॥ ते नित्यं यन्न विदितं तत् सर्वेषु लोकेषु नास्ति तस्माच्छंसेति ॥१७॥ शोकविधेयः शोकपरवशः । कालयुतं कालोचितं । अदीनसत्त्वः अदीनधृतिः । एवमुक्त्वेत्यन्वयः॥१८॥ अस्याः सीतायाः । विमार्गणे अन्वेषणे ॥ १९ ॥ उदग्रपौरुषं महापराक्रमं । इतीव ब्रुवन्तं सौमित्रिं न चिन्तयामास तद्वचनं नाद्रतवानित्यर्थः । धृतिं च मुक्तवान् ॥ २० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नरेखलाख्याने आरण्यकाण्डव्याख्याने त्रिषष्टितमः सर्गः ॥ ६३ ॥

ति० लोककृताकृतज्ञेत्यादिना तादृशसूक्ष्मज्ञानवत्तत्सज्ञानंसर्वथाऽसीतिभावः ॥ स० लोककृताकृतज्ञ बहिःप्रकाशद्वाराकृताकृतज्ञानिन् । लोकस्य सत्यानृतकर्मसाक्षिन् अन्तः । मूलपुरुषरत्नादित्यंप्रत्युक्तिर्युक्तेतिभावः ॥ १६ ॥ ति० कुलपालिनीमित्यनेन तस्यामहत्त्वात्तज्ज्ञानंममनेति वक्तुमशक्यमितिसूचितं ॥ स० उत्तरत्रत्वदभिमानिनामरुतैव सर्वकार्यंसाधयिष्यामीति वायुंपृच्छति ॥ १७ ॥ ति० इतीवातीवशब्दोपमार्थौ ॥ १८ ॥ इतित्रिषष्टितमस्सर्गः ॥ ६३ ॥

[पा०] १ क.—घ. वातु. २ क. ख. ट. शोकहतस्य. ३ क. ख. ट. सर्वं. क. ग. च. छ. ज. झ. सर्व्यं. ४ क. ङ. च. छ. झ. ट. नचास्ति. ५ क. ख. ट. कुलपालिनीं. ६ क. ख. ट. मृताहृतावा. ख. ग. हृताहृतावा. ७ च. छ. ज. झ. अतीव. ८ घ. ङ. छ.—ट. मेव. ९ क. च. छ. ज. कालहितं. १० क. ख. ट. विसृज्याथ. च. छ. ज. झ. चमुआर्यं. ११ च. छ. ज. वायु. १२ ग. च. छ. ज. कर्मसपि. १३ क. ख. झ. ट. मार्तं. १४ क. ख. ट. रघुवंशसत्तमः. १५ घ. मुग्रमभ्युपागमत्. च. छ. ज. झ. महदभ्युपागतः. क. ख. ट. महदभ्युपागमत्.

चतुःषष्टितमः सर्गः ॥ ६४ ॥

रामेणसीतायाः पद्मानयनार्थंगोदावरींप्रतिगमनसंभावनया गोदावरीमेत्यसीतादर्शनप्रश्नः ॥ १ ॥ तया रावणभयात्सीतावृत्तान्तानभिधानं ॥ २ ॥ ततोनिर्विण्णेनरामेण मृगाणामिङ्गितविज्ञानेनतान्प्रतिप्रश्नः ॥ ३ ॥ तथा तच्चेष्टया नैर्ऋतदिशिसीतागमनंनिर्धारितवतालक्ष्मणेनसह तदाभिमुख्येनगमनं ॥ ४ ॥ तथा मार्गपतितांसंततधारांपुष्पपरंपरांदृष्टवतातेनतेषु लीलापुष्पत्वप्रत्यभिज्ञानं ॥ ५ ॥ तथा भूमौसीतारावणचरणाङ्कानां जटायुभग्नरथसारथिकवचकार्मुकादीनांचावलोकनं ॥ ६ ॥ तथा देवादिभिःकैरपि सीतावृत्तान्तानिवेदने कोपात्सकलभुवनभस्मीकरणप्रतिज्ञानेन धनुषिकरारोपणं ॥ ७ ॥

स दीनो दीनया वाचा लक्ष्मणं वाक्यमब्रवीत् ॥ १ ॥
शीघ्रं लक्ष्मण जानीहि गत्वा गोदावरीं नदीम् ॥ अपि गोदावरीं सीता पद्मान्यानयितुं गता ॥२॥
एवमुक्तस्तु रामेण लक्ष्मणः परवीरहा ॥ नदीं गोदावरीं रम्यां जगाम लघुविक्रमः ॥ ३ ॥
तां लक्ष्मणस्तीर्थवतीं विचित्वा राममब्रवीत् ॥ ४ ॥
नैनां पश्यामि तीर्थेषु क्रोशतो न शृणोति मे ॥ कं नु सा देशमापन्ना वैदेही क्लेशनाशिनी ॥
न ह्यहं वेद तं देशं यत्र सा जनकात्मजा ॥ ५ ॥
लक्ष्मणस्य वचः श्रुत्वा दीनः सन्तापमोहितः ॥ रामः समभिचक्राम स्वयं गोदावरीं नदीम् ॥ ६ ॥
स तामुपस्थितो रामः क्व सीतेत्येवमब्रवीत् ॥ ७ ॥
भूतानि राक्षसेन्द्रेण वधार्हेण हृतामपि ॥ न तां शशंसु रामाय तथा गोदावरी नदी ॥ ८ ॥
ततः प्रचोदिता भूतैः शंसास्मत्तां प्रियामिति ॥ न तु साऽभ्यवदत्सीतां पृष्टा रामेण शोचता ॥ ९ ॥

अथ चिह्नविशेषैः सीताहरणनिश्चयश्चतुष्षष्टितमे । लोके कश्चिद्दीनोपि दीनां वाचं न व्याहरति । इदमर्धमेकं वाक्यं ॥ १—२ ॥ लघुविक्रमः त्वरितपदविन्यासः ॥३॥ तीर्थवतीं अवतारवतीं । क्रोशतः आह्वयतः । मे मत्तः । न शृणोति । सेति शेषः ॥ ४—५ ॥ वेद जानामि स तामित्यर्धमेकं वाक्यम् ॥ ६ ॥ भूतानि वन्यानि सत्त्वानि । दृष्टान्तार्थमिदं । यथा पूर्वं पृच्छ्यमानानि भूतानि न शशंसुः तथा गोदावरी च न शशंसेत्यर्थः ॥७—८॥ स्वयं न शशंस । भूतैः प्रचोदितापि न शशंसेत्यर्थः । अस्मत् अस्मदर्थं । पञ्चमी

स० दीनयावाचासहितंलक्ष्मणं सरामोदीनः सन्वाक्यमब्रवीत् । ति० एवंशोककरणं चारद्वाराश्रवणेनरावणस्यमनुष्यत्वबुद्धिदार्ढ्यपूर्वकंस्ववध्यत्वसंपादनायेतिबोध्यं । तदुक्तंब्रह्माण्डपुराणे—"स्त्रीपुंमलानुषङ्गात्मा देहोनास्यविजायते । किंतुनिर्दोषचैतन्यं सुखनित्यांस्वकांतनुम् । प्रकाशयतिसैवेयं जनिर्विष्णोर्नचापरा । तथाप्यसुरमोहार्थं परेषांचक्वचित्क्वचित् । दुःखाज्ञानश्रमादींश्च दर्शयेच्छुद्धसद्गुणः । क्वव्रणादिक्वचाज्ञानंस्वतन्त्राचिन्त्यसद्गुणे । मोक्षाभावायतेषांतुदर्शयेत्तानजोहरिः । कृष्णोह्यत्यक्तदेहोपि त्यक्तदेहस्य देहवत् । लोकानांदर्शयामास स्वरूपसदृशाकृतिम् " इति । एतेन रावणस्येश्वरत्वबुद्धिप्रतिबन्धेनमोक्षाभावोपिशोकफलमित्युक्तं । एवंरावणद्वारासीताहरणमपितत्पुण्यातिशयनाशेनवध्यतासंपादनाय । तथाचकेदारखण्डेउक्ताऽऽख्यायिका । " महतातपसालब्धबलोरावणस्तदधिकतपोबलंविनाजेतुमशक्यः । देवाश्चस्वयंतदधिकंतपःकर्तुमक्षमाः । अतस्तेषांकार्यमत्यन्तानुचितसीतानुरागमोहानुवृत्तिसंपादनेनरावणस्य तपोवीर्यभ्रंशंसंपाद्यकर्तव्यमितिलक्ष्म्यासहविचार्यतदर्थंविष्णुः सीतयाब्रह्मविद्ययासहावतीर्णः "

[पा०] १ सदीनोदीनयावाचा लक्ष्मणंवाक्यमब्रवीत् इतिपादद्वयमध्ये. संशुष्कवदनोभृशम् । अभिराममिदंरामोविललापाकुलेन्द्रियः । त्रिलोकाधिपतिं देवंशक्रं त्वां वेदयाम्यहं । पुरंदर विहारार्हप्रिया भार्याजहातिमाम् । यस्मिन्कालेस्त्रियंकामी लब्ध्वाभूयोपि नन्दति । तस्मिन्सुखोदये काले प्रिया भार्या जहाति माम् । निर्वीर्यइवमातङ्गः परिवृत्तइवोत्सवः । प्रतिभात्ययमाशासो गतध्वजइवाहवः । रतिंनैवचविन्दामि तांविनापद्मलोचनाम् । नाशयत्येव सर्वस्वमनुशोचामि भामिनीम् । इतिशोकसमाविष्टो. इतिपादद्वयसहिताइमेश्लोकाः ख. पाठेदृश्यन्ते. २ क. ख. ग. ङ. च. छ. झ. ञ. ट. पुनरेवहि. ३ ङ. च. छ. झ. ञ. ट. नहितंवेद्मिवैरामयत्रसातनुमध्यमा. ४ घ. कर्शितः. ५ छ. ज. तत्रैवस्थितो. च. तत्रावस्थितो. ६ ग. झ. शंसचास्मै. क. ख. ब.—ज. ञ. शंसास्मैतां. ७ क. ङ.—ट. नचसाह्यवदत्, ख. ग. नचसाभ्यवदत्.

रावणस्य च तद्रूपं कर्माणि च दुरात्मनः ॥ ध्यात्वा भयात्तु वैदेहीं सा नदी न शशंस ताम् ॥ १० ॥
निराशस्तु तया नद्या सीताया दर्शने कृतः ॥ उवाच रामः सौमित्रिं सीताऽदर्शनकर्शितः ॥ ११ ॥
एषा गोदावरी सौम्य किंचिन्न प्रतिभाषते ॥ किंनु लक्ष्मण वक्ष्यामि समेत्य जनकं वचः ॥
मातरं चैव वैदेह्या विना तामहमप्रियम् ॥ १२ ॥
या मे राज्यविहीनस्य वन्येन जीवतः ॥ सर्वं व्यपनयेच्छोकं वैदेही क्व नु सा गता ॥ १३ ॥
ज्ञातिपक्षविहीनस्य राजपुत्रीमपश्यतः ॥ मन्ये दीर्घा भविष्यन्ति रात्रयो मम जाग्रतः ॥ १४ ॥
मन्दाकिनीं जनस्थानमिमं प्रस्रवणं गिरिम् ॥ सर्वाण्यनुचरिष्यामि यदि सीता हि दृश्यते ॥ १५ ॥
एते मृगा महावीर्या मामीक्षन्ते मुहुर्मुहुः ॥ वक्तुकामा इव हि मे इङ्गितान्युपलक्षये ॥ १६ ॥
तांस्तु दृष्ट्वा नरव्याघ्रो राघवः प्रत्युवाच ह ॥ क्व सीतेति निरीक्षन्वै बाष्पसंरुद्धया दृशा ॥ १७ ॥
एवमुक्ता नरेन्द्रेण ते मृगाः सहसोत्थिताः ॥ दक्षिणाभिमुखाः सर्वे दर्शयन्तो नभःस्थलम् ॥ १८ ॥
मैथिली ह्रियमाणा सा दिशं यामन्वपद्यत ॥ तेन मार्गेण धावन्तो निरीक्षन्ते नराधिपम् ॥ १९ ॥
येन मार्गं च भूमिं च निरीक्षन्ते स्म ते मृगाः ॥ पुनश्च मार्गमिच्छन्ति लक्ष्मणेनोपलक्षिताः ॥ २० ॥
तेषां वचनसर्वस्वं लक्षयामास चेङ्गितम् ॥ उवाच लक्ष्मणो ज्येष्ठं धीमान्भ्रातरमार्तवत् ॥ २१ ॥
क्व सीतेति त्वया पृष्टा यैर्यैमे सहसोत्थिताः ॥ दर्शयन्ति क्षितिं चैव दक्षिणां च दिशं मृगाः ॥ २२ ॥
साधु गच्छावहै देव दिशमेतां हि नैर्ऋतिम् ॥ यदि सीतागमः कश्चिदार्यो वा साऽथ लक्ष्यते ॥ २३ ॥

॥ ९ ॥ अकथने हेतुमाह—रावणस्येति ॥ १० ॥ निराशः कृत इत्यन्वयः ॥ ११—१२ ॥ वन्येन फलादिना ॥ १३ ॥ ज्ञातयश्च ते पक्षाः सहायाश्च तैर्विहीनस्य ॥ १४—१५ ॥ बाष्पसंरुद्धया दृशा निरीक्षन् निरीक्षमाणः सन् । क्व सीतेत्युवाच ॥ १६ ॥ उक्ताः पृष्टाः । नभःस्थलं दर्शयन्तः आकाशावलोकनेङ्गितेन सीतागमनमार्गं दर्शयन्तइत्यर्थः । उत्थिताः प्रस्थिताः आकाशमार्गेण दक्षिणां दिशं गता सीतेत्यसूचयन्निति भावः ॥ १७—१८ ॥ अमुमेवार्थं स्पष्टयति—मैथिलीति । ह्रियमाणा सा मैथिली यां दिशमन्वपद्यत प्राप । तेन मार्गेण तयादिशा । धावन्तः सन्तः नराधिपं निरीक्षन्ते ॥ १९ ॥ येन कारणेन । मार्गं आकाशमार्गं । भूमिं दक्षिणां भूमिं च । निरीक्षन्ते स्म । पुनश्च मार्गं दक्षिणमार्गं । इच्छन्ति स्म । गन्तुमिति शेषः । तेन कारणेन मृगाः उपलक्षिताः गृहीतचेष्टार्था आसन् ॥ २० ॥ उक्तमनुवदन्नाह—तेषामिति । वचनसर्वस्वं तत्सदृशमिङ्गितमित्यर्थः । लक्षयामास मृगचेष्टार्थं वचनोक्तमिव ज्ञातवानित्यर्थः । उवाच चेत्यन्वयः । आर्तवत् आर्तमिति क्रियाविशेषणं । क्वबतुप्रत्ययः ॥ २१ ॥ कैस्यादिश्लोकद्वयमेकान्वयं । यथा येन प्रकारेण दर्शयन्ति तथा गच्छावहै इत्यन्वयः । आर्षमात्मनेपदं । नैर्ऋतिं दक्षिणपश्चिमां राक्षसाधिष्ठितां । तस्याश्चदक्षिणैकदेशत्वाद्दक्षिणां दिशमिति व्यपदेशः । आगमः सीतादर्शनोपायः ॥ २२—

इति ॥ १ ॥ ति० मन्दाकिनी नाम काचिन्नदी ॥ १५ ॥ तनि० अत्रारामाशयाभिज्ञैर्मृगैः सीतागमनदिक्सूचकचेष्टाकरणात्सूक्ष्मालङ्कारः । " सूक्ष्मंपराशयाभिज्ञेरसाकूतचेष्टितं ।" इतिलक्षणात् ॥ १८ ॥ ति० पुनश्चमार्गंदर्शयितुमिच्छन्तोलक्ष्मणेनोपलक्षिताः तेषामिङ्गितंलक्ष्मणोलक्षयामासेत्यर्थः । आकाशमार्गेणगच्छादक्षिणदिशिदूरेस्थापितासीता दक्षिणदिशिगच्छतेत्येवं तत्रिङ्गितं तेषांवचनसर्वस्वभूतंस्वयंलक्षयामास ॥ २१ ॥ दी० तस्यागमः तस्या आगमइत्यर्थः । आर्षोदीर्घः । ज्ञापकंवस्तुदृश्ये-

[पा०] १ क. ङ. च. ट. कर्माणिच. २ क.—ट. शशंसह. ३ ग. घ. ङ. ञ. ण. ट. व्यपनयच्छोकं. ४ ङ. ञ. ज्ञातिवर्गे. ५ क. ञ. वैदेहीमप्यपश्यतः. ६ घ. जनस्थानंतथाप्रस्रवणं. ७ छ. ज. ण. संदृष्टोविचरिष्यामि. ८ ङ. ञ. लक्ष्यते. ९ क. ञ. ट. महामृगावीराः. १० क. ञ. ट. पुनःपुनः. ११ ख. सैरिभमा. १२ ख.ङ. ञ. ट. गिरा. १३ ञ. ट. वामभ्यपद्यत. १४ ङ. ञ. ट. गच्छन्तो. १५ ट. पुनर्नेदन्तोगच्छन्ति. क.—घ. च.—ञ. पुनश्चमार्गमिच्छन्तो. १६ ङ. ट. श्रीमाञ्ज्येष्ठंभ्रातरं. १७ घ. क. ञ. ट. यदिमे. क. घ. छ. ज. यथैते. १८ ङ. घ. ञ. ज. ट. मेतांच. १९ ङ. ञ. ट. तस्यागमः.

बाढमित्येव काकुत्स्थः प्रस्थितो दक्षिणां दिशम् ॥ लक्ष्मणानुगतः श्रीमान्वीक्षमाणो वसुंधराम् ॥२४॥
एवं संभाषमाणौ तावन्योन्यं भ्रातरावुभौ ॥ वसुंधरायां पतितं पुष्पमार्गमपश्यताम् ॥ २५ ॥
तां पुष्पवृष्टिं पतितां दृष्ट्वा रामो महीतले ॥ उवाच लक्ष्मणं वीरो दुःखितो दुःखितं वचः ॥२६॥
अभिजानामि पुष्पाणि तानीमानीह लक्ष्मण ॥ पिनद्धानीह वैदेह्या मया दत्तानि कानने ॥ २७ ॥
मन्ये सूर्यश्च वायुश्च मेदिनी च यशस्विनी ॥ अभिरक्षन्ति पुष्पाणि प्रकुर्वन्तो मम प्रियम् ॥ २८ ॥
एवमुक्त्वा महाबाहुं लक्ष्मणं पुरुषर्षभः ॥ उवाच रामो धर्मात्मा गिरिं प्रस्रवणाकुलम् ॥ २९ ॥
कच्चित्क्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी ॥ रामा रम्ये वनोद्देशे मया विरहिता त्वया ॥ ३० ॥
क्रुद्धोऽब्रवीद्गिरिं तत्र सिंहः क्षुद्रमृगं यथा ॥ ३१ ॥
तां हेमवर्णां हेमाभां सीतां दर्शय पर्वत ॥ यावत्सानूनि सर्वाणि न ते विध्वंसयाम्यहम् ॥ ३२ ॥
एवमुक्तस्तु रामेण पर्वतो मैथिलीं प्रति ॥ शंसन्निव ततः सीतां नादर्शयत राघवे ॥ ३३ ॥
ततो दाशरथी राम उवाच च शिलोच्चयम् ॥ ३४ ॥
मम बाणाग्निनिर्दग्धो भस्मीभूतो भविष्यसि ॥ असेव्यः संततं चैव निस्तृणद्रुमपल्लवः ॥ ३५ ॥
इमां वा सरितं चाद्य शोषयिष्यामि लक्ष्मण ॥ यदि नाख्याति मे सीतामार्यां चन्द्रनिभाननाम् ॥३६॥
एवं स रुषितो रामो दिधक्षन्निव चक्षुषा ॥ ददर्श भूमौ निष्क्रान्तं राक्षसस्य पदं महत् ॥ ३७ ॥

२३ ॥ श्रीमान् सीताधिगमनहेतुदर्शनश्रीमान् ॥२४॥ एवं साध्वित्याद्युक्तरीत्या । पुष्पमार्गं पुष्पयुक्तमार्गं । मध्यमपदलोपिसमासः ॥ २५ ॥ वीरः दर्शनोपायमात्रे ज्ञाते तांलब्धुंसमर्थः ॥ २६ ॥ तानीमानि पुष्पाणि मया दत्तानि वैदेह्या केशपाशे पिनद्धानि बद्धानीत्यभिजानामि ॥ २७ ॥ अम्लानीकरणात्सूर्यः अनुत्क्षेपणाद्वायुः धारणाद्भूमिश्च रक्षन्तीति भावः ॥ २८ ॥ महाबाहुमित्यनेन बलवत्सहायत्वं । पुरुषर्षभ इत्यनेन स्वतः पराक्रमशालित्वमुक्तं । तथापि धर्मात्मा सहसा गिरेरविनाशकरणात् ॥२९॥ रामा स्त्री ॥ ३० ॥ अदर्शनादाह—क्रुद्ध इति । एकमर्धं ॥ ३१ ॥ हेमवर्णां हेमप्रतिमासदृशीं । हेमाभां स्वर्णतुल्यकान्तिं ॥ ३२ ॥ शंसन्निव प्रतिध्वनिना कथयन्निव । स्वपृष्टस्यैवानुवादेनानादरोक्तिं रामोऽमन्यतेति भावः । ततः अनादरोक्त्या । राघवे विषये सीतां नादर्शयत । " णिचश्च " इत्यात्मनेपदम् ॥ ३३ ॥ दाशरथिरिति हेतुगर्भं । शिलोच्चयं पर्वतं । इदमर्धमेकं ॥ ३४—३५ ॥ इमामिति इयमपि पृष्टा चेन्न वक्ष्यतीति मत्वेति भावः ॥ ३६ ॥ निष्क्रान्तं प्रादुर्भूतं ।

तेत्यर्थः ॥ २३ ॥ तनि० क्षितिभृतांनाथ पर्वतश्रेष्ठ । सर्वाङ्गसुन्दरी प्रत्यवयवशोभायुक्ता । मयाविरहितारामा रम्येवनोद्देशे त्वयादृष्टाकच्चित् । अस्यैवप्रश्नस्यावृत्त्यायोजने इदमेवोत्तरं । क्षितिभृतांनाथ क्षत्रियश्रेष्ठ । त्वयाविरहिता मयादृष्टेतिकच्चित् । कच्चित्कामप्रवेदने । मयादृष्टेतीदमेवममाप्यत्यन्ताभिमतमित्यर्थः । अत्रैकस्यैववाक्यस्यप्रश्नोत्तररूपत्वाच्चित्रालङ्कारध्वनिः । " कृतप्रश्नोत्तराभिन्नमुत्तरंचित्रमुच्यते । " इतिलक्षणात् ॥ ३० ॥ ती० हेमाभामित्यनेन लावण्यनिर्देशः । हरिद्रादौहेमवर्णसद्भावेपिलावण्याभावादुभयनिर्देशः ॥ ३२ ॥ तनि० शंसन्निवप्रतिशब्देनकथयन्निव । अत्रप्रतिध्वनिव्यपदेशेनरामंप्रतिसीतादर्शनकथनंव्यज्यते । नादर्शयतेतिरावणाद्भयंव्यज्यते । शि० सीतांदर्शयन् जानन्नपि । राघवे (राघव)समीपे । नादर्शयत नाबोधयत् । एतेन ज्ञापनसमये रावणस्मृतिर्भवतीतिध्वनितं । तेनरावणभीतेरतिप्राबल्यंव्यञ्जितं ॥ ३३ ॥ ति० दिधक्षन्निव ।

[पा०] १ क. च. छ. ञ. लक्ष्मणानुचरः. २ ङ. झ. ट. पुष्पवृष्टिंनिपतितां. ३ क. ङ.—ट. अपिनद्धानिवैदेह्या. ४ ख. प्रकुर्वाणा. ५ क.—ठ. महाबाहुर्लक्ष्मणंपुरुषर्षभं. ६ क. च. छ. ञ. प्रस्रवणाभिधं. ७ च. सीता. ८ च. छ. ज. ञ. वनेत्वस्मिन्मयाः. क. ख. ग. वनेह्यस्मिन्मया. ९ क. च. छ. ज. ञ. सुमुखीं. ङ. झ. ट. हेमाङ्गीं. १० क. ग. घ. च. छ. ज. ञ. त्सर्वाणिसानूनि. ११ ङ. झ. ट दर्शयन्निवतांसीतां. १२ ख. ग. बाणाग्निनिर्दग्धो. १३ ट. असेव्यःपर्वतश्चैव. क. च. ज. ञ. असेव्यस्त्वंततश्चैव. ङ. झ. असेव्यस्सर्वतश्चैव. १४ च. छ. ज. चैव. १५ क. ग. छ. ज. ञ. ट. सीतामद्य. १६ ङ. झ. ट. प्ररुषितो. १७ च. ज. ञ. महत्पदं.

त्रस्ताया रामकाङ्क्षिण्याः प्रधावन्त्या इतस्ततः ॥ राक्षसेनानुवृत्ताया मैथिल्याश्च पदान्यथ ॥ ३८ ॥
स समीक्ष्य परिक्रान्तं सीताया राक्षसस्य च ॥ भग्नं धनुश्च तूणी च विकीर्णं बहुधा रथम् ॥
संभ्रान्तहृदयो रामः शशंस भ्रातरं प्रियम् ॥ ३९ ॥
पश्य लक्ष्मण वैदेह्या शीर्णाः कनकबिन्दवः ॥ भूषणानां हि सौमित्रे माल्यानि विविधानि च ॥४०॥
तप्तबिन्दुनिकाशैश्च चित्रैः क्षतजबिन्दुभिः ॥ आवृतं पश्य सौमित्रे सर्वतो धरणीतलम् ॥ ४१ ॥
मन्ये लक्ष्मण वैदेही राक्षसैः कामरूपिभिः ॥ भित्त्वाभित्त्वा विभक्ता वा भक्षिता वा भविष्यति ॥४२॥
तस्या निमित्तं वैदेह्या द्वयोर्विवदमानयोः ॥ बभूव युद्धं सौमित्रे घोरं राक्षसयोरिह ॥ ४३ ॥
मुक्तामणिमयं चेदं तपनीयविभूषितम् ॥ धरण्यां पतितं सौम्य कस्य भग्नं महद्धनुः ॥
[राक्षसानामिदं वत्स सुराणामथवाऽपि वा] ॥ ४४ ॥
तरुणादित्यसंकाशं वैडूर्यगुलिकाचितम् ॥ विशीर्णं पतितं भूमौ कवचं कस्य काञ्चनम् ॥ ४५ ॥
छत्रं शतशलाकं च दिव्यमाल्योपशोभितम् ॥ भग्नदण्डमिदं कस्य भूमौ सम्यङ्निपातितम् ॥४६॥
काञ्चनोरश्छदाश्चेमे पिशाचवदनाः खराः ॥ भीमरूपा महाकायाः कस्य वा निहता रणे ॥ ४७ ॥
दीप्तपावकसंकाशो द्युतिमान्समरध्वजः ॥ अपविद्धश्च भग्नश्च कस्य सांग्रामिको रथः ॥ ४८ ॥
रथाक्षमात्रा विशिखास्तपनीयविभूषणाः ॥ कस्येमेऽभिहता बाणाः प्रकीर्णा घोरकर्मणः ॥ ४९ ॥

इतःपूर्वमदर्शनादेवमुक्तं ॥ ३७ ॥ त्रस्तायाः रावणाद्भीतायाः । रामकाङ्क्षिण्याः रामाश्रमं प्रयातुमुद्युक्तायाः । अतएव राक्षसेनानुवृत्तायाः अनुगतायाः । अतएवेतस्ततो धावन्त्याः । ददर्शेत्यनुवर्तते ॥ ३८ ॥ स समीक्ष्येति सार्धश्लोक एकान्वयः । परिक्रान्तं परिक्रमं पदन्यासमिति यावत् ॥३९॥ कनकबिन्दवः स्वर्णशकलानि ॥४०॥ तप्तं स्वर्णं ॥ ४१ ॥ मन्य इति । इति मन्य इति योज्यं ॥४२॥ तस्या निमित्तं सुन्दोपसुन्दवत्परिग्रहार्थमित्यर्थः । विवदमानयोः वैमत्यं प्राप्तयोः । "भासनोपसंभाषा–" इत्यादिना आत्मनेपदं ॥ ४३ ॥ मुक्तामणिमयं मुक्तामणिप्रचुरं ॥ ४४ ॥ वैडूर्यगुलिकाचितं वैडूर्यमणिखचितं ॥ ४५ ॥ सम्यक् शतधा भग्नदण्डमित्यन्वयः ॥ ४६ ॥ काञ्चनमयाः उरश्छदाः तनुत्राणि येषां ते । खराः अश्वतराः रासभविशेषा वा ॥ ४७ ॥ द्युतिमत्त्वादेव दीप्तपावकसंकाशः समरे नायकसूचको ध्वजः समरध्वजः । अपविद्धः रथश्च भग्न इति संबन्धः । सांग्रामिकः समरोचितः ॥ ४८ ॥ रथस्याक्षः आधारदण्डः तन्मात्राः तद्वद्दीर्घप्रमाणाः । प्रमाणे मात्रच् । विशिखाः विगतशिखाः मुण्डाग्रा इत्यर्थः । विगतफलभागा इति वा । अभिहताः भग्नाः । प्रकीर्णाः इतस्ततो विप्रकी-

सर्वजगदितिशेषः ॥ दिधक्षन्निव नतुवास्तवीदिधक्षेतिभावः ॥ ३७ ॥ अनुसृतायाः अनुगम्यमानायाः । जटायुयुद्धसमयेसीतायारावणेनभूमौविसृज्यपुनर्ग्रहणादेवमुक्तिः ॥ ३८ ॥ शि० हेलक्ष्मण कामरूपिभिःराक्षसैः भित्त्वाभित्त्वाविभक्तासतीभक्षिता अनेवभविष्यतीतिमन्ये । एकोवाएवार्थे । अपरइत्यर्थे । एतेनतस्यानित्यत्वंसूचितं ॥ ४२ ॥ शि० द्वयोः राक्षसयोरिहयुद्धं बभूव । एतेनतयोरन्यतरशरीरजमितिव्यञ्जितं । बलवत्त्वेनराक्षससदृशपरैकराक्षसशब्देनैकशेषान्नमृषावाचित्वसंसर्गः ॥ ४३ ॥ ती० रथाक्षमात्राः चतुश्शताङ्गुलपरिमिताः । तदुक्तंशिल्पिप्रश्ने " अष्टाशीतिशतमीषातिर्यगक्षश्चतुश्शतः ।" इति ॥ ४९ ॥

[पा०] १ क. नाभितप्तायाः. ङ.—ट. नानुसृतायाः. २ ङ.—ट. वैदेह्याश्चपदानितु. घ. वैदेह्याश्चपदान्यपि. ३ क. प्रति. ४ ङ. झ. ट. कीर्णाः. ५ क. च. छ. ज. ञ. विभक्ताङ्गं. ६ ङ.—ट. सीतायाः. ७ क. च. छ. ज. मणिविचित्रंच. ख.—ङ. झ. ञ. ट. मणिचितंचेदं. ८ ङ. झ. रमणीयं. ९ ङ—ज. विभूषणं. १० इदमर्धं ङ. झ. ञ. ट. पाठेषुदृश्यते. ११ ङ. झ. ट. मिदसौम्य. १२ क.—घ. च. छ. ज. ञ. सौम्यनिपातितं. ङ. झ. ट. कस्यनिपातितं. १३ क. छ. ज. ञ. विभूषिताः. १४ क. ङ.—ज. ञ. कस्येमेविहताः. ख. घ. झ. ट. कस्येमेनिहताः. १५ घ. भीमकर्मणः. ङ. झ. ट. घोरदर्शनाः.

शरावरौ शरैः पूर्णौ विध्वस्तौ पश्य लक्ष्मण ॥ प्रतोदाभीषुहस्तो वै कस्यायं सारथिर्हतः ॥
[सारथिं हतवान्को वा महाबलपराक्रमः] ॥ ५० ॥
कस्येमौ पुरुषव्याघ्र शयाते निहतौ युधि ॥ चामरग्राहिणौ सौम्य सोष्णीषमणिकुण्डलौ ॥ ५१ ॥
पदवी पुरुषस्यैषा व्यक्तं कस्यापि रक्षसः ॥ वैरं शतगुणं पश्य ममेदं जीवितान्तकम् ॥ ५२ ॥
सुघोरहृदयैः सौम्य राक्षसैः कामरूपिभिः ॥ हृता मृता वा सीता सा भक्षिता वा तपस्विनी ॥ ५३ ॥
न धर्मेष्वायते सीतां ह्रियमाणां महावने ॥ ५४ ॥
भक्षितायां हि वैदेह्यां हतायामपि लक्ष्मण ॥ के हि लोकेऽप्रियं कर्तुं शक्ताः सौम्य ममेश्वराः ॥ ५५ ॥
कर्तारमपि लोकानां शूरं करुणवेदिनम् ॥ अज्ञानादवमन्येरन्सर्वभूतानि लक्ष्मण ॥ ५६ ॥
मृदुं लोकहिते युक्तं दान्तं करुणवेदिनम् ॥ निर्वीर्य इति मन्यन्ते नूनं मां त्रिदशेश्वराः ॥ ५७ ॥
मां प्राप्य हि गुणो दोषः संवृत्तः पश्य लक्ष्मण ॥ अद्यैव सर्वभूतानां रक्षसामभवाय च ॥ ५८ ॥
संहृत्यैव शशिज्योत्स्नां महान्सूर्य इवोदितः ॥ संहृत्यैव गुणान्सर्वान्मम तेजः प्रकाशते ॥ ५९ ॥

र्णाः ॥ ४९ ॥ शरावरौ निषङ्गौ । प्रतोदः तोत्रं । अभीषवः रश्मयः । " अभीषुः प्रग्रहे रश्मौ " इति शाश्वतः ॥ ५० ॥ उष्णीषः शिरोवेष्टनं ॥ ५१ ॥ एषा पदवी मार्गः । पुरुषस्य जघनभाग-निम्नत्वाद्यभावात् । तत्रापि रक्षसः पदवी विषमरूपत्वात् । एवं च मम राक्षसैः सह इदं वैरं शतगुणं सत्तेषां जीवितमन्तयति विनाशयतीति जीवितान्तकं संपन्नं पश्य । एतावत्पर्यन्तं राक्षसैस्तीव्रवैराकरणात्त-दपराधःसोढः संप्रति तान्समूलं नाशयिष्यामीति भावः ॥ ५२ ॥ मृता मारिता ॥ ५३ ॥ अस्यामव-स्थायामरक्षकत्वाद्धर्मेऽपि रोषो जात इत्याह—न धर्म इति । इदमर्थमेकं ॥ ५४ ॥ न केवलं धर्मे तत्फल-प्रदेवेषु च रोषो जात इत्याह—भक्षितायामिति । के वा ईश्वराः मम अप्रियं कर्तुं शक्ता इत्यन्वयः । आद्यो हिः पादपूरणे । द्वितीयः प्रसिद्धौ ॥ ५५ ॥ सर्वदानीं कथमप्रियं तैः कृतमित्यत्राह—कर्तारमिति। लोकानांकर्तारमपि शूरमपि संहारकरणसमर्थमपि । करुणवेदिनं कारुण्यपरंपुरुषं । सर्वभूतानि अज्ञानाद-वमन्येरन् नादियेरन् । लोकरक्षाबोऽयमितिभावः ॥ ५६ ॥ विशिष्य गर्विता देवाः मां नादियेरमित्या-ह—मृदुमिति । लोकहिते युक्तं सक्तं । अतएव मृदुं कोमलहृदयं । अतएव करुणवेदिनं दान्तं विषयचा-पलरहितमतो निर्वीर्यं मन्यन्ते । अज्ञलाविशेषादिति भावः ॥ ५७ ॥ गुणः कारुण्यादिः । मां प्राप्य दो-षःसंवृत्तः अनिष्टसाधनत्वेनसंवृत्तः । तस्मादस्मदव-मानहेतुतया दोषरूपेण गुणेन किं प्रयोजनमित्यर्थः । यद्वा सर्वभूतानां रक्षसां च अभवाय नाशाय । गुणः दोषःसंवृत्तः । क्षयात्मकत्वात्क्षोभंकरिष्यामीत्यर्थः ॥ ५८ ॥ यथा उदितःसूर्यः शशिज्योत्स्नां शीतलच-न्द्रचन्द्रिकां । संहृत्यैव प्रकाशते । तथा ममतेजः गुणान् मृदुत्वादीन् । संहृत्यैव निरस्यैव प्रकाशते

शि० यतः अमृता मरणधर्मरहिता । अतएव अभक्षितावैदेही हृतैव । महावनेह्रियमाणांसीतां । धर्मे एवत्रायते ॥ ५३ ॥ शि० भक्षितायां खादिद्वारासकललोकसंहारकर्त्र्यां । वैदेह्यां हतायांसत्यां ममप्रियंकर्तुलोकेकेऽपीश्वराः । ब्रह्मविष्णुमहेशाद्यन्यतमाः समर्थाः नकेपीत्यर्थः । अत्रखादिद्वारासकललोकसंहारकर्त्र्यां हतायामित्युक्तयाऽपहरणमपिकस्यैचि-न्निमित्ताय तदिच्छयैवजातमितिसूचितं । तेनापहरणकर्तुस्तत्परिकरवर्तित्वंसूचितं । भक्षितायाश्च कर्तृनिष्ठान्तः । कर्मणोऽविव-क्षितत्वेनाकर्मकत्वात् ॥ ५५ ॥ शि० करुणवेदिनं करुणोदयाद्धरेवेदीदयाद्धत्वसमानाधिकरणसकलविषयकज्ञानवन्तमित्यर्थः । ति० करुणवेदिनं करुणंयथातथावेदितुंशीलमस्यतं । दयादृष्टयातूर्णीस्थितं अज्ञानात् तद्भवाज्ञानात् अवमन्येरन् किमयंकुपितो-पिकरिष्यतीतिनगणयन्तीत्यर्थः ॥ ५६ ॥ तनि० सर्वभूतानां राक्षसानुकूलतयायानिभूतानिप्रवर्तन्ते तेषां । रक्षसांच अभवाय नाशाय ॥ ५८ ॥ तनि० शशिज्योत्स्नामित्युपलक्षणं । उदितोमहान्सूर्यः अनायासेन शशिज्योत्स्नादीनितेजांस्यपहृत्ययथाप्रका-

[पा०] १ क. ङ. ट. हस्योर्यकस्यचा. २ इदमर्धं च. पाठेदृश्यते. ३ च. छ. ज. ञ. पापैर्ममासीत्. ४ ख. ग. घ. साधोर. ५ ख. म. ष. सीतापि. क. च. छ. ज. सीताहि. क. ङ. ग. ट. वैदेही. ६ क. सीतायां. ७ क. वादिनं.

नैव यक्षा न गन्धर्वा न पिशाचा न राक्षसाः ॥ किन्नरा वा मनुष्या वा सुखं प्राप्स्यन्ति लक्ष्मण ॥६०॥
ममास्त्रबाणसंपूर्णमाकाशं पश्य लक्ष्मण ॥ [1]निःसंपातं करिष्यामि ह्यद्य त्रैलोक्यचारिणाम् ॥ ६१ ॥
सन्निरुद्धग्रहगणमावारितनिशाकरम् ॥ विप्रनष्टानलमरुद्भास्कर[2]द्युतिसंवृतम् ॥ ६२ ॥
विनिर्मथितशैलाग्रं शुष्यमाणजलाशयम् ॥ ध्वस्तद्रुमलतागुल्मं वि[3]प्रणाशितसागरम् ॥
त्रैलोक्यं तु करिष्यामि संयुक्तं काल[4]धर्मणा ॥ ६३ ॥
न[5] तां कुशलिनीं सीतां प्रदास्यन्ति म[6]मेश्वराः ॥ अस्मिन्मुहूर्ते सौमित्रे मम द्रक्ष्यन्ति विक्रमम् ॥६४॥
नाकाशमुत्पतिष्यन्ति सर्वभूतानि लक्ष्मण ॥ मम चा[7]पगुणोन्मुक्तैर्बाणजालैर्निरन्तरम् ॥ ६५ ॥
अ[8]र्दितं मम नाराचैर्ध्वस्तभ्रान्तमृगद्विजम् ॥ समाकुलममर्यादं जगत्प[9]श्यार्य लक्ष्मण ॥ ६६ ॥
आकर्णपूर्णैरिषुभिर्जीव[10]लोकं दुरावरैः ॥ करिष्ये मैथिलीहेतोरपिशाचमराक्षसम् ॥ ६७ ॥
मम रोष[11]प्रयुक्तानां सा[12]यकानां बलं सुराः ॥ द्र[13]क्ष्यन्त्यद्य विमुक्तानाम[14]तिदूरातिगामिनाम् ॥ ६८ ॥
नैव देवा न[15] दैतेया न पिशाचा न राक्षसाः ॥ भविष्यन्ति मम क्रोधात्त्रैलोक्ये विप्रणाशिते ॥६९॥
देवदानवयक्षाणां लोका ये रक्षसामपि ॥ बहुधा न[16]भविष्यन्ति बाणौघैः शकलीकृताः ॥ ७० ॥
निर्मर्यादानि[17]माँल्लोकान्[18]करिष्याम्यद्य सायकैः ॥ हृतां मृतां वा सौमित्रे न दास्यन्ति म[19]मेश्वराः ॥७१॥
त[20]थारूपां हि वैदेहीं न दास्यन्ति यदि प्रियाम् ॥ नाशयामि जगत्सर्वं त्रैलोक्यं सचराचरम् ॥७२॥

॥ ५९ ॥ देवविषयःकोपस्तत्संबन्धिष्वपि प्रवर्ततामित्याह—नैवेति ॥ ६० ॥ अस्त्राणि ब्रह्मास्त्रादीनि । पश्य उत्तरक्षणइतिशेषः । त्रैलोक्यचारिणां निःसंपातं बाणप्रचारतोऽशक्यसंचारं ॥ ६१ ॥ सन्निरुद्धेत्यादिसार्धश्लोकद्वयमेकान्वयं । सन्निरुद्धः ग्रहगणः ग्रहगणसंचारः यस्य । आवारितः आच्छादितः । विप्रनष्टानलमरुत् नष्टाग्निवातं । भास्करद्युतिसंवृतं संवृतभास्करद्युति । आहिताग्न्यादित्वान्निष्ठायाःपरनिपातः । कालसाध्योधर्मः कालधर्मः विनाशः तेन कालधर्मणा । अनिजार्षः ॥ ६२—६३ ॥ न तामिति । तस्मादस्मिन्मुहूर्त इत्युपस्कार्यं । कुशलिनीं क्षेमयुक्तां । अक्षतामित्यर्थः ॥ ६४ ॥ गुणो मौर्वी ॥ ६५ ॥ अर्दितं हिंसितं । समाकुलं सम्यग्व्यग्रं । अमर्यादं त्यक्तस्वस्वप्रकृत्यवस्थानं ॥ ६६ ॥ दुरावरैः दुर्वारैः । जीवलोकं ब्रह्माण्डं ॥ ६७ ॥ रोषप्रयुक्तानां रोषसंप्रयुक्तानां । ममेति शेषः । अतिदूरातिगामिनां अतिदूरातिपातिनां ॥ ६८ ॥ नभविष्यन्ति नशिष्यन्तीत्यर्थः । पूर्वं दुःखप्राप्तिरेवोक्ता ॥ ६९ ॥ बहुधा शकलीकृता इत्यन्वयः ॥ ७० ॥ निर्मर्यादान् स्वस्वव्यवस्थारहितान् । न दास्यन्ति न दास्यन्ति यदि ॥७१॥ हृतां मृतां वेत्यत्र सूचितमाह—तथारूपामिति । जगत्सर्वं सर्वं जनमित्यर्थः । अन्यथा त्रैलोक्यमित्य-

शते तद्वन्ममतेजः सकलवस्तुगुणान् संहृत्यप्रकाशते ॥ ५९ ॥ ती० 'विप्रनष्टाखिलमहद्भास्करद्युति' इत्यपिपाठः । तस्यायमर्थः । विप्रनष्टाः अखिलमहतां भास्करस्यचद्युतयोयस्मिंस्तत् । अतएवसंवृतं । तमसेतिशेषः । कालकर्मणा विनाशेन । संयुक्तंकरिष्यामीत्यन्वयः ॥ ६२ ॥ शि० अमर्षात् राक्षसकृतबहुदुष्कृतासहनाद्धेतोः । रोषप्रयुक्तानां क्रोधात्त्यक्तानां । विमुक्तानां विशेषेण मुक्तंसंसारान्मोक्षोयैस्तेषां । दूरगामिनां विशिखानांबाणानांबलं सुराद्रक्ष्यन्ति । एतेन सुरकार्यार्थमेवायमुद्योगइतिध्वनितं ॥ ६८ ॥ ति० अत्रनदास्यन्तीतिपौनरुक्त्यं क्रोधातिशयान्नदोषाय ॥ ७१ ॥ ७२ ॥

[पा०] १ क. झ. ट. असंपातं. २ ख. द्युतिवर्जितं. ३ ख. संप्रणाशित. ४ क. ज. झ. ठ. कालकर्मणा. ५ क. झ. ठ. मते. ६ क. ग. यदीश्वराः. ख. महेश्वराः ७ क.—ट. चापमुखान्मुक्तैः. क. ख. घ. ज. चापगुणान्मुक्तैः. च. चापगुणैर्मुक्तैः. ८ ख.—ज. म. ट. मर्दितं. ९ क. ख. ग. ङ.—ट. पश्याद्य. १० क. छ.—ट. लोकदुरावारैः. ११ ख. ग. रोषप्रमुक्तानां. १२ क. झ. ट. विशिखानां. १३ क. च. छ. ज. म. द्रक्ष्यन्तिज्याविमुक्तानां. १४ क. च छ. ज. म. ममर्षाद्दूरपातिनां. ख. ग. ङ. झ. ठ. ममर्षाद्दूरगामिनां. १५ क. नगन्धर्वाः. १६ क. ख. ङ. छ.—ट. निपतिष्यन्ति. १७ क. ख. ग. च. छ. ज. म. नहंलोकान्. १८ क. च. छ. ज. म. करिष्येमम. १९ ख. यदीश्वराः. २० क. ग. घ. च. छ. म. यथारूपां.

इत्युक्त्वा रोषताम्राक्षो रामो निष्पीड्य कार्मुकम् ॥ शरमादाय संदीप्तं घोरमाशीविषोपमम् ॥७३॥
सन्धाय धनुषि श्रीमान्रामः परपुरञ्जयः ॥ युगान्ताग्निरिव क्रुद्ध इदं वचनमब्रवीत् ॥ ७४ ॥
यथा जरा यथा मृत्युर्यथा कालो यथा विधिः ॥ नित्यं न प्रतिहन्यन्ते सर्वभूतेषु लक्ष्मण ॥
तथाऽहं क्रोधसंयुक्तो न निवार्योस्मि सर्वथा ॥ ७५ ॥
पुरेव मे चारुदतीमनिन्दितां दिशन्ति सीतां यदि नाद्य मैथिलीम् ॥
सदेवगन्धर्वमनुष्यपन्नगं जगत्सशैलं परिवर्तयाम्यहम् ॥ ७६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

पञ्चषष्टितमः सर्गः ॥ ६५ ॥

सीताहरणकोपेन सकललोकसंहरणसमुद्युक्तं रामंप्रति लक्ष्मणेन सयुक्तिकवचनोपन्यासेनपरिसान्त्वनम् ॥ १ ॥

तप्यमानं तथा रामं सीताहरणकर्शितम् ॥ लोकानामभवे युक्तं संवर्तकमिवानलम् ॥ १ ॥
वीक्षमाणं धनुः सज्यं निःश्वसन्तं पुनःपुनः ॥ दग्धुकामं जगत्सर्वं युगान्ते तु यथा हरम् ॥ २ ॥

नेन पुनरुक्तिः । सचराचरमित्यनुवादः ॥७२॥ इत्युक्त्वेतिश्लोकद्वयमेकान्वयं । निष्पीड्य दृढमुष्टिबलेन गृहीत्वा ॥ ७३—७४ ॥ यथेत्यादिःसार्धश्लोकः । विधिः अदृष्टं । जरादयो यथा न प्रतिहन्यन्ते तथाहं न निवार्यः । अन्ये यथाशब्दाः पादपूरणार्थाः । यद्वा बहुवचनमविवक्षितं । प्रतिहन्यत इति प्रत्येकमन्वयः ॥ ७५ ॥ पुरेव मे चारुदतीं मायामृगंप्रतिगमनात्पूर्वं कान्तंमांप्रति इमंमृगं गृहीत्वामह्यं देहीतिहर्षेण यत् स्मितं कृतवती । तेन सहैव न दास्यन्ति चेत् अनिन्दितां तामलब्ध्वा जगदुपसंहारंकरिष्यामि चेदपि इदंनिन्दितमिति न केपि वक्ष्यन्तीति भावः । वक्ष्यते हि "यदि रामः समुद्रान्तां मेदिनीं परिवर्तयेत् । अस्या हेतोर्विशालाक्ष्या युक्तमित्येव मे मतिः" इति सर्वज्ञेन हनुमता । चारुदतीमित्यत्र "छन्दसि" इति सूत्रेण दन्तशब्दस्य दत्रादेशः । "अग्रान्त—" इति सूत्रस्थचकारेण वा दत्रादेशः । सीतां अयोनिजतया मत्तोप्यतिशयितां । मैथिलीं वीरश्रेष्ठजनकचक्रवर्तिपुत्रीत्वेन मत्सदृशीं । सदेवेत्यादि सर्वलोकस्य संभूतमरणमेव करिष्यामीति भावः । परिवर्तयामि नाशयामि अन्यथाकरिष्यामीति वा । अस्मिन्सर्गे सार्धपञ्चसप्ततिश्लोकाः ॥७६॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुःषष्टितमः सर्गः ॥६४॥

एवं जगदुपसंहारक्रोधकलुषं रामं लक्ष्मणःसन्धुक्ष (सान्त्व)यति पञ्चषष्टितमे । तप्यमानमित्यादिश्लोकत्रयमेकान्वयं । तप्यमानं तपन्तं । तथातप्यमानमित्यनेन पूर्वोक्तजगदुपसंहारवाचस्तप्तत्वकृताः नतुसंकल्प-

---

तनि० अनेनाप्रतिहतसंकल्पत्वंपरैरनभिभवनीयत्वंचकथितं । अत्रयथेतिपदावृत्त्यानप्रतिहन्यन्तइत्यप्रतिक्रिया स्वरूपावृत्तिः । दीपकालङ्कारः ॥ ति० नन्वेवंविधःक्रोधः कथमस्य किमर्थंचेतिचेच्छृणु—मनुष्यदेहधारणेनतद्व्यवहारनटनमेवैतत् । किंचईदृशदुःखकालेऽस्यक्रोधाभावेरावणोमनुष्यबुद्धिंकुर्यात् । तथाचतद्वधोशक्यःस्यादित्येतदर्थंचसः । मृत्युंमरणधर्मेणयोजयामीत्यादिवचोपिरावणवचोवदेव ॥ आरोपितक्रोधमूलकत्वात् । अतएवशरैर्विधमिष्यामीत्युक्तिः । लक्ष्मणस्तुतत्वज्ञोपितद्वदेवातत्वज्ञइवतन्मायामोहितोवाप्रलयकालिकरौद्रशक्त्यावेशंसंभाव्यानुनयतिस्म । किंचास्यक्रोधस्यारोपितत्वाभावेऽद्यसीतायाअलाभेसर्वजगत्परिवर्तनंप्रतिज्ञायकथं लक्ष्मणप्रार्थनयापितामन्यथयेत् । अन्यथाकैकेय्यग्रेकृतां वनवासप्रतिज्ञांकथंकौसल्यावचसानत्यक्तवान् । तस्मात्सायथार्था । इयंत्वारोपितेत्येवसारं । अनेनव्यवहारेणक्रोधादिकालेकृतायाअयुक्तायाअपिप्रतिज्ञायाअपालनेऽत्यन्तदोषाभावइत्यपिसूचितं ॥ ७५ ॥ इतिचतुष्षष्टितमःसर्गः ॥ ६४ ॥

[पा०] १ क. ग. ङ.—ट. संदधे. २ घ. युगान्ताग्निसमः. ३ घ. ननित्यं. ४ ङ. छ. ज. झ. ट. निवार्योस्म्यसंशयं. ग. निवार्योस्मिसंयुगे. ५ घ. महिते. ६ ञ. ट. सांवर्तक. घ. संवर्तइवचानलं. ७ क. ग. मुहुर्मुहुः. ८ क. ख. ग. च. छ. ज. हन्तुकामंपशुंरुद्रंक्रुद्धंदक्षक्रतौयथा. ९ ङ. झ. ञ. ट. युगान्तेच.

अदृष्टपूर्वं संक्रुद्धं दृष्ट्वा रामं तु लक्ष्मणः ॥ अब्रवीत्प्राञ्जलिर्वाक्यं मुखेन परिशुष्यता ॥ ३ ॥
पुरा भूत्वा मृदुर्दान्तः सर्वभूतहिते रतः ॥ न क्रोधवशमापन्नः प्रकृतिं हातुमर्हसि ॥ ४ ॥
चन्द्रे लक्ष्मीः प्रभा सूर्ये गतिर्वायौ भुवि क्षमा ॥ एतच्च नियतं सर्वं त्वयि चानुत्तमं यशः ॥५॥
एकस्य नापराधेन लोकान्हन्तुं त्वमर्हसि ॥ न तु जानामि कस्यायं भग्नः सांग्रामिको रथः ॥
केन वा कस्य वा हेतोः सायुधः सपरिच्छदः ॥ ६ ॥
खुरनेमिक्षतश्चायं सिक्तो रुधिरबिन्दुभिः ॥ देशो निर्वृत्तसंग्रामः सुघोरः पार्थिवात्मज ॥ ७ ॥
एकस्य तु विमर्दोयं न द्वयोर्वदतां वर ॥ न हि वृत्तं हि पश्यामि बलस्य महतः पदम् ॥ ८ ॥
नैकस्य तु कृते लोकान्विनाशयितुमर्हसि ॥ युक्तदण्डा हि मृदवः प्रशान्ता वसुधाधिपाः ॥ ९ ॥
सदा त्वं सर्वभूतानां शरण्यः परमा गतिः ॥ को नु दारप्रणाशं ते साधु मन्येत राघव ॥ १० ॥
सरितः सागराः शैला देवगन्धर्वदानवाः ॥ नालं ते विप्रियं कर्तुं दीक्षितस्येव साधवः ॥ ११ ॥
येन राजन्हृता सीता तमन्वेषितुमर्हसि ॥ मद्द्वितीयो धनुष्पाणिः सहायैः परमर्षिभिः ॥ १२ ॥
समुद्रं च विचेष्यामः पर्वतांश्च वनानि च ॥ गुहाश्च विविधा घोरा नदीः पद्मवनानि च ॥ १३ ॥
देवगन्धर्वलोकांश्च विचेष्यामः समाहिताः ॥ यावन्नाधिगमिष्यामस्तव भार्यापहारिणम् ॥ १४ ॥
न चेत्साम्ना प्रदास्यन्ति पत्नीं ते त्रिदशेश्वराः ॥ कोसलेन्द्र ततः पश्चात्प्राप्तकालं करिष्यसि ॥ १५ ॥

पूर्वाइत्युच्यते । रामंदृष्ट्वा राममब्रवीदिति क्रियाभेदान्नपुनरुक्तिदोषः । अभवे विनाशे । युक्तं उद्युक्तं । संवर्तकं संहारकं । अदृष्टपूर्वमिति क्रोधनक्रियाविशेषणं । परिशुष्यता लोकविनाशभयेनेति भावः ॥ १—३ ॥ क्रोधवशमापन्नःसन् प्रकृतिं मृदुत्वादिनिजस्वभावं । न हातुमर्हसि ॥ ४ ॥ लक्ष्म्यादिकमेकैकस्य प्रतिनियतं त्वयितु एतत्सर्वंच यशश्च प्रतिनियतमित्यर्थः ॥ ५ ॥ मम दान्ततयैवैतादृशीदशाजाता अधुनापियदिक्रोधोनस्यात् कोवाममवित्रस्येत् कथंचसीताप्राप्तिरित्याशङ्क्याह—एकस्येति । अर्धत्रयमेकान्वयं । अयंभावः । एकोरथोदृश्यते एकस्यैवपदंप्रतीयते । तेन एक एवापराधीतिनिश्चीयते । एकस्यचापराधेन सर्वान् हन्तुंनार्हसि । तर्हिकोवाऽपराधीत्यत्राह—नत्विति । केन प्रतिपक्षिणा कस्य प्रयोजनस्य हेतोः । "षष्ठी हेतुप्रयोगे" इति षष्ठी । प्रकृतादन्यस्माद्वा निमित्तादिति न जानामि । तच्चिन्तनीयमित्यर्थः । सपरिच्छदः सपरिकरः ॥ ६ ॥ खुरेति अश्वानां खुरैः रथनेमिभिः रथाङ्गैश्च क्षतः । निर्वृत्तसंग्रामः दृश्यत इति शेषः ॥ ७ ॥ विमर्दः संप्रहारः । तत्र हेतुमाह—नहीति । वृत्तं संक्रान्तं ॥ ८ ॥ वक्तव्यमुक्त्वा प्रकृतमाह—नैकस्येति । युक्तदण्डाः अपराधोचितशिक्षणप्रवर्तकाः ॥ ९ ॥ विशिष्य तवायं धर्म इत्याह—सदेति । शरण्यः शरणार्हः । परमा गतिः परमप्राप्यः । देवादिकृतोऽयमपराधो नेत्याह—को न्विति ॥१०॥ दीक्षितस्य उपक्रान्तयज्ञानुष्ठानस्य । साधवः ऋत्विजः ॥ ११ ॥ परमर्षिभिः एतद्वनस्थैः ॥ १२ ॥ विचेष्यामः अन्वेषिष्यामहे ॥ १३—१४ ॥ प्राप्तश्चतुर्थोपायकालोय-

स० अदृष्टपूर्वमितिविशेष्येणस्वरसान्वयिसत् विशेषणीभूतेक्रोधेऽन्वेति । ततश्चादृष्टपूर्वक्रोधवन्तमित्यर्थः ॥ ३ ॥ तनि० अत्रयशश्शब्देन"नतस्येशेकश्चनतस्यनाममहद्यशः" इत्युक्तनिस्सीमाभ्यधिकत्वादिगुणाः प्रतिनियताइत्युपलक्ष्यन्ते ॥ ५ ॥ शि० एकस्यराक्षसस्यापराधेन लोकान्सर्वजनान् हन्तुंत्वंनार्हसि । एतेनविभीषणकर्मकविघातजनितभीतिमत्त्वंलक्ष्मणस्यसूचितं ॥ ६ ॥ स० बलस्य सैन्यस्य । वृत्तं भुविकृतचिह्नं ॥ ८ ॥ ती० युक्तदण्डाः यथापराधदण्डाः ॥ ९ ॥ ती० दीक्षितस्य प्रक्रान्तयज्ञानुष्ठानस्य । साधवः ज्ञानसंपन्ना ऋत्विजः । विप्रियं शापाद्यपचारं । कर्तुंनसमर्थाः । "नैनंशप्तंनाभिचरितमागच्छति" इत्यादिश्रुतिबलादितिभावः ॥ ११ ॥ स० पर्वताश्चअनिनश्चतत्रत्याः प्राणिनश्च वनानिचेत्येतानि ॥१३॥ ति० यद्यस्मात्

[पा०] १ क. ङ.—ट. सलक्ष्मणः. २ ङ. झ. ट. नित्यंत्वयि. ३ ङ. च. छ. ज. म. लोकांस्त्वंहन्तुमर्हसि. ४ ङ. झ. संयुगः. ५ ख. च. छ. ज. म. रथनेमि. ६ क. सिक्तःशोणितबिन्दुभिः. ग. सिक्तःक्षतजबिन्दुभिः. ७ क. च. छ. ज. म. मन्वेष्टुंत्वमर्हसि. ८ ठ. पर्वतानिवनानिच. ९ ङ. झ. ट. पद्मिन्योविविधास्तथा. क. ख. च. छ. ज. म. नलिनीःपार्वतीश्चह. १० क. च. छ. ज. म. पश्चाद्बाणमोक्षं. ११ घ. विधास्यति.

शीलेन साम्ना विनयेन सीतां नयेन न प्राप्स्यसि चेन्नरेन्द्र ॥
ततः समुत्पादय हेमपुङ्खैर्महेन्द्रवज्रप्रतिमैः शरौघैः ॥ १६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ॥ ६६ ॥

लक्ष्मणेन सीतावियोगेनशोचन्तंरामंप्रति वसिष्ठादिदृष्टान्तप्रदर्शनेन कर्मफलभोगस्यावश्यंभावित्वोक्त्यासमाश्वासनपूर्वकं लोकसंहरणोद्यमनिवृत्त्या सीतापहारिणोनिर्धारणेन तदसुहरणकरणोक्तिः ॥ १ ॥

तं तथा शोकसंतप्तं विलपन्तमनाथवत् ॥ मोहेन महताऽऽविष्टं परिद्यूनमचेतनम् ॥ १ ॥
ततः सौमित्रिराश्वास्य मुहूर्तादिव लक्ष्मणः ॥ रामं संबोधयामास चरणौ चाभिपीडयन् ॥ २ ॥
महता तपसा राम महता चापि कर्मणा ॥ राज्ञा दशरथेनासि लब्धोऽमृतमिवामरैः ॥ ३ ॥
तव चैव गुणैर्बद्धस्त्वद्वियोगान्महीपतिः ॥ राजा देवत्वमापन्नो भरतस्य यथा श्रुतम् ॥ ४ ॥
यदि दुःखमिदं प्राप्तं काकुत्स्थ न सहिष्यसे ॥ प्राकृतश्चाल्पसत्त्वश्च इतरः कः सहिष्यति ॥ ५ ॥
दुःखितो हि भवाँल्लोकांस्तेजसा यदि धक्ष्यते ॥ आर्ताः प्रजा नरव्याघ्र क्व नु यास्यन्ति निर्वृतिम् ॥६॥
[आश्वसिहि नरश्रेष्ठ प्राणिनः कस्य नापदः ॥ संस्पृशन्त्यग्निवद्राजन्क्षणेन व्यपयान्ति च ॥७॥]

स्मिन्कर्मणितत्तथा ॥१५॥ एतदेव स्पष्टयति—शीलेनेति । समुत्पादय विवक्षितकार्यमितिशेषः । समुत्सादयेतिपाठे लोकानितिशेषः । एवं लक्ष्मणप्रसादनेन रामकोपशान्तिप्रपञ्चनाद्रावणाराधिततत्पक्षपातिरुद्रसंकल्पाद्रामकोपो भग्न इति वदन् मूर्ख इत्यवगन्तव्यः ॥ १६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चषष्टितमः सर्गः ॥ ६५ ॥

एवं लक्ष्मणो राममाश्वास्य पुनर्वक्तव्यांशं ज्ञापयति षट्षष्टितमे । तं तथेत्यादिश्लोकद्वयमेकान्वयं । परिद्यूनं परिदेवनंप्राप्तं परिशोचन्तमित्यर्थः । "च्छ्वोः शूडनुनासिकेच" इत्यूठ् । "दिवोऽविजिगीषायां" इति निष्ठानत्वं । अचेतनं अस्वस्थचित्तं । संबोधयामास ज्ञापयामास । अभिपीडयन् उपसंगृह्णन् ॥१—२॥ महता तपसा कायक्लेशेन व्रतोपवासादिना । महता चापि कर्मणा अश्वमेधपुत्रकामेष्टिप्रभृतिकर्मणा । राज्ञा दशरथेन । राजा लोकस्य रञ्जनात् । अनेन मन्त्रद्रव्यक्रियालोपाभावेनाधिकारिणा कृतत्वमुच्यते । अमृतमिव तद्वत् भोग्यत्वं यत्नसाध्यत्वं चोच्यते । अमरैः अनेकसुरकृतयत्नः एकेनकृत इति गम्यते ॥३॥ एवकारेण इतरपुत्रव्यावृत्तिः । तवैव गुणैर्बद्धः त्वद्गुणैकपरवशः । महीपतिः राजा न तु जातिमात्रेण राजा । देवत्वमापन्नः । तत्र किं प्रमाणं तत्राह—भरतस्येति । भरतादित्यर्थः । पञ्चम्यर्थे षष्ठी । तथैव मयोक्तमिति शेषः ॥ ४ ॥ काकुत्स्थेत्यनेनाप्राकृतत्वं महासत्त्वत्वं च सिद्धं । सहिष्यति सहिष्यते ॥ ५ ॥ धक्ष्यते धक्ष्यति ॥६—७॥ प्रसङ्गात् दैविकावर्थानर्था-

विचयनेनाशक्यातत्प्राप्तिः स्यात् । ततः परंदेवाःसर्वज्ञाः यदितेपत्नीपत्नीवार्तांनदास्यन्ति ततः पश्चात्प्राप्तकालंचतुर्थोपायंदण्डंतेषुकरिष्यसि ॥ शि० त्रिदशेश्वराः तदुपलक्षितनिखितदारापहारिणः । प्राप्तकालं प्राप्तः कालोयस्मिंस्तंदण्डं ॥ १५ ॥ इतिपञ्चषष्टितमस्सर्गः ॥ ६५ ॥

स० देवत्वमापन्नइति यथा यथावत् । भरतस्यमुखाच्छ्रुतं ॥ ४ ॥ ति० इतरः कइति । "यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः" इत्युक्तेः "मर्त्यावतारस्त्विहमर्त्यशिक्षणं" इतिभागवतोक्तरीत्यालोकशिक्षणार्थमपित्वदवतारादितिभावः ॥ ५ ॥ ति० आश्वसिहीति । "नहवैशरीरस्यसतः प्रियाप्रिययोरपहतिरस्ति" इतिश्रुतेः ॥ ७ ॥

[पा०] १ क. ख. घ. ञ. शिवेन. २ ख. घ. समुत्पाटय. ङ.—ट. समुत्सादय. ३ च. छ. ज. ञ. शोकसंतप्तंपरिद्यूनमचेतसम् । मोहेनमहताऽऽविष्टंविलपन्तमनाथवत्. ४ ङ. झ. ट. महतायुक्तं. ५ क. ङ. झ. ट. मचेतसं. ६ घ. मुहूर्तादेव. ७ ङ. झ. ट. तपसाचापि. ८ घ. दुःखमिव. ९ अयंश्लोकः झ. पाठेनदृश्यते. १० अयंश्लोकः क. ङ.—ट. पाठेषुदृश्यते.

लोकस्वभाव एवैष ययातिर्नहुषात्मजः ॥ गतः शक्रेण सालोक्यमनयस्तं तमः स्पृशत् ॥ ८ ॥
महर्षिर्यो वसिष्ठस्तु यः पितुर्नः पुरोहितः ॥ अह्ना पुत्रशतं जज्ञे तथैवास्य पुनर्हतम् ॥ ९ ॥
या चेयं जगतां माता देवी लोकनमस्कृता ॥ अस्याश्च चलनं भूमेर्दृश्यते सत्यसंश्रव ॥ १० ॥
यौ धर्मौ जगतां नेत्रौ यत्र सर्वं प्रतिष्ठितम् ॥ आदित्यचन्द्रौ ग्रहणमभ्युपेतौ महाबलौ ॥ ११ ॥
सुमहान्त्यपि भूतानि देवाश्च पुरुषर्षभ ॥ न दैवस्य प्रमुञ्चन्ति सर्वभूतादिदेहिनः ॥ १२ ॥
शक्रादिष्वपि देवेषु वर्तमानौ नयानयौ ॥ श्रूयेते नरशार्दूल न त्वं शोचितुमर्हसि ॥ १३ ॥
नष्टायामपि वैदेह्यां हृतायामपि चानघ ॥ शोचितुं नार्हसे वीर यथाऽन्यः प्राकृतस्तथा ॥ १४ ॥
त्वद्विधा न हि शोचन्ति सततं सत्यदर्शिनः ॥ सुमहत्स्वपि कृच्छ्रेषु रामानिर्विण्णदर्शनाः ॥ १५ ॥
तत्त्वतो हि नरश्रेष्ठ बुद्ध्या समनुचिन्तय ॥ बुद्ध्या युक्ता महाप्राज्ञा विजानन्ति शुभाशुभे ॥ १६ ॥
अदृष्टगुणदोषाणामधृतानां च कर्मणाम् ॥ नान्तरेण क्रियां तेषां फलमिष्टं प्रवर्तते ॥ १७ ॥

वन्ये महान्तोपि प्राप्नुवन्तीति दृष्टान्तमुखेन प्रतिपादयितुमाह—लोकस्वभाव इत्यादिना । एषलोकस्वभाव इति वक्ष्यमाणेषु सर्वत्र योज्यं । अनयः अनयमूलं दुःखमित्यर्थः । तमः अज्ञानं । स्पृशत् अस्पृशत् । स हि स्वर्गगतोपि इन्द्रेणासूयाकलुषेण भवद्राज्ये को वा श्रेष्ठ इति पृष्टः सत्यवादितयाऽहमेवेत्युक्तवान् । इन्द्रेणात्मश्लाघी त्वं न स्वर्गार्ह इति पातित इति पुराणप्रसिद्धिः । नहुषात्मजइत्यनेन नहुषानीतिरपिव्यज्यते । स च सप्तर्षीन्स्ववाहकान् शचीस्मरणेन सर्पसर्पेत्युक्तवान् । सर्पो भवेत्यगस्त्यशप्तश्चिरं तथाभूतस्तस्थौ ॥८॥ अह्ना पुत्रशतं हतं विश्वामित्रकोपेन युगपत्पुत्रशतनाशदुःखमनुभूतमितिभावः ॥ ९ ॥ माता सर्वोपादानत्वात् । देवी देवस्य विष्णोः पत्नी । अतएव लोकनमस्कृता । सत्यसंश्रवेति त्वयैव हि पूर्वं मह्यमेवमुपदिष्टमिति भावः ॥ १० ॥ धर्मौ धर्मप्रवर्तकौ । सर्वधर्मसाक्षित्वात् । नेत्रौ नेतारौ । कालपरिच्छेदादिमुखेनजगतः प्रवर्तकौ । "नेत्रो नेतरि भेद्यवान्" इति विश्वः । सर्वेषामर्थप्रकाशकत्वेन नेत्रभूतौ वा । लिङ्गव्यत्ययश्छान्दसः । यत्र ययोः । सर्वं जगत् । प्रतिष्ठितं यदधीनस्वरूपस्थितिप्रवृत्तिकाःसर्वे जना इत्यर्थः । सूर्यस्यवर्षहेतुत्वात् चन्द्रस्यौषधिहेतुत्वाच्चेतिभावः । "आदित्याज्जायते वृष्टिस्ततोऽन्नमभिजायते" इतिवचनात् । ग्रहणं राहुकेतुभ्यां ग्रासं॥११॥ किं बहुना संग्रहेणोच्यत इत्याह—सुमहान्तीति । सुमहान्तिभूतानि मान्धातृनलप्रभृतिमहाजना अपि । सर्वभूतादिदेहिनः सर्वभूतानिआदिदेहोस्यास्तीति तथा । सर्वभूतान्तर्यामिण इत्यर्थः । दैवस्य परमात्मनः । पञ्चम्यर्थे षष्ठी । न प्रमुञ्चति सर्वेपितत्संकल्पनातिक्रामन्तीत्यर्थः ॥१२॥ उपसंहरति—शक्रादिष्वपीति । नयानयौ तन्मूलसुखदुःखे । अतोनत्वं शोचितुमर्हसीत्यर्थः ॥ १३ ॥ उक्तं विवृणोति—नष्टायामपीति । नार्हसे नार्हसि ॥१४॥ सत्यदर्शिनः यथार्थदर्शिनः । कृच्छ्रेषु दुःखेषु । अनिर्विण्णं अविनाशि दर्शनं कृत्याकृत्यविवेकोयेषां ते तथा ॥ १५ ॥ तत्त्वतो बुद्ध्या अबाधितबुद्ध्या । समनुचिन्तय शुभाशुभे इति शेषः । महाप्राज्ञाः बुद्ध्या तात्कालिक्या युक्ताःसन्तः शुभाशुभे भाविनी विजानन्ति ॥ १६ ॥ इदानींफलानुभवःपूर्वकर्मसाध्यः अतस्तत्रनशोचनीयमित्याह—अदृष्टेति । अदृष्टगु-

ति० एषः औपाधिकदुःखसंबन्धः । लोकस्य शरीरिणः । स्वभावएव । तदेवाह—ययातिरिति । अनयः अनयमूलं दुःखं । तच्चस्वर्गाद्भ्रंशरूपं । समस्पृशदित्यनेनाचिरस्थितिकस्पर्शमात्रार्थकेनपुनरविलंबेनैवदौहित्रप्रयुक्तसुखोत्तरकालिकदुःखनिवृत्तिरप्यस्यसूचिता ॥ ८ ॥ ति० दैवस्य कर्मणः । वशंनप्रमुञ्चन्तीत्यर्थः । किंपुनर्वक्तव्यं देहिनस्सर्वभूतानि देहवन्तिसर्वभूतानिनमुञ्चन्तीति । पुंस्त्वमार्षं ॥ ९ ॥ ती० अदृष्टाः शास्त्रैकसमधिगम्यतयाप्रत्यक्षतोद्रष्टुमशक्याः गुणदोषाः सुखदुःखरूपायेषां

[पा०] १ क. ख. ग. शक्रस्य. २ ख. ग. मनयस्तंचसंस्पृशत्. क. मपतत्सतमःस्पृशन्. ३ क. ङ.—ट. जगतो. ४ ङ. झ. ञ. ट. सर्वलोक. ५ ङ. झ. ञ. ट. कोसलेश्वर. क. छ. ज. सत्यसंश्रय. ६ क. घ. ज. छ. ज. यौचेमौ. ७ ग. ङ. झ. ट. जगतो. ८ ग. ङ. च. झ. ञ. ट. व्यथितुं. ९ ङ. झ. ट. मृतायामपिवैदेह्यांनष्टायामपिराघव. १० क. ख. छ. वानघ. ११ क.—घ. हिनशोचन्ति. १२ ङ. झ. ट. सर्वदर्शनाः. ग. सत्यदर्शनाः. घ. समदर्शनाः. १३ क. ङ.—ज. ञ. महात्मानो. १४ ङ. झ. ट. मधुवाणांतु. ख. ग. मधृतानांतु. घ. मश्रुतानांतु. १५ ङ. छ.—ट. मिष्टंचवर्तते.

त्वमेव हि पुरा राम मामेवं बहुशोऽन्वशाः ॥ अनुशिष्याद्धि कोनु त्वामपि साक्षाद्बृहस्पतिः ॥ १८ ॥
बुद्धिश्च ते महाप्राज्ञ देवैरपि दुरन्वया ॥ शोकेनाभिप्रसुप्तं ते ज्ञानं संबोधयाम्यहम् ॥ १९ ॥
दिव्यं च मानुषं च त्वमात्मनश्च पराक्रमम् ॥ इक्ष्वाकुवृषभावेक्ष्य यतस्व द्विषतां वधे ॥ २० ॥
किं ते सर्वविनाशेन कृतेन पुरुषर्षभ ॥ तमेव त्वं रिपुं पापं विज्ञायोद्धर्तुमर्हसि ॥ २१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

सप्तषष्टितमः सर्गः ॥ ६७ ॥

लक्ष्मणेनसमाश्वासनात्कोपत्यागपूर्वकं तेनसह पुनःसीतांविचिन्वतारामेण जटायुदर्शनं ॥ १ ॥ तथा तस्मिन्रक्षोबुद्ध्या तेनसीताहननसंभावनया तद्वधोद्यमः ॥ २ ॥ तेनरामंप्रति रावणेनसीताहरणनिवेदनपूर्वकं युद्धे स्वेनतदीयरथादिविध्वंसननिवेदनेनसह वृद्धत्वाद्युद्धश्रान्तस्यस्वस्य तेनखड्गेनपक्षच्छेदनपूर्वकं पुनर्वैदेह्यानयनेन वैहायसमार्गगमननिवेदनम् ॥ ३ ॥ रामेणपितृसुहृत्त्वस्नेहाज्जटायुषःपरिष्वङ्गपूर्वकंविलापेनदुःखाद्भूमौपतनं ॥ ६३ ॥

पूर्वजोप्युक्तमात्रस्तु लक्ष्मणेन सुभाषितम् ॥ सारग्राही महासारं प्रतिजग्राह राघवः ॥ १ ॥
संनिगृह्य महाबाहुः प्रवृत्तं कोपमात्मनः ॥ अवष्टभ्य धनुश्चित्रं रामो लक्ष्मणमब्रवीत् ॥ २ ॥

णदोषाणां प्रत्यक्षतोद्रष्टुमशक्यसुखदुःखरूपगुणदोषाणां । अधृतानां पुरा एवंकर्म कृतमिति निश्चेतुमशक्यानां । तेषां प्रसिद्धानां पूर्वकृतानामित्यर्थः । कर्मणां इष्टं फलं क्रियां अनुष्ठानमन्तरेण न प्रवर्तते । पूर्वकर्मानुष्ठानं विना इदानीं फलं नोत्पद्यते । अतः पूर्वकर्मफले इदानींप्रवृत्ते कात्रपरिदेवनेति भावः ॥१७॥ अन्वशाः अनुशासितवानसि ॥ १८ ॥ दुरन्वया दुर्लभा । प्रसुप्तं स्तिमितं । संबोधयामि उत्थापयामि ॥१९॥ दिवि भवंदिव्यं । प्राणिजातं देवगन्धर्वादिकं । तच्च सात्त्विकं वधानर्हं । मानुषं मनुष्यलोकोद्भवं ब्राह्मणादिकं तदपि वधानर्हं । सर्वलोकसंहारसमर्थं आत्मनःपराक्रमं च अवेक्ष्य विचार्य द्विषतामेव वधे यतस्व ॥ २० ॥ उद्धर्तुं नाशयितुं ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षट्षष्टितमः सर्गः ॥ ६६ ॥

अथ लक्ष्मणवाक्यप्रतिष्ठापितधैर्यो रामो युद्धभूमेर्दक्षिणतः किंचिद्दूरे गृध्रराजं दृष्ट्वा रोदिति सप्तषष्टितमे । राघवः पूर्वजोपि लक्ष्मणेन कनिष्ठेन सुभाषितं युक्तियुक्ततयोक्तं वाक्यं । उक्तमात्रस्तु उक्तमात्र एव जग्राह । "बालादपि सुभाषितं" इति स्मृतेः । स्वयमुपदेष्टा कथमन्योक्तं जग्राहेत्यत्राह— सारग्राहीति । किमस्य वाक्यस्य सारवत्त्वं तत्राह—

तेषां । अतएवाध्रुवाणां अनिश्चितफलानां । सत्कर्मानुष्ठानेदुःखमित्यन्वयव्यतिरेकसूचकप्रत्यक्षप्रमाणेनानिश्चितफलानामित्यर्थः ॥ १७ ॥ ति० इयंचबुद्धिस्त्वद्दत्तैवमे अतस्तवोपदेशेकिंसामर्थ्यमिति नवाच्यमित्याह—मामिति । अकारणेक्रोधवशमापन्नमिति शेषः । बहुशोक्तवानितिसन्धिरार्षः ॥ स० बहुशोक्तवानितिपाठे बहुशेतिसंबोधनं । बहुश पूर्णसुख ॥ साक्षाद्बृहस्पतिरपि नानुशिष्यात् ॥ १८ ॥ ति० देवैरपिदुरन्वयाअन्वेतुमनुगन्तुमशक्या । त्वज्ज्ञानपरिच्छेदोदेवानामप्यशक्यइतिभावः । अनेनेश्वरतासूचिता ॥ १९ ॥ ति० दिव्यं देवोचितं मानुषं मनुष्योचितं । एवमुभयविधपराक्रमाश्रयत्वमात्मनोऽवेक्ष्य । तत्राद्यः परशुरामविषयः । अन्त्योरक्षोविषयः ॥ एवंच देवोचितपराक्रमस्यायं नावसरइतिभावः ॥२०॥ इतिषट्षष्टितमस्सर्गः ॥ ६६ ॥

[पा०] १ ख. ग. घ. मामेव. क. ङ. झ. ट. मामेवं. २ क. ख. ग. ङ.—ट. वीर. ३ क ख. ङ. झ. ट. ठ. त्वमेवबहुशोक्तवान्. ग. त्वमेवबहुधोक्तवान् घ. त्वमेवबहुशोऽन्वशाः. च. छ. ज. ञ. ह्यनुशिष्यसिराघव. ४ क. च. छ. ज. अनुशिष्यति. घ. अनुशिष्यात्तु. ५ ख. त्वांसाक्षादपिबृहस्पतिः. ६ क ग. च. छ. ज. ञ. लोकैरेतैर्दुरन्वया. ७ ङ.—ट. चैवमात्मनश्च. घ. रूपमात्मनश्च. ८ ङ. झ. ट. तमेवतु. च. त्वमेवतं. ९ ङ. झ. ट. प्युक्तवाक्यस्तु. १० क ङ.—ट. सनिगृह्य. ११ घ. ङ. झ. ट. प्रवृद्धंरोषमात्मनः. च. छ. ज ञ. प्रवृद्धंक्रोधमात्मनः.

किं करिष्यावहे वत्स क्व वा गच्छाव लक्ष्मण ॥ केनोपायेन पश्येयं सीतामिति विचिन्तय ॥ ३॥
तं तथा परितापार्तं लक्ष्मणो राममब्रवीत् ॥ ४ ॥
इदमेव जनस्थानं त्वमन्वेषितुमर्हसि ॥ राक्षसैर्बहुभिः कीर्णं नानाद्रुमलतायुतम् ॥ ५ ॥
सन्तीह गिरिदुर्गाणि निर्दराः कन्दराणि च ॥ गुहाश्च विविधा घोरा नानामृगगणाकुलाः ॥ ६ ॥
आवासाः किन्नराणां च गन्धर्वभवनानि च ॥ तानि युक्तो मया सार्धं त्वमन्वेषितुमर्हसि ॥ ७ ॥
त्वद्विधा बुद्धिसंपन्ना महात्मानो नरर्षभ ॥ आपत्सु न प्रकम्पन्ते वायुवेगैरिवाचलाः ॥ ८ ॥
इत्युक्तस्तद्वनं सर्वं विचचार सलक्ष्मणः ॥ क्रुद्धो रामः शरं घोरं सन्धाय धनुषि क्षुरम् ॥ ९ ॥
ततः पर्वतकूटाभं महाभागं द्विजोत्तमम् ॥ ददर्श पतितं भूमौ क्षतजार्द्रं जटायुषम् ॥
तं दृष्ट्वा गिरिशृङ्गाभं रामो लक्ष्मणमब्रवीत् ॥ १० ॥
अनेन सीता वैदेही भक्षिता नात्र संशयः ॥ गृध्ररूपमिदं रक्षो व्यक्तं भवति कानने ॥ ११ ॥
भक्षयित्वा विशालाक्षीमास्ते सीतां यथासुखम् ॥ एनं वधिष्ये दीप्तास्यैर्घोरैर्बाणैरजिह्मगैः ॥ १२ ॥
इत्युक्त्वाऽभ्यपतद्गृध्रं सन्धाय धनुषि क्षुरम् ॥ क्रुद्धो रामः समुद्रान्तां कम्पयन्निव मेदिनीम् ॥ १३ ॥
तं दीनं दीनया वाचा सफेनं रुधिरं वमन् ॥ अभ्यभाषत पक्षी तु रामं दशरथात्मजम् ॥ १४॥
यामोषधिमिवायुष्मन्नन्वेषसि महावने ॥ सा देवी मम च प्राणा रावणेनोभयं हृतम् ॥ १५ ॥
त्वया विरहिता देवी लक्ष्मणेन च राघव ॥ ह्रियमाणा मया दृष्टा रावणेन बलीयसा ॥ १६ ॥
सीतामभ्यवपन्नोऽहं रावणश्च रणे मया ॥ विध्वंसितरथश्चात्र पातितो धरणीतले ॥ १७ ॥

महासारमिति ॥ १—२ ॥ पश्येयं पश्येव ॥ ३ ॥ तमित्यर्धमेकंवाक्यं ॥ ४—५ ॥ इह जनस्थाने । गिरिगतानि दुर्गाणि गन्तुमशक्यप्रदेशा इत्यर्थः । निर्दराः विदीर्णपाषाणाः । कन्दराणि पाषाणसन्धयः । गुहाः देवखातबिलानि । युक्तः संनद्धः ॥६—७॥ न प्रकम्पन्ते न चञ्चलचित्ता भवन्तीत्यर्थः ॥ ८ ॥ क्षुरं क्षुरप्राख्यं शरं । सीताया अदर्शनात्क्रोधः ॥ ९ ॥ कूटः शृङ्गं । महाभागं महाभाग्यं । स्वाम्यर्थे त्यक्तशरीरत्वात् । द्विजोत्तमं पक्षिश्रेष्ठं । "दन्तविप्राण्डजा द्विजाः" इत्यमरः । क्षतजं रुधिरं ॥ १० ॥ भक्षिता रुधिरार्द्रत्वादिति भावः। गृध्रेति । गृध्रस्य रूपमिव रूपं यस्य तत्तथा ॥११॥ अजिह्मं अकुण्ठं अवक्रं वा गच्छन्तीत्यजिह्मगाः तैः ॥१२॥ अभ्यपतत् अभिमुखं गतः। समुद्रान्तां समुद्रपर्यन्तां ॥ १३ ॥ दशरथात्मजमिति संबन्धोक्तिः॥१४॥ यथा महौषध्यन्वेषिणः प्रतिवनमन्वेषन्ते तथा यामस्मिन्विस्तीर्णे वनेऽन्वेषसि । एषृ गतावित्यस्माद्व्यत्ययेन परस्मैपदं । नित्यंप्राणसमेत्युक्ता सा देवी मम प्राणाश्च उभयं रावणेन हृतं । मम प्राणान्हृतप्रायान्कृत्वा सीतां रावणो हृतवानित्यर्थः । खरवधादिना रामबलंज्ञात्वाप्यस्थानेभयशङ्कितया रामस्यायुः प्रार्थयते—आयुष्मन्निति ॥ १५—१६ ॥ अभ्यवपन्नः आभिमुख्येन गतः । ह्रियमाणांसीतामवलोक्य तदभिमुखमागत इत्यर्थः । रावणश्च विध्वंसितरथःसन् अत्र धरणीतले पातितः रथाद्भ्रंशित

शि० क्रुद्धः क्रुधंजहातिसः त्यक्तकोपोरामः ॥ ९ ॥ शि० इदंगृध्ररूपंवस्तु यदिरक्षः राक्षसः तर्हि अनेनरक्षसाभक्षितासीता अत्र अस्योदरे भ्रमति भ्रमेत् । संशयोन । यदीत्यध्याहृतं । भ्रमतीत्यनेन तस्याः नित्यत्वंसूचितं तेनैतदुदरान्निर्गच्छेदितिसंभा-

[पा०] १ च. छ. ज. ञ. क्वगच्छावच. २ घ. झ. पश्यावः. ३ ङ. झ. ट. सीतामिह. क. सीतांसुरसुतोपमां. ४ घ. ङ. झ. ट. वाक्यमब्रवीत्. ५ घ.—ट. समन्वेषितुं. ६ ख. घोरं. ७ च. छ. ज. महाकायं. ८ च. छ. ज. ञ. किल. ९ ग. ङ.—ट. व्यक्तंरक्षोभ्रमतिकाननं. १० क. ग ङ.—ट. दीप्ताग्रैःशरैर्घोरैरजिह्मगैः. ११ ङ. झ. ट. भ्यपतद्द्रष्टुं. १२ ख. च. छ. ज. ञ. सुसंभ्रान्तश्चालयन्निव. क. ग. घ. ङ. झ. ट. समुद्रान्तांचालयन्निव. १३ ख. च. दीनो. ङ. झ. ञ. दीनदीनया. १४ ङ. झ. ट. सरामं. १५ ङ. झ. ट. प्रभो. १६ क.—ट. रथच्छत्रः. १७ ख.—ट. पतितो.

एतदस्य धनुर्भग्नमेतदस्य शरावरम् ॥ अयमस्य रथो राम भग्नः सांग्रामिको मया ॥ १८ ॥
अयं तु सारथिस्तस्य मत्पक्षनिहतो युधि ॥ १९ ॥
परिश्रान्तस्य मे पक्षौ छित्त्वा खड्गेन रावणः ॥ सीतामादाय वैदेहीमुत्पपात विहायसम् ॥ २० ॥
रक्षसा निहतं पूर्वं न मां हन्तुं त्वमर्हसि ॥ २१ ॥
रामस्तस्य तु विज्ञाय बाष्पपूर्णमुखस्तदा ॥ द्विगुणीकृततापार्तः सीतासक्तां प्रियां कथाम् ॥ २२ ॥
गृध्रराजं परिष्वज्य परित्यज्य महद्धनुः ॥ निपपातावशो भूमौ रुरोद सहलक्ष्मणः ॥
[द्विगुणीकृततापार्तो रामो धीरतरोपि सन्] ॥ २३ ॥
एकमेकायने दुर्गे निःश्वसन्तं कथंचन ॥ समीक्ष्य दुःखिततरो रामः सौमित्रिमब्रवीत् ॥ २४ ॥
राज्याद्भ्रंशो वने वासः सीता नष्टा द्विजो हतः ॥ ईदृशीयं ममालक्ष्मीर्निर्दहेदपि पावकम् ॥ २५ ॥
संपूर्णमपि चेदद्य प्रतरेयं महोदधिम् ॥ सोपि नूनं ममालक्ष्म्या विशुष्येत्सरितां पतिः ॥ २६ ॥

इत्यर्थः ॥ १७ ॥ भग्नमेतद्धनुः अस्य रावणस्य संबन्धि । एवमुत्तरत्रापि योज्यं । शरावरं वर्म तूणीरं वा ॥ १८ ॥ अयंत्वित्यर्धमेकं ॥ १९ ॥ वैदेहीं जनकेन सम्यक्परिपोषितां ॥ २० ॥ रक्षसेत्यर्धमेकं ॥ २१ ॥ तस्य गृध्रस्यसंबन्धिनीं । सीताविषयकथां विज्ञाय श्रुत्वा । द्विगुणीकृतेन गृध्रवधेनद्विरावर्तितेन तापेन आर्तः पीडितः । अभूदिति शेषः ॥ २२ ॥ अवशः मूर्च्छित इत्यर्थः । रुरोद क्रमादिति शेषः ॥ २३ ॥ एकं असहायं सहायरहितं दययासंरक्षकपथिकजनरहितमित्यर्थः । एकायने एकस्य मार्गे । "अयनं वर्त्म मार्गाध्व—" इत्यमरः । एकपद्यामित्यर्थः । दुर्गे इतः परमपिकेनचिद्गन्तुमशक्ये इति दुःखहेत्वतिरेकोक्तिः । निःश्वसन्तं गृध्रराजमितिशेषः ॥ २४ ॥ राज्यादिति । यद्यपि "न चास्य महतीं लक्ष्मीं राज्यनाशोपकर्षति" "वनवासो महोदयः" इति अभिमततमतया प्रोक्तौ राज्यनाशवनवासौ तथापि संप्रतिसीताविश्लेषकारित्वाज्जटायुवियोगफलकत्वाच्च तावेवानर्थकरौ जाताविति आह । राज्याद्भ्रंशः हठात् लब्धराज्यस्यविच्युतिः । वनेवासः राज्यभ्रंशेपि राज्येभिक्षुकवृत्त्यापिस्थातुंशक्यं तदपि नलब्धं । सीता नष्टा वनवासेप्यभिमतजनविश्लेषाभावे सुखेनावस्थातुं शक्यं तदपि नास्ति । हतो द्विजः अभिमतजनविश्लेषेपि बन्धुजनसन्निधौ शोको निर्वापयितुं शक्यः स च निवृत्तः । ईदृशी एतादृशदुःखपर्यवसायिनी । मम अलक्ष्मीः दौर्भाग्यं । पावकमपि निर्दहेत् सर्ववस्तुदाहकमपिदहेत् । सदा विश्लेषप्रसक्तिशून्यं लक्ष्मणमपि विश्लेषयेदिति भावः

वनाव्यञ्जिता ॥ ११ ॥ ती० तस्यजटायुषः । विज्ञाय स्वरूपमितिशेषः । सीतासक्तां सीताविषयां कथां श्रुत्वेतिशेषः ॥ २२ ॥ रामोरुरोदेत्यस्यायमभिप्रायः । परमेश्वरस्यश्रीरामस्यभक्तपक्षपातित्वेन भक्तंजटायुषमापन्नंदृष्ट्वा परमप्रियांसीतांरावणेनहृतांचश्रुत्वा " व्यसनेषुमनुष्याणांभृशंभवतिदुःखितः " इत्युक्तेः भक्तापदं दृष्ट्वारुरोदेति । द्विगुणीकृततापार्तः बभूवेतिशेषः । सीताऽदर्शनजस्तापः निजभक्तजटायुवधजनिततापश्च । एवंतापस्यद्विगुणत्वं ॥ २३ ॥ ति० एकंअसहायं । एकस्मिन् ऊर्ध्वतालक्षणे अयने श्वासमार्गे । अतएव कृच्छ्रे मुहुर्मुहुर्निश्वसन्तमितिकतकसंमतपाठेऽर्थः ॥ २४ ॥ शि० राज्यं राज्याभिषेकः । वनेवासः जातइतिशेषः । या पावकमपिदहेत् ईदृशी ममालक्ष्मीः मस्यमधुसूदनस्यमा लक्ष्मीः तस्याअपिलक्ष्मीः । इयं बुद्धिस्था सीता नष्टा अपहरणेनादृश्यत्वंप्राप्ता । द्विजः सहायकः पक्षी । मृतः मृतप्रायः । " मोयमेसमयेपिस्याद्विषेचमधुसूदने । " इतिमेदिनी ॥ २५ ॥ शि० पतिः सर्वेषांनियन्ता अहं संपूर्णां सरितं नदीं संपूर्णंमहोदधिंसमुद्रंच । ममालक्ष्म्या मधुसूदनलक्ष्मीलक्ष्म्या सहितः । अत् निरन्तरंवनपर्यटनशीलोहं चेत् यदि इच्छामि तदा प्रतरेयं विशुष्ये शोषयामिच । अतः येनरक्षसाहेतुभूतेन

[पा०] १ घ. एतत्तस्य. २ ङ. झ. ट. मेतेवास्यशरास्तथा. घ. मेतत्तस्य. ३ क. ग. ङ.—ट. रणे. ४ क. ङ.—ट. रथः. ५ क. घ. च. छ. खस्थस्स. ६ क. च. छ. ज. नमांत्वंहन्तुमर्हसि. ङ. झ. ट. मांनहन्तुंत्वमर्हसि. ७ घ. छ. ज. कथांप्रियां. ८ अतःपूर्वं 'श्रुत्वाजटायुषोवाक्यंराम सौमित्रिणासह.' इत्यर्धं घ. पाठेअधिकंदृश्यते. ९ इदमर्धं. ङ. झ. ट. पाठेषुदृश्यते. १० ख. ङ. झ. ट. कृच्छ्रेनिश्वसंतंमुहुर्मुहुः. ११ क. ख. ग. ङ.—ट. दुःखितोरामःसौमित्रिमिदमब्रवीत्. १२ ङ. छ.—ट. राज्यंभ्रष्टं. क. राज्यभ्रंशो. १३ ङ.—ट. मृतोद्विजः. ग. घ. हतोद्विजः. क. द्विजोमृतः. १४ क. ममालक्ष्मीर्दहेदपिच. ङ. झ. ट. ममालक्ष्मीर्दहेदपिहि. १५ क. पाथोभिःप्रतरेयं. च. छ. ज. झ. चेदद्यप्रविशेयं.

नास्त्यभाग्यतरो लोके मत्तोऽस्मिन्सचराचरे ॥ येनेयं महती प्राप्ता मया व्यसनवागुरा ॥ २७ ॥
अयं पितृवयस्यो मे गृध्रराजो जरान्वितः ॥ शेते विनिहतो भूमौ मम भाग्यविपर्ययात् ॥ २८ ॥
इत्येवमुक्त्वा बहुशो राघवः सहलक्ष्मणः ॥ जटायुषं च पस्पर्श पितृस्नेहं विदर्शयन् ॥ २९ ॥
निकृत्तपक्षं रुधिरावसिक्तं सै गृध्रराजं परिरभ्य रामः ॥
क्व मैथिली प्राणसमा मेमेति विमुच्य वाचं निपपात भूमौ ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

अष्टषष्टितमः सर्गः ॥ ६८ ॥

रामेण सीताहरणवृत्तान्तस्यथाधातथ्यंपृष्टेनजटायुषा संप्रतितत्कथनपूर्वकं सीताहरणकालस्य विन्दुनामकमुहूर्तस्योक्तया तन्मुहूर्तमहिम्ना पुनःसीतालाभस्यभाविनोक्तया समाश्वासनं ॥ १ ॥ तथा संप्रति रावणवृत्तान्तंकथयतोजटायोरर्धोक्तावेव शरीरात्प्राणानांविनिर्गमः ॥ २ ॥ संप्रतिशोचतारामेण तस्यविष्णुलोकगमनानुग्रहपूर्वकं तच्छरीरदहनेनतंप्रतिपिण्डो-दकदानं ॥ ३ ॥

रामः संप्रेक्ष्य तं गृध्रं भुवि रौद्रेण पातितम् ॥ सौमित्रिं मित्रसंपन्नमिदं वचनमब्रवीत् ॥ १ ॥
ममार्थं नूनमर्थेषु यतमानो विहङ्गमः ॥ राक्षसेन हतः संख्ये प्राणांस्त्यक्ष्यति दुस्त्यजान् ॥ २ ॥
अग्रमस्य शरीरेऽस्मिन्प्राणो लक्ष्मण विद्यते ॥ तथाहि स्वरहीनोऽयं विक्लवः समुदीक्षते ॥ ३ ॥
जटायो यदि शक्नोषि वाक्यं व्याहरितुं पुनः ॥ सीतामाख्याहि भद्रं ते वधमाख्याहि चात्मनः ॥४॥
[12]किंनिमित्तोऽहरत्सीतां रावणस्तस्य किं मया ॥ [13]अपराधं तु यं दृष्ट्वा रावणेन हृता प्रिया ॥ ५ ॥

॥२५॥ प्रतरेयं तापशान्तयेऽप्लवेयं वेत् ॥२६॥ व्यसनं वागुरेव व्यसनवागुरा । "वागुरा मृगबन्धिनी" इत्यमरः ॥ २७ ॥ पितुर्वयस्यः सखा ॥ २८ ॥ पितरीव स्नेहः पितृस्नेहः ॥ २९ ॥ रामः वाचं विमुच्य उक्तेत्यर्थः ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तषष्टितमः सर्गः ॥ ६७ ॥

अथभगवत्कार्यार्थंत्यक्तशरीरस्यगृध्रराजस्यमोक्षप-दप्रापणमष्टषष्टितमे । रौद्रेण रावणेन । मित्रसंपन्नं सर्वजनमित्रमित्यर्थः । यद्वा परनिपातः । संपन्नमित्रं अत्यन्तरामविषयसौहार्दयुक्तमित्यर्थः ॥ १ ॥ अर्थे-ध्विति निमित्तसप्तमी । मम प्रयोजनार्थमित्यर्थः । संख्ये युद्धे ॥ २ ॥ अयंप्राणः सूक्ष्मप्राणः । स्वरहीनः हीनस्वरः । विक्लवः विह्वलः ॥ ३ ॥ व्याहरितुं व्याहर्तुं । वधं वधप्रकारं ॥४॥ किंनिमित्तः किंनिमित्तं

महती इयंव्यसनवागुरा दुःखरूपमृगादिबन्धनजालं । मयाकर्त्रा प्राप्ताप्रापिता । तस्मान्मत्तः उन्मत्तः अभाग्यतरश्च लोकेनास्ति । एतेन सद्यीघ्रंध्रुवंनङ्क्ष्यतीतिसूचितं । श्लोकद्वयमेकान्वयि ॥२६—२७॥ शि० तदेवद्वयमाह—अयमिति । मेपितुर्वयस्यः सखा निहतः निहतप्रायः । अयंगृध्रराजः भाग्यविपर्ययात् हननकर्तुर्भाग्यवैपरीत्यादेव ममाप्रेक्षते ॥ २८ ॥ स० वाचंविमुच्य करणेति वाचंविमुच्यभूमौनिपपात ॥ ३० ॥ इतिसप्तषष्टितमः सर्गः ॥ ६७ ॥

स० मित्रसंपन्नं मित्रत्वेनसंप्रतिपन्नं ॥१॥ स० तस्य रावणस्य । आर्यां जगन्मातरं । तस्यकिमपराद्धमितितस्येत्युभयत्रान्वेति

[पा०] १ ङ. ञ. ट. महाबलः. २ क.—ट. निदर्शयन्. ३ ख. ङ.—ट. तंगृध्रराजं. ४ ङ. ञ. ट. परिगृह्यराघवः. ५ ङ. ट. गतेति. ६ ख. वाष्पं. ७ क. ग. ङ.—ट. प्रेक्ष्यतु. ८ क. घ. च. ज. ट. त्यजति. ङ. ञ. त्यजतिमत्कृते. घ. त्यजतिदुःखितान्. ९ ङ. ञ. ण. ट. अतिक्षिप्रःशरीरे. १० च. छ. ज. दृश्यते. ११ ङ.—ट. तथास्वरविहीनोयं. ख. तथापिस्वरहीनोयं. १२ च. छ. ज. विक्लवंसमुदैक्षत. ङ. ञ. ण. ट. विक्लवंसमुदीक्षते. १३ ख. ग. किंनिमित्तंहरेत्. ङ. ञ. ट. किंनिमित्तोऽहरत्सीतां. १४ ख. ङ.—ट. अपराद्धंतु.

कथं तच्चन्द्रसंकाशं मुखमासीन्मनोहरम् ॥ सीतया कानि चोक्तानि तस्मिन्काले द्विजोत्तम ॥ ६ ॥
कथंवीर्यः कथंरूपः किंकर्मा स च राक्षसः ॥ क्व चास्य भवनं तात ब्रूहि मे परिपृच्छतः ॥ ७ ॥
तमुद्वीक्ष्याथ दीनात्मा विलपन्तमनन्तरम् ॥ वाचाऽतिसन्नया रामं जटायुरिदमब्रवीत् ॥ ८ ॥
हृता सा राक्षसेन्द्रेण रावणेन विहायसा ॥ मायामास्थाय विपुलां वातदुर्दिनसंकुलाम् ॥ ९ ॥
परिश्रान्तस्य मे तात पक्षौ छित्त्वा स राक्षसः ॥ सीतामादाय वैदेहीं प्रयातो दक्षिणां दिशम् ॥१०॥
उपरुध्यन्ति मे प्राणा दृष्टिर्भ्रमति राघव ॥ पश्यामि वृक्षान्सौवर्णानुशीरकृतमूर्धजान् ॥ ११ ॥
येन यातो मुहूर्तेन सीतामादाय रावणः ॥ विप्रनष्टं धनं क्षिप्रं तत्स्वामी प्रतिपद्यते ॥ १२ ॥
विन्दो नाम मुहूर्तोऽयं स च काकुत्स्थ नाबुधत् ॥ त्वत्प्रियां जानकीं हृत्वा रावणो राक्षसेश्वरः ॥
झषवद्बडिशं गृह्य क्षिप्रमेव विनश्यति ॥ १३ ॥
न च त्वया व्यथा कार्या जनकस्य सुतां प्रति ॥ वैदेह्यां रंस्यसे क्षिप्रं हत्वा तं राक्षसं रणे ॥ १४ ॥
असंमूढस्य गृध्रस्य रामं प्रत्यनुभाषतः ॥ आस्यात्सुस्राव रुधिरं म्रियमाणस्य सामिषम् ॥ १५ ॥

यस्यासौ किंनिमित्तः । केन हेतुना अहरदित्यर्थः । किं भोगार्थं उत अपकारप्रतीकारार्थमित्यर्थः । चरमपक्षे तत्स्वरूपं पृच्छति—तस्येति । यं अपराधं ॥५॥ कथं कीदृशप्रकारं । कानि वाक्यानि ॥ ६ ॥ तात पितृतुल्य ॥ ७ ॥ दीनात्मा दीनमनाः । अतिसन्नया अतिकार्श्यं प्राप्तया ॥८॥ किंकर्मेत्यस्योत्तरमाह—हृता सेति । वातेन दुर्दिनेन च संकुलां । "मेघच्छन्नेह्नि दुर्दिनं" इत्यमरः।मायया महावातंमेघच्छादनंचोत्पाद्य हृतवानित्यर्थः ॥ ९ ॥ वधमाख्याहीत्यस्योत्तरमाह—परिश्रान्तस्येति । युद्धपरिश्रान्तस्येत्यर्थः ॥ १० ॥ प्रश्नान्तरे प्रत्युत्तरकथनाशक्तिमाह—उपरुध्यन्तीति । उपरुध्यन्ति उपरुध्यन्ते । मरणवेदनया पीड्यन्त इत्यर्थः। सौवर्णान् मरणकालेतथाप्रतीयन्त इतिप्रसिद्धं। उशीरैः लामज्जकैः कृताः कल्पिताः मूर्धजाः केशाः येषांते तथा ॥११॥ किमिह बहुनोक्तेन सर्वथा सीता पुनर्लप्स्यत इत्याह—येनेति । येनमुहूर्तेन निमित्तभूतेन । रावणः सीतामादाय यातिस्म । तन्मुहूर्तबलेन स्वामी धनस्वामी। विप्रनष्टं धनं क्षिप्रं अचिरेण। पुनः प्रतिपद्यते प्राप्नोति ॥ १२ ॥ कोसौ मुहूर्त इत्यत्राह—विन्द इति । नष्टं धनं विन्दति लभतेऽस्मिन्निति विन्दः । स रावणस्तु नाबुधत् नाबुध्यत । विकरणव्यत्ययश्छान्दसः । तस्मात् बडिशं गृह्य गृहीत्वा । झषवत् मत्स्यइव विनश्यति । वर्तमानसामीप्येवर्तमानवत् । "बडिशं मत्स्यवेधनं" इत्यमरः ॥ १३ ॥ फलितमाह—न चेति ॥ १४ ॥ असंमूढस्येति एतावत्पर्यन्तमिति शेषः। अनुभाषतः उत्तरं भाषमाणस्य।

ति० यमपराधंदृष्ट्वातु प्रियासीताहृता सोपराधस्तस्यमयाकिंकृतः अपितुन । अतः किं निमित्तं हृदि यस्यसआर्याजहार ॥ ५ ॥ स० कानि किंप्रकाराणि ॥ शि० चन्द्रसंकाशंचन्द्रस्यापिप्रकाशकं ॥ ६ ॥ शि० अनन्तरं अन्तररहितं निरन्तरमित्यर्थः । विलपन्तं विविधंपृच्छन्तं ॥ ८ ॥ ती० येनमुहूर्तेन यस्मिन्मुहूर्ते रावणस्सीतामादाययातः असौमुहूर्तो विन्दोनाम । तत्रनष्टं धनं पुनरायास्यति । तदेतत्सरावणोनाबुधत् नाबुध्यत । सीतामोहितत्वात् । विन्दतेऽनेन नष्टंधनमिति विन्दः । विद्लृलाभे इतिधातुः । सचैकादशोमुहूर्तः । मुहूर्तलक्षणंतूक्तंपुराणे—"रौद्रःश्वेतश्चमैत्रश्चतथासारभटःस्मृतः । सावित्रोवैश्वदेवश्चगान्धर्वः कुतपस्तथा । रौहिणस्तिलकश्चैवविजयोनैर्ऋतस्तथा । शंबरोवारुणश्चैवभगःपञ्चदशःस्मृतः" इति । एते अह्निमुहूर्ताः । अत्रविजयस्यैवनामान्तरंविन्दइतिज्ञेयं । यद्वा विन्दः घटिका । नकेवलंमुहूर्तमहिम्नासीतारूपेष्टप्राप्तिः । अपित्वनिष्टरूपरावणविनाशोपीत्याह । विनश्यति सीतापहर्तेतिशेषः ॥ १२—१३ ॥ ति० असंमूढस्य मृतिकालेप्यभ्रान्तस्य ॥ १५ ॥

[पा०] १ क. झ. ट. मुद्वीक्ष्यस. २ ङ.—ट. धर्मात्मा. ३ ख. च. छ. ज. ञ. मनाथवत्. ४ ख. घ.—ट. राममिदं वचनमब्रवीत्. ५ घ. च. ज.—ट. साहृता. ६ ङ. झ. ट. दुरात्मना. ७ ङ. झ. क्लान्तस्य. ८ क. ख. ग. ङ.—ट. निशाचरः. ९ क. ख. ग. ङ.—ट. दक्षिणामुखः. १० क. ख. ग. ङ.—ट. याति. ११ क. ग. ङ. छ.—ट. मुहूर्तोसौ. १२ ङ. झ. ट. नचकाकुत्स्थसोबुधत्. १३ ग. झ. वैदेह्यां. १४ ख. मोक्ष्यसे. १५ ङ. झ. ट. रणमूर्धनि. च. छ. ज. ञ. रावणंरणे.

पुत्रो विश्रवसः साक्षाद्भ्राता वैश्रवणस्य च ॥ इत्युक्त्वा दुर्लभान्प्राणान्मुमोच पतगेश्वरः ॥ १६ ॥
ब्रूहि ब्रूहीति रामस्य ब्रुवाणस्य कृताञ्जलेः ॥ त्यक्त्वा शरीरं गृध्रस्य जग्मुः प्राणा विहायसम् ॥१७॥
स निक्षिप्य शिरो भूमौ प्रसार्य चरणौ तदा ॥ विक्षिप्य च शरीरं स्वं पपात धरणीतले ॥ १८ ॥
तं गृध्रं प्रेक्ष्य ताम्राक्षं गतासुमचलोपमम् ॥ रामः सुबहुभिर्दुःखैर्दीनः सौमित्रिमब्रवीत् ॥ १९ ॥
बहूनि रक्षसां वासे वर्षाणि वसता सुखम् ॥ [पक्षिराजेन वृद्धेन तातमित्रेण नस्सुखम्] ॥
अनेन दण्डकारण्ये विशीर्णमिह पक्षिणा ॥ २० ॥
अनेकवार्षिको यस्तु चिरकालसमुत्थितः ॥ सोयमद्य हतः शेते कालो हि दुरतिक्रमः ॥ २१ ॥
पश्य लक्ष्मण गृध्रोऽयमुपकारी हतश्च मे ॥ सीतामभ्यवपन्नो वै रावणेन बलीयसा ॥ २२ ॥
गृध्रराज्यं परित्यज्य पितृपैतामहं महत् ॥ मम हेतोरयं प्राणान्मुमोच पतगेश्वरः ॥ २३ ॥
सर्वत्र खलु दृश्यन्ते साधवो धर्मचारिणः ॥ शूराः शरण्याः सौमित्रे तिर्यग्योनिगतेष्वपि ॥२४॥
सीताहरणजं दुःखं न मे सौम्य तथागतम् ॥ यथा विनाशो गृध्रस्य मत्कृते च परंतप ॥ २५ ॥
राजा दशरथः श्रीमान्यथा मम महायशाः ॥ पूजनीयश्च मान्यश्च तथाऽयं पतगेश्वरः ॥ २६ ॥

सामिषं मांससहितं रुधिरं ॥ १५ ॥ अथ रावणवंशं वक्तुमुपक्रमते—पुत्र इति । साक्षात्पुत्रः औरस इत्यर्थः । अस्योत्तरार्धं "अध्यास्ते नगरीं लङ्कां रावणो राक्षसेश्वरः" इति बोध्यम् । उत्तरत्र संपातिवचने इदमेव पूर्वार्धमुपादाय अस्योत्तरार्धस्य कथनादिति लोकाचार्योक्तम् । इत्युक्त्वा एतावन्मात्रमुक्त्वा । भवनादिकथनात्पूर्वमित्यर्थः । दुर्लभान् मूर्छिमूर्छीति पृच्छते रामाय साकल्येन विज्ञापनपर्यन्तं प्राणा न स्थिताः हन्तेति ऋषिःशोचति ॥ १६ ॥ ब्रुवाणस्य ब्रुवाणे सति । प्राणः सूक्ष्मशरीरेन्द्रियप्राणसहित आलेत्यर्थः ॥ १७ ॥ निक्षिप्य मरणवेदनयेति भावः । विक्षिप्य विधूय । पपातेत्युक्तिरौपचारिकी ॥ १८ ॥ ताम्राक्षं अधःशिरस्कतया पतनजक्षोभात् ॥ १९ ॥ रक्षसां वासे दण्डकारण्ये । बहूनिवर्षाणि निर्भयतया सुखं वसताऽनेन पक्षिणा विशीर्णं देहविशरणं प्राप्तं इहैवसुखं वसित्वा इहैव मृतमनेनेति भावः । विचीर्णमिति पाठे अत्रैव वसता अनेन अत्रैव सुखं विचीर्णं अनुभूतमित्यर्थः ॥ २० ॥ एतदेव विवृणोति—अनेकेति । अनेकवार्षिकः बहुवयःप्राप्तः । चिरकालमभ्युदयं प्राप्तः ॥२१॥ पश्येति । अनेन मोक्षप्रदानोचितं तदीयसुकृतविशेषं दर्शयति । सीतामभ्यवपन्नो मे उपकारी सन्हतः ॥ २२ ॥ गृध्रराज्यं परित्यज्येति प्राण्याभासपरित्याग उक्तः । महदिति स्वकीयेक्ष्वाकुराज्यव्यावृत्तिः । एकमुखत्वात् । ममेत्यादिना उपायानुष्ठानोक्तिः । पतगेश्वरः पितुर्मरणात् इतःपरमस्य पक्षानाश्रित्य सुखं स्थास्यामीति स्थितोहं अयं तातवन्मत्कृते प्राणत्यागं कृतवानिति भावः ॥ २३ ॥ सर्वत्रेति सर्वजातिष्वपीत्यर्थः । तिर्यग्योनिगतस्यास्य कथमेतादृशीबुद्धिरिति नमन्तव्यमितिभावः ॥ २४ ॥ मत्कृते च मत्कृत एव । यथाऽस्य विनाशःप्राप्तः तथा सीताहरणजं दुःखं नागतं न प्राप्तं । अत्र विनाशशब्देन तज्जं दुःखमुच्यते ॥ २५ ॥ अथ संस्कारयोग्यतामाह—राजेति । पूजनीयः पैतृकविधिना अर्चनी-

सी० ननु रावणहतस्यजटायोरेतावन्तंकालंप्राणधारणंकथमितिचेत् तस्मात्सीतायाअनुग्रहवशादित्यनुसन्धेयं । उक्तंचस्कान्दे—"देवीमाप्राहराजेन्द्रयावत्संभाषणंमम । भवतस्तावदासन्मे प्राणाहृत्याहृजानकी ।" इति ॥ १८ ॥ ति० सीतामभ्यवपन्नः सीतामोचयितुंप्रवृत्तः ॥ २२ ॥ ति० सीताहरणजदुःखाद्गृध्रविनाशजंदुःखमधिकमितिभावः । तस्याः पुनःप्राप्तिसंभावनासत्त्वादस्यतदभावाच्चेतितात्पर्यं ॥ २५ ॥

[पा०] १ क. च. छ. ज. ञ. ट. प्राणाजग्मुः. २ क. ख. ग. ङ.—ट. तथा. ३ क. ख. ग. विनिक्षिप्य. ४ इदमर्धं घ. पाठेदृश्यते. ५ क. वार्षिकोवीरधिरकालसमुद्भिमान्. ६ च. छ. ज. ञ. मभ्यवपन्नोयं. ङ. ञ. ट. मभ्यवपन्नोहि. घ. मभ्यवपन्नोवै.

सौमित्रे हर काष्ठानि निर्मथिष्यामि पावकम् ॥ गृध्रराजं दिधक्षामि मत्कृते निधनं गतम् ॥ २७ ॥
नाथं पतगलोकस्य चितामारोप्य राघव ॥ इमं धक्ष्यामि सौमित्रे हतं रौद्रेण रक्षसा ॥ २८ ॥
या गतिर्यज्ञशीलानामाहिताग्नेश्च या गतिः ॥ अपरावर्तिनां या च या च भूमिप्रदायिनाम् ॥२९॥

यः । मान्यः श्लाघ्यः ॥ २६ ॥ दिधक्षामि दग्धुमिच्छामि । दहेस्सन्नन्तात् धत्वभप्भावौ ॥ २७ ॥ चितां काष्ठभारं ॥ २८ ॥ या गतिरित्यादिश्लोकद्वयमेकान्वयं । गम्यत इति गतिः लोकः । यज्ञशीलानां यज्ञाः शीलं सद्वृत्तं येषां ते तथा सदायज्ञानुष्ठानपराणांगृहस्थानामित्यर्थः । आहिताः परितःस्थापिताः अग्नयः पञ्चाग्नयो यस्य सतथा सर्वदातपःशीलस्य वानप्रस्थस्येत्यर्थः । अग्न्याधानस्य पूर्वेणैव सिद्धत्वात् पृथक्फलाभावाच्च । अपरावर्तिनां "अरण्यमियात्ततो नपुनरेयात्" इत्युक्तानांसंन्यासिनामित्यर्थः । रणादपलायितानामित्यर्थवर्णने जटायोस्तादृशत्वेन तत्फलस्य स्वतःसिद्धत्वेनानुज्ञातव्यत्वाभावात् । मुक्तानां धर्मप्रकरणे उक्त्यसंभवात् । भूमिप्रदायिनां भूमिभोगत्यागिनां नैष्ठिकानामित्यर्थः । ता गतीरिति यत्तदोर्नित्यसंबन्धात्सिद्धम् । ता गतीः "प्राजापत्यं गृहस्थानां ब्राह्मं संन्यासिनां स्मृतं" इत्याद्युक्तस्थानानि । यद्वा यज्ञदानतपःसंन्यासिनामित्यर्थः । तेषां या या गतिः शास्त्रविहिता तां मया संस्कृतो व्रज । मया समनुज्ञातस्तु अनुत्तमान् सर्वश्रेष्ठान् । लोकान् "अथ यदतः परोदिवो ज्योतिर्दीप्यते विश्वतःपृष्ठेषु सर्वतःपृष्ठेष्वनुत्तमेषूत्तमेषु" इत्यादिश्रुतिप्रसिद्धान्विष्णुलोकान् गच्छ अवयवबहुत्वाद्बहुवचनं । अन्यथा गतिशब्देन पौनरुक्त्यमनन्वयश्च । समनुज्ञातःसंस्कृतश्चेति पदद्वयानर्थक्यं च । ननु मानुषभावंभावयतः श्रीरामस्य कथं मुक्तिप्रदानं तस्यपरत्वासाधारणचिह्नत्वादिति चेत् "सत्येनलोकाञ्जयति" इत्युक्तरीत्या स्वार्जितधर्मविशेषेण स्वाधीनसर्वलोकत्वाविरोधात् । केचित्तु मया संस्कृतस्ततोऽनुज्ञातस्त्वं यज्ञशीलादीनां या गतयः ताँल्लोकान्गच्छ सर्वान्ते मांव्रज । "सोश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता" इत्युक्तरीत्या मुक्तभोगं प्राप्नुहि । न च निर्हेतुकमुक्तिप्रदानेतिप्रसङ्गः स्वकार्यमुद्दिश्य प्राणत्यागस्यैव हेतुत्वात् । अतएव नृसिंहपुराणे "मत्कृतेनिधनंयस्मात्त्वया प्राप्तं द्विजोत्तम । तस्मान्मम प्रसादेन विष्णुलोकमवाप्स्यसि" इत्युक्तं ।

ति० दिधक्ष्यामि सद्गतिसिद्धये ॥२७॥ तनि० गम्यतइतिगतिर्लोकः । तिरश्चांकर्माधिकाराभावेप्यकृतसंस्काराणां परलोकाभावात्त्वं मयासंस्कृतस्सन् मदनुज्ञयैव अनुत्तमान् लोकान् गच्छ । अपरावर्तिनां पुनरावृत्तिरहितानां मुक्तानामित्यर्थः । "नसपुनरावर्तते" इति श्रुतेः । लोकानितिपूजायांबहुवचनं । यद्वा विश्वतःपृष्ठेषुसर्वतःपृष्ठेष्वनुत्तमेषूत्तमेष्वित्यत्र परमव्योमस्थितावान्तरलोकापेक्षयाबहुवचननिर्देशवदत्रापि बहुवचननिर्देशः । यज्ञशीलानां यज्ञशीलादिलोकमार्गेणापरावर्तिनां लोकंप्राप्नुहीत्यर्थः । तथा च नृसिंहपुराणे—'मत्कृतेमरणंयस्मात्' इत्यादि । ननु भगवतारामेण तिरश्चोगतायुषः संस्कारकरणंकथमितिचेत् 'नशूद्राभगवद्भक्ताः' इत्यत्र शूद्रशब्दस्योपलक्षणार्थत्वाद्भगवद्भक्तानांसर्वप्राणिनांमोक्षाधिकारस्यगम्यमानत्वाच्च युक्तमेवेदमितिज्ञेयं । नन्वेवंसति जटायुषोमोक्षप्रदत्वाद्रामस्यपरमात्मत्वंप्रतीयते । 'त्वंगतिः परमादेव' इत्यादिना बालकाण्डे 'सहिदेवैरुदीर्णस्य' इत्यादिना युद्धकाण्डे 'सीतालक्ष्मीर्भवान्विष्णुः' इत्यादिना श्रीभागवते च श्रीरामस्यपरमात्मत्वंस्फुटमुक्तं । एवं समस्तकल्याणगुणाकरस्य श्रीमन्नारायणस्य रावणादिवधरूपलोकहितार्थं स्वयमेवदशरथभवनेऽवतीर्णस्य सीतामुद्दिश्यविलापःकथमितिचेत् सत्यं । तथापि नदोषः । 'व्यसनेषुमनुष्याणांभृशंभवतिदुःखितः ।—निश्चिताऽपि हिमेबुद्धिर्वनवासेदृढव्रता । भरतस्नेहसंतप्ता बालिशीक्रियते पुनः । सीताहरणजंदुःखं नमेसौम्यतथागतम् । यथाविनाशोगृध्रस्य मत्कृतेचपरंतप ।' इत्यनेनप्रकारेण सर्वेश्वरस्याप्याश्रितवत्सलत्वात् दुःखितानाश्रितानाकलय्य दुःखेनस्वयमपिदुःखितइवभाति तेषांदुःखमपनयतिचेति ऋषेरभिप्रायइतिवेदितव्यं । शुकादयस्तु 'मर्त्यावतारस्त्विहमर्त्यशिक्षणं रक्षोवधायैवनकेवलविभोः' इत्यादिप्रकारेण श्रीरामस्यदुःखाभावमेववर्णयन्ति । एवमन्यत्राप्येवंविधविषयेपरिहारोद्रष्टव्यः ॥ ति० अपरावर्तिनां । संग्रामेइतिशेषः । गम्यतइतिगतिर्लोकः । यज्ञशीलानांलोकाक्रमेणप्राप्य मदनुज्ञातस्सन् अनुत्तमान् येभ्यः परेउत्तमानसन्ति तांल्लोकान् ब्रह्मणो लोकान् क्रममुक्तिदान् गच्छ । अनेन संकल्पमात्रात्कर्मानधिकृततिरश्चः साधनहीनस्यापि तल्लोकदानेन भगवान्रामः स्वस्वरूपांशेमाययावृतज्ञानइतिप्रलपतांमुखंध्वस्तं । शोकादितु नटनमित्युक्तमेवासकृत् । तदुक्तं—"संस्कारमकरोत्तस्य रामोब्रह्मविधानतः । स्वपदंचददौतस्मै सोपिरामप्रसादतः । हरेस्सामान्यरूपेण प्रययौपरमंपदम् ।' इतिजटायुषंप्रक्रम्य पाद्मे । एतेन तिरश्चामपिस्नेहादिना दाहादियुक्तमितिध्वनितं ।

[पा०] १ क. घ. हिधक्ष्यामि. २ घ. देहंपतगराजस्य. ३ क. ख. ग. चितामारोपयाम्यहं. च. छ. झ. ञ. ट. चितिमारोपयाम्यहं.

मया त्वं समनुज्ञातो गच्छ लोकाननुत्तमान् ॥ गृध्रराज महासत्त्व संस्कृतश्च मया व्रज ॥ ३० ॥
एवमुक्त्वा चितां दीप्तामारोप्य पतगेश्वरम् ॥ ददाह रामो धर्मात्मा स्वबन्धुमिव दुःखितः ॥ ३१ ॥
रामोथ सहसौमित्रिर्विनं गत्वा स वीर्यवान् ॥ स्थूलान्हत्वा महारोहीननु तस्तार तं द्विजम् ॥३२॥
रोहिमांसानि चोत्कृत्य पेशीकृत्य महायशाः ॥ शकुनाय ददौ रामो रम्ये हरितशाद्वले ॥ ३३ ॥
यत्तत्प्रेतस्य मर्त्यस्य कथयन्ति द्विजातयः ॥ तत्स्वर्गगमनं तस्य पित्र्यं रामो जजाप ह ॥ ३४ ॥
ततो गोदावरीं गत्वा नदीं नरवरात्मजौ ॥ उदकं चक्रतुस्तस्मै गृध्रराजाय तावुभौ ॥ ३५ ॥
शास्त्रदृष्टेन विधिना जलेले गृध्राय राघवौ ॥ स्नात्वा तौ गृध्रराजाय उदकं चक्रतुस्तदा ॥ ३६ ॥

"कर्मणैवहिसंसिद्धिमास्थिता जनकादयः" इतिहि कर्मणोपि मुक्तिहेतुत्वमुक्तं । "नान्यः पन्थाः" इति श्रुतिः परमात्मनोऽन्यत्र साक्षान्मुक्तिहेतुत्वं निषेधति। तस्यैवप्राधान्येन प्रकृतत्वादित्याहुः । यद्वा हे गृध्रराज महासत्त्व मया संस्कृतस्त्वं मयानुज्ञातो भूत्वा अनुत्तमांल्लोकान् महोकानित्यर्थः । गच्छ आनुषङ्गिकतया यज्ञशीलादीनां या या गतयस्ता अपि गच्छ । गम्यत इति गतिः लोकः । आहिताग्नेः गार्हपत्याहवनीयदक्षिणाग्निनिरतस्य । या गतिः "अग्नयो वै त्रयीविद्या" इत्यारभ्य "तस्मादग्नीन्परमंवदन्ति" इत्याहिताग्नित्वस्यापि पृथग्धर्मत्वभवणात् । अपरावर्तिनां युद्धादपरावर्तमानानां । या गतिः दृष्टान्तार्थमिदमुक्तं । जटायोस्तादृशत्वेन तत्फलस्येदानीमदेयत्वात् । तिरश्चां यज्ञाद्यधिकाराभावेन तत्फलमात्रस्य देयत्वात् । यथाऽपरावर्तिनां गतिं प्राप्स्यसि तथा यज्ञशीलादीनां लोकानपि । ब्रह्मप्राप्तौ वसुत्वादिकमिव प्राप्नुहीत्यर्थः । अस्मिन्कल्पे भूमिप्रदायिनामित्यस्य प्रतीयमानार्थकत्वमेव । व्रज एवं गच्छ । यद्वा मया प्रथमं संस्कृतः अथ " तृतीयेन ज्योतिषा संविशस्व" इत्यादिमन्त्रेणानुज्ञातो मया त्वं यज्ञाधिकारिणां लोकान् गच्छ । ब्रह्ममेधसंस्कारबलेन प्राप्नुहीत्यर्थः । इदं च फलं संस्कारोत्तरक्षण एवानुतिष्ठतीत्युच्यते । संस्कृतो व्रजेति । गृध्रराज महासत्त्व संस्कृतश्च महाव्रतेति पाठे संस्कृतश्च भवेति वार्थः ॥ २९—३० ॥ दीप्तां दीपनार्हां । स्वबन्धुमिवेत्यनेन मन्त्रपूर्वकत्वं दाहस्योच्यते ॥ ३१ ॥ महारोहीन् महामृगान् । तं द्विजमनु जटायुषमुद्दिश्य । हत्वा तस्तार पिण्डदानार्थं दर्भानास्तृतवान् ॥३२॥ उत्कृत्य उद्धृत्य । पेशीकृत्यपिण्डीकृत्य । हरितशाद्वले नवीनतृणास्तृतप्रदेशे । शकुनाय पक्षिणे । ददौ ॥ ३३ ॥ प्रेतस्य मर्त्यस्य मनुष्यस्य । यत्तत् प्रसिद्धं मन्त्रजातं । स्वर्गगमनं स्वर्गोगम्यतेनेनेति स्वर्गगमनं स्वर्गप्रापकं वदन्ति । पित्र्यं पितृदेवताकं । तज्जजाप यान्यसूक्तादिकं जजापेत्यर्थः ॥३४॥ चक्रतुरिति लक्ष्मणस्यकर्तृत्वं सहकारितया । उदकं उदकदानमित्यर्थः ॥३५॥ उक्तस्यैवार्थस्यस्नानपूर्वकत्वविधिपूर्वकत्वप्रदर्शनायपुनरप्याह—शास्त्रेति । तदा तौराघवौ शास्त्रदृष्टेन विधिना गृध्राय गृध्रमुद्दिश्य । जलेलात्वा गृध्रराजायोदकं चक्रतुरित्यन्वयः । अयमत्र क्रमः । गृध्रराजंदग्ध्वा स्वर्गगमनसूक्तंजप्त्वा गोदावरींगत्वा स्नात्वा उदकंदत्त्वा रोहिमांसपिण्डंदत्तवानिति। ननु वैदिकोत्तमोरामः कथंहीनजातितिर्यञ्चं वैदिकेन कर्मणासंस्कृतवान् । मैवं । तस्यात्यन्तभक्तत्वेन जातेरपगमात् । "न शूद्रा भगवद्भक्ता विप्रा भागवताः स्मृताः । सर्ववर्णेषु ते शूद्रा ये ह्यभक्ता जनार्दने" इत्युक्तेः । न चेदं वचनं "अपशवोवाअन्येगोअश्वेभ्यः" इतिवत्प्रशंसापरमितिवक्तुंशक्यं । बाधकाभावात् । ब्राह्मणत्वादिजातिर्हिशास्त्रैकसमधिगम्या नतु गोत्वादिवदाकृतिगम्या । येन तत्तुल्यत्वमाशङ्क्येत । अतएव विश्वामित्रस्यापि क्षत्रियत्वजातिरपनीता उपनीताचब्राह्मणत्वजातिरित्युपपादितं बालकाण्डे । अयमर्थ उपपादयिष्यतेच श्रमणीवृत्तान्ते । इदंच द्रौपदीविवाहादिवदैतिहासिकविलक्षणव्यक्तिविशेषनियतमितिच

साक्ष्यमुक्तिलाभश्चोक्तः । मया मन्त्रेण सामान्यहरिरूपेण ॥ २९ ॥ ३० ॥ शि० जलं जलाशयं । प्राप्येतिशेषः ॥ ३६ ॥

[पा०] १ घ. द्विज. २ क—ट. रामोपि. ३ क. ख. ग. ङ.—ञ. मात्वा. ४ ख. हत्वाऽपरान्रोहीननु. ५ क. ख. ङ.—ट. पेशीकृत्वा. ६ क. ख. शकुनीनां. ७ घ. छ. ज. झ. मन्त्रेच. ८ घ. छ. ज. झ. क्षिप्रंयाम्यसूक्तंजजापह. ङ. ञ. ट. क्षिप्रंतस्यरामो. ९ क. ख. ग. तथा. १० क. ङ.—ञ. ट. जलं.

स गृध्रराजः कृतवान्यशस्करं सुदुष्करं कर्म रणे निपातितः ॥
महर्षिकल्पेन च संस्कृतस्तदा जगाम पुण्यां गतिमात्मनः शुभाम् ॥ ३७ ॥
कृतोदकौ तावपि पक्षिसत्तमे स्थिरां च बुद्धिं प्रणिधाय जग्मतुः ॥
प्रवेश्य सीताधिगमे ततो मनो वनं सुरेन्द्राविव विष्णुवासवौ ॥ ३८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे अष्टषष्टितमः सर्गः ॥ ६८ ॥

एकोनसप्ततितमः सर्गः ॥ ६९ ॥

अटायुषेजळदानानन्तरं सुदूरमेकैकतदिग्भागंगताभ्यां रामलक्ष्मणाभ्यां मध्येवनं कबन्धोभिद्राक्षसा निरीक्षणं ॥ १ ॥ लक्ष्मणेनायोमुखीतिस्वनामनिर्देशपूर्वकं भोगायाहूतेनोपगूहनोद्यतायास्तस्याः सव्यकर्णमासच्छेदः ॥ २ ॥ दुश्शकुनदर्शनेनानिष्टसंभावनया सावधानंचरन्तौरामवाभ्यां कबन्धसदृक्षशरीरतयाकबन्धनाम्नोमहाराक्षसस्य निरीक्षणम् ॥ ३ ॥ तेन घोजनायतनिजभुजाभ्यां रामयोर्ग्रहणे भयाद्विषीदतोलक्ष्मणस्य रामेणसमाश्वासनं ॥ ४ ॥ अत्रान्तरे कबन्धेन सौमित्रि वनागमनप्रयोजनादिप्रश्नपूर्वकं स्वेनसयोर्भक्षणप्रतिज्ञाने लक्ष्मणंप्रतिरामेण महतामपिशोकादिहेतुत्वहेतुना कालस्यबलीयस्त्वोक्त्वाशोचनं ॥ ५ ॥

कृत्वैवमुदकं तस्मै प्रस्थितौ रामलक्ष्मणौ ॥ अन्वेषन्तौ वने सीतां पश्चिमां जग्मतुर्दिशम् ॥ १ ॥
तौ दिशं दक्षिणां गत्वा शरचापासिधारिणौ ॥ अविप्रहतमैक्ष्वाकौ पन्थानं प्रतिपेदतुः ॥ २ ॥
गुल्मैर्वृक्षैश्च बहुभिर्लताभिश्च प्रवेष्टितम् ॥ आवृतं सर्वतो दुर्गं गहनं घोरदर्शनम् ॥ ३ ॥
व्यतिक्रम्य तु वेगेन व्यालसिंहनिषेवितम् ॥ सुभीमं तन्महारण्यं व्यतियातौ महाबलौ ॥ ४ ॥

नातिप्रसङ्गावकाशः ॥ ३६ ॥ उक्तमर्थमादरातिशयेनपुनःसंगृह्णाति—सहति। रणे सीतानिमित्तं दुष्करं कर्म प्राणविनाशपर्यन्तंव्यापारं कृतवान्। संगृध्रराजः रावणेननिपातितः महर्षिकल्पेन महर्षितुल्येनरामेण। संस्कृतश्च तदा तदुत्तरक्षणएव। पुण्यांपुण्यफलभूतां। आत्मनः सुखावहांगतिं लोकं जगाम ॥ ३७ ॥ कृतोदकाविति। इदं पिण्डदानस्याप्युपलक्षणं। पक्षिसत्तमे स्थिरां बुद्धिंप्रणिधाय सीतामन्वेष्यं प्राप्स्यसीत्युक्तंतद्वचनं विश्वस्येत्यर्थः। सीताधिगमेमनः प्रवेश्य वनं जग्मतुः। सुरेन्द्रौविष्णुवासवाविव स्थितावित्यनेन सीतान्वेषणंभावनामात्रमितिसूच्यते। अस्मिन्सर्गे सार्धाष्टत्रिंशच्छ्लोकाः ॥ ३८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने अष्टषष्टितमः सर्गः ॥ ६८ ॥

अथायोमुखीविरूपकरणपूर्वकं कबन्धदर्शनमेकोनसप्ततितमे। अन्वेषन्तौ अन्वेषमाणौ। पश्चिमां दक्षिणपश्चिमामित्यर्थः ॥ १ ॥ दक्षिणांदिशमिति दक्षिणपश्चिमाद्वयभयथा व्यवहर्तुशक्या। अविप्रहतं अक्षुण्णं। ऐक्ष्वाकौ। "दाण्डिनायन—" इत्यादिसूत्रेनिपातितः। प्रतिपेदतुः प्रतिपेदाते ॥ २ ॥ गुल्मैरित्यादिश्लोकद्वयमेकान्वयं। गुल्मैः कीचकप्रभृतिभिः वृक्षैश्च। प्रवेष्टितं लताभिश्चावृतं। दुर्गं विषमं। गहनं दुष्प्रवेशं। घोरदर्शनं अतएव सुभीमं तत् महारण्यं दण्डकारण्यं। व्यतिक्रम्य

स० महर्षीणां ब्रह्मादीनां कल्पेन कल्पपादपवद्विद्यमानेन ॥ ३७ ॥ ती० सर्गश्रवणफलस्कान्दे—"जटायोःसंस्कृतिंश्रुत्वास्वर्लोकंयातिमानवः ॥" इति ॥ ३८ ॥ इत्यष्टषष्टितमसर्गः ॥ ६८ ॥

शि० अन्वेषन्तौ अन्वेषन्तौ॥१॥ शि० पश्चिमांदक्षिणां पश्चिमदक्षिणदिगन्तराळदिशंजग्मतुः। तांदिशंगत्वा अविप्रहतं जनै-

[पा०] १ छ. ज. मात्मनस्तदा. २ घ. तदा. ३ क.—ट. राघवौतदा. ४ क. च. छ. ज. ञ. अन्वेषन्तौ. ५ क.—ट. जग्मतुःपश्चिमांदिशं. ६ ट. पश्चिमांदक्षिणांगत्वा. झ. ञ. तांदिशं. ७ क. ग. घ. छ. ज. दक्षिणांगृह्य. घ. पश्चिमांगत्वा. ८ क. घ. च. छ. ज. ञ. पन्थानंप्रतिजग्मतुः. ग. पन्थानमभिजग्मतुः. ९ च. छ. ज. ञ. अतिक्रम्य. १० क. ख. ग. ङ.—ट. गृहीत्वादक्षिणांदिशं.

ततः परं जनस्थानात्त्रिक्रोशं गम्य राघवौ ॥ क्रौञ्चारण्यं विविशतुर्गहनं तौ महौजसौ ॥ ५ ॥
नानामेघघनप्रख्यं प्रहृष्टमिव सर्वतः ॥ नानापक्षिगणैर्जुष्टं नानाव्यालमृगैर्युतम् ॥ ६ ॥
दिदृक्षमाणौ वैदेहीं तद्वनं तौ विचिक्यतुः ॥ तत्रतत्रावतिष्ठन्तौ सीताहरणकर्शितौ ॥ ७ ॥
ततः पूर्वेण तौ गत्वा त्रिक्रोशं भ्रातरौ तदा ॥ क्रौञ्चारण्यमतिक्रम्य मतङ्गाश्रममन्तरे ॥ ८ ॥
दृष्ट्वा तु तद्वनं घोरं बहुभीममृगद्विजम् ॥ नानासत्त्वसमाकीर्णं सर्वं गहनपादपम् ॥ ९ ॥
ददृशाते तु तौ तत्र दरीं दशरथात्मजौ ॥ पातालसमगम्भीरां तमसा नित्यसंवृताम् ॥ १० ॥
आसाद्य तौ नरव्याघ्रौ दर्यास्तस्याविदूरतः ॥ ददृशाते महारूपां राक्षसीं विकृताननाम् ॥ ११ ॥
भयदामल्पसत्त्वानां बीभत्सां रौद्रदर्शनाम् ॥ लम्बोदरीं तीक्ष्णदंष्ट्रां करालां परुषत्वचम् ॥ १२ ॥
भक्षयन्तीं मृगान्भीमान्विकटां मुक्तमूर्धजाम् ॥ प्रैक्षेतां तौ ततस्तत्र भ्रातरौ रामलक्ष्मणौ ॥ १३ ॥
सा समासाद्य तौ वीरौ व्रजन्तं भ्रातुरग्रतः ॥ एहि रंस्यावहेत्युक्त्वा समालम्बत लक्ष्मणम् ॥ १४ ॥
उवाच चैनं वचनं सौमित्रिमुपगुह्य सा ॥ १५ ॥
अहं त्वयोमुखी नाम लाभस्ते त्वमसि प्रियः ॥ नाथ पर्वतकूटेषु नदीनां पुलिनेषु च ॥
आयुःशेषमिमं वीर त्वं मया सह रंस्यसे ॥ १६ ॥
एवमुक्तस्तु कुपितः खड्गमुद्धृत्य लक्ष्मणः ॥ कर्णनासौ स्तनौ चोरुसा निचकर्तारिसूदनः ॥ १७ ॥

अतीत्य व्यतियातौ गतौ॥३-४॥ततःपरं गमनानन्तरं। जनस्थानात् त्रिक्रोशं गम्य गत्वा। क्रौञ्चारण्याख्यं गहनं वनं। विविशतुः। "गहनं काननं वनं" इत्यमरः॥ ५॥ नानेत्यादिश्लोकद्वयमेकान्वयं। नानामेघघनप्रख्यं नानावर्णमेघसमूहसदृशं। प्रहृष्टमिव पुष्पोद्गमादिभिःसन्तुष्टमिव। व्यालमृगैः सर्पैः मृगैश्च। तद्वनं क्रौञ्चारण्यं। तत्रतत्र वृक्षमूले। विश्रान्त्यै तिष्ठन्तौसन्तौ। विचिक्यतुः मृगयामासतुः ॥ ६ ॥ ॥ ७ ॥ तत इत्यादिश्लोकत्रयमेकान्वयं। ततः क्रौञ्चारण्यमतिक्रम्य। मतङ्गाश्रमं पूर्वेण मतङ्गाश्रमपूर्वदिग्भागे। "एनपाद्वितीया" इति द्वितीया। त्रिक्रोशं गत्वा अन्तरे मतङ्गाश्रमक्रौञ्चारण्ययोर्मध्ये। तद्वनं मतङ्गाश्रमसंबन्धि किंचिद्वनं। दृष्ट्वा तत्र दरीं ददृशाते ददृशतुः। अत्रोपरिष्टाच्च कर्तरिलिडित्यालनेपदमार्षं ॥ ८—१० ॥ तस्याविदूरत इत्यार्षःसन्धिः। महारूपां महाशरीरां ॥ ११ ॥ सामान्यतो दर्शनमुक्त्वा विशेषतो दर्शनमाह—भाभ्यां ॥१२—१३॥ रंस्यावहेत्युक्त्वेत्यत्र सन्धिरार्षः। समालम्बत हस्ते गृहीतवती ॥ १४ ॥ उवाचेत्यर्धं। उपगुह्य आलिङ्ग्य ॥ १५ ॥ अहमित्यादिसार्धश्लोकः। अयोमुखीत्यन्वर्थनामा। इयमुखीत्यपि पाठः। ते लाभः लाभभूता। त्वमपि मम प्रियोसि आयुःशेषमित्यन्तसंयोगेद्वितीया ॥ १६ ॥ कर्णनासाविति्यत्र एकवद्भावाभाव आर्षः। नासाशब्दस्य पुलिङ्गताचार्षी ॥ १७ ॥

रक्षण्यंपन्थानंप्रतिपेदतुः प्रापतुः। पश्चिमदक्षिणशब्दौभाक्तौ। श्लोकद्वयमेकान्वयि ॥ १—२ ॥ शि० प्रहृष्टमिवसर्वतः वनगतपुष्पविकासादिना तद्वतमृगादिहर्षेणच वनस्यप्रहृष्टत्वव्यपदेशः ॥ ६ ॥ शि० नानासत्त्वानां अनेकविधमृगादीनां समाकीर्णभक्षणायराक्षसादिकर्तृकापक्षेपोयस्मिंस्तत् ॥ ९ ॥ ति० कर्णनासस्तनमितिसमाहारद्वन्द्वः। कर्णनासे प्राण्यङ्गत्वाद्द्वैकवद्भावः ॥१७॥

[पा०] १ ख. जनस्थानंहित्वावेगेनराघवौ. २ घ. छ. ज. ञ. महाजवौ. ३ क. ख. ग. ङ.—ट. नानावर्णैःशुभैःपुष्पैर्नगपक्षिगणैर्युतं. ४ क. विचेरतुः. ५ क. ख. ग. ङ—ट. दुःखितौ. ६ क. घ. छ. ज. गम्य. ७ घ. व्यंव्यतिक्रम्य. ८ ख. घ. ञ. मन्तरा. ९ घ. छ. ज. ञ. दृष्ट्वाथ. १० ङ. ञ. नानावृक्षसमाकीर्णं. च. छ. नानासत्त्वमृगाकीर्णं. ११ क. ख. ट. गिरौतत्र. क. चतौतत्र. १२ क. ख. ङ.—ट. आसाद्यच. १३ क.—ट. ददर्शतुर्महा. १४ क.—घ. विकृतेक्षणां. १५ क.—ट. करालीं. १६ क. ञ. ट. अवैक्षेतांतुतौतत्र. १७ क.—घ. घ. छ. ज. ञ. तदातत्र. १८ क. चैनंसौमित्रिमुपगूह्यमहौजसं. १९ क. ञ. ट. सुपगूह्यच. ख. ग. घ. छ. सुपगूह्यसा. २० ख. नात्रालब्धोमे. २१ क. ख. ग. ङ.—ट. पर्वतदुर्गेषु. २२ क.—घ. आयुःशिष्टमिदं. ङ.—ट. आयुश्चिरमिदं. २३ ख. सुरम्य. क. सुतूह्य. २४ क. ख. कर्णनासे. ङ. ञ. ण, ट. कर्णनासस्तनं. २५ क.—ट. तस्याः. २६ ट. सचकर्तारि. २७ च. छ. ज, मर्दनः.

कर्णनासे निकृत्ते तु विस्वरं सा विनद्य च ॥ यथागतं प्रदुद्राव राक्षसी भीमदर्शना ॥ १८ ॥
तस्यां गतायां गहनं विशन्तौ वनमोजसा ॥ आसेदतुरमित्रघ्नौ भ्रातरौ रामलक्ष्मणौ ॥ १९ ॥
लक्ष्मणस्तु महातेजाः सत्त्ववाञ्छीलवाञ्शुचिः ॥ अब्रवीत्प्राञ्जलिर्वाक्यं भ्रातरं दीप्ततेजसम् ॥२०॥
स्पन्दते मे दृढं बाहुरुद्विग्नमिव मे मनः ॥ प्रायशश्चाप्यनिष्टानि निमित्तान्युपलक्षये ॥ २१ ॥
तस्मात्सज्जीभवार्यं त्वं कुरुष्व वचनं हितम् ॥ ममैव हि निमित्तानि सद्यः शंसन्ति संभ्रमम् ॥२२॥
एष वञ्जुलको नाम पक्षी परमदारुणः ॥ आवयोर्विजयं युद्धे शंसन्निव विनर्दति ॥ २३ ॥
तयोरन्वेषतोरेवं सर्वं तद्वनमोजसा ॥ संजज्ञे विपुलः शब्दः प्रभञ्जन्निव तद्वनम् ॥ २४ ॥
संवेष्टितमिवात्यर्थं गगनं मातरिश्वना ॥ वनस्य तस्य शब्दोऽभूद्दिवमापूरयन्निव ॥ २५ ॥
तं शब्दं काङ्क्षमाणस्तु रामः कक्षे सहानुजः ॥ ददर्श सुमहाकायं राक्षसं विपुलोरसम् ॥ २६ ॥
आसेदतुस्ततस्तत्र तावुभौ प्रमुखे स्थितम् ॥ विवृद्धमशिरोग्रीवं कबन्धमुदरेमुखम् ॥ २७ ॥
रोमभिर्निचितैस्तीक्ष्णैर्महागिरिमिवोच्छ्रितम् ॥ नीलमेघनिभं रौद्रं मेघस्तनितनिःस्वनम् ॥ २८ ॥
अग्निज्वालानिकाशेन ललाटस्थेन दीप्यता ॥ महापक्ष्मेण पिङ्गेन विपुलेनायतेन च ॥ २९ ॥
एकेनोरसि घोरेण नयनेनाशुदर्शिना ॥ महादंष्ट्रोपपन्नं तं लेलिहानं महामुखम् ॥ ३० ॥

कर्णेति एकबद्भावे सप्तमी ॥ १८ ॥ गहनं दुष्प्रवेशं । वनं विशन्तौ वनमध्यं गच्छन्तौ । आसेदतुः वक्ष्यमाणनिमित्तानीति शेषः ॥ १९ ॥ महातेजा इत्यादीनतोक्तिः । सत्त्ववान् निर्मलमनस्कः । शीलवान् सद्वृत्तवान् । शुचिः कायशुद्धियुक्तः । एभिर्विशेषणैर्भ्रातृभक्तिरुक्ता ॥ २० ॥ बाहुः बामइतिशेषः । उद्विग्नं कम्पितं । अनिष्टानि अनिष्टसूचकानि ॥२१॥ मम वचनमित्यन्वयः । संभ्रमं भयं ॥ २२ ॥ वञ्जुलकः कर्णबालाख्यःपक्षिविशेषः । "वञ्जुलः कर्णबालः स्यात्" इतिनिघण्टुः । विनर्दति कूजति ॥ २३ ॥ एवं एतादृशोक्तिपूर्वकं । अन्वेषतोः अन्वेषमाणयोः । प्रभञ्जन् प्रभञ्जयन् ॥ २४ ॥ मातरिश्वना वायुना । संवेष्टितं पूरितं । अयमुत्पातविशेषः । शब्दः पूर्वोक्तः । तस्य वनस्य संबन्धिनी । दिवं आकाशं । आपूरयन्निवाभूत् ॥ २५ ॥ तं काङ्क्षमाणः किमस्योत्पत्तिमूलमिति ज्ञातुमिच्छन् । सहेति शेषः । कक्षे गुल्मे । ददर्श दूरादितिशेषः ॥ २६ ॥ आसेदतुरित्यादिसार्धपद्यश्लोकौ । प्रमुखे अग्रे । विवृद्धं उन्नतं । अशिरोग्रीवं । अदृश्यमानशिरोग्रीवं । अतएव कबन्धं अन्वर्थकबन्धनामकं । उदरेमुखं "अमूर्धमस्तकात्स्वाङ्गादकामे" इति लुक् । रोमभिरुपलक्षितं निचितैः निबिडैः । अग्निज्वालानिकाशेन तत्सदृशेन । महापक्ष्मेण महापक्ष्मणा । अदन्तत्वमार्षं । विपुलेन विस्तीर्णेन । आयतेन दीर्घेण । उरसि उरोन्तर्गतशिरस्कत्वेन उरसिदृश्यमानेनेत्यर्थः । लेलिहानं पुनःपुनर्जिह्वयालेहनं कुर्वन्तं महामुखं विपुलास्यरन्ध्रं । विकुर्वाणं व्यापारयन्तं । योजनमिति अध्ववाचित्वादत्यन्तसंयोगे द्वितीया । आकर्षन्तं आभिमुख्येन कर्षन्तं । विकर्षन्तं । विशेषेण कर्षन्तं मृगयूथपानिति मृगविशेषणं । प्रपन्नयोः समीपंप्राप्तयोः

शि० मेममबाहुः बाहुद्वयं स्पन्दतेस्फुरति । अतएवमेमनः उद्विग्नमिव उद्विग्नसदृशं । सदृशमित्युक्त्या वस्तुतउद्विग्नत्वाभावस्सूचितः । तेन दक्षिणस्यापिभुजस्यस्फुरणात् यथाकथंचित्प्राप्तस्यविग्रस्य विध्वसोभविष्यतीति निश्चयस्सूचितः । विनिगमनाविरहाद्बाहुशब्देन बाहुद्वयग्रहणं । एकवचनंतु जात्यभिप्रायेण ॥ २१ ॥ ति० एवइति । अनेन युद्धमवश्यंभावि जयश्चेत्युभयंसूचितं ॥ २३ ॥ ति० उच्यमानविशेषणेन ललाटस्थेनैकेननयनेन उरःप्रदेशान्तर्गतशिरस्त्वात् उरसि उरःप्रदेशे

[पा०] १ क. ख. ग. ङ.—ट. विस्वरंविननादसा. २ ङ.—ट घोरदर्शना. ३ क. ख. ग. ट. व्रजन्तौ. ४ ख. ग. लक्ष्मणश्च. ५ ख. ङ. म. सत्त्ववान्. ६ क. ख. ट. मम. ७ क. ममैवच. ८ छ. ज. सदा. ९ ग. विभ्रमं. १० ट. राम. ११ क. घ. ततस्त्वन्वेषतो'. १२ क. ङ. च. छ. झ. ञ. ट. गहनं. १३ ख. गंभीरस्तस्य. १४ क. ख. ङ. झ. ट. वनमापूरयन्निव. १५ क. झ. ट. रामःस्वाङ्गी. क. च. छ. ज. ञ. रामस्तस्थौ. १६ ट. समहाकायं. १७ ख विपुलोदरं. १८ ख. आजग्मतुस्तत्र. ङ. झ. ट. आसेदतुश्चतद्रक्षस्तावुभौ. १९ घ. मिवोन्नतं. २० घ. भीममेघनिभं.

भक्षयन्तं महाघोरानृक्षसिंहमृगद्विपान् ॥ घोरौ भुजौ विकुर्वाणमुभौ योजनमायतौ ॥ ३१ ॥
कराभ्यां विविधान्गृह्य ऋक्षान्पक्षिगणान्मृगान् ॥ आकर्षन्तं विकर्षन्तमनेकान्मृगयूथपान् ॥
स्थितमावृत्य पन्थानं तयोर्भ्रात्रोः प्रपन्नयोः ॥ ३२ ॥
अथ तौ समभिक्रम्य क्रोशमात्रे ददर्शतुः ॥ महान्तं दारुणं भीमं कबन्धं भुजसंवृतम् ॥
कबन्धमिव संस्थानादतिघोरप्रदर्शनम् ॥ ३३ ॥
स महाबाहुरत्यर्थं प्रसार्य विपुलौ भुजौ ॥ जग्राह सहितावेव राघवौ पीडयन्बलात् ॥ ३४ ॥
खड्गिनौ दृढधन्वानौ तिग्मतेजोवपुर्धरौ ॥ भ्रातरौ विवशं प्राप्तौ कृष्यमाणौ महाबलौ ॥ ३५ ॥
तत्र धैर्येण शूरस्तु राघवो नैव विव्यथे ॥ बाल्यादनाश्रयत्वाच्च लक्ष्मणस्त्वतिविव्यथे ॥
उवाच च विषण्णः सन्राघवं राघवानुजः ॥ ३६ ॥
पश्य मां वीर विवशं राक्षसस्य वशं गतम् ॥ मयैकेन विनिर्युक्तः परिमुञ्चस्व राघव ॥
मां हि भूतबलिं दत्त्वा पलायस्व यथासुखम् ॥ ३७ ॥
अधिगन्ताऽसि वैदेहीमचिरेणेति मे मतिः ॥ ३८ ॥
प्रतिलभ्य च काकुत्स्थ पितृपैतामहीं महीम् ॥ तत्र मां राम राज्यस्थः स्मर्तुमर्हसि सर्वदा ॥ ३९ ॥
लक्ष्मणेनैवमुक्तस्तु रामः सौमित्रिमब्रवीत् ॥ मा स्म त्रासं कृथा वीर न हि त्वादृग्विषीदति ॥४०॥

॥ २७—३२ ॥ अथेति सार्धश्लोक एकान्वयः । अथ आसादनानन्तरं । समभिक्रम्य आभिमुख्येनगत्वा । क्रोशमात्रे समीपे । ददर्शतुः ददृशतुः । दारुणं भीमं अतिशयेन भीमं भुजाभ्यां मृगान् संवृणोतीति भुजसंवृतं । संस्थानात् देहस्थित्या । कबन्धमिव सर्वदाऽशिरस्कत्वलक्षणकबन्धवत्स्थितं ॥३३॥ सहितावेव नैकमपि मुक्त्वेत्यर्थः ॥३४॥ तिग्मं खरं तेजो यस्यतत्तथा तादृशवपुर्धरौ विवशं पारवश्यं । प्राप्तौ ॥३५॥ तत्र तस्यामवस्थायां । बाल्यात् बालबुद्धित्वात् । रामवदप्रौढबुद्धित्वादित्यर्थः । अनाश्रयत्वात् धैर्यानालम्बनात् । अतिविव्यथे अत्यन्तं खिन्नोऽभूत् उवाच च ॥३६॥ राक्षसस्य वशं गतत्वेन विवशमिति योजना । विनिर्युक्तः वियुक्तः । एतस्यैवविवरणं मामिति । भूतबलिं भूतस्य कबन्धस्य बलिं ॥३७॥ अधीत्येकार्धं ॥३८॥ तत्र मह्यां ॥३९—

अन्तरुपलभ्यमानेनन्यनेनोपलक्षितंमुखंलेलिहानं ॥ ३० ॥ ति० तिग्मतेजौ तिग्मतेजसौ ॥ ३५ ॥ ति० अनाश्रयात् धैर्यस्येतिशेषः । धैर्यानालंबनादित्यर्थः । तत्रहेतुर्बाल्यं बालबुद्धित्वं । शुद्धसत्त्वाप्रधानत्वं । अनाश्रयत्वादितिपाठे आश्रयभूतस्यरामस्यापि कबन्धभुजावृतत्वादितिभावः ॥ ३६ ॥ ति० निर्युक्तः नियोजितरक्षोबलिस्संस्त्वं किंचित्स्ववशमात्मानंपरिमुञ्चस्व । पलायनेनेतिशेषः ॥ शि० मांभूतबलिंदत्त्वा पिशाचाकारराक्षसायसमर्प्येत्यर्थः । एकेनमयानिर्युक्तः वियुक्तस्त्वं पलायस्व राक्षसमितिशेषः । अतएव यथासुखंपरिमुञ्चस्व । आत्मानमितिशेषः । मांभूतबलिंदत्वेत्यनेनमांप्राप्य संतोषप्राप्त्यापराक्रमाद्राक्षसोनिवर्तिष्यतइति सूचितं । तेन सीतान्वेषणेविलंबोनकार्यइतिध्वनितं । तेन लक्ष्मणस्यसीताविषयकप्रेमातिशयोव्यञ्जितः ॥ ३७ ॥

[पा०] १ ख. च. छ. ज. ञ. रुरुद्विपान्. ङ. झ. ट. मृगद्विजान्. २ ट. विकुर्वन्तमुभौ. ३ घ. गणान्बहून्. ४ च. छ. ज. ञ. ट. तत्समतिक्रम्य. ख. ग. घ. झ. तंसमतिक्रम्य. ५ घ. ङ. छ. झ. ञ. ट. क्रोशमात्रं. ६ च. छ. ज. ञ. भूतं. ७ ङ. झ. ट. सहितावेव. ८ घ.—ट. तिग्मतेजौमहाभुजौ. ख. तिग्मतेजौधनुर्धरौ. ९ ख. च. छ. ज. ञ. ट. तत्रधैर्याच्च. १० झ. दनाश्रयाच्चैव. ११ ख. ञ. ट. स्त्वभिविव्यथे. १२ ङ.—ट. विवशंवीर. १३ क.—घ. च. छ. ज. ञ. मयैकेनतुनिर्युक्तः. १४ प्रतिलभ्यचकाकुत्स्थेतिश्लोकात्परं एतस्मिन्नन्तरे इतिश्लोकात्पूर्वं लक्ष्मणेनैवमुक्तस्त्वितिश्लोकस्यस्थाने क. च. छ. ज. पाठेषु. महिमेत्वत्समोबन्धुः कश्चनानघविद्यते । नमातुश्चममाख्येयोविनाशश्चकथंचन । विषीदत्यतिमात्रंहिप्रियपुत्राहिसान्नृशम् ॥ १ ॥ तंतुसंपन्नयावाचापरितापार्तमातुरम् । आश्वासहेतोर्वचनमिदमाहपरंतपः ॥ २ ॥ पुत्रोदशरथस्यासीद्वितीयोममचानुजः । सप्राकृतइवोदारःकथंनामविषीदति ॥ ३ ॥ मांसराशिमयःपापोरूपमात्रंहिभीषणम् । मासंत्रासंकृथावीरनहित्वादृग्विषीदति ॥ ४ ॥ ततःसत्वानितद्रक्षःक्षुधयाह्यप्रसत्तदा ॥ ५ ॥ खड्गिनौदृढधन्वानौतिग्मबाणौधनुर्धरौ । भ्रातरावरणींप्राप्यकृष्यमाणौददर्शतुः ॥ ६ ॥ महाजगरसंकाशौखड्गरोमभिरावृतौ । तीक्ष्णरोमनखौबाहूपञ्चास्याविवपन्नगौ ॥ ७ ॥ ताभ्यांतुकृष्यमाणौतौबाणपातमिवागतौ । कृच्छ्रेणदूरतस्तस्यतत्रदृष्ट्वाव्यवस्थितौ ॥ ८ ॥ इत्यष्टौश्लोकादृश्यन्ते.

एतस्मिन्नन्तरे क्रूरो भ्रातरौ रामलक्ष्मणौ ॥ पप्रच्छ घननिर्घोषः कबन्धो दानवोत्तमः ॥ ४१ ॥
कौ युवां वृषभस्कन्धौ महाखड्गधनुर्धरौ ॥ घोरं देशमिमं प्राप्तौ मम भक्षावुपस्थितौ ॥ ४२ ॥
वदतं कार्यमिह वां किमर्थं चागतौ युवाम् ॥ इमं देशमनुप्राप्तौ क्षुधार्तस्येह तिष्ठतः ॥ ४३ ॥
सबाणचापखड्गौ च तीक्ष्णशृङ्गाविवर्षभौ ॥ ममास्यमनुसंप्राप्तौ दुर्लभं जीवितं पुनः ॥ ४४ ॥
तस्य तद्वचनं श्रुत्वा कबन्धस्य दुरात्मनः ॥ उवाच लक्ष्मणं रामो मुखेन परिशुष्यता ॥ ४५ ॥
कृच्छ्रात्कृच्छ्रतरं प्राप्य दारुणं सत्यविक्रम ॥ व्यसनं जीवितान्ताय प्राप्तमप्राप्य तां प्रियाम् ॥४६॥
कालस्य सुमहद्वीर्यं सर्वभूतेषु लक्ष्मण ॥ त्वां च मां च नरव्याघ्र व्यसनैः पश्य मोहितौ ॥ ४७ ॥
नातिभारोस्ति दैवस्य सर्वभूतेषु लक्ष्मण ॥ शूराश्च बलवन्तश्च कृतास्त्राश्च रणाजिरे ॥
कालाभिपन्नाः सीदन्ति यथा वालुकसेतवः ॥ ४८ ॥

इति ब्रुवाणो दृढसत्यविक्रमो महायशा दाशरथिः प्रतापवान् ॥
अवेक्ष्य सौमित्रिमुदग्रपौरुषं स्थिरां तदा स्वां मतिमात्मनाऽकरोत् ॥ ४९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकोनसप्ततितमः सर्गः ॥ ६९ ॥

४०॥ एतस्मिन्नन्तरे लक्ष्मणाश्वासनावसरे ॥ ४१ ॥ भक्षौ आहारौ ॥४२॥ इह वने । वां युवयोः । कार्यं वदतं । लोण्मध्यमपुरुषद्विवचनं । वामिह वने किं कार्यं किं कर्तव्यं । किमर्थं कस्य प्रयोजनाय । आगतौ न किमप्यस्त्यत्रवां प्रयोजनं । प्रत्युतास्मत्प्रयोजनमेव सिद्धमित्याह—इममिति । इह तिष्ठतः ममेति शेषः । क्षुधार्तस्य मम संबन्धिनमिमं देशमनुप्राप्तावित्यनेन मम क्षुन्निवृत्त्यर्थमेव वामागमनमिति भावः ॥ ४३ ॥ आगमने आवयोःकाहानिरित्यत्राह—सबाणेति ॥४४॥ मुखेन उपलक्षित इति शेषः ॥ ४५ ॥ कृच्छ्रात्कृच्छ्रतरं राज्यभ्रंशवनवाससीताहरणपर्यन्तं प्राप्यावस्थितयोः पुनश्चतां प्रियामप्राप्यैव आवयोर्जीवितान्ताय दारुणं व्यसनं दुःखं प्राप्तं ॥ ४६ ॥ अत्र हेतुमाह—कालस्येति । सर्वभूतेष्वपि कालस्य वीर्यं सुमहत् अनर्गलमित्यर्थः । त्वां च मां च महाबलपराक्रमावपि व्यसनैर्मोहितौ करोति पश्य ॥ ४७ ॥ उक्तमर्थमुपपादयति—नातीति । सार्धश्लोकएकान्वयः । वालुकसेतवः सिकतामयसेतवः ॥ ४८ ॥ सौमित्रिं दीनमवेक्ष्य स्वांमतिं आत्मनैव स्थिरामकरोत् ॥ ४९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे

शि० दानवोत्तमइत्युक्त्यादनुवंशोद्भवत्वेपिकर्मणाराक्षसत्वादन्यत्रराक्षसत्वोक्तिर्नविरुध्यते ॥ ४१ ॥ शि० जीवितान्ताय अवध्यतिक्रमणहेतुकायोध्यावासिजीवनविध्वंसाय व्यसनं राक्षसग्रहजनितदुःखं प्राप्तम् ॥ ४६ ॥ ती० सर्ववाक्यंसावधारणं इतिन्यायेनात्रैवकारोद्रष्टव्यः । अस्यार्थः—सर्वभूतेषुमध्ये कालस्यैवसुमहद्वीर्यं । अस्तीतिशेषः । कुतः त्वांत्वादृशं । मांमादृशंच । व्यसनैः कालकृतैरितिशेषः । मोहितौपश्येत्यर्थः ॥ ४७ ॥ ती० नातीति । दैवस्यकालस्यसर्वभूतेषुविषये । यद्वा सर्वभूतेषु सर्वभूतानां संहारइतिशेषः । नातिभारोस्ति नप्रयाससाध्यइत्यर्थः । कुतः । शूराश्चेति । समहाबाहुरित्यारभ्य ' तत्रमांराम राज्यस्थः ' इत्यन्तस्यवास्तवार्थेऽयमर्थः । सकबन्धस्तौजग्राहयद्यपि । तथापि तौविवशं । विवेतिनिपातौपादपूरणार्थौ । शंसुखंप्राप्तौ । यद्वा विवशं वे पक्षिणःगरुत्मतः वशंप्राप्तौ गरुडारूढावित्यर्थः । तौसजग्राहेतिपूर्वेणसंबन्धः । तत्र लक्ष्मणस्यमनुष्यनाट्यं दर्शयति—तत्रेति । तुइवार्थे । अभिविव्यधइव ॥ कृच्छ्रात्कृच्छ्रतरमित्यादेर्वास्तवार्थस्तु दारुणंकृच्छ्रतरंप्राप्यापि तांप्रियामप्राप्य जीवितान्ताय व्यसनंप्राप्तमित्यादि लोकरीतिमनुसृत्य सीतादर्शनव्याजेनोक्तिः ॥ ४८ ॥ इत्येकोनसप्ततितमः सर्गः ॥ ६९ ॥

[पा०] १ एतस्मिन्नन्तरेइतिश्लोकस्यस्थाने ख. पाठे. ततःपिपासाविक्षिप्तः क्षुधयानिभृतस्तदा । विक्षिप्तांसबाहुभ्यांमृगैः सहमहावने । भ्रातरौनिकटंप्राप्य कृष्यमाणौददर्शह । तावुवाचमहाबाहुःकबन्धोदानवोत्तमः । इतिश्लोकादृश्यते. २ क.—ट. तावुवाचमहाबाहुः. ३ घ. मनुप्राप्तौ. ४ क. झ. ट. दैवेनममचाक्षुषौ. ५ च. छ. ज. चागतावुभौ. ६ घ. च. छ. ज. ञ. सचापबाणखड्गौच. ख. ट. सचापबाणखड्गेन. ७ क. झ. मांतूर्णमनुसंप्राप्तौ. ८ क. झ. ट. जीवितंहिवां. ९ च. छ. ज. महात्मनः. १० क. झ. ञ. नहिभारोस्ति. ११ च. छ. ज. ञ. महारणे. १२ क. ख. ग. कालावपन्नाः. १३ घ. महारथो. १४ ख. ग. च. छ. ज. मुदारविक्रमं. क. झ. ञ. मुदारविक्रमः.

सप्ततितमः सर्गः ॥ ७० ॥

लक्ष्मणेनरामंप्रतिकबन्धस्यप्रतियोधनाक्षमतयामारणाकरणेनभुजच्छेदनमात्रस्यकर्तव्यत्वोक्तिः ॥ १ ॥ तद्वचनश्राविणाकबन्धेनतयोर्भक्षणोद्यमेताभ्यांतद्भुजयोश्छेदनं ॥२॥ ततोभुविपतितेनतेन तौप्रतितत्तत्वप्रश्ने लक्ष्मणेनतंप्रतिसीताहरणान्तनिजवृत्तान्तकथनपूर्वकं तत्स्वरूपप्रश्नेनसहकबन्धसादृश्यप्राप्तिकारणप्रश्नः ॥ ३ ॥

तौ तु तत्र स्थितौ दृष्ट्वा भ्रातरौ रामलक्ष्मणौ ॥ बाहुपाशपरिक्षिप्तौ कबन्धो वाक्यमब्रवीत् ॥ १ ॥
तिष्ठतः किंनु मां दृष्ट्वा क्षुधार्तं क्षत्रियर्षभौ ॥ आहारार्थं तु संदिष्टौ दैवेन गतचेतसौ ॥ २ ॥
तच्छ्रुत्वा लक्ष्मणो वाक्यं प्राप्तकालं हितं तदा ॥ उवाचार्तिं समापन्नो विक्रमे कृतलक्षणः ॥ ३ ॥
त्वां च मां च पुरा तूर्णमादत्ते राक्षसाधमः ॥ तस्मादसिभ्यामस्याशु बाहू छिन्दावहै गुरू ॥ ४ ॥
भीषणोयं महाकायो राक्षसो भुजविक्रमः ॥ लोकं ह्यतिजितं कृत्वा ह्यावां हन्तुमिहेच्छति ॥ ५ ॥
निश्चेष्टानां वधो राजन्कुत्सितो जगतीपतेः ॥ क्रतुमध्योपनीतानां पशूनामिव राघव ॥ ६ ॥
एतत्सञ्जल्पितं श्रुत्वा तयोः क्रुद्धस्तु राक्षसः ॥ विदार्यास्यं तदा रौद्रस्तौ भक्षयितुमारभत् ॥ ७ ॥
ततस्तौ देशकालज्ञौ खड्गाभ्यामेव राघवौ ॥ अच्छिन्दतां सुसंहृष्टौ बाहू तस्यांसदेशतः ॥ ८ ॥
दक्षिणो दक्षिणं बाहुमसक्तमसिना ततः ॥ चिच्छेद रामो वेगेन सव्यं वीरस्तु लक्ष्मणः ॥ ९ ॥

रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकोनसप्ततितमः सर्गः ॥ ६९ ॥

अथ कबन्धस्य बाहुच्छेदेन पूर्वजन्मस्मृतिरुच्यते सप्ततितमे । परिक्षिप्तौ परिवेष्टितौ ॥ १ ॥ क्षुधार्तं मांदृष्ट्वा भीतौ किंनुतिष्ठतः व्यर्थमेव नतुजीवितापत्परिहारइत्यर्थः । यतो गतचेतसौयुवां मे दैवेनाहारार्थं संदिष्टौ ॥ २ ॥ कृतलक्षणः कृतोद्योगः ॥ ३ ॥ पुरा आदत्ते आदास्यतीत्यर्थः ॥ ४ ॥ भुजयोरेव विक्रमो यस्य स तथा । लोकं जनं । अतिजितं अत्यन्तजितं ॥ ५ ॥ भुजच्छेदनमात्रंकर्तव्यंनतुमारणमित्याह— निश्चेष्टानामिति । निश्चेष्टानां प्रतीकाराशक्तानां । जगतीपतेः क्षत्रियस्य । क्रतुमध्योपनीतानां निश्चेष्टानामित्यस्मिन्नर्थे प्रयुक्तं । "पर्यग्निकृतानारण्यानुत्सृजन्त्यहिंसायै" इत्युक्तरीत्या अश्वमेधक्रतावुपनीतानामारण्यपशूनां वधः कुत्सित एव ॥ ६ ॥ तयोरेतत् संजल्पितं श्रुत्वा भक्षयितुमारभत् हस्ताभ्यामाकृष्टवानित्यर्थः ॥ ७ ॥ सुसंहृष्टौ कदलीकाण्डवत्सुखच्छेदनादिति भावः ॥ ८ ॥ दक्षिणः समर्थः । असक्तं अप्रतिबन्धं यथाभवतितथा । रामदक्षिणपार्श्वेगमनं लक्ष्मणस्य । अत उभयोर्दक्षिणसव्यपार्श्वप्राप्तिः ॥९॥

ती० वस्तुतस्तु—हेक्षत्रियर्षभौ युवांदैवेनाहारार्थंसंदिष्टौकिं । ममेतिशेषः । गतचेतसौकिं तादृशौनभवतः । अतः क्षुधार्तं मांदृष्ट्वा किंतिष्ठतः । गच्छतमितिशेषः । इत्यब्रवीदितिपूर्वेणसंबन्धः । शि० क्षुधार्तंमांदृष्ट्वादैवेनाहारार्थंसंदिष्टौ । अतःकिमर्थंतिष्ठतः ॥ २ ॥ ती० अस्यहननमेवयुक्तमित्याकांक्षायामाह—निश्चेष्टानामिति । निश्चेष्टानां अकृतविक्रमाणां । वधः कुत्सितः अयुक्तइत्यर्थः । क्रतुमध्यापनीतानां क्रतुमध्यादन्यत्रनीतानां । क्रतुबाह्यानां क्रत्वनङ्गभूतानामितियावत् ॥ ति० क्रतुमध्यंप्राप्तानां पशूनांवधइव । सयथास्वर्गफलदोपि शास्त्रविहितोपि कुत्सितः । साङ्ख्यपातञ्जलाद्युक्तरीत्या धर्मजनकत्वाल्लोकदृष्ट्याचकुत्सितः । एतेन तद्वधस्यापीषत्पापफलदता सूचिता । केचित्तु क्रतुमध्यापनीतानामितिपाठं श्रद्धाजाड्येनकल्पयित्वा क्रतुमध्यादन्यत्रनीतानामितिव्याचक्षते ॥ स० क्रतुमध्योपनीतानां पशूनांवधः कलिकाले प्रायस्तद्विधानाज्ञत्वाल्लोकानांयथाकुत्सितः पिष्टपशोरेवहिंस्यत्वेन भारताद्युक्तेः । अथवा क्रतुमध्ये तद्धननाक्लृप्तदिने ॥ ६ ॥ ति० दक्षिणः समर्थः दक्षिणपार्श्वस्थोवा ॥ ९ ॥

[पा०] १ क. सतौतत्र. २ ख. ङ. झ. ट. स्थितो. ३ ङ. तिष्ठतं. ४ ङ. झ. हतचेतसौ. च. ट. हतचेतनौ. घ. छ. ज. गतचेतनौ. ५ घ. ङ. झ. ट. कृतनिश्चयः. ६ ख. ग. महाबाहूराक्षसो. ७ ख. ह्यपजितं. ८ ख. ग. घ. च. छ. ज. ञ. जगतीपते. ९ क. क्रुद्धस्स. १० ख. ततौरौद्रः. ग. ङ—ट. ततोरौद्रंतं. ११ ट. तुसंहृष्टौ. १२ ख. ग. ङ.—ट. देशयोः. १३ च. छ. ज. धीरस्तु.

स पपात महाबाहुश्छिन्नबाहुर्महास्वनः ॥ खं च गां च दिशश्चैव नादयञ्जलदो यथा ॥ १० ॥
स निकृत्तौ भुजौ दृष्ट्वा शोणितौघपरिप्लुतः ॥ दीनः पप्रच्छ तौ वीरौ कौ युवामिति दानवः ॥११॥
इति तस्य ब्रुवाणस्य लक्ष्मणः शुभलक्षणः ॥ शशंस राघवं तस्य कबन्धस्य महात्मनः ॥ १२ ॥
अयमिक्ष्वाकुदायादो रामो नाम जनैः श्रुतः ॥ अस्यैवावरजं विद्धि भ्रातरं मां च लक्ष्मणम् ॥१३॥
[मात्रा प्रतिहृते राज्ये रामः प्रव्राजितो वनम् ॥ मया सह चरत्येष भार्यया च महद्वनम्] ॥१४॥
अस्य देवप्रभावस्य वसतो विजने वने ॥ राक्षसाऽपहृता पत्नी यामिच्छन्ताविहागतौ ॥ १५ ॥
त्वं तु को वा किमर्थं वा कबन्धसदृशो वने ॥ आस्येनोरसि दीप्तेन भग्नजङ्घो विवेष्टसे ॥ १६ ॥
एवमुक्तः कबन्धस्तु लक्ष्मणेनोत्तरं वचः ॥ उवाच परमप्रीतस्तदिन्द्रवचनं स्मरन् ॥ १७ ॥
स्वागतं वां नरव्याघ्रौ दिष्ट्या पश्यामि चाप्यहम् ॥ दिष्ट्या चेमौ निकृत्तौ मे युवाभ्यां बाहुबन्धनौ ॥१८॥
विरूपं यच्च मे रूपं प्राप्तं ह्यविनयाद्यथा ॥ तन्मे शृणु नरव्याघ्र तत्त्वतः शंसतस्तव ॥ १९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

एकसप्ततितमः सर्गः ॥ ७१ ॥

कबन्धेनश्रीरामंप्रति सामस्त्येनमिजवृत्तान्तनिवेदनपूर्वकं कुत्सितमिजराक्षसशरीरदाहेसति विज्ञानप्रतिबन्धकशापनिवृत्त्यामिजरूपप्राप्तौ सीतान्वेषणसहकारिणो निवेदनप्रतिज्ञानम् ॥ १ ॥

पुरा राम महाबाहो महाबलपराक्रम ॥ रूपमासीन्ममाचिन्त्यं त्रिषु लोकेषु विश्रुतम् ॥
यथा सोमस्य शक्रस्य सूर्यस्य च यथा वपुः ॥ १ ॥
सोहं रूपमिदं कृत्वा लोकवित्रासनं महत् ॥ ऋषीन्वनगतान्राम त्रासयामि ततस्ततः ॥ २ ॥

गां भूमिं ॥ १० ॥ पूर्वमदत्तोत्तरत्वात्पुनः प्रश्नः ॥११॥ क्रियाभेदात्पुनस्तच्छब्दः ॥ १२ ॥ इक्ष्वाकुदायादः दशरथपुत्रः । "दायादौ सुतबान्धवौ" इत्यमरः ॥१३—१४॥ इच्छन्तौ अन्वेषमाणावित्यर्थः ॥१५॥ विवेष्टसे लुठसीति यावत् ॥ १६ ॥ प्रीतः शापमोक्षकालप्रत्यभिज्ञानात् । तदिन्द्रवचनं उत्तरसर्गप्रतिपाद्यं ॥ १७ ॥ बाह्वोर्बन्धनं ययोस्तौ बाहुबन्धनौ अंसावित्यर्थः ॥ १८ ॥ विरूपं विषमरूपं । यथा येनकारणेन । प्राप्तं तत्कारणं तत्त्वतस्तव शंसतो मे सकाशाच्छृणु । अस्मिन्सर्गे अष्टादश श्लोकाः ॥१९॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्ततितमः सर्गः ॥ ७० ॥

अथ कबन्धः स्ववृत्तान्तकथनपूर्वकं स्वशापमोक्षाय स्वशरीरदहनमर्थयते एकसप्ततितमे । पुरेत्यादिसार्धश्लोक एकान्वयः । अचिन्त्यं अचिन्त्यवैभवं ॥१॥ सोहमिति । सुन्दररूपोहं । रूपं शरीरं लोकवित्रासनं क्रूरं ।

शि० इति ब्रुवाणस्यकबन्धस्यसमीपे तस्यरामस्यप्रेरितोलक्ष्मणः काकुत्स्थंरामंशशंस ॥ १२ ॥ स० यां सीतां । इच्छन्तौ आवां ॥ १५ ॥ ति० यथाऽविनयात्यादृशाविनयात्प्राप्तंतच्छृण्वित्यन्वयः ॥ १९ ॥ इतिसप्ततितमः सर्गः ॥ ७० ॥

स० अचिन्त्यं अचिन्त्यमिव । सोमस्यचन्द्रस्य । रुद्रस्येत्यप्यर्थः । यथातेषांवपुः तथाममापिरूपमासीदितिपूर्वेणसंबन्धः ॥ १ ॥ सोहंएतादृशोप्यहं लोकवित्रासनं इदंरूपं राक्षसरूपं वैभवेनकृत्वा ऋषींस्त्रासयामीतिसंबन्धः ॥ २ ॥

[पा०] १ घ. सन्निकृत्तौ. २ क. ख. ग. ङ.—ट. तस्यकाकुत्स्थंकबन्धस्यमहाबलः ३ ङ. झ. ञ. ट. तस्यैवावरजं. ४ अयंश्लोकः घ.—ट. पाठेषुदृश्यते. ५ ख. ङ.—ट. भार्या. ६ ख. ट. विचेष्टसे. ७ ग. च. च. छ. ज. ट. नोत्तमं. ८ ङ.—ठ. वचनंप्रीतः. ९ ङ. झ. ट. वामहं. १० ख. ग. नरश्रेष्ठ. ११ ख. ग. ङ. झ. ठ. पराक्रमं. १२ क. ख. ग. ङ.—ट. सूर्यस्यसोमस्यशक्रस्यच.

ततः स्थूलशिरा नाम महर्षिः कोपितो मया ॥ संचिन्वन्विविधं वन्यं रूपेणानेन धर्षितः ॥ ३ ॥
तेनाहमुक्तः प्रेक्ष्यैवं घोरशापाभिधायिना ॥ एतदेव नृशंसं ते रूपमस्तु विगर्हितम् ॥ ४ ॥
स मया याचितः क्रुद्धः शापस्यान्तो भवेदिति ॥ अभिशापकृतस्येति तेनेदं भाषितं वचः ॥ ५ ॥
यदा छित्त्वा भुजौ रामस्त्वां दहेद्विजने वने ॥ तदा त्वं प्राप्स्यसे रूपं स्वमेव विपुलं शुभम् ॥ ६ ॥
श्रिया विराजितं पुत्रं दनोस्त्वं विद्धि लक्ष्मण ॥ इन्द्रकोपादिदं रूपं प्राप्तमेवं रणाजिरे ॥ ७ ॥
अहं हि तपसोग्रेण पितामहमतोषयम् ॥ दीर्घमायुः स मे प्रादात्ततो मां विभ्रमोस्पृशत् ॥ ८ ॥
दीर्घमायुर्मया प्राप्तं किं मे शक्रः करिष्यति ॥ इत्येवं बुद्धिमास्थाय रणे शक्रमधर्षयम् ॥ ९ ॥
तस्य बाहुप्रमुक्तेन वज्रेण शतपर्वणा ॥ सक्थिनी चैव मूर्धा च शरीरे संप्रवेशितम् ॥ १० ॥
स मया याच्यमानः सन्नानयद्यमसादनम् ॥ पितामहवचः सत्यं तदस्त्विति ममाब्रवीत् ॥ ११ ॥
अनाहारः कथं शक्तो भग्नसक्थिशिरोमुखः ॥ वज्रेणाभिहतः कालं सुदीर्घमपि जीवितुम् ॥ १२ ॥
एवमुक्तस्तु मे शक्रो बाहू योजनमायतौ ॥ प्रादादास्यं च मे क्रुद्धो तीक्ष्णदंष्ट्रमकल्पयत् ॥ १३ ॥
सोहं भुजाभ्यां दीर्घाभ्यां संकृष्यास्मिन्वनेचरान् ॥ सिंहद्विपमृगव्याघ्रान्भक्षयामि समन्ततः ॥१४॥
स तु मामब्रवीदिन्द्रो यदा रामः सलक्ष्मणः ॥ छेत्स्यते समरे बाहू तदा स्वर्गं गमिष्यसि ॥ १५ ॥

कृत्वा परिगृह्य ततस्ततः तत्रतत्र । ऋषीन् त्रासयामि अत्रासयं ॥२॥ विविधं वन्यं संचिन्वन् स्थूलशिराः धर्षितः अपहृतवन्यः । तेन कोपितश्च ॥ ३ ॥ एवंविधं मे रूपं प्रेक्ष्य घोरशापाभिधायिना तेन ऋषिणा नृशंसं गर्हितं एतदेव रूपं ते अस्त्वित्यहमुक्तः ॥ ४ ॥ अभिशापशब्देन तन्निमित्तंधर्षणंलक्ष्यते । मद्धर्षणकृतस्य शापस्यान्तोभवेदिति स मया याचितः प्रार्थितः इति हेतोः तेन मयैवं याचितेन । इदं वक्ष्यमाणं । वचो भाषितं ॥ ५ ॥ तदेवाह—यदेति ॥ ६ ॥ तर्हि कबन्धरूपप्राप्तिः केन हेतुनेत्यत्राह—श्रियेति । मामिति शेषः । एवं एवंविधं । रणाजिरे रणाङ्गणे ॥ ७ ॥ इन्द्रेणयोद्धुंतव कृतःसामर्थ्य तत्राह—अहं हीति । ऋषिदत्तघोराकारप्राप्त्यनन्तरं उग्रेण तपसा पितामहमतोषयं । स्वकुलशत्रोरिन्द्रस्य जयायेत्यर्थः । विभ्रमः अज्ञानं ॥८॥ तदेवाह—दीर्घमिति ॥ ९ ॥ शतपर्वणा शतधारेण । सक्थिनी पृष्ठास्थिफलके शरीरे मध्यदेहे उदरभागे सक्थ्नोः प्रवेशनं उरोभागे मूर्ध्नः प्रवेशनं । संप्रवेशितमित्यत्र " नपुंसकमनपुंसकेन— " इति नपुंसकपरिशेषत्वमेकवद्भावश्च ॥ १० ॥ याच्यमानः मारयेति प्रार्थ्यमानः । यमसादनं नानयत् मृतिं न प्रापितवान् । कुत इत्यत्राह—पितामहेति । तत् पूर्वोक्तं दीर्घायुर्विषयकं पितामहवचः सत्यमस्त्विति मम मह्यं । अब्रवीत् न त्वां मारयामीत्यब्रवीदित्यर्थः ॥११॥ अनाहार इत्यादिश्लोकद्वयमेकान्वयं । अनाहारः सन् सुदीर्घं कालं कथं जीवितुं शक्तः । भग्नसक्थिशिरोमुखत्वमनाहारत्वे हेतुः । बाहू प्रादात् आस्यमकल्पयत् ॥१२–१३॥ संकृष्य आकृष्य ॥१४॥ स मामित्यनेन

स० अभिशापकृतस्य मत्कृतप्रधर्षणादिनिमित्तकस्य शापस्यान्तःपरिहारोभवेदिति । समवायाचितहृल्लेकेपदं । समये शापानन्तरकाले आयाचितोयत्नेनेदंवचोभाषितमित्यन्वयः ॥ ५ ॥ ति० तदाहं विपुलं उत्तमं श्रियाविराजितंरूपंप्राप्स्यसेइति तेनभाषितमितिसंबन्धः । एवंभूतं मांदनोःपुत्रं विद्धीत्यन्वयः । 'श्रियाविराजितंपुत्रंदनुंलंविद्धिलक्ष्मण' इतिपाठान्तरं । तदा श्रियाः श्रीनाम्नोदानवस्य पुत्रं दनुनामानमित्यर्थः ॥ ती० श्रियइति । श्रियः श्रिया विराजितं दनोःपुत्रंविद्धि । यद्वा दनोः दनुवंशजस्य । श्रियः श्रीनाम्नःपुत्रं विद्धि । मामितिशेषः । " दनुर्नामश्रियःपुत्रः शापाद्राक्षसतांगतः " इतिकिष्किन्धाकाण्डे वक्ष्यमाणत्वात् ॥ ७ ॥

[पा०] १ ङ.—ट. इन्द्रशापात्. २ ख. प्रादान्मानोमांचतदाऽस्पृशत्. ३ ख. विमुक्तेन. च. छ. ज. प्रयुक्तेन. ४ ख. शतपर्वणा. ५ ग. ङ.—ट. सक्थिनीचशिरश्चैव. ६ घ. भग्नस्कन्धशिरोधरः. छ. झ. भग्नस्कन्धशिरोमुखः. ७ ख. ङ. झ. ञ. ट. तदाचासंच. ८ घ. च. छ. ज. ञ. समाकृष्यबनेचरान् ङ. झ. ट. संक्षिप्यास्मिन्. ख. विकृष्यास्मिन्. ९ ङ. झ. ञ. ट. सिंहद्वीपि.

अनेन वपुषा राम वनेऽस्मिन्नोजसत्तम ॥ यद्यत्पश्यामि सर्वस्य ग्रहणं साधु रोचये ॥ १६ ॥
अवश्यं ग्रहणं रामो मन्येऽहं समुपैष्यति ॥ इमां बुद्धिं पुरस्कृत्य देहन्यासकृतश्रमः ॥ १७ ॥
स त्वं रामोसि भद्रं ते नाहमन्येन राघव ॥ शक्यो हन्तुं यथातत्त्वमेवमुक्तं महर्षिणा ॥ १८ ॥
अहं हि मतिसाचिव्यं करिष्यामि नरर्षभ ॥ मित्रं चैवोपदेक्ष्यामि युवाभ्यां संस्कृतोऽग्निना ॥ १९ ॥
एवमुक्तस्तु धर्मात्मा दनुना तेन राघवः ॥ इदं जगाद वचनं लक्ष्मणस्योपशृण्वतः ॥ २० ॥
रावणेन हृता भार्या मम सीता यशस्विनी ॥ निष्क्रान्तस्य जनस्थानात्सह भ्रात्रा यथासुखम् ॥ २१ ॥
नाममात्रं तु जानामि न रूपं तस्य रक्षसः ॥ निवासं वा प्रभावं वा वयं तस्य न विद्महे ॥ २२ ॥
शोकार्तानामनाथानामेवं विपरिधावताम् ॥ कारुण्यं सदृशं कर्तुमुपकारे च वर्तताम् ॥ २३ ॥
काष्ठान्योदाय शुष्काणि काले मग्नानि कुञ्जरैः ॥ धक्ष्यामस्त्वां वयं वीर श्वभ्रे महति कल्पिते ॥ २४ ॥
स त्वं सीतां समाचक्ष्व येन वा यत्र वा हृता ॥ कुरु कल्याणमत्यर्थं यदि जानासि तत्त्वतः ॥ २५ ॥
एवमुक्तस्तु रामेण वाक्यं दनुरनुत्तमम् ॥ प्रोवाच कुशलो वक्तुं वक्तारमपि राघवम् ॥ २६ ॥
दिव्यमस्ति न मे ज्ञानं नाभिजानामि मैथिलीम् ॥ यस्तां हरिष्यति तं वक्ष्ये दग्धः स्वं रूपमास्थितः ॥
[योऽभिजानाति तद्रक्षस्तं वक्ष्ये राम तत्परम्] ॥ २७ ॥
अदग्धस्य तु विज्ञातुं शक्तिरस्ति न मे प्रभो ॥ राक्षसं ते महावीर्यं सीता येन हृता तव ॥ २८ ॥
विज्ञानं हि मम ह्यष्टं शापदोषेण राघव ॥ स्वकृतेन मया प्राप्तं रूपं लोकविगर्हितम् ॥ २९ ॥
किंतु यावन्न यात्यस्तं सविता श्रान्तवाहनः ॥ तावन्मामुवटे क्षिप्त्वा दह राम यथाविधि ॥ ३० ॥

बलात्कारो लक्ष्यते ॥ १५ ॥ अनेनवपुषा उपलक्षितोहं यद्यत्पश्यामि तस्यग्रहणंरोचये नत्वभक्ष्यबुद्ध्या किंचित्त्यजामीत्यर्थः ॥ १६ ॥ महर्षिवाक्यविश्वासात् अवश्यं रामो ग्रहणं समुपैष्यतीति मन्ये । इमांबुद्धिंपुरस्कृत्य देहन्यासेकृतश्रमो भवामि विकृतदेहत्यागेकृतोद्योगो भवामि । देहत्यागेकृतबुद्धितया रामोऽवश्यंग्रहणमुपैष्यतीति सर्वंग्रहणंरोचयइतिभावः ॥ १७ ॥ रामस्येयुक्तिमाह—नाहमिति । एवं यथातत्त्वं यथार्थमेव । महर्षिणोक्तं ॥ १८ ॥ मतिसाचिव्यं बुद्धिसाहाय्यं । करिष्यामि । किंच तद्विषये मित्रं चोपदेक्ष्यामि । युवाभ्यामग्निना संस्कृतश्चेद्भवेयं ॥ १९ ॥ दनुना दनुवंश्येन । औपचारिकस्तद्वंश्ये तच्छब्दः ॥ २० ॥ जनस्थानाद्यथासुखं निष्क्रान्तस्य निर्गतस्य मे भार्या हृता ॥ २१ ॥ नाममात्रं तु जानामि आप्तवाक्यादिति शेषः । न विद्महे अहं मत्पुरीजनाश्चेत्यर्थः ॥ २२ ॥ उपकारे परोपकारे । वर्ततां प्रवर्तमानानां । अस्माकं विषये कारुण्यंकर्तुं सदृशं युक्तं ॥ २३ ॥ उपकारमेवाह—काष्ठानीति । कल्पिते सज्जे । श्वभ्रे अवटे ॥ २४ ॥ कल्याणं तत्त्वकथनरूपं ॥ २५ ॥ वक्तारमपिराघवं वक्तुं कुशलः ॥ २६ ॥ मैथिलीं तद्रपहर्तारंचेति द्रष्टव्यं । तर्हि किंवा मतिसाचिव्यं करिष्यसीत्यत्राह—य इति । तर्हि तंवाब्रूहीत्यत्राह—दग्ध इति ॥ २७ ॥ इदमेव व्यतिरेकमुखेनाह—अदग्धस्येति ॥ २८ ॥ कुत इत्यत्राह—विज्ञानं हीति । विज्ञानं अतीन्द्रियविषयकं । स्वकृतेन पापेनेति शेषः ॥ २९ ॥ अवटे श्वभ्रे । यथाविधि यथा

ति० ऋषेरिन्द्रस्यचवाक्यविश्वासात् अवश्यंरामोममहस्तेग्रहणमेष्यतीतिमन्ये मन्यमानस्तिष्ठामि—ममदेहन्यासे देहत्यागेकृतश्रमः कृतयत्नः रामोममहस्तेग्रहणमेष्यतीतिमांबुद्धिंपुरस्कृत्यसर्वंस्वग्रहणंसाधुरोचये । अयमेवरामोभवेदितिबुध्याकिमपिनत्यजामीत्याशयः ॥ १७ ॥ स० मतिसाचिव्यं बुध्यासाहाय्यं ॥ १९ ॥ ति० दनुना दनुनाम्ना ॥ २० ॥ स० 'वयमिति अस्मदो द्वयोश्च' इतिबहुवचनं ॥ २२ ॥ ति० तत्परं दाहात्परं ॥ २७ ॥ इत्येकसप्ततितमःसर्गः ॥ ७१ ॥

[पा०] १ क.—ट. तात. २ ख. त्रघुसत्तम. ३ ख. सर्वत्र. ४ घ. समुपैष्यसि. ५ ख. ग. घ. ङ. ज. मेतदुक्तं. ६ ङ. झ. ठ. लक्ष्मणस्यवपश्यतः. ७ क. ख. ग. सीताममभार्यां. ङ.—ट. भार्यासीताम. ८ ङ.—ट. सुपकारेण. ९ ख. ग. ङ.—ट. न्यानीय. १० ख. ङ. झ. ट. भग्नानिकालेशुष्काणि. ११ घ ङ. झ. ट. धक्ष्यति. १२ इदमर्धं ङ. छ. झ. ञ. ट. पाठेषुदृश्यते. १३ ख. घ. ट. अदग्धस्यहि. १४ ङ.—ट, राक्षसंतु. १५ ङ. झ. ट. महद्भद्रं. घ. परिभ्रष्टं.

दग्धस्त्वयाऽहमवटे न्यायेन रघुनन्दन ॥ वक्ष्यामि तमहं वीर यस्तं ज्ञास्यति राक्षसम् ॥ ३१ ॥
तेन सख्यं च कर्तव्यं न्याय्यवृत्तेन राघव ॥ कल्पयिष्यति ते प्रीतः साहाय्यं लघुविक्रमः ॥ ३२ ॥
न हि तस्यास्त्यविज्ञातं त्रिषु लोकेषु राघव ॥ सर्वान्परिसृतो लोकान्पुराऽसौ कारणान्तरे ॥ ३३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकसप्ततितमः सर्गः ॥ ७१ ॥

द्विसप्ततितमः सर्गः ॥ ७२ ॥

रामलक्ष्मणाभ्यां कबन्धदेहस्यगर्तेचितारोपणपूर्वकमग्निनादहनं ॥ १ ॥ ततश्चितामध्यात्समुत्पत्यमभसिहंसयुक्तविमानमधिरूढेनकबन्धेनरामंप्रतिसुग्रीववृत्तान्तनिवेदनपूर्वकं ऋष्यमूकमेत्यतेनसहसख्यकरणे तेनस्वानुचरवानरैः सीतान्वेषणकरणोक्तिः ॥ २ ॥

एवमुक्तौ तु तौ वीरौ कबन्धेन नरेश्वरौ ॥ गिरिप्रदरमासाद्य पावकं विससर्जतुः ॥ १ ॥
लक्ष्मणस्तु महोल्काभिर्ज्वलिताभिः समन्ततः ॥ चितामादीपयामास सा प्रजज्वाल सर्वतः ॥ २ ॥
तच्छरीरं कबन्धस्य घृतपिण्डोपमं महत् ॥ मेदसा पच्यमानस्य मन्दं दहति पावकः ॥ ३ ॥
स विधूय चितामाशु विधूमोऽग्निरिवोत्थितः ॥ अरजे वाससी बिभ्रन्माल्यं दिव्यं महाबलः ॥४॥
ततश्चिताया वेगेन भास्करो विमलाम्बरः ॥ उत्पपाताशु संहृष्टः सर्वप्रत्यङ्गभूषणः ॥ ५ ॥
विमाने भास्वरे तिष्ठन्हंसयुक्ते यशस्करे ॥ प्रभया च महातेजा दिशो दश विराजयन् ॥ ६ ॥
सोन्तरिक्षगतो रामं कबन्धो वाक्यमब्रवीत् ॥ शृणु राघव तत्त्वेन यथा सीतामवाप्स्यसि ॥ ७ ॥
राम षड्युक्तयो लोके याभिः सर्वं विमृश्यते ॥ ८ ॥
परिमृष्टो दशान्तेन दशाभागेन सेव्यते ॥ दशाभागगतो हीनस्त्वं हि रामः सलक्ष्मणः ॥

सम्यग्दग्धंभवति तथेत्यर्थः ॥ ३० ॥ न्यायेन सम्यक्तेन ॥ ३१ ॥ न्याय्यवृत्तेन नीतिमत्करित्रेण ॥ ३२ ॥ कारणान्तरे भ्रातृविरोधरूपनिमित्तान्तरे । अयं रावणमेव न जानाति सुग्रीवं तु जानाति । किंतु तन्नाम न कथितवान् वाहात्पूर्वकथने कुत्सितशरीरदहनेरामोवैमनस्यं कुर्यादिति । अस्मिन्सर्गे सार्धत्रयस्त्रिंशच्छ्लोकाः ॥ ३३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकसप्ततितमः सर्गः ॥ ७१ ॥

अथ संस्कृतः कबन्धः स्वरूपं प्रत्यापन्नो मित्रमुपदिशति द्विसप्ततितमे । प्रदरं श्वभ्रं । आसाद्य प्रापय्य कबन्धमिति शेषः ॥ १ ॥ महोल्काभिः निर्गतज्वालकाष्ठैः ॥२॥ मेदसा मांसेन । पच्यमानस्य अभिवृद्धस्य कबन्धस्य शरीरं ॥ ३ ॥ अरजे निर्मले । अदन्तत्वमार्ष ॥ ४ ॥ चितायाः उत्पपात । सर्वेषु प्रत्यङ्गेष्वङ्गुल्यादिष्वपि भूषणानि यस्य स तथा ॥ ५ ॥ हंसयुक्त इत्यनेन रामदग्धतया ब्रह्मलोकप्राप्तिः सूच्यते । विराजयन् अभूदिति शेषः ॥ ६ ॥ तत्त्वेन परमार्थतः । शृण्विति वाक्यमब्रवीदिति संबन्धः ॥ ७ ॥ हे राम लोके षड्युक्तयः सन्ति । युक्तयः उपायाः । ते च सन्धिविग्रहयानासनद्वैधीभावसमाश्रयाः । याभिर्युक्तिभिः सर्वं राज्ञां कृत्यं विमृश्यते ताः सन्तीति ॥ ८ ॥ ततः किमित्यपेक्षायां संधिविषयं दर्शयति—

शी० षड्वाक्युक्तयइति । तत्रयुक्तयः प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यभावप्रमाणानि । पार्थसारथिमिश्रैः शास्त्रदीपिकायां युक्तिशब्दस्यप्रमाणपरतयाव्याख्यातत्वात् । अस्यार्थः । हेराम लोके षड्युक्तयः षट्प्रमाणानिसन्ति । याभिःप्रत्यक्षादिभिः सर्वंवस्तु विमृश्यते ज्ञाप्यते ॥ ८ ॥ अत्र सर्वैप्रमाणैः क्षीणःपुरुषः क्षीणेनपुरुषेण सेव्यतइतिफलितार्थः । तत्रान्वयव्यतिरेकमूलं

[पा०] १ ङ. झ. ञ. ट. धीर. २ ङ. झ. ञ. ट. परिवृतो. ३ ख. ङ.—ट. पुरावै. ४ ग, घ. ज. प्रवरं. ५ ङ. दह्यमानस्य. ६ ग. झ. ञ. न्यास्यंदिव्यं. ७ ख. झ. ठ. विरजांबरः. घ. विरजोंबरः. ८ ख. ङ.—ठ. वाक्यंकबन्धोरामं. ९ ख. झ. स्त्वंतु. क. च. छ. ज. ञ. स्त्वंरामसहलक्ष्मणः.

यत्कृते व्यसनं प्राप्तं त्वया दारप्रधर्षणम् ॥ ९ ॥
तदवश्यं त्वया कार्यः स सुहृत्सुहृदां वर ॥ अकृत्वा हि न ते सिद्धिमहं पश्यामि चिन्तयन् ॥१०॥
श्रूयतां राम वक्ष्यामि सुग्रीवो नाम वानरः ॥ भ्रात्रा निरस्तः क्रुद्धेन वालिना शक्रसूनुना ॥ ११ ॥
ऋश्यमूके गिरिवरे पम्पापर्यन्तशोभिते ॥ निवसत्यात्मवान्वीरश्चतुर्भिस्सह वानरैः ॥ १२ ॥
वानरेन्द्रो महावीर्यस्तेजोवानमितप्रभः ॥ सत्यसन्धो विनीतश्च धृतिमान्मतिमान्महान् ॥ १३ ॥
दक्षः प्रगल्भो द्युतिमान्महाबलपराक्रमः ॥ भ्रात्रा विवासितो राम राज्यहेतोर्महाबलः ॥ १४ ॥
स ते सहायो मित्रं च सीतायाः परिमार्गणे ॥ भविष्यति हि ते राम मा च शोके मनः कृथाः ॥१५॥
भवितव्यं हि यच्चापि न तच्छक्यमिहान्यथा ॥ कर्तुमिक्ष्वाकुशार्दूल कालो हि दुरतिक्रमः ॥ १६ ॥
गच्छ शीघ्रमितो राम सुग्रीवं तं महाबलम् ॥ वयस्यं तं कुरु क्षिप्रमितो गत्वाऽद्य राघव ॥
अद्रोहाय समागम्य दीप्यमाने विभावसौ ॥ १७ ॥
सैं च ते नावमन्तव्यः सुग्रीवो वानराधिपः ॥ कृतज्ञः कामरूपी च सहायार्थी च वीर्यवान् ॥१८॥
शक्तौ ह्यप युवां कर्तुं कार्यं तस्य चिकीर्षितम् ॥ कृतार्थो वाऽकृतार्थो वा कृत्यं तव करिष्यति ॥१९॥
स ऋक्षरजसः पुत्रः पम्पामटति शङ्कितः ॥ भास्करस्यौरसः पुत्रो वालिना कृतकिल्बिषः ॥ २० ॥

परिसृष्ट इति । दशा नाम दौस्थ्यरूपावस्था तस्या अन्तः परिपाकः तेन । परिसृष्टः संसृष्टः पुरुषः दशाभागेन दशायाः भागः परिपाककलक्षणोंशो यस्य तेन । सेव्यते संधीयते । अस्तुप्रकृतेकिमायातंतत्राह—दशाभागगत इति । हे राम सलक्ष्मणस्त्वं दशाभागगतः दुर्दशापन्नः । अतएव हीनश्च । कृतः यत्कृते येन कारणेन । दारप्रधर्षणं नाम व्यसनं प्राप्तं तेन त्वं दशाभागगतः ॥ ९ ॥ ततोपि किमित्यत्राह—तदिति । दशाभागेन त्वया सः दशाभागगतःकश्चित् सुहृत् कार्यः । अवश्यमित्यत्र हेतुमाह—अकृत्वेति । सुहृदं अकृत्वा असम्पाद्य । सिद्धिं सीतालाभं । चिन्तयन्नपि न पश्यामि ॥ १० ॥ स पुनः क इत्यपेक्षायामाह । श्रूयतामित्यादिश्लोकद्वयमेकान्वयं ॥ ११—१२ ॥ स च त्वत्सदृशगुणकत्वादृशाभागगतत्वाच्च ते मित्रतामर्हतीत्याह त्रिभिः—वानरेन्द्र इति । तेजोवान् तेजस्वी । द्युतिमान् कान्तिमान् ॥ १३—१५ ॥ शोकापनोदनाय लोकन्यायमाह—भवितव्यमिति श्लोकेन ॥ १६ ॥ गच्छेत्यादिसार्धश्लोक एकान्वयः । इतो गत्वेत्यनुवादः । समागम्य सुग्रीवेणसंयुज्य । अद्रोहाय परस्परद्रोहाभावाय । विभावसौ अग्नौ । दीप्यमाने सति । अग्निसाक्षिकमित्यर्थः । तं सुग्रीवं वयस्यं कुरु ॥ १७ ॥ स च सुग्रीवः ते त्वया । नावमन्तव्यः अयंतिर्यक् किमनेनेति तस्मिन्नावमतिः कार्या । तत्र हेतुमाह—कृतज्ञ इति ॥ १८ ॥ तस्य सुग्रीवस्य । चिकीर्षितं युवां कर्तुं शक्तौ । अतः सः कृतार्थः कृतस्वप्रयोजनः । अकृतार्थः करिष्यमाणस्वप्रयोजनो वा । तव कृत्यं करिष्यति ॥ १९ ॥ स कस्यपुत्रःकुत्रतिष्ठतीत्यत्राह—स इति । सन्धिरार्षः ।

प्रश्नक्षंदर्शयति—दशाभागगतोहीनस्त्वमिति । 'यत्कृतेव्यसनंप्राप्तं त्वयादारप्रधर्षणं' इत्यनुमानंदर्शयति । 'अकृत्वा नहितेसिद्धिमहंपश्यामि चिन्तयन्' इत्यर्थापत्तिंदर्शयति । 'वयस्यंतं कुरुक्षिप्रमितोगत्वाथ राघव' इति शब्दप्रमाणंदर्शयति ॥ ति० परिसृष्टइतिपाठे दशान्तेन दुर्दशापरिपाककालेनार्थाद्भंशितहत्यर्थः ॥ शि० दशा सर्वदंशकेन । अन्तेनकालेन परिसृष्टःवशंप्राप्त पुरुष दशाभागेन दशांशेन दुर्दशयेत्यर्थः । सेव्यतेप्राप्यते । दशान्तेनकालेनहीनः तद्वशत्वानाक्रान्तोपि सलक्ष्मणस्त्वं दशाभागगतः भार्यापहरणेनकुदशांप्राप्तइव । हिरिवार्थे । आर्षयमेतदितितात्पर्यम् ॥ ९ ॥ शि० तेजस्वी प्रतापवान् । अमितप्रभः अनियतबुद्धिविदोषविशिष्टः ॥ १३ ॥ ति० तेदित्यादीनांपुनरुक्तिस्तु रामदुःखेनतस्यापिदुःखितचित्तत्वामदोषाय ॥ १५ ॥

इतिद्विसप्ततितमसर्गः ॥ ७२ ॥

[पा०] १ ग. ङ.—ट. नहितेसिद्धिं. ख. नहितेबुद्धिं. २ ख. संकुद्धोवालिना. ३ घ. ट. तेजसीचामितप्रभः. ख. तेजसाचरविप्रभ. ४ क. ख. ग. ङ.—ट. वीर. ५ ङ. झ. ट. मैंद्रात्मना. ६ क. ख. च.—ट. वीर. ७ क.—ट. नचतेसोवमन्तव्यः. ८ ख. यच. ९ क. ङ. झ. ट. तवकृत्यं.

सन्निधायायुधं क्षिप्रमृश्यमूकालयं कपिम् ॥ कुरु राघव सत्येन वयस्यं वनचारिणम् ॥ २१ ॥
स हि स्थानानि सर्वाणि कार्त्स्न्येन कपिकुञ्जरः ॥ नरमांसाशिनां लोके नैपुण्यादधिगच्छति ॥२२॥
न तस्याविदितं लोके किंचिदस्ति हि राघव ॥ यावत्सूर्यः प्रतपति सहस्रांशुररिन्दम ॥ २३ ॥
स नदीर्विपुलाञ्छैलान्गिरिदुर्गाणि कन्दरान् ॥ अन्वीक्ष्य वानरैः सार्धं पत्नीं तेऽधिगमिष्यति ॥२४॥
वानरांश्च महाकायान्प्रेषयिष्यति राघव ॥ दिशो विचेतुं तां सीतां त्वद्वियोगेन शोचतीम् ॥
स यास्यति वरारोहां निर्मलां रावणालये ॥ २५ ॥

स मेरुशृङ्गाग्रगतामनिन्दितां प्रविश्य पातालतलेऽपि वाऽऽश्रिताम् ॥
प्लवङ्गमानां प्रवरस्तव प्रियां निहत्य रक्षांसि पुनः प्रदास्यति ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे द्विसप्ततितमः सर्गः ॥ ७२ ॥

त्रिसप्ततितमः सर्गः ॥ ७३ ॥

कबन्धेनरामंप्रति मार्गस्थपंपावनादिवर्णनपूर्वकमृश्यमूकमार्गप्रदर्शनं ॥ १ ॥ तथा मार्गेशबर्याश्रमस्यागन्तव्यत्वनिवेदनं ॥ २ ॥ तथामतङ्गमहर्षितपःप्रभावजऋश्यमूकगिरिमहिमातिशयवर्णनपूर्वकं तद्गुहायांसुग्रीवस्यावस्थानकथनं ॥ ३ ॥ रामलक्ष्मणाभ्यांकबन्धंप्रतिनिजलोकगमनाभ्यनुज्ञानं ॥ ४ ॥

निदर्शयित्वा रामाय सीतायाः प्रतिपादने ॥ वाक्यमन्वर्थमर्थज्ञः कबन्धः पुनरब्रवीत् ॥ १ ॥
एष राम शिवः पन्था यत्रैते पुष्पिता द्रुमाः ॥ प्रतीचीं दिशमाश्रित्य प्रकाशन्ते मनोरमाः ॥ २ ॥
जम्बूप्रियालपनसप्लक्षन्यग्रोधतिन्दुकाः ॥ अश्वत्थाः कर्णिकाराश्च चूताश्चान्ये च पादपाः ॥ ३ ॥

ऋक्षरजास्तन्मातेत्याहुः । पम्पामटति तत्तीरे पर्यटति शङ्कितः वालिनिमित्तमिति शेषः । कृतकिल्बिषः कृतवैरः ॥ २० ॥ सख्यं च न केवलमग्निसाक्षिकं किं त्वायुधमपि सन्निधाप्य कर्तव्यमित्याह—सन्निधायेति । सत्येन शपथेन ॥ २१ ॥ नरमांसाशिनां राक्षसानां । अधिगच्छति ज्ञास्यति ॥ २२ ॥ यावत्सूर्यः प्रतपति तावति लोक इत्यन्वयः ॥ २३ ॥ अधिगमिष्यति ज्ञास्यति ॥ २४ ॥ वानरांश्चेति सार्धश्लोकः । शोचतीं शोचन्तीं ॥ २५ ॥ प्रविश्य रक्षांसि निहत्येत्यन्वयः । अनिन्दितामिति सीतायाः शुद्धत्वप्रतिज्ञा ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्विसप्ततितमः सर्गः ॥ ७२ ॥

अथकबन्धः सुग्रीवस्थानमार्गं दर्शयित्वा गत इत्याह त्रिसप्ततितमे । सीतायाः प्रतिपादने प्रापणे निमित्ते निदर्शयित्वा प्रदर्श्य "क्त्वाच च्छन्दसि" इति क्त्वाप्रत्ययः । पूर्वोक्तमुपायमिति शेषः ॥ १ ॥ ऋश्यमूकमार्गं सचिह्नं दर्शयति—एष इति । शिवः शोभनः । शोभनत्वमेवाह —यत्रेति ॥ २ ॥ द्रुमान् विशेषयति सार्धद्वयेन । प्रियालाः धनुःपटाख्या वृक्षाः । प्लक्षाः वटभेदाः । तिन्दुकाः स्फूर्जकाख्या वृक्षाः । धन्वनाः धवाः । नागवृक्षाः नागकेसराः । तिलकाः क्षुरकवृक्षाः

[पा०] १ ङ. झ. ट. कार्त्स्न्येनसर्वाणि. २ क. ख. ग च. छ. ज. ञ. कपिपुङ्गवः. ३ ङ. झ. ट. सहस्रांशुःपरंतप. ४ क. च. ज.—ट. अन्विष्य. ५ क. ख. च. छ. ज. ञ. महाभागान्. ६ ङ. झ. ट. अन्वेष्यति. क. ख. ग. च. छ. ज. ञ. गमिष्यति. ७ ख. ङ. झ. ट. मैथिलीं. ८ च. छ. ञ. चाश्रितां. ९ क. ङ.—ट. प्लवङ्गमानामृषभः. ख. प्लवङ्गमानामधिपः. १० घ. ङ. झ. दर्शयित्वातु. ११ च. छ. ज. गिरेःपन्थाः. घ. पुनःपन्थाः. १२ ङ. च. छ. झ. ञ. ट. पनसान्यग्रोधप्लक्ष. क. ग. पनसाः प्लक्षन्यग्रोध.

धन्वना नागवृक्षाश्च तिलका नक्तमालकाः ॥ नीलाशोकाः कदम्बाश्च करवीराश्च पुष्पिताः ॥
अग्निमुख्या अशोकाश्च सुरक्ताः पारिभद्रकाः ॥ ४ ॥
तानारुह्याथवा भूमौ पातयित्वा च तान्बलात् ॥ फलान्यमृतकल्पानि भक्षयन्तौ गमिष्यथः ॥ ५ ॥
तदतिक्रम्य काकुत्स्थ वनं पुष्पितपादपम् ॥ नन्दनप्रतिमं चान्यत्कुरवो यत्तरा इव ॥ ६ ॥
सर्वकामफला वृक्षाः पादपास्तु मधुस्रवाः ॥ सर्वे च ऋतवस्तत्र वने चैत्ररथे यथा ॥ ७ ॥
फलभारानतास्तत्र महाविटपधारिणः ॥ शोभन्ते सर्वतस्तत्र मेघपर्वतसन्निभाः ॥ ८ ॥
तानारुह्याथवा भूमौ पातयित्वा यथासुखम् ॥ फलान्यमृतकल्पानि लक्ष्मणस्ते प्रदास्यति ॥ ९ ॥
चङ्क्रमन्तौ वरान्देशाञ्शैलाच्छैलं वनाद्वनम् ॥ ततः पुष्करिणीं वीरौ पम्पां नाम गमिष्यथः ॥ १० ॥
अशर्करामविभ्रंशां समतीर्थामशैवलाम् ॥ राम सञ्जातवालूकां कमलोत्पलशालिनीम् ॥ ११ ॥
तत्र हंसाः प्लवाः क्रौञ्चाः कुरराश्चैव राघव ॥ वल्गुस्वना निकूजन्ति पम्पासलिलगोचराः ॥ १२ ॥
नोद्विजन्ते नरान्दृष्ट्वा वधस्याकोविदाः शुभाः ॥ घृतपिण्डोपमान्स्थूलांस्तान्द्विजान्भक्षयिष्यथः ॥ १३ ॥
रोहितांश्चक्रतुण्डांश्च नडमीनांश्च राघव ॥ पम्पायामिषुभिर्मत्स्यांस्तत्र राम वरान्हतान् ॥ १४ ॥

नक्तमालकाः चिरिबिल्वाख्याः । करवीराः प्रतिहासाख्यावृक्षाः । अग्निमुख्याः भल्लातकीवृक्षाः । सुरक्ताः रक्तचन्दनाः । पारिभद्रकाः निम्बाः ॥ ३—४ ॥ पातयित्वा नमयित्वा । तानारुह्य अथवा भूमौ तान् पातयित्वा वेत्यन्वयः ॥ ५ ॥ सद्वनमतिक्रम्य नन्दनप्रतिममन्यद्वनं पश्यतमिति शेषः । उत्तरकुरुसाम्यं सर्वकामसमृद्ध्या ॥६॥ सद्वनं वर्णयति त्रिभिः । मधु पुष्परसं स्रवन्तीति मधुस्रवाः । सर्वैः काम्यमानानि फलानि येषां ते सर्वकामफलाः ऋतवः षट् ऋतवः वसन्तीति शेषः । चैत्ररथे कुबेरोद्याने तत्र वने । महाविटपधारिणः । "विस्तारो विटपोऽस्त्रियां" इत्यमरः । पादपा इत्यनुषङ्गः । तत्र मेघपर्वतसन्निभाः तत्रविद्यमानाः मेघपर्वताइवस्थिताइत्यर्थः ॥ ७—९ ॥ श्लोकद्वयमेकं वाक्यं । चङ्क्रमन्तौ चङ्क्रममाणौ पुनः पुनः गच्छन्तौ । पुष्करिणीं सरसीं । अशर्करां शर्कराराहितां । अविभ्रंशां अशिथिलतटां । समतीर्थां अवतारस्थलेऽतिनिम्नत्वात्यगाधत्वरहितां । सञ्जातवालूकां अपङ्कतया संहतसिकतां दीर्घां आर्षः ॥ १०—११ ॥ प्लवाः मण्डूकाः हंसभेदा वा । कुरराः कौञ्चभेदाः । वल्गुस्वराः रम्यस्वनाः । सलिलगोचराः सलिलचारिणः । गोचरः सञ्चारः ॥ १२ ॥ वधस्याकोविदाः वधमजानानाः । नोद्विजन्ते न बिभ्यति । द्विजा इति शेषः । तानित्यनुवादात् ॥ १३ ॥ रोहितानित्यादिश्लोकद्वयं । रोहितान् पितृप्रियमत्स्यभेदान् । चक्रतुण्डान् चक्रमुखमत्स्यान् । नडमीनान् नडाख्यतृणविशेषस्तम्बसञ्चारशीलान्मत्स्यान् । वरान् श्रेष्ठान् । अयस्तान् अयःशूलाग्रप्रो-

ति० बलात्तान्वृक्षान्भूमौपातयित्वा शाखाशूलाग्रभूमिपर्यन्तंसंनाम्य ॥ ५ ॥ स० उत्तरकुरुवद्वपुष्पितपादपं ॥ शि० चैत्ररथे उत्तराःकुरवइव पादपाः मधुस्रवाः मधुच्युतः सर्वकालफलाश्च सन्तीतिशेषः ॥ सार्धश्लोकएकान्वयी ॥ ६ ॥ ती० सर्वकामफलाः सर्वकामान्कामितान्पदार्थान्फलन्तीतितथा ॥ ७ ॥ शि० इषुभिः बाणाग्रभागैः । निस्त्वक्पक्षान् निर्गतत्वक्फलपरिग्रहणान् । अतएव नष्टकोपिकण्टकोपेतान् । अतएव घृतपिण्डोपमान् अकृशान् । अशुष्कानित्यर्थः । अयस्तान् अयसा महौजाग्रभागगृहीतेन तत्तान्परिपक्वान् यान्भक्ष्यान् मूलफलसमूहान् । तवभक्ष्यायसमायुक्तोलक्ष्मणः तवतुभ्यं संप्रदास्यति तान्स्थूलान्द्विजान् पक्षिणः तान्प्रसिद्धान् वरान्श्रेष्ठान् रोहितादींश्च । हृप्रसिद्धे । भक्षयिष्यथः । सार्धश्लोकत्रयमेकान्वयं ॥ ती० अकृशानेकक-

[पा०] १ ख. अग्निमुख्यास्तथाशोकाश्च. २ ग. अशोकास्तिलमुक्ताश्चसुभद्राःपारिभद्रकाः. ३ घ. चतान्बलात्—क. ङ. सतान्बलात्. ४ क. ङ. भक्षयित्वा. ५ क. ञ्चान्यत्. ङ. ञ. ट. स्वन्यग्. ६ क. च. छ. ङ. ञ. ट. कालफलायत्र. ७ क. ङ. ट. पादपामधुरस्रवाः. ८ ग. घ. च. छ. ज. झ. भारानताश्चैव. ९ च. छ. ज. झ. तरवस्तत्र. १० क. च. छ. ज. झ. महापर्वत. ११ क. ङ. पातयित्वाऽथवा. १२ क. ख. ङ.—ट. शोभितां. घ. मालिनीं. १३ ख. सलिलवासिनः. १४ घ. मयस्याकोविदाः. १५ ङ. ञ. ट. पुरा. १६ ग. ङ.—ट. रोहितांश्चक्रतुण्डांश्च. १७ क. ग. घ. च. छ. ज. ट. नलमीनांश्च. १८ क. मत्स्यान्हत्वाचादत्तवान्वरान्. ख. छ. ज. ञ. मत्स्यान्हत्वाचादायनित्यशः. घ. मत्स्यान्हत्वावारिचरान्वरान्. १९ ख. वराङ्गकान्.

निस्त्वक्पक्षानयस्तप्तानकृशानेककण्टकान् ॥ तव भक्त्या समायुक्तो लक्ष्मणः संप्रदास्यति ॥ १५ ॥
भृशं ते[3] खादतो मत्स्यान्पम्पायाः पुष्पसंचये ॥ पद्मगन्धि शिवं वारि सुखशीतमनामयम् ॥ १६ ॥
उद्धृत्य संततालिप्तं रौप्यस्फाटिकसन्निभम् ॥ असौ पुष्करपर्णेन लक्ष्मणः पाययिष्यति ॥ १७ ॥
स्थूलान्गिरिगुहाशय्यान्वेरोहान्वनचारिणः ॥ अपां लोभादुपावृत्तान्वृषभानिव नर्दतः ॥
रूपान्वितांश्च पम्पायां द्रक्ष्यसि त्वं नरोत्तम ॥ १८ ॥
सायाह्ने विचरन्राम विटपीन्माल्यधारिणः ॥ शीतोदकं च पम्पाया दृष्ट्वा शोकं विहास्यसि ॥ १९ ॥
सुमनोभिश्चितांस्तत्र तिलकाभक्तमालकान् ॥ उत्पलानि च फुल्लानि पङ्कजानि च राघव ॥ २० ॥
न तानि कश्चिन्माल्यानि तत्रारोपयिता नरः ॥ न च वै म्लानतां यान्ति न च शीर्यन्ति राघव ॥ २१ ॥
मतङ्गशिष्यास्तत्रासन्नृषयः शुसमाहिताः ॥ तेषां भाराभितप्तानां वन्यमाहरतां गुरोः ॥ २२ ॥
ये प्रपेतुर्महीं तूर्णं शरीरात्स्वेदबिन्दवः ॥ तानि जातानि माल्यानि मुनीनां तपसा तदा ॥
स्वेदबिन्दुसमुत्थानि न विनश्यन्ति राघव ॥ २३ ॥
तेषामद्यापि तत्रैव दृश्यते परिचारिणी ॥ श्रमणी शबरी नाम काकुत्स्थ चिरजीविनी ॥ २४ ॥
त्वां तु धर्मे स्थिता नित्यं सर्वभूतनमस्कृतम् ॥ दृष्ट्वा देवोपमं राम स्वर्गलोकं गमिष्यति ॥ २५ ॥

ततया पक्वान् । कृशाश्चानेककण्टकाश्च ते न भवन्ति-त्यकृशानेककण्टकाः तान् ॥ १४—१५ ॥ भृशमित्यादिद्वावेकान्वयौ । पुष्पसंचये पुष्पसमूहे वर्तमानं । अतएव सुगन्धि शिवं पापापहं सुखशीतं नातिशीतमित्यर्थः । अनामयं अव्याधिकरमित्यर्थः । एवंभूतं वारि पुष्करपर्णेन पद्मपत्रेण । पम्पाया उद्धृत्य पाययिष्यति ॥ १६—१७ ॥ स्थूलानित्यादिसार्धश्लोक एकान्वयः । गिरिगुहायां शय्या येषां तान् । रूपान्वितान् सौन्दर्यवतः ॥ १८ ॥ विटपीन् विटपिनः । इनिप्रत्ययस्य नलोप आर्षः । माल्यधारिणः पुष्पधारिणः । पुष्पविकासहेतुत्वात्सायाह्न इत्युक्तं ॥ १९ ॥ सुमनोभिः चितान् निरन्तरान् । उत्पलानि इन्दीवराणि । दृष्ट्वा शोकं विहास्यसीत्यत्राप्यनुषज्यते ॥ २० ॥ आरोपयिता गृहीत्वाग्रथिता । वनविस्तारात्पुष्पबाहुल्याच्च तानि म्लानतां न यान्ति । न शीर्यन्ति न शीर्यन्ते । शीर्णदलानि न भवन्तीत्यर्थः । मतङ्गशिष्यप्रभावाद्वाऽनारोपणं ॥ २१ ॥ अग्राह्यत्वाम्लानत्वादौ निमित्तमाह—मतङ्गेति । सार्धश्लोकद्वयमेकान्वयं । मतङ्गोनाम महाप्रभावो महर्षिः । तत्र पम्पातीरे । सुष्ठु समाहितं समाधियेषां ते तथा । वन्यमाहरतां अतएव भाराभितप्तानां । तानीति विधेयापेक्षया नपुंसकत्वं । स्वेदबिन्दुसमुत्थानीति हेतुगर्भविशेषणं । स्वेदबिन्दवो वायुना वृक्षोपरिनीता माल्यानिजाता-नीत्याशयः ॥ २२—२३ ॥ तेषां मतङ्गशिष्याणां । परिचारिणी श्रमणी संन्यासिनी । शबरीतिनाम शबरीतिप्रसिद्धा ॥ २४ ॥ धर्मे गुरुपरिचरणधर्मे ॥ २५ ॥

ष्टकान् कृशाः कृशवत्तीक्ष्णाः अनेककण्टका येषांनविद्यन्ते तेतथोक्ताः ॥ १४—१५ ॥ शि० अनामयंरोगनिवर्तकं ॥ १६ ॥ ति० पीतान् अल्पानंकुर्वतः ॥ १८ ॥ ति० विटपीन् विटपिनः । आर्षमेकत्वं । प्रथमान्तत्वं ॥ १९ ॥ गो० देवोपमं हेदेव उप समीपे मा लक्ष्मीर्यस्यतं विष्णुंलक्षीत्यर्थः ॥ स्वर्गलोकं स्वःगीयतइतिस्वर्गः स्वर्गश्चासौलोकश्च तं वैकुण्ठमित्यर्थः । कृतः नित्यंधर्मे उपासनात्मकेस्थिता । " विधयोदेवलोकः " इतिश्रुतेः ॥ स० " स्वर्गःसुषुप्तिरित्याहुर्यामुक्तेरपिसमा ' इति

[पा०] १ च. छ. ज. ञ. नकृशानेक. २ क. लक्ष्मणस्तवदास्यति. ३ ङ. ज्ञ. ञ. ट. तान्खादतो. ४ क. पुष्पसंयुतं. ५ क. ख. छ. ज. ञ. खादुशीत. ६ क. ख. छ. ज. सितमक्लिष्टं. घ. चतदाक्लिष्टं. ङ. क. ज्ञ. ञ. ट. सतदाक्लिष्टं. ७ ङ. रूपस्फटिक. क. ग.—ट. रूप्यस्फटिक. ८ क.—ट. अथपुष्कर. ९ ग. घ. ट. पत्रेण. १० ङ. ज्ञ. ट. न्वानरान्वनचारिणः. ११ ग. नृषभान्महिषांस्तथा. १२ ग. ङ. ज्ञ. ट. स्थूलान्पीतांश्चपंपायां. १३ क. ख. ग. ङ.—ट. विटपीमाल्य. १४ ङ. ज्ञ. विद्योदकं. १५ ख. ग. ङ.—ट. पंपायां. १६ क. ख. ग. ङ. ज्ञ. ट. सुमनोभिश्चितास्तप्तिलकानक्तमालकाः. १७ च. तत्रगोपयिता. १८ क. ग. खत्रासन्मुनयः. १९ ख. भारावतप्तानां. २० ख. प्रपेतुर्महीरेणौ. २१ क. ख. ग. ङ.—ट. माल्यानिजातानि. २२ ङ. ज्ञ. ञ. ट. तेषांतस्तानामद्यापिदृश्यते. २३ च. छ. ज. धर्मेस्थिता. २४ ख. लोकनमस्कृतं. २५ ग. देवलोकं.

[1]ततस्तद्राम पम्पायास्तीरमा[2]श्रित्य पश्चिमम् ॥ आश्रमस्थानमतुलं गुह्यं काकुत्स्थ पश्यसि ॥ २६ ॥
न तत्राक्रमितुं नागाः शक्नुवन्ति [3]तमाश्रमम् ॥ विविधास्तत्र वै नागा वने तस्मिंश्च पर्वते ॥ २७ ॥
ऋषेस्तस्य मतङ्गस्य विधा[4]नात्तच्च काननम् ॥ [[5]मतङ्गवनमित्येव विश्रुतं रघुनन्दन] ॥ २८ ॥
तस्मिन्नन्दनसंकाशे देवारण्योपमे वने ॥ नानाविहगसंकीर्णे रंस्यसे राम निर्वृतः ॥ २९ ॥
[6]ऋश्यमूकश्च पम्पायाः पुरस्तात्पुष्पितद्रुमः ॥ सुदुःखारोह[7]णो नाम शिशुनागाभिरक्षितः ॥ ३० ॥
[[8]महात्मभिर्महायज्ञैः स्तोत्रमन्त्रैर्द्विजातिभिः ॥] उदारो ब्रह्मणा चैव पूर्वका[9]ले विनिर्मितः ॥ ३१ ॥
शयानः पुरुषो राम तस्य [10]शैलस्य मूर्धनि ॥ [11]यत्स्वप्ने लभते वित्तं तत्प्रबुद्धोऽधिगच्छति ॥ ३२ ॥
[12]न त्वेनं विषमाचारः पापकर्माऽधिरोहति ॥ ३३ ॥
[13]यस्तु तं विषमाचारः पापकर्माऽधिरोहति ॥ तत्रैव प्रहरन्त्येनं सुप्तमादाय राक्षसाः ॥ ३४ ॥
[14]तत्रापि शिशुनागानामाक्रन्दः श्रूयते महान् ॥ क्रीडतां राम पम्पायां [15]मतङ्गारण्यवासिनाम् ॥ ३५ ॥
सि[16]क्ता रुधिरधाराभिः सं[17]हृत्य परमद्विपाः ॥ प्रचरन्ति पृथक्कीर्णा मेघवर्णास्तरस्विनः ॥ ३६ ॥
ते तत्र पीत्वा पानीयं विमलं [18]शीतमव्ययम् ॥ [[19]अत्यन्तसुखसंस्पर्शं सर्वगन्धसमन्वितम्] ॥
निर्वृताः संविगाहन्ते वनानि वनगोचराः ॥ ३७ ॥

तत् शबर्यावासभूतं । गुह्यं इतरैरदर्शनीयं पश्यसि द्रक्ष्यसि ॥ २६ ॥ तस्मिन्वने वक्ष्यमाणे ऋश्यमूकपर्वते च । विविधाः नागाः गजाः सन्ति । तथापि तमाश्रमं तत्र प्रदेशे स्थिताः नागाः नाक्रमितुं शक्नुवन्ति ॥ २७ ॥ अनाक्रमणे हेतुमाह—ऋषेरिति । तस्य पूर्वोक्तस्य । विधानात् निर्माणात् । तत् काननं जातमिति शेषः ॥ २८ ॥ देवारण्यं चैत्ररथादि । निर्वृतः निवृत्तदुःख इत्यर्थः ॥ २९ ॥ एवमनुग्रहार्थं शबर्याश्रमंगत्वा पुनःपम्पायाःपुरस्तादृश्यमूकोगन्तव्यइत्याह सार्धश्लोकेन । ऋश्याः मृगविशेषाः मूकाः निःशब्दा भवन्ति यस्मिन् सः ऋश्यमूकः । सुदुःखमारोहणं यस्य स तथा । तत्र हेतुः—शिशुनागाभिरक्षितइति । अत्र नागाः गजा एव । "विविधास्तत्र वैनागाः" इतिपूर्वमुक्तत्वात् ॥ ३० ॥ उदारः प्रशस्तः । पूर्वकाले ब्रह्मणा उदारः प्रशस्तोनिर्मितः । कुत्रचिन्निमित्ते अयं प्रशस्तोभवत्वित्यनुगृहीतइत्यर्थः ॥ ३१ ॥ प्राशस्त्यमाह—शयानइति ॥ ३२—३३ ॥ अतिशयान्तरमाह—यस्त्विति ॥ ३४ ॥ शिशुनागानां कलभानां । तत्रापीत्यत्रापिशब्दात्पम्पादिकंसमुच्चीयते । अनेन ऋश्यमूकस्य पम्पासामीप्यमुक्तं ॥ ३५ ॥ संहृत्य अन्योन्यं प्रहृत्य । रुधिरधाराभिः सिक्ताः अतएव पृथक्कीर्णाश्चरन्ति ॥ ३६ ॥ संविगाहन्ते प्रविशन्ति

बृहदारण्यकभाष्योक्तेः मुक्तिमितिवा ॥ २५ ॥ स० नन्दनसंकाशे इन्द्रवनतुल्ये । देवारण्योपमे इतरदेवविहारस्थलसदृशे ॥ शि० नन्दनसंकाशे नन्दनेन फलपुष्पसंवृद्ध्या संकाशः अतिशोभायस्य तस्मिन् । देवारण्योपमे नन्दनचैत्ररथादिसदृशे ॥ २९ ॥ स० शिशुनागःकश्चनसर्पः । भागवतेद्वादशस्कन्धेकूर्मपुराणेचतथैवोक्तेः ॥ ३० ॥ ति० सुदुःखारोहणः अत्युच्चत्वात् । हेत्वन्तरमप्याह । शिशुभिर्नागैःसर्पैः अभिरक्षितः । उदारः दाता । ब्रह्मणापूर्वकाले सृष्टिकालेनिर्मितः विद्यौदार्यतपःप्राधान्येननिर्मितः ॥ ३१ ॥ ति० औदार्यमेवदर्शयति—शयानइति ॥ स० यः सः । स्वप्नस्तुसत्यएव तथापि तत्कालएवफलोपलंभइत्यतिशयइति महत्त्वमितिभावः ॥ ३२ ॥ ति० रुधिरधाराभिः ईषद्रक्तमदधाराभिः । सक्ताः संबद्धाः । संहत्य संभूय ॥ ३६ ॥

[पा०] १ ज. ततस्त्वंराम. ग. तस्यास्तद्राम. २ ग. मासाद्य. ३ ख. च. छ. ज. तदाश्रमं. ङ. झ. ञ. ट. तदाश्रमं. ४ क. प्रभावाच्च. ५ ख. घ. ङ. झ. ट. पाठेष्विदमर्धंदृश्यते. ६ क.—ट. ऋश्यमूकस्तु. ७ ङ. झ. ञ. ट. रोहणश्चैव. ८ इदमर्धं क. पाठेदृश्यते. ९ ङ. झ. ट. कालेऽभिनिर्मितः. १० घ. ङ. झ. ट. यःस्वप्ने. ११ इदमर्धं झ. ञ. ट. पाठेषुनदृश्यते. १२ ङ. झ. ञ. ट. यस्त्वेनं. १३ क. घ.—ट. ततोपि. १४ ङ. झ. ट. मतङ्गाश्रमवासिनां. १५ ङ. झ. ञ. ट. सक्तारुधिर. १६ ख.—ट. संहत्य. १७ ङ. झ. ट. चारुशोभनं. क. च. छ. ज. ञ. शीतलंसुखं. १८ इदमर्धं ङ. झ. ट. पाठेषुदृश्यते.

ऋक्षांश्च द्वीपिनश्चैव नीलकोमलकप्रभान् ॥ रुरूनपेतापजयान्दृष्ट्वा शोकं जहिष्यसि ॥ ३८ ॥
राम तस्य तु शैलस्य महती शोभते गुहा ॥ शिलापिधाना काकुत्स्थ दुःखं चास्याः प्रवेशनम् ॥३९॥
तस्या गुहायाः प्राग्द्वारे महान्शीतोदको ह्रदः ॥ फलमूलान्वितो रम्यो नानामृगसमावृतः ॥४०॥
तस्यां वसति सुग्रीवश्चतुर्भिः सह वानरैः ॥ कदाचिच्छिखरे तस्य पर्वतस्यावतिष्ठते ॥ ४१ ॥
कबन्धस्त्वनुशास्यैवं तावुभौ रामलक्ष्मणौ ॥ स्रग्वी भास्करवर्णाभः खे व्यरोचत वीर्यवान् ॥४२॥
तं तु खस्थं महाभागं कबन्धं रामलक्ष्मणौ ॥ प्रस्थितौ त्वं व्रजस्वेति वाक्यमूचतुरन्तिके ॥ ४३ ॥
गम्यतां कार्यसिद्ध्यर्थमिति तावब्रवीत्स च ॥ सुप्रीतौ तावनुज्ञाप्य कबन्धः प्रस्थितस्तदा ॥ ४४ ॥

स तत्कबन्धः प्रतिपद्य रूपं वृतः श्रिया भास्करतुल्यदेहः ॥
निदर्शयन्रामममवेक्ष्य खस्थः सख्यं कुरुष्वेति तदाऽभ्युवाच ॥ ४५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

॥ ३७ ॥ द्वीपिनः व्याघ्रान् । नीलकोमलकप्रभान् नीलरत्नवन्मनोज्ञप्रभान् । रुरून् मृगविशेषान् । अपेतापजयान् जयशीलानित्यर्थः । जहिष्यसि त्यक्ष्यसि ॥ ३८ ॥ शिला अपिधानमाच्छादनं यस्याः सा । अस्या गुहायाः प्रवेशनं दुःखं दुःखकरं । उन्नतस्थानस्थितत्वादिति भावः ॥ ३९ ॥ महान् विशालः । अस्तीतिशेषः । फलमूलान्वितः फलमूलान्विततीरः ॥४०॥ तस्यामिति । कदाचिद्भ्रमाविति सिद्धं ॥४१॥ अनुशास्य उपदिश्य । स्रगस्यास्तीति स्रग्वी । "अस्माद्यामेधास्रजोविनिः" इतिविनिप्रत्ययः । भास्करवर्णाभः सूर्यप्रभातुल्यप्रभः । खेव्यरोचत रामानुज्ञानार्थक्षणमतिष्ठदित्यर्थः ॥ ४२ ॥ प्रस्थितौ सन्तौ सुखं व्रजस्व व्रज । इति अन्तिके ऊचतुः अन्तिके प्रस्थितावित्ति कबन्धसमीपमागत्योचतुरित्यर्थः ॥ ४३ ॥ प्रस्थितः स्वर्गमिति शेषः ॥ ४४ ॥ उक्तमर्थं सर्गान्ते संगृह्णाति—स इति । तत् पूर्वोक्तं । रूपं शरीरं । रामं प्रति निदर्शयन् । सख्यं कुरुष्व सुग्रीवेणेति शेषः । अस्मिन्सर्गे पञ्चचत्वारिंशच्छ्लोकाः ॥ ४५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रिसप्ततितमः सर्गः ॥ ७३ ॥

ति० अपेतान् मनुष्यदृष्ट्यपलायितान् अजयान् प्राणिजयहीनान् । अनेनाकूरता ॥ ३८ ॥ **ती०** ऋश्यमूकस्यासाधारणचिह्नमाह—रामेति । शिलापिधानेति गुहानामेतिज्ञातव्यं । ति० शिलापिधानेति गुहानामेतितीर्थः । विशेषणमित्यन्ये ॥ ३९ ॥ ति० प्रस्थितौ आवां सुग्रीवसमीपंप्रस्थितौ । त्वंव्रजस्व पुण्यलोकमितिशेषः । अन्तिके वर्तमानं ॥ ४३ ॥ **स०** भास्करसर्वदेहः प्रकाशमानसमग्राङ्गः । भास्करः प्रकाशितः सर्वो भूभागादिर्येन सदेहोयस्यसइतिवा ॥ ति० निदर्शयन् मार्गादिकमितिशेषः । **ती०** सर्गश्रवणफलंस्कान्दे—'कबन्धरामसंवादं येशृण्वन्तिसदावरात् । विप्रावमानजनितस्ताप क्षिप्रंविनश्यति ।' इति ॥ ४५ ॥ इतित्रिसप्ततितमःसर्गः ॥ ७३ ॥

[पा०] १ घ. रुरून्गतभयांश्चैवदृष्ट्वाशोकंत्यजिष्यति. ङ. ञ. ट. रुरूनपेतानजयान्. २ ङ. ञ. ज. ट. प्रहास्यसि. ३ ख. महतः. ४ ग. शोभना. ५ च. छ. ज. तस्याःप्रवेशने. ६ ख. ग. तस्यांगुहायां. ७ ग. वृद्धायां. क. च. छ. ज. झ. प्रागभागे. ८ क. ख. घ.—ट. बहुमूलफलो. ९ च. छ. ज. ञ. नानानागसमावृतः. ङ. ञ. ट. नानानगसमाकुलः. घ. नानामृगसमाकुलः. क. नानामृगगणायुतः. ख. नानानगसमावृतः. १० ङ. ञ. ट. धर्मात्मासुग्रीवःसह. ११ घ. ङ. ञ. ज. ट. पर्वतस्यापितिष्ठति. ख. सुग्रीवःपरितिष्ठति. १२ क. महाबाहुं. १३ ङ. ञ. ट. तावुभौ. १४ च. छ. ज. प्रस्थितस्त्वं. क. प्रस्थितौतं. १५ क. ख. ग. च. छ. ज. रन्तिकात्. १६ ख. वज्रयीवसः. १७ ङ.—ट. भास्करसर्वदेहः. क. ख. भास्करवर्णदेहः. १८ ग. ज्ञाममुदारवीर्यसख्यं.

चतुःसप्ततितमः सर्गः ॥ ७४ ॥

रामलक्ष्मणाभ्यांकबन्धप्रदर्शितमार्गेणपंपापश्चिमतीरे शबर्याश्रमगमनं ॥ १ ॥ शबर्या चिरसंचितमधुरतरफलमूलादिनासादरंरामलक्ष्मणयोरर्चनं ॥ २ ॥ तथारामचोदनयावनप्रदेशेषुमतङ्गमहर्षेस्तच्छिष्याणांचतपःप्रभावव्यापकतत्तद्विशेषप्रदर्शनपूर्वकंश्रीरामानुज्ञयाहुताशनेदेहत्यागाद्दिव्यरूपपरिग्रहेणस्वाचार्यमहर्ष्यध्युषितदिव्यलोकगमनं ॥ ३ ॥

तौ कबन्धेन तं मार्गं पम्पाया दर्शितं वने ॥ प्रतस्थतुर्दिशं गृह्य प्रतीचीं नृवरात्मजौ ॥ १ ॥
तौ शैलेष्वाचितानेकान्क्षौद्रकल्पफलान्द्रुमान् ॥ वीक्षन्तौ जग्मतुर्द्रष्टुं सुग्रीवं रामलक्ष्मणौ ॥ २ ॥
कृत्वा च शैलपृष्ठे तु तौ वासं रामलक्ष्मणौ ॥ पम्पायाः पश्चिमं तीरं राघवावुपतस्थतुः ॥ ३ ॥
तौ पुष्करिण्याः पम्पायास्तीरमासाद्य पश्चिमम् ॥ अपश्यतां ततस्तत्र शबर्या रम्यमाश्रमम् ॥ ४ ॥
तौ तमाश्रममासाद्य द्रुमैर्बहुभिरावृतम् ॥ सुरम्यमभिवीक्षन्तौ शबरीमभ्युपेयतुः ॥ ५ ॥
तौ च दृष्ट्वा तदा सिद्धा समुत्थाय कृताञ्जलिः ॥ रामस्य पादौ जग्राह लक्ष्मणस्य च धीमतः ॥
पाद्यमाचमनीयं च सर्वं प्रादाद्यथाविधि ॥ ६ ॥
तामुवाच ततो रामः श्रमणीं शंसितव्रताम् ॥ ७ ॥
कच्चित्ते निर्जिता विघ्नाः कच्चित्ते वर्धते तपः ॥ कच्चित्ते नियतः क्रोध आहारश्च तपोधने ॥ ८ ॥
कच्चित्ते नियमाः प्राप्ताः कच्चित्ते मनसः सुखम् ॥ कच्चित्ते गुरुशुश्रूषा सफला चारुभाषिणि ॥ ९ ॥
रामेण तापसी पृष्टा सा सिद्धा सिद्धसंमता ॥ शशंस शबरी वृद्धा रामाय प्रत्युपस्थिता ॥ १० ॥
अद्य प्राप्ता तपःसिद्धिस्तव सन्दर्शनान्मया ॥ अद्य मे सफलं तप्तं गुरवश्च सुपूजिताः ॥ ११ ॥
अद्य मे सफलं जन्म स्वर्गश्चैव भविष्यति ॥ त्वयि देववरे राम पूजिते पुरुषर्षभ ॥ १२ ॥
चक्षुषा तव सौम्येन पूताऽस्मि रघुनन्दन ॥ गमिष्याम्यक्षयाँल्लोकांस्त्वत्प्रसादादरिन्दम ॥ १३ ॥

एवमेतावत्पर्यन्तं भगवत्कैङ्कर्यतत्फले दर्शिते । अथार्याभिमाननिष्ठा तत्फले दर्शयति चतुःसप्ततितमे । प्रतीचींदिशं गृह्य गृहीत्वा । कबन्धेन दर्शितं पम्पाया मार्गमुद्दिश्य प्रतस्थतुः प्रतस्थाते ॥ १ ॥ शैलेष्वाचिताम् प्ररूढान् अनेकांश्च क्षौद्रकल्पफलान् मधुतुल्यफलयुक्तान् । वीक्षन्तौ वीक्षमाणौ ॥ २ ॥ वासं तस्यांरात्र्यामिति शेषः । उपतस्थतुः उपतस्थाते प्रापतुरित्यर्थः । रात्र्यन्तइतिशेषः ॥ ३—४ ॥ आश्रममासाद्य तं अभिवीक्षन्तौ अभिवीक्षमाणौ ॥ ५ ॥ तौ चेति सार्धश्लोक एकान्वयः । सिद्धा सिद्धयोगा ॥ ६—७ ॥ विघ्नाः तपोविघ्नाः कामादयः । नियतः निगृहीतः । आहारश्चेत्यत्रापि नियत इत्यनुषज्यते । "तपो नानशनात्परं" इति श्रुतेः ॥ ८ ॥ नियमाः व्रतानि । मनसः सुखं मनःसन्तोषः । चारुभाषिणीति साध्वीसंबोधनप्रकारः । इति तामुवाचेति संबन्धः ॥ ९ ॥ रामाय प्रत्युपस्थितेति तादर्थ्ये चतुर्थी ॥ १० ॥ तपःसिद्धिः तपःपरिपाकः । तप्तं तपः ॥ ११ ॥ अद्येत्यस्यार्थं विवृणोति—त्वयीति । देववरे विष्णौ । अनेन शबर्याः परमार्थज्ञानंवृत्तमितिसूच्यते ॥ १२ ॥ एवमुपचारवादानुक्त्वा स्वप्रयोजनमाह—चक्षुषेति । तेन सौम्येन

[पा०] १ क.—ट. आतस्थतुः. २ क. ष्वाचितान्वृक्षान्. ३ ङ. झ. ट. न्क्षौद्रपुष्पफलद्रुमान्. क. न्क्षौद्रकल्पफलान्बहून्. ४ ख. ग. पश्यन्तौ. ५ क. घ. ङ. झ. कृत्वातु. ६ क. पृष्ठेषु. ग. पृष्ठेच. ७ क. ख. ङ.—ट. रघुनन्दनौ. ८ ग. देवंराघवौसमुपस्थितौ. क. ख. तीरमुपयातौचराघवौ. घ. तीरंराघवावुपजग्मतुः. ९ ग. पुष्करिण्यास्तु. १० ग. शबरीमाश्रमस्थितां. ११ घ. तदाश्रम. १२ क.—घ. तौतु. ङ. च. झ. ञ. ट. तौदृष्ट्वातु. १३ क. ङ. झ. ट. पादौजग्राहरामस्य. १४ च. ञ. माचमनीयंतु. १५ ङ. झ. ट. धर्मसंस्थितां. १६ ख. निर्जितःकोपः. क. ग.—ट. नियतःकोपः. १७ ङ. छ. ज. ञ. ट. प्रत्यवस्थिता. क. प्रयतास्थिता. १८ ख. ग. ङ.—ट. जन्म. १९ ख. ग. ङ.—ट. तप्तं. २० ख. स्वर्गश्चेह. २१ घ. ङ. झ. तवाहंचक्षुषासौम्यपूतासौम्येनमानद. क च. छ. ज. ञ. तवाहंचक्षुषारामपूतासौम्येनमानद. ग. तवाहंचक्षुषाराजन्पूतासौम्येनमानद. ख. त्वयाहंचक्षुषासौम्यपूतासौम्येनमानद.

चित्रकूटं त्वयि प्राप्ते विमानैरतुलप्रभैः ॥ इतस्ते दिवमारूढा यानहं पर्यचारिषम् ॥ १४ ॥
तैश्चाहमुक्ता धर्मज्ञैर्महाभागैर्महर्षिभिः ॥ आगमिष्यति ते रामः सुपुण्यमिममाश्रमम् ॥ १५ ॥
स ते प्रतिग्रहीतव्यः सौमित्रिसहितोऽतिथिः ॥ तं च दृष्ट्वा वराँल्लोकानक्षयांस्त्वं गमिष्यसि ॥१६॥
मया तु [3]विविधं वन्यं संचितं पुरुषर्षभ ॥ तवार्थे पुरुषव्याघ्र पम्पायास्तीरसंभवम् ॥ १७ ॥
एवमुक्तः स धर्मात्मा शबर्या शबरीमिदम् ॥ राघवः प्राह विज्ञाने तां नित्यमबहिष्कृताम् ॥१८॥
दनोः सकाशात्तत्त्वेन प्रभावं ते महात्मनः ॥ श्रुतं प्रत्यक्षमिच्छामि संद्रष्टुं यदि मन्यसे ॥ १९ ॥
एतत्तु वचनं श्रुत्वा रामवक्त्राद्विनिःसृतम् ॥ शबरी दर्शयामास तावुभौ तद्वनं महत् ॥ २० ॥
पश्य मेघघनप्रख्यं मृगपक्षिसमाकुलम् ॥ मतङ्गवनमित्येव विश्रुतं रघुनन्दन ॥ २१ ॥
इह ते भावितात्मानो गुरवो मे महाद्युते ॥ जुहवांचक्रिरे [8]तीर्थं मन्त्रवन्मन्त्रपूजितम् ॥ २२ ॥

चक्षुषा निर्हेतुककटाक्षेण पूतास्मि । अनेन पूर्वाघविनाश उक्तः । अरिन्दमेत्यनेन उत्तराघाश्लेष उच्यते । त्वत्प्रसादात् "धातुः प्रसादान्महिमानमात्मनः" इत्युक्तत्वादाचार्यप्रसादोपबृंहितात्त्वत्प्रसादात् । अक्षयान् लोकान् गमिष्यामि पुनरावृत्तिरहितं परमपदं प्राप्स्यामीत्यर्थः ॥ १३ ॥ तर्हि त्वदाचार्यैरेवसहकिमर्थं न गतासीत्यत्राह—चित्रकूटमिति । ते मतङ्गशिष्या मदाचार्याः ॥ १४ ॥ धर्मज्ञैः योगरूपभगवत्प्राप्त्युपायाभावेप्याचार्यप्रसादकृतभगवत्प्रसादात् सद्गतिमियं प्राप्स्यतीत्येतद्धर्मज्ञैः । महाभागैः भविष्यत्तद्वृत्तान्तज्ञानोचितभाग्यवद्भिः । सुपुण्यमित्यागमनार्हत्वमुच्यते । प्रतिग्रहीतव्यः आतिथ्यकरणेनसत्करणीयः । दृष्ट्वा तेन दर्शनेन निमित्तेन । अक्षयान् लोकान् गमिष्यसि वरानिति कैवल्यव्यावृत्तिः । गमिष्यसीति तैरहमुक्तेत्यन्वयः। अनेन आचार्यशुश्रूषणं भगवत्प्रसादद्वारा मोक्षहेतुरित्युक्तंभवति॥१५—१६॥ आचार्योक्तिश्रद्धामात्मनः सूचयति—मया त्विति । तीरसंभवं विविधं वन्यं संचितं।वन्यशब्देन फलमूलादिकमुच्यते। विविधमित्यनेन फलमूलादिभेद उच्यते । संचितमित्यनेन रामस्य चित्रकूटागमनात्प्रभृति संपादितत्वमादरेण गुप्तत्वं च तत्तत्फलजातीयमाधुर्यं परीक्ष्य स्थापितमिति संप्रदायः ॥१७॥ विज्ञानेविषये । अबहिष्कृतां अन्तरङ्गभूतां । जात्याहीनामप्याचार्यप्रसादलब्धब्रह्मज्ञानामितिभगवताप्यादरणीयत्वोक्तिः ॥ १८ ॥ दनोःसकाशात् दनुतइत्यर्थः । पञ्चम्यर्थे सकाशशब्दंप्रयुञ्जते । तत्त्वेन याथार्थ्येन । ते महात्मनः त्वत्संबन्धिनो महात्मनः मतङ्गस्येत्यर्थः । महात्मनामिति पाठे त्वदाचार्याणामित्यर्थः । श्रुतं प्रभावं प्रत्यक्षं संद्रष्टुमिच्छामि । यदि मन्यसे दर्शयितुमिति शेषः ॥ १९ ॥ विनिःसृतं निर्गतं ॥ २० ॥ मेघघनप्रख्यं घनमेघसदृशं । विश्रुतं वनमिति शेषः॥२१॥ भावितात्मानः चिन्तितात्मानः । ते प्रसिद्धाः । मे गुरवः । मन्त्रवन्मन्त्रपूजितं मन्त्रवतांमन्त्रैःपूजितं । तीर्थं गङ्गादिपुण्यसलिलं । इहप्रदेशे जुहवांचक्रिरे आहूत-

ति० एवमुक्ताऽहं यतः अतो मयात्वदर्थं वन्यंसम्यक्परीक्ष्य माधुर्ययुतं संचितमित्यर्थः । तदुक्तंपाद्मेशबरींप्रस्तुत्य—"प्रत्युद्गम्यप्रणम्याथ निवेश्यकुशविष्टरे । पादप्रक्षालनंकृत्वा तत्तोयंपापनाशनम् । शिरसाधार्यपीत्वाच वन्यैःपुष्पैरथार्चयत् । फलानि चसुपक्वानि मूलानिमधुराणिच । स्वयमास्वाद्यमाधुर्यं परीक्ष्यपरिभक्ष्यच । पश्चात्रिवेदयामास राघवाभ्यांदृढव्रता । फलान्यास्वाद्यकाकुत्स्थस्तस्यैमुक्तिंपरांददौ ॥" इति ॥ १७ ॥ स० विज्ञाने तद्विषये अबहिष्कृतां सर्वदाविज्ञानसंपन्नामितियावत् ॥ कतक० विज्ञानेब्रह्मविद्यायां मैत्रेय्यादिवदबहिष्कृतां तत्राप्यधिकारिणीमित्यर्थः ॥ ति० विशिष्टंज्ञानंयेषां तेषांसंबन्धोयस्यास्तत्संबोधनं हेविज्ञाने इतिसंबोध्य । तां नित्यमबहिष्कृतां भोजनादिव्यवहारादितिशेषः । तद्दत्तमाहाराद्यङ्गीकृत्येतिचशेषइत्यन्ये ॥ १८ ॥ ति० मेघोवर्षुकोयोघनस्तद्वन्नीलं । मिह सेचने । बाहुलकाद्धलं ॥ २१ ॥ ती० मन्त्रवतांमुनीनां मन्त्रैः पूजितं पालितं तीर्थंयज्ञं । 'तीर्थंमन्त्राद्युपाध्याययज्ञेष्वंभसिपावके' इतिरत्नाकरे। ति० मन्त्रपूजितं मन्त्रस्य गायत्र्याः जपेनपूजितं अतिशुद्धं । नीडं

[पा०] १ क. महात्मभिः. २ सतइतिश्लोकानन्तरं. मयात्वितिश्लोकात्पूर्वं. एवमुक्तामहाभागैस्तदाहंपुरुषर्षभ इत्यर्धं क. ङ.—ट. पाठेषुदृश्यते. ३ ङ.—ञ. संचितंवन्यंविविधं. ४ क. ख. ग. छ. ज. एवमुक्तस्तु. ५ ङ. च. झ. ट. महात्मनां. ६ घं. गणाकुलं. ७ क. ख. महामते. ८ क. ख. देहान्मन्त्रविन्मन्त्रपूजितान्. ग. झ. नीडं.

इयं प्रत्यक्स्थली वेदिर्यत्र ते मे सुसत्कृताः ॥ पुष्पोपहारं कुर्वन्ति श्रमादुद्वेपिभिः करैः ॥ २३ ॥
तेषां तपःप्रभावेन पश्याद्यापि रघूद्वह ॥ द्योतयन्ति दिशः सर्वाः श्रिया वेद्योतुलप्रभाः ॥ २४ ॥
अशक्नुवद्भिस्तैर्गन्तुमुपवासश्रमालसैः ॥ चिन्तितेऽभ्यागतान्पश्य सहितान्सप्त सागरान् ॥ २५ ॥
कृताभिषेकैस्तैर्न्यस्ता वल्कलाः पादपेष्विह ॥ अद्यापि नावशुष्यन्ति प्रदेशे रघुनन्दन ॥ २६ ॥
देवकार्याणि कुर्वद्भिर्यानीमानि कृतानि वै ॥ पुष्पैः कुवलयैः सार्धं म्लानत्वं नोपयान्ति वै ॥ २७ ॥
कृत्स्नं वनमिदं दृष्टं श्रोतव्यं च श्रुतं त्वया ॥ तदिच्छाम्यभ्यनुज्ञाता त्यक्तुमेतत्कलेवरम् ॥ २८ ॥
तेषामिच्छाम्यहं गन्तुं समीपं भावितात्मनाम् ॥ मुनीनामाश्रमो येषामहं च परिचारिणी ॥ २९ ॥
धर्मिष्ठं तु वचः श्रुत्वा राघवः सहलक्ष्मणः ॥ प्रहर्षमतुलं लेभे आश्चर्यमिति तत्त्वतः ॥ ३० ॥
तामुवाच ततो रामः श्रमणीं संशितव्रताम् ॥ अर्चितोऽहं त्वया भक्त्या गच्छ कामं यथासुखम् ॥ ३१ ॥

वन्तः । महाभुते इत्यनेन मुनिप्रभावश्रवणेसन्तोषवत्त्वंव्यज्यते ॥ २२ ॥ प्रत्यक्स्थली प्रत्यक्प्रदेशे स्थलीभूता । प्राक्प्रदेशेपश्चिमाभिमुखविष्णुस्थानत्वेन प्रत्यक्त्वनिर्देशेत्यर्थः । वेदिः देवपूजास्थानं । इयं अवलोक्यतामिति शेषः । यत्र वेद्यां । मे मया सुसत्कृतास्ते गुरवः श्रमात् वृद्धतानिबन्धनया पुष्पधारणाशक्त्या उद्वेपिभिः उत्कम्पिभिः । करैः पुष्पोपहारं पुष्पैरर्चनं कुर्वन्ति अकुर्वन् । अत्र वेदिरिति जात्येकवचनं उत्तरश्लोके बहुवचनप्रयोगात् बहूनां बहुवेदिसंभवाच्च ॥ २३ ॥ तेषां अस्मदाचार्याणां प्रभावेन अतुलप्रभाः इमाः वेद्यः । अद्यापि तेषामसन्निधानेपि । सर्वा दिशः द्योतयन्ति प्रकाशयन्ति । अनेन आचार्याभिमतो देशस्तदसन्निधानेप्युद्देश्य इत्युक्तं ॥ २४ ॥ पुनर्वैभवान्तरमाह—अशक्नुवद्भिरिति । उपवासश्रमेण अलसैः मन्दैः । अतएव सप्तसागरान् गन्तुमशक्नुवद्भिः मे गुरुभिः चिन्तिते चिन्तितमात्रे । अभ्यागतान् अभिमुखमागतान् । सप्तसागरान् पश्य ॥ २५ ॥ अद्भुतान्तरमाह—कृतेति । इह प्रदेशे सागरप्रदेशे । कृताभिषेकैः कृतस्नानैः । तैर्गुरुभिः पादपेषु न्यस्ताः आर्द्रवल्कलाः अद्यापिनावशुष्यन्ति नशुष्काभवन्ति । तदङ्गसम्पर्कवैभवादितिभावः ॥ २६ ॥ देवकार्याणि देवार्चनानि । कुर्वद्भिः तैः कुवलयैः सह पुष्पैः पुष्पास्तरैः । यानीमानि माल्यानिकृतानि तानि म्लानत्वं नोपयान्ति भक्त्यतिशयेनसमर्पितत्वादिति भावः । एतावता ग्रन्थसंदर्भेण "गुरुं प्रकाशयेद्धीमान्" इत्युक्तरीत्या आचार्यवैभवप्रकटनंकर्तव्यमितिसूचितं ॥ २७ ॥ उपसंहरति—कृत्स्नमिति । अभ्यनुज्ञाता त्वयेतिशेषः ॥ २८ ॥ त्यक्त्वाकिंकरिष्यसीत्यत्राह—तेषामिति । समीपं पादमूलं । गमिष्यामि । "यानहं पर्यचारिषं" इत्यन्यत्रोक्तेः । आश्रमः अयमिति शेषः । येषामाश्रमोऽयं येषामहं च परिचारिणी तेषां समीपं गन्तुमिच्छामीतिसंबन्धः ॥ २९ ॥ वचः आचार्यवैभवप्रदर्शनादिरूपं । तत्त्वतः मायां विना । आश्चर्यमिति मत्वा ॥ ३० ॥ अथ शबरीमनोरथंपूरयति—तामिति । संशितव्रतां आचार्यपरिचर्यानिष्ठामित्यर्थः । अर्चितः तव गुरुवृत्तिसंवर्धनेनैवेतिशेषः । भक्त्या वन्यसंपादनमात्रेण वा । अयमेवार्थःसंक्षेपे "शबर्या पूजितः सम्यक्" इत्युक्तः ।

देहपञ्जरं । तीर्थमितिपाठे सप्तवार्धिः । मन्त्रवत् तद्धोममन्त्रवत् । जुहवांचक्रिरे हुतवन्तः ॥ २३ ॥ ती० दृष्टं त्वया मयादर्शितं । श्रुतं त्वया मयाश्रावितं ॥ २८ ॥ शि० भावितात्मनां परिशीलितपरमात्मनां ॥ २९ ॥

[पा०] १ क. च. छ. ज. पुरुषर्षभाः. २ ख. ग. तेषामेवंप्रभावेन. ३ क.—ट. रघूत्तम. ४ क. ङ.—ट. द्योतयन्ती. ५ क. ङ—ट. वेद्यतुलप्रभा. ६ च. छ. ज. ञ. चिन्तितेनागतान्सप्तसहितान्पश्य. क. चिन्तितैरागतान्पश्य. ख. ग. चिन्तितेनागतान्पश्यसमेतान्सप्त. ७ ख. घ.—ट. नविशुष्यन्ति. क. नैवशुष्यन्ति. ८ क. घ. ञ. किसलयैः. ९ ख. ग. ङ. ञ. ट. म्लानत्वंनतुयान्तिवै. क. नरलानिसुपयान्तिच. १० क. कदावासंवनंदृष्टं. ११ ख. च. छ. ज. माश्रमे. १२ च. छ. ञ. धर्मिष्ठावचः. ग. धर्मिष्ठंतदुवः. १३ क. ञ. ट. मितिचाब्रवीत्. १४ क. ञ. ट. शबरीं १५ ख. घ.—ट. मद्रे. १६ ग. तपोधने.

इत्युक्ता जटिला वृद्धा चीरकृष्णाजिनाम्बरा ॥ तस्मिन्मुहूर्ते शबरी देहं जीर्णं जिहासती ॥ ३२ ॥
अनुज्ञाता तु रामेण हुत्वाऽऽत्मानं हुताशने ॥ ज्वलत्पावकसंकाशा स्वर्गमेव जगाम सा ॥ ३३ ॥
दिव्याभरणसंयुक्ता दिव्यमाल्यानुलेपना ॥ दिव्याम्बरधरा तत्र बभूव प्रियदर्शना ॥
विराजयन्ती तं देशं विद्युत्सौदामिनी यथा ॥ ३४ ॥
यत्र ते सुकृतात्मानो विहरन्ति महर्षयः ॥ तत्पुण्यं शबरीस्थानं जगामात्मसमाधिना ॥ ३५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे चतुःसप्ततितमः सर्गः ॥ ७४ ॥

पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

मतङ्गादिमहर्षिमहिमप्रशंसनपूर्वकं निर्वर्तितपुण्यतीर्थावगाहनाद्विकेनरामेण लक्ष्मणेनसहशबर्याश्रमाद्विर्गत्यपंपांप्रतिगमनं ॥ १ ॥

दिवं तु तस्यां यातायां शबर्यां स्वेन तेजसा ॥ लक्ष्मणेन सह भ्रात्रा चिन्तयामास राघवः ॥ १ ॥
स चिन्तयित्वा धर्मात्मा प्रभावं तं महात्मनाम् ॥ हितकारिणमेकाग्रं लक्ष्मणं राघवोऽब्रवीत् ॥२॥
दृष्टोऽयमाश्रमः सौम्य महाश्चर्यः कृतात्मनाम् ॥ विश्वस्तमृगशार्दूलो नानाविहगसेवितः ॥ ३ ॥
स्नातानां च समुद्राणामेषु तीर्थेषु लक्ष्मण ॥ उपस्पृष्टं च विधिवत्पितरश्चापि तर्पिताः ॥ ४ ॥
अनृष्टमशुभं तत्तत्कल्याणं समुपस्थितम् ॥ तेन तत्त्वेन दृष्टं मे मनो लक्ष्मण संप्रति ॥ ५ ॥

कामं काम्यमानंलोकं ॥ ३१ ॥ इतीति श्लोकद्वयमेकान्वयं । जिहासती हातुमिच्छन्ती । स्वर्गमेवेत्यवधानंद्योतयति ॥ ३२—३३ ॥ दिव्येतिसार्धश्लोकः । तत्र स्वर्गगमनारम्भे । विद्युत् विशेषेणद्योतमाना । सौदामिनी तटित् ॥ ३४ ॥ ते गुरवः सुकृतात्मानः सुकृतधैर्यवन्तः । आत्मसमाधिना आत्मविषययोगेन । एतत्सर्गवृत्तान्तेन मतङ्गशिष्योपदिष्टसमाधिकाशबरी गुर्वनुज्ञयारामागमनपर्यन्तंस्थित्वा ततोरामानुज्ञयास्वसमाधिबलेनस्वगुरुगतंस्वर्गविशेषंप्राप्तेत्यवगम्यते । स्त्रियाअपि विदुरादेरिवयोगाधिकारःसंभवति । तदक्षयब्रह्मादिकर्मस्थाने गुरुशुश्रूषा । स्वर्गश्च आदौअक्षयानित्युक्त्या पुनरावृत्तिरहितंपरमपदमित्यवगम्यते । "एवमेवामुत्रपुण्यचितोलोकःक्षीयते" इतिश्रुत्याकेवलस्वर्गस्यक्षयित्वावगमात् । अस्मिन्सर्गेसार्धपञ्चत्रिंशच्छ्लोकाः ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुःसप्ततितमः सर्गः ॥ ७४ ॥

अथ पम्पागमनंपञ्चसप्ततितमे । स्वेनतेजसा उपलक्षितायामितिशेषः ॥ १ ॥ एकाग्रं एकचित्तं ॥२॥ महाश्चर्यः अत्यद्भुतपुष्पफलादिसंपत्तिसकलतीर्थसमागमादिनाऽऽश्चर्ययुक्तः । विश्वस्ताः विश्वासंप्राप्ताः परस्परहिंसकत्वरहिताः मृगाः शार्दूलाश्चयस्मिंस्तथा ॥ ३ ॥ उपस्पृष्टं स्नातं । अनेन पुण्यतीर्थप्राप्तौ स्नानाद्धादिकंकर्तव्यमित्युक्तं ॥ ४ ॥ तत्तदशुभं अनृष्टं । कल्याणं शुभं । तेन अशुभनिवृत्तिपूर्वकशुभप्राप्त्या

तीo सर्गश्रवणफलंस्कान्दे—'शबर्यासत्कृतिश्रुत्वा साध्वीनांलोकगोभवेत्'इति ॥ ३५ ॥ इतिचतुस्सप्ततितमःसर्गः ॥ ७४ ॥
शिo चिन्तयामास मुनिप्रभावंप्रशंसयामासेत्यर्थः ॥ १ ॥

[पाo] १ ङ. झ. ट. इत्येवमुक्ताजटिला. २ क. ख. ग. जीर्णंदेहंविहायतत्. च. छ. ज. ञ. देहंजीर्णंविहायतत्. ३ ग. ङ. झ. ठ. जगामह. ४ विराजयन्तीत्येतदर्धान्तरं. क. ख. घ. च. छ. ज. ञ. पाठेषु. प्रणम्यशिरसारामंस्वर्गंताप्तुप्रभानना. इत्यर्धमधिकंदृश्यते. ५ क. घ. कर्मणा. ६ ङ.—ट. चिन्तयित्वातु. ७ ग.—ट. दृष्टोमयाऽऽश्रमः. ८ घ. महाश्चर्यो महात्मनां. ९ च. छ. ज. ञ. विहगशोभितः. १० ग. झ. समुद्राणामेषां. ११ ख. ग. घ. च. छ. ज. यत्तत्कल्याणं, क. ङ. झ. ञ. ठ. यत्नःकल्याणं. १२ क. ङ. च. छ. झ. ञ. ट. तेनत्वेतत्प्रहृष्टं, ख. तेनचापिप्रहृष्टं.

हृदये हि नरव्याघ्र शुभमाविर्भविष्यति ॥ ६ ॥
तदागच्छ वमिष्यावः पम्पां तां प्रियदर्शनाम् ॥ ऋश्यमूकोऽगिरिर्यत्र नातिदूरे प्रकाशते ॥ ७ ॥
यस्मिन्वसति धर्मात्मा सुग्रीवोंऽशुमतः सुतः ॥ नित्यं वालिभयोद्विग्नस्चतुर्भिः सह वानरैः ॥ ८ ॥
अभित्वरे च तं द्रष्टुं सुग्रीवं वानरर्षभम् ॥ तदधीनं हि मे सौम्य सीतायाः परिमार्गणम् ॥ ९ ॥
एवं ब्रुवाणं तं धीरं रामं सौमित्रिरब्रवीत् ॥ गच्छावस्त्वरितं तत्र ममापि त्वरते मनः ॥ १० ॥
आश्रमात्तु ततस्तस्मान्निष्क्रम्य स विशांपतिः ॥ आजगाम ततः पम्पां लक्ष्मणेन सहाभिभूः ॥११॥
स ददर्श ततः पुण्यामुदारजनसेविताम् ॥ नानाद्रुमलताकीर्णां पम्पां पानीयवाहिनीम् ॥ १२ ॥
पद्मैः सौगन्धिकैस्ताम्रां शुक्लां कुमुदमण्डलैः ॥ नीलां कुवलयोद्घातैर्बहुवर्णां कथामिव ॥ १३ ॥
स तामासाद्य वै रामो दूरादुदकवाहिनीम् ॥ मतङ्गसरसं नाम ह्रदं समवगाहत ॥ १४ ॥
अरविन्दोत्पलवतीं पद्मसौगन्धिकायुताम् ॥ पुष्पिताम्रवणोपेतां बर्हिणोद्घुष्टनादिताम् ॥ १५ ॥

॥ ५ ॥ हृदय इत्यर्धमेकं । शुभं शुभस्मरणं ॥ ६ ॥ तदित्यादिश्लोकद्वयं । अंशुमतः सूर्यस्य ॥ ७—८ ॥ मे सीताया इत्यन्वयः ॥ ९ ॥ धीरं कृतधैर्यमित्यर्थः ॥१०॥ ततः अनन्तरं । विशां प्रजानां पतिः । ततः तत्र मार्गे । अभिभवतीत्यभिभूः अभिभावक इत्यर्थः । शत्रूणामित्यर्थसिद्धं । प्रभुरित्यपिपाठः ॥ ११ ॥ सदृदर्शेतत:पुण्यामित्यादी द्वौ श्लोकौ । उदारजनाः श्रेष्ठजनाः मुनिप्रभृतयः । पानीयवाहिनीं पानार्हशीतलस्वादुजलवतीमित्यर्थः । सौगन्धिकैः कह्लारैः । कुवलयोद्घातैः कुवलयसमूहैः । कुथा चित्रकम्बलं ददर्श दूरादिति बोध्यं । अत्र इत्यनुवादात् ॥ १२—१३ ॥ उदकवाहिनीतां दूरादासाद्य मतङ्गसरसंनाम मतङ्गसरसमिति प्रसिद्धं । " अनोऽश्मायःसरसांजातिसंज्ञयोः" इति टच् समासान्तः । ह्रदं पम्पासमीपस्थं सरः । समवगाहत सस्नौ । पुण्यतीर्थत्वादिति भावः ॥१४॥ दूरतः पम्पादर्शनमनुवदंस्तत्तीरवनदर्शनमाह षड्भिः । अरविन्दं रक्ताब्जं । पद्मैः सितपद्मैः । आम्रवणं चूतवनं । बर्हिणोद्घुष्टं मयूरशब्दः तेन नादितां संजातनादां । तिलकैः क्षुरकवृक्षैः । बीजपूरैः दाडिमैः । भवैः धवाख्यैर्वृक्षविशेषैः । शुक्लद्रुमैः अर्जुनवृक्षैः । करवीरैः प्रसिद्धैः । पुन्नागैः तुङ्गवृक्षैः । मालतीति मालतीगुल्मैः कुन्दगुल्मैश्चेत्यन्वयः । भाण्डीरैः वटैः । निचुलैः वञ्जुलैः । सप्तपर्णैः विषमच्छदवृक्षैः । अतिमुक्तकैः नेमिवृक्षैः । भूषितां शोभितां । अतएव प्रमदामिव स्थितां । सर्वतः चतुर्दिक्प्रदेशेपि । कोयष्टिकैः टिट्टिभाख्यैःपक्षिविशेषैः । अर्जुनकैः पक्षिविशेषैः । शतपत्रैः दार्वाघाटैः । कीरकैः शुकैः । अव्यग्रौ सुसमाहितौ व्याकुलत्वरहितौ । प्रत्युत सावधानौ चेत्यर्थः । राघवौ अरविन्दोत्पलवतीमित्यादिविशेषितां । तिलकादिभिर्वृक्षैर्भूषितां अतएव प्रमदामिव स्थितां पम्पां सर्वतःसमीक्षमाणौ ततः पुष्पाढ्यं सर्वतो विपुलद्रुमं कोयष्टिकादिभिर्विहगैर्नादितं अन्यैःशकुनैश्चयुतं सरसः पम्पायाःसंबन्धि तद्वनंच पश्यन्तावेव सन्तौ अव्यग्रौ सुसमाहितौ च

स० वालिनोभयं आतयतिगमयतीति वालिभयात् अहं अभित्वरे ॥ ८—९ ॥ ति० पानीयवाहिनीं पानार्हातिमधुरसुशीतनिर्मलजलवाहिनीं । अनेन पंपा नदीतिलभ्यते । वाहिनीमित्यस्य भारिणीमित्यर्थोक्तः । मतङ्गसरसमित्यकारान्तः । तच्च पंपायामेवप्रदेशभेदो गङ्गायांमणिकर्णिकेव ॥ १४ ॥

[पा०] १ घ. हृदयेऽपि. च. छ. ज. ञ. लिखितंह्लिनरव्याघ्र. घ. ङ.ञ. ट. हृदयेमे. २ छ.ज. ञ. शुभमाह्नुभविष्यति. ३ ग. घ. गिरिर्यस्मा. ४ ख. छ. भयत्रस्तः. ५ ङ. ञ. ट. अहंत्वरे. ६ ङ. ञ. ट. मेकार्थं. ग. यत्सौम्य. ७ क. ख. घ.—ट. इति. ८ क. ङ. ञ. ट. तंवीरंसौमित्रिरिदमब्रवीत्. च. छ. ज. ञ. काकुत्स्थंसौमित्रिरिदमब्रवीत्. घ. तंरामंसौमित्रिरिदमब्रवीत्. ग. तंवीरंरामं. ९ ग. त्वरितं. १० ग. स्निग्धंच. ११ ख. ग. ङ. ज.—ट. सहप्रभुः. १२ सददर्शततःपुण्यामिति श्लोकमारभ्य आसर्गसमाप्तिविद्यमानेषुश्लोकेषुकेषांचित्पौर्वापर्यं. केषांचिदानुपूर्व्याभेदः. केषांचिच्यूनाधिकभावश्च. ञ. य. ट. पाठेषुदृश्यते. १३ ग. छ. ज. कुवलयैर्जातैः. १४ ङ. ञ. ट. दूरात्पानीयवाहिनीं. ख. आराद्रुदक.

तिलकैर्बीजपूरैश्च धवैः शुक्लद्रुमैस्तथा ॥ पुष्पितैः करवीरैश्च पुन्नागैश्च सुपुष्पितैः ॥ १६ ॥
मालतीकुन्दगुल्मैश्च भाण्डीरैर्निचुलैस्तथा ॥ अशोकैः सप्तपर्णैश्च केतकैरतिमुक्तकैः ॥ १७ ॥
अन्यैश्च विविधैर्वृक्षैः प्रमदामिव भूषिताम् ॥ समीक्षमाणौ पुष्पाढ्यं सर्वतो विपुलद्रुमम् ॥ १८ ॥
कोयष्टिकैश्चार्जुनकैः शतपत्रैश्च कीरकैः ॥ एतैश्चान्यैश्च विहगैर्नादितं तु वनं महत् ॥ १९ ॥
ततो जग्मतुरव्यग्रौ राघवौ सुसमाहितौ ॥ तद्वनं चैव सरसः पश्यन्तौ शकुनैर्युतम् ॥ २० ॥
स ददर्श ततः पम्पां शीतवारिनिधिं शुभाम् ॥ प्रहृष्टनानाशकुनां पादपैरुपशोभिताम् ॥
तिलकाशोकपुन्नागवकुलोद्दालकाश्विनीम् ॥ २१ ॥
स रामो विविधान्वृक्षान्सरांसि विविधानि च ॥ पश्यन्कामाभिसंतप्तो जगाम परमं ह्रदम् ॥ २२ ॥
पुष्पितोपवनोपेतां सालचम्पकशोभिताम् ॥ षट्पदौघसमाविष्टां श्रीमतीमतुलप्रभाम् ॥ २३ ॥
स्फटिकोपमतोयाढ्यां श्लक्ष्णवालुकसंततां ॥ स तां दृष्ट्वा पुनः पम्पां पद्मसौगन्धिकैर्युताम् ॥
इत्युवाच तदा वाक्यं लक्ष्मणं सत्यविक्रमः ॥ २४ ॥
अस्यास्तीरे तु पूर्वोक्तः पर्वतो धातुमण्डितः ॥ ऋश्यमूक इति ख्यातः पुण्यः पुष्पितपादपः ॥ २५ ॥
हरेरृक्षरजोनाम्नः पुत्रस्तस्य महात्मनः ॥ अध्यास्ते तं महावीर्यः सुग्रीव इति विश्रुतः ॥ २६ ॥
सुग्रीवमभिगच्छ त्वं वानरेन्द्रं नरर्षभ ॥ इत्युवाच पुनर्वाक्यं लक्ष्मणं सत्यविक्रमम् ॥ २७ ॥
राज्यभ्रष्टेन दीनेन तस्यामासक्तचेतसा ॥ कथं मया विना शक्यं सीता लक्ष्मण जीवितुम् ॥ २८ ॥
इत्येवमुक्त्वा मदनाभिपीडितः स लक्ष्मणं वाक्यमनन्यचेतसम् ॥
विवेश पम्पां नलिनीं मनोहरां रघूत्तमः शोकविषादयन्त्रितः ॥ २९ ॥

सन्तौ । तद्वनं जग्मतुरिति संबन्धः । अतो न वनशब्दद्वयदोषः ॥ १५—२० ॥ समीपतःपम्पादर्शनमाह—स ददर्शेति ॥ २१ ॥ अथ पम्पाप्राप्तिमाह—स राम इति । परमंह्रदं पम्याख्यं सरः ॥ २२ ॥ प्राप्यानन्तरं पम्पां दृष्ट्वा लक्ष्मणं प्रत्याह—पुष्पितेत्यादिसार्धश्लोकद्वयं । सालाः सर्जैकवृक्षाः । चम्पकाः चाम्पेयवृक्षाः ॥ २३—२४ ॥ पूर्वोक्तः कबन्धेनेति शेषः ॥ २५ ॥ हरेः वानरस्य । तस्य प्रसिद्धस्य । तं ऋश्यमूकं ॥ २६ ॥ अभिगच्छेत्यनन्तरमित्युक्त्वेति शेषः । इति वक्ष्यमाणप्रकारेण । सुग्रीवमभिगच्छेत्युक्त्वा लक्ष्मणंपुनरित्युवाचेत्यन्वयः ॥ २७ ॥ राज्यभ्रष्टेन अतएव दीनेन सर्वदैन्यपरिहारार्थं तस्यां सीतायां । आसक्तचेतसा मया सीतांविना कथंजीवितुं शक्यं ॥ २८ ॥ अनन्यचेतसं स्ववाक्यश्रवणेसावधानं । विवेश स्नानायेति शेषः । नलिनीं सरसीं । शोकः दुःखं विषादःतत्कृतःकार्यकरणापाटव-

---

शि० अनन्यचेतनः न अन्यस्मिन् सीतातिरिक्तवस्तुनि चेतनंचित्तं यस्यसः । रघूत्तमः सरामः ॥ २९ ॥

[पा०] १ ख. घ. च. छ. वरैः. २ क.—ङ. ञ. ट. समीक्षमाणः. ३ ख. पुष्पाढ्यांफलपुष्पसमाकुलां. ४ ङ. ञ. कोयष्टिभिश्चा. ५ ञ. कीचकैः. ख. घ. किंशुकैः. ६ क. ख. घ. च. ञ. विविधैः. ङ. ञ. ट. बहुभिः. ७ क. ख. घ.—ट. तद्वनं. ८ घ. छ. ज. ट. समाजग्मतुः. क. ञ. ञ. तत्रजग्मतुः. ९ ङ. ञ. ञ. राघवौहि. १० ख. वारिधरां. ११ क. ख. ञ. तोयांतां. १२ ख. ग. ञ. ट. पुनर्वाक्यं. १३ ख. च. छ. ज. ट. सत्यविक्रमं. १४ ख. तस्यास्तीरेतु. ग. अस्यास्तुतीरे. १५ क. ख. घ. ङ. चित्रपुष्पितकाननः. ङ. ञ. ट. चित्रपुष्पितपादपः. ग. सदापुष्पितपादपः. च. छ. ज. ञ. सदापुष्पितकाननः. १६ क. ख. हरिर्ऋक्ष. १७ ग. अभिगच्छावो. १८ घ. च.—ञ. इत्युक्त्वाच. १९ घ. हीनेन. २० क. ख. ग. ङ. ज.—ञ. सीतांशक्यं. २१ ङ. ञ. ञ. ट. अनन्यचेतनः. क. मदीनचेतसं. च. छ. ज. मदीनसत्वः. २२ क. घ. च. छ. ञ. ञ. ट. मनोरमां.

ततो महद्दूरं सुदूरसंक्रमः क्रमेण गत्वा प्रतिकूलधन्वनम् ॥
ददर्श पम्पां शुभदर्शकाननामनेकनानाविधपक्षिजालकाम् ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशत्सहस्रिकायां संहितायां आरण्यकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

श्रीमदारण्यकाण्डपठनश्रवणयोः फलं ब्रह्माण्डपुराणे सप्तचत्वारिंशदुत्तरशततमे अध्याये—
आरण्यकं तु यः काण्डमतिभक्तिसमन्वितः । पठेद्वा शृणुयाद्वापि सोमसायुज्यमाप्नुयात् ॥

इति आरण्यकाण्डः समाप्तः ॥ ३ ॥

रूपशरीरावसादः ताभ्यांयन्त्रितः नियमितः । तत्परवशइत्यर्थः ॥ २९ ॥ सर्गार्थसंगृह्णाति—तत इति । सुदूरं संक्रमः गमनं यस्य स तथा दूरादागत इत्यर्थः। प्रतिकूलधन्वनं पथिकजनप्रतिकूलभूतमरुकान्तारैकबन्धवनमित्यर्थः । क्रमेण अनेकविघ्नतितृक्षापूर्वकंगत्वा शुभः शोभनः दर्शः दर्शनंयस्य तादृशं काननं यस्यास्तां । अनेके नानाजातीयाः बहवो वा नानाविधाः नानासंस्थानाःपक्षिणः शुकशारिकाकोकिलप्रभृतयः तेषांजालकानि समूहाः यस्यां तां । यद्वा अनेकानि नानाविधपक्षिजालकानि यस्यां तां । काननद्वारापक्षिजालवत्त्वं । तादृशीं पम्पां ददर्श । अस्मिन्सर्गे त्रिंशच्छ्लोकाः । न्यूनातिरेकसद्भावस्तु कोशेषु बहुधा दृश्यते ॥३०॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

इत्थं कौशिकदिव्यवंशकलशीवाराशिराकाशशी पादाम्भोजमरन्दभोगरसिकः श्रीमच्छठारेर्गुरोः ॥
आलोक्याखिलदेशिकोत्तमकृतव्याख्यानशैलीश्चिरं व्याचख्यौ तदरण्यकाण्डमखिलं गोविन्दराजाभिधः १

ती० फलश्रुतिस्स्कान्दे "आरण्यकाण्डमाहात्म्यं ये शृण्वन्ति महीतले । श्रीरामस्यप्रसादेन विष्णुलोकंव्रजन्तिते ॥" इति ॥ ३० ॥ इतिपञ्चसप्ततितमःसर्गः ॥ ७५ ॥

[पा०] १ क. ख. घ. छ. द्रुतमेवदूरसंक्रमं. २ ख.—ङ. झ. ञ. ट. प्रविलोकयन्वनं. क. च. छ. सविलोकयन्वनं. ३ क. नानामृग. ४ क. —ङ. संकुलां.

इदं आरण्यकाण्डम् कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागरमुद्रायन्त्रे मुद्रापितम् । शकाब्दाः १८३४ सन १९१२.

SV I

Cat
17/2/76

Central Archaeological Library,
NEW DELHI.
9045
Call No. Sa 8 Kr/Val/K.V.
Author— Krishnacharya, T.R.
Vyasacharya, T.R.
Title— Srimad Valmiki

"A book that is shut is but a block"

CENTRAL ARCHAEOLOGICAL LIBRARY
GOVT. OF INDIA
Department of Archaeology
NEW DELHI.

Please help us to keep the book clean and moving.